# Table of Contents for the 18 Smṛitis


| | | |
|---|---|---|
| 1. | Āṅgirasa Smṛiti | 2 |
| 2. | Vyāsa Smṛiti | 8 |
| 3. | Āpastamba Smṛiti | 28 |
| 4. | Dakṣha Smṛiti | 45 |
| 5. | Viṣhṇu Smṛiti | 63 |
| 6. | Yāgyavalkya Smṛiti | 73 |
| 7. | Likhita Smṛiti | 155 |
| 8. | Samvartta Smṛiti | 163 |
| 9. | Śhaṅka Smṛiti | 181 |
| 10. | Bṛihaspati Smṛiti | 213 |
| 11. | Atri Smṛiti | 220 |
| 12. | Kātyāyana Smṛiti | 233 |
| 13. | Parāśhara Smṛiti | 276 |
| 14. | Manu Smṛiti | 323 |
| 15. | Auśhanasa Smṛiti | 531 |
| 16. | Hārīta Smṛiti | 536 |
| 17. | Gautama Smṛiti | 737 |
| 18. | Yama Smṛiti | 764 |

# आङ्गिरसस्मृतिः

श्रीगणेशाय नमः

अथादौ प्रायश्चित्तविधानवर्णनम्

गृहाश्रमेषु धर्मेषु वर्णानामनुपूर्वशः
प्रायश्चित्त विधिं दृष्ट्वा अङ्गिरामुनिरब्रवीत् १
अन्त्यानामपि सिद्धान्नं भक्षयित्वा द्विजातयः
चान्द्रं कृच्छ्रं तदर्द्धन्तु ब्रह्मक्षत्र विशां विदुः २
रजकश्चर्मकारश्च नटोवुरुड एव च
कैवर्त्तभेदभिल्लाश्च सप्तैते चान्त्यजाः स्मृताः ३
अन्त्यजानां गृहे तोयं भाण्डे पर्य्युषितञ्च यत्
प्रायश्चित्तं यदा पीतं तदैव हि समाचरेत् ४
चाण्डालकूपभाण्डेषु त्वज्ञानात्पिवते यदि
प्रायश्चित्तं कथं तेषां वर्णे वर्णे विधीयते ५
चरेत् सान्तपनं विप्रः प्राजापत्यन्तु भूमिपः
तदर्द्धन्तु चरेद्वैश्यः पादं शूद्रेषु दापयेत् ६
अज्ञानात् पिवते तोयं ब्राह्मणस्त्वन्त्यजातिषु
अहोरात्रोषितोभूत्वा पञ्चगव्येन शुध्यति ७
विप्रो विप्रेण संस्पृष्ट उच्छिष्टेन कदाचन
आचान्त एव शुध्येत अङ्गिरामुनिरब्रवीत् ८
क्षत्रियेण यदा स्पृष्ट उच्छिष्टेन कदाचन
स्नानं जप्यन्तु कुर्वीत दिनस्यार्द्धेन शुध्यति ९
वैश्येन तु यदा स्पृष्टः शुना शूद्रेण वा द्विजः
उपोष्य रजनीमेकां पञ्चगव्येन शुध्यति १०
अनुच्छिष्टेन संस्पृष्टौ स्नानं येन विधीयते
तेनैवोच्छिष्टसंस्पृष्टः प्राजापत्यं समाचरेत् ११
अत ऊर्द्ध्वं प्रवक्ष्यामि नीली वस्त्रस्य वै विधिम्

स्त्रीणां क्रीडार्थसंयोगे शयनीये न दुष्यति १२
पालने विक्रये चैव तद्वृत्तेरूपजीवने
पतितस्तु भवेद्विप्रस्त्रिभिः कृच्छ्रैर्व्यपोहति १३
स्नानं दानं जपो होमः स्वाध्यायः पितृतर्पणम्
वृथा तस्य महायज्ञा नीलीवस्त्रस्य धारणात् १४
नीलीरक्तं यदा वस्त्रमज्ञानेन तु धारयेत्
अहोरात्रोषितोभूत्वा पञ्चगव्येन शुध्यति १५
नीलीदारु यदा भिन्द्याद्ब्राह्मणं वै प्रमादतः
शोणितं दृश्यते यत्र द्विजश्चान्द्रायणञ्चरेत् १६
नीलीवृक्षेण पक्वन्तु अन्नमश्नाति चेद्द्विजः
आहार वमनं कृत्वा पञ्चगव्येन शुध्यति १७
भक्षन् प्रमादतोनीलीं द्विजातिस्त्व समाहितः
त्रिषु वर्णेषु सामान्यं चान्द्रायणमिति स्थितम् १८
नीलौरक्तेन वस्त्रेण यदन्नमुपनीयते
नोपतिष्ठति दातारं भोक्ता भुङ्क्ते तु किल्विषम् १९
नीलीरक्तेन वस्त्रेण यत्पाके श्रपितं भवेत्
तेन भुक्तेन विप्राणां दिनमेकमजोजनम् २०
मृते भर्त्तरि या नारी नीलीवस्त्रं प्रधारयेत्
भर्त्ता तु नरकं याति सा नारी तदनन्तरम् २१
नील्या चोपहते क्षेत्रे शस्यं यत्तु प्ररोहति
अभोज्यं तद्द्विजातीनां भुक्त्वा चान्द्रायणं चरेत् २२
देवद्रोण्यां वृषोत्सर्गे यज्ञे दाने तथैव च
अत्र स्नानं न कर्त्तव्यं दूषिता च वसुन्धरा २३
वापिता यत्र नीली स्यात्तावद्भूम्य शुचिर्भवेत्
यावद्द्वादशवर्षाणि अतऊर्द्ध्वं शुचिर्भवेत् २४
भोजने चैव पाने च तथा चौषधभेषजैः

एवं म्रियन्ते या गावः पादमेकं समाचरेत्  २५
घराटाभरणदोषेण यत्र गौर्विनिपीड्यते
चरेदर्द्धं व्रतं तेषां भूषणार्थं हि तत् कृतम्  २६
दमने दामने रोधे अवघाते च वैकृते
गवा प्रभवता घातैः पादोनं व्रतमाचरेत्  २७
अङ्गुष्ठपर्वमात्रस्तु बाहुमात्रः प्रमाणतः
सपल्लवश्च साग्रश्च दराडइत्यभिधीयते  २८
दराडादुक्ताद्यदान्येन पुरुषाः प्रहरन्ति गाम्
द्विगुणं गोब्रतं तेषां प्रायश्चित्तं विशोधनम्  २९
शृङ्गभङ्गे त्वस्थिभङ्गे चर्मनिर्म्मोचने तथा
दशरात्रं चरेत् कृच्छ्रं यावत्स्वस्थोभवेत्तदा  ३०
गोमूत्रेण तु संमिश्रं यावकञ्चोपजायते
एतदेव हितं कृच्छ्रमिदमाङ्गिरसं मतम्  ३१
असमर्थस्य वालस्य पिता वा यदि वा गुरुः
यमुद्दिश्य चरेद्धर्मं पापं तस्य न विद्यते  ३२
अशीतिर्यस्य वर्षाणि वालोवाप्यूनषोडशः
प्रायश्चित्तार्द्धमर्हन्ति स्त्रियो रोगिण एव च  ३३
मूर्च्छिते पतिते चापि गवि यष्टिप्रहारिते
गायत्र्यष्टसहस्रन्तु प्रायश्चित्तं विशोधनम्  ३४
स्नात्वा रजस्वला चैव चतुर्थेऽह्नि विशुध्यति
कुर्याद्रजसि निवृत्तेऽनिवृत्ते न कथञ्चन  ३५
रोगेण यद्रजः स्त्रीणामत्यर्थं हि प्रवर्त्तते
अशुच्यन्ता न तेन स्युस्तासां वैकारिकं हि तत्  ३६
साध्वाचारा न तावत्स्याद्रजो यावत्प्रवर्त्तते
वृत्ते रजसि गम्या स्त्री गृहकर्मणि चैन्द्रिये  ३७
प्रथमेऽहनि चाराडाली द्वितीये ब्रह्मघातिनी

तृतीये रजकी प्रोक्ता चतुर्थेऽहनि शुध्यति ३८
रजस्वला यदा स्पृष्टा शुना शूद्रेण चैव हि
उपोष्य रजनीमेकां पञ्चगव्येन शुध्यति ३९
द्वावेतावशुची स्यातां दम्पती शयनङ्गतौ
शयनादुत्थिता नारी शुचिः स्यादशुचिः पुमान् ४०
गण्डूषं पादशौचञ्च न कुर्य्यात् कांस्यभाजने
भस्मना शुध्यते कांस्यं ताम्रमम्लेन शुध्यति ४१
रजसा शुध्यते नारी नदी वेगेन शुध्यति
भूमौ निःक्षिप्य षण्मासमत्यन्तोपहतं शुचि ४२
गवाघ्रातानि कांस्यानि शूद्रोच्छिष्टानि यानि तु
भस्मना दशभिः शुद्ध्येत् काकेनोपहते तथा ४३
शौचं सौवर्णरूप्याणां वायुनार्केन्दुरश्मिभिः ४४
रेतःस्पृष्टं शवस्पृष्टमाविकञ्च न दुष्यति
अद्भिर्मृदा च तन्मात्रं प्रक्षाल्य च विशुध्यति ४५
शुष्कमन्नमविप्रस्य भुक्त्वा सप्ताहमृच्छति
अन्नं व्यञ्जनसंयुक्तमर्द्धमासेन जीर्य्यति ४६
पयोदधि च मासेन षण्मासेन घृतं तथा
तैलं सवत्सरेणैव कोष्ठे जीर्य्यति वा नवा ४७
यो भुङ्क्ते हि च शूद्रान्नं मासमेकं निरन्तरम्
इह जन्मनि शूद्रत्वं मृतः श्वा चाभिजायते ४८
शूद्रान्नं शूद्रसस्पर्कः शूद्रेण च सहासनम्
शूद्राज्ज्ञानगमः कश्चिज्ज्वलन्तमपि पातयेत् ४९
अप्रणामे तु शूद्रेऽपि स्वस्ति यो वदति द्विजः
शूद्रोऽपि नरकं याति ब्राह्मणोऽपि तथैव च ५०
दशाहाच्छुध्यते विप्रो द्वादशाहेन भूमिपः
पाक्षिकं वैश्य एवाह शूद्रोमासेन शुध्यति ५१

अग्निहोत्री च यो विप्रः शूद्रान्नं चैव भोजयेत्
पञ्च तस्य प्रणश्यन्ति आत्मा वेदास्त्रयोऽग्नयः ५२
शूद्रान्नेन तु भुक्तेन यो द्विजो जनयेत्सुतान्
यस्यान्नं तस्य ते पुत्रा अन्नाच्छुक्रं प्रवर्त्तते ५३
शूद्रेण स्पृष्टमुच्छिष्टं प्रमादादथ पाणिना
तद्द्विजेभ्यो न दातव्यमापस्तम्बोऽब्रवीन्मुनिः ५४
ब्राह्मणस्य सदा भुङ्क्ते क्षत्रियस्य च पर्वसु
वैश्येष्वापत्सु भुञ्जीत न शूद्रेऽपि कदाचन ५५
ब्राह्मणान्ने दरिद्रत्वं क्षत्रियान्ने पशुस्तथा
वैश्यान्नेन तु शूद्रत्वं शूद्रान्ने नरकं ध्रुवम् ५६
अमृतं ब्राह्मणस्यान्नं क्षत्रियान्नं पयः स्मृतम्
वैश्यस्य चान्नमेवान्नं शूद्रान्नं रुधिरं ध्रुवम् ५७
दुष्कृतं हि मनुष्याणामन्नमाश्नित्य तिष्ठति
यो यस्यान्नं समश्नाति स तस्याश्नाति किल्विषम् ५८
सूतकेषु यदा विप्रो ब्रह्मचारी जितेन्द्रियः
पिवेत् पानीयमज्ञानाद्भुङ्क्ते अन्नं भक्तमथापिवा ५९
उत्तार्य्याचम्य उदकमवतीर्य्य उपस्पृशेत्
एवं हि समुदाचारो वरुणेनाभिमन्त्रितः ६०
अग्न्यागारे गवां गोष्ठे देवब्राह्मण सन्निधौ
आहारे जपकाले च पादुकानां विसर्जनम् ६१
पादुकासनमारूढोगेहात्पञ्चगृहं ब्रजेत्
छेदयेत्तस्य पादौ तु धार्मिकः पृथिवीपतिः ६२
अग्निहोत्री तपस्वी च श्रोत्रियो वेदपारगः
एते वै पादुकैर्य्यान्ति शेषान्दण्डेन ताडयेत् ६३
जन्मप्रभृतिसंस्कारे चूडान्ते भोजनं नवम्
असपिण्डेन भोक्तव्यं चूडस्यान्ते विशेषतः ६४

याचकान्नं नवश्राद्धमपि सूतकभोजनम्
नारीप्रथमगर्भेषु भुक्त्वा चान्द्रायणं चरेत् ६५
अन्यदत्ता तु या कन्या पुनरन्यस्य दीयते
तस्याश्चान्नं न भोक्तव्यं पुनर्भूःसा प्रगीयते ६६
पूर्वश्च स्रावितोयश्च गर्भोयश्चाप्यसंस्कृतः
द्वितीये गर्भसंस्कारस्तेन शुद्धिर्विधीयते ६७
राजाद्यैर्द्दशभिर्मासैर्यावत्तिष्ठति गुर्विणी
तावद्रक्षा विधातव्या पुनरन्योविधीयते ६८
भर्तृशासनमुल्लङ्घ्य या च स्त्री विप्रवर्त्तते
तस्याश्चैव न भोक्तव्यं विज्ञेया कामचारिणी ६९
अनपत्या तु या नारी नाश्नीयात्तद्गृहेऽपि वै
अथ भुङ्क्ते तु यो मोहात्पूयसं नरकं व्रजेत् ७०
स्त्रियाधनन्तु ये मोहादुपजीवन्ति बान्धवाः
स्त्रिया यानानि वासांसि ते पापा यान्त्यधोगतिम् ७१
राजान्नं हरते तेजः शूद्रान्नं ब्रह्मवर्च्चसम्
सूतकेषु च यो भुङ्क्ते स भुङ्क्ते पृथिवी मलम् ७२

इत्यङ्गिरसा महर्षिणा प्रणीतं धर्मशास्त्रं समाप्तम्
समाप्ताचेयं अाङ्गिरसस्मृतिः

Reference:
*Smṛti Sandarbha*, Vol. I, (Delhi: Nag, 1981), pp. 591ff.

# अथ वेदव्यासस्मृतिः

## श्रीगणेशाय नमः

## प्रथमोऽध्यायः

### अथ धर्माचरणादेशप्रयुक्तवर्णषोडशसंस्कारवर्णनम्

वाराणस्यां सुखासीनं वेदव्यासं तपोनिधिम्
पप्रच्छुर्मुनयोऽभ्येत्य धर्मान् वर्णव्यवस्थितान्  १
स पृष्टः स्मृतिमान् स्मृत्वा स्मृतिं वेदार्थगर्भिताम्
उवाचाथ प्रसन्नात्मा मुनयः श्रूयतामिति  २
यत्र यत्र स्वभावेन कृष्णसारो मृगः सदा
चरते तत्र वेदोक्तो धर्मो भवितु मर्हति  ३
शुरिस्मृतिपुराणानां विरोधो यत्र दृश्यते
तत्र श्रौतं प्रमाणन्तु तयोर्द्वैधे स्मृतिर्वरा  ४
ब्राह्मणःक्षत्रियोवैश्यस्त्रयो वर्णा द्विजातयः
श्रुतिस्मृतिपुराणोक्तधर्मयोग्यास्तु नेतरे  ५
शूद्रोवर्णश्चतुर्थोऽपि वर्णत्वाद्धर्ममर्हति
वेदमन्त्रस्वधास्वाहावषट्कारादिभिर्विना  ६
विप्रवद्विप्रविन्नासु क्षत्रविन्नासु विप्रवत्
जातकर्माणि कुर्वीत ततः शूद्रासु शूद्रवत्  ७
वैश्यासु विप्रक्षत्राभ्यां ततः शूद्रासु शूद्रवत्
अधमादुत्तमायान्तु जातः शूद्राधमः स्मृतः  ८
ब्राह्मण्यां शूद्रजनितश्चाण्डालो धर्मवर्जितः
कुमारीसम्भवस्त्वेकः सगोत्रायां द्वितीयकः  ९
ब्राह्मण्यां शूद्रजनितश्चाण्डालस्त्रिविधः स्मृतः
वर्द्धकी नापितो गोप आशापः कुम्भकारकः  १०
वणिक्किरातकायस्थमालाकारकुटुम्बिनः
एते चान्ये च वहवः शूद्रा भिन्नः स्वकर्मभिः

चर्मकारो भटो भिल्लो रजकः पुष्करो नटः
वरटोमेदचरडालदासस्वपचकोलकाः ११
एतेऽन्त्यजाः समाख्याता ये चान्ये च गवाशनाः
एषां सम्भाषणात् स्नानं दर्शनादर्कवीक्षणम् १२
गर्भाधानं पुंसवनं सीमन्तो जातकर्म च
नामक्रिया निष्क्रमणेऽन्नाशनं वपनक्रिया १३
कर्णवेधो व्रतादेशो वेदारम्भक्रियाविधिः
केशान्तः स्नानमुद्वाहो विवाहाग्निपरिग्रहः १४
त्रेताग्निसंग्रहश्चेति संस्काराः षोडश स्मृताः
नवताः कर्णवेधान्ता मन्त्रवर्जं क्रियाः स्त्रियाः १५
विवाहो मन्त्रतस्तस्याः शूद्रस्यामन्त्रतो दश
गर्भाधानं प्रथमतस्तृतीये मासि पुंसवः १६
सीमन्तश्चाष्टमे मासि जाते जातक्रिया भवेत्
एकादशेऽह्नि नामार्कस्येक्षा मासि चतुर्थके १७
षाष्ठे मास्यान्नमश्नीयाच्चूडाकर्म कुलोचितम्
कृतचूडे च बाले च कर्नबेधो विधीयते १८
विप्रो गर्भाष्टमे वर्षे क्षत्त्रमेकादशे तथा
द्वादशे वैश्यजातिस्तु व्रतोपनयनक्रिया १९
तस्य प्राप्तव्रतस्यायं कालः स्यात् द्विगुणाधिकः
वेदव्रतच्युतो व्रात्यः स व्रात्यस्तोममर्हति २०
द्वे जन्मनी द्विजातीनां मातुः स्यात् प्रथमं तयोः
द्वितीयं छन्दसां मातुर्ग्रहणाद्विधिवद्गुरोः २१
एवं द्विजातिमापन्नो विमुक्तो वाल्यदोषतः
श्रुतिस्मृतिपुराणानां भवेदध्ययनक्षमः २२
उपनीतो गुरुकुले वसेन्नित्यं समाहितः
विभृयाद्दण्डकौपीनोपवीताजिनमेखलाः २३

पुरायेऽह्नि गुर्वनुज्ञातः कृतमन्त्राहुतिक्रियः
स्मृत्वोङ्कारञ्च गायत्रीमारभेद्वेदमादितः २४
शौचाचारविचारार्थं धर्मशास्त्रमपि द्विजः
पठेत गुरुतः सम्यक् कर्म तद्दिष्टमाचरेत् २५
ततोऽभिवाद्य स्थविरान् गुरुञ्चैव समाश्रयेत्
स्पाध्यायार्थं तदा यत्नः सर्वदा हितमाचरेत् २६
नापद्विप्तोऽपि भाषेत नोव्रजेत्ताडितोऽपि वा
विद्वेषमथ पैशुन्यं हिंसनञ्चार्कवीक्षणम् २७
तौर्यत्रिकानृतोन्मादपरिवादानलङ्क्रियाम्
अञ्जनोद्वर्त्तनादर्शस्त्रग्विलेपनयोषितः २८
वृथाटनमसन्तोषं ब्रह्मचारी विवर्जयेत्
ईषच्चलितमध्याह्नेऽनुज्ञातो गुरुणा स्वयम् २९
आलोलुपश्चरेद्भैक्षं व्रतिषूत्तमवृत्तिषु
सद्यो भिक्षान्नमादाय वित्तवत्तदुपस्पृशेत् ३०
कृतमाध्याह्निकोऽश्नीयादनुज्ञातो यथाविधि
नाद्यादेकान्नमुच्छिष्टं भुक्त्वा चाचामितामियात् ३१
नान्यद्भिक्षितमादद्यादापन्नो द्रविणादिकम्
अनिन्द्यामन्त्रितः श्राद्धे पैत्र्येऽदद्याद्गुरुचोदितः ३२
एकान्न मप्यविरोधे व्रतानां प्रथमाश्रमी
भुक्त्वा गुरुमुपासीत कृत्वा सन्धुक्षणादिकम् ३३
समिधोऽग्नावादधीत ततः परिचरेद्गुरुम्
अधीतगुर्वनुज्ञातः प्रह्वश्च प्रथमं गुरोः ३४
एवमन्वहमभ्यासी ब्रह्मचारी व्रतञ्चरेत्
हितोपवादः प्रियवाक् सम्यग्गुर्वर्थसाधकः ३५
नित्यमाराधयेदेनमा समाप्तेः श्रुतिग्रहात्
अनेन विधिनाऽधीतो वेदमन्त्रो द्विजं नयेत् ३६

शापानुग्रहसामर्थ्यमृषीणाञ्च सलोकताम्
पयोऽमृताभ्यां मधुभिः साज्यैः प्रीणन्ति देवताः ३७
तस्मादहरहर्वेदमनध्यायमृते पठेत्
यदङ्गं तदनध्याये गुरोर्वचनमाचरेत् ३८
व्यतिक्रमादसम्पूर्णमनहंकृतिराचरेत्
परत्रेह च तद्ब्रह्म अनधीतमपि द्विजम्
यस्तूपनयनादेतदामृत्योर्व्रतमाचरेत् ३९
स नैष्ठिको ब्रह्मचारी ब्रह्मसायुज्यमाप्नुयात्
उपकुर्वाणकोयस्तु द्विजः षड्विंशवार्षिकः ४०
केशान्तकर्मणा तत्र यथोक्तचरितव्रतः
समाप्य वेदान् वेदौ वा वेदं वा प्रसभं द्विजः ४१
स्नायीत गुर्वनुज्ञातः प्रवृत्तोदितदक्षिणः
इति श्रीवेदव्यासीये धर्मशास्त्रे ब्रह्मचर्याधिकारो नाम प्रथमोऽध्यायः

## द्वितीयोऽध्यायः

## अथ विवाहविधिवर्णनम्

एवं स्नातकतां प्राप्तो द्वितीयाश्रमकाङ्क्षया
प्रतीक्षेत विवाहार्थमनिन्द्यान्वयसम्भवाम् १
अरोगादुष्टवंशोत्थामशुल्कादानदूषिताम्
सवर्णामसमानार्षाममातृपितृगोत्रजाम् २
अनन्यपूर्विकां लघ्वीं शुभलक्षणसंयुताम्
धृताधोवसनां गौरीं विख्यातदशपूरुषाम् ३
ख्यातनाम्नः पुत्रवतः सदाचारवतः सतः
दातुमिच्छोर्दुहितरं प्राप्य धर्मेण चोद्वहेत् ४
ब्राह्मोद्वाहविधानेन तदभावेऽपरो विधिः
दातव्यैषा सदृक्षाय वयोविद्यान्वयादिभिः ५

पितृतत्पितृभ्रातृषु पितृव्यज्ञातिमातृषु
पूर्वाभावे परो दद्यात् सर्वाभावे स्वयं व्रजेत् ६
यदि सा दातृवैकल्याद्रजः पश्येत् कुमारिका
भ्रूणहत्याश्च यावत्यः पतितः स्यात्तदप्रदः ७
तुभ्यं दास्याम्यहमिति ग्रहीष्यामीति यस्तयोः
कृत्वा समयमन्योन्यं भजते न स दण्डभाक् ८
त्यजन्नदुष्टां दण्ड्यः स्याद्दूषयंश्चाप्यदूषिताम्
तावन्न दुष्टं दुष्टं च स्वार्थेभ्यो भेदयंश्च तत्
ऊढायां हि सवर्णायामन्या वा काममुद्वहेत् ९
तस्यामुत्पादितः पुत्रो न सवर्णात् प्रहीयते १०
उद्वहेत् क्षत्रियां विप्रो वैश्याञ्च क्षत्रियो विशाम्
न तु शूद्रां द्विजः कश्चिन्नाधमः पूर्ववर्णजाम् ११
नानावर्णासु भार्यासु सवर्णा सहचारिणी
धर्म्या धर्मेषु धर्मिष्ठा ज्येष्ठा तस्य स्वजातिषु १२
पाटितोऽयं द्विजाः पूर्वमेकदेहः स्वयम्भुवा
पतयोऽर्द्धेन चार्द्धेन पत्न्योऽभूवन्निति श्रुतिः १३
यावन्न विन्दते जायां तावदर्द्धो भवेत् पुमान्
नार्द्धं प्रजायते सर्वं प्रजायेतेत्यपि श्रुतिः १४
गुर्वी सा भूस्त्रिवर्गस्य वोढुं नान्येन शक्यते
यतस्ततोऽन्वहं भूत्वा स्ववशो बिभृयाच्च ताम् १५
कृतदारोऽग्निपत्नीभ्यां कृतवेश्मा गृहं वसेत्
स्वकृत्यं वित्तमासाद्य वैतानाग्निं न हापयेत् १६
स्मार्त्तं वैवाहिके वह्नौ श्रौतं वैतानिकाग्निषु
कर्म कुर्यात् प्रतिदिनं विधिवत् प्रीतिपूर्वतः १७
सम्यग्धर्मार्थकामेषु दम्पतिभ्यामहर्निशम्
एकचित्ततया भाव्यं समानव्रतवृत्तितः १८

न पृथग्विद्यते स्त्रीणां त्रिवर्गविधिसाधनम्
भावतो ह्यतिदेशाद्वा इति शास्त्रविधिः परः १९
पत्युः पूर्वं समुत्थाय देहशुद्धिं विधाय च
उत्थाप्य शयनाद्यानि कृत्वा वेश्मविशोधनम् २०
मार्जनैर्लेपनैः प्राप्य साग्निशालं स्वमङ्गनम्
शोधयेदग्निकार्याणि स्निग्धान्युष्णेन वारिणा २१
प्रोक्षण्यैरिति तान्येव यथास्थनं प्रकल्पयेत्
द्वन्द्वपात्राणि सर्वाणि न कदाचिद्वियोजयेत् २२
शोधयित्वा तु पात्राणि पूरयित्वा तु धारयेत्
महानसस्य पात्राणि बहिः प्रक्षाल्य सर्वथा २३
मृद्भिश्च शोधयेच्चुल्लीं तत्राग्निं विन्यसेत्ततः
स्मृत्वा नियोगपात्राणि रसांश्च द्रविणानि च २४
कृतपूर्वाह्णकार्या च स्वगुरूनभिवादयेत्
ताभ्यां भर्तृपितृभ्यां वा भ्रातृमातुलबान्धवैः २५
वस्त्रालङ्काररत्नानि प्रदत्तान्येव धारयेत्
मनोवाक्कर्मभिः शुद्धा पतिदेशानुवर्तिनी २६
छायेवानुगता स्वच्छा सखीव हितकर्मसु
दासीवादिष्टकार्येषु भार्या भर्त्तुः सदा भवेत् २७
ततोऽन्नसाधनं कृत्वा पतये विनिवेद्य तत्
वैश्वदेवकृतैरन्नैर्भोजनीयांश्च भोजयेत् २८
पतिश्चैतदनुज्ञाता शिष्टमन्वाद्यमात्मना
भुक्त्वा नयेदहःशेषमायव्ययविचिन्तया २९
पुनः सायं पुनः प्रातर्गृहशुद्धिं विधाय च ३०
कृतान्नसाधना साध्वी मुभृशं भोजयेत् पतिम्
नातितृप्त्या स्वयं भुक्त्वा गृहनीतिं विधाय च ३१
आस्तीर्य साधुशयनं ततः परिचरेत् पतिम्

सुप्ते पतौ तदभ्यासे स्वपेत्तद्गतमानसा
अनग्ना चाप्रमत्ता च निष्कामा च जितेन्द्रिया ३२
नोच्चैर्वदेन्न परुषं न बहून् पत्युरप्रियम्
न केनचित् विवदेच्च अप्रलापविलापिनी ३३
नचातिव्ययशीला स्यान्न धर्मार्थविरोधिनी
प्रमादोन्मादरोषेर्ष्यावञ्चनञ्चातिमानिताम् ३४
पैशुन्यहिंसाविद्वेषमहाहङ्कारधूर्त्तताः
नास्तिक्यसाहसस्तेयदम्भान् साध्वी विवर्जयेत् ३५
एवं परिचरन्ती सा पतिं परमदैवतम्
यशः शमिह यात्येव परत्र च सलोकताम् ३६
योषितो नित्यकर्मोक्तं नैमित्तिकमथोच्यते
रजोदर्शनतोदोषात् सर्वमेव परित्यजेत् ३७
सर्वैरलक्षिता शीघ्रं लज्जिताऽन्तर्गृहे वसेत्
एकाम्बरावृता दीना स्नानालङ्कारवर्जिता ३८
मौनिन्यधोमुखी चक्षुष्पाणिपद्भिरचञ्चला
अश्नीयात् केवलं भक्तं नक्तं मृण्मयभाजने ३९
स्वपेद्भूमावप्रमत्ता क्षपेदेवमहस्त्रयम्
स्नायीत सा त्रिरात्रान्ते सचैलमुदिते रवौ ४०
विलोक्य भर्त्तुर्वदनं शुद्धा भवति धर्मतः
कृतशौचा पुनः कर्म पूर्ववच्च समाचरेत् ४१
रजोदर्शनतो याः स्यू रात्रयः षोडशर्त्तवः
ततः पुंबीजमाक्लिष्टं शुद्धे क्षेत्रे प्ररोहति ४२
चतस्रश्चादिमा रात्रीः पर्ववच्च विवर्जयेत्
गच्छेद्युग्मासु रात्रीषु पौष्णपित्रर्क्षराक्षसान् ४३
प्रच्छादितादित्यपथे पुमान् गच्छेत् स्वयोषितः
कामालङ्कृदवाप्नोति पुत्रं पूजितलक्षणम् ४४

ऋतुकालेऽभिगम्यैवं ब्रह्मचर्ये व्यवस्थितः
गच्छन्नपि यथाकामं न दुष्टः स्यादनन्यकृत्  ४५
भ्रूणहत्यामवाप्नोति ऋतौ भार्यापराङ्मुखः
सा त्ववप्यान्यतो गर्भं त्याज्या भवति पापिनी  ४६
महापातकदुष्टा च पतिगर्भविनाशिनी
सद्वृत्तचारिणीं पत्नीं त्यक्त्वा पतति धर्मतः  ४७
महापातकदुष्टोऽपि नाप्रतीक्ष्यस्तया पतिः
अशुद्धे क्षयमादूरं स्थितायामनुचिन्तया  ४८
व्यभिचारेण दुष्टानां पतीनां दर्शनादृते
धिक्कृतायामवाच्यायामन्यत्र वासयेत् पतिः  ४९
पुनस्तामार्त्तवस्नातां पूर्ववद् व्यवहारयेत्
धूर्त्ताञ्च धर्मकामघ्नीमपुत्रां दीर्घरोगिणीम्  ५०
सुदुष्टां व्यसनासक्तामहितामधिवासयेत्
अधिविन्नामपि विभुः स्त्रीणान्तु समतामियात्  ५१
विवर्णा दीनवदना देहसंस्कारवर्जिता
पतिव्रता निराहारा शोष्यते प्रोषिते पतौ  ५२
मृतं भर्त्तारमादाय ब्राह्मणी वह्निमाविशेत्
जीवन्ती चेत्यक्तकेशा तपसा शोधयेद्वपुः  ५३
सर्वावस्थासु नारीणां न युक्तं स्यादरक्षणम्
तदेवानुक्रमात् कार्यं पितृभर्तृसुतादिभिः  ५४
जाताः सुरक्षिताया ये पुत्रपौत्रप्रपौत्रकाः
ये यजन्ति पितॄन् यज्ञैर्मोक्षप्राप्तिमहोदयः  ५५
मृतानामग्निहोत्रेण दाहयेद्विधिपूर्वकम्
दाहयेदविलम्बेन भार्याञ्चात्र व्रजेत सा  ५६

इति श्रीवेदव्यासीये धर्मशास्त्रे स्त्र्यधिकारोनाम द्वितीयोऽध्यायः

## तृतीयोऽध्यायः
## अथ सस्नानादिविधि पूर्वाह्णकृत्यवर्णनम्

नित्यं नैमित्तिकं काम्यमिति कर्म त्रिधा मतम्
त्रिविधं तच्च वक्ष्यामि गृहस्थस्यावधार्यताम् १
यामिन्याः पश्चिमे यामे त्यक्तनिद्रो हरिं स्मरेत्
आलोक्य मङ्गलद्रव्यं कर्मावश्यकमाचरेत् २
कृतशौचो निषेव्याग्निं दन्तान् प्रक्षयाल्य वारिणा
स्नात्वोपास्य द्विजः सन्ध्यां देवादींश्चैव तर्पयेत् ३
जुहोत्यनुदिते भानावित्येक उदिते रवौ
जपेदादित्यदेवत्यान्मन्त्रान्मन्त्रनियोगवित्
वेदवेदाङ्गशास्त्राणि इतिहासानि चाभ्यसेत्
अध्यापयेच्च सच्छिष्यान् सद्विप्रांश्च द्विजोत्तमः ४
अलब्धं प्रपयेल्लब्ध्वा क्षणमात्रं समापयेत्
समर्थो हि समर्थेन नाविज्ञातः क्वचिद्वसेत् ५
सरित्सरसि वापीषु गर्तप्रस्रवणादिषु
स्नायीत यावदुद्धृत्य पञ्च पिण्डानि वारिणा ६
तीर्थाभावेऽप्यशक्त्यां वा स्नायात्तोयैः समाहृतैः
गृहाङ्गणगतस्तत्र यावदम्बरपीडनम् ७
स्नानमब्दैवतैः कुर्यात् पावनैश्चापि मार्जनम्
मन्त्रैः प्राणांस्त्रिरायम्य सौरैश्चार्कं विलोकयेत् ८
तिष्ठन् स्थित्वा तु गायत्रीं ततः स्वाध्यायमारभेत्
ऋचाञ्च यजुषां साम्नामथर्वाङ्गिरसामपि ९
इतिहासपुराणानां वेदोपनिषदां द्विजः
शक्त्या सम्यक् पठेन्नित्यमल्पमप्यासमापनात् १०
स यज्ञदानतपसामखिलं फलमाप्नुयात्
वेदेभ्योऽन्यत्र संतुष्टः स विप्रः शूद्रतामियात्

तस्मादहरहर्वेदं द्विजोऽधीयीत वाग्यतः ११
धर्मशास्त्रेतिहासादि सर्वेषां शक्तितः पठेत्
कृतत्वाध्यायः प्रथमं तर्पयेच्चाथ देवताः १२
जान्वा च दक्षिणं दर्भैः प्रागग्रैः सयवैस्तिलैः
पुरः क्षिप्तैःकराग्राभ्यां निर्गतैः प्राङ्मुखो द्विजः
एकैकाञ्जलिदानेन प्रकृतिस्थोपवीतकः १३
समजानुद्वयो ब्रह्मसूत्रहार उदङ्मुखः
तिर्य्यग्दर्भैश्च वामाग्रैर्यवैस्तिलविमिश्रितैः १४
अम्भोभिरूत्तरक्षिप्तह् कनिष्ठामूलनिर्गतैः
द्वाभ्यां द्वाभ्यामञ्जलिभ्यां मनुष्यांस्तर्पयेत्ततः १५
दक्षिणाभिमुखः सव्यं जान्वा च द्विगुणैः कुशैः
तिलैर्जलिश्चश्च देशिन्या मूलदर्भाद्विनिःसृतैः १६
दक्षिणांसोपवीतः स्यात् क्रमेणाञ्जलिभिस्त्रिभिः
सन्तर्पयेद्दिव्यपितृंस्तत्परांश्च पितृन् स्वकान् १७
स्वधा वर्जन्यमानेवमेक इच्छन्ति तर्पणे
द्विजतिजीवत्पितृकोऽत्येतानन्याँश्च तर्पयेत्
तर्पयेद्दिव्यपितॄँश्च पितृपूर्वान्पितृन्स्वकान्
मातृमातामहांस्तद्वत्त्रीनेवं हि त्रिभिस्त्रिभिः
मातामहाश्च येऽप्यन्ये गोत्रिणो दाहवर्जिताः १८
तानेकाञ्जलिदानेन तर्पयेच्च पृथक् पृथक्
असंस्कृतप्रमीता ये प्रेतसंस्कारवर्जिताः १९
वस्त्रनिष्पीडनाम्भोभिस्तेषामाप्यायनम्भवेत्
अतर्पितेषु पितृषु वस्त्रं निष्पीडयेच्च यः २०
निराशाः पितरस्तस्य भवन्ति सुरमानुषैः
पयोदर्भस्वधाकारगोत्रनामतिलैर्भवेत् २१
सुदत्तं तत्पुनस्तेषामेकेनापि वृथा विना

अन्यचित्तेन यद्दत्तम् यद्दत्तं विधिवर्जितम् २२
अनासनस्थितेनापि तज्जलं रुधिरायते
एवं सन्तर्पिताः कामैस्तर्पकांस्तर्पयन्ति च २३
ब्रह्मविष्णुशिवादित्यमित्रावरुणनामभिः
पूजयेल्लक्षितैर्मन्त्रैर्जलमन्त्रोक्तदेवताः २४
उपस्थाय रवेः काष्ठां पूजयित्वा च देवताः
ब्रह्माग्नीन्द्रौषधीजीवविष्णुनामहतांहसाम् २५
अपां यत्तेति सत्कायं नमस्कारैः स्वनामभिः
कृत्वा मुखं समालभ्य स्नानमेवं समाचरेत् २६
ततः प्रविश्य भवनमावसथ्ये हुताशने
पाकयज्ञांश्च चतुरो विदध्याद्विधिवद् द्विजः २७
अनाहितावसथ्याग्निरादायान्नं घृतप्लुतम्
शाकलेन विधानेन जुहुयाल्लौकिकेऽनले २८
व्यस्ताभिर्व्याहृतीभिश्च समस्ताभिस्ततः परम्
षड्भिर्देवकृतस्येति मन्त्रवद्भिर्यथाक्रमम् २९
प्राजापत्यं स्विष्टकृतं हुत्वैवं द्वादशाहुतीः
ओङ्कारपूर्वः स्वाहान्तस्त्यागः स्विष्टविधानतः ३०
भुविदर्भान् समास्तीर्य्य बलिकर्म समाचरेत्
विश्वेभ्योदेवेभ्य इति सर्वेभ्यो भूतेभ्य एव च ३१
भूतानां पतये चेति नमस्कारेण शास्त्रवित्
दद्याद्बलित्रयञ्चाग्रे पितृभ्यश्च स्वधा नमः ३२
पात्रनिर्णेजनं वारि वायव्यां दिशि निःक्षिपेत्
उद्धृत्य षोडशग्रासमात्रमन्नं घृतोक्षितम्
इदमन्नं मनुष्येभ्यो हन्तेत्युक्त्वा समुत्सृजेत्
गोत्रनामस्वधाकारैः पितृभ्यश्चापि शक्तितः ३३
षड्भ्योऽन्नमन्वहं दद्यात् पितृयज्ञविधानतः

वेदादीनां पठेत् किञ्चिदल्पं ब्रह्ममखाप्तये ३४
ततोऽन्यदन्नमादाय निर्गत्य भवनाद्बहिः
काकेभ्यः श्वपचेभ्यश्च प्रक्षिपेद्ग्रासमेव च ३५
उपविश्य गृहद्वारि तिष्ठेद्यावन्मुहूर्तकम्
अप्रमुक्तोऽतिथिं लिप्सुर्भावशुद्धः प्रतीक्षकः ३६
आगतं दूरतः शान्तं भोक्तुकाममकिञ्चनम्
दृष्ट्वा संमुखमभ्येत्य सत्कृत्य प्रश्रयार्च्चनैः ३७
पादधावनसम्मानाभ्यञ्जनादिभिरर्च्चितः
त्रिदिवं प्रापयेत्सद्यो यज्ञस्याभ्यधिकोऽतिथिः ३८
कालागतोऽतिथिर्द्दष्टवेदपारो गृहागतः
द्वावेतौ पूजितौ स्वर्गं नयतोऽधस्त्वपूजितौ
विवाह्यस्नातकक्ष्माभृदाचार्यसुहृदृत्विजः ३९
अर्घ्या भवन्ति धर्मेण प्रतिवर्षं गृहागताः
गृहागताय सत्कृत्य श्रोत्रियाय यथाविधि ४०
भक्त्योपकल्पयेदेकं महाभागं विसर्जयेत्
विसर्जयेदनुव्रज्य सुतृप्तश्रोत्रियातिथीन्
मित्रमातुलसम्बन्धिवान्धवान् समुपागतान् ४१
भोजयेद् गृहिणो भिक्षां सत्कृतां भिक्षुकोऽर्हति
स्वाद्वन्नमश्नन्नस्वादु ददद्गच्छत्यधोगतिम् ४२
गर्भिण्यातुरभृत्येषु बालवृद्धातुरादिषु
बुभुक्षितेषु भुञ्जानो गृहस्थोऽश्नाति किल्विषम् ४३
नाद्याद्गृध्येन्न पाकान्नं कदाचिदनिमन्त्रितः
निमन्त्रितोऽपि निन्द्येन प्रत्याख्यानं द्विजोऽर्हति ४४
क्षुद्राभिशस्तवार्धुष्यवाग्दुष्टक्रूरतस्कराः
क्रुद्धापबिद्धबद्धोग्रवधबन्धनजीविनः ४५
शैलूषशौण्डिकोन्नद्धोन्मत्तव्रात्यब्रतच्युताः

नग्ननास्तिकनिर्लज्जं पिशुनव्यसनान्विताः ४६
कदर्य्यस्त्रीजितानार्य्यपरवादकृता नराः
अनीशाः कीर्तिमन्तोऽपि राजदेवस्वहारकाः ४७
शयनासनसंसर्गवृत्तकर्मादिदूषिताः
अश्रद्दधानाः पतिता भ्रष्टाचारादयश्च ये ४८
अभोज्यान्नाः स्युरन्नादो यस्य यः स्यात्स तत्समः
नापितान्वयमित्रार्ध सिरिणो दासगोपकाः ४९
शूद्राणामप्यमीषान्तु भुक्त्वाऽन्नं नैव दुष्यति
धर्मेणान्योन्यभोज्यान्ना द्विजास्तु विदितान्वयाः ५०
स्ववृत्त्योपार्जितं मेध्यमकेशकृमिमक्षिकम्
अश्वलीढप्रगोघ्रातमस्पृष्टं शूद्रवायसैः ५१
अनुच्छिष्टमसंदुष्टमपर्युषितमेव च
अम्लानवाष्पमन्नाद्यमद्यान्नित्यं सुसंस्कृतम् ५२
कृसरापूपसंयावपायसं शष्कुलीति च
नाश्नीयाद् ब्राह्मणो मांसमनियुक्तः कथञ्चन ५३
क्रतौ श्राद्धे नियुक्तो वा अनश्नन् पतति द्विजः
मृगयोपार्जितं मांसमभ्यर्च्य पितृदेवताः ५४
क्षत्रियो द्वादशोनं तत् क्रीत्वा वैश्योऽपि धर्मतः
द्विजोजग्ध्वा वृथामांसं हत्वाप्यविधिना पशून् ५५
निरयेष्वक्षयं वासमाप्नोत्याचन्द्रतारकम्
सर्वान् कामान् समासाद्य फलमश्वमखस्य च ५६
मुनिसाम्यमवाप्नोति गृहस्थोऽपि द्विजोत्तमः
द्विजभोज्यानि गव्यानि माहिषाणि पयांसि च ५७
निर्द्दशासन्धिसम्बन्धिवत्सवन्तीपयांसि च
अलावुशिग्रुकवकच्छत्राकलशुनानि च
पलाण्डुश्वेतवृन्ताकरक्तमूलकमेव च ५८

गृञ्जनारुणवृक्षासृग्जन्तुगर्भ फलानि च
अकालकुसुमादीनि द्विजोजग्ध्वैन्दवं चरेत् ५९
वाग्दूषितमविज्ञातमन्यपीडितकार्य्यपि
भूतेभ्योऽन्नमदत्त्वा च तदन्नं गृहिणो दहेत् ६०
हैमराजतकांस्येषु पात्रेष्वद्यात् सदा गृही
तदभावे साधुगन्धलोध्रद्रुमलतासु च ६१
पलाशपद्मपत्रेषु गृहस्थो भोक्तुमर्हति
ब्रह्मचारी यतिश्चैव श्रेयोयद्भोक्तुमर्हति ६२
अभ्युक्ष्यान्नं नमस्कारैर्भुवि दद्याद्बलित्रयम्
भूपतये भुवः पतये भूतानां पतये तथा ६३
अपः प्राश्य ततः पश्चात् पञ्चप्राणाहुतिःक्रमात्
स्वाहाकारेण जुहुयाच्छेषमद्याद्यथासुखम् ६४
अनन्यचित्तो भुञ्जीत वाग्यतोऽन्नमकुत्सयन्
आतृप्तेरन्न मश्नीयादक्षुरणां पात्रमुत्सृजेत् ६५
उच्छिष्टमन्नमुद्धृत्य ग्रासमेकं भुवि क्षिपेत्
आचान्तः साधुसङ्गेन सद्विद्यापठनेन च ६६
वृत्तवृद्धकथाभिश्चशेषाहमतिवाहयेत्
सायं सन्ध्यामुपासीत हुत्वाऽग्निं भृत्यसंयुतः ६७
आपोशानक्रियापूर्वमश्नीयादन्वहं द्विजः
सायमप्यतिथिः पूज्यो होमकालागतोऽनिशम् ६८
श्रद्धया शक्तितो नित्यं श्रुतं हन्यादपूजितः
नातितृप्त उपस्पृश्य प्रक्षाल्य चरणौ शुचिः ६९
अप्रत्यगुत्तरशिराः शयीत शयने शुभे
शक्तिमानुचिते काले स्नानं सन्ध्यां न हापयेत् ७०
ब्राह्मे मुहूर्त्ते चोत्थाय चिन्तयेद्धितमात्मनः
शक्तिमान् मतिमान् नित्यं वृत्तमेतत् समाचरेत् ७१

इति वेदव्यासीये धर्मशास्त्रे गृहस्थाह्निकोनाम तृतीयोऽध्यायः

## चतुर्थोऽध्यायः

### अथ गृहस्थाश्रमप्रशंसापूर्वक तीर्थधर्म वर्णनम्

इति व्यासकृतं शास्त्रं धर्मसारसमुच्चयम्
आश्रमे यानि पुण्यानि मोक्षधर्माश्रितानि च १
गृहाश्रमात् परो धर्मो नास्ति नास्ति पुनः पुनः
सर्वतीर्थफलं तस्य यथोक्तं यस्तु पालयेत् २
गुरुभक्तो भृत्यपोषी दयावाननुसूयकः
नित्यजापी च होमी च सत्यवादी जितेन्द्रियः ३
स्वदारे यस्य सन्तोषः परदारनिवर्तनम्
अपवादोऽपि नो यस्य तस्य तीर्थफलं गृहे ४
परदारान् परद्रव्यं हरते यो दिने दिने
सर्व्वतीर्थाभिषेकेण पापं तस्य न नश्यति ५
गृहेषु सेवनीयेषु सर्वतीर्थफलं ततः
अन्नदस्य त्रयो भागाः कर्ता भोगेन लिप्यते ६
प्रतिश्रयं पादशौचं ब्राह्मणानाञ्च तर्पणम्
न पापं संस्पृशेत्तस्य बलिं भिक्षां ददाति यः ७
पादोदकं पादघृतं दीपमन्नं प्रतिश्रयम्
यो ददाति ब्राह्मणेभ्यो नोपसर्पति तं यमः ८
विप्रपादोदकक्लिन्ना यावत्तिष्ठति मेदिनी
तावत् पुष्करपात्रेषु पिबन्ति पितरोऽमृतम् ९
यत्फलं कपिलादाने कार्तिक्यां ज्येष्ठपुष्करे
तत्फलं ऋषयः श्रेष्ठा विप्राणां पादशौचने १०
स्वागतेनाग्नयः प्रीता आसनेन शतक्रतुः
पितरः पादशौचेन अन्नाद्येन प्रजापतिः ११

मातापित्रोः परं तीर्थं गङ्गा गावो विशेषतः
ब्राह्मणात् परमं तीर्थं न भूतं न भविष्यति १२
इन्द्रियाणि वशीकृत्य गृह एव वसेन्नरः
तत्र तस्य कुरुक्षेत्रं नैमिषं पुष्कराणि च १३
गङ्गाद्वारञ्च केदारं सन्निहत्यां तथैव च
एतानि सर्वतीर्थानि कृत्वा पापैः प्रमुच्यते १४
वर्णानामाश्रमाणाञ्च चातुर्वर्णस्य भो द्विजाः
दानधर्मं प्रवक्ष्यामि यथा व्यासेन भाषितम् १५
यद्ददाति विशिष्टेभ्यो यच्चाश्नाति दिने दिने
तच्च वित्तमहं मन्ये शेषं कस्याभिरक्षति १६
यद्ददाति यदश्नाति तदेव धनिनो धनम्
अन्ये मृतस्य क्रीडन्ति दारैरपि धनैरपि १७
किं धनेन करिष्यन्ति देहिनोऽपि गतायुषः
यद्वर्द्धयितुमिच्छन्तस्तच्छरीरमशाश्वतम् १८
अशाश्वतानि गात्राणि विभवो नैव शाश्वतः
नित्यं सन्निहितो मृत्युः कर्तव्यो धर्मसंग्रहः १९
यदि नाम न धर्माय न कामाय न कीर्तये
यत्परित्यज्य गन्तव्यं गद्धनं किं न दीयते २०
जीवन्ति जीविते यस्य विप्रा मित्राणि बान्धवाः
जीवितं सफलं तस्य आत्मार्थे को न जीवति २१
क्रिमयः किं न जीवन्ति भक्षयन्ति परस्परम्
परलोकाविरोधेन यो जीवति स जीवति
पशवोऽपि हि जीवन्ति केवलात्मोदरम्भराः
किं कायेन सुगुप्तेन बलिना चिरजीविनः २२
ग्रासादर्धमपि ग्रासमर्थिभ्यः किं न दीयते
इच्छानुरूपो विभवः कदा करय भविष्यति २३

अदाता पुरुषस्त्यागी धनं संत्यज्य गच्छति
दातारं कृपणं मन्ये मृतोऽप्यर्थं न मुञ्चति २४
प्राणनाशस्तु कर्तव्यो यः कृतार्थो न सोऽमृतः
अकृतार्थस्तु यो मृत्युं प्राप्तः खरसमोहि सः २५
अनाहूतेषु यद्दत्तं यच्च दत्तमयाचितम्
भविष्यति युगस्यान्तस्तस्यान्तो न भविष्यति २६
मृतवत्सा यथा गौश्च तृष्णा लोभेन दुह्यति
परस्परस्य दानानि लोकयात्रा न धर्मतः २७
अदृष्टे चाशुभे दानं भोक्ता चैव न दृश्यते
पुनरागमनं नास्ति तत्र दानमनन्तकम् २८
मातापितृषु यद्द्याद् भ्रातृषु श्वशुरेषु च
जायापत्येषु यद्द्यात् सोऽनन्तः स्वर्गसंक्रमः २९
पितुः शतगुणं दानं सहस्त्रं मातुरुच्यते
भगिन्यां शतसाहस्त्रं सोदरे दत्तमक्षयम् ३०
इन्दुक्षयः पिता ज्ञेयो माता चैव दिनक्षयः
संक्रान्तिर्भगिनी चैव व्यतीपातः सहोदरः
अहन्यहनि दातव्यं ब्राह्मणेभ्यो मुनीश्वर
आगमिष्यति यत् पात्रं तत्पात्रं तारयिष्यति ३१
किञ्चिद्वेदमयं पात्रं किञ्चित् पात्रं तपोमयम्
पात्राणामुत्तमं पात्रं शूद्रान्नं यस्य नोदरे ३२
यस्य चैव गृहे मूर्खो दूरे चापि गुणान्वितः
गुणान्विताय दातव्यं नास्ति मूर्खे व्यतिक्रमः ३३
देवद्रव्यविनाशेन ब्रह्मस्वहरणेन च
कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च ३४
ब्राह्मणातिक्रमो नास्ति विप्रे वेदविवर्जिते
ज्वलन्तमग्निमुत्सृज्य न हि भस्मनि हूयते ३५

सन्निकृष्टमधीयानं ब्राह्मणं यो व्यतिक्रमेत्
भोजने चैव दाने च हन्यात्त्रिपुरुषं कुलम्  ३६
यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः
यश्च विप्रोऽनधीयानस्त्रयस्ते नामधारकाः  ३७
ग्रामस्थानं यथा शून्यं यथा कूपश्च निर्जलः
यश्च विप्रोऽनधीयानस्त्रयस्ते नामधारकाः  ३८
ब्राह्मणेषु च यद्दत्तं यच्च वैश्वानरे हुतम्
तद्धनं धनमाख्यातं धनं शेषं निरर्थकम्  ३९
स्ममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे
सहस्रगुणमाचार्ये ह्यनन्तं वेदपारगे  ४०
ब्रह्मबीजसमुत्पन्नो मन्त्रसंस्कारवर्जितः
जातिमात्रोपजीवी च स भवेद् ब्राह्मणः नमः  ४१
गर्भाधानादिभिर्मन्त्रैर्वेदोपनयनेन च
नाध्यापयति नाधीते स भवेद् ब्राह्मणब्रुवः  ४२
अग्निहोत्री तपस्वी च वेदमध्यापयेच्च यः
सकल्पं सरहस्यञ्च तमाचार्यं प्रचक्षते  ४३
इष्टिभिः पशुबन्धैश्च चातुर्मास्यैस्तथैव च
अग्निष्टोमादिभिर्यज्ञैर्येन चेष्टं स इष्टवान्  ४४
मीमांस्ते च यो वेदान् षड्भिरङ्गैः सविस्तरैः
इतिहासपुराणानि स भवेद्वेदपारगः  ४५
ब्राह्मणा येन जीवन्ति नान्यो वर्णः कथञ्चन
इदृक्पथमुपस्थाय कोऽन्यस्तं त्यक्तुमुत्सहेत्  ४६
ब्राह्मणः स भवेच्चैव देवानामपि दैवतम्
प्रत्यक्षञ्चैव लोकस्य ब्रह्मतेजो हि कारणम्  ४७
ब्राह्मणस्य मुखं क्षेत्रं निष्ककरमकराटकम्
वापयेत्तत्र बीजानि स कृषिः सार्वकामिकी  ४८

सुक्षेत्रो वापयेद्बीजं सुपात्रे दापयेद्धनम्
सुक्षेत्रे च सुपात्रे च क्षिप्तं नैव विदुष्यति ४९
विद्याविनयसम्पन्ने ब्राह्मने गृहमागते
क्रीडन्त्योषधयः सर्वा यास्यामः परमां गतिम् ५०
नष्टशौचे व्रतभ्रष्टे विप्रे वेदविवर्जिते
दीयमानं रुदत्स्यन्नं भयार्द्वे दुष्कृतं कृतम् ५१
वेदपूर्णमुखं विप्रं सुभुक्तमपि भोजयेत्
नच मूर्खं निराहारं षड्रात्रमुपवासिनम् ५२
यानि यस्य पवित्राणि कुक्षौ तिष्ठन्ति भो द्विजाः
तानि तस्य प्रयोज्यानि न शरीराणि देहिनाम् ५३
यस्य देहे सदाऽश्नन्ति हव्यानि त्रिदिवौकसः
कव्यानि चैव पितरः किम्भूतमधिकं ततः ५४
यद्भुङ्क्ते वेदविद्विप्रः स्वकर्मनिरतः शुचिः
दातुः फलमसङ्ख्यातं प्रतिजन्म तदक्षयम् ५५
हस्त्यश्वरथयानानि केचिदिच्छन्ति पण्डिताः
अहं नेच्छामि मुनयः कस्यैताः शस्यसम्पदः ५६
वेदलाङ्गलकृष्टेषु द्विजश्रेष्ठेषु सत्सु च
यत्पुरा पातितं बीजं तस्यैताः सस्यसम्पदः ५७
शतेषु जायते शूरः सहस्रेषु च पण्डितः
वक्ता शतसहस्रेषु दाता भवति वा न वा
न रणे विजयाच्छूरोऽध्ययनान्न च पण्डितः ५९
न वक्ता वाक्पटुत्वेन न दाता चार्थदानतः
इन्द्रियाणां जये शूरो धर्मं चरति पण्डितः ६०
हितप्रियोक्तिभिर्वक्ता दाता सम्मानदानतः ६१
यद्येकपङ्क्त्यां विषमं ददाति स्नेहाद्भयाद्वा यदि वार्थहेतोः
वेदेषु दृष्टं ऋषिभिश्च गीतम् तद्ब्रह्महत्यां मुनयो वदन्ति ६२

ऊषरे वापितं वीजं भिन्नभाण्डेषु गोदुहम्
हुतं भस्मनि हव्यञ्च मूर्खे दानमशाश्वतम् ६३
मृतसूतकपुष्टाङ्गो द्विजः शूद्रान्नभोजने
अहमेवं न जानामि कां योनिं स गमिष्यति ६४
शूद्रान्नेनोदरस्थेन यदि कश्चिन्म्रियेत यः
स भवेत्च्छूकरो नूनं तस्य वा जायते कुलम् ६५
गृध्रो द्वादश जन्मानि सप्त जन्मानि शूकरः
श्वा चैव सप्त जन्मानि इत्येवं मनुरब्रवीत्
अमृतं ब्राह्मणान्नेन दारिद्रं क्षत्रियस्य च ६६
वैश्यान्नेन तु शूद्रत्वं शूद्रान्नान्नरकं व्रजेत्
यश्च भुङ्क्तेऽथ शूद्रान्नं मासमेकं निरन्तरम् ६७
इह जन्मनि शूद्रत्वं मृतः श्वा चैव जायते
यस्य शूद्रा पचेन्नित्यं शूद्रो वा गृहमेधिनी ६८
वर्जितः पितृदेवैस्तु रौरवं याति स द्विजः
भाण्डसङ्करसङ्कीर्णा नानासङ्करसङ्कराः ६९
योनिसङ्करसङ्कीर्णा निरयं यान्ति मानवाः
पङ्क्तिभेदी वृथापाकी नित्यं ब्राह्मणनिन्दकः ७०
आदेशी वेदविक्रेता पञ्चैते ब्रह्मघातकाः ७१
इदं व्यासमतं नित्यमध्येतव्यं प्रयत्नतः
एतदुक्ताचारवतः पतनं नव विद्यते ७२

इति श्रीवेदव्यासीये धर्मशास्त्रे गृहस्थाश्रमप्रशंसादिवर्णनो नाम
चतुर्थोऽध्यायः

समाप्ता चेयं व्याससमृतिः

Reference:
*Smṛti Sandarbha* Vol. III, (Delhi: Nag, 1981), p. 1631.

# आपस्तम्बस्मृतिः

श्रीगणेशाय नमः

अथ प्रथमोऽध्यायः

अथ गोरोधनादिविषयेगोहत्यायां च प्रायश्चित्तवर्णनम्
आपस्तम्बं प्रवक्ष्यामि प्रायश्चित्तविनिर्णयम्
दूषितानां हितार्थाय वर्णानामनुपूर्वशः १
परेषां परिवादेषु निवृत्तमृषिसत्तमम्
विविक्तदेश आसीनमात्मविद्यापरायणम् २
अनन्यमनसं शान्तं सत्वस्थं योगवित्तमम्
आपस्तम्बमृषिं सर्वे समेत्य मुनयोऽब्रुवन् ३
भगवन् मानवाः सर्वेऽसन्मार्गेऽपिस्थिता यदा
चरेयुर्धर्मकार्याणां तेषां ब्रूहि विनिष्कृतिम् ४
यतोऽवश्यं गृहस्थेन गवादिपरिपालनम्
कृषिकर्मादि चापत्सु द्विजामन्त्रणमेव च ५
देयञ्चानाथकेऽवश्यं विप्रादीनाञ्च भेषजम्
बालानां स्तन्यपानादिकार्यञ्च परिपालनम् ६
एवं कृते कथञ्चित् स्यात्प्रमादो यद्यकामतः
गवादीनां ततोऽस्माकं भगवन् ब्रूहि निष्कृतिम् ७
एवमुक्तः क्षणं ध्यात्वा प्रणिपातादधोमुखः
दृष्ट्वा ऋृषीनुवाचेदमापस्तम्बः सुनिश्चितम् ८
बालानां स्तन्यपानादिकार्ये दोषो न विद्यते
विपत्तावपि विप्राणामामन्त्रणचिकित्सने ९
गवादीनां प्रवक्ष्यामि प्रायश्चित्तं रुजादिषु
केचिदाहुर्न दोषोऽत्र देहधारणभेषजे १०
औषधं लवणञ्चैव स्नेहपुष्ट्यन्नभोजनम्
प्राणिनां प्राणवृत्त्यर्थः प्रायश्चित्तं न विद्यते ११

अतिरिक्तं न दातव्यं काले स्वल्पन्तु दापयेत्
अतिरिक्ते विपन्नानां कृच्छ्रमेव विधीयते १२
त्र्यहं निरशनात् पादः पादश्चायाचितं त्र्यहम्
पादः सायं त्र्यहं पादः प्रतिभोज्यं तथा त्र्यहम् १३
प्रातः सायं दिनार्द्धञ्च पादोनं सायवर्ज्जितम् १४
प्रातः पादं चरेच्छूद्रः सायं वैश्यस्य दापयेत्
अयाचितन्तु राजन्ये त्रिरात्रं ब्राह्मणस्य च १५
पादमेकं चरेद्रोधे द्वौ पादौ बन्धने चरेत्
योजने पादहीनञ्च चरेत् सर्वं निपातने १६
घण्टाभरणदोषेण गौस्तु यत्र विपद्यते
चरेदर्द्धव्रतं तत्र भूषणार्थं कृतं हि तत् १७
दमने वा निरोधे वा संघाते चैव योजने
स्तम्भशृङ्खलपाशैश्च मृते पादोनमाचरेत् १८
पाषाणैर्लगुडैर्वापि शस्त्रेणान्येन वा बलात्
निपातयन्ति ये गास्तु तेषां सर्वं विधीयते १९
प्राजापत्यं चरेद्विप्रः पादोनं क्षत्रियश्चरेत्
कृच्छ्रार्द्धन्तु चरेद्वैश्यः पादं शूद्रस्य दापयेत् २०
द्वौ मासौ दापयेद्वत्सं द्वौ मासौ द्वौ स्तनौ दुहेत्
द्वौ मासावेकवेलायां शेषकाले यथारुचि २१
दशरात्रार्द्धमासेन गौस्तु यत्र विपद्यते
सशिखं वपनं कृत्वा प्राजापत्यं समाचरेत् २२
हलमष्टगवं धर्मं षड्गवं जीवितार्थिनाम्
चतुर्गवं नृशंसानां द्विगवञ्च जिघांसिनाम् २३
अतिवाहातिदोहाभ्यां नासिकाभेदने तथा
नदीपर्वतसंरोधे मृते पादोनमाचरेत् २४
न नारिकेलबालाभ्यां न मुञ्जेन न चर्म्मणा

एभिर्गास्तु न बध्नीयाद्बद्ध्वा परवशोभवेत्  २५
कुशैः काशैश्च बध्नीयाद्वृषभं दक्षिणामुखम्
पादलग्नाग्निदोषेषु प्रायश्चित्तं न विद्यते  २६
व्यापन्नानां बहूनान्तु रोधने बन्धनेऽपि च
भिषङ्मिथ्योपचारे च द्विगुणं गोव्रतञ्चरेत्  २७
शृङ्गभङ्गेऽस्थिभङ्गे च लाङ्गूलस्य च कर्त्तने
सप्तरात्रं पिबेद्दुग्धं यावत्स्वस्था पुनर्भवेत्  २८
गोमूत्रेण तु संमिश्रं यावकं भक्षयेद्द्विजः
एतद्विमिश्रितं चैव मुक्तञ्चोशनसा स्वयम्  २९
देवद्रोण्यां विहारेषु कूपेष्वायतनेषु च
एषु गोषु विपन्नासु प्रायश्चित्तं न विद्यते  ३०
एका पादात्तु बहुभिर्दैवाद्व्यापादिता क्वचित्
पादं पादन्तु हत्यायाश्चरेयुस्ते पृथक्पृथक्  ३१
यन्त्रणे गोश्चिकित्सार्थे मूढगर्भविमोचने
यत्ने कृते विपत्तिश्चेत्प्रायश्चित्तं न विद्यते  ३२
सरोमं प्रथमे पादे द्वितीये श्मश्रुकर्त्तनम्
तृतीये तु शिखा धार्य्या सशिखन्तु निपातने  ३३
सर्व्वान्केशान् समुद्धृत्य छेदयेदङ्गुलिद्वयम्
एवमेव तु नारीणां शिरसो मुण्डनं स्मृतम्  ३४
इत्यापस्तम्बीये धर्म्मशास्त्रे प्रथमोऽध्यायः

## अथ द्वितीयोऽध्यायः

अथ शुद्ध्यशुद्धिविवेकवर्णनम्
कारुहस्तगतं पुण्यं यच्च ग्रामाद्विनिःस्मृतम्
स्त्रीबालवृद्धाचरितं प्रत्यक्षादृष्टमेव च  १
प्रपास्वरण्येषु जलेऽथ नीरे द्रोण्यां जलं यच्च विनिःसृतं भवेत्

श्वपाकचाण्डालपरिग्रहेषु पीत्वा जलं पञ्चगव्येन शुद्धिः २
न दुष्येत्सन्तता धारा वातोद्धूताश्च रेणवः
स्त्रियो वृद्धाश्च बालाश्च न दुष्यन्ति कदाचन ३
आत्मशय्या च वस्त्रञ्च जायापत्यं कमण्डलुः
आत्मनः शुचिरेतानि परेषामशुचीनि तु ४
अन्यैस्तु खानिताः कूपास्तडागानि तथैव च
एषु स्नात्वा च पीत्वा पञ्चगव्येन शुध्यति ५
उच्छिष्टमशुचित्वञ्च यच्च विष्ठानुलेपनम्
सर्वं शुध्यति तोयेन तत्तोयं केन शुध्यति ६
सूर्य्यरश्मिनिपातेन मारुतस्पर्शनेन च
गवां मूत्रपुरीषेण तत्तोयं तेन शुध्यति ७
अस्थिचर्म्मादियुक्तन्तु खराश्वोष्ट्रोपदूषितम्
उद्धरेदुदकं सर्व्वं शोधनं परिमार्जनम् ८
कूपो मूत्रपुरीषेण ष्ठीवनेनापि दूषितः
श्वशृगालखरोष्ट्रैश्च क्रव्यादैश्च जुगुप्सितः ९
उद्धृत्यैव च तत्तोयं सप्तपिण्डान् समुद्धरेत्
पञ्चगव्यं मृदा पूतं कूपे तच्छोधनं स्मृतम् १०
बापीकूपतडागानां दूषितानाञ्च शोधनम्
कुम्भानां शतमुद्धृत्य पञ्चगव्यं ततः क्षिपेत् ११
यश्च कूपात्पिबेत्तोयं ब्राह्मणः शवदूषितात्
कथं तत्र विशुद्धिः स्यादिति मे संशयो भवेत् १२
अक्लिन्नेनाप्यभिन्नेन शवेन परिदूषिते
पीत्वा कूपे ह्यहोरात्रं पञ्चगव्येन शुध्यति १३
क्लिन्ने भिन्ने शवे चैव तत्रस्थं यदि तत् पिबेत्
शुद्धिश्चान्द्रायणं तस्य तप्तकृच्छ्रमथापि वा १४

इत्यापस्तम्बीये धर्मशास्त्रे द्वितीयोऽध्यायः

## अथ तृतीयोऽध्यायः

गृहेऽविज्ञातस्यान्त्यजातेनिवेशने बालादिविषये च प्रायश्चित्तम्

अन्त्यजातिमविज्ञातो निवसेद्यश्च वेश्मनि
सम्यग्ज्ञात्वा तु कालेन द्विजाः कुर्वन्त्यनुग्रहम्  १
चान्द्रायणं पराको वा द्विजातीनां विशोधनम्
प्राजापत्यन्तु शूद्रस्य शेषं तदनुसारतः  २
यैर्भुक्तं तत्र पक्वान्नं कृच्छ्रं तेषां प्रदापयेत्
तेषामपि च यैर्भुक्तं कृच्छ्रपादं प्रदापयेत्  ३
कूपैकपानैर्दुष्टानां स्पर्शने शवदूषणम्
तेषामेकोपवासेन पञ्चगव्येन शोधनम्  ४
बालो वृद्धस्तथा रोगी गर्भिणी वाऽपि पीडिता
तेषां नक्तं प्रदातव्यं बालानां प्रहरद्वयम्  ५
अशीतिर्यस्य वर्षाणि वालोवाप्यूनषोडशः
प्रायश्चित्ताद्ध मर्हन्ति स्त्रियो व्याधित एव च  ६
न्यूनकादशवर्षस्य पञ्चवर्षाधिकस्य च
चरेद्गुरुः सुहृद्वापि प्रायश्चित्तं विशोधनम्  ७
अथवा क्रियमाणेषु येषामार्त्तिः प्रदृश्यते
शेषसम्पादनाच्छुद्धिर्विपत्तिर्न भवेद्यथा  ८
क्षुधा व्याधितकायानां प्राणो येषां विपद्यते
ये न रक्षन्ति भक्तेन तेषां तत्किल्विषं भवेत्  ९
पूर्णेऽपि कालनियमे न शुद्धिर्ब्राह्मणैर्विना
अपूर्णेष्वपि कालेषु शोधयन्ति द्विजोत्तमाः  १०
समाप्तमिति नो वाच्यं त्रिषु वर्णेषु कर्हिचित्
विप्रसम्पादनं कार्यमुत्पन्ने प्राणसंशये  ११
सम्पादयन्ति यद्विप्राः स्नानतीर्थं फलञ्च तत्
सम्यक्कर्त्तुरपापं स्याद्व्रती च फलमाप्नुयात्  १२

इत्यापस्तम्बीये धर्मशास्त्रे तृतीयोऽध्यायः

## अथ चतुर्थोऽध्यायः

अथ चाण्डालकूपजलपानादौ पानादिषूदक्यादिसंस्पर्शे च प्रायश्चित्तं
चाण्डालकूपभाण्डेषु योऽज्ञानात्पिबते जलम्
प्रायश्चित्तं कथं तस्य वर्णे वर्णे विधीयते १
चरेत्सान्तपनं विप्रः प्राजापत्यन्तु भूमिपः
तदर्द्धन्तु चरेद्वैश्यः पादं शूद्रस्य दापयेत् ३
भुक्त्वोच्छिष्टस्त्वनाचान्तश्चाण्डालैः श्वपचेन वा
प्रमादात्स्पर्शनं गच्छेत्तत्र कुर्याद्विशोधनम् ४
गायत्र्यष्टसहस्रन्तु द्रुपदां वा शतं जपेत्
जपं त्रिरात्रमनश्नन् पञ्चगव्येन शुध्यति ५
चाण्डालेन यदा स्पृष्टो विण्मूत्रे च कृते द्विजः
प्रायश्चित्तं त्रिरात्रं स्याद्भुक्त्वोच्छिष्टः षडाचरेत् ६
पानमैथुनसम्पर्के तथा मूत्रपुरीषयोः
सम्पर्कं यदि गच्छेत्तु उदक्या चान्त्यजैस्तथा ७
एतैरेव यदा स्पृष्टः प्रायश्चित्तं कथं भवेत्
भोजने च त्रिरात्रं स्यात्पाने तु त्र्यहमेव च ८
मैथुने पादकृच्छ्रं स्यात्तथा मूत्रपुरीषयोः
दिनमेकं तथा मूत्रे पुरीषे तु दिनत्रयम् ९
एकाहं तत्र निर्द्दिष्टं दन्तधावनभक्षणे १०
वृक्षारूढे तु चाण्डाले द्विजस्तत्रैव तिष्ठति
फलानि भक्षयेत्तस्य कथं शुद्धिं विनिर्द्दिशेत् ११
ब्राह्मणान्समनुज्ञाप्य सवासाः स्नानमाचरेत्
एकरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति १२
येन केनचिदुच्छिष्टो अमेध्यं स्पृशति द्विजः

अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति १३
इत्यापस्तम्बीये धर्मशास्त्रे चतुर्थोऽध्यायः

अथ पञ्चमोऽध्यायः
अथ वैश्यान्त्यजश्वकाकोच्छिष्टभोजनेप्रायश्चित्तवर्णनम्
चाण्डालेन यदा स्पृष्टो द्विजवर्णः कदाचन
अनभ्युद्य पिवेत्तोयं प्रायश्चित्तं कथं भवेत् १
ब्राह्मणस्तु त्रिरात्रेण पञ्चगव्येन शुध्यति
क्षत्रियस्तु द्विरात्रेण पञ्चगव्येन शुध्यति २
चतुर्थस्य तो वर्णस्य प्रायश्चित्तं न वै भवेत्
व्रतं नास्ति तपो नास्ति होमो नैव च विद्यते ३
पञ्चगव्यं न दातव्यं तस्य मन्त्रविवर्जनात्
ख्यापयित्वा द्विजानान्तु शूद्रो दानेन शुध्यति ४
ब्राह्मणस्य यदोच्छिष्टमश्नात्यज्ञानतो द्विजः
अहोरात्रन्तु गायत्र्या जपं कृत्वा विशुध्यति ५
उच्छिष्टं वैश्यजातीनां भुङ्क्ते ज्ञानाद्द्विजो यदि
शङ्खपुष्पीपयः पीत्वा त्रिरात्रेणैव शुध्यति ६
ब्राह्मण्या सह योऽश्नीयादुच्छिष्टं वा कदाचन
न तत्र दोषं मन्यन्ते नित्यमेव मनीषिणः ७
उच्चिष्टमितरस्त्रीणामश्नीयात् पिवतेऽपिवा
प्राजापत्येन शुद्धिः स्याद्भगवानङ्गिराब्रवीत् ८
अन्त्यानां भुक्तशेषन्तु भक्षयित्वा द्विजातयः
चान्द्रायणं तदर्द्धार्द्धं ब्रह्मक्षत्रविशां विधिः ९
विण्मूत्रभक्षणे विप्रस्तप्तकृच्छ्रं समाचरेत्
श्वकाकोच्छिष्टभोगे च प्राजापत्यविधिः स्मृतः १०
उच्छिष्टः स्पृशते विप्रो यदि कश्चिदकामतः

शुनः कुक्कुटशूद्रांश्च मद्यभाण्डं तथैव च  ११
पक्षिणाधिष्ठितं यच्च यदमेध्यं कदाचन
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति  १२
वैश्येन च यदा स्पृष्ट उच्छिष्टेन कदाचन
स्नानं जपञ्च त्रैकाल्यं दिनस्यान्ते विशुध्यति  १३
विप्रोविप्रेण संस्पृष्ट उच्छिष्टेन कदाचन
स्नात्वाचम्य विशुद्धः स्यादापस्तम्बोऽब्रवीन्मुनिः  १४
इत्यापस्तम्बीये धर्मशास्त्रे पञ्चमोऽध्यायः

## षष्ठोऽध्यायः

अथ नीलीवस्त्रधारणे नीलीभक्षणे प्रायश्चित्तम्
अत ऊर्द्ध्वं प्रवक्ष्यामि नीलीवस्त्रस्य यो विधिः
स्त्रीणां क्रीडाथसम्भोगे शयनीये न दुष्यति  १
पालने विक्रये चैव तद्वृत्तेरुपजीवने
पतितस्तु भवेद्विप्र स्त्रिभिः कृच्छ्रैर्विशुध्यति  २
स्नानं दानं तपोहोमः स्वाध्यायः पितृतपणम्
पञ्चयज्ञा वृथा तस्य नीलीवस्त्रस्य धारणात्  ३
नीलीरक्तं यदा वस्त्रं ब्राह्मणोऽङ्गेषु धारयेत्
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति  ४
रोमकूपैर्यदा गच्छेद्रसो नील्यास्तु कर्हिचित्
पतितस्तु भवेद्विप्रस्त्रिभिः कृच्छ्रैर्विशुध्यति  ५
नीलीदारु यदा भिन्द्याद् ब्राह्मणस्य शरीरकम्
शोणितं दृश्यते तत्र द्विजश्चान्द्रायणं चरेत्  ६
नीलीमध्ये यदा गच्छेत्प्रमादाद्ब्राह्मणः क्वचित्
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति  ७
नीलीरक्तेन वस्त्रेण यदन्नमुपनीयते

अभोज्यं तद्द्विजातीनां भुक्त्वा चन्द्रायणं चरेत् ८
भक्षयेद्यस्य नीलीन्तु प्रमादाद् ब्राह्मणः क्वचित्
चान्द्रायणेन शुद्धिः स्यादापस्तम्बोऽब्रवीन्मुनिः ९
यावत्यां वापिता नीली तावती चाशुचिर्मही
प्रमाणं द्वादशाब्दानि अत ऊर्द्ध्वं शुचिर्भवेत् १०
इत्यापस्तम्बीये धर्म्मशास्त्रे षष्ठोऽध्यायः

अथ सप्तमोऽध्यायः

अन्त्यजादिस्पर्शैरजस्वलायाः विवाहादिषु कन्याया रजोदर्शने प्रायश्चित्तम् ।

स्नानं रजस्वलायास्तु चतुर्थेऽहनि शस्यते
वृत्ते रजसि गम्या स्त्री नानिवृत्ते कथञ्चन १
रोगेण यद्रजः स्त्रीणामत्यर्थं हि प्रवर्तते
अशुद्धास्तु न तेनेह तासां वैकारिकं हि तत् २
साध्वाचारा न सा तावद्रजो यावत्प्रवर्तते
वृत्ते रजसि साध्वी स्याद्गृहकर्म्मणि चैन्द्रिये ३
प्रथमेऽहनि चाण्डाली द्वितीये ब्रह्मघातिनी
तृतीये रजकी प्रोक्ता चतुर्थेहनि शुध्यति ४
अन्त्यजातिश्वपाकेन संस्पृष्टा वै रजस्वला
अहानि तान्यतिक्रम्य प्रायश्चित्तं प्रकल्पयेत् ५
त्रिरात्रमुपवासः स्यात्पञ्चगव्यं विशोधनम्
निशां प्राप्य तु तां योनिं प्रजाकारञ्च कारयेत् ६
रजस्वलां त्यजेत् स्पृष्टां शुना च श्वपचेन च
त्रिरात्रोपोषितो भूत्वा पञ्चगव्येन शुध्यति ७
प्रथमेऽहनि षड्रात्रं द्वितीये तु त्र्यहन्तथा
तृतीये चोपवासस्तु चतुर्थे वह्निदर्शनात् ८

विवाहे वितते यज्ञे संस्कारे च कृते तथा
रजस्वला भवेत् कन्या संस्कारस्तु कथं भवेत् ९
स्नापयित्वा तदा कन्यामन्यैर्वस्त्रैरलङ्कृताम्
पुनः प्रत्याहुतिं हुत्वाशेषं कर्म्म समाचरेत् १०
रजस्वला तु संस्पृष्टा प्लवकुक्कुटवायसैः
सा त्रिरात्रोपवासेन पञ्चगव्येन शुध्यति ११
उच्छिष्टेन तु संस्पृष्टा कदाचित्स्त्री रजस्वला
कृच्छ्रेण शुद्धते विप्रस्तथा दानेन शुध्यति १२
एकशाखासमारूढा चाण्डाला वा रजस्वला
ब्राह्मणेन समं तत्र सवासाः स्नानमाचरेत् १३
रजस्वलायाः संस्पर्श कथञ्चिज्जायते शुना
रजोदिनात्तु यच्छेषस्तदुपोष्य विशुध्यति १४
अशक्ता चोपवासे तु स्नानं पश्चात् समाचरेत्
तत्राप्यशक्ता चैकेन पञ्चगव्यं पिबेत्ततः १५
उच्छिष्टस्तु यदा विप्रः स्पृशेन्मद्यं रजस्वलाम्
मद्यं स्पृष्ट्वा चरेत्कृच्छ्रं तदर्द्धन्तु रजस्वलाम् १६
उदक्यां सूतिकां विप्र उच्छिष्टः स्पृशते यदि
कृच्छ्रार्द्धन्तु चरेद्विप्रः प्रायश्चित्तं विशोधनम् १७
चाण्डालैः श्वपचैर्वापि आत्रेयी स्पृशते यदि
शेषाहात्फालकृष्टेन पञ्चगव्येन शुध्यति १८
उदक्या ब्राह्मणी शूद्रामुदक्यां स्पृशते यदि
अहोरात्रोषिता भूत्वा पञ्चगव्येन शुध्यति १९
एवञ्च क्षत्रियां वैश्यां ब्राह्मणी चेद्रजस्वलाम्
सचेलप्लवनं कृत्वा दिनस्यान्ते घृतं पिबेत् २०
सवर्णेषु तु नारीणां सद्यः स्नानं विधीयते
एवमेव विशुद्धिः स्यादापस्तम्बोऽब्रवीन्मुनिः २१

इत्यापस्तम्बीये धर्म्मशास्त्रे सप्तमोऽध्यायः

अथ अष्टमोऽध्यायः

सुरादिदूषितकांस्यशुद्धिविधानवर्णनम्
भस्मना शुध्यते कांस्यं सुरया यन्न लिप्यते
सुराविरामूत्रसंस्पृष्टं शुध्यते तापलेखनैः ११
गवाघ्रातानि कांस्यानि शुद्धोच्छिष्टानि यानि तु
दशभिः क्षारैः शुध्यन्ति श्वकाकोपहतानि च २
शौचं सुवर्णनारीणां वायुसूर्य्येन्दुरश्मिभिः ३
रेतस्पृष्टं शवस्पृष्टमाविकन्तु प्रदुष्यति
अद्भिर्मृदा च तन्मात्रं प्रक्षाल्य च विशुध्यति ४
शुद्धमन्नमविप्रस्य पञ्चरात्रेण जीर्य्यति
अन्नं व्यञ्जनसंयुक्तमर्द्धमासेन जीर्य्यति ५
पयस्तु दधि मासेन षरामासेन घृतं तथा
सम्वत्सरेण तैलन्तु कोष्ठे जीर्य्यति वा नवा
भुञ्जते ये तु शूद्रान्नं मासमेकं निरन्तरम्
इह जन्मनि शूद्रत्वं जायन्ते ते मृताः शुनि ७
शूद्रान्नं शूद्रसम्पर्कः शूद्रेणैव सहासनम्
शूद्रात् ज्ञानागमः कश्चिज्ज्वलन्तमपि पातयेत् ८
आहित्याग्निस्तु योविप्रः शूद्रान्नान्न निवर्तते
तथा तस्य प्रणश्यन्ति आत्मा ब्रह्म त्रयोऽग्नयः ९
शूद्रान्नेन तु भुक्तेन मैथुनं योऽधिगच्छति
यस्यान्नं तस्य ते पुत्रा ह्यन्याच्छुक्रस्य सम्भवः १०
शूद्रान्नेनोदरस्थेन यः कश्चिन्म्रियते द्विजः
स भवेच्छूकरो ग्राम्यो मृतः श्वा वाथ जायते ११
ब्राह्मणस्य सदा भुङ्क्ते क्षत्रियस्य तु पर्वणि

वैश्यस्य यज्ञदीक्षायां शूद्रस्य न कदाचन १२
अमृतं ब्राह्मणस्यान्नं क्षत्रियस्य पयः स्मृतम्
वैश्यस्याप्यन्नमेवान्नं शूद्रस्य रुधिरं स्मृतम् १३
वैश्वदेवेन होमेन देवताभ्यर्च्चनैर्जपैः
अमृतं तेन विप्रान्नमृग्यजुःसामसंस्कृतम् १४
व्यवहारानुरूपेण धर्मेण च्छलवर्जितम्
क्षत्रियस्य पयस्तेन भूतानां यच्च पालनम् १५
स्वकर्म्मणा च वृषभैरनुसृत्याद्यशक्तितः
खलयज्ञातिथित्वेन वैश्यान्नन्तेन संस्कृतम् १६
अज्ञानतिमिरान्धस्य मद्यपानरतस्य च
रुधिरं तेन शूद्रान्नं विधिमन्त्रविवर्जितम् १७
आममांसं मधु घृतं धानाः क्षीरं तथैव च
गुडं तक्रं समं ग्राह्यं निवृत्तेनापि शूद्रतः १८
शाकं मांसं मृणालानि तुम्बुरुः शक्तवस्तिलाः
रसाः फलानि पिण्याकं प्रतिग्राह्या हि सर्वतः १९
आपत्काले तु विप्रेण भुक्तं शूद्रगृहे यदि
मनस्तापेन शुध्येत द्रुपदां वा शतं जपेत् २०
द्रव्यपाणिश्च शूद्रेण स्पृष्टोच्छिष्टेन कर्हिचित्
तद्द्विजेन न भोक्तव्यमापस्तम्बोऽब्रवीन्मुनिः २१
इत्यापस्तम्बीये धर्म्मशास्त्रेऽष्टमोऽध्यायः

## अथ नवमोऽध्यायः

अपेयपानेऽभक्ष्यभक्षणे च प्रायश्चित्तवर्णनम्
भुञ्जानस्य तु विप्रस्य कदाचित्स्रवते गुदम्
उच्छिष्टस्याशुचेस्तस्य प्रायश्चित्तं कथं भवेत् १
पूर्वं शौचन्तु निर्वर्त्य ततः पश्चादुपस्पृशेत्

अहोरात्रोषितोभूत्वा पञ्चगव्येन शुध्यति २
अशित्वा सर्वमेवान्नमकृत्वा शौचमात्मनः
मोहाद्भुक्त्वा त्रिरात्रन्तु यवान् पीत्वा विशुध्यति ३
प्रसृतं यवशस्येन पलमेकन्तु सर्पिषा
पलानि पञ्च गोमूत्रं नातिरिक्तवदाशयेत् ४
अलेह्यानामपेयानामभक्ष्याणाञ्च भक्षणे
रेतोमूत्रपुरीषाणां प्रायश्चित्तं कथं भवेत् ५
पद्मोदुम्बरबिल्वाश्च कुशाश्वत्थपलाशकाः
एतेषामुदकं पीत्वा षड्रात्रेण विशुध्यति ६
ये प्रत्यवसिता विप्राः प्रव्रज्याग्निजलादिषु
अनाशकनिवृत्ताश्च गृहस्थत्वं चिकीर्षतः ७
चरेयुस्त्रीणि कृच्छ्राणि त्रीणि चान्द्रायणानि वा
जातकर्मादिभिः सर्वैः पुनः संस्कारभागिनः
तेषां सान्तपनं कृच्छ्रं चान्द्रायणमथापिवा ८
यद्वेष्टितं कालवलाकचिल्लैरमेध्यलिप्तञ्च भवेच्छरीरम्
श्रोत्रे मुखे च प्रविशेच्च सम्यक्स्नानेन लेपोपहतस्य शुद्धिः ९
ऊर्द्ध्वं नाभेः करौ मुक्त्वा यदङ्गमुपहन्यते
ऊर्द्ध्वं स्नानमधः शौचं मार्जनेनैव शुध्यति १०
उपानहावमेध्यं वा यस्य संस्पृशते मुखम्
मृत्तिकाशोधनं स्नानं पञ्चगव्यं विशोधनम् ११
दशाहाच्छुध्यते विप्रो जन्महानौ स्वयोनिषु
षड्भिस्त्रिभिरथैकेन क्षत्रविट्शूद्रयोनिषु १२
उपनीतं यदा त्वन्नं भोक्ता च समुपस्थितः
अपीतवत्समुत्सृष्टं न दद्यान्नैव होमयेत् १३
अन्ने भोजनसम्पन्ने मक्षिकाकेशदूषिते
अनन्तरं स्पृशेदापस्तच्चान्नं भस्मना स्पृशेत् १४

शुष्कमांसमयं चान्नं शूद्रान्नं वाप्यकामतः
भुक्त्वा कृच्छ्रं चरेद्विप्रो ज्ञानात्कृच्छ्रत्रयं चरेत् १५
अभुक्ते मुञ्चते यश्च भुञ्जन् यश्चापि सुच्यते
भोक्ता च भोजकश्चैव पङ्क्त्या गच्छति दुष्कृतम् १६
यच्च भुङ्क्ते तु भुक्तं वा दुष्टं वाऽपि विशेषतः
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति १७
उदके चोदकस्थस्तु स्थलस्थश्च स्थले शुचिः
पादौ स्थाप्योभयत्रैव आचम्योभयतः शुचिः १८
उत्तीर्य्याचम्य उदकादवतीर्य्य उपस्पृशेत्
एवन्तु श्रेयसा युक्तो वरुणेनाभिपूज्यते १९
अग्न्यगारे गवां गोष्ठे ब्राह्मणानाञ्च सन्निधौ
स्वाध्याये भोजने चैव पादुकानां विसर्जनम् २०
जम्मप्रभृतिसंस्कारे श्मशानान्ते च भोजनम्
असपिण्डैर्न कर्तव्यं चूडाकार्ये विशेषतः २१
याजकान्नं नवश्राद्धं सग्रहे चैव भोजनम्
स्त्रीणां प्रथमगर्भे च भुक्त्वा चान्द्रायणं चरेत् २२
ब्रह्मौदने च श्राद्धे च सीमन्तोन्नयने तथा
अन्नश्राद्धे मृतश्राद्धे भुक्त्वा चान्द्रायणं चरेत् २३
अप्रजा या तु नारी स्यान्नाश्नीयादेव तद्गृहे
अथ भुञ्जीत मोहाद्यः पूयसं नरकं व्रजेत् २४
अल्पेनापि हि शुल्केन पिता कन्यां ददाति यः
रौरवे बहुवर्षाणि पुरीषं मूत्रमश्नुते २५
स्त्रीधनानि च ये मोहादुपजीवन्ति बान्धवाः
स्वर्णं यानानि वस्त्राणि ते पापा यान्त्यधोगतिम् २६
राजान्नं तेजआदत्ते शूद्रान्नं ब्रह्मवर्चसम्
असंस्कृतन्तु योभुङ्क्ते स भुङ्क्ते पृथिवीमलम् २७

मृतके सूतके चैव गृहीते शशिभास्करे
हस्तिच्छायान्तु यो भुङ्क्ते पापः स पुरुषो भवेत् २८
पुनर्भूः पुनरेता च रेतोधा कामचारिणी
आसां प्रथमगर्भेषु भुक्त्वा चान्द्रायणं चरेत् २९
मातृघ्नश्च पितृघ्नश्च ब्रह्मघ्नो गुरुतल्पगः
विशेषाद्भुक्तमेतेषां भुक्त्वा चान्द्रायणं चरेत् ३०
रजकव्याधशैलूषवेणुचर्मोपजीविनाम्
भुक्त्वैषां ब्राह्मणश्चान्नं शुद्धिं चान्द्रायणेन तु ३१
उच्छ्रिष्टोच्छिष्टसंस्पृष्टः कदाचिदुपजायते
सवर्णेन तदोत्थाय उपस्पृश्य शुचिर्भवेत्
उच्छिष्टोच्छिष्टसंस्पृष्टः शुना शूद्रेण वा द्विजः
उपोष्य रजनीमेकां पञ्चगव्येन शुद्ध्यति ३२
ब्राह्मणस्य सदाकालं शूद्रे प्रेषणकारिणः
भूमावन्नं प्रदातव्यं यथैव श्वा तथैव सः ३३
अनूदकेष्वरण्येषु चौरव्याघ्राकुले पथि
कृत्वा मूत्रं पुरीषञ्च द्रव्यहस्तः कथं शुचिः ३४
भूमावन्नं प्रतिष्ठाप्य कृत्वा शौचं यथार्थतः
उत्सङ्गे गृह्य पक्वान्नमुपस्पृश्य ततः शुचिः ३५
मूत्रोच्चारं द्विजः कृत्वा अकृत्वा शौचमात्मनः
मोहाद्भुक्त्वा त्रिरात्रन्तु गव्यं पीत्वा विशुध्यति ३६
उदक्यां यदि गच्छेत्तु ब्राह्मणो मदमोहितः
चान्द्रायणेन शुध्येतब्राह्मणानांच भोजनैः ३७
भुक्तोच्छिष्टस्त्वनाचान्तश्चाण्डालैः श्वपचेन वा
प्रमादाद्यदि संस्पृष्टो ब्राह्मणो ज्ञानदुर्बलः ३८
स्नात्वा त्रिषवणं नित्यं ब्रह्मचारी धराशयः
स त्रिरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ३९

चाण्डालेन तु संस्पृष्टो यश्चापः पिबति द्विजः
अहोरात्रोषितो भूत्वा त्रिषवणेन शुध्यति ४०
सायं प्रातस्त्वहोरात्रं पादं कृच्छ्रस्य तं विदुः
सायं प्रातस्तथैवैकं दिनद्वयमयाचितम् ४१
दिनद्वयञ्च नाश्नीयात्कृच्छ्रार्द्धं तद्विधीयते
प्रायश्चित्तं लघु ह्येतत्पापेषु तु यथाऽहतः ४२
कृष्णाजिनतिलग्राही हस्त्यश्वानाञ्च विक्रयी
प्रेतनिर्यातकश्चैव न भूयः पुरुषोभवेत् ४३
इत्यापस्तम्बीये धर्मशास्त्रे नवमोऽध्यायः

अथ दशमोऽध्यायः

अथ मोक्षाधिकारिणामभिधानवर्णनम्
आचान्तोऽप्यशुचिस्तावद्यावन्नोद्ध्रियते जलम्
उद्धृतेऽप्यशुचिस्तावद्यावद्भूमिर्न लिप्यते १
भूमावपि च लिप्तायां तावत्स्यादशुचिः पुमान्
आसनादुत्थितस्तस्माद्यावन्नाऽऽक्रमते महीम् २
न यमं यममित्याहुरात्मा वै यम उच्यते
आत्मा संयमितो येन तं यमः किं करिष्यति ३
न तथाऽसिस्तथा तीक्ष्णः सर्पो वा दुरधिष्ठितः
यथा क्रोधो हि जन्तूनां शरीरस्थो विनाशकः ४
क्षमा गुणो हि जन्तूनामिहामूत्रसुखप्रदः
अरिर्वानित्यसंक्रुद्धो यथाऽऽत्मादुरधिष्ठितः
एकः क्षमावतां दोषो द्वितीयो नोपपद्यते
यदेनं क्षमया युक्तमशक्तं मन्यते जनः ५
न शक्तिशास्त्राभिरतस्य मोक्षो नचैव रम्यावसथप्रियस्य
न भोजनाच्छादनतत्परस्य एकान्तशीलस्य दृढव्रतस्य ६

मोक्षो भवेत् प्रीतिनिवर्त्तकस्य अध्यात्मयोगैकरतस्य सम्यक्
मोक्षो भवेन्नित्यमहिंसकस्य स्वाध्याययोगागतमानसस्य ७
क्रोधयुक्तो यद्यजते यज्जुहोति यदर्च्चति
सर्वं हरति दत्तस्य आमकुम्भ इवोदकम् ८
अपमानात्तपोवृद्धिः सम्मानात्तपसः क्षयः
अर्चितः पूजतो विप्रो दुग्धा गौरिव सीदति ९
आप्यायते यथा धेनुस्तृणैरमृतसम्भवैः
एवं जपश्च होमैश्च पुनराप्यायते द्विजः १०
मातृवत् परदारांश्च परद्रव्याणि लोष्ट्रवत्
आत्मवत् सवभूतानि यः पश्यति स पश्यति ११
रजकव्याधशैलूषवेणुचर्मोपजीविनाम्
यो भुङ्क्ते भुक्तमेतेषां प्राजापत्यं विशोधनम् १२
अगम्यागमनं कृत्वा अभक्ष्यस्य च भक्षणम्
शुद्धिं चान्द्रायणं कृत्वा अथर्वोक्तं तथैव च १३
अग्निहोत्रं त्यजेद्यस्तु स नरोवीरहा भवेत्
तस्य शुद्धिर्विधातव्या नान्या चान्द्रायणादृते १४
विवाहोत्सवयज्ञेषु अन्तरा मृतसूतके
सद्यः शुद्धिं विजानीयात्पूर्वं सङ्कल्पितं चरेत् १५
देवद्रोण्यां विवाहेषु यज्ञेषु प्रतरेषु च
कल्पितं सिद्धमन्नाद्यं नाशौचं मृतसूतके १६

इत्यापस्तम्बीये धर्मशास्त्रे दशमोऽध्यायः

समाप्ताचेयमापस्तम्बस्मृतिः

Reference:

*Smṛti Sandarbha*, Vol. III, (Delhi: Nag, 1981) p. 1387.

# दक्षस्मृतिः

## प्रथमोऽध्यायः

श्रीगणेशाय नमः

अथादौ आश्रमवर्णनम् ।

सर्वधर्मार्थतत्त्वज्ञ सर्ववेदविदां वरः
पारगः सर्व्वविद्यानां दक्षो नाम प्रजापतिः १
उत्पत्तिः प्रलयश्चैव स्थितिः संहार एव च
आत्मा चात्मनि तिष्ठेत आत्मा ब्रह्मण्यवस्थितः २
ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा
एतेषान्तु हितार्थाय दक्षः शास्त्रमकल्पयत् ३
जातमात्रः शिशुस्तावद्यावदष्टौ समा वयः
सहि गर्भसमो ज्ञेयो व्यक्तिमात्रप्रदर्शितः ४
भक्ष्याभक्ष्ये तथा पेये वाच्यावाच्ये तथानृते
तस्मिन् काले न दोषोऽस्ति स यावन्नोपनीयते ५
उपनीतस्य दोषोऽस्ति क्रियमाणैर्विगर्हितैः
अप्राप्तव्यवहारोऽसौ यावत् षोडशवार्षिकः ६
स्वीकरोति यदा वेदं चरेद्वेदव्रतानि च
ब्रह्मचारी भवेत्तावदूर्द्ध्वं स्नातो भवेद्गृही ७
द्विविधो ब्रह्मचारी तु स्मृतः शास्त्रे मनीषिभिः
उपकुर्वाणकस्त्वाद्यो द्वितीयो नैष्ठिकः स्मृतः ८
यो गृहाश्रममास्थाय ब्रह्मचारी भवेत् पुनः
न यतिर्न वनस्थश्च सर्व्वाश्रमविवर्ज्जितः ९
अनाश्रमी न तिष्ठेत्तु दिनमेकमपि द्विजः
आश्रमेण विना तिष्ठन् प्रायश्चित्तीयते हि सः १०
जपे होमे तथा दाने स्वाध्याये च रतस्तु यः
नासौ तत्फलमाप्नोति कुर्वाणोऽप्याश्रमाच्च्युतः

त्रयाणामानुलोम्यं हि प्रातिलोम्यं न विद्यते ११
प्रातिलोम्येन यो याति न तस्मात् पापकृत्तमः
मेखलाजिनदण्डेन ब्रह्मचारी तु लक्ष्यते १२
गृहस्थो देवयज्ञाद्यैर्नखलोम्ना वनाश्रितः
त्रिदण्डेन यतिश्चैव लक्षणानि पृथक्पृथक् १३
यस्यैतल्लक्षणं नास्ति प्रायश्चित्ती नचाश्रमी
उक्त कर्म क्रमोनोक्तो न कालो मुनिभिः स्मृतः
द्विजानान्तु हितार्थाय दक्षस्तु स्वयमब्रवीत् १४
इति दाक्षे धर्मशास्त्रे प्रथमोऽध्यायः

अथ द्वितीयोऽध्यायः

प्रातरुत्थाय कर्त्तव्यं यद्द्विजेन दिने दिने
तत्सर्वं संप्रवक्ष्यामि द्विजानामुपकारकम् १
उदयास्तमयं यावन्न विप्रः क्षणिकोभवेत्
नित्यनैमित्तिकैर्मुक्तः काम्यैश्चान्यैरगर्हितैः २
यः स्वकर्म परित्यज्य यदन्यत्कुरुते द्विजः
अज्ञानाद्यदि वा मोहात्स तेन पतितो भवेत् ३
दिवसस्याद्यभागे तु कृत्यं तस्योपदिश्यते
द्वितीये च तृतीये च चतुर्थे पञ्चमे तथा ४
षष्ठे च सप्तमे चैव अष्टमे च पृथक् पृथक्
विभागेष्वेषु यत्कर्म तत्प्रवक्ष्याम्यशेषतः ५
उषःकाले तु सम्प्राप्ते शौचं कृत्वा यथार्थवत्
ततः स्नानं प्रकुर्वीत दन्तधावनपूर्वकम् ६
अत्यन्तमलिनः कायो नवच्छिद्रसमन्वितः
स्रवत्येष दिवारात्रौ प्रातःस्नानं विशोधनम् ७
क्लिद्यन्ति हि प्रसुप्तस्य इन्द्रियाणि स्रवन्ति च

अङ्गानि समतां यान्ति उत्तमान्यधमैः सह ८
नानास्वेदसमाकीर्णः शयनादुत्थितः पुमान्
अस्नात्वा नाचरेत्कर्म जपहोमादि किञ्चन ९
प्रातरुत्थाय यो विप्रः प्रातस्नायी भवेत् सदा
समस्तजन्मजं पापं त्रिभिर्वर्षैर्व्यपोहति १०
उषस्युषसि यत्स्नानं सन्ध्यायामुदिते रवौ
प्राजापत्येन तत्तुल्यं महापातकनाशनम् ११
प्रातःस्नानं प्रशंसन्ति दृष्टादृष्टकरं हि तत्
सर्वमर्हति पूतात्मा प्रातःस्नायी जपादिकम् १२
स्नानादनन्तरं तावदुपस्पर्शनमुच्यते
अनेन तु विधानेन आचान्तः शुचिता मियात् १३
प्रक्षाल्य पादौ हस्तौ च त्रिः पिवेदम्बु वीक्षितम्
संवृत्याङ्गुष्ठमूलेन द्विः प्रमृज्यात्ततोमुखम् १४
संहत्य तिसृभिः पूर्वमास्यमेवमुपस्पृशेत्
ततः पादौ समभ्युक्ष्य अङ्गानि समुपस्पृशेत् १५
अङ्गुष्ठेन प्रदेशिन्या घ्राणं पश्चादनन्तरम्
अङ्गुष्ठानामिकाभ्याञ्च चक्षुःश्रोत्रे पुनः पुनः १६
कनिष्ठाङ्गुष्ठया नाभिं हृदयञ्च तलेन वै
सर्व्वाभिस्तु शिरः पश्चाद्बाहू चाग्रेण संस्पृशेत् १७
सन्ध्यायाञ्च प्रभाते च मध्याह्ने च ततः पुनः
सन्ध्यां नोपासते यस्तु ब्राह्मणो हि विशेषतः १८
स जीवन्नेव शूद्रः स्यान्मृतः श्वा चैव जायते
सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु १९
यदन्यत्कुरुते कर्म न तस्य फलमश्नुते
सन्ध्याकर्मावसाने तु स्वयं होमो विधीयते
स्वयं होमे फलं यत्तु तदन्येन न जायते २०

ऋत्विक्पुत्रो गुरुर्भ्राता भागिनेयोऽथ विट्पतिः
एभिरेव हुतं यत्तु तद्धुतं स्वयमेव हि २१
देवकार्य्यं ततः कृत्वा गुरुमङ्गलवीक्षणम्
देवकार्य्याणि पूर्व्वाह्णे मनुष्याणाञ्च मध्यमे २२
पितृणामपराह्णे च कार्य्याण्येतानि यत्नतः
पौर्व्वाह्णिकन्तु यत् कर्म यदि तत्सायमाचरेत् २३
न तस्य फलमाप्नोति बन्ध्यास्त्रीमैथुनं यथा
दिवसस्याद्यभागे तु सर्वमेतद्विधीयते २४
द्वितीये च तथाभागे वेदाभ्यासो विधीयते
वेदाभ्यासो हि विप्राणां परमं तप उच्यते २५
ब्रह्मयज्ञः स विज्ञेयः षडङ्गसहितस्तु सः
वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः २६
ततोदानञ्च शिष्येभ्यो वेदाभ्यासो हि पञ्चधा
समित्पुष्पकुशादीनां स कालः समुदाहृतः २७
तृतीये चैव भागे तु पोष्यवर्गार्थसाधनम्
पिता माता गुरुर्भार्य्या प्रजादीनाः समाश्रिताः २८
अभ्यागतोऽतिथिश्चान्यः पोष्यवर्ग उदाहृतः
ज्ञातिर्बन्धुजनः क्षीणस्तथानाथः समाश्रितः २९
अन्येऽप्यधनयुक्ताश्च पोष्यवर्ग उदाहृतः
भरणं पोष्यवर्गस्य प्रशस्तं स्वर्गसाधनम् ३०
नरकं पीडने चास्य तस्माद्यत्नेन तं भरेत्
सार्वभौतिकमन्नाद्यं कर्त्तव्यन्तु विशेषतः
ज्ञानविद्भिः प्रदातव्यमन्यथा नरकं व्रजेत् ३१
स जीवति य एवैको बहुभिश्चोपजीव्यते
जीवन्तो मृतकाश्चान्ये य आत्मम्भरयो नराः
वह्वर्थे जीव्यते कश्चित्कुटुम्बार्थे तथा परैः ३२

आत्मार्थेऽन्यो न शक्नोति स्वोदरेणापि दुःखितः
दीनानाथविशिष्टेभ्यो दातव्यं भूतिमिच्छता ३३
अदत्तदाना जायन्ते परभाग्योपजीविनः
यद्ददाति विशिष्टेभ्यो यज्जुहोति दिने दिने ३४
तत्तु वित्तमहं मन्ये शेषं कस्यापि रक्षति
चतुर्थे च तथा भागे स्नानार्थं मृदमाहरेत् ३५
तिलपुष्पकुशादीनि स्नानञ्चाकृत्रिमे जले
नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते ३६
तेषां मध्ये तु यन्नित्यं तत्पुनर्भिद्यते त्रिधा
मलापहरणं पश्चान्मन्त्रवत्तु जले स्मृतम् ३७
सन्ध्यास्नानमुभाभ्याञ्च स्नानभेदाः प्रकीर्तिताः
मार्जनं जलमध्ये तु प्राणायामो यतस्ततः ३८
उपस्थानं ततः पश्चात्सावित्र्या जप उच्यते
सविता देवता यस्या सुखमग्निस्त्रिधा स्थितः ३९
विश्वमित्रऋषिश्छन्दो गायत्री सा विशिष्यते
पञ्चमे च तथाभागे संविभागो यथार्हतः ४०
पितृदेवमनुष्याणां कीटानाञ्चोपदिश्यते
देवैश्चैव मनुष्यैश्च तिर्य्यग्भिश्चोपजीव्यते ४१
गृहस्थः प्रत्यहं यस्मात्तस्माज्ज्येष्ठाश्रमी गृही
त्रयाणामाश्रमाणान्तु गृहस्थो योनिरुच्यते ४२
तेनैव सीदमानेन सीदन्तीहेतरे त्रयः
मूलप्राणो भवेत् स्कन्दः स्कान्दाच्छाखाः सपल्लवाः ४३
मूलेनैव विनष्टेन सर्वमेतद्विनश्यति
तस्मात्सर्वप्रयत्नेन रक्षितव्यो गृहाश्रमी ४४
राज्ञा चान्यैस्त्रिभिः पूज्यो माननीयश्च सर्वदा
गृहस्थोऽपि क्रियायुक्तो न गृहेण गृहाश्रमी ४५

न चैव पुत्रदारेण स्वकर्मपरिवर्जितः
अस्नात्वा चाप्यहुत्वा चाजप्त्वाऽदत्त्वा च मानवः ४६
देवादीनामृणी भूत्वा नरकं प्रतिपद्यते
एक एव हि भुङ्क्तेऽन्नमपरोऽन्नेन भुज्यते ४७
न भुज्यते स एवैको योभुङ्क्तेऽन्नं ससाक्षिणा
विभागशीलो योनित्यं क्षमायुक्तोदयापरः ४८
देवतातिथिभक्तश्च गृहस्थः स तु धार्मिकः
दया लज्जा क्षमा श्रद्धा प्रज्ञा योगः कृतज्ञता ४९
एते यस्य गुणाः सन्ति स गृही मुख्य उच्यते
संविभागं ततः कृत्वा गृहस्थः शेषभुग्भवेत् ५०
भुक्त्वा तु सुखमास्थाय तदन्नं परिणामयेत्
इतिहासपुराणाद्यैः षष्ठञ्च सप्तमं नयेत् ५१
अष्टमे लोकयात्रा तु बहिः सन्ध्या ततः पुनः
होमो भोजनकञ्चैव यच्चान्यद्गृहकृत्यकम् ५२
कृत्वा चैवं ततः पश्चात् स्वाध्यायं किञ्चिदाहरेत्
प्रदोषपश्चिमौ यामौ वेदाभ्यासेन तौ नयेत् ५३
यामद्वयं शयानो हि ब्रह्मभूयाय कल्पते
नैमित्तिकानि काम्यानि निपतन्ति यथा यथा ५४
तथा तथैव कार्य्याणि न कालस्तु विधीयते
अस्मिन्नेव प्रयुञ्जानो ह्यस्मिन्नेव तु लीयते ५५
तस्मात्सर्वप्रयत्नेन कर्त्तव्यं सुखमिच्छता
सर्वत्र मध्यमौ यामौ हुतशेषं हविश्च यत्
भुञ्जानश्च शयानश्च ब्राह्मणो नावसीदति ५६

इति दाक्षे धर्मशास्त्रे द्वितीयोऽध्यायः

## अथ तृतीयोऽध्यायः
## गृहस्थाश्रमवर्णनम्

सुधा नवगृहस्थस्य शब्दयामि नवैव तु
तथैव नव कर्माणि विकर्माणि तथा नव १
प्रच्छन्नानि नवान्यानि प्रकाश्यानि तथा नव
सफलानि नवान्यानि निष्फलानि नवैव तु २
अदेयानि नवान्यानि वस्तुजातानि सर्वदा
नवका नव निर्दिष्टा गृहस्थोन्नतिकारकाः ३
सुधावस्तूनि वक्ष्यामि विशिष्टे गृहमागते
मनश्चक्षुर्मुखं वाचं सौम्यं दद्याच्चतुष्टयम् ४
अभ्युत्थानमिहागच्छ पृच्छालापप्रियान्वितः
उपासनमनुव्रज्या कार्याण्येतानि यत्नतः ५
ईषद्दानानि चान्यानि भूमिरापस्तृणानि च
पादशौचं तथाभ्यङ्गमाश्रयः शयनन्तथा ६
किञ्चिच्चान्नं यथाशक्ति नास्यानश्नन् गृहे वसेत्
मृज्जलं चार्थिने देयमेतान्यपि सदा गृहे ७
सन्ध्या स्नानं जपो होमः स्वाध्यायो देवतार्चनम्
वैश्वदेवं तथातिथ्यमुद्धृतञ्चापि शक्तितः ८
पितृदेवमनुष्याणां दीनानाथतपस्विनाम्
मातापितृगुरूणाञ्च संविभागो यथार्हतः ९
एतानि नव कर्माणि विकर्माणि तथा पुनः
अनृतं पारदार्य्यञ्च तथाभक्ष्यस्य भक्षणम् १०
अगम्यागमनापेयपानं स्तेयञ्च हिंसनम्
अश्रौतकर्माचरणं मित्रधर्मवहिष्कृतम् ११
नवैतानि विकर्माणि तानि सर्वाणि वर्जयेत्
आयुर्वित्तं गृहच्छिद्रं मन्त्रमैथुनभेषजम् १२

तपोदानावमानौ च नव गोप्यानि यत्नतः
प्रायोग्यमृणशुद्धिश्च दानाध्ययनविक्रयाः १३
कन्यादानं वृषोत्सर्गो रहः पापमकुत्सनम्
प्रकाश्यानि नवैतानि गृहस्थाश्रमिणस्तथा १४
मातापित्रोर्गुरौ मित्रे विनीते चोपकारिणि
दीनानाथविशिष्टेभ्यो दत्तन्तु सफलं भवेत् १५
धूर्त्ते वन्दिनि मन्दे च कुवैद्ये कितवे शठे
चाटुचारणचौरभ्यो दत्तं भवति निष्फलम् १६
सामान्यं याचितं न्यास आधिर्दाराश्च तद्धनम्
क्रमायातञ्च निक्षेपः सर्वस्वञ्चान्वये सति १७
आपत्स्वपि न देयानि नव वस्तूनि सर्वदा
यो ददाति स मूढात्मा प्रायश्चित्तीयते नरः १८
नवनवकवेत्तारमनुष्ठानपरं नरम्
इह लोके परे च श्रीः स्वर्गस्थञ्च न मुञ्चति १९
यथैवात्मा परस्तद्वद्द्रष्टव्यः सुखमिच्छता
सुखदुःखानि तुल्यानि यथात्मनि तथा परे २०
सुखं वा यदि वा दुःखं यत्किञ्चित् क्रियते परे
ततस्तत्तु पुनः पश्चात्सर्वमात्मनि जायते २१
न क्लेशेन विना द्रव्यं द्रव्यहीने कुतः क्रिया
क्रियाहीने न धर्मः स्याद्धर्महीने कुतः सुखम् २२
सुखं वाञ्छन्ति सर्वे हि तच्च धर्मसमुद्भवम्
तस्माद्धर्मः सदा कार्य्यः सर्ववर्णैः प्रयत्नतः २३
न्यायागतेन द्रव्येण कर्तव्यं पारलौकिकम्
दानञ्च विधिना देयं काले पात्रे गुणान्विते २४
समद्विगुणसाहस्रमानन्त्यञ्च यथाक्रमम्
दाने फलविशेषः स्याद्धिंसायां तावदेव तु २५

सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे
सहस्रगुणमाचार्य्ये त्वनन्तं वेदपारगे २६
विधिहीने तथा पात्रे यो ददाति प्रतिग्रहम्
न केवलं तद्विनश्येच्छेषमप्यस्य नश्यति २७
व्यसनप्रतिकाराय कुटुम्बार्थञ्च याचते
एवमन्विष्य दातव्यमन्यथा न फलं भवेत् २८
मातापितृविहीनन्तु संस्कारोद्वहनादिभिः
यः स्थापयति तस्येह पुण्यसंख्या न विद्यते ३०
न तच्छेयोऽग्निहोत्रेण नाग्निष्टोमेन लभ्यते
यच्छ्रेयः प्राप्यते पुंसा विप्रेण स्थापितेन तु ३१
यद्यदिष्टतमं लोके यच्चापि दयितं गृहे
तत्तद्गुणवते देयं तदेवाक्षयमिच्छता ३२
इति दाक्षे धर्मशास्त्रे तृतीयोऽध्यायः

अथ चतुर्थोऽध्यायः

पत्नीमूलं गृहं पुंसां यदि च्छन्दोऽनुवर्तिनी
गृहाश्रमसमं नास्ति यदि भार्य्या वशानुगा १
तया धर्मार्थकामानां त्रिवर्गफलमश्नुते
प्राकाम्ये वर्त्तमाना तु स्नेहान्नतु निवारिता २
अवश्या सा भवेत्पश्चाद्यथा व्याधिरुपेक्षितः
अनुकूला नवाग्दुष्टा दक्षा साध्वी प्रियम्वदा ३
आत्मगुप्ता स्वामिभक्ता देवता सा न मानुषी ४
अनुकूलकलत्रो यस्तस्य स्वर्ग इहैव हि
प्रतिकूलकलत्रस्य नरको नात्र संशयः ५
स्वर्गेऽपि दुर्लभं ह्येतदनुरागः परस्परम्
रक्त एको विरक्तोऽन्यस्तस्मात् कष्टतरं नु किम् ६

गृहवासः सुखार्थाय पत्नीमूलं गृहे सुखम्
सा पत्नी या विनीता स्याच्चित्तज्ञा वशवर्त्तिनी ७
दुःखा ह्यन्या सदा खिन्ना चित्तभेदः परस्परम्
प्रतिकूलकलत्रस्य द्विदारस्य विशेषतः ८
योषित्सर्वा जलौकेव भूषणाच्छादनाशनैः
सुभृत्यापि कृता नित्यं पुरुषं ह्यपकर्षति ९
जलौका रक्तमादत्ते केवलं सा तपस्विनी
इतरा तु धनं वित्तं मांसं वीर्यं बलं सुखम् १०
सशङ्का वालभावे तु यौवने विमुखी भवेत्
तृणवन्मन्यते पश्चाद्वृद्धभावे स्वकं पतिम् ११
अनुकूला नवाग्दुष्टा दक्षा साध्वी पतिव्रता
एभिरेव गुणैर्युक्ता श्रीरेव स्त्री न संशयः १२
या हृष्टमनसा नित्यं स्थानमानविचक्षणा
भर्त्तुः प्रीतिकरी नित्यं सा भार्य्या हीतरा जरा १३
शिष्यो भार्य्या शिशुर्भ्राता पुत्रो दासः समाश्रितः
यस्यैतानि विनीतानि तस्य लोके हि गौरवम् १४
प्रथमा धर्मपत्नी च द्वितीया रतिवर्द्धिनी
दृष्टमेव फलं तत्र नादृष्टमुपजायते १५
धर्मपत्नी समाख्याता निर्द्दोषा यदि सा भवेत्
दोषे सति न दोषः स्यादन्या भार्य्या गुणान्विता १६
अदृष्टापतितां भार्य्यां यौवने यः परित्यजेत्
स जीवनान्ते स्त्रीत्वञ्च बन्ध्यत्वञ्च समाप्नुयात् १७
दरिद्रं व्याधितं चैव भर्त्तारं यावमन्यते
शुनी गृध्री च मकरी जायते सा पुनः पुनः १८
मृते भर्तरि या नारी समारोहेद्धुताशनम्
सा भवेत्तु शुभाचारा स्वर्गलोके महीयते १९

व्यालग्राही यथा व्यालं बलादुद्धरते विलात्
तथा सा पतिमुद्धृत्य तेनैव सह मोदते २०
चाण्डालप्रत्यवसितपरिव्राजकतापसाः
तेषां जातान्यपत्यानि चाण्डालैः सह वासयेत् २१
इति दाक्षे धर्मशास्त्रे चतुर्थोऽध्यायः

अथ पञ्चमोऽध्यायः
उक्तं शौचमशौचञ्च कार्य्यं त्याज्यं मनीषिभिः
विशेषार्थं तयोः किञ्चिद्वक्ष्यामि हितकाम्यया १
शौचे यत्नः सदाकार्य्यः शौचमूलोद्विजः स्मृतः
शौचाचारविहीनस्य समस्तनिष्फलाः क्रियाः २
शौचञ्च द्विविधं प्रोक्तं बाह्यमाभ्यन्तरन्तथा
मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्तथान्तरम् ३
अशौचाद्धि वरं बाह्यं तस्मादाभ्यन्तरं वरम्
उभाभ्याञ्च शुचिर्यस्तु स शुचिर्नेतरः शुचिः ४
एका लिङ्गे गुदे तिस्रो दश वामकरे तथा
उभयोः सप्त दातव्या मृदस्तिस्रस्तु पादयोः ५
गृहस्थशौचमाख्यातं त्रिष्वन्येषु यथाक्रमम्
द्विगुणं त्रिगुणञ्चैव चतुर्थस्य चतुर्गुणम् ६
अर्द्धप्रसृतिमात्रन्तु प्रथमा मृत्तिका स्मृता
द्वितीया च तृतीया च तदर्द्धं परिकीर्तिता ७
लिङ्गेऽप्यत्र समाख्याता त्रिपर्वी पूर्य्यते यया
एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम् ८
त्रिगुणन्तु वनस्थानां यतीनाञ्च चतुर्गुणम्
दातव्यमुदकन्तावन्मृदभावो यथा भवेत् ९
मृदा जलेन शुद्धिः स्यान्न क्लेशो न धनव्ययः

यस्य शौचेऽपि शैथिल्यं चित्तं तस्य परीक्षितम्  १०
अन्यदेव दिवा शौचं रात्रावन्यद्विधीयते
अन्यदापत्सु विप्राणामन्यदेव ह्यनापदि  ११
दिवोदितस्य शौचस्य रात्रावर्द्धं विधीयते
तदर्द्धमातुरस्याहुस्त्वरायामर्द्धमध्वनि  १२
न्यूनाधिकं न कर्तव्यं शौचे शुद्धिमभीप्सिता
प्रायश्चित्तेन युज्येत विहितातिक्रमे कृते  १३
इति दाक्षे धर्मशास्त्रे पञ्चमोऽध्यायः

अथ षष्ठोऽध्यायः

सूतकं तु प्रवक्ष्यामि जन्ममृत्युसमुद्भवम्
यावज्जीवं तृतीयन्तु यथावदनुपूर्वशः  १
सद्यः शौचं तथैकाहो द्वित्रिचतुरहस्तथा
दशाहो द्वादशाहश्च पक्षो मासस्तथैव च  २
मरणान्तं तथा चान्यद्दशपक्षन्तु सूतके
उपन्यस्तक्रमेणैव वक्ष्याम्यहमशेषतः  ३
ग्रन्थार्थं यो विजानाति वेदमङ्गैः समन्वितम्
सकल्पं सरहस्यञ्च क्रियावांश्चेन्न सूतकी  ४
राजर्त्विग्दीक्षितानाञ्च बाले देशान्तरे तथा
व्रतिनां सत्रिणाञ्चैव सद्यः शौचं विधीयते  ५
एकाहस्तु समाख्यातो योऽग्निवेदसमन्वितः
हीने हीनतरे चैव द्वित्रिचतुरहस्तथा  ६
जातिविप्रो दशाहेन द्वादशाहेन भूमिपः
वैश्य पञ्चदशाहेन शूद्रो मासेन शुद्ध्यति  ७
अस्नात्वा चाप्यहुत्वा च भुङ्क्तेऽदत्वा च यः पुनः
एवं विधस्य सर्वस्य सूतकं समुदाहृतम्

व्याधितस्य कदर्य्यस्य ऋणग्रस्तस्य सर्वदा
क्रियाहीनस्य मूर्खस्य स्त्रीजितस्य विशेषतः ८
व्यसनासक्तचित्तस्य पराधीनस्य नित्यशः
श्रद्धात्यागविहीनस्य भस्मान्तं सूतकं भवेत् ९
न सूतकं कदाचित्स्याद्यावज्जीवन्तु सूतकम्
एवं गुणविशेषेण सूतकं समुदाहृतम् १०
सूतके मृतके चैव तथा च मृतसूतके
एतत्संहतशौचानां मृतशौचेन शुद्ध्यति ११
दानं प्रतिग्रहो होमः स्वाध्यायश्च निवर्तते
दशाहात्तु परं शौचं विप्रोऽर्हति च धर्मवित् १२
दानञ्च विधिना देयं अशुभात्तारकं हि तत्
मृतकान्ते मृतो यस्तु सूतकान्ते च सूतकम् १३
एतत्संहतशौचानां पूर्वाशौचेन शुद्ध्यति
उभयत्र दशाहानि कुलस्यान्नं न भुज्यते १४
चतुर्थेऽहनि कर्तव्यमस्थि सञ्चयनं द्विजैः
ततः सञ्चयनादूर्द्ध्वमङ्गस्पर्शो विधीयते १५
वर्णानामानुलोम्येन स्त्रीणामेको यदा पतिः
दशषट्त्र्यहमेकाहः प्रसवे सूतकं भवेत् १६
यज्ञकाले विवाहे च देशभङ्गे तथैव च
हूयमाने तथाग्नौ च नाशौचं मृतसूतके १७
स्वस्थकाले त्विदं सर्वमशौचं परिकीर्तितम्
आपद्गतस्य सर्वस्य सूतके न तु सूतकम् १८

इति दाक्षे धर्मशास्त्रे षष्ठोऽध्यायः

## अथ सप्तमोऽध्यायः

लोको वशीकृतो येन येन चात्मा वशीकृतः

इन्द्रियार्थो जितो येन तं योगं प्रब्रवीम्यहम्  १
प्राणायामस्तथा ध्यानं प्रत्याहारस्तु धारणा
तर्कश्चैव समाधिश्च षडङ्गो योग उच्यते  २
नारण्यसेवनाद्योगो नानेकग्रन्थचिन्तनात्
व्रतैयज्ञैस्तपोभिश्च न योगः कस्यचिद्भवेत्  ३
न च पथ्याशनाद्योगो न नासाग्रनिरीक्षणात्
न च शास्त्रातिरिक्तेन शौचेन स भवेत्क्वचित्  ४
न मौनमन्त्रकुहकैरनेकैः सुकृतैस्तथा
लोकयात्रावियुक्तस्य योगो भवति कस्यचित्  ५
अभियोगात्तथाभ्यासात्तस्मिन्नेव तु निश्चयात्
पुनः पुनश्च निर्वेदाद्योगः सिद्ध्यति नान्यथा  ६
आत्मचिन्ताविनोदेन शौचक्रीडनकेन च
सर्व्वभूतसमत्वेन योगः सिध्यति नान्यथा  ७
यश्चात्मनिरतो नित्यमात्मक्रीडस्तथैव च
आत्मनिष्ठश्च सततमात्मन्येव स्वभावतः  ८
रतश्चैव स्वयं तुष्टः सन्तुष्टो नान्यमानसः
आत्मन्येव सुतृप्तोऽसौ योगस्तस्य प्रसिद्ध्यति  ९
सुप्तोऽपि योगयुक्तः स्याज्जाग्रच्चापि विशेषतः
ईदृक्चेष्टः स्मृतः श्रेष्ठो गरिष्ठो ब्रह्मवादिनाम्  १०
य आत्मव्यतिरेकेण द्वितीयं नैव पश्यति
ब्रह्मीभूय स एवं हि दक्षपक्ष उदाहृतः  ११
विषयासक्तचित्तो हि यतिर्मोक्षं न विन्दति
यत्नेन विषयासक्तिं तस्माद्योगी विवर्जयेत्  १२
विषयेन्द्रियसंयोगः केचिद्योगं वदन्ति हि
अधर्मो धर्मरूपेण गृहीतस्तैरपण्डितैः  १३
मनसश्चात्मनश्चैव संयोगञ्च तथापरे

उक्तानामधिका ह्येते केवलं योगवञ्चिताः १४
वृत्तिहीनं मनः कृत्वा क्षेत्रज्ञं परमात्मनि
एकीकृत्य विमुच्येत योगोऽयं मुख्य उच्यते १५
कषायमोहविक्षेपलज्जाशङ्कादिचेतसः
व्यापारास्तु समाख्यातास्तान् जित्वा वशमानयेत् १६
कुटुम्बैः पञ्चभिर्ग्राम्यैः षष्ठस्तत्र महत्तरः
देवासुरमनुष्यैस्तु स जेतुं नैव शक्यते १७
वलेन परराष्ट्राणि गृह्णन् शूरस्तु नोच्यते
जितो येनेन्द्रियग्रामः स शूरः कथ्यते बुधैः १८
बहिर्मुखानि सर्व्वाणि कृत्वा चाभिमुखानि वै
सर्वञ्चैवेन्द्रियग्रामं मनश्चात्मनि योजयेत् १९
सर्वभावविनिर्मुक्तः क्षेत्रज्ञं ब्रह्मणि न्यसेत्
एतद्ध्यानञ्च योगश्च शेषाः स्युर्ग्रन्थविस्तराः २०
त्यक्त्वा विषयभोगांश्च मनो निश्चलतां गतम्
आत्मशक्तिस्वरूपेण समाधिः परिकीर्त्तितः २१
चतुर्णां सन्निकर्षेण पदं यत्तदशाश्वतम्
द्वयोस्तु सन्निकर्षेण शाश्वतं ध्रुवमक्षयम् २२
यन्नास्ति सर्व्वलोकस्य तदस्तीति विरुद्ध्यते
कथ्यमानं तथान्यस्य हृदये नावतिष्ठते २३
स्वसंवेद्यं हि तद्ब्रह्म कुमारीमैथुनं यथा
अयोगी नैव जानाति जातोन्धो हि यथा घटम् २४
नित्याभ्यसनशीलस्य सुसंवेद्यं हि तद्भवेत्
तत्सूक्ष्मत्वादनिर्देश्यं परं ब्रह्म सनातनम् २५
बुधस्त्वाभरणं भावं मनसालोचनं यथा
मन्यते स्त्री च मूर्खश्च तदेव बहुमन्यते २६
सत्त्वोत्कटाः सुराश्चापि विषयेण वशीकृताः

प्रमादिभिः क्षुद्रसत्वैर्मानुषैरत्र का कथा २७
तस्मात्त्यक्तकषायेण कर्त्तव्यं दण्डधारणम्
इतरस्तु न शक्नोति विषयैरभिभूयते २८
न स्थिरं क्षणमप्येकमुदकं हि यथोर्मिभिः
वाताहतं तथा चित्तं तस्मात्तस्य न विश्वसेत् २९
त्रिदण्डव्यपदेशेन जीवन्ति बहवो नराः
यो हि ब्रह्म न जानाति न त्रिदण्डार्ह एव सः ३०
ब्रह्मचर्य्यं सदा रक्षेदष्टधा मैथुनं पृथक्
स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम् ३१
सङ्कल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च
एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः ३२
न ध्यातव्यं न वक्तव्यं कर्त्तव्यं कदाचन
एतैः सर्वैः सुसम्पन्नो यतिर्भवति नेतरः ३३
पारिव्रज्यं गृहीत्वा च यो धर्मे नावतिष्ठते
श्वपदेनाङ्कयित्वा तं राजा शीघ्रं प्रवासयेत् ३४
एको भिक्षुर्यथोक्तस्तु द्वौ चैव मिथुनं स्मृतम्
त्रयो ग्रामस्तथा ख्यात ऊर्द्ध्वन्तु नगरायते ३५
नगरं हि न कर्त्तव्यं ग्रामो वा मिथुनं तथा
एतत्त्रयं प्रकुर्व्वाणः स्वधर्माच्च्यवते यतिः ३६
राजवार्त्तादि तेषान्तु भिक्षावार्त्ता परस्परम्
स्नेहपैशून्यमात्सर्य्यं सन्निकर्षादसंशयम् ३७
लाभपूजानिमित्तं हि व्याख्यानं शिष्यसंग्रहः
एते चान्ये च बहवः प्रपञ्चाः कुतपस्विनाम् ३८
ध्यानं शौचं तथा भिक्षा नित्यमेकान्तशीलता
भिक्षोश्चत्वारि कर्माणि पञ्चमो नोपपद्यते ३९
तपोजपैः कृशीभूतो व्याधितोऽवसथावहः

वृद्धो ग्रहगृहीतश्च यश्चान्यो विकलेन्द्रियः ४०
नीरुजश्च युवा चैव भिक्षुर्नावसथावहः
स दूषयति तत्स्थानं बुधान् पीडयतीति च ४१
नीरुजश्च युवा चैव ब्रह्मचर्य्याद्विनश्यति
ब्रह्मचर्य्याद्विनष्टस्तु कुलञ्चैव तु नाशयेत् ४२
वसन्नावसथे भिक्षुर्मैथुनं यदि सेवते
तस्यावसथनाथस्य मूलान्यपि निकृन्तति ४३
आश्रमे तु यतिर्यस्य मुहूर्त्तमपि विश्रमेत्
किन्तस्यान्येन धर्मेण कृतकृत्योऽभिजायते ४४
समितं यद्गृहस्थेन पापमामरणान्तिकम्
स निर्दहति तत्सर्व्वमेकरात्रोषितो यतिः ४५
योगाश्रमपरिश्रान्तं यस्तु भोजयते यतिम्
निखिलं भोजितं तेन त्रैलोक्यं सचराचरम् ४६
यस्मिन् देशे वसेद्योगी ध्यानयोगविचक्षणः
सोऽपि देशो भवेत्पूतः किंपुनस्तस्य वान्धवाः ४७
द्वैतञ्चैव तथाद्वैतं द्वैताद्वैतं तथैव च
न द्वैतं नापि चाद्वैतमित्येतत्परमार्थिकम् ४८
नाहं नैवान्यसम्बन्धो ब्रह्मभावेन भावितः
ईदृशायामवस्थायामवाप्यं परमं पदम् ४९
द्वैतपक्षाः समाख्याता येऽद्वैते तु व्यवस्थिताः
अद्वैतिनां प्रवक्ष्यामि यथा धर्मः सुनिश्चितः ५०
तत्रात्मव्यतिरेकेण द्वितीयं यदि पश्यति
ततः शास्त्राण्यधीयन्ते श्रूयन्ते ग्रन्थसञ्चयाः ५१
दक्षशास्त्रं यथा प्रोक्तमशेषाश्रममुत्तमम्
अधीयन्ते तु ये विप्रास्ते यान्त्यमरलोकताम् ५२
इदन्तु यः पठेद्भक्त्या शृणुयादधमोऽपिवा

स पुत्रपौत्रपशुमान् कीर्त्तिञ्च समवाप्नुयात् ५३
श्रावयित्वा त्विदं शास्त्रं श्राद्धकालेऽपि वा द्विजः
अक्षयं भवति श्राद्धं पितृभ्यश्चोपजायते ५४

इति दाक्षे धर्मशास्त्रे सप्तमोऽध्यायः

समाप्ता चेयं दक्षस्मृतिः

Reference:
*Smṛti Sandarbha*, Vol. I, (Delhi: Nag, 1981) p. 569.

# विष्णुस्मृतिः

श्रीगणेशाय नमः

महामते महाप्राज्ञ सर्वशास्त्रविशारद ।
अक्षीणकर्म बन्धस्तु पुरुषो द्विजसत्तम १
सततं किं जपन् जप्यं विबुधः किमनुस्मरन्
मरणे यज्जपं जप्यं यञ्च भावमनुस्मरन् २
यच्च ध्यात्वा द्विजश्रेष्ठ पुरुषो मृत्युमागतः
परम्पदमवाप्नोति तन्मे वद महामुनेः ३
शौनक उवाच
इदमेव महाराज पृष्टवांस्ते पितामहः
भीष्मं धर्मभृतां श्रेष्ठं धर्मपुत्रो युधिष्ठिरः ४
युधिष्ठिर उवाच
पितामह महाप्राज्ञ सर्वशास्त्र विशारद
प्रयाणकाले यच्चिन्त्यं सूरिभिस्तत्वचिन्तकैः ५
किन्नु स्मरन् कुरुश्रेष्ठ मरणे पर्युपस्थिते
प्राप्नुयात्परमां सिद्धिं श्रोतुमिच्छामि तद्वद ६
भीष्म उवाच
अद्भुतं च हितं सूक्ष्मं उक्तं प्रश्नं त्वयानघ
शृणुष्वावहितो राजन् नारदेन पुरा श्रुतम् ७
श्रीवत्साङ्कं जगद्बीजमनन्तं लोकसाक्षिणम्
पुरा नारायणं देवं नारदः परिपृष्टवान् ८
नारद उवाच
त्वमक्षरं परं ब्रह्म निर्गुणं तमसः परम्
आहुर्वेद्यं परं धाम ब्रह्मादि कमलोद्भवम् ९
भगवन् भूतभव्येश श्रद्दधानै जितेन्द्रियैः
कथं भक्तैर्विचिन्त्योऽसि योगिभिर्देहमोक्षिभिः १०

किं च जप्यं जपेन्नित्यं कल्यमुत्थाय मानवाः
कथं युञ्जन् सदा ध्यायन् ब्रूहि तत्त्वं सनातनम्  ११
भीष्म उवाच
श्रुत्वा तस्य तु देवर्षेर्वाक्यं वाचस्पतिः स्वयम्
प्रोवाच भगवान् विष्णुर्नारदं वरदः प्रभुः
श्रीभगवानुवाच
हन्त ते कथयिष्यामि इमां दिव्यामनुस्मृतिम्
मरणे मामनुस्मृत्य प्राप्नोति परमां गतिम्  १३
यामधीत्य प्रयाणे तु मद्भावायोपपद्यते
ओङ्कारमग्रतः कृत्वा मां नमस्कृत्य नारद  १४
एकाग्रः प्रयतो भूत्वा इमं मन्त्रमुदीरयेत्
अवशेनापि यन्नाम्नि कीर्तिते सर्वपातकैः  १५
पुमान् विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव
ओमित्येव परं ब्रह्म शाश्वतं परमव्ययम्  १६
एतदुच्चारयन्मर्त्यो ब्रह्मभूयाय कल्पते
ब्रह्मा विष्णुश्च रुद्रश्च सर्वमोमिति चोच्यते  १७
सम्पन्नेऽसुरसंथाने नम्यते च मुमुक्षुभिः
मोक्षश्च ज्ञानिनां प्रोक्तो मोहश्चाज्ञानिनां स्मृतः  १८
यस्य यादृग्विधो भावस्तस्य तादृग्विधो हरिः
भवे भवनविश्वात्मा भूतानां हितकाम्यया  १९
सृजते आत्मनात्मानमात्मन्येव स्वमायया
हरिरेव सतां नित्यं शरण्यः शरणार्थिनाम्  २०
न हि नारायणादन्यस्त्रिषु लोकेषु विद्यते
वसत्यमृतमक्षय्यं यस्मिन् लोकाः ससागराः  २१
त एव सृजते लोकान् सृष्टिकाले जगत्प्रभुः
तेजांसि येन दिव्यन्ते महोत्पन्नेन तेजसा  २२

वासुदेवात्मकं सर्वं तत्तेजोऽपि हि नान्यथा
वासनाद्यास्तु ये भावाः सम्भवन्ति युगे युगे २३
लोकत्रयहितार्थाय स्वोकाराय नो हरिः
यतश्चोत्पद्यते विश्वं यस्मिन्नेव प्रलिप्यते २४
क्षराक्षरविसृष्टस्तु सोऽच्युतः पुरुषोत्तमः
अव्यक्तं शाश्वतं देवं प्रभवं पुरुषोत्तमम् २५
प्रपद्ये प्राञ्जलिर्विष्णुमक्षय्यं भक्तवत्सलम्
पुराणं पुरुषं दिव्यमद्भुतं लोकपावनम् २६
प्रपद्ये पुण्डरीकाक्षं देवं नारायणं हरिम्
लोकनाथं सहस्राक्षमक्षरं परमं पदम् २७
भगवन्तं प्रपन्नोऽस्मि भूतभव्यप्रभुं विभुम्
स्रष्टारं सर्वलोकानामनन्तं विश्वतोमुखं २८
पद्मनाभं हृषीकेशं प्रपद्ये सत्यमच्युतम्
हिरण्यगर्भममृतं भूगर्भं परतः परम् २९
प्रभुं विभुमनाद्यन्तं प्रपद्ये तं रविप्रभम्
सहस्रशीर्षं पुरुषं महर्षिं सत्यभावनम् ३०
प्रपद्ये सूक्ष्ममचलं वरेण्यमभयप्रदम्
नारायणं पुराणेशं योगात्मानं सनातनम् ३१
संज्ञानां सर्वसत्वानां प्रपद्ये ध्रुवमीश्वरम्
यः प्रभुः सर्वलोकानां येन सर्वमिदं ततम् ३२
चराचरगुरुर्देवः स मे विष्णुः प्रसीदतु
यस्मादुत्पद्यते ब्रह्मा पद्मयोनिः पितामहः ३३
ब्रह्मयोनिर्हि विश्वस्य स मे विष्णुः प्रसीदतु
चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेवच ३४
हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु
पर्जन्यः पृथिवी सस्यं कालो धर्मः क्रियाक्रिये ३५

गुणाकरः स मे विष्णुर्वासुदेवः प्रसीदतु
अग्निसोमार्कताराणां ब्रह्मरुद्रेन्द्रयोगिनाम् ३६
यस्तेजयति तेजांसि स मे विष्णुः प्रसीदतु
कार्यं क्रिया च करणं कर्त्ता हेतुः प्रयोजनम् ३७
अक्रिया करणी कार्यं स मे विष्णुः प्रसीदतु
शमीगर्भस्य यो गर्भस्तस्य गर्भस्य यो रिपुः ३८
रिपुगर्भस्य यो गर्भः स मे विष्णुः प्रसीदतु
अबलो येन बालेन कंसमल्लो महाबलः ३९
चाणूरो निहतो रङ्गे स मे विष्णुः प्रसीदतु
शङ्खः करवरे यस्य स मे विष्णुः प्रसीदतु ४०
येन क्रान्तास्त्रयो लोका दानवाश्च वशीकृताः
शरणं सर्वभूतानां स मे विष्णुः प्रसीदतु ४१
योगावास नमस्तुभ्यं सर्वावास वरप्रद
सर्वादि वासनाद्यादि वासुदेव प्रधानकृत् ४२
यज्ञगर्भ हिरण्याङ्ग पञ्चयज्ञ नमोऽस्तुते
चतुर्मूर्त्तिः परन्धाम लक्ष्मानन्दवरार्चित ४३
अजस्त्वमगमः पन्था ह्यमूर्त्तिविश्वमूर्त्तिधृक्
श्रीकर्तः पञ्चकालज्ञ नमस्ते ज्ञानसागर ४४
अव्यक्ताद्व्यक्तमुत्पन्नमव्यक्ताद्यः परोऽक्षरः
यस्मात्परतरन्नास्ति तमस्मि शरणं गतः ४५
न प्रधानो न च महान् पुरुषश्चेतनो ह्यजः
अनयोग्यः परतरस्तमस्मि शरणं गतः ४६
चिन्तयन्तोऽपि यन्नित्यं ब्रह्मेशानादयः प्रभुम्
निश्चयं नाधिगच्छन्ति तमस्मि शरणं गतः ४७
जितेन्द्रिया जितात्मानो ज्ञानध्यानपरायणाः
यं प्राप्य न निवर्त्तन्ते तमस्मि शरणं गतः ४८

एकांशेन जगत्कृत्स्नमवष्टभ्य विभुः स्थितः
अग्राह्यो निर्गुणो नित्यस्तमस्मि शरणं गतः ४९
सोमार्काग्निगतन्तेजो या च तारामयी द्युतिः
दिवि संजायते यो यः स महात्मा प्रसीदतु ५०
सूर्यमध्यस्थितः सोमस्तस्य मध्ये च यास्तिता
भूतबाह्याचरा दीप्तिः स महात्मा प्रसीदतु ५१
सगुणे निर्गुणश्चासौ लक्ष्मीवान् चेतनो ह्यजः
सूक्ष्मः सर्वगतो देही स महात्मा प्रसीदतु ५२
साङ्ख्ययोगाश्च ये चान्ये सिद्धाश्च परमर्षयः
यं विदित्वा विमुच्यन्ते स महात्मा प्रसीदतु ५३
अव्यक्तः समधिष्ठाता ह्यचिन्त्यः सदसत्परः
आस्थितः प्रकृतिं भुङ्क्ते स महात्मा प्रसीदतु ५४
क्षेत्रज्ञः पञ्चधा भुङ्क्ते प्रकृतिं पञ्चभिर्मुखैः
निर्विकार नमस्तेऽस्तु साक्षिक्षेत्रिध्रुवस्थितः ५५
अतीन्द्रिय नमस्तुभ्यं लिङ्गैर्व्यक्तैर्न मीयसे
ये च त्वां नाभिजानन्ति संसारे सञ्चरन्ति ते ५६
कामक्रोधविनिर्मुक्ता भक्तास्त्वां प्रविशन्ति च
अव्यक्तमत्यहङ्कारा मनोभूतेन्द्रियाणि च ५७
त्वयि तानि चलेषु त्वं नतेषु त्वं न ते त्वयि
एकत्वान् चत्वनानात्वं ये विदुर्यान्ति ते परम् ५८
समोहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः
समत्वमभिकाङ्क्षन्तम्भक्त्या वै नान्यचेतसः ५९
चराचरमिदं सर्वं भूतग्रामञ्चतुर्विधम्
त्वया त्वय्येव तत्प्रोतं सूत्रे मणिगणाइव ६०
स्त्रष्टो भोक्तासि कूटस्थो ह्यतत्वस्तत्वसंज्ञितः
अकर्ता हेतुरचरः पृथगात्मन्यवस्थितः ६१

न मे भूतेषु संयोगो न भूतत्वगुणाधिकः
अहङ्कारेण बुद्ध्या वा न मे योगास्त्रिभिर्गुणैः ६२
न मे धर्मो ह्यधर्मो वा नामभोजन्नवा पुनः
जरामरणमोक्षार्थं त्वां प्रपन्नोस्मि सर्वगः ६३
विषयैरिन्द्रियैर्वापि न मे भूयः समागतः
ईश्वरोऽसि जगन्नाथ किमतः परमुच्यते ६४
भक्तानां यद्धितं देव तद्देहि त्रिदशेश्वर
पृथिवीं यातु मे घ्राणं यातु मे रसनञ्जलम् ६५
रूपं हुताशनं यातु स्पर्शो यातु च मारुतम्
श्रोत्रमाकाशमप्ये तु मनो वैकारिकं पुनः ६६
इन्द्रियाणि गुणान्यातु स्वासु स्वासु च योनिषु
पृथिवी यातु सलिलमापोऽग्निमनलोऽनिलम् ६७
वायुराकाशमप्येतु मनश्चाकाशमेव च
अहङ्कारं मनो यातु मोहनं सर्वदेहिनाम् ६८
अहङ्कारस्तथा बुद्धिं बुद्धिरव्यक्तमेव च
प्रधाने प्रकृतिं याते गुणसाम्ये व्यवस्थिते ६९
वियोगः सर्वकरणैर्गुणैर्भूतैश्च मेऽभवत्
सत्वं रजस्तमश्चैव प्रकृतिं प्रविशन्तु मे ७०
निष्कैवल्यं पदं देवकांक्षितं परमन्तपः
एकीभावस्त्वया मेऽस्तु न मे जन्म भवेत्पुनः ७१
नमो भगवते तस्मै विष्णवे प्रभविष्णवे
त्वद्बुद्धिस्तद्गतप्राणस्त्वद्भक्तस्त्वत्परायणः ७२
त्वामेवाहं स्मरिष्यामि मरणे पर्युपस्थिते
पूर्वदेहिकृता ये मे व्याधयः प्रविशन्तु माम् ७३
आर्दयन्तु च दुःखानि ऋणं मे न भवेदिति
उपदिष्टन्तु मे सर्वे व्याधयः पूर्वचिन्तिताः ७४

अनृणो गन्तुमिच्छामि तद्विष्णोः परमम्पदम्
अहं भगवतस्तस्य मम वासः सनातनः ७५
तत्याहं न प्रणश्यामि स च मे न प्रणश्यति
कर्मेन्द्रियाणि संयम्य पञ्च बुद्धीन्द्रियाणि च ७६
दशेन्द्रियाणि मनसो ह्यहङ्कारेण वा पुनः
अहङ्कारं तथा बुद्धौ बुद्धिमात्मनि योजयेत् ७७
आत्मबुद्धीन्द्रियम्पश्येद्बुद्धौ बुद्धेः परायणम्
ममायमपि तस्याहं येन सर्वमिदन्ततम् ७८
आत्मनात्मनि संयोज्यममात्मन्यनुसंस्मरेत्
एवं बुद्धेः परंबुद्ध्वा लभते न पुनर्भवम् ७९
ॐ नमो भगवते तस्मै देहिनां परमात्मने
नारायणाय भक्तानामेकनिष्ठाय शाश्वते ८०
हृदिस्थाय च भूतानां सर्वेषां च महात्मने
इमामनुस्मृतिन्दिव्यां वैष्णवीं पापनाशनीम् ८१
स्वयम्विबुद्धश्च पठेद्यत्र तत्र समभ्यसेत्
मरणे समनुप्राप्ते यस्त्विमामनुसंस्मरेत् ८२
अपि पापममाचारः स याति परमाङ्गतिम्
यद्यहङ्कारमाश्रित्य यज्ञदानतपः क्रियाः ८३
कुर्वस्तत्फलमाप्नोति पुनरावर्तते न तु
अभ्यर्चयन् पितृन्देवान् पठन् जुह्वन् बलिन्ददन् ८४
ज्वलदग्निं स्मरेद्यो मां लभते परमाङ्गतिम्
यज्ञोदानं तपः कर्म पावनानि मनीषिणाम् ८५
यज्ञोदानं तपस्तस्मात्कुर्यादाशाविवर्जितः
पौर्णमास्याममावास्यां द्वादश्यां च विशेषतः ८६
श्रावयेच्छ्रद्दधानांश्च मद्भक्तांश्च विशेषतः
नम इत्येव यो ब्रूयान्मद्भक्तः श्रद्धयान्वितः ८७

तस्याद्वयो भवेल्लोकः श्वपाकस्यापि नारद
किं पुनर्ये यजन्ते मां साधका विधिपूर्वकम् ८८
श्रद्धावन्तो यतात्मानस्ते मां यान्ति मदाश्रिताः
कर्माण्याद्यन्तवन्तीह मद्भक्तोऽनन्तमश्नुते ८९
मामेव तस्माद्देवर्षे ध्याहि नित्यमतन्द्रितः
अवाप्स्यसि तपः सिद्धिं लभ्यसे च पदं मम ९०
अज्ञानामिच्छया ज्ञानं दद्याद्धर्मोपदेशनम्
कृत्स्नां वा पृथिवीं दद्यात्तेन तुल्यं न तत्फलम् ९१
अस्मात्प्रदेयं साधुभ्यो जन्मबन्धभयापहम्
अश्वमेधसहस्राणां सहस्रं यः समाचरेत् ९२
नासौ फलमवाप्नोति मद्भक्तैर्यदवाप्यते
भीष्म उवाच
एवं पृष्टः पुरा तेन नारदेन सुरर्षिणा
यदुवाच तथा शम्भुस्तदुक्तं तव सुव्रत ९३
त्वमप्येकमना भूत्वा ध्येयं ज्ञेयं गुणाधिकम्
भज सर्वेण भावेन परमात्मानमव्ययम् ९४
श्रुत्वैतद् नारदो वाक्यं दिव्यं नारायणेरितम्
अत्यन्तभक्तिमान्देवे एकान्तित्वमुपेयिवान् ९५
नारायणमृषीन्देवं दशवर्षाण्यनन्यभाक्
इदं जपन्वै प्राप्नोति तद्विष्णोः परमं पदम् ९६
किं तस्य बहुभिर्मन्त्रैः किं तस्य बहुभिर्व्रतैः
नमो नारायणायेति मन्त्रः सर्वार्थसाधकः ९७
नारायणाय नम ओमिति वेदमन्त्रं-
यो नित्यमेव मनसापि समभ्यसेच्च
पापैः प्रमुच्य परमे तृषयातिविष्णोः-
स्थानं हि सर्वमिति वेदविदो वदन्ति ९८

किं तस्य दानैः किं तीर्थैः किं तपोभिः किमध्वरैः
यो नित्यं ध्यायते देव नारायण मनन्यधीः ९९
चीरवासा जपी वापि त्रिदण्डी मुण्ड एव वा
भूषितो वा द्विजश्रेष्ठ न लिङ्गं धर्मकारणम् १००
ये नृशंसा दुरात्मानः पापधर्मविवर्जिताः
तेऽपि यान्ति परं स्थानं नारायणपरायणाः १०१
अन्यथा मन्दबुद्धीनां प्रतिभाति दुरात्मनाम्
कुतर्कज्ञानदृष्टीनां विश्रान्तेन्द्रियवर्त्मनाम् १०२
नमो नारायणायेति ये विदुर्ब्रह्म शाश्वतम्
अन्तकाले जपन्नेति तद्विष्णोः परमं पदम् १०३
आचारहीनो च मुनिप्रवीर भक्त्या विहीनोऽपि तु विन्दतोऽपि
संकीर्त्य नारायणशब्दमात्रं विमुक्तपापो विशतेऽच्युतां गतिम् १०४
कान्तारवनदुर्गेषु कृत्स्नेष्वापत्सु संयुगे
दस्युभिः सन्निरोधे च नामभिर्मां प्रकीर्तयेत् १०५
न दिव्यपुरुषो धीमान् येषु स्थानेषु मां स्मरेत्
चौरव्याघ्र महासर्पैः क्रूरैरपि न वाध्यते १०६
जन्मान्तरसहस्रेषु तपोध्यानसमाधिभिः
नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते १०७
नामास्ति याति शक्तिश्च पापे निर्हरणे हरेः
श्वपचोऽपि नरः कर्तुं क्षमस्तावन्न किल्बिषम् १०८
न तावत्पापमस्तीह यावन्नामहतं हरेः
अतिरेक भयादाहुः प्रायश्चित्तान्तरं बुधाः १०९
गत्वा गत्वा निवर्तन्ते चन्द्रसूर्यादयो ग्रहाः
अद्यापि न निवर्तन्ते द्वादशाक्षरचिन्तकाः ११०
न वासुदेवात्परमस्ति मङ्गलं न वासुदेवात्परमस्ति पावनम्
न वासुदेवात्परमस्ति दैवतं न वासुदेवं प्रणिपत्य सीदति १११

इमां रहस्यां परमामनुस्मृतिं ह्यधीत्य बुद्धिं लभते च नैष्ठिकम्
विहाय दुःखानि विमुच्य सङ्कटात्
स वीतरागो विचरेन्महीमिमाम् ११२
गङ्गायां मरणं चैव दृढा भक्तिश्च केशवे
ब्रह्मविद्याप्रबोधश्च नाल्पस्य तपसः फलम् ११३
इति विष्णुस्मृतिः समाप्ता

Reference:
*Smṛti Sandarbha*, Vol. I, (Delhi: Nag, 1981) p. 389.

# अथ याज्ञवल्क्यस्मृतिः

## प्रथम आचाराध्यायः

### १ उपोद्धातप्रकरणम्

योगीश्वरं याज्ञवल्क्यं सम्पूज्य मुनयोऽब्रुवन्
वर्णाश्रमेतराणां नो ब्रूहि धर्मानशेषतः १
मिथिलास्थः स योगीन्द्रः क्षणं ध्यात्वाब्रवीन्मुनीन्
यस्मिन्देशे मृगः कृष्णस्तस्मिन्धर्मान्निबोधत २
पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ३
मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः
यमापस्तम्बसम्वर्ताः कात्यायनबृहस्पती ४
पराशरव्यासशङ्खलिखिता दक्षगौतमौ
शातातपो वसिष्ठश्च धर्मशास्त्रयोजकाः ५
देशे काल उपायेन द्रव्यं श्रद्धासमन्वितम्
पात्रे प्रदीयते यत्तत्सकलं धर्मलक्षणम् ६
श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियं आत्मनः
सम्यक्सम्कल्पजः कामो धर्ममूलं इदं स्मृतम् ७
इज्याचारदमाहिंसादानस्वाध्यायकर्मणाम्
अयं तु परमो धर्मो यद्योगेन आत्मदर्शनम् ८
चत्वारो वेदधर्मज्ञाः पर्षत्त्रैविद्यमेव वा
सा ब्रूते यं स धर्मः स्यादेको वाध्यात्मवित्तमः ९

### २ ब्रह्मचारिप्रकरणम्

ब्रह्मक्षत्रियविट्शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः
निषेकाद्याः श्मशानान्तास्तेषां वै मन्त्रतः क्रियाः १०
गर्भाधानमृतौ पुंसः सवनं स्पन्दनात्पुरा

षष्ठेऽष्टमे वा सीमन्तो मास्येते जातकर्म च  ११
अहन्येकादशे नाम चतुर्थे मासि निष्क्रमः
षष्ठेऽन्नप्राशनं मासि चूडा कार्या यथाकुलम्  १२
एवमेनः शमं याति बीजगर्भसमुद्भवम्
तूष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समन्त्रकः  १३
गर्भाष्टमेऽष्टमे वाब्दे ब्राह्मणस्योपनायनम्
राज्ञामेकादशे स्ङ्के विशामेके यथाकुलम्  १४
उपनीय गुरुः शिष्यं महाव्याहृतिपूर्वकम्
वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत्  १५
दिवासम्ध्यासु कर्णस्थब्रह्मसूत्रोदङ्मुखः
कुर्यान्मूत्रपुरीषे च रात्रौ चेद्दक्षिणामुखः  १६
गृहीतशिश्नश्चोत्थाय मृद्भिरभ्युद्धृतैर्जलैः
गन्धलेपक्षयकरं शौचं कुर्यादतन्द्रितः  १७
अन्तर्जानु शुचौ देश उपविष्ट उदङ्मुखः
प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत्  १८
कनिष्ठादेशिन्यङ्गुष्ठमूलान्यग्रं करस्य च
प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात्  १९
त्रिः प्राश्यापो द्विरुन्मृज्य खान्यद्भिः समुपस्पृशेत्
अद्भिस्तु प्रकृतिस्थाभिर्हीनाभिः फेनबुद्बुदैः  २०
हृत्कण्ठतालुगाभिस्तु यथासम्ख्यं द्विजातयः
शुध्येरन्स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरन्ततः  २१
स्नानमब्दैवतैर्मन्त्रैर्मार्जनं प्राणसम्यमः
सूर्यस्य चाप्युपस्थानं गायत्र्याः प्रत्यहं जपः  २२
गायत्रीं शिरसा सार्धं जपेद्व्याहृतिपूर्विकाम्
प्रतिप्रणवसम्युक्तां त्रिरयं प्राणसम्यमः  २३
प्राणानायम्य सम्प्रोक्ष्य तृचेन अब्दैवतेन तु

जपन्नासीत सावित्रीं प्रत्यगातारकोदयात्  २४
सम्ध्यां प्राक् प्रातरेवं हि तिष्ठेदासूर्यदर्शनात्
अग्निकार्यं ततः कुर्यात्सम्ध्ययोरुभयोरपि  २५
ततोऽभिवादयेद्वृद्धानसावहमिति ब्रुवन्
गुरुं चैव अप्युपासीत स्वाध्यायार्थं समाहितः  २६
आहूतश्चाप्यधीयीत लब्धं चास्मै निवेदयेत्
हितं तस्याचरेन्नित्यं मनोवाक्कायकर्मभिः  २७
कृतज्ञाद्रोहिमेधाविशुचिकल्यानसूयकाः
अध्याप्या धर्मतः साधु शक्ताप्तज्ञानवित्तदाः  २८
दण्डाजिनोपवीतानि मेखलां चैव धारयेत्
ब्राह्मणेषु चरेद्भैक्षमनिन्द्येष्वात्मवृत्तये  २९
आदिमध्यावसानेषु भवच्छब्दोपलक्षिता
ब्राह्मणक्षत्रियविशां भैक्षचर्या यथाक्रमम्  ३०
कृताग्निकार्यो भुञ्जीत वाग्यतो गुर्वनुज्ञया
आपोशानक्रियापूर्वं सत्कृत्यान्नमकुत्सयन् ३१
ब्रह्मचर्ये स्थितो नैकमन्नमद्यादनापदि
ब्राह्मणः काममश्नीयाच्छ्राद्धे व्रतमपीडयन् ३२
मधुमांसाञ्जनोच्छिष्टशुक्तस्त्रीप्राणिहिंसनम्
भास्करालोकनाश्लीलपरिवादादि वर्जयेत्  ३३
स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति
उपनीय ददद्वेदमाचार्यः स उदाहृतः  ३४
एकदेशमुपाध्याय ऋत्विग्यज्ञकृदुच्यते
एते मान्या यथापूर्वमेभ्यो माता गरीयसी  ३५
प्रतिवेदं ब्रह्मचर्यं द्वादशाब्दानि पञ्च वा
ग्रहणान्तिकमित्येके केशान्तश्चैव षोडशे  ३६
आषोडशादाद्वाविंशाच्चतुर्विंशाच्च वत्सरात्

ब्रह्मक्षत्रविशां काल औपनायनिकः परः ३७
अत ऊर्ध्वं पतन्त्येते सर्वधर्मबहिष्कृताः
सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोः ३८
मातुर्यदग्रे जायन्ते द्वितीयं मौञ्जिबन्धनात्
ब्राह्मणक्षत्रियविशस्तस्मादेते द्विजाः स्मृताः ३९
यज्ञानां तपसां चैव शुभानां चैव कर्मणाम्
वेद एव द्विजातीनां निह्श्रेयसकरः परः ४०
मधुना पयसा चैव स देवांस्तर्पयेद्द्विजः
पितृन्मधुघृताभ्यां च ऋचोऽधीते च योऽन्वहम् ४१
यजूम्षि शक्तितोऽधीते योऽन्वहं स घृतामृतैः
प्रीणाति देवानाज्येन मधुना च पितृंस्तथा ४२
स तु सोमघृतैर्देवांस्तर्पयेद्योऽन्वहं पठेत्
सामानि तृप्तिं कुर्याच्च पितृणां मधुसर्पिषा ४३
मेदसा तर्पयेद्देवानथर्वाङ्गिरसः पठन्
पितृंश्च मधुसर्पिर्भ्यामन्वहं शक्तितो द्विजः ४४
वाकोवाक्यं पुराणं च नाराशंसीश्च गाथिकाः
इतिहासांस्तथा विद्याः शक्त्याधीते हि योऽन्वहम् ४५
मांसक्षीरौदनमधुतर्पणं स दिवौकसाम्
करोति तृप्तिं कुर्याच्च पितृणां मधुसर्पिषा ४६
ते तृप्तास्तर्पयन्त्येनं सर्वकामफलैः शुभैः
यं यं क्रतुमधीते च तस्य तस्याप्नुयात्फलम् ४७
त्रिर्वित्तपूर्णपृथिवीदानस्य फलमश्नुते
तपसश्च परस्येह नित्यं स्वाध्यायवान्द्विजः ४८
नैष्ठिको ब्रह्मचारी तु वसेदाचार्यसन्निधौ
तदभावेऽस्य तनये पत्न्यां वैश्वानरेऽपि वा ४९
अनेन विधिना देहं सादयन्विजितेन्द्रियः

ब्रह्मलोकमवाप्नोति न चेहाजायते पुनः ५०

## ३ विवाहप्रकरणम्

गुरवे तु वरं दत्त्वा स्नायाद्वा तदनुज्ञया
वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा ५१
अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत्
अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम् ५२
अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजान्
पञ्चमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथा ५३
दशपूरुषविख्याताच्छ्रोत्रियाणां महाकुलात्
स्फीतादपि न सम्चारिरोगदोषसमन्वितात् ५४
एतैरेव गुणैर्युक्तः सवर्णः श्रोत्रियो वरः
यत्नात्परीक्षितः पुंस्त्वे युवा धीमान्जनप्रियः ५५
यदुच्यते द्विजातीनां शूद्राद्दारोपसम्ग्रहः
नैतन्मम मतं यस्मात्तत्रायं जायते स्वयम् ५६
तिस्रो वर्णानुपूर्व्येण द्वे तथैका यथाक्रमम्
ब्राह्मणक्षत्रियविशां भार्या स्वा शूद्रजन्मनः ५७
ब्राह्मो विवाह आहूय दीयते शक्त्यलम्कृता
तज्जः पुनात्युभयतः पुरुषानेकविंशतिम् ५८
यज्ञस्थ ऋत्विजे दैव आदायार्षस्तु गोद्वयम्
चतुर्दश प्रथमजः पुनात्युत्तरजश्च षट् ५९
इत्युक्त्वा चरतां धर्मं सह या दीयतेऽर्थिने
स कायः पावयेत्तज्जः षट् षड्वंश्यान्सहात्मना ६०
आसुरो द्रविणादानाद्गान्धर्वः समयान्मिथः
राक्षसो युद्धहरणात्पैशाचः कन्यकाछलात् ६१
पाणिग्राह्यः सवर्णासु गृह्णीयात्क्षत्रिया शरम्

वैश्या प्रतोदमादद्याद्वेदने त्वग्रजन्मनः ६२
पिता पितामहो भ्राता सकुल्यो जननी तथा
कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः ६३
अप्रयच्छन्समाप्नोति भ्रूणहत्यामृतावृतौ
गम्यं त्वभावे दातॄणां कन्या कुर्यात्स्वयम्वरम् ६४
सकृत्प्रदीयते कन्या हरंस्तां चोरदण्डभाक्
दत्तामपि हरेत्पूर्वाच्छ्रेयांश्चेद्वर आव्रजेत् ६५
अनाख्याय ददद्दोषं दण्ड्य उत्तमसाहसम्
अदुष्टां तु त्यजन्दण्ड्यो दूषयंस्तु मृषा शतम् ६६
अक्षता च क्षता चैव पुनर्भूः संस्कृता पुनः
स्वैरिणी या पतिं हित्वा सवर्णं कामतः श्रयेत् ६७
अपुत्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया
सपिण्डो वा सगोत्रो वा घृताभ्यक्त ऋतावियात् ६८
आगर्भसम्भवाद्गच्छेत्पतितस्त्वन्यथा भवेत्
अनेन विधिना जातः क्षेत्रजोऽस्य भवेत्सुतः ६९
हृताधिकारां मलिनां पिण्डमात्रोपजीविनाम्
परिभूतामधःशय्यां वासयेद्व्यभिचारिणीम् ७०
सोमः शौचं ददावासां गन्धर्वश्च शुभां गिरम्
पावकः सर्वमेध्यत्वं मेध्या वै योषितो ह्यतः ७१
व्यभिचारादृतौ शुद्धिर्गर्भे त्यागो विधीयते
गर्भभर्तृवधादौ च तथा महति पातके ७२
सुरापी व्याधिता धूर्ता वन्ध्यार्थघ्न्यप्रियम्वदा
स्त्रीप्रसूश्चाधिवेत्तव्या पुरुषद्वेषिणी तथा ७३
अधिविन्ना तु भर्तव्या महदेनोऽन्यथा भवेत्
यत्रानुकूल्यं दम्पत्योस्त्रिवर्गस्तत्र वर्धते ७४
मृते जीवति वा पत्यौ या नान्यमुपगच्छति

सेह कीर्तिमवाप्नोति मोदते चोमया सह ७५
आज्ञासम्पादिनीं दक्षां वीरसूं प्रियवादिनीम्
त्यजन्दाप्यस्तृतीयांशमद्रव्यो भरणं स्त्रियाः ७६
स्त्रीभिर्भर्तृवचः कार्यमेष धर्मः परः स्त्रियाः
आशुद्धेः सम्प्रतीक्ष्यो हि महापातकदूषितः ७७
लोकानन्त्यं दिवः प्राप्तिः पुत्रपौत्रप्रपौत्रकैः
यस्मात्तस्मात्स्त्रियः सेव्याः कर्तव्याश्च सुरक्षिताः ७८
षोडशर्तुनिशाः स्त्रीणां तस्मिन्युग्मासु सम्विशेत्
ब्रह्मचार्येव पर्वाण्याद्याश्चतस्रस्तु वर्जयेत् ७९
एवं गच्छन्स्त्रियं क्षामां मघां मूलं च वर्जयेत्
सुस्थ इन्दौ सकृत्पुत्रं लक्षण्यं जनयेत्पुमान् ८०
यथाकामी भवेद्वापि स्त्रीणां वरमनुस्मरन्
स्वदारनिरतश्चैव स्त्रियो रक्ष्या यतः स्मृताः ८१
भर्तृभ्रातृपितृज्ञातिश्वश्रूश्वशुरदेवरैः
बन्धुभिश्च स्त्रियः पूज्या भूषणाच्छादनाशनैः ८२
सम्यतोपस्करा दक्षा हृष्टा व्ययपराङ्मुखी
कुर्याच्छ्वशुरयोः पादवन्दनं भर्तृतत्परा ८३
क्रीडां शरीरसंस्कारं समाजोत्सवदर्शनम्
हास्यं परगृहे यानं त्यजेत्प्रोषितभर्तृका ८४
रक्षेत्कन्यां पिता विन्नां पतिः पुत्रास्तु वार्धके
अभावे ज्ञातयस्तेषां न स्वातन्त्र्यं क्वचित्स्त्रियाः ८५
पितृमातृसुतभ्रातृश्वश्रूश्वशुरमातुलैः
हीना न स्याद्विना भर्त्रा गर्हणीयान्यथा भवेत् ८६
पतिप्रियहिते युक्ता स्वाचारा विजितेन्द्रिया
सेह कीर्तिमवाप्नोति प्रेत्य चानुत्तमां गतिम् ८७
सत्यामन्यां सवर्णायां धर्मकार्यं न कारयेत्

सवर्णासु विधौ धर्म्ये ज्येष्ठया न विनेतरा ८८
दाहयित्वाग्निहोत्रेण स्त्रियं वृत्तवतीं पतिः
आहरेद्विधिवद्दारानग्नींश्चैवाविलम्बयन् ८९

## ४ वर्णजातिविवेकप्रकरणम्

सवर्णेभ्यः सवर्णासु जायन्ते हि सजातयः
अनिन्द्येषु विवाहेषु पुत्राः सम्तानवर्धनाः ९०
विप्रान्मूर्धावसिक्तो हि क्षत्रियायां विशः स्त्रियाम्
अम्बष्ठः शूद्र्यां निषादो जातः पारशवोऽपि वा ९१
वैश्याशूद्र्योस्तु राजन्यान्माहिष्योग्रौ सुतौ स्मृतौ
वैश्यात्तु करणः शूद्र्यां विन्नास्वेष विधिः स्मृतः ९२
ब्राह्मण्यां क्षत्रियात्सूतो वैश्याद्वैदेहकस्तथा
शूद्राज् जातस्तु चण्डालः सर्वधर्मबहिष्कृतः ९३
क्षत्रिया मागधं वैश्याच्छूद्रात्क्षत्तारमेव च
शूद्रादायोगवं वैश्या जनयामास वै सुतम् ९४
माहिष्येण करण्यां तु रथकारः प्रजायते
असत्सन्तस्तु विज्ञेयाः प्रतिलोमानुलोमजाः ९५
जात्युत्कर्षो युगे ज्ञेयः सप्तमे पञ्चमेऽपि वा
व्यत्यये कर्मणां साम्यं पूर्ववच्चाधरोत्तरम् ९६

## ५ गृहस्थधर्मप्रकरणम्

कर्म स्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही
दायकालाहृते वापि श्रौतं वैतानिकाग्निषु ९७
शरीरचिन्तां निर्वर्त्य कृतशौचविधिर्द्विजः
प्रातःसम्ध्यामुपासीत दन्तधावनपूर्वकम् ९८
हुत्वाग्नीन्सूर्यदैवत्यान्जपेन्मन्त्रान्समाहितः

वेदार्थानधिगच्छेच्च शास्त्राणि विविधानि च  ९९
उपेयादीश्वरं चैव योगक्षेमार्थसिद्धये
स्नात्वा देवान्पितृंश्चैव तर्पयेदर्चयेत्तथा  १००
वेदाथर्वपुराणानि सेतिहासानि शक्तितः
जपयज्ञप्रसिद्ध्यर्थं विद्यां चाध्यात्मिकीं जपेत्  १०१
बलिकर्मस्वधाहोमस्वाध्यायातिथिसत्क्रियाः
भूतपित्रमरब्रह्ममनुष्याणां महामखाः  १०२
देवेभ्यश्च हुतादन्नाच्छेषाद्भूतबलिं हरेत्
अन्नं भूमौ श्वचाण्डालवायसेभ्यश्च निक्षिपेत्  १०३
अन्नं पितृमनुष्येभ्यो देयमप्यन्वहं जलम्
स्वाध्यायं सततं कुर्यान्न पचेदन्नमात्मने  १०४
बालस्ववासिनीवृद्धगर्भिण्यातुरकन्यकाः
सम्भोज्यातिथिभृत्यांश्च दम्पत्योः शेषभोजनम्  १०५
आपोशनेनोपरिष्टादधस्तादश्नता तथा
अनग्नममृतं चैव कार्यमन्नं द्विजन्मना  १०६
अतिथित्वेन वर्णानां देयं शक्त्यानुपूर्वशः
अप्रणोद्योऽतिथिः सायमपि वाग्भूतृणोदकैः  १०७
सत्कृत्य भिक्षवे भिक्षा दातव्या सव्रताय च
भोजयेच्चागतान्काले सखिसम्बन्धिबान्धवान् १०८
महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेत्
सत्क्रियान्वासनं स्वादु भोजनं सूनृतं वचः  १०९
प्रतिसम्वत्सरं त्वर्घ्याः स्नातकाचार्यपार्थिवाः
प्रियो विवाह्यश्च तथा यज्ञं प्रत्यृत्विजः पुनः  ११०
अध्वनीनो अतिथिर्ज्ञेयः श्रोत्रियो वेदपारगः
मान्यावेतौ गृहस्थस्य ब्रह्मलोकमभीप्सतः  १११
परपाकरुचिर्न स्यादनिन्द्यामन्त्रणादृते

वाक्पाणिपादचापल्यं वर्जयेच्चातिभोजनम् ११२
अतिथिं श्रोत्रियं तृप्तमासीमन्तमनुव्रजेत्
अहःशेषं सहासीत शिष्टैरिष्टैश्च बन्धुभिः ११३
उपास्य पश्चिमां सम्ध्यां हुत्वाग्नींस्तानुपास्य च
भृत्यैः परिवृतो भुक्त्वा नातितृप्त्याथ सम्विशेत् ११४
ब्राह्मे मुहूर्ते चोत्थाय चिन्तयेदात्मनो हितम्
धर्मार्थकामान्स्वे काले यथाशक्ति न हापयेत् ११५
विद्याकर्मवयोबन्धुवित्तैर्मान्या यथाक्रमम्
एतैः प्रभूतैः शूद्रोऽपि वार्धके मानमर्हति ११६
वृद्धभारिनृपस्नातस्त्रीरोगिवरचक्रिणाम्
पन्था देयो नृपस्तेषां मान्यः स्नातश्च भूपतेः ११७
इज्याध्ययनदानानि वैश्यस्य क्षत्रियस्य च
प्रतिग्रहोऽधिको विप्रे याजनाध्यापने तथा ११८
प्रधानं क्षत्रिये कर्म प्रजानां परिपालनम्
कुसीदकृषिवाणिज्यपाशुपाल्यं विशः स्मृतम् ११९
शूद्रस्य द्विजशुश्रूषा तयाजीवन्वणिग्भवेत्
शिल्पैर्वा विविधैर्जीवेद्द्विजातिहितमाचरन् १२०
भार्यारतिः शुचिर्भृत्यभर्ता श्राद्धक्रियारतः
नमस्कारेण मन्त्रेण पञ्चयज्ञान्न हापयेत् १२१
अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः
दानं दमो दया क्षान्तिः सर्वेषां धर्मसाधनम् १२२
वयोबुद्ध्यर्थवाग्वेषश्रुताभिजनकर्मणाम्
आचरेत्सदृशीं वृत्तिमजिह्मामशठां तथा १२३
त्रैवार्षिकाधिकान्नो यः स हि सोमं पिबेद्द्विजः
प्राक्सौमिकीः क्रियाः कुर्याद्यस्यान्नं वार्षिकं भवेत् १२४
प्रतिसम्वत्सरं सोमः पशुः प्रत्ययनं तथा

कर्तव्याग्रयणेष्टिश्च चातुर्मास्यानि चैव हि  १२५
एषामसम्भवे कुर्यादिष्टिं वैश्वानरीं द्विजः
हीनकल्पं न कुर्वीत सति द्रव्ये फलप्रदम्  १२६
चाण्डालो जायते यज्ञकरणाच्छूद्रभिक्षितात्
यज्ञार्थं लब्धमददद्भासः काकोऽपि वा भवेत्  १२७
कुशूलकुम्भीधान्यो वा त्र्याहिकोऽश्वस्तनोऽपि वा
जीवेद्वापि शिलोञ्छेन श्रेयानेषां परः परः  १२८

## ६  स्नातकधर्मप्रकरणम्

न स्वाध्यायविरोध्यर्थमीहेत न यतस्ततः
न विरुद्धप्रसङ्गेन सम्तोषी च भवेत्सदा  १२९
राजान्तेवासियाज्येभ्यः सीदन्निच्छेद्धनं क्षुधा
दम्भिहैतुकपाखण्डिबकवृत्तींश्च वर्जयेत्  १३०
शुक्लाम्बरधरो नीचकेशश्मश्रुनखः शुचिः
न भार्यादर्शनेऽश्नीयान्नैकवासा न संस्थितः  १३१
न संशयं प्रपद्येत नाकस्मादप्रियं वदेत्
नाहितं नानृतं चैव न स्तेनः स्यान्न वार्धुषी  १३२
दाक्षायणी ब्रह्मसूत्री वेणुमान्सकमण्डलुः
कुर्यात्प्रदक्षिणं देवमृद्गोविप्रवनस्पतीन् १३३
न तु मेहेन्नदीछायावर्त्मगोष्ठाम्बुभस्मसु
न प्रत्यग्नयर्कगोसोमसम्ध्याम्बुस्त्रीद्विजन्मनः  १३४
नेक्षेतार्कं न नग्नां स्त्रीं न च संसृष्टमैथुनाम्
न च मूत्रं पुरीषं वा नाशुची राहुतारकाः  १३५
अयं मे वज्र इत्येवं सर्वं मन्त्रमुदीरयेत्
वर्षत्यप्रावृतो गच्छेत्स्वपेत्प्रत्यक्शिरा न च  १३६
ष्ठीवनासृक्शकृन्मूत्ररेतांस्यप्सु न निक्षिपेत्

पादौ प्रतापयेन्नाग्नौ न चैनमभिलङ्घयेत् १३७
जलं पिबेन्नाञ्जलिना न शयानं प्रबोधयेत्
नाक्षैः क्रीडेन्न धर्मघ्नैर्व्याधितैर्वा न सम्विशेत् १३८
विरुद्धं वर्जयेत्कर्म प्रेतधूमं नदीतरम्
केशभस्मतुषाङ्गारकपालेषु च संस्थितिम् १३९
नाचक्षीत धयन्तीं गां नाद्वारेण विशेत्क्वचित्
न राज्ञः प्रतिगृह्णीयाल् लुब्धस्योच्छास्त्रवर्तिनः १४०
प्रतिग्रहे सूनिचक्रिध्वजिवेश्यानराधिपाः
दुष्टा दशगुणं पूर्वात्पूर्वादेते यथाक्रमम् १४१
अध्यायानामुपाकर्म श्रावण्यां श्रवणेन वा
हस्तेनौषधिभावे वा पञ्चम्यां श्रावणस्य तु १४२
पौषमासस्य रोहिण्यामष्टकायामथापि वा
जलान्ते छन्दसां कुर्यादुत्सर्गं विधिवद्बहिः १४३
त्र्यहं प्रेतेष्वनध्यायः शिष्यर्त्विग्गुरुबन्धुषु
उपाकर्मणि चोत्सर्गे स्वशाखाश्रोत्रिये तथा १४४
सम्ध्यागर्जितनिर्घातभूकम्पोल्कानिपातने
समाप्य वेदं द्युनिशमारण्यकमधीत्य च १४५
पञ्चदश्यां चतुर्दश्यामष्टम्यां राहुसूतके
ऋतुसम्धिषु भुक्त्वा वा श्राद्धिकं प्रतिगृह्य च १४६
पशुमण्डूकनकुलश्वाहिमार्जारमूषकैः
कृतेऽनन्तरे त्वहोरात्रं शक्रपाते तथोच्छ्रये १४७
श्वक्रोष्टृगर्दभोलूकसामबाणार्तनिह्स्वने
अमेध्यशवशूद्रान्त्यश्मशानपतितान्तिके १४८
देशेऽशुचावात्मनि च विद्युत्स्तनितसम्प्लवे
भुक्त्वार्द्रपाणिरम्भोऽन्तरर्धरात्रेऽतिमारुते १४९
पांसुप्रवर्षे दिग्दाहे सम्ध्यानीहारभीतिषु

धावतः पूतिगन्धे च शिष्टे च गृहमागते १५०
खरोष्ट्रयानहस्त्यश्वनौवृक्षेरिणरोहणे
सप्तत्रिंशदनध्यायानेतांस्तात्कालिकान्विदुः १५१
देवर्त्विक्स्नातकाचार्यराज्ञां छायां परस्त्रियाः
नाक्रामेद्रक्तविरामूत्रष्ठीवनोद्वर्तनादि च १५२
विप्राहिक्षत्रियात्मानो नावज्ञेयाः कदाचन
आमृत्योः श्रियमाकाङ्क्षेन्न कम्चिन्मर्मणि स्पृशेत् १५३
दूरादुच्छिष्टविरामूत्रपादाम्भांसि समुत्सृजेत्
श्रुतिस्मृत्युदितं सम्यङ्ग नित्यमाचारमाचरेत् १५४
गोब्राह्मणानलान्नानि नोच्छिष्टो न पदा स्पृशेत्
न निन्दाताडने कुर्यात्पुत्रं शिष्यं च ताडयेत् १५५
कर्मणा मनसा वाचा यत्नाद्धर्मं समाचरेत्
अस्वर्ग्यं लोकविद्विष्टं धर्म्यमप्याचरेन्न तु १५६
मातृपित्रतिथिभ्रातृजामिसम्बन्धिमातुलैः
वृद्धबालातुराचार्यवैद्यसंश्रितबान्धवैः १५७
ऋत्विक्पुरोहितापत्यभार्यादाससनाभिभिः
विवादं वर्जयित्वा तु सर्वाम्ल् लोकाञ् जयेद्गृही १५८
पञ्च पिण्डाननुद्धृत्य न स्नायात्परवारिषु
स्नायान्नदीदेवखातह्रदप्रस्रवणेषु च १५९
परशय्यासनोद्यानगृहयानानि वर्जयेत्
अदत्तान्यग्निहीनस्य नान्नमद्यादनापदि १६०
कदर्यबद्धचौराणां क्लीबरङ्गावतारिणाम्
वैणाभिशस्तवार्धुष्यगणिकागणदीक्षिणाम् १६१
चिकित्सकातुरक्रुद्धपुंश्चलीमत्तविद्विषाम्
क्रूरोग्रपतितव्रात्यदाम्भिकोच्छिष्टभोजिनाम् १६२
अवीरास्त्रीस्वर्णकारस्त्रीजितग्रामयाजिनाम्

शस्त्रविक्रयिकर्मारतन्तुवायश्ववृत्तिनाम् १६३
नृशंसराजरजककृतघ्नवधजीविनाम्
चैलधावसुराजीवसहोपपतिवेश्मनाम् १६४
पिशुनानृतिनोश्चैव तथा चाक्रिकबन्दिनाम्
एषामन्नं न भोक्तव्यं सोमविक्रयिणस्तथा १६५
शूद्रेषु दासगोपालकुलमित्रार्धसीरिणः
भोज्यान्नाः नापितश्चैव यश्चात्मानं निवेदयेत् १६६

७ भक्ष्याभक्ष्यप्रकरणम्

अनर्चितं वृथामांसं केशकीटसमन्वितम्
शुक्तं पर्युषितोच्छिष्टं श्वस्पृष्टं पतितेक्षितम् १६७
उदक्यास्पृष्टसम्घुष्टं पर्यायान्नं च वर्जयेत्
गोघ्रातं शकुनोच्छिष्टं पदा स्पृष्टं च कामतः १६८
अन्नं पर्युषितं भोज्यं स्नेहाक्तं चिरसंस्थितम्
अस्नेहा अपि गोधूमयवगोरसविक्रियाः १६९
सम्धिन्यनिर्दशावत्सागोपयः परिवर्जयेत्
औष्ट्रमैकशफं स्त्रैणं आरण्यकमथाविकम् १७०
देवतार्थं हविः शिग्रुं लोहितान्व्रश्चनांस्तथा
अनुपाकृतमांसानि विड्जानि कवकानि च १७१
क्रव्यादपक्षिदात्यूहशुकप्रतुदटिट्टिभान्
सारसैकशफान्हंसान्सर्वांश्च ग्रामवासिनः १७२
कोयष्टिप्लवचक्राह्वबलाकाबकविष्किरान्
वृथाकृसरसम्यावपायसापूपशष्कुलीः १७३
कलविङ्कं सकाकोलं कुररं रज्जुदालकम्
जालपादान्खञ्जरीटानज्ञातांश्च मृगद्विजान् १७४
चाषांश्च रक्तपादांश्च सौनं वल्लूरमेव च

मत्स्यांश्च कामतो जग्ध्वा सोपवासस्त्र्यहं वसेत्  १७५
पलाण्डुं विड्वराहं च छत्राकं ग्रामकुक्कुटम्
लशुनं गृञ्जनं चैव जग्ध्वा चान्द्रायणं चरेत्  १७६
भक्ष्याः पञ्चनखाः सेधागोधाकच्छपशल्लकाः
शशश्च मत्स्येष्वपि हि सिम्हतुण्डकरोहिताः  १७७
तथा पाठीनराजीवसशल्काश्च द्विजातिभिः
अतः शृणुध्वं मांसस्य विधिं भक्षणवर्जने  १७८
प्राणात्यये तथा श्राद्धे प्रोक्षिते द्विजकाम्यया
देवान्पितॄन्समभ्यर्च्य खादन्मांसं न दोषभाक्  १७९
वसेत्स नरके घोरे दिनानि पशुरोमभिः
सम्मितानि दुराचारो यो हन्त्यविधिना पशून् १८०
सर्वान्कामानवाप्नोति हयमेधफलं तथा
गृहेऽपि निवसन्विप्रो मुनिर्मांसविवर्जनात्  १८१

## ८  द्रव्यशुद्धिप्रकरणम्

सौवर्णराजताब्जानामूर्ध्वपात्रग्रहाश्मनाम्
शाकरज्जुमूलफलवासोविदलचर्मणाम्  १८२
पात्राणां चमसानां च वारिणा शुद्धिरिष्यते
चरुस्त्रुक्स्त्रुवसस्नेहपात्राण्युष्णेन वारिणा  १८३
स्फ्यशूर्पाजिनधान्यानां मुसलोलूखलानसाम्
प्रोक्षणं सम्हतानां च बहूनां धान्यवाससाम्  १८५
तक्षणं दारुशृङ्गास्थ्नां गोवालैः फलसम्भुवाम्
मार्जनं यज्ञपात्राणां पाणिना यज्ञकर्मणि  १८५
सोषरोदकगोमूत्रैः शुध्यत्याविककौशिकम्
सश्रीफलैरंशुपट्टं सारिष्टैः कुतपं तथा  १८६
सगौरसर्षपैः क्षौमं पुनःपाकान्महीमयम्

कारुहस्तः शुचिः पण्यं भैक्षं योषिन्मुखं तथा १८७
भूशुद्धिर्मार्जनाद्दाहात्कालाद्गोक्रमणात्तथा
सेकादुल्लेखनाल् लेपाद्गृहं मार्जनलेपनात् १८८
गोघ्रातेऽन्ने तथा केशमक्षिकाकीटदूषिते
सलिलं भस्म मृद्वापि प्रक्षेप्तव्यं विशुद्धये १८९
त्रपुसीसकताम्राणां क्षाराम्लोदकवारिभिः
भस्माद्भिः कांस्यलोहानां शुद्धिः प्लावो द्रवस्य च १९०
अमेध्याक्तस्य मृत्तोयैः शुद्धिर्गन्धादिकर्षणात्
वाक्शस्तमम्बुनिर्णिक्तमज्ञातं च सदा शुचि १९१
शुचि गोतृप्तिकृत्तोयं प्रकृतिस्थं महीगतम्
तथा मांसं श्वचण्डालक्रव्यादादिनिपातितम् १९२
रश्मिरग्नी रजश्छाया गौरश्वो वसुधानिलः
विप्रुषो मक्षिकाः स्पर्शे वत्सः प्रस्नवने शुचिः १९३
अजाश्वयोर्मुखं मेध्यं न गोर्न नरजा मलाः
पन्थानश्च विशुध्यन्ति सोमसूर्यांशुमारुतैः १९४
मुखजा विप्रुषो मेध्यास्तथाचमनबिन्दवः
श्मश्रु च आस्यगतं दन्तसक्तं त्यक्त्वा ततः शुचिः १९५
स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे
आचान्तः पुनराचामेद्वासो विपरिधाय च १९६
रथ्याकर्दमतोयानि स्पृष्टान्यन्त्यश्ववायसैः
मारुतेनैव शुध्यन्ति पक्वेष्टकचितानि च १९७

## ९ दानप्रकरणम्

तपस्तप्त्वासृजद्ब्रह्मा ब्राह्मणान्वेदगुप्तये
तृप्त्यर्थं पितृदेवानां धर्मसम्रक्षणाय च १९८
सर्वस्य प्रभवो विप्राः श्रुताध्ययनशीलिनः

तेभ्यः क्रियापराः श्रेष्ठास्तेभ्योऽप्यध्यात्मवित्तमाः १९९
न विद्यया केवलया तपसा वापि पात्रता
यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्तितं  २००
गोभूतिलहिरण्यादि पात्रे दातव्यमर्चितम्
नापात्रे विदुषा किम्चिदात्मनः श्रेय इच्छता  २०१
विद्यातपोभ्यां हीनेन न तु ग्राह्यः प्रतिग्रहः
गृह्णन्प्रदातारमधो नयत्यात्मानमेव च  २०२
दातव्यं प्रत्यहं पात्रे निमित्तेषु विशेषतः
याचितेनापि दातव्यं श्रद्धापूतं स्वशक्तितः  २०३
हेमशृङ्गी शफै रौप्यैः सुशीला वस्त्रसम्युता
सकांस्यपात्रा दातव्या क्षीरिणी गौः सदक्षिणा  २०४
दातास्याः स्वर्गमाप्नोति वत्सरान्रोमसम्मितान्
कपिला चेत्तारयति भूयश्चासप्तमं कुलम्  २०५
सवत्सारोमतुल्यानि युगान्युभयतोमुखीम्
दातास्याः स्वर्गमाप्नोति पूर्वेण विधिना ददत्  २०६
यावद्वत्सस्य पादौ द्वौ मुखं योन्यां च दृश्यते
तावद्गौः पृथिवी ज्ञेया यावद्गर्भं न मुञ्चति  २०७
यथाकथम्चिद्दत्त्वा गां धेनुं वाधेनुमेव वा
अरोगामपरिक्लिष्टां दाता स्वर्गे महीयते  २०८
श्रान्तसम्वाहनं रोगिपरिचर्या सुरार्चनम्
पादशौचं द्विजोच्छिष्टमार्जनं गोप्रदानवत्  २०९
भूदीपांश्च अन्नवस्त्राम्भस्तिलसर्पिः प्रतिश्रयान्
नैवेशिकं स्वर्णधुर्यं दत्त्वा स्वर्गे महीयते  २१०
गृहधान्याभयोपानच्छत्रमाल्यानुलेपनम्
यानं वृक्षं प्रियं शय्यां दत्त्वात्यन्तं सुखी भवेत् २११
सर्वधर्ममयं ब्रह्म प्रदानेभ्योऽधिकं यतः

तद्ददत्समवाप्नोति ब्रह्मलोकमविच्युतम्  २१२
प्रतिग्रहसमर्थोऽपि नादत्ते यः प्रतिग्रहम्
ये लोका दानशीलानां स तानाप्नोति पुष्कलान् २१३
कुशाः शाकं पयो मत्स्या गन्धाः पुष्पं दधि क्षितिः
मांसं शय्यासनं धानाः प्रत्याख्येयं न वारि च  २१४
अयाचिताहृतं ग्राह्यमपि दुष्कृतकर्मणः
अन्यत्र कुलटाषण्ढपतितेभ्यस्तथा द्विषः  २१५
देवातिथ्यर्चनकृते गुरुभृत्यार्थमेव वा
सर्वतः प्रतिगृह्णीयादात्मवृत्त्यर्थमेव च  २१६

## १० श्राद्धप्रकरणम्

अमावास्याष्टका वृद्धिः कृष्णपक्षोऽयनद्वयम्
द्रव्यं ब्राह्मणसम्पत्तिर्विषुवत्सूर्यसम्क्रमः  २१७
व्यतीपातो गजछाया ग्रहणं चन्द्रसूर्ययोः
श्राद्धं प्रति रुचिश्चैते श्राद्धकालाः प्रकीर्तिताः  २१८
अग्र्यः सर्वेषु वेदेषु श्रोत्रियो ब्रह्मविद्युवा
वेदार्थविज् ज्येष्ठसामा त्रिमधुस्त्रिसुपर्णकः  २१९
स्वस्त्रीयर्त्विज्जामातृयाज्यश्वशुरमातुलाः
त्रिणाचिकेतदौहित्रशिष्यसम्बन्धिबान्धवाः  २२०
कर्मनिष्ठास्तपोनिष्ठाः पञ्चाग्निर्ब्रह्मचारिणः
पितृमातृपराश्चैव ब्राह्मणाः श्राद्धसम्पदः  २२१
रोगी हीनातिरिक्ताङ्गः काणः पौनर्भवस्तथा
अवकीर्णी कुण्डगोलौ कुनखी श्यावदन्तकः  २२२
भृतकाध्यापकः क्लीबः कन्यादूष्यभिशस्तकः
मित्रध्रुक् पिशुनः सोमविक्रयी परिविन्दकः  २२३
मातापितृगुरुत्यागी कुण्डाशी वृषलात्मजः

परपूर्वापतिः स्तेनः कर्मदुष्टाश्च निन्दिताः  २२४
निमन्त्रयेत पूर्वेद्युर्ब्राह्मणानात्मवान्शुचिः
तैश्चापि सम्यतैर्भाव्यं मनोवाक्कायकर्मभिः  २२५
अपराह्णे समभ्यर्च्य स्वागतेन आगतांस्तु तान्
पवित्रपाणिराचान्तानासनेषूपवेशयेत्  २२६
युग्मान्दैवे यथाशक्ति पित्र्येऽयुग्मांस्तथैव च
परिस्तृते शुचौ देशे दक्षिणाप्रवणे तथा  २२७
द्वौ दैवे प्राक् त्रयः पित्र्य उदगेकैकमेव वा
मातामहानामप्येवं तन्त्रं वा वैश्वदेविकम्  २२८
पाणिप्रक्षालनं दत्त्वा विष्टरार्थं कुशानपि
आवाहयेदनुज्ञातो विश्वे देवास इत्यृचा  २२९
यवैरन्ववकीर्याथ भाजने सपवित्रके
शं नो देव्या पयः क्षिप्त्वा यवोऽसीति यवांस्तथा  २३०
या दिव्या इति मन्त्रेण हस्तेष्वर्घ्यं विनिक्षिपेत्
दत्त्वा उदकं गन्धमाल्यं धूपदानं सदीपकम् २३१
तथाच्छादनदानं च करशौचार्थमम्बु च
अपसव्यं ततः कृत्वा पितृणामप्रदक्षिणम्  २३२
द्विगुणांस्तु कुशान्दत्त्वा ह्यु अन्तस्त्वेत्यृचा पितृन्
आवाह्य तदनुज्ञातो जपेदायन्तु नस्ततः  २३३
अपहता इति तिलान्विकीर्य च समन्ततः
यवार्थास्तु तिलैः कार्याः कुर्यादर्घ्यादि पूर्ववत्  २३४
दत्त्वा अर्घ्यं संस्रवांस्तेषां पात्रे कृत्वा विधानतः
पितृभ्यः स्थानमसीति न्युब्जं पात्रं करोत्यधः  २३५
अग्नौ करिष्यन्नादाय पृच्छत्यन्नं घृतप्लुतम्
कुरुष्वेत्यभ्यनुज्ञातो हुत्वाग्नौ पितृयज्ञवत्  २३६
हुतशेषं प्रदद्यात्तु भाजनेषु समाहितः

यथालाभोपपन्नेषु रौप्येषु च विशेषतः २३७
दत्त्वान्नं पृथिवीपात्रमिति पात्राभिमन्त्रणम्
कृत्वेदं विष्णुरित्यन्ने द्विजाङ्गुष्ठं निवेशयेत् २३८
सव्याहृतिकां गायत्रीं मधु वाता इति त्र्यृचम्
जप्त्वा यथासुखं वाच्यं भुञ्जीरंस्तेऽपि वाग्यताः २३९
अन्नमिष्तं हविष्यं च दद्यादक्रोधनोऽत्वरः
आतृप्तेस्तु पवित्राणि जप्त्वा पूर्वजपं तथा २४०
अन्नमादाय तृप्ताः स्थ शेषं चैवानुमान्य च
तदन्नं विकिरेद्भूमौ दद्याच्चापः सकृत्सकृत् २४१
सर्वमन्नमुपादाय सतिलं दक्षिणामुखः
उच्छिष्टसन्निधौ पिण्डान्दद्याद्वै पितृयज्ञवत् २४२
मातामहानामप्येवं दद्यादाचमनं ततः
स्वस्तिवाच्यं ततः कुर्यादक्षय्योदकमेव च २४३
दत्त्वा तु दक्षिणां शक्त्या स्वधाकारमुदाहरेत्
वाच्यतामित्यनुज्ञातः प्रकृतेभ्यः स्वधोच्यताम् २४४
ब्रूयुरस्तु स्वधेत्युक्ते भूमौ सिञ्चेत्ततो जलम्
विश्वे देवाश्च प्रीयन्तां विप्रैश्चोक्त इदं जपेत् २४५
दातारो नोऽभिवर्धन्तां वेदाः सम्ततिरेव च
श्रद्धा च नो मा व्यगमद्बहु देयं च नोऽस्त्विति २४६
इत्युक्त्वोक्त्वा प्रिया वाचः प्रणिपत्य विसर्जयेत्
वाजे वाज इति प्रीतः पितृपूर्वं विसर्जनम् २४७
यस्मिंस्तु संस्रवाः पूर्वमर्घ्यपात्रे निवेशिताः
पितृपात्रं तदुत्तानं कृत्वा विप्रान्विसर्जयेत् २४८
प्रदक्षिणमनुव्रज्य भुञ्जीत पितृसेवितम्
ब्रह्मचारी भवेत्तां तु रजनीं ब्राह्मणैः सह २४९
एवं प्रदक्षिणावृत्को वृद्धौ नान्दीमुखान्पितृन्

यजेत दधि कर्कन्धुमिश्रान्पिण्डान्यवैः क्रियाः २५०
एकोद्दिष्टं देवहीनमेकार्घ्यैकपवित्रकम्
आवाहनाग्नौ करणरहितं ह्यपसव्यवत् २५१
उपतिष्ठतामक्षय्यस्थाने विप्रविसर्जने
अभिरम्यतामिति वदेद्ब्रूयुस्तेऽभिरताः स्म ह २५२
गन्धोदकतिलैर्युक्तं कुर्यात्पात्रचतुष्टयम्
अर्घ्यार्थं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत् २५३
ये समाना इति द्वाभ्यां शेषं पूर्ववदाचरेत्
एतत्सपिण्डीकरणमेकोद्दिष्टं स्त्रिया अपि २५४
अर्वाक्सपिण्डीकरणं यस्य सम्वत्सराद्भवेत्
तस्याप्यन्नं सोदकुम्भं दद्यात्सम्वत्सरं द्विजे २५५
मृतेऽहनि प्रकर्तव्यं प्रतिमासं तु वत्सरम्
प्रतिसम्वत्सरं चैवमाद्यमेकादशेऽहनि २५६
पिण्डांस्तु गोऽजविप्रेभ्यो दद्यादग्नौ जलेऽपि वा
प्रक्षिपेत्सत्सु विप्रेषु द्विजोच्छिष्टं न मार्जयेत् २५७
हविष्यान्नेन वै मासं पायसेन तु वत्सरम्
मात्स्यहारिणकौरभशाकुनछागपार्षतैः २५८
ऐणरौरववाराहशाशैर्मांसैर्यथाक्रमम्
मासवृद्ध्याभितृप्यन्ति दत्तैरिह पितामहाः २५९
खड्गामिषं महाशल्कं मधु मुन्यन्नमेव वा
लौहामिषं महाशाकं मांसं वार्ध्रीणसस्य च २६०
यद्ददाति गयास्थश्च सर्वमानन्त्यमश्नुते
तथा वर्षात्रयोदश्यां मघासु च विशेषतः २६१
कन्यां कन्यावेदिनश्च पशून्वै सत्सुतानपि
द्यूतं कृषिं वाणिज्यां च द्विशफैकशफांस्तथा २६२
ब्रह्मवर्चस्विनः पुत्रान्स्वर्णरूप्ये सकुप्यके

ज्ञातिश्रैष्ठ्यं सर्वकामानाप्नोति श्राद्धदः सदा २६३
प्रतिपत्प्रभृतिष्वेकां वर्जयित्वा चतुर्दशीम्
शस्त्रेण तु हता ये वै तेभ्यस्तत्र प्रदीयते २६४
स्वर्गं ह्यपत्यमोजश्च शौर्यं क्षेत्रं बलं तथा
पुत्रं श्रैष्ठ्यं च सौभाग्यं समृद्धिं मुख्यतां शुभम् २६५
प्रवृत्तचक्रतां चैव वाणिज्यप्रभृतीनपि
अरोगित्वं यशो वीतशोकतां परमां गतिम् २६६
धनं वेदान्भिषक्सिद्धिं कुप्यं गा अप्यजाविकम्
अश्वानायुश्च विधिवद्यः श्राधं सम्प्रयच्छति २६७
कृत्तिकादिभरण्यन्तं स कामानाप्नुयादिमान्
आस्तिकः श्रद्धानश्च व्यपेतमदमत्सरः २६८
वसुरुद्रादितिसुताः पितरः श्राद्धदेवताः
प्रीणयन्ति मनुयाणां पितॄन्श्राद्धेन तर्पिताः २६९
आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च
प्रयच्छन्ति तथा राज्यं प्रीता नृणां पितामहाः २७०

## ११ गणपतिकल्पप्रकरणम्

विनायकः कर्मविघ्नसिद्ध्यर्थं विनियोजितः
गणानामाधिपत्ये च रुद्रेण ब्रह्मणा तथा २७१
तेनोपसृष्टो यस्तस्य लक्षणानि निबोधत
स्वप्नेऽवगाहतेऽत्यर्थं जलं मुण्डांश्च पश्यति २७२
काषायवाससश्चैव क्रव्यादांश्चाधिरोहति
अन्त्यजैर्गर्दभैरुष्ट्रैः सहैकत्रावतिष्ठते २७३
व्रजन्नपि तथात्मानं मन्यते अनुगतं परैः
विमना विफलारम्भः संसीदत्यनिमित्ततः २७४
तेनोपसृष्टो लभते न राज्यं राजनन्दनः

कुमारी च न भर्तारमपत्यं गर्भमङ्गना २७५
आचार्यत्वं श्रोत्रियश्च न शिष्योऽध्ययनं तथा
वणिग्लाभं न चाप्नोति कृषिं चापि कृषीवलः २७६
स्नपनं तस्य कर्तव्यं पुण्येऽह्नि विधिपूर्वकम्
गौरसर्षपकल्केन साज्येन उत्सादितस्य च २७७
सर्वाउषधैः सर्वगन्धैर्विलिप्तशिरसस्तथा
भद्रासनोपविष्टस्य स्वस्तिवाच्या द्विजाः शुभाः २७८
अश्वस्थानाद्गजस्थानाद्वल्मीकात्सम्गमाद्ध्रदात्
मृत्तिकां रोचनां गन्धान्गुग्गुलुं चाप्सु निक्षिपेत् २७९
या आहृता ह्येकवर्णैश्चतुर्भिः कलशैर्ह्रदात्
चर्मण्यानडुहे रक्ते स्थाप्यं भद्रासनं ततः २८०
सहस्राक्षं शतधारमृषिभिः पावनं कृतम्
तेन त्वामभिषिञ्चामि पावमान्यः पुनन्तु ते २८१
भगं ते वरुणो राजा भगं सूर्यो बृहस्पतिः
भगमिन्द्रश्च वायुश्च भगं सप्तर्षयो ददुः २८२
यत्ते केशेषु दौर्भाग्यं सीमन्ते यच्च मूर्धनि
ललाटे कर्णयोरक्ष्णोरापस्तद्घ्नन्तु सर्वदा २८३
स्नातस्य सार्षपं तैलं स्नुवेण औदुम्बरेण तु
जुहुयान्मूर्धनि कुशान्सव्येन परिगृह्य च २८४
मितश्च सम्मितश्चैव तथा शालकटङ्कटौ
कूश्माण्डो राजपुत्रश्चेत्यन्ते स्वाहासमन्वितैः २८५
नामभिर्बलिमन्त्रैश्च नमस्कारसमन्वितैः
दद्याच्चतुष्पथे शूर्पे कुशानास्तीर्य सर्वतः २८६
कृताकृतांस्तण्डुलांश्च पललौदनमेव च
मत्स्यान्पक्वांस्तथैवामान्मांसमेतावदेव तु २८७
पुष्पं चित्रं सुगन्धं च सुरां च त्रिविधामपि

मूलकं पूरिकापूपांस्तथैवोरण्डेरकस्रजः २८८
दध्यन्नं पायसं चैव गुडपिष्टं समोदकम्
एतान्सर्वान्समाहृत्य भूमौ कृत्वा ततः शिरः २८९
विनायकस्य जननीमुपतिष्ठेत्ततोऽम्बिकाम्
दूर्वासर्षपपुष्पाणां दत्त्वार्घ्यं पूर्णमञ्जलिम् २९०
रूपं देहि यशो देहि भगं भवति देहि मे
पुत्रान्देहि धनं देहि सर्वकामांश्च देहि मे २९१
ततः शुक्लाम्बरधरः शुक्लमाल्यानुलेपनः
ब्राह्मणान्भोजयेद्दद्याद्वस्त्रयुग्मं गुरोरपि २९२
एवं विनायकं पूज्य ग्रहांश्चैव विधानतः
कर्मणां फलमाप्नोति श्रियं चाप्नोत्यनुत्तमाम् २९३
आदित्यस्य सदा पूजां तिलकं स्वामिनस्तथा
महागणपतेश्चैव कुर्वन्सिद्धिमवाप्नुयात् २९४

१२ ग्रहशान्तिप्रकरणम्

श्रीकामः शान्तिकामो वा ग्रहयज्ञं समाचरेत्
वृष्ट्यायुःपुष्टिकामो वा तथैवाभिचरन्नपि २९५
सूर्यः सोमो महीपुत्रः सोमपुत्रो बृहस्पतिः
शुक्रः शनैश्चरो राहुः केतुश्चेति ग्रहाः स्मृताः २९६
ताम्रकात्स्फटिकाद्रक्तचन्दनात्स्वर्णकादुभौ
राजतादयसः सीसात्कांस्यात्कार्या ग्रहाः क्रमात् २९७
स्ववर्णैर्वा पटे लेख्या गन्धैर्मण्डलकेषु वा
यथावर्णं प्रदेयानि वासांसि कुसुमानि च २९८
गन्धाश्च बलयश्चैव धूपो देयश्च गुग्गुलुः
कर्तव्या मन्त्रवन्तश्च चरवः प्रतिदैवतम् २९९
आकृष्णेन इमं देवा अग्निर्मूर्धा दिवः ककुत्

उद्बुध्यस्वेति च ऋचो यथासम्ख्यं प्रकीर्तिताः ३००
बृहस्पते अति यदर्यस्तथैव अन्नात्परिस्रुतः
शं नो देवीस्तथा काण्डात्केतुं कृण्वन्निमांस्तथा ३०१
अर्कः पलाशः खदिर अपामार्गोऽथ पिप्पलः
उदुम्बरः शमी दूर्वा कुशाश्च समिधः क्रमात् ३०२
एकैकस्य त्वष्टशतमष्टाविंशतिरेव वा
होतव्या मधुसर्पिर्भ्यां दध्ना क्षीरेण वा युताः ३०३
गुडौदनं पायसं च हविष्यं क्षीरषाष्टिकम्
दध्योदनं हविश्चूर्णं मांसं चित्रान्नमेव च ३०४
दद्याद्ग्रहक्रमादेवं द्विजेभ्यो भोजनं बुधः
शक्तितो वा यथालाभं सत्कृत्य विधिपूर्वकम् ३०५
धेनुः शङ्खस्तथानड्वान्हेम वासो हयः क्रमात्
कृष्णा गौरायसं छाग एता वै दक्षिणाः स्मृताः ३०६
यश्च यस्य यदा दुहस्थः स तं यत्नेन पूजयेत्
ब्रह्मणैषां वरो दत्तः पूजिताः पूजयिष्यथ ३०७
ग्रहाधीना नरेन्द्राणामुच्छ्रायाः पतनानि च
भावाभावौ च जगतस्तस्मात्पूज्यतमा ग्रहाः ३०८
ग्रहाणामिदमातिथ्यं कुर्यात्सम्वत्सरादपि
आरोग्यबलसम्पन्नो जीवेत्स शरदः शतम् ३०९

## १३ राजधर्मप्रकरणम्

महोत्साहः स्थूललक्षः कृतज्ञो वृद्धसेवकः
विनीतः सत्त्वसम्पन्नः कुलीनः सत्यवाक् शुचिः ३०९
अदीर्घसूत्रः स्मृतिमानक्षुद्रोऽपरुषस्तथा
धार्मिकोऽव्यसनश्चैव प्राज्ञः शूरो रहस्यवित् ३१०
स्वरन्ध्रगोप्तान्वीक्षिक्यां दण्डनीत्यां तथैव च

विनीतस्त्वथ वार्तायां त्रय्यां चैव नराधिपः ३११
स मन्त्रिणः प्रकुर्वीत प्राज्ञान्मौलान्स्थिरान्शुचीन्
तैः सार्धं चिन्तयेद्राज्यं विप्रेणाथ ततः स्वयम् ३१२
पुरोहितं प्रकुर्वीत दैवज्ञमुदितोदितम्
दण्डनीत्यां च कुशलमथर्वाङ्गिरसे तथा ३१३
श्रौतस्मार्तक्रियाहेतोर्वृणुयादेव चर्त्विजः
यज्ञांश्चैव प्रकुर्वीत विधिवद्भूरिदक्षिणान् ३१४
भोगांश्च दद्याद्विप्रेभ्यो वसूनि विविधानि च
अक्षयोऽयं निधी राज्ञां यद्विप्रेषूपपादितम् ३१५
अस्कन्नमव्यथं चैव प्रायश्चित्तैरदूषितम्
अग्नेः सकाशाद्विप्राग्नौ हुतं श्रेष्ठमिहोच्यते ३१६
अलब्धमीहेद्धर्मेण लब्धं यत्नेन पालयेत्
पालितं वर्धयेन्नीत्या वृद्धं पात्रेषु निक्षिपेत् ३१७
दत्त्वा भूमिं निबन्धं वा कृत्वा लेख्यं तु कारयेत्
आगामिभद्रनृपतिपरिज्ञानाय पार्थिवः ३१८
पटे वा ताम्रपट्टे वा स्वमुद्रोपरिचिह्नितम्
अभिलेख्यात्मनो वंश्यानात्मानं च महीपतिः ३१९
प्रतिग्रहपरीमाणं दानच्छेदोपवर्णनम्
स्वहस्तकालसम्पन्नं शासनं कारयेत्स्थिरम् ३२०
रम्यं पशव्यमाजीव्यं जाङ्गलं देशमावसेत्
तत्र दुर्गाणि कुर्वीत जनकोशात्मगुप्तये ३२१
तत्र तत्र च निष्णातानध्यक्षान्कुशलान्शुचीन्
प्रकुर्यादायकर्मान्तव्ययकर्मसु चोद्यतान् ३२२
नातः परतरो धर्मो नृपाणां यद्रणार्जितम्
विप्रेभ्यो दीयते द्रव्यं प्रजाभ्यश्चाभयं सदा ३२३
य आहवेषु वध्यन्ते भूम्यर्थमपराङ्मुखाः

अकूटैरायुधैर्यान्ति ते स्वर्गं योगिनो यथा ३२४
पदानि क्रतुतुल्यानि भग्नेष्वविनिवर्तिनाम्
राजा सुकृतमादत्ते हतानां विपलायिनाम् ३२५
तवाहम्वादिनं क्लीबं निर्हेतिं परसम्गतम्
न हन्याद्विनिवृत्तं च युद्धप्रेक्षणकादिकम् ३२६
कृतरक्षः समुत्थाय पश्येदायव्ययौ स्वयम्
व्यवहारांस्ततो दृष्ट्वा स्नात्वा भुञ्जीत कामतः ३२७
हिरण्यं व्यापृतानीतं भाण्डागारेषु निक्षिपेत्
पश्येच्चारांस्ततो दूतान्प्रेषयेन्मन्त्रिसम्गतः ३२८
ततः स्वैरविहारी स्यान्मन्त्रिभिर्वा समागतः
बलानां दर्शनं कृत्वा सेनान्या सह चिन्तयेत् ३२९
संध्यामुपास्य शृणुयाच्चाराणां गूढभाषितम्
गीतनृत्यैश्च भुञ्जीत पठेत्स्वाध्यायमेव च ३३०
सम्विशेत्तूर्यघोषेण प्रतिबुध्येत्तथैव च
शास्त्राणि चिन्तयेद्बुद्ध्या सर्वकर्तव्यतास्तथा ३३१
प्रेषयेच्च ततश्चारान्स्वेष्वन्येषु च सादरान्
ऋत्विक्पुरोहिताचार्यैराशीर्भिरभिनन्दितः ३३२
दृष्ट्वा ज्योतिर्विदो वैद्यान्दद्याद्गां काञ्चनं महीम्
नैवेशिकानि च ततः श्रोत्रियेभ्यो गृहाणि च ३३३
ब्राह्मणेषु क्षमी स्निग्धेष्वजिह्मः क्रोधनोऽरिषु
स्याद्राजा भृत्यवर्गेषु प्रजासु च यथा पिता ३३४
पुण्यात्षड्भागमादत्ते न्यायेन परिपालयन्
सर्वदानाधिकं यस्मात्प्रजानां परिपालनम् ३३५
चाटतस्करदुर्वृत्तमहासाहसिकादिभिः
पीड्यमानाः प्रजा रक्षेत्कायस्थैश्च विशेषतः ३३६
अरक्ष्यमाणाः कुर्वन्ति यत्किम्चित्किल्बिषं प्रजाः

तस्मात्तु नृपतेरर्धं यस्माद्ब्रह्मात्यसौ करान् ३३७
ये राष्ट्राधिकृतास्तेषां चारैर्ज्ञात्वा विचेष्टितम्
साधून्सम्मानयेद्राजा विपरीतांश्च घातयेत् ३३८
उत्कोचजीविनो द्रव्यहीनान्कृत्वा विवासयेत्
सद्दानमानसत्कारान्श्रोत्रियान्वासयेत्सदा ३३९
अन्यायेन नृपो राष्ट्रात्स्वकोशं योऽभिवर्धयेत्
सोऽचिराद्विगतश्रीको नाशमेति सबान्धवः ३४०
प्रजापीडनसम्तापात्समुद्भूतो हुताशनः
राज्ञः कुलं श्रियं प्राणांश्चादग्ध्वा न निवर्तते ३४१
य एव नृपतेर्धर्मः स्वराष्ट्रपरिपालने
तमेव कृत्स्नमाप्नोति परराष्ट्रं वशं नयन् ३४२
यस्मिन्देशे य आचारो व्यवहारः कुलस्थितिः
तथैव परिपाल्योऽसौ यदा वशमुपागतः ३४३
मन्त्रमूलं यतो राज्यं तस्मान्मन्त्रं सुरक्षितम्
कुर्याद्यथास्य न विदुः कर्मणामाफलोदयात् ३४४
अरिर्मित्रमुदासीनोऽनन्तरस्तत्परः परः
क्रमशो मण्डलं चिन्त्यं सामादिभिरुपक्रमैः ३४५
उपायाः साम दानं च भेदो दण्डस्तथैव च
सम्यक्प्रयुक्ताः सिध्येयुर्दण्डस्त्वगतिका गतिः ३४६
सम्धिं च विग्रहं यानमासनं संश्रयं तथा
द्वैधीभावं गुणानेतान्यथावत्परिकल्पयेत् ३४७
यदा सस्यगुणोपेतं परराष्ट्रं तदा व्रजेत्
परश्च हीन आत्मा च हृष्टवाहनपूरुषः ३४८
दैवे पुरुषकारे च कर्मसिद्धिर्व्यवस्थिता
तत्र दैवमभिव्यक्तं पौरुषं पौर्वदेहिकम् ३४९
केचिद्दैवात्स्वभावाद्वा कालात्पुरुषकारतः

सम्योगे केचिदिच्छन्ति फलं कुशलबुद्धयः ३५०
यथा ह्येकेन चक्रेण रथस्य न गतिर्भवेत्
एवं पुरुषकारेण विना दैवं न सिध्यति ३५१
हिरण्यभूमिलाभेभ्यो मित्रलब्धिर्वरा यतः
अतो यतेत तत्प्राप्त्यै रक्षेत्सत्यं समाहितः ३५२
स्वाम्यमात्या जनो दुर्गं कोशो दण्डस्तथैव च
मित्राण्येताः प्रकृतयो राज्यं सप्ताङ्गमुच्यते ३५३
तदवाप्य नृपो दण्डं दुर्वृत्तेषु निपातयेत्
धर्मो हि दण्डरूपेण ब्रह्मणा निर्मितः पुरा ३५४
स नेतुं न्यायतोऽशक्यो लुब्धेनाकृतबुद्धिना
सत्यसम्धेन शुचिना सुसहायेन धीमता ३५५
यथाशास्त्रं प्रयुक्तः सन्सदेवासुरमानवम्
जगदानन्दयेत्सर्वमन्यथा तत्प्रकोपयेत् ३५६
अधर्मदण्डनं स्वर्गकीर्तिलोकविनाशनम्
सम्यक् तु दण्डनं राज्ञः स्वर्गकीर्तिजयावहम् ३५७
अपि भ्राता सुतोऽर्घ्यो वा श्वशुरो मातुलोऽपि वा
नादण्ड्यो नाम राज्ञोऽस्ति धर्माद्विचलितः स्वकात् ३५८
यो दण्ड्यान्दण्डयेद्राजा सम्यग्वध्यांश्च घातयेत्
इष्टं स्यात्क्रतुभिस्तेन समाप्तवरदक्षिणैः ३५९
इति सम्चिन्त्य नृपतिः क्रतुतुल्यफलं पृथक्
व्यवहारान्स्वयं पश्येत्सभ्यैः परिवृतो अन्वहम् ३६०
कुलानि जातीः श्रेणीश्च गणान्जानपदानपि
स्वधर्माच्चलितान्राजा विनीय स्थापयेत्पथि ३६१
जालसूर्यमरीचिस्थं त्रसरेणू रजः स्मृतम्
तेऽष्टौ लिक्षा तु तास्तिस्रो राजसर्षप उच्यते ३६२
गौरस्तु ते त्रयः षट् ते यवो मध्यस्तु ते त्रयः

कृष्णलः पञ्च ते माषस्ते सुवर्णस्तु षोडश ३६३
पलं सुवर्णाश्चत्वारः पञ्च वापि प्रकीर्तितम्
द्वे कृष्णले रूप्यमाषो धरणं षोडशैव ते ३६४
शतमानं तु दशभिर्धरणैः पलमेव तु
निष्कं सुवर्णाश्चत्वारः कार्षिकस्ताम्रिकः पणः ३६५
साशीतिपणसाहस्रो दण्ड उत्तमसाहसः
तदर्धं मध्यमः प्रोक्तस्तदर्धमधमः स्मृतः ३६६
धिग्दण्डस्त्वथ वाग्दण्डो धनदण्डो वधस्तथा
योज्या व्यस्ताः समस्ता वा ह्यपराधवशादिमे ३६७
ज्ञात्वापराधं देशं च कालं बलमथापि वा
वयः कर्म च वित्तं च दण्डं दण्ड्येषु पातयेत् ३६८
इत्याचाराध्यायः

## व्यवहाराध्यायः

### १ साधारणव्यवहारमातृकाप्रकरणम्

व्यवहारान्नृपः पश्येद्विद्वद्भिर्ब्राह्मणैः सह
धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः १
श्रुताध्ययनसम्पन्ना धर्मज्ञाः सत्यवादिनः
राज्ञा सभासदः कार्या रिपौ मित्रे च ये समाः २
अपश्यता कार्यवशाद्व्यवहारान्नृपेण तु
सभ्यैः सह नियोक्तव्यो ब्राह्मणः सर्वधर्मवित् ३
रागाल् लोभाद्भयाद्वापि स्मृत्यपेतादिकारिणः
सभ्याः पृथक् पृथग्दण्ड्या विवादाद्द्विगुणं दमम् ४
स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः
आवेदयति चेद्राज्ञे व्यवहारपदं हि तत् ५
प्रत्यर्थिनोऽग्रतो लेख्यं यथावेदितमर्थिना

समामासतदर्धाहर्नामजात्यादिचिह्नितम् ६
श्रुतार्थस्योत्तरं लेख्यं पूर्वावेदकसन्निधौ
ततो ऽर्थी लेखयेत्सद्यः प्रतिज्ञातार्थसाधनम् ७
तत्सिद्धौ सिद्धिमाप्नोति विपरीतमतो ऽन्यथा
चतुष्पाद्व्यवहारो ऽयं विवादेषूपदर्शितः ८

## २ असाधारणव्यवहारमातृकाप्रकरणम्

अभियोगमनिस्तीर्य नैनं प्रत्यभियोजयेत्
अभियुक्तं च नान्येन नोक्तं विप्रकृतिं नयेत् ९
कुर्यात्प्रत्यभियोगं च कलहे साहसेषु च
उभयोः प्रतिभूर्ग्राह्यः समर्थः कार्यनिर्णये १०
निह्नवे भावितो दद्याद्धनं राज्ञे च तत्समम्
मिथ्याभियोगी द्विगुणमभियोगाद्धनं वहेत् ११
साहसस्तेयपारुष्यगोऽअभिशापात्यये स्त्रियाम्
विवादयेत्सद्य एव कालोऽन्यत्रेच्छया स्मृतः १२
देशाद्देशान्तरं याति सृक्किणी परिलेढि च
ललाटं स्विद्यते चास्य मुखं वैवर्ण्यमेति च १३
परिशुष्यत्स्खलद्वाक्यो विरुद्धं बहु भाषिते
वाक्चक्षुः पूजयति नो तथौष्ठौ निर्भुजत्यपि १४
स्वभावाद्विकृतिं गच्छेन्मनोवाक्कायकर्मभिः
अभियोगे ऽथ साक्ष्ये वा दुष्टः स परिकीर्तितः १५
सम्दिग्धार्थं स्वतन्त्रो यः साधयेद्यश्च निष्पतेत्
न चाहूतो वदेत्किम्चिद्धीनो दण्ड्यश्च स स्मृतः १६
साक्षिषूभयतः सत्सु साक्षिणः पूर्ववादिनः
पूर्वपक्षेऽधरीभूते भवन्त्युत्तरवादिनः १७
सपणश्चेद्विवादः स्यात्तत्र हीनं तु दापयेत्

दराडं च स्वपरां चैव धनिने धनमेव च  १८
छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः
भूतमप्यनुपन्यस्तं हीयते व्यवहारतः  १९
निह्नुते लिखितं नैकमेकदेशे विभावितः
दाप्यः सर्वं नृपेणार्थं न ग्राह्यस्त्वनिवेदितः  २०
स्मृत्योर्विरोधे न्यायस्तु बलवान्व्यवहारतः
अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्थितिः  २१
प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्तितम्
एषामन्यतमाभावे दिव्यान्यतममुच्यते  २२
सर्वेष्वर्थविवादेषु बलवत्युत्तराक्रिया
आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरा  २३
पश्यतोऽब्रुवतो भूमेर्हानिर्विंशतिवार्षिकी
परेण भुज्यमानाया धनस्य दशवार्षिकी  २४
आधिसीमोपनिक्षेपजडबालधनैर्विना
तथोपनिधिराजस्त्रीश्रोत्रियाणां धनैरपि  २५
आध्यादीनां विहर्तारं धनिने दापयेद्धनम्
दराडं च तत्समं राज्ञे शक्त्यपेक्षमथापि वा  २६
आगमोऽभ्यधिको भोगाद्विना पूर्वक्रमागतात्
आगमेऽपि बलं नैव भुक्तिः स्तोकाअपि यत्र नो  २७
आगमस्तु कृतो येन सोऽभियुक्तस्तमुद्धरेत्
न तत्सुतस्तत्सुतो वा भुक्तिस्तत्र गरीयसी  २८
योऽभियुक्तः परेतः स्यात्तस्य रिक्थी तमुद्धरेत्
न तत्र कारणं भुक्तिरागमेन विनाकृता  २९
नृपेणाधिकृताः पूगाः श्रेणयोऽथ कुलानि च
पूर्वं पूर्वं गुरु ज्ञेयं व्यवहारविधौ नृणाम्  ३०
बलोपाधिविनिर्वृत्तान्व्यवहारान्निवर्तयेत्

स्त्रीनक्तमन्तरागारबहिःशत्रुकृतांस्तथा ३१
मत्तोन्मत्तार्तव्यसनिबालभीतादियोजितः
असम्बद्धकृतश्चैव व्यवहारो न सिध्यति ३२
प्रनष्टाधिगतं देयं नृपेण धनिने धनम्
विभावयेन्न चेल् लिङ्गैस्तत्समं दण्डमर्हति ३३
राजा लब्ध्वा निधिं दद्याद्द्विजेभ्योऽर्धं द्विजः पुनह्
विद्वानशेषमादद्यात्स सर्वस्य प्रभुर्यतः ३४
इतरेण निधौ लब्धे राजा षष्ठांशमाहरेत्
अनिवेदितविज्ञातो दाप्यस्तं दण्डमेव च ३५
देयं चौरहृतं द्रव्यं राज्ञा जानपदाय तु
अददद्धि समाप्नोति किल्बिषं यस्य तस्य तत् ३६

## ३ ऋणादानप्रकरणम्

अशीतिभागो वृद्धिः स्यान्मासि मासि सबन्धके
वर्णक्रमाच्छतं द्वित्रिचतुष्पञ्चकमन्यथा ३७
कान्तारगास्तु दशकं सामुद्रा विंशकं शतम्
दद्युर्वा स्वकृतां वृद्धिं सर्वे सर्वासु जातिषु ३८
सम्ततिस्तु पशुस्त्रीणां रसस्याष्टगुणा परा
वस्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणा परा ३९
प्रपन्नं साधयन्नर्थं न वाच्यो नृपतेर्भवेत्
साध्यमानो नृपं गच्छन्दण्ड्यो दाप्यश्च तद्धनम् ४०
गृहीतानुक्रमाद्दाप्यो धनिनामधमर्णिकः
दत्त्वा तु ब्राह्मणायैव नृपतेस्तदनन्तरम् ४१
राज्ञाधमर्णिको दाप्यः साधिताद्दशकं शतम्
पञ्चकं च शतं दाप्यः प्राप्तार्थो ह्युत्तमर्णिकः ४२
हीनजातिं परिक्षीणमृणार्थं कर्म कारयेत्

ब्राह्मणस्तु परिक्षीणः शनैर्दाप्यो यथोदयम् ४३
दीयमानं न गृह्णाति प्रयुक्तं यः स्वकं धनम्
मध्यस्थस्थापितं चेत्स्याद्वर्धते न ततः परम् ४४
अविभक्तैः कुटुम्बार्थे यदृणं तु कृतं भवेत्
दद्युस्तद्रिक्थिनः प्रेते प्रोषिते वा कुटुम्बिनि ४५
न योषित्पतिपुत्राभ्यां न पुत्रेण कृतं पिता
दद्यादृते कुटुम्बार्थान्न पतिः स्त्रीकृतं तथा ४६
सुराकामद्यूतकृतं दण्डशुल्कावशिष्टकम्
वृथादानं तथैवेह पुत्रो दद्यान्न पैतृकम् ४७
गोपशौण्डिकशैलूषरजकव्याधयोषिताम्
ऋणं दद्यात्पतिस्तेषां यस्माद्वृत्तिस्तदाश्रया ४८
प्रतिपन्नं स्त्रिया देयं पत्या वा सह यत्कृतम्
स्वयम्कृतं वा यदृणं न अन्यत्स्त्री दातुमर्हति ४९
पितरि प्रोषिते प्रेते व्यसनाभिप्लुतेऽपि वा
पुत्रपौत्रैर्ऋणं देयं निह्नवे साक्षिभावितम् ५०
रिक्थग्राह ऋणं दाप्यो योषिद्ग्राहस्तथैव च
पुत्रोऽनन्याश्रितद्रव्यः पुत्रहीनस्य रिक्थिनः ५१
भ्रातृणामथ दम्पत्योः पितुः पुत्रस्य चैव हि
प्रातिभाव्यमृणं साक्ष्यमविभक्ते न तु स्मृतम् ५२
दर्शने प्रत्यये दाने प्रातिभाव्यं विधीयते
आद्यौ तु वितथे दाप्यावितरस्य सुता अपि ५३
दर्शनप्रतिभूर्यत्र मृतः प्रात्ययिकोऽपि वा
न तत्पुत्रा ऋणं दद्युर्दद्युर्दानाय यः स्थितः ५४
बहवः स्युर्यदि स्वांशैर्दद्युः प्रतिभुवो धनम्
एकच्छायाश्रितेष्वेषु धनिकस्य यथारुचि ५५
प्रतिभूर्दापितो यत्तु प्रकाशं धनिनो धनम्

द्विगुणं प्रतिदातव्यमृणिकैस्तस्य तद्भवेत् ५६
सम्ततिः स्त्रीपशुष्वेव धान्यं त्रिगुणमेव च
वस्त्रं चतुर्गुणं प्रोक्तं रसश्च अष्टगुणस्तथा ५७
आधिः प्रणश्येद्द्विगुणे धने यदि न मोक्ष्यते
काले कालकृतो नश्येत्फलभोग्यो न नश्यति ५८
गोप्याधिभोगे नो वृद्धिः सोपकारे च हापिते
नष्टो देयो विनष्टश्च दैवराजकृतादृते ५९
आधेः स्वीकरणात्सिद्धी रक्ष्यमाणोऽप्यसारताम्
यातश्चेदन्य आधेयो धनभाग्वा धनी भवेत् ६०
चरित्रबन्धककृतं स वृद्ध्या दापयेद्धनं
सत्यं कारकृतं द्रव्यं द्विगुणं प्रतिदापयेत् ६१
उपस्थितस्य मोक्तव्य आधिः स्तेनोऽन्यथा भवेत्
प्रयोजकेऽसति धनं कुले न्यस्याधिमाप्नुयात् ६२
तत्कालकृतमूल्यो वा तत्र तिष्ठेदवृद्धिकः
विना धारणकाद्वापि विक्रीणीत ससाक्षिकम् ६३
यदा तु द्विगुणीभूतमृणमाधौ तदा खलु
मोच्य आधिस्तदुत्पन्ने प्रविष्टे द्विगुणे धने ६४

४ उपनिधिप्रकरणम्

वासनस्थमनाख्याय हस्तेऽन्यस्य यदर्प्यते
द्रव्यं तदौपनिधिकं प्रतिदेयं तथैव तत् ६५
न दाप्योऽपहृतं तं तु राजदैविकतस्करैः
भ्रेषश्चेन्मार्गितेऽदत्ते दाप्यो दण्डं च तत्समम् ६६
आजीवन्स्वेच्छया दण्ड्यो दाप्यस्तं चापि सोदयम्
याचितान्वाहितन्यासनिक्षेपादिष्वयं विधिः ६७

## ५ साक्षिप्रकरणम्

तपस्विनो दानशीलाः कुलीनाः सत्यवादिनः
धर्मप्रधाना ऋजवः पुत्रवन्तो धनान्विताः ६८
त्र्यवराः साक्षिणो ज्ञेयाः श्रौतस्मार्तक्रियापराः
यथाजाति यथावर्णं सर्वे सर्वेषु वा स्मृताः ६९
स्त्रीबालवृद्धकितवमत्तोन्मत्ताभिशस्तकाः
रङ्गावतारिपाखण्डिकूटकृद्विकलेन्द्रियाः ७०
पतिताप्तार्थसम्बन्धिसहायरिपुतस्कराः
साहसी दृष्टदोषश्च निर्धूताद्यास्त्वसाक्षिणः ७१
उभयानुमतः साक्षी भवत्येकोऽपि धर्मवित्
सर्वः साक्षी सम्ग्रहणे चौर्यपारुष्यसाहसे ७२
साक्षिणः श्रावयेद्वादिप्रतिवादिसमीपगान्
ये पातककृतां लोका महापातकिनां तथा ७३
अग्निदानां च ये लोका ये च स्त्रीबालघातिनाम्
स तान्सर्वानवाप्नोति यः साक्ष्यमनृतं वदेत् ७४
सुकृतं यत्त्वया किम्चिज् जन्मान्तरशतैः कृतम्
तत्सर्वं तस्य जानीहि यं पराजयसे मृषा ७५
अब्रुवन्हि नरः साक्ष्यमृणं सदशबन्धकम्
राज्ञा सर्वं प्रदाप्यः स्यात्षट्चत्वारिंशकेऽहनि ७६
न ददाति हि यः साक्ष्यं जानन्नपि नराधमः
स कूटसाक्षिणां पापैस्तुल्यो दण्डेन चैव हि ७७
द्वैधे बहूनां वचनं समेषु गुणिनां तथा
गुणिद्वैधे तु वचनं ग्राह्यं ये गुणवत्तमाः ७८
यस्योचुः साक्षिणः सत्यां प्रतिज्ञां स जयी भवेत्
अन्यथा वादिनो यस्य ध्रुवस्तस्य पराजयः ७९
उक्तेऽपि साक्षिभिः साक्ष्ये यद्यन्ये गुणवत्तमाः

द्विगुणा वान्यथा ब्रूयुः कूटाः स्युः पूर्वसाक्षिणः ८०
पृथक् पृथग्दण्डनीयाः कूटकृत्साक्षिणस्तथा
विवादाद्द्विगुणं दण्डं विवास्यो ब्राह्मणः स्मृतः ८१
यः साक्ष्यं श्रावितोऽन्येभ्यो निह्नुते तत्तमोवृतः
स दाप्योऽष्टगुणं दण्डं ब्राह्मणं तु विवासयेत् ८२
वर्णिनां हि वधो यत्र तत्र साक्ष्यनृतं वदेत्
तत्पावनाय निर्वाप्यश्चरुः सारस्वतो द्विजैः ८३

## ६ लेख्यप्रकरणम्

यः कश्चिदर्थो निष्णातः स्वरुच्या तु परस्परम्
लेख्यं तु साक्षिमत् कार्यं तस्मिन्धनिकपूर्वकम् ८४
समामासतदर्धाहर्नामजातिस्वगोत्रकैः
सब्रह्मचारिकात्मीयपितृनामादिचिह्नितम् ८५
समाप्तेऽर्थे ऋणी नाम स्वहस्तेन निवेशयेत्
मतं मेऽमुकपुत्रस्य यदत्रोपरि लेखितम् ८६
साक्षिणश्च स्वहस्तेन पितृनामकपूर्वकम्
अत्राहममुकः साक्षी लिखेयुरिति ते समाः ८७
उभयाभ्यर्थितेनैतन्मया ह्यमुकसूनुना
लिखितं ह्यमुकेनेति लेखकोऽन्ते ततो लिखेत् ८८
विनापि साक्षिभिर्लेख्यं स्वहस्तलिखितं तु यत्
तत्प्रमाणं स्मृतं लेख्यं बलोपधिकृतादृते ८९
ऋणं लेख्यकृतं देयं पुरुषैस्त्रिभिरेव तु
आधिस्तु भुज्यते तावद्यावत्तन्न प्रदीयते ९०
देशान्तरस्थे दुर्लेख्ये नष्टोन्मृष्टे हृते तथा
भिन्ने दग्धेऽथवा छिन्ने लेख्यमन्यत्तु कारयेत् ९१
सम्दिग्धलेख्यशुद्धिः स्यात्स्वहस्तलिखितादिभिः

युक्तिप्राप्तिक्रियाचिह्नसम्बन्धागमहेतुभिः ९२
लेख्यस्य पृष्ठेऽभिलिखेद्दत्त्वा दत्त्वर्णिको धनम्
धनी वोपगतं दद्यात्स्वहस्तपरिचिह्नितम् ९३
दत्त्वर्णं पाटयेल् लेख्यं शुद्ध्यै वान्यत्तु कारयेत्
साक्षिमच्च भवेद्यद्वा तद्दातव्यं ससाक्षिकम् ९४

७ दिव्यप्रकरणम्

तुलाग्न्यापो विषं कोशो दिव्यानीह विशुद्धये
महाभियोगेष्वेतानि शीर्षकस्थेऽभियोक्तरि ९५
रुच्या वान्यतरः कुर्यादितरो वर्तयेच्छिरः
विनापि शीर्षकात्कुर्यान्नृपद्रोहेऽथ पातके ९६
सचैलं स्नातमाहूय सूर्योदय उपोषितम्
कारयेत्सर्वदिव्यानि नृपब्राह्मणसन्निधौ ९७
तुला स्त्रीबालवृद्धान्धपङ्गुब्राह्मणरोगिणाम्
अग्निर्जलं वा शूद्रस्य यवाः सप्त विषस्य वा ९८
नासहस्राद्धरेत्फालं न विषं न तुलां तथा
नृपार्थेष्वभिशापे च वहेयुः शुचयः सदा ९९
तुलाधारणविद्वद्भिरभियुक्तस्तुलाश्रितः
प्रतिमानसमीभूतो रेखां कृत्वावतारितः १००
त्वं तुले सत्यधामासि पुरा देवैर्विनिर्मिता
तत्सत्यं वद कल्याणि संशयान्मां विमोचय १०१
यद्यस्मि पापकृन्मातस्ततो मां त्वमधो नय
शुद्धश्चेद्गमयोर्ध्वं मां तुलामित्यभिमन्त्रयेत् १०२
करौ विमृदितव्रीहेर्लक्षयित्वा ततो न्यसेत्
सप्ताश्वत्थस्य पत्राणि तावत्सूत्रेण वेष्टयेत् १०३
त्वमग्ने सर्वभूतानामन्तश्चरसि पावक

साक्षिवत्पुरायपापेभ्यो ब्रूहि सत्यं कवे मम १०४
तस्येत्युक्तवतो लौहं पञ्चाशत्पलिकं समम्
अग्निवर्णं न्यसेत्पिराडं हस्तयोरुभयोरपि १०५
स तमादाय सप्तैव मराडलानि शनैर्व्रजेत्
षोडशान्गुलकं ज्ञेयं मराडलं तावदन्तरम् १०६
मुक्त्वाग्निं मृदितव्रीहिरदग्धः शुद्धिमाप्नुयात्
अन्तरा पतिते पिराडे सम्देहे वा पुनर्हरेत् १०७
सत्येन माभिरक्ष त्वं वरुरोत्यभिशाप्य कम्
नाभिदघ्नोदकस्थस्य गृहीत्वोरू जलं वशेत् १०८
समकालमिषुं मुक्तमानीयान्यो जवी नरः
गते तस्मिन्निमग्नाङ्गं पश्येच्चेच्छुद्धिमाप्नुयात् १०९
त्वं विष ब्रह्मराः पुत्रः सत्यधर्मे व्यवस्थितः
त्रायस्वास्मादभीशापात्सत्येन भव मेऽमृतम् ११०
एवमुक्त्वा विषं शार्ङ्गं भक्षयेद्धिमशैलजम्
यस्य वेगैर्विना जीर्येच्छुद्धिं तस्य विनिर्दिशेत् १११
देवानुग्रान्समभ्यर्च्य तत्स्नानोदकमाहरेत्
संस्नाव्य पाययेत्तस्माज् जलं तु प्रसृतित्रयम् ११२
अर्वाक् चतुर्दशादह्नो यस्य नो राजदैविकम्
व्यसनं जायते घोरं स शुद्धः स्यान्न संशयः ११३

## ८ दायविभागप्रकरराम्

विभागं चेत्पिता कुर्यादिच्छया विभजेत्सुतान्
ज्येष्ठं वा श्रेष्ठभागेन सर्वे वा स्युः समांशिनः ११४
यदि कुर्यात्समानंशान्पत्न्यः कार्याः समांशिकाः
न दत्तं स्त्रीधनं यासां भर्त्रा वा श्वशुरेण वा ११५
शक्तस्यानीहमानस्य किम्चिद्दत्त्वा पृथक् क्रिया

न्यूनाधिकविभक्तानां धर्म्यः पितृकृतः स्मृतः ११६
विभजेरन्सुताः पित्रोरूर्ध्वं रिक्थमृणं समम्
मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेऽन्वयः ११७
पितृद्रव्याविरोधेन यदन्यत्स्वयमर्जितम्
मैत्रमौद्वाहिकं चैव दायादानां न तद्भवेत् ११८
क्रमादभ्यागतं द्रव्यं हृतमप्युद्धरेत्तु यः
दायादेभ्यो न तद्दद्याद्विद्यया लब्धमेव च ११९
सामान्यार्थसमुत्थाने विभागस्तु समः स्मृतः
अनेकपितृकाणां तु पितृतो भागकल्पना १२०
भूर्या पितामहोपात्ता निबन्धो द्रव्यमेव वा
तत्र स्यात्सदृशं स्वाम्यं पितुः पुत्रस्य चैव हि १२१
विभक्तेषु सुतो जातः सवर्णायां विभागभाक्
दृश्याद्वा तद्विभागः स्यादायव्ययविशोधितात् १२२
पितृभ्यां यस्य तद्दत्तं तत्तस्यैव धनं भवेत्
पितुरूर्ध्वं विभजतां माताप्यंशं समं हरेत् १२३
असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः
भगिन्यश्च निजादंशाद्दत्त्वांशं तु तुरीयकम् १२४
चतुस्त्रिद्व्येकभागाः स्युर्वर्णशो ब्राह्मणात्मजाः
क्षत्रजास्त्रिद्व्येकभागा विड्जास्तु द्व्येकभागिनः १२५
अन्योन्यापहृतं द्रव्यं विभक्ते यत्तु दृश्यते
तत्पुनस्ते समैरंशैर्विभजेरन्निति स्थितिः १२६
अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः
उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मतः १२७
औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः
क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा १२८
गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृतः

कानीनः कन्यकाजातो मातामहसुतो मतः  १२९
अक्षतायां क्षतायां वा जातः पौनर्भवः सुतः
दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत्  १३०
क्रीतश्च ताभ्यां विक्रीतः कृत्रिमः स्यात्स्वयं कृतः
दत्त्वात्मा तु स्वयं दत्तो गर्भे विन्नः सहोढजः  १३१
उत्सृष्टो गृह्यते यस्तु सोऽपविद्धो भवेत्सुतः
पिण्डदोऽअंशहरश्चैषां पूर्वाभावे परः परः  १३२
सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः
जातोऽपि दास्यां शूद्रेण कामतोऽअंशहरो भवेत्  १३३
मृते पितरि कुर्युस्तं भ्रातरस्त्वर्धभागिकम्
अभ्रातृको हरेत्सर्वं दुहितॄणां सुतादृते  १३४
पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा
तत्सुता गोत्रजा बन्धुशिष्यसब्रह्मचारिणः  १३५
एषामभावे पूर्वस्य धनभागुत्तरोत्तरः
स्वर्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिः  १३६
वानप्रस्थयतिब्रह्मचारिणां रिक्थभागिनः
क्रमेणाचार्यसच्छिष्यधर्मभ्रात्रेकतीर्थिनः  १३७
संसृष्टिनस्तु संसृष्टी सोदरस्य तु सोदरः
दद्यादपहरेच्चांशं जातस्य च मृतस्य च  १३८
अन्योदर्यस्तु संसृष्टी न अन्योदर्यो धनं हरेत्
असंसृष्ट्यपि वादद्यात् संसृष्टो नान्यमातृजः  १३९
क्लीबोऽथ पतितस्तज्जः पङ्गुरुन्मत्तको जडः
अन्धोऽचिकित्स्यरोगाद्या भर्तव्याः स्युर्निरंशकाः  १४०
औरसाः क्षेत्रजास्त्वेषां निर्दोषा भागहारिणः
सुताश्चैषां प्रभर्तव्या यावद्वै भर्तृसात्कृताः  १४१
अपुत्रा योषितश्चैषां भर्तव्याः साधुवृत्तयः

निर्वास्या व्यभिचारिरायः प्रतिकूलास्तथैव च १४२
पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतम्
आधिवेदनिकाद्यं च स्त्रीधनं परिकीर्तितम् १४३
बन्धुदत्तं तथा शुल्कमन्वाधेयकमेव च
अतीतायामप्रजसि बान्धवास्तदवाप्नुयुः १४४
अप्रजस्त्रीधनं भर्तुर्ब्राह्मादिषु चतुर्ष्वपि
दुहितृणां प्रसूता चेच्छेषेषु पितृगामि तत् १४५
दत्त्वा कन्यां हरन्दराड्यो व्ययं दद्याच्च सोदयम्
मृतायां दत्तमादद्यात्परिशोध्योभयव्ययम् १४६
दुर्भिक्षे धर्मकार्ये च व्याधौ सम्प्रतिरोधके
गृहीतं स्त्रीधनं भर्ता न स्त्रियै दातुमर्हति १४७
अधिविन्नस्त्रियै दद्यादाधिवेदनिकं समम्
न दत्तं स्त्रीधनं यस्यै दत्ते त्वर्धं प्रकल्पयेत् १४८
विभागनिह्नवे ज्ञातिबन्धुसाक्ष्यभिलेखितैः
विभागभावना ज्ञेया गृहक्षेत्रैश्च यौतकैः १४९

## ९ सीमाविवादप्रकरणम्

सीम्नो विवादे क्षेत्रस्य सामन्ताः स्थविरादयः
गोपाः सीमाकृषाणा ये सर्वे च वनगोचराः १५०
नयेयुरेते सीमानं स्थलाङ्गारतुषद्रुमैः
सेतुवल्मीकनिम्नास्थिचैत्याद्यैरुपलक्षिताम् १५१
सामन्ता वा समग्रामाश्चत्वारोऽष्टौ दशापि वा
रक्तस्रग्वसनाः सीमां नयेयुः क्षितिधारिणः १५२
अनृते तु पृथग्दराड्या राज्ञा मध्यमसाहसम्
अभावे ज्ञातृचिह्नानां राजा सीम्नः प्रवर्तिता १५३
आरामायतनग्रामनिपानोद्यानवेश्मसु

एष एव विधिर्ज्ञेयो वर्षाम्बुप्रवहादिषु १५४
मर्यादायाः प्रभेदे च सीमातिक्रमणे तथा
क्षेत्रस्य हरणे दण्डा अधमोत्तममध्यमाः १५५
न निषेध्योऽल्पबाधस्तु सेतुः कल्याणकारकः
परभूमिं हरन्कूपः स्वल्पक्षेत्रो बहूदकः १५६
स्वामिने योऽनिवेद्यैव क्षेत्रे सेतुं प्रवर्तयेत्
उत्पन्ने स्वामिनो भोगस्तदभावे महीपतेः १५७
फालाहतमपि क्षेत्रं न कुर्याद्यो न कारयेत्
स प्रदाप्यः कृष्टफलं क्षेत्रमन्येन कारयेत् १५८

## १० स्वामिपालविवादप्रकरणम्

माषानष्टौ तु महिषी सस्यघातस्य कारिणी
दण्डनीया तदर्धं तु गौस्तदर्धमजाविकम् १५९
भक्षयित्वोपविष्टानां यथोक्ताद्द्विगुणो दमः
सममेषां विवीतेऽपि खरोष्ट्रं महिषीसमम् १६०
यावत्सस्यं विनश्येत्तु तावत्स्यात्क्षेत्रिणः फलम्
गोपस्ताड्यश्च गोमी तु पूर्वोक्तं दण्डमर्हति १६१
पथि ग्रामविवीतान्ते क्षेत्रे दोषो न विद्यते
अकामतः कामचारे चौरवद्दण्डमर्हति १६२
महोक्षोत्सृष्टपशवः सूतिकागन्तुकादयः
पालो येषां न ते मोच्या दैवराजपरिप्लुताः १६३
यथार्पितान्पशून्गोपः सायं प्रत्यर्पयेत्तथा
प्रमादमृतनष्टांश्च प्रदाप्यः कृतवेतनः १६४
पालदोषविनाशे तु पाले दण्डो विधीयते
अर्धत्रयोदशपणः स्वामिनो द्रव्यमेव च १६५
ग्राम्येच्छया गोप्रचारो भूमिराजवशेन वा

द्विजस्तृणैधःपुष्पाणि सर्वतः सर्वदा हरेत्  १६६
धनुःशतं परीणाहो ग्रामे क्षेत्रान्तरं भवेत्
द्वे शते खर्वटस्य स्यान्नगरस्य चतुःशतम्  १६७

## ११  अस्वामिविक्रयप्रकरणम्

स्वं लभेतान्यविक्रीतं क्रेतुर्दोषोऽप्रकाशिते
हीनाद्रहो हीनमूल्ये वेलाहीने च तस्करः  १६८
नष्टापहृतमासाद्य हर्तारं ग्राहयेन्नरम्
देशकालातिपत्तौ च गृहीत्वा स्वयमर्पयेत्  १६९
विक्रेतुर्दर्शनाच्छुद्धिः स्वामी द्रव्यं नृपो दमम्
क्रेता मूल्यमवाप्नोति तस्माद्यस्तस्य विक्रयी  १७०
आगमेनोपभोगेन नष्टं भाव्यमतोऽन्यथा
पञ्चबन्धो दमस्तस्य राज्ञे तेनाविभाविते  १७१
हृतं प्रनष्टं यो द्रव्यं परहस्तादवाप्नुयात्
अनिवेद्य नृपे दण्ड्यः स तु षण्णवतिं पणान् १७२
शौल्किकैः स्थानपालैर्वा नष्टापहृतमाहृतम्
अर्वाक् सम्वत्सरात्स्वामी हरेत परतो नृपः  १७३
पणानेकशफे दद्याच्चतुरः पञ्च मानुषे
महिषोष्ट्रगवां द्वौ द्वौ पादं पादमजाविके  १७४

## १२  दत्ताप्रदानिकप्रकरणम्

स्वं कुटुम्बाविरोधेन देयं दारसुतादृते
नान्वये सति सर्वस्वं यच्चान्यस्मै प्रतिश्रुतम्  १७५
प्रतिग्रहः प्रकाशः स्यात्स्थावरस्य विशेषतः
देयं प्रतिश्रुतं चैव दत्त्वा नापहरेत्पुनः  १७६

## १३ क्रीतानुशयप्रकरणम्

दशैकपञ्चसप्ताहमासत्र्यहार्धमासिकम्
बीजायो वाह्यरत्नस्त्रीदोह्यपुंसां परीक्षणम् १७७
अग्नौ सुवर्णमक्षीणं रजते द्विपलं शते
अष्टौ त्रपुणि सीसे च ताम्रे पञ्च दशायसि १७८
शते दशपला वृद्धिरौर्णे कार्पाससौत्रिके
मध्ये पञ्चपला वृद्धिः सूक्ष्मे तु त्रिपला मता १७९
कार्मिके रोमबद्धे च त्रिंशद्भागः क्षयो मतः
न क्षयो न च वृद्धिश्च कौशेये वाल्कलेषु च १८०
देशं कालं च भोगं च ज्ञात्वा नष्टे बलाबलम्
द्रव्याणां कुशला ब्रूयुर्यत्तद्दाप्यमसंशयम् १८१

## १४ अभ्युपेत्याशुश्रूषाप्रकरणम्

बलाद्दासीकृतश्चौरैर्विक्रीतश्चापि मुच्यते
स्वामिप्राणप्रदो भक्तत्यागात्तन्निष्क्रयादपि १८२
प्रव्रज्यावसितो राज्ञो दास आमरणान्तिकम्
वर्णानामानुलोम्येन दास्यं न प्रतिलोमतः १८३
कृतशिल्पोऽपि निवसेत्कृतकालं गुरोर्गृहे
अन्तेवासी गुरुप्राप्तभोजनस्तत्फलप्रदः १८४

## १५ सम्विद्व्यतिक्रमप्रकरणम्

राजा कृत्वा पुरे स्थानं ब्राह्मणान्नयस्य तत्र तु
त्रैविद्यं वृत्तिमद्ब्रूयात्स्वधर्मः पाल्यतामिति १८५
निजधर्माविरोधेन यस्तु समयिको भवेत्
सोऽपि यत्नेन सम्रक्ष्यो धर्मो राजकृतश्च यः १८६
गणद्रव्यं हरेद्यस्तु सम्विदं लङ्घयेच्च यः

सर्वस्वहरणं कृत्वा तं राष्ट्राद्विप्रवासयेत् १८७
कर्तव्यं वचनं सर्वैः समूहहितवादिनाम्
यस्तत्र विपरीतः स्यात्स दाप्यः प्रथमं दमम् १८८
समूहकार्य आयातान्कृतकार्यान्विसर्जयेत्
स दानमानसत्कारैः पूजयित्वा महीपतिः १८९
समूहकार्यप्रहितो यल् लभेत तदर्पयेत्
एकादशगुणं दाप्यो यद्यसौ नार्पयेत्स्वयम् १९०
धर्मज्ञाः शुचयोऽलुब्धा भवेयुः कार्यचिन्तकाः
कर्तव्यं वचनं तेषां समूहहितवादिनाम् १९१
श्रेणिनैगमपाखण्डगणानामप्ययं विधिः
भेदं चैषां नृपो रक्षेत्पूर्ववृत्तिं च पालयेत् १९२

१६ वेतनादानप्रकरणम्

गृहीतवेतनः कर्म त्यजन्द्विगुणमावहेत्
अगृहीते समं दाप्यो भृत्यै रक्ष्य उपस्करः १९३
दाप्यस्तु दशमं भागं वाणिज्यपशुसस्यतः
अनिश्चित्य भृतिं यस्तु कारयेत्स महीक्षिता १९४
देशं कालं च योऽतीयाल् लाभं कुर्याच्च योऽन्यथा
तत्र स्यात्स्वामिनश्छन्दोऽधिकं देयं कृतेऽधिके १९५
यो यावत्कुरुते कर्म तावत्तस्य तु वेतनम्
उभयोरप्यसाध्यं चेत्साध्ये कुर्याद्यथाश्रुतम् १९६
अराजदैविकं नष्टं भाण्डं दाप्यस्तु वाहकः
प्रस्थानविघ्नकृच्चैव प्रदाप्यो द्विगुणां भृतिम् १९७
प्रक्रान्ते सप्तमं भागं चतुर्थं पथि सम्त्यजन्
भृतिमर्धपथे सर्वां प्रदाप्यस्त्याजकोऽपि च १९८

## १७ द्यूतसमाह्वयप्रकरणम्

ग्लहे शतिकवृद्धेस्तु सभिकः पञ्चकं शतम्
गृह्णीयाद्धूर्तकितवादितराद्दशकं शतम् १९९
स सम्यक्पालितो दद्याद्राज्ञे भागं यथाकृतम्
जितमुद्ग्राहयेज् जेत्रे दद्यात्सत्यं वचः क्षमी २००
प्राप्ते नृपतिना भागे प्रसिद्धे धूर्तमण्डले
जितं ससभिके स्थाने दापयेदन्यथा न तु २०१
द्रष्टारो व्यवहाराणां साक्षिणश्च त एव हि
राज्ञा सचिह्नं निर्वास्याः कूटाक्षोपधिदेविनः २०२
द्यूतमेकमुखं कार्यं तस्करज्ञानकारणात्
एष एव विधिर्ज्ञेयः प्राणिद्यूते समाह्वये २०३

## १८ वाक्पारुष्यप्रकरणम्

सत्यासत्यान्यथास्तोत्रैर्न्यूनाङ्गेन्द्रियरोगिणाम्
क्षेपं करोति चेद्दण्ड्यः पणानर्धत्रयोदशान् २०४
अभिगन्तास्मि भगिनीं मातरं वा तवेति ह
शपन्तं दापयेद्राजा पञ्चविंशतिकं दमम् २०५
अर्धोऽधर्मेषु द्विगुणः परस्त्रीषूत्तमेषु च
दण्डप्रणयनं कार्यं वर्णजात्युत्तराधरैः २०६
प्रातिलोम्यापवादेषु द्विगुणत्रिगुणा दमाः
वर्णानां आनुलोम्येन तस्मादर्धार्धहानितः २०७
बाहुग्रीवानेत्रसक्थिविनाशे वाचिके दमः
सत्यस्तदर्धिकः पादनासाकर्णकरादिषु २०८
अशक्तस्तु वदन्नेवं दण्डनीयः पणान्दश
तथा शक्तः प्रतिभुवं दाप्यः क्षेमाय तस्य तु २०९
पतनीयकृते क्षेपे दण्डो मध्यमसाहसः

उपपातकयुक्ते तु दाप्यः प्रथमसाहसम्  २१०
त्रैविद्यनृपदेवानां क्षेप उत्तमसाहसः
मध्यमो जातिपूगानां प्रथमो ग्रामदेशयोः  २११

१९  दण्डपारुष्यप्रकरणम्

असाक्षिकहते चिह्नैर्युक्तिभिश्चागमेन च
द्रष्टव्यो व्यवहारस्तु कूटचिह्नकृतो भयात्  २१२
भस्मपङ्करजः स्पर्शे दण्डो दशपणः स्मृतः
अमेध्यपार्ष्णिनिष्ठ्यूतस्पर्शने द्विगुणस्ततः  २१३
समेष्वेवं परस्त्रीषु द्विगुणस्तूत्तमेषु च
हीनेष्वर्धदमो मोहमदादिभिरदण्डनम्  २१४
विप्रपीडाकरं छेद्यमङ्गमब्राह्मणस्य तु
उद्गूर्णे प्रथमो दण्डः संस्पर्शे तु तदर्धिकः  २१५
उद्गूर्णे हस्तपादे तु दशविंशतिकौ दमौ
परस्परं तु सर्वेषां शस्त्रे मध्यमसाहसः  २१६
पादकेशांशुककरोल्लुञ्चनेषु पणान्दश
पीडाकर्षांशुकावेष्टपादाध्यासे शतं दमः  २१७
शोणितेन विना दुह्खं कुर्वन्काष्ठादिभिर्नरः
द्वात्रिंशतं पणान्दण्ड्यो द्विगुणं दर्शनेऽसृजः  २१८
करपाददतो भङ्गे छेदने कर्णनासयोः
मध्यो दण्डो व्रणोद्भेदे मृतकल्पहते तथा  २१९
चेष्टाभोजनवाग्रोधे नेत्रादिप्रतिभेदने
कन्धराबाहुसक्थ्नां च भङ्गे मध्यमसाहसः  २२०
एकं घ्नतां बहूनां च यथोक्ताद्द्विगुणो दमः
कलहापहृतं देयं दण्डश्च द्विगुणस्ततः  २२१
दुह्खमुत्पादयेद्यस्तु स समुत्थानजं व्ययम्

दाप्यो दराडं च यो यस्मिन्कलहे समुदाहृतः २२२
अभिघाते तथा छेदे भेदे कुड्यावपातने
पणान्दाप्यः पञ्च दश विंशतिं तद्व्ययं तथा २२३
दुह्खोत्पादि गृहे द्रव्यं क्षिपन्प्राणहरं तथा
षोडशाद्यः पणान्दाप्यो द्वितीयो मध्यमं दमम् २२४
दुह्खे च शोणितोत्पादे शाखाङ्गच्छेदने तथा
दराडः क्षुद्रपशूनां तु द्विपणप्रभृतिः क्रमात् २२५
लिङ्गस्य छेदने मृत्यौ मध्यमो मूल्यमेव च
महापशूनामेतेषु स्थानेषु द्विगुणो दमः २२६
प्ररोहिशाखिनां शाखास्कन्धसर्वविदारणे
उपजीव्यद्रुमाणां च विंशतेर्द्विगुणो दमः २२७
चैत्यश्मशानसीमासु पुरायस्थाने सुरालये
जातद्रुमाणां द्विगुणो दमो वृक्षे च विश्रुते २२८
गुल्मगुच्छक्षुपलताप्रतानौषधिवीरुधाम्
पूर्वस्मृतादर्धदराडः स्थानेषूक्तेषु कर्तने २२९

## २० साहसप्रकरणम्

सामान्यद्रव्यप्रसभहरणात्साहसं स्मृतम्
तन्मूल्याद्द्विगुणो दराडो निह्नवे तु चतुर्गुणः २३०
यः साहसं कारयति स दाप्यो द्विगुणं दमम्
यश्चैवमुक्त्वाहं दाता कारयेत्स चतुर्गुणम् २३१
अर्घ्याक्षेपातिक्रमकृद्भ्रातृभार्याप्रहारकः
सम्दिष्टस्याप्रदाता च समुद्रगृहभेदकृत् २३२
सामन्तकुलिकादीनामपकारस्य कारकः
पञ्चाशत्पणिको दराड एषामिति विनिश्चयः २३३
स्वच्छन्दविधवागामी विक्रुष्टेऽनभिधावकः

अकारणे च विक्रोष्टा चण्डालश्चोत्तमान्स्पृशेत् २३४
शूद्रप्रव्रजितानां च दैवे पित्र्ये च भोजकः
अयुक्तं शपथं कुर्वन्नयोग्यो योग्यकर्मकृत् २३५
वृषक्षुद्रपशूनां च पुंस्त्वस्य प्रतिघातकृत्
साधारणस्यापलापी दासीगर्भविनाशकृत् २३६
पितृपुत्रस्वसृभ्रातृदम्पत्याचार्यशिष्यकाः
एषामपतितान्योन्यत्यागी च शतदण्डभाक् २३७
वसानस्त्रीन्पणान्दण्ड्यो नेजकस्तु परांशुकम्
विक्रयावक्रयाधानयाचितेषु पणान्दश २३८
पितापुत्रविरोधे तु साक्षिणां त्रिपणो दमः
अन्तरे च तयोर्यः स्यात्तस्याप्यष्टगुणो दमः २३९
तुलाशासनमानानां कूटकृन्नाणकस्य च
एभिश्च व्यवहर्ता यः स दाप्यो दममुत्तमम् २४०
अकूटं कूटकं ब्रूते कूटं यश्चाप्यकूटकम्
स नाणकपरीक्षी तु दाप्य उत्तमसाहसम् २४१
भिषङ्मिथ्याचरन्दण्ड्यस्तिर्यक्षु प्रथमं दमम्
मानुषे मध्यमं राजपुरुषेषूत्तमं दमम् २४२
अबन्ध्यं यश्च बध्नाति बद्धं यश्च प्रमुञ्चति
अप्राप्तव्यवहारं च स दाप्यो दममुत्तमम् २४३
मानेन तुलया वापि योऽअमष्टमकं हरेत्
दण्डं स दाप्यो द्विशतं वृद्धौ हानौ च कल्पितम् २४४
भेषजस्नेहलवणगन्धधान्यगुडादिषु
पण्येषु प्रक्षिपन्हीनं पणान्दाप्यस्तु षोडश २४५
मृच्चर्ममणिसूत्रायः काष्ठवल्कलवाससाम्
अजातौ जातिकरणे विक्रेयाष्टगुणो दमः २४६
समुद्गपरिवर्तं च सारभाण्डं च कृत्रिमम्

आधानं विक्रयं वापि नयतो दण्डकल्पना  २४७
भिन्ने पणे च पञ्चाशत्पणे तु शतमुच्यते
द्विपणे द्विशतो दण्डो मूल्यवृद्धौ च वृद्धिमान् २४८
सम्भूय कुर्वतामर्घं सम्बाधं कारुशिल्पिनाम्
अर्घस्य ह्रासं वृद्धिं वा जानतो दम उत्तमः  २४९
सम्भूय वणिजां पण्यमनर्घेणोपरुन्धताम्
विक्रीणतां वा विहितो दण्ड उत्तमसाहसः  २५०
राजनि स्थाप्यते योऽर्घः प्रत्यहं तेन विक्रयः
क्रयो वा निह्स्रवस्तस्माद्वणिजां लाभकृत्स्मृतः  २५१
स्वदेशपण्ये तु शतं वणिग्गृह्णीत पञ्चकम्
दशकं पारदेश्ये तु यः सद्यः क्रयविक्रयी  २५२
पण्यस्योपरि संस्थाप्य व्ययं पण्यसमुद्भवम्
अर्घोऽनुग्रहकृत्कार्यः क्रेतुर्विक्रेतुरेव च  २५३

२१  विक्रीयासम्प्रदानप्रकरणम्

गृहीतमूल्यं यः पण्यं क्रेतुर्नैव प्रयच्छति
सोदयं तस्य दाप्योऽसौ दिग्लाभं वा दिगागते  २५४
विक्रीतमपि विक्रेयं पूर्वक्रेतर्यगृह्णति
हानिश्चेत्क्रेतृदोषेण क्रेतुरेव हि सा भवेत्  २५५
राजदैवोपघातेन पण्ये दोषमुपागते
हानिर्विक्रेतुरेवासौ याचितस्याप्रयच्छतः  २५६
अन्यहस्ते च विक्रीय दुष्टं वादुष्टवद्यदि
विक्रीणीते दमस्तत्र मूल्यात्तु द्विगुणो भवेत्  २५७
क्षयं वृद्धिं च वणिजा पण्यानामविजानता
क्रीत्वा नानुशयः कार्यः कुर्वन्षड्भागदण्डभाक्  २५८

## २२ सम्भूयसमुत्थानप्रकरणम्

समवायेन वणिजां लाभार्थं कर्म कुर्वताम्
लाभालाभौ यथाद्रव्यं यथा वा सम्विदा कृतौ २५९
प्रतिषिद्धमनादिष्टं प्रमादाद्यच्च नाशितम्
स तद्दद्याद्विप्लवाच्च रक्षिताद्दशमांशभाक् २६०
अर्घप्रक्षेपणाद्विंशं भागं शुल्कं नृपो हरेत्
व्यासिद्धं राजयोग्यं च विक्रीतं राजगामि तत् २६१
मिथ्या वदन्परीमाणं शुल्कस्थानादपासरन्
दाप्यस्त्वष्टगुणं यश्च सव्याजक्रयविक्रयी २६२
तरिकः स्थलजं शुल्कं गृह्णन्दाप्यः पणान्दश
ब्राह्मणप्रातिवेश्यानामेतदेव अनिमन्त्रणे २६३
देशान्तरगते प्रेते द्रव्यं दायादबान्धवाः
ज्ञातयो वा हरेयुस्तदागतास्तैर्विना नृपः २६४
जिह्मं त्यजेयुर्निर्लाभमशक्तोऽन्येन कारयेत्
अनेन विधिराख्यात ऋत्विक्कर्षककर्मिणाम् २६५

## २३ स्तेयप्रकरणम्

ग्राहकैर्गृह्यते चौरो लोप्त्रेणाथ पदेन वा
पूर्वकर्मापराधी च तथा चाशुद्धवासकः २६६
अन्येऽपि शङ्कया ग्राह्या जातिनामादिनिह्नवैः
द्यूतस्त्रीपानसक्ताश्च शुष्कभिन्नमुखस्वराः २६७
परद्रव्यगृहाणां च पृच्छका गूढचारिणः
निराया व्ययवन्तश्च विनष्टद्रव्यविक्रयाः २६८
गृहीतः शङ्कया चौर्ये नात्मानं चेद्विशोधयेत्
दापयित्वा हृतं द्रव्यं चौरदण्डेन दण्डयेत् २६९
चौरं प्रदाप्यापहृतं घातयेद्विविधैर्वधैः

सचिह्नं ब्राह्मणं कृत्वा स्वराष्ट्राद्विप्रवासयेत् २७०
घातितेऽपहृते दोषो ग्रामभर्तुरनिर्गते
विवीतभर्तुस्तु पथि चौरोद्धर्तुरवीतके २७१
स्वसीम्नि दद्याद्ग्रामस्तु पदं वा यत्र गच्छति
पञ्चग्रामी बहिः क्रोशाद्दशग्राम्यथ वा पुनः २७२
बन्दिग्राहांस्तथा वाजिकुञ्जराणां च हारिणः
प्रसह्यघातिनश्चैव शूलानारोपयेन्नरान् २७३
उत्क्षेपकग्रन्थिभेदौ करसम्दंशहीनकौ
कार्यौ द्वितीयापराधे करपादैकहीनकौ २७४
क्षुद्रमध्यमहाद्रव्यहरणे सारतो दमः
देशकालवयः शक्ति सम्चिन्त्यं दण्डकर्मणि २७५
भक्तावकाशाग्न्युदकमन्त्रोपकरणव्ययान्
दत्त्वा चौरस्य वा हन्तुर्जानतो दम उत्तमः २७६
शस्त्रावपाते गर्भस्य पातने चोत्तमो दमः
उत्तमो वाधमो वापि पुरुषस्त्रीप्रमापणे २७७
विप्रदुष्टां स्त्रियं चैव पुरुषघ्नीमगर्भिणीम्
सेतुभेदकरीं चाप्सु शिलां बद्ध्वा प्रवेशयेत् २७८
विषाग्निदां पतिगुरुनिजापत्यप्रमापणीम्
विकर्णकरनासौष्ठीं कृत्वा गोभिः प्रमापयेत् २७९
अविज्ञातहतस्याशु कलहं सुतबान्धवाः
प्रष्टव्या योषितश्चास्य परपुंसि रताः पृथक् २८०
स्त्रीद्रव्यवृत्तिकामो वा केन वायं गतः सह
मृत्युदेशसमासन्नं पृच्छेद्वापि जनं शनैः २८१
क्षेत्रवेश्मवनग्रामविवीतखलदाहकाः
राजपत्न्यभिगामी च दग्धव्यास्तु कटाग्निना २८२

## २४ स्त्रीसम्ग्रहणप्रकरणम्

पुमान्सम्ग्रहणे ग्राह्यः केशाकेशि परस्त्रिया
सद्यो वा कामजैश्चिह्नैः प्रतिपत्तौ द्वयोस्तथा २८३
नीवीस्तनप्रावरणसक्थिकेशावमर्शनम्
अदेशकालसम्भाषं सहैकासनमेव च २८४
स्त्री निषेधे शतं दद्याद्द्विशतं तु दमं पुमान्
प्रतिषेधे तयोर्दण्डो यथा सम्ग्रहणे तथा २८५
सजातावुत्तमो दण्ड आनुलोम्ये तु मध्यमः
प्रातिलोम्ये वधः पुंसो नार्याः कर्णादिकर्तनम् २८६
अलम्कृतां हरन्कन्यामुत्तमं ह्यन्यथाधमम्
दण्डं दद्यात्सवर्णासु प्रातिलोम्ये वधः स्मृतः २८७
सकामास्वनुलोमासु न दोषस्त्वन्यथा दमः
दूषणे तु करच्छेद उत्तमायां वधस्तथा २८८
शतं स्त्रीदूषणे दद्याद्द्वे तु मिथ्याभिशंसने
पशून्गच्छन्शतं दाप्यो हीनां स्त्रीं गां च मध्यमम् २८९
अवरुद्धासु दासीसु भुजिष्यासु तथैव च
गम्यास्वपि पुमान्दाप्यः पञ्चाशत्पणिकं दमम् २९०
प्रसह्य दास्यभिगमे दण्डो दशपणः स्मृतः
बहूनां यद्यकामासौ चतुर्विंशतिकः पृथक् २९१
गृहीतवेतना वेश्या नेच्छन्ती द्विगुणं वहेत्
अगृहीते समं दाप्यः पुमानप्येवमेव हि २९२
अयोनौ गच्छतो योषां पुरुषं वाभिमेहतः
चतुर्विंशतिको दण्डस्तथा प्रव्रजितागमे २९३
अन्त्याभिगमने त्वङ्कयहङ्कय कुबन्धेन प्रवासयेत्
शूद्रस्तथान्त्य एव स्यादन्त्यस्यार्यागमे वधः २९४

## २५ प्रकीर्णकप्रकरणम्

ऊनं वाभ्यधिकं वापि लिखेद्यो राजशासनम्
पारदारिकचौरं वा मुञ्चतो दण्ड उत्तमः  २९५
अभक्ष्येण द्विजं दूष्यो दण्ड्य उत्तमसाहसम्
मध्यमं क्षत्रियं वैश्यं प्रथमं शूद्रमर्धिकम्  २९६
कूटस्वर्णव्यवहारी विमांसस्य च विक्रयी
त्र्यङ्गहीनस्तु कर्तव्यो दाप्यश्चोत्तमसाहसम्  २९७
चतुष्पादकृतो दोषो नापेहीति प्रजल्पतः
काष्ठलोष्टेषुपाषाणबाहुयुग्यकृतस्तथा  २९८
छिन्ननस्येन यानेन तथा भग्नयुगादिना
पश्चाच्चैवापसरता हिंसने स्वाम्यदोषभाक्  २९९
शक्तोऽप्यमोक्षयन्स्वामी दंष्ट्रिणां शृङ्गिणां तथा
प्रथमं साहसं दद्याद्विक्रुष्टे द्विगुणं तथा  ३००
जारं चौरेत्यभिवदन्दाप्यः पञ्चशतं दमम्
उपजीव्य धनं मुञ्चंस्तदेवाष्टगुणीकृतम्  ३०१
राज्ञोऽनिष्टप्रवक्तारं तस्यैवाक्रोशकारिणम्
तन्मन्त्रस्य च भेत्तारं छित्त्वा जिह्वां प्रवासयेत्  ३०२
मृताङ्गलग्नविक्रेतुर्गुरोस्ताडयितुस्तथा
राजयानासनारोढुर्दण्ड उत्तमसाहसः  ३०३
द्विनेत्रभेदिनो राजद्विष्टादेशकृतस्तथा
विप्रत्वेन च शूद्रस्य जीवतोऽष्टशतो दमः  ३०४
दुर्दृष्टांस्तु पुनर्दृष्ट्वा व्यवहारान्नृपेण तु
सभ्याः सजयिनो दण्ड्या विवादाद्द्विगुणं दमम्  ३०५
यो मन्येताजितोऽस्मीति न्यायेनापि पराजितः
तमायान्तं पुनर्जित्वा दापयेद्द्विगुणं दमम्  ३०६
राज्ञान्यायेन यो दण्डो गृहीतो वरुणाय तम्

निवेद्य दद्याद्विप्रेभ्यः स्वयं त्रिंशद्गुणीकृतम् ३०७
इति व्यवहाराध्यायः

अथ प्रायश्चित्ताध्यायः
१ आशौचप्रकरणम्

ऊनद्विवर्षं निखनेन्न कुर्यादुदकं ततः
आश्मशानादनुव्रज्य इतरो ज्ञातिभिर्वृतः १
यमसूक्तं तथा गाथा जपद्भिर्लौकिकाग्निना
स दग्धव्य उपेतश्चेदाहिताग्न्यावृतार्थवत् २
सप्तमाद्दशमाद्वापि ज्ञातयोऽभ्युपयन्त्यपः
अप नः शोशुचदघमनेन पितृदिङ्मुखाः ३
एवं मातामहाचार्यप्रेतानामुदकक्रिया
कामोदकं सखिप्रत्तास्वस्त्रीयश्वशुरर्त्विजाम् ४
सकृत्प्रसिञ्चन्त्युदकं नामगोत्रेण वाग्यताः
न ब्रह्मचारिणः कुर्युरुदकं पतितास्तथा ५
पाखण्ड्यनाश्रिताः स्तेना भर्तृघ्न्यः कामगादिकाः
सुराप्य आत्मत्यागिन्यो नाशौचोदकभाजनाः ६
कृतोदकान्समुत्तीर्णान्मृदुशाद्वलसंस्थितान्
स्नातानपवदेयुस्तानितिहासैः पुरातनैः ७
मानुष्ये कदलीस्तम्भनिह्सारे सारमार्गणम्
करोति यः स सम्मूढो जलबुद्बुदसन्निभे ८
पञ्चधा सम्भृतः कायो यदि पञ्चत्वमागतः
कर्मभिः स्वशरीरोत्थैस्तत्र का परिदेवना ९
गन्त्री वसुमती नाशमुदधिर्दैवतानि च
फेनप्रख्यः कथं नाशं मर्त्यलोको न यास्यति १०
श्लेष्माश्रु बान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतोऽवशः

अतो न रोदितव्यं हि क्रियाः कार्याः स्वशक्तितः १९
इति संश्रुत्य गच्छेयुर्गृहं बालपुरह्सराः
विदश्य निम्बपत्राणि नियता द्वारि वेश्मनः १२
आचम्याग्न्यादि सलिलं गोमयं गौरसर्षपान्
प्रविशेयुः समालभ्य कृत्वाश्मनि पदं शनैः १३
प्रवेशनादिकं कर्म प्रेतसंस्पर्शिनामपि
इच्छतां तत्क्षणाच्छुद्धिः परेषां स्नानसम्यमान् १४
आचार्यपित्रुपाध्यायान्निर्हृत्यापि व्रती व्रती
सम्कटान्नं च नाश्नीयान्न च तैः सह सम्वसेत् १५
क्रीतलब्धाशना भूमौ स्वपेयुस्ते पृथक् क्षितौ
पिण्डयज्ञावृता देयं प्रेतायान्नं दिनत्रयम् १६
जलमेकाहमाकाशे स्थाप्यं क्षीरं च मृन्मये
वैतानाउपासनाः कार्याः क्रियाश्च श्रुतिचोदनात् १७
त्रिरात्रं दशरात्रं वा शावमाशौचमिष्यते
ऊनद्विवर्ष उभयोः सूतकं मातुरेव हि १८
पित्रोस्तु सूतकं मातुस्तदसृग्दर्शनाद्ध्रुवम्
तदहर्न प्रदुष्येत पूर्वेषां जन्मकारणात् १९
अन्तरा जन्ममरणे शेषाहोभिर्विशुध्यति
गर्भस्त्रावे मासतुल्या निशाः शुद्धेस्तु कारणम् २०
हतानां नृपगोविप्रैरन्वक्षं चात्मघातिनाम्
प्रोषिते कालशेषः स्यात्पूर्णे दत्त्वोदकं शुचिः २१
क्षत्रस्य द्वादशाहानि विशः पञ्चदशैव तु
त्रिंशद्दिनानि शूद्रस्य तदर्धं न्यायवर्तिनः २२
आदन्तजन्मनः सद्य आचूडान्नैशिकी स्मृता
त्रिरात्रमाव्रतादेशाद्दशरात्रमतः परम् २३
अहस्त्वदत्तकन्यासु बालेषु च विशोधनम्

गुर्वन्तेवास्यनूचानमातुलश्रोत्रियेषु च २४
अनौरसेषु पुत्रेषु भार्यास्वन्यगतासु च
निवासराजनि प्रेते तदहः शुद्धिकारणम् २५
ब्राह्मणेनानुगन्तव्यो न शूद्रो न द्विजः क्वचित्
अनुगम्याम्भसि स्नात्वा स्पृष्ट्वाग्निं घृतभुक् शुचिः २६
महीपतीनां नाशौचं हतानां विद्युता तथा
गोब्राह्मणार्थं सम्ग्रामे यस्य चेच्छति भूमिपः २७
ऋत्विजां दीक्षितानां च यज्ञियं कर्म कुर्वताम्
सत्रिव्रतिब्रह्मचारिदातृब्रह्मविदां तथा २८
दाने विवाहे यज्ञे च सम्ग्रामे देशविप्लवे
आपद्यपि हि कष्टायां सद्यः शौचं विधीयते २९
उदक्याशुचिभिः स्नायात्संस्पृष्टस्तैरुपस्पृशेत्
अब्लिङ्गानि जपेच्चैव गायत्रीं मनसा सकृत् ३०
कालोऽग्निः कर्म मृद्वायुर्मनो ज्ञानं तपो जलम्
पश्चात्तापो निराहारः सर्वेऽमी शुद्धिहेतवः ३१
अकार्यकारिणां दानं वेगो नद्याश्च शुद्धिकृत्
शोध्यस्य मृच्च तोयं च सम्न्यासो वै द्विजन्मनाम् ३२
तपो वेदविदां क्षान्तिर्विदुषां वर्ष्मणो जलम्
जपः प्रच्छन्नपानानां मनसः सत्यमुच्यते ३३
भूतात्मनस्तपोविद्ये बुद्धेर्ज्ञानं विशोधनम्
क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिः परमा मता ३४

## २ आपद्धर्मप्रकरणम्

क्षात्रेण कर्मणा जीवेद्विशां वाप्यापदि द्विजः
निस्तीर्य तामथात्मानं पावयित्वा न्यसेत्पथि ३५
फलोपलक्षौमसोममनुष्यापूपवीरुधः

तिलौदनरसक्षारान्दधि क्षीरं घृतं जलम् ३६
शस्त्रासवमधूच्छिष्टं मधु लाक्षा च बर्हिषः
मृच्चर्मपुष्पकुतपकेशतक्रविषक्षितिः ३७
कौशेयनीललवणमांसैकशफसीसकान्
शकार्द्रौषधिपिण्याकपशुगन्धांस्तथैव च ३८
वैश्यवृत्त्यापि जीवन्नो विक्रीणीत कदाचन
धर्मार्थं विक्रयं नेयास्तिला धान्येन तत्समाः ३९
लाक्षालवणमांसानि पतनीयानि विक्रये
पायो दधि च मद्यं च हीनवर्णकराणि तु ४०
आपद्गतः सम्प्रगृह्णन्भुञ्जानो वा यतस्ततः
न लिप्येतैनसा विप्रो ज्वलनार्कसमो हि सः ४१
कृषिः शिल्पं भृतिर्विद्या कुसीदं शकटं गिरिः
सेवानूपं नृपो भैक्षमापत्तौ जीवनानि तु ४२
बुभुक्षितस्त्र्यहं स्थित्वा धान्यमब्राह्मणाद्धरेत्
प्रतिगृह्य तदाख्येयमभियुक्तेन धर्मतः ४३
तस्य वृत्तं कुलं शीलं श्रुतमध्ययनं तपः
ज्ञात्वा राजा कुटुम्बं च धर्म्यां वृत्तिं प्रकल्पयेत् ४४

## ३ वानप्रस्थधर्मप्रकरणम्

सुतविन्यस्तपत्नीकस्तया वानुगतो वनम्
वानप्रस्थो ब्रह्मचारी साग्निः सोपासनो व्रजेत् ४५
अफालकृतेनाग्नींश्च पितृन्देवातिथीनपि
भृत्यांश्च तर्पयेत्श्मश्रुजटालोमभृदात्मवान् ४६
अह्नो मासस्य षण्णां वा तथा सम्वत्सरस्य वा
अर्थस्य सम्चयं कुर्यात्कृतमाश्वयुजे त्यजेत् ४७
दान्तस्त्रिषवणस्नायी निवृत्तश्च प्रतिग्रहात्

स्वाध्यायवान्दानशीलः सर्वसत्त्वहिते रतः ४८
दन्तोलूखलिकः कालपक्वाशी वाश्मकुट्टकः
श्रौत्रं स्मार्तं फलस्नेहैः कर्म कुर्यात्तथा क्रियाः ४९
चान्द्रायणैर्नयेत्कालं कृच्छ्रैर्वा वर्तयेत्सदा
पक्षे गते वाप्यश्नीयान्मासे वाहनि वा गते ५०
स्वप्याद्भूमौ शुची रात्रौ दिवा सम्प्रपदैर्नयेत्
स्थानासनविहारैर्वा योगाभ्यासेन वा तथा ५१
ग्रीष्मे पञ्चाग्निमध्यस्थो वर्षासु स्थण्डिलेशयः
आर्द्रवासास्तु हेमन्ते शक्त्या वापि तपश्चरेत् ५२
यः कण्टकैर्वितुदति चन्दनैर्यश्च लिम्पति
अक्रुद्धोऽपरितुष्टश्च समस्तस्य च तस्य च ५३
अग्नीन्वाप्यात्मसात्कृत्वा वृक्षावासो मिताशनः
वानप्रस्थगृहेष्वेव यात्रार्थं भैक्षमाचरेत् ५४
ग्रामादाहृत्य वा ग्रासानष्टौ भुञ्जीत वाग्यतः
वायुभक्षः प्रागुदीचीं गच्छेद्वावर्ष्मसम्क्षयात् ५५

## ४ यतिधर्मप्रकरणम्

वनाद्गृहाद्वा कृत्वा इष्टिं सार्ववेदसदक्षिणाम्
प्राजापत्यां तदन्ते तानग्नीनारोप्य चात्मनि ५६
अधीतवेदो जपकृत्पुत्रवानन्नदो अग्निमान्
शक्त्या च यज्ञकृन्मोक्षे मनः कुर्यात्तु नान्यथा ५७
सर्वभूतहितः शान्तस्त्रिदण्डी सकमण्डलुः
एकारामः परिव्रज्य भिक्षार्थी ग्राममाश्रयेत् ५८
अप्रमत्तश्चरेद्भैक्षं सायाह्नेऽनभिलक्षितः
रहिते भिक्षुकैर्ग्रामे यात्रामात्रमलोलुपः ५९
यतिपात्राणि मृद्वेणुदार्वलाबुमयानि च

सलिलं शुद्धिरेतेषां गोवालैश्च अवघर्षणम् ६०
सन्निरुध्येन्द्रियग्रामं रागद्वेषौ प्रहाय च
भयं हित्वा च भूतानाममृतीभवति द्विजः ६१
कर्तव्याशयशुद्धिस्तु भिक्षुकेण विशेषतः
ज्ञानोत्पत्तिनिमित्तत्वात्स्वातन्त्र्यकरणाय च ६२
अवेक्ष्या गर्भवासाश्च कर्मजा गतयस्तथा
आधयो व्याधयः क्लेशा जरा रूपविपर्ययः ६३
भवो जातिसहस्रेषु प्रियाप्रियविपर्ययः
ध्यानयोगेन सम्पश्येत्सूक्ष्म आत्मात्मनि स्थितः ६४
नाश्रमः कारणं धर्मे क्रियमाणो भवेद्धि सः
अतो यदात्मनोऽपथ्यं परेषां न तदाचरेत् ६५
सत्यमस्तेयमक्रोधो ह्रीः शौचं धीर्धृतिर्दमः
सम्यतेन्द्रियता विद्या धर्मः सर्व उदाहृतः ६६
निह्सरन्ति यथा लोहपिण्डात्तप्तात्स्फुलिङ्गकाः
सकाशादात्मनस्तद्वदात्मानः प्रभवन्ति हि ६७
तत्रात्मा हि स्वयं किम्चित्कर्म किम्चित्स्वभावतः
करोति किम्चिदभ्यासाद्धर्माधर्मोभयात्मकम् ६८
निमित्तमक्षरः कर्ता बोद्धा गुणी वशी
अजः शरीरग्रहणात्स जात इति कीर्त्यते ६९
सर्गादौ स यथाकाशं वायुं ज्योतिर्जलं महीम्
सृजत्येकोत्तरगुणांस्तथादत्ते भवन्नपि ७०
आहुत्याप्यायते सूर्यः सूर्याद्वृष्टिरथौषधिः
तदन्नं रसरूपेण शुक्रत्वमधिगच्छति ७१
स्त्रीपुंसयोस्तु सम्योगे विशुद्धे शुक्रशोणिते
पञ्चधातून्स्वयं षष्ठ आदत्ते युगपत्प्रभुः ७२
इन्द्रियाणि मनः प्राणो ज्ञानमायुः सुखं धृतिः

धारणा प्रेरणं दुह्खमिच्छाहम्कार एव च ७३
प्रयत्न आकृतिर्वर्णः स्वरद्वेषौ भवाभवौ
तस्यैतदात्मजं सर्वमनादेरादिमिच्छतः ७४
प्रथमे मासि सम्क्लेदभूतो धातुविमूर्च्छितः
मास्यर्बुदं द्वितीये तु तृतीयेऽङ्गेन्द्रियैर्युतः ७५
आकाशाल् लाघवं सौक्ष्म्यं शब्दं श्रोत्रं बलादिकम्
वायोश्च स्पर्शनं चेष्टां व्यूहनं रौक्ष्यमेव च ७६
पित्तात्तु दर्शनं पक्तिमौष्ण्यं रूपं प्रकाशिताम्
रसात्तु रसनं शैत्यं स्नेहं क्लेदं समार्दवम् ७७
भूमेर्गन्धं तथा घ्राणं गौरवं मूर्तिमेव च
आत्मा गृह्णात्यजः सर्वं तृतीये स्पन्दते ततः ७८
दौहृदस्याप्रदानेन गर्भो दोषमवाप्नुयात्
वैरूप्यं मरणं वापि तस्मात्कार्यं प्रियं स्त्रियाः ७९
स्थैर्यं चतुर्थे त्वङ्गानां पञ्चमे शोणितोद्भवः
षष्ठे बलस्य वर्णस्य नखरोम्णां च सम्भवः ८०
मनश्चैतन्ययुक्तोऽसौ नाडीस्नायुशिरायुतः
सप्तमे चाष्टमे चैव त्वङ्मांसस्मृतिमानपि ८१
पुनर्धात्रीं पुनर्धर्ममोजस्तस्य प्रधावति
अष्टमे मास्यतो गर्भो जातः प्राणैर्वियुज्यते ८२
नवमे दशमे वापि प्रबलैः सूतिमारुतैः
निह्सार्यते बाण इव यन्त्रच्छिद्रेण सज्वरः ८३
तस्य षोढा शरीराणि शट् त्वचो धारयन्ति च
सडङ्गानि तथास्थ्नां च सह षष्ट्या शतत्रयम् ८४
स्थालैः सह चतुःषष्टिर्दन्ता वै विंशतिर्नखाः
पाणिपादशलाकाश्च तेषां स्थानचतुष्टयम् ८५
षष्टयङ्गुलीनां द्वे पार्ष्ण्योर्गुल्फेषु च चतुष्टयम्

चत्वार्यरत्निकास्थीनि जङ्घयोस्तावदेव तु ८६
द्वे द्वे जानुकपोलोरुफलकांससमुद्भवे
अक्षतालूषके श्रोणीफलके च विनिर्दिशेत् ८७
भगास्थ्येकं तथा पृष्ठे चत्वारिंशच्च पञ्च च
ग्रीवा पन्चदशास्थिः स्याज् जत्र्वेकैकं तथा हनुः ८८
तन्मूले द्वे ललाटाक्षिगण्डे नासा घनास्थिका
पार्श्वकाः स्थालकैः सार्धमर्बुदैश्च द्विसप्ततिः ८९
द्वौ शङ्खकौ कपालानि चत्वारि शिरसस्तथा
उरः सप्तदशास्थीनि पुरुषस्यास्थिसम्ग्रहः ९०
गन्धरूपरसस्पर्शशब्दाश्च विषयाः स्मृताः
नासिका लोचने जिह्वा त्वक् श्रोत्रं च इन्द्रियाणि च ९१
हस्तौ पायुरुपस्थं च जिह्वा पादौ च पञ्च वै
कर्मेन्द्रियाणि जानीयान्मनश्चैवोभयात्मकम् ९२
नाभिरोजो गुदं शुक्रं शोणितं शङ्खकौ तथा
मूर्धांसकण्ठहृदयं प्राणस्यायतनानि तु ९३
वपा वसावहननं नाभिः क्लोम यकृत्प्लिहा
क्षुद्रान्त्रं वृक्ककौ बस्तिः पुरीषाधानमेव च ९४
आमाशयोऽथ हृदयं स्थूलान्त्रं गुद एव च
उदरं च गुदौ कोष्ठ्यौ विस्तारोऽयमुदाहृतः ९५
कनीनिके चाक्षिकूटे शष्कुली कर्णपत्रकौ
कर्णौ शङ्खौ भ्रुवौ दन्तवेष्टावोष्ठौ ककुन्दरे ९६
वङ्क्षणौ वृषणौ वृक्कौ श्लेष्मसम्घातजौ स्तनौ
उपजिह्वास्फिजौ बाहू जङ्घोरुषु च पिण्डिका ९७
तालूदरं बस्तिशीर्षं चिबुके गलशुण्डिके
अवटश्चैवमेतानि स्थानान्यत्र शरीरके ९८
अक्षिकर्णचतुष्कं च पद्भहस्तहृदयानि च

नव छिद्राणि तान्येव प्राणस्यायतनानि तु ९९
शिराः शतानि सप्तैव नव स्नायुशतानि च
धमनीनां शते द्वे तु पञ्च पेशीशतानि च १००
एकोनत्रिंशल्लक्षाणि तथा नव शतानि च
षट्पञ्चाशच्च जानीत शिरा धमनिसम्ज्ञिताः १०१
त्रयो लक्षास्तु विज्ञेयाः श्मश्रुकेशाः शरीरिणाम्
सप्तोत्तरं मर्मशतं द्वे च सम्धिशते तथा १०२
रोम्णां कोटयस्तु पञ्चाशच्चतस्रः कोटय एव च
सप्तषष्टिस्तथा लक्षाः सार्धाः स्वेदायनैः सह १०३
वायवीयैर्विगण्यन्ते विभक्ताः परमाणवः
यद्यप्येकोऽनुवेत्त्येषां भावनां चैव संस्थितिम् १०४
रसस्य नव विज्ञेया जलस्याञ्जलयो दश
सप्तैव तु पुरीषस्य रक्तस्याष्टौ प्रकीर्तिताः १०५
षट् श्लेष्मा पञ्च पित्तं तु चत्वारो मूत्रमेव च
वसा त्रयो द्वौ तु मेदो मज्जैकोर्ध्वं तु मस्तके १०६
श्लेष्मौजसस्तावदेव रेतसस्तावदेव तु
इत्येतदस्थिरं वर्ष्म यस्य मोक्षाय कृत्यसौ १०७
द्वासप्ततिसहस्राणि हृदयादभिनिहसृताः
हिताहिता नाम नाडयस्तासां मध्ये शशिप्रभम् १०८
मण्डलं तस्य मध्यस्थ आत्मा दीप इवाचलः
स ज्ञेयस्तं विदित्वेह पुनराजायते न तु १०९
ज्ञेयं चारण्यकमहं यदादित्यादवाप्तवान्
योगशास्त्रं च मत्प्रोक्तं ज्ञेयं योगमभीप्सता ११०
अनन्यविषयं कृत्वा मनोबुद्धिस्मृतीन्द्रियम्
ध्येय आत्मा स्थितो योऽसौ हृदये दीपवत्प्रभुः १११
यथाविधानेन पठन्सामगायमविच्युतम्

सावधानस्तदभ्यासात्परं ब्रह्माधिगच्छति १११२
अपरान्तकमुल्लोप्यं मद्रकं प्रकरीं तथा
औवेणकं सरोबिन्दुमुत्तरं गीतकानि च ११३
ऋग्गाथा पाणिका दक्षविहिता ब्रह्मगीतिका
गेयमेतत्तदभ्यासकरणान्मोक्षसम्ज्ञितम् ११४
वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः
तालज्ञश्चाप्रयासेन मोक्षमार्गं नियच्छति ११५
गीतज्ञो यदि योगेन नाप्नोति परमं पदम्
रुद्रस्यानुचरो भूत्वा तेनैव सह मोदते ११६
अनादिरात्मा कथितस्तस्यादिस्तु शरीरकम्
आत्मनस्तु जगत्सर्वं जगतश्चात्मसम्भवः ११७
कथमेतद्विमुह्यामः सदेवासुरमानवम्
जगदुद्भूतमात्मा च कथं तस्मिन्वदस्व नः ११८
मोहजालमपास्येह पुरुषो दृश्यते हि यः
सहस्रकरपन्नेत्रः सूर्यवर्चाः सहस्रकः ११९
स आत्मा चैव यज्ञश्च विश्वरूपः प्रजापतिः
विराजः सोऽन्नरूपेण यज्ञत्वमुपगच्छति १२०
यो द्रव्यदेवतात्यागसम्भूतो रस उत्तमः
देवान्सम्तर्प्य स रसो यजमानं फलेन च १२१
सम्योज्य वायुना सोमं नीयते रश्मिभिस्ततः
ऋग्यजुः सामविहितं सौरं धामोपनीयते १२२
खमण्डलादसौ सूर्यः सृजत्यमृतमुत्तमम्
यज् जन्म सर्वभूतानामशनानशनात्मनाम् १२३
तस्मादन्नात्पुनर्यज्ञः पुनरन्नं पुनः क्रतुः
एवमेतदनाद्यन्तं चक्रं सम्परिवर्तते १२४
अनादिरात्मा सम्भूतिर्विद्यते नान्तरात्मनः

समवायी तु पुरुषो मोहेच्छाद्वेषकर्मजः १२५
सहस्त्रात्मा मया यो व ग्रादिदेव उदाहृतः
मुखबाहूरुपज्ञाः स्युस्तस्य वर्णा यथाक्रमम् १२६
पृथिवी पादतस्तस्य शिरसो द्यौरजायत
नस्तः प्राणा दिशः श्रोत्रात्स्पर्शाद्वायुर्मुखाच्छिखी १२७
मनसश्चन्द्रमा जातश्चक्षुषश्च दिवाकरः
जघनादन्तरिक्षं च जगच्च सचराचरम् १२८
यद्येवं स कथं ब्रह्मन्पापयोनिषु जायते
ईश्वरः स कथं भावैरनिष्टैः सम्प्रयुज्यते १२९
करणैरन्वितस्यापि पूर्वं ज्ञानं कथं च न
वेत्ति सर्वगतां कस्मात्सर्वगोऽपि न वेदनाम् १३०
ग्रन्त्यपक्षिस्थावरतां मनोवाक्कायकर्मजैः
दोषैः प्रयाति जीवोऽयं भवं योनिशतेषु च १३१
ग्रनन्ताश्च यथा भावाः शरीरेषु शरीरिणाम्
रूपाण्यपि तथैवेह सर्वयोनिषु देहिनाम् १३२
विपाकः कर्मणां प्रेत्य केषाम्चिदिह जायते
इह वामुत्र वैकेषां भावस्तत्र प्रयोजनम् १३३
परद्रव्याण्यभिध्यायंस्तथानिष्टानि चिन्तयन्
वितथाभिनिवेशी च जायतेऽन्यासु योनिषु १३४
पुरुषोऽनृतवादी च पिशुनः परुषस्तथा
ग्रनिबद्धप्रलापी च मृगपक्षिषु जायते १३५
ग्रदत्तादाननिरतः परदारोपसेवकः
हिंसकश्चाविधानेन स्थावरेष्वभिजायते १३६
ग्रात्मज्ञः शौचवान्दान्तस्तपस्वी विजितेन्द्रियः
धर्मकृद्वेदविद्यावित्सात्त्विको देवयोनिताम् १३७
ग्रसत्कार्यरतोऽधीर ग्रारम्भी विषयी च यः

स राजसो मनुष्येषु मृतो जन्माधिगच्छति १३८
निद्रालुः क्रूरकृल् लुब्धो नास्तिको याचकस्तथा
प्रमादवान्भिन्नवृत्तो भवेत्तिर्यक्षु तामसः १३९
रजसा तमसा चैवं समाविष्टो भ्रमन्निह
भावैरनिष्टैः सम्युक्तः संसारं प्रतिपद्यते १४०
मलिनो हि यथा आदर्शो रूपालोकस्य न क्षमः
तथाविपक्वकरण आत्मज्ञानस्य न क्षमः १४१
कट्वेर्वारौ यथापक्वे मधुरः सन्रसोऽपि न
प्राप्यते ह्यात्मनि तथा नापक्वकरणे ज्ञता १४२
सर्वाश्रयां निजे देहे देही विन्दति वेदनाम्
योगी मुक्तश्च सर्वासां यो न चाप्नोति वेदनाम् १४३
आकाशमेकं हि यथा घटादिषु पृथग्भवेत्
तथात्मा एको ह्यनेकश्च जलाधारेष्विवांशुमान् १४४
ब्रह्मखानिलतेजांसि जलं भूश्चेति धातवः
इमे लोका एष चात्मा तस्माच्च सचराचरम् १४५
मृद्दण्डचक्रसम्योगात्कुम्भकारो यथा घटम्
करोति तृणमृत्काष्ठैर्गृहं वा गृहकारकः १४६
हेममात्रमुपादाय रूपं वा हेमकारकः
निजलालासमायोगात्कोशं वा कोशकारकः १४७
कारणान्यन्येवमादाय तासु तास्विह योनिषु
सृजत्यात्मानमात्मा च सम्भूय करणानि च १४८
महाभूतानि सत्यानि यथात्मापि तथैव हि
कोऽन्यथैकेन नेत्रेण दृष्टमन्येन पश्यति १४९
वाचं वा को विजानाति पुनः संश्रुत्य संश्रुताम्
अतीतार्थस्मृतिः कस्य को वा स्वप्नस्य कारकः १५०
जातिरूपवयोवृत्तविद्यादिभिरहम्कृतः

शब्दादिविषयोद्योगं कर्मणा मनसा गिरा १५१
स सम्दिग्धमतिः कर्मफलमस्ति न वेति वा
विप्लुतः सिद्धमात्मानमसिद्धोऽपि हि मन्यते १५२
मम दाराः सुतामात्या अहमेषामिति स्थितिः
हिताहितेषु भावेषु विपरीतमतिः सदा १५३
ज्ञेयज्ञे प्रकृतौ चैव विकारे चाविशेषवान्
अनाशकानलाघातजलप्रपतनोद्यमी १५४
एवम्वृत्तोऽविनीतात्मा वितथाभिनिवेशवान्
कर्मणा द्वेषमोहाभ्यामिच्छया चैव बध्यते १५५
आचार्योपासनं वेदशास्त्रार्थेषु विवेकिता
तत्कर्मणामनुष्ठानं सङ्गः सद्भिर्गिरः शुभाः १५६
स्त्र्यालोकालम्भविगमः सर्वभूतात्मदर्शनम्
त्यागः परिग्रहाणां च जीर्णकाषायधारणम् १५७
विषयेन्द्रियसम्रोधस्तन्द्रालस्यविवर्जनम्
शरीरपरिसम्ख्यानं प्रवृत्तिष्वघदर्शनम् १५८
नीरजस्तमसा सत्त्वशुद्धिर्निह्स्पृहता शमः
एतैरुपायैः संशुद्धः सत्त्वयोग्यमृती भवेत् १५९
तत्त्वस्मृतेरुपस्थानात्सत्त्वयोगात्परिज्ञयात्
कर्मणां सम्निकर्षाच्च सतां योगः प्रवर्तते १६०
शरीरसम्क्षये यस्य मनः सत्त्वस्थमीश्वरम्
अविप्लुतमतिः सम्यक् स जातिसंस्मरतामियात् १६१
यथा हि भरतो वर्णैर्वर्णयत्यात्मनस्तनुम्
नानारूपाणि कुर्वाणस्तथात्मा कर्मजास्तनूः १६२
कालकर्मात्मबीजानां दोषैर्मातुस्तथैव च
गर्भस्य वैकृतं दृष्टमङ्गहीनादि जन्मनः १६३
अहम्कारेण मनसा गत्या कर्मफलेन च

शरीरेण च नात्मायं मुक्तपूर्वः कथम्चन १६४
वर्त्याधारस्नेहयोगाद्यथा दीपस्य संस्थितिः
विक्रियापि च दृष्टैवमकाले प्राणसम्क्षयः १६५
अनन्ता रश्मयस्तस्य दीपवद्यः स्थितो हृदि
सितासिताः कर्बुरूपाः कपिला नीललोहिताः १६६
ऊर्ध्वमेकः स्थितस्तेषां यो भित्त्वा सूर्यमण्डलम्
ब्रह्मलोकमतिक्रम्य तेन याति परां गतिम् १६७
यदस्य अन्यद्रश्मिशतमूर्ध्वमेव व्यवस्थितम्
तेन देवशरीराणि सधामानि प्रपद्यते १६८
येऽनेकरूपाश्चाधस्ताद्रश्मयोऽस्य मृदुप्रभाः
इह कर्मोपभोगाय तैः संसरति सोऽवशः १६९
वेदैः शास्त्रैः सविज्ञानैर्जन्मना मरणेन च
आर्त्या गत्या तथागत्या सत्येन ह्यनृतेन च १७०
श्रेयसा सुखदुह्खाभ्यां कर्मभिश्च शुभाशुभैः
निमित्तशाकुनज्ञानग्रहसम्योगजैः फलैः १७१
तारानक्षत्रसम्चारैर्जागरैः स्वप्नजैरपि
आकाशपवनज्योतिर्जलभूतिमिरैस्तथा १७२
मन्वन्तरैर्युगप्राप्त्या मन्त्रौषधिफलैरपि
वित्तात्मानं वेद्यमानं कारणं जगतस्तथा १७३
अहम्कारः स्मृतिर्मेधा द्वेषो बुद्धिः सुखं धृतिः
इन्द्रियान्तरसम्चार इच्छा धारणजीविते १७४
स्वर्गः स्वप्नश्च भावानां प्रेरणं मनसो गतिः
निमेषश्चेतना यत्न आदानं पाञ्चभौतिकम् १७५
यत एतानि दृश्यन्ते लिङ्गानि परमात्मनः
तस्मादस्ति परो देहादात्मा सर्वग ईश्वरः १७६
बुद्धीन्द्रियाणि सार्थानि मनः कर्मेन्द्रियाणि च

अहम्कारश्च बुद्धिश्च पृथिव्यादीनि चैव हि १७७
अव्यक्तमात्मा क्षेत्रज्ञः क्षेत्रस्यास्य निगद्यते
ईश्वरः सर्वभूतस्थः सन्नसन्सदसच्च यः १७८
बुद्धेरुत्पत्तिरव्यक्तात्ततोऽहम्कारसम्भवः
तन्मात्रादीन्यहम्कारादेकोत्तरगुणानि च १७९
शब्दः स्पर्शश्च रूपं च रसो गन्धश्च तद्गुणाः
यो यस्मान्निह्सृतश्चैषां स तस्मिन्नेव लीयते १८०
यथात्मानं सृजत्यात्मा तथा वः कथितो मया
विपाकात्त्रिप्रकाराणां कर्मणामीश्वरोऽपि सन् १८१
सत्त्वं रजस्तमश्चैव गुणास्तस्यैव कीर्तिताः
रजस्तमोभ्यामाविष्टश्चक्रवद्भ्राम्यते ह्यसौ १८२
अनादिरादिमांश्चैव स एव पुरुषः परः
लिङ्गेन्द्रियग्राह्यरूपः सविकार उदाहृतः १८३
पितृयानोऽजवीथ्याश्च यदगस्त्यस्य चान्तरम्
तेनाग्निहोत्रिणो यान्ति स्वर्गकामा दिवं प्रति १८४
ये च दानपराः सम्यगष्टाभिश्च गुणैर्युताः
तेऽपि तेनैव मार्गेण सत्यव्रतपरायणाः १८५
तत्राष्टाशीतिसाहस्रमुनयो गृहमेधिनः
पुनरावर्तिनो बीजभूता धर्मप्रवर्तकाः १८६
सप्तर्षिनागवीथ्यन्तर्देवलोकं समाश्रिताः
तावन्त एव मुनयः सर्वारम्भविवर्जिताः १८७
तपसा ब्रह्मचर्येण सङ्गत्यागेन मेधया
तत्र गत्वावतिष्ठन्ते यावदाभूतसम्प्लवम् १८८
यतो वेदाः पुराणानि विद्योपनिषदस्तथा
श्लोका सूत्राणि भाष्याणि यच्च किम्चन वाङ्मयम् १८९
वेदानुवचनं यज्ञो ब्रह्मचर्यं तपो दमः

श्रद्धोपवासः स्वातन्त्र्यमात्मनो ज्ञानहेतवः १९०
स ह्याश्रमैर्विजिज्ञास्यः समस्तैरेवमेव तु
द्रष्टव्यस्त्वथ मन्तव्यः श्रोतव्यश्च द्विजातिभिः १९१
य एनमेवं विन्दन्ति य वारण्यकमाश्रिताः
उपासते द्विजाः सत्यं श्रद्धया परया युताः १९२
क्रमात्ते सम्भवन्त्यर्चिरहः शुक्लं तथोत्तरम्
अयनं देवलोकं च सवितारं सवैद्युतम् १९३
ततस्तान्पुरुषोऽभ्येत्य मानसो ब्रह्मलौकिकान्
करोति पुनरावृत्तिस्तेषामिह न विद्यते १९४
यज्ञेन तपसा दानैर्ये हि स्वर्गजितो नराः
धूमं निशां कृष्णपक्षं दक्षिणायनमेव च १९५
पितृलोकं चन्द्रमसं वायुं वृष्टिं जलं महीम्
क्रमात्ते सम्भवन्तीह पुनरेव व्रजन्ति च १९६
एतद्यो न विजानाति मार्गद्वितयमात्मवान्
दन्दशूकः पतङ्गो वा भवेत्कीटोऽथ वा कृमिः १९७
ऊरुस्थोत्तानचरणः सव्ये न्यस्योत्तरं करम्
उत्तानं किम्चिदुन्नाम्य मुखं विष्टभ्य चोरसा १९८
निमीलिताक्षः सत्त्वस्थो दन्तैर्दन्तानसंस्पृशन्
तालुस्थाचलजिह्वश्च सम्वृतास्यः सुनिश्चलः १९९
सन्निरुध्येन्द्रियग्रामं नातिनीचोच्छ्रितासनः
द्विगुणं त्रिगुणं वापि प्राणायाममुपक्रमेत् २००
ततो ध्येयः स्थितो योऽसौ हृदये दीपवत्प्रभुः
धारयेत्तत्र चात्मानं धारणां धारयन्बुधः २०१
अन्तर्धानं स्मृतिः कान्तिर्दृष्टिः श्रोत्रज्ञता तथा
निजं शरीरमुत्सृज्य परकायप्रवेशनम् २०२
अर्थानां छन्दतः सृष्टिर्योगसिद्धेर्हि लक्षणम्

सिद्धे योगे त्यजन्देहममृतत्वाय कल्पते  २०३
अथ वाप्यभ्यसन्वेदं न्यस्तकर्मा वने वसन्
अयाचिताशी मितभुक् परां सिद्धिमवाप्नुयात्  २०४
न्यायागतधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः
श्राधकृत्सत्यवादी च गृहस्थोऽपि हि मुच्यते  २०५

## ५ प्रायश्चित्तप्रकरणम्

महापातकजान्घोरान्नरकान्प्राप्य दारुणान्
कर्मक्षयात्प्रजायन्ते महापातकिनस्त्विह  २०६
मृगाश्वसूकरोष्ट्राणां ब्रह्महा योनिमृच्छति
खरपुल्कसवेनानां सुरापो नात्र संशयः  २०७
कृमिकीटपतङ्गत्वं स्वर्णहारी समाप्नुयात्
तृणगुल्मलतात्वं च क्रमशो गुरुतल्पगः  २०८
ब्रह्महा क्षयरोगी स्यात्सुरापः श्यावदन्तकः
हेमहारी तु कुनखी दुश्चर्मा गुरुतल्पगः  २०९
यो येन सम्वसत्येषां स तल्लिङ्गोऽभिजायते
अन्नहर्तामयावी स्यान्मूको वागपहारकः  २१०
धान्यमिश्रोऽतिरिक्ताङ्गः पिशुनः पूतिनासिकः
तैलहृत्तैलपायी स्यात्पूतिवक्त्रस्तु सूचकः  २११
परस्य योषितं हृत्वा ब्रह्मस्वमपहृत्य च
अरण्ये निर्जले देशे भवति ब्रह्मराक्षसः  २१२
हीनजातौ प्रजायेत पररत्नापहारकः
पत्रशाकं शिखी हत्वा गन्धान्छुच्छुन्दरी शुभान् २१३
मूषको धान्यहारी स्याद्यानमुष्ट्रः कपिः फलम्
जलं प्लवः पयः काको गृहकारी ह्युपस्करम्  २१४
मधु दंशः पलं गृध्रो गां गोधाग्निं बकस्तथा

श्वित्री वस्त्रं श्वा रसं तु चीरी लवणहारकः २१५
प्रदर्शनार्थमेतत्तु मयोक्तं स्तेयकर्मणि
द्रव्यप्रकारा हि यथा तथैव प्राणिजातयः २१६
यथाकर्म फलं प्राप्य तिर्यक्त्वं कालपर्ययात्
जायन्ते लक्षणभ्रष्टा दरिद्राः पुरुषाधमाः २१७
ततो निष्कल्मषीभूताः कुले महति भोगिनः
जायन्ते विद्ययोपेता धनधान्यसमन्विताः २१८
विहितस्याननुष्ठानान्निन्दितस्य च सेवनात्
अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति २१९
तस्मात्तेनेह कर्तव्यं प्रायश्चित्तं विशुद्धये
एवमस्यान्तरात्मा च लोकश्चैव प्रसीदति २२०
प्रायश्चित्तमकुर्वाणाः पापेषु निरता नराः
अपश्चात्तापिनः कष्टान्नरकान्यान्ति दारुणान् २२१
तामिस्त्रं लोहशङ्कुं च महानिरयशाल्मली
रौरवं कुड्मलं पूतिमृत्तिकं कालसूत्रकम् २२२
सम्घातं लोहितोदं च सविषं सम्प्रपातनम्
महानरककाकोलं सम्जीवनमहापथम् २२३
अवीचिमन्धतामिस्त्रं कुम्भीपाकं तथैव च
असिपत्रवनं चैव तापनं चैकविंशकम् २२४
महापातकजैर्घोरैरुपपातकजैस्तथा
अन्विता यान्त्यचरितप्रायश्चित्ता नराधमाः २२५
प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत्
कामतो व्यवहार्यस्तु वचनादिह जायते २२६
ब्रह्महा मद्यपः स्तेनस्तथैव गुरुतल्पगः
एते महापातकिनो यश्च तैः सह सम्वसेत् २२७
गुरूणामध्यधिक्षेपो वेदनिन्दा सुहृद्वधः

ब्रह्महत्यासमं ज्ञेयमधीतस्य च नाशनम् २२८
निषिद्धभक्षणं जैह्म्यमुत्कर्षे च वचोऽनृतम्
रजस्वलामुखास्वादः सुरापानसमानि तु २२९
अश्वरत्नमनुष्यस्त्रीभूधेनुहरणं तथा
निक्षेपस्य च सर्वं हि सुवर्णस्तेयसम्मितम् २३०
सखिभार्याकुमारीषु स्वयोनिष्वन्त्यजासु च
सगोत्रासु सुतन्त्रीषु गुरुतल्पसमं स्मृतम् २३१
पितुः स्वसारं मातुश्च मतुलानीं स्नुषामपि
मातुः सपत्नीं भगिनीमाचार्यतनयां तथा २३२
आचार्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्पगः
लिङ्गं छित्त्वा वधस्तस्य सकामायाः स्त्रिया अपि २३३
गोवधो व्रात्यता स्तेयमृणानां चानपाक्रिया
अनाहिताग्नितापण्यविक्रयः परिदेवनम् २३४
भृतादध्ययनादानं भृतकाध्यापनं तथा
पारदार्यं पारिवित्त्यं वार्धुष्यं लवणक्रिया २३५
स्त्रीशूद्रविट्क्षत्रवधो निन्दितार्थोपजीवनम्
नास्तिक्यं व्रतलोपश्च सुतानां चैव विक्रयः २३६
धान्यकुप्यपशुस्तेयमयाज्यानां च याजनम्
पितृमातृसुतत्यागस्तडागारामविक्रयः २३७
कन्यासम्दूषणं चैव परिविन्दकयाजनम्
कन्याप्रदानं तस्यैव कौटिल्यं व्रतलोपनम् २३८
आत्मनोऽर्थे क्रियारम्भो मद्यपस्त्रीनिषेवणम्
स्वाध्यायाग्निसुतत्यागो बान्धवत्याग एव च २३९
इन्धनार्थं द्रुमछेदः स्त्रीहिंसाउषधजीवनम्
हिंस्त्रयन्त्रविधानं च व्यसनान्यात्मविक्रयः २४०
शूद्रप्रेष्यं हीनसख्यं हीनयोनिनिषेवणम्

तथैवानाश्रमे वासः परान्नपरिपुष्टता २४१
असच्छास्त्राधिगमनमाकरेष्वधिकारिता
भार्याया विक्रयश्चैषामेकैकमुपपातकम् २४२
शिरःकपाली ध्वजवान्भिक्षाशी कर्म वेदयन्
ब्रह्महा द्वादशाब्दानि मितभुक् शुद्धिमाप्नुयात् २४३
ब्राह्मणस्य परित्राणाद्गवां द्वादशकस्य च
तथाश्वमेधावभृथस्नानाद्वा शुद्धिमाप्नुयात् २४४
दीर्घतीव्रामयग्रस्तं ब्राह्मणं गामथापि वा
दृष्ट्वा पथि निरातङ्कं कृत्वा तु ब्रह्महा शुचिः २४५
आनीय विप्रसर्वस्वं हृतं घातित एव वा
तन्निमित्तं क्षतः शस्त्रैर्जीवन्नपि विशुध्यति २४६
लोमभ्यः स्वाहेत्येवं हि लोमप्रभृति वै तनुम्
मज्ञान्तां जुहुयाद्वापि मन्त्रैरेभिर्यथाक्रमम् २४७
सम्ग्रामे वा हतो लक्ष्यभूतः शुद्धिमवाप्नुयात्
मृतकल्पः प्रहारार्तो जीवन्नपि विशुध्यति २४८
अरण्ये नियतो जप्त्वा त्रिर्वै वेदस्य सम्हिताम्
शुध्येत वा मिताशित्वात्प्रतिस्रोतः सरस्वतीम् २४९
पात्रे धनं वा पर्याप्तं दत्त्वा शुद्धिमवाप्नुयात्
आदातुश्च विशुद्ध्यर्थमिष्टैर्वैश्वानरी स्मृता २५०
यागस्थक्षत्रविड्घाती चरेद्ब्रह्महणि व्रतम्
गर्भहा च यथावर्णं तथात्रेयीनिषूदकः २५१
चरेद्व्रतमहत्वापि घातार्थं चेत्समागतः
द्विगुणं सवनस्थे तु ब्राह्मणे व्रतमादिशेत् २५२
सुराम्बुघृतगोमूत्रपयसामग्निसन्निभम्
सुरापोऽन्यतमं पीत्वा मरणाच्छुद्धिमृच्छति २५३
वालवासा जटी वापि ब्रह्महत्याव्रतं चरेत्

पिरायाकं वा कणान्वापि भक्षयेत्त्रिसमा निशि २५४
अज्ञानात्तु सुरां पीत्वा रेतो विरामूत्रमेव च
पुनः संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः २५५
पतिलोकं न सा याति ब्राह्मणी या सुरां पिबेत्
इहैव सा शुनी गृध्री सूकरी चोपजायते २५६
ब्राह्मणस्वर्णहारी तु राज्ञे मुसलमर्पयेत्
स्वकर्म व्याख्यायंस्तेन हतो मुक्तोऽपि वाशुचिः २५७
अनिवेद्य नृपे शुध्येत्सुरापव्रतमाचरन्
आत्मतुल्यं सुवर्णं वा दद्याद्वा विप्रतुष्टिकृत् २५८
तप्तेऽयःशयने सार्धमायस्या योषिता स्वपेत्
गृहीत्वोत्कृत्य वृषणौ नैर्ऋत्यां चोत्सृजेत्तनुम् २५९
प्राजापत्यं चरेत्कृच्छ्रं समा वा गुरुतल्पगः
चान्द्रायणं वा त्रीन्मासानभ्यसेद्वेदसम्हिताम् २६०
एभिस्तु सम्वसेद्यो वै वत्सरं सोऽपि तत्समः
कन्यां समुद्वहेदेषां सोपवासामकिम्चनाम् २६१
चान्द्रायणं चरेत्सर्वानवकृष्टान्निहत्य तु
शूद्रोऽधिकारहीनोऽपि कालेनानेन शुध्यति २६२
पञ्चगव्यं पिबेद्गोघ्नो मासमासीत सम्यतः
गोष्ठे शयो गोऽनुगामी गोप्रदानेन शुध्यति २६३
कृच्छ्रं चैवातिकृच्छ्रं च चरेद्वापि समाहितः
दद्यात्त्रिरात्रं चोपोष्य वृषभैकादशास्तु गाः २६४
उपपातकशुद्धिः स्यादेवं चान्द्रायणेन वा
पयसा वापि मासेन पराकेणाथ वा पुनः २६५
ऋषभैकसहस्रा गा दद्यात्क्षत्रवधे पुमान्
ब्रह्महत्याव्रतं वापि वत्सरत्रितयं चरेत् २६६
वैश्यहाब्दं चरेदेतद्दद्याद्वैकशतं गवाम्

षरामासाच्छूद्रहाप्येतद्धेनुर्दद्याद्दशाथ वा  २६७
दुर्वृत्तब्रह्मविट्चत्रशूद्रयोषाः प्रमाप्य तु
दृतिं धनुर्बस्तमविं क्रमाद्दद्याद्विशुद्धये  २६८
अप्रदुष्टां स्त्रियं हत्वा शूद्रहत्याव्रतं चरेत्
अस्थिमतां सहस्रं तु तथानस्थिमताअमनः  २६९
मार्जारगोधानकुलमराडूकांश्च पतत्रिणः
हत्वा त्र्यहं पिबेत्चीरं कृच्छ्रं वा पादिकं चरेत्  २७०
गजे नीलवृषाः पञ्च शुके वत्सो द्विहायनः
खराजमेषेषु वृषो देयः क्रौञ्चे त्रिहायनः  २७१
हंसश्येनकपिक्रव्याज् जलस्थलशिखराडिनः
भासं च हत्वा दद्याद्गामक्रव्यादस्तु वत्सिकाम्  २७२
उरगेष्वायसो दराडः पराडके त्रपु सीसकम्
कोले घृतघटो देय उष्ट्रे गुञ्जा हयेऽउकम्  २७३
तित्तिरौ तु तिलद्रोणं गजादीनामशक्नुवन्
दानं दातुं चरेत्कृच्छ्रमेकैकस्य विशुद्धये  २७४
फलपुष्पान्नरसजसत्त्वघाते घृताशनम्
किम्चित्सास्थिवधे देयं प्राणायामस्त्वनस्थिके  २७५
वृचगुल्मलतावीरुच्छेदने जप्यमृक्शतम्
स्यादोषधिवृथाछेदे चीराशी गोऽनुगो दिनम्  २७६
पुंश्चलीवानरखरैर्दष्टश्वोष्ट्रादिवायसैः
प्राणायामं जले कृत्वा घृतं प्राश्य विशुध्यति  २७७
यन्मेऽद्य रेत इत्याभ्यां स्कन्नं रेतोऽभिमन्त्रयेत्
स्तनान्तरं भ्रुवोर्मध्यं तेनानामिकया स्पृशेत्  २७८
मयि तेज इति छायां स्वां दृष्ट्वाम्बुगतां जपेत्
सावित्रीमशुचौ दृष्टे चापल्ये चानृतेऽपि च  २७९
अवकीर्णी भवेद्गत्वा ब्रह्मचारी तु योषितम्

गर्दभं पशुमालभ्य नैर्ऋतं स विशुध्यति २८०
भैक्षाग्निकार्ये त्यक्त्वा तु सप्तरात्रमनातुरः
कामावकीर्ण इत्याभ्यां जुहुयादाहुतिद्वयम् २८१
उपस्थानं ततः कुर्यात्सं मा सिम्चन्त्वनेन तु
मधुमांसाशने कार्यः कृच्छ्रः शेषव्रतानि च २८२
प्रतिकूलं गुरोः कृत्वा प्रसाद्यैव विशुध्यति
कृच्छ्रत्रयं गुरुः कुर्यान्म्रियते प्रहितो यदि २८३
क्रियमाणोपकारे तु मृते विप्रे न पातकम्
विपाके गोवृषाणां तु भेषजाग्निक्रियासु च
मिथ्याभिशंसिनो दोषो द्विः समो भूतवादिनः २८४
मिथ्याभिशस्तदोषं च समादत्ते मृषा वदन्
महापापोपपापाभ्यां योऽभिशंसेन्मृषा परम्
अब्भक्षो मासमासीत स जापी नियतेन्द्रियः २८५
अभिशस्तो मृषा कृच्छ्रं चरेदाग्नेयमेव वा
निर्वपेत्तु पुरोडाशं वायव्यं पशुमेव वा २८६
अनियुक्तो भ्रातृजायां गच्छंश्चान्द्रायणं चरेत्
त्रिरात्रान्ते घृतं प्राश्य गत्वोदक्यां विशुध्यति २८७
त्रीन्कृच्छ्रानाचरेद्व्रात्ययाजकोऽभिचरन्नपि
वेदप्लावी यवाश्यब्दं त्यक्त्वा च शरणागतम् २८८
गोष्ठे वसन्ब्रह्मचारी मासमेकं पयोव्रतम्
गायत्रीजप्यनिरतः शुध्यतेऽसत्प्रतिग्रहात् २८९
प्राणायामी जले स्नात्वा खरयानोष्ट्रयानगः
नग्नः स्नात्वा च भुक्त्वा च गत्वा चैव दिवा स्त्रियम् २९०
गुरुं हुंकृत्य त्वंकृत्य विप्रं निर्जित्य वादतः
बद्ध्वा वा वाससा क्षिप्रं प्रसाद्योपवसेद्दिनम् २९१
विप्रदण्डोद्यमे कृच्छ्रस्त्वतिकृच्छ्रो निपातने

कृच्छ्रातिकृच्छ्रोऽसृक्पाते कृच्छ्रोऽभ्यन्तरशोणिते २९२
देशं कालं वयः शक्तिं पापं चावेक्ष्य यत्नतः
प्रायश्चित्तं प्रकल्प्यं स्याद्यत्र चोक्ता न निष्कृतिः २९३
दाषीकुम्भं बहिर्ग्रामान्निनयेरन्स्वबान्धवाः
पतितस्य बहिः कुर्युः सर्वकार्येषु चैव तम् २९४
चरितव्रत आयाते निनयेरन्नवं घटम्
जुगुप्सेरन्न चाप्येनं सम्वसेयुश्च सर्वशः २९५
पतितानामेष एव विधिः स्त्रीणां प्रकीर्तितः
वासो गृहान्तके देयमन्नं वासः सरक्षणम् २९६
नीचाभिगमनं गर्भपातनं भर्तृहिंसनम्
विशेषपतनीयानि स्त्रीमामेतान्यपि ध्रुवम् २९७
शरणागतबालस्त्रीहिंसकान्सम्वसेन्न तु
चीर्णव्रतानपि सतः कृतघ्नसहितानिमान् २९८
घटेऽपवर्जिते ज्ञातिमध्यस्थो यवसं गवाम्
स दद्यात्प्रथमं गोभिः सत्कृतस्य हि सत्क्रिया २९९
विख्यातदोषः कुर्वीत पर्षदोऽनुमतं व्रतम्

## रहस्यप्रायश्चित्तम्

अनभिख्यातदोषस्तु रहस्यं व्रतमाचरेत् ३००
त्रिरात्रोपोषितो जप्त्वा ब्रह्महा त्वघमर्षणम्
अन्तर्जले विशुध्येत दत्त्वा गां च पयस्विनाम् ३०१
लोमभ्यः स्वाहेत्यथ वा दिवसं मारुताशनः
जले स्थित्वाभिजुहुयाच्चत्वारिंशद्घृताहुतीः ३०२
त्रिरात्रोपोषितो हुत्वा कूष्माण्डीभिर्घृतं शुचिः
ब्राह्मणस्वर्णहारी तु रुद्रजापी जले स्थितः ३०३
सहस्रशीर्षाजापी तु मुच्यते गुरुतल्पगः

गौर्देया कर्मणोऽस्यान्ते पृथगेभिः पयस्विनी ३०४
प्राणायामशतं कार्यं सर्वपापापनुत्तये
उपपातकजातानामनादिष्टस्य चैव हि ३०५
ओंकाराभिष्टुतं सोमसलिलं पावनं पिबेत्
कृत्वा हि रेतोविरामूत्रप्राशनं तु द्विजोत्तमः ३०६
निशायां वा दिवा वापि यदज्ञानकृतं भवेत्
त्रैकाल्यसम्ध्याकरणात्तत्सर्वं विप्रणश्यति ३०७
शुक्रियारण्यकजपो गायत्र्याश्च विशेषतः
सर्वपापहरा ह्येते रुद्रैकादशिनी तथा ३०८
यत्र यत्र च सम्कीर्णमात्मानं मन्यते द्विजः
तत्र तत्र तिलैर्होमो गायत्र्या वाचनं तथा ३०९
वेदाभ्यासरतं क्षान्तं पञ्चयज्ञक्रियापरम्
न स्पृशन्तीह पापानि महापातकजान्यपि ३१०
वायुभक्षो दिवा तिष्ठन्रात्रिं नीत्वाप्सु सूर्यदृक्
जप्त्वा सहस्रं गायत्र्याः शुध्येद्ब्रह्मवधादृते ३११
ब्रह्मचर्यं दया क्षान्तिर्दानं सत्यमकल्कता
अहिंसा स्तेयमाधुर्ये दमश्चेति यमाः स्मृताः ३१२
स्नानं मौनोपवासेज्यास्वाध्यायोपस्थनिग्रहाः
नियमा गुरुशुश्रूषा शौचाक्रोधाप्रमादता ३१३
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्
जग्ध्वा परेऽह्न्युपवसेत्कृच्छ्रं सान्तपनं चरेत् ३१४
पृथक्सान्तपनद्रव्यैः षडहः सोपवासकः
सप्ताहेन तु कृच्छ्रोऽयं महासान्तपनः स्मृतः ३१५
पर्णोदुम्बरराजीवबिल्वपत्रकुशोदकैः
प्रत्येकं प्रत्यहं पीतैः पर्णकृच्छ्र उदाहृतः ३१६
तप्तक्षीरघृताम्बूनामेकैकं प्रत्यहं पिबेत्

एकरात्रोपवासश्च तप्तकृच्छ्र उदाहृतः ३१७
एकभक्तेन नक्तेन तथैवायाचितेन च
उपवासेन चैवायं पादकृच्छ्रः प्रकीर्तितः ३१८
यथाकथम्चित्त्रिगुणः प्राजापत्योऽयमुच्यते
अयमेवातिकृच्छ्रः स्यात्पाणिपूरान्न भोजनः ३१९
कृच्छ्रातिकृच्छ्रः पयसा दिवसानेकविंशतिम्
द्वादशाहोपवासेन पराकः परिकीर्तितः ३२०
पिण्याकाचामतक्राम्बुसक्तूनां प्रतिवासरम्
एकरात्रोपवासश्च कृच्छ्रः सौम्योऽयमुच्यते ३२१
एषां त्रिरात्रमभ्यासादेकैकस्य यथाक्रमम्
तुलापुरुष इत्येष ज्ञेयः पञ्चदशाहिकः ३२२
तिथिवृद्ध्या चरेत्पिण्डान्शुक्ले शिख्यण्डसम्मितान्
एकैकं ह्रासयेत्कृष्ने पिण्डं चान्द्रायणं चरन् ३२३
यथाकथम्चित्पिण्डानां चत्वारिंशच्छतद्वयम्
मासेनैवोपभुञ्जीत चान्द्रायणमथापरम् ३२४
कुर्यात्त्रिषवणस्नायी कृच्छ्रं चान्द्रायणं तथा
पवित्राणि जपेत्पिण्डान्गायत्र्या चाभिमन्त्रयेत् ३२५
अनादिष्टेषु पापेषु शुद्धिश्चान्द्रायणेन च
धर्मार्थं यश्चरेदेतच्चन्द्रस्यैति सलोकताम् ३२६
कृच्छ्रकृद्धर्मकामस्तु महतीं श्रियमाप्नुयात्
यथा गुरुक्रतुफलं प्राप्नोति सुसमाहितः ३२७
श्रुत्वैतानृषयो धर्मान्याज्ञवल्क्येन भाषितान्
इदमूचुर्महात्मानं योगीन्द्रममितौजसम् ३२८
य इदं धारयिष्यन्ति धर्मशास्त्रमतन्द्रिताः
इह लोके यशः प्राप्य ते यास्यन्ति त्रिविष्टपम् ३२९
विद्यार्थी प्राप्नुयाद्विद्यां धनकामो धनं तथा

आयुष्कामस्तथैवायुः श्रीकामो महतीं श्रियम् ३३०
श्लोकत्रयमपि ह्यस्माद्यः श्राद्धे श्रावयिष्यति
पितॄणां तस्य तृप्तिः स्यादक्षय्या नात्र संशयः ३३१
ब्राह्मणः पात्रतां याति क्षत्रियो विजयी भवेत्
वैश्यश्च धान्यधनवानस्य शास्त्रस्य धारणात् ३३२
य इदं श्रावयेद्विद्वान्द्विजान्पर्वसु पर्वसु
अश्वमेधफलं तस्य तद्भवाननुमन्यताम् ३३३
श्रुत्वैतद्याज्ञवल्क्योऽपि प्रीतात्मा मुनिभाषितम्
एवमस्त्विति होवाच नमस्कृत्य स्वयम्भुवे ३३४

इति प्रायश्चित्ताध्याय

याज्ञवल्क्यस्मृतिः समाप्ता

Credits
Sources: Narayan Ram Acharya, *Yājñavalkya-Smṛti of Yogīśvara Yājñavalkya, with the Commentary Mitākṣarā of Vijnāneśvara, Notes, Variant Readings, etc.* Nirnayasagara Press, Bombay, 1949.
Typescript: Edited by Muneo Tokunaga, checked by Yasuke Ikari
Conversion to Devanagari using Vedapad Software by Ralph Bunker

Formatted for Maharishi University of Management Vedic Literature Collection

# लिखितस्मृतिः

## अथेष्टापूर्तकर्म वृषोत्सर्गफल गयापिण्डदान षोडश श्राद्धानि वर्णनम्

इष्टापूर्ते तु कर्तव्ये ब्राह्मणेन प्रयत्नतः
इष्टेन लभते स्वर्गं पूर्ते मोक्षमवाप्नुयात् १
एकाहमपि कर्तव्यं भूमिष्ठमुदकं शुभम्
कुलानि तारयेत्सप्त यत्र गौर्वितृषी भवेत् २
भूमिदानेन ये लोका गोदानेन च कीर्तिताः
ताँल्लोकान्प्राप्नुयान्मर्त्यः पादपानां प्ररोपणे ३
वापीकूपतडागानि देवतायतनानि च
पतितान्युद्धरेद्यस्तु स पूर्तफलमश्नुते ४
अग्निहोत्रं तपः सत्यं वेदानां चैव पालनम्
आतिथ्यं वैश्वदेवं च इष्टमित्यभिधीयते ५
इष्टापूर्ते द्विजातीनां सामान्यो धर्म उच्यते
अधिकारी भवेच्छूद्रः पूर्ते धर्मे न वैदिके ६
यावदस्थि मनुष्यस्य गङ्गातोयेषु तिष्ठति
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ७
देवतानां पितॄणां च जले दद्याज्जलाञ्जलीन्
असंस्कृतमृतानां च स्थले दद्याज्जलाञ्जलिम् ८
एकादशाहे प्रेतस्य यस्य चोत्सृज्यते वृषः
मुच्यते प्रेतलोकात्तु पितृलोकं स गच्छति ९
एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत्
यजेत वाऽश्वमेधेन नीलं वा वृषमुत्सृजेत् १०
वाराणस्यां प्रविष्टस्तु कदाचिन्निष्क्रमेद्यदि
हसन्ति तस्य भूतानि अन्योन्यं करताडनैः ११
गयाशिरे तु यत्किंचिन्नाम्ना पिण्डं तु निर्वपेत्

नरकस्था दिवं यान्ति स्वगस्था मोक्षमाप्नुयुः १२
आत्मनो वा परस्यापि गयाकूपे यतस्ततः
यन्नाम्ना पातयेत्पिण्डं तं नयेद्ब्रह्म शाश्वतम् १३
लोहितो यस्तु वर्णेन शङ्खवर्णखुरः स्मृतः
लाङ्गूलशिरसोश्चैव स वै नीलवृषः स्मृतः १४
नवश्राद्धं त्रिपक्षं च द्वादशैव तु मासिकम्
षण्मासौ चाऽऽब्दिकं चैव श्राद्धान्येतानि षोडश १५
यस्यैतानि न कुर्वीत एकोद्दिष्टानि षोडश
पिशाचत्वं स्थिरं तस्य दत्तैः श्राद्धशतैरपि १६
सपिण्डीकरणादूर्ध्वं प्रतिसंवत्सरं द्विजः
मातापित्रोः पृथक्कुर्यादेकोद्दिष्टं मृतेऽहनि १७
वर्षे वर्षे तु कर्तव्यं मात्रापित्रोस्तु संततम्
अदैवं भोजयेच्छ्राद्धं पिण्डमेकं तु निर्वपेत् १८
संक्रान्तावुपरागे च सर्वोत्सवमहालये
निर्वाप्यास्तु त्रयः पिण्डा एकतस्तु क्षयेऽहनि १९
एकोद्दिष्टं परित्यज्य पार्वणं कुरुते द्विजः
अकृतं तद्विजानीयात्स मातृपितृघातकः २०
अमावास्यां तु क्षयो यस्य प्रेतपक्षेऽथ वा यदि
सपिण्डीकरणादूर्ध्वं तस्योक्तः पार्वणो विधिः २१
त्रिदण्डग्रहणादेव प्रेतत्वं नैव जायते
अहन्येकादशे प्राप्ते पार्वणं तु विधीयते २२
यस्य संवत्सरादर्वाक्सपिण्डीकरणं स्मृतम्
प्रत्यहं तत्सोदकुम्भं दद्यात्संवत्सरं द्विजः
पत्या चैकेन कर्तव्यं सपिण्डीकरणं स्त्रियाः २३
पितामह्याऽपि तत्तस्मिन्सत्येवं तु क्षयेऽहनि
तस्यां सत्यां प्रकर्तव्यं तस्याः श्वश्र्वेति निश्चितम् २४

विवाहे चैव निर्वृत्ते चतुर्थेऽहनि रात्रिषु
एकत्वं सा गता भर्तुः पिण्डे गोत्रे च सूतके २५
स्वगोत्राद्भ्रश्यते नारी उद्वाहात्सप्तमे पदे
भर्तृगोत्रेण कर्तव्यं दानं पिण्डोदकक्रियाः २६
द्विमातुः पिण्डदानं तु पिण्डे पिण्डे द्विनामतः
षण्णां देयास्त्रयः पिण्डा एवं दाता न मुह्यति २७
अथ चेन्मन्त्रविद्युक्तः शारीरैः पङ्क्तिदूषणैः
अदूष्यं तं यमः प्राह पङ्क्तिपावन एव सः २८
अग्नौकरणशेषं तु विश्वेदेवादि हूयते
अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेत् २९
यो ह्यग्निः स द्विजो विप्रैर्मन्त्रदर्शिभिरुच्यते ३०
अजस्य दक्षिणे कर्णे पाणौ विप्रस्य दक्षिणे
रजते च सुवर्णे च नित्यं वसति पावकः ३१
यत्र यत्र प्रदातव्यं श्राद्धं कुर्वीत पार्वणम्
तत्र मातामहानां च कर्तव्यमुभयं सदा ३२
अपुत्रा ये मृताः केचित्पुरुषा वा स्त्रियोऽपि वा
एभ्य एव प्रदातव्यमेकोद्दिष्टं न पार्वणम् ३३
यस्मिन्राशिगते सूर्ये विपत्तिः स्याद्द्विजन्मनः
तस्मिन्नहनि कर्तव्यं दानं पिण्डोदकक्रिया ३४
वर्षवृद्ध्याभिषेकादि कर्तव्यमधिके न तु
अधिमासे तु पूर्वं स्याच्छ्राद्धं संवत्सरादपि ३५
स एव हेयोद्दिष्टस्य येन केन तु कर्मणा
अभिघातान्तरं कार्यं तत्रैवाहः कृतं भवेत् ३६
शालाग्नौ पच्यते ह्यन्नं लौकिके वाथ संशयः
यस्मिन्नेव पचेदन्नं तस्मिन्होमो विधीयते ३७
वैदिके लौकिके वाऽपि नित्यं हुत्वा ह्यतन्द्रितः

वैदिके स्वर्गमाप्नोति लौकिके हन्ति किल्विषम् ३८

अन्नदानेनिषेधः

अग्नौ व्याहृतिभिः पूर्वं हुत्वा मन्त्रौस्तु शाकलैः
संविभागं तु भूतेभ्यस्ततोऽश्नीयादनग्निमान् ३९
उच्छेषणं तु नोत्तिष्ठेद्यावद्विप्रविसर्जनम्
ततो गृहबलिं कुर्यादिति धर्मो व्यवस्थितः ४०
दर्भाः कृष्णाजिनं मन्त्रा ब्राह्मणाश्च विशेषतः
नैते निर्माल्यतां यान्ति नियोक्तव्याः पुनः पुनः ४१
पानमाचमनं कुर्यात्कुशपाणिः सदा द्विजः
भुक्त्वाऽप्युच्छिष्टतां याति एष एव विधिः स्मृतः ४२
पान आचमने चैव तर्पणे दैविके सदा
कुशहस्तो न दुष्येत यथा पाणिस्तथा कुशः ४३
वामपाणौ कुशं कृत्वा दक्षिणेन उपस्पृशेत्
आचामन्ति च ये मूढा रुधिरेणाऽऽचमन्ति ते ४४
नीवीमध्येषु ये दर्भा ब्रह्मसूत्रेषु ये कृताः
पवित्रांस्तान्विजानीयाद्यथा कायस्तथा कुशाः ४५
पिण्डे कृतास्तु ये दर्भा यैः कृतं पितृतर्पणम्
मूत्रोच्छिष्टपुरीषं च तेषां त्यागो विधीयते ४६
दैवपूर्वं तु यच्छ्राद्धमदैवं चापि यद्भवेत्
ब्रह्मचारी भवेत्तत्र कुर्याच्छ्राद्धं तु पैतृकम् ४७
मातुः श्राद्धं तु पूर्वं स्यात्पितृणां तदनन्तरम्
ततो मातामहानां च वृद्धौ श्राद्धत्रयं स्मृतम् ४८
क्रतुर्दक्षो वसुः सत्यः कालकामौ धुरिलोचनौ
पुरूरवार्द्रवाश्चैव विश्वेदेवाः प्रकीर्तिताः ४९
आगच्छन्तु महाभागा विश्वेदेवा महाबलाः
ये यत्र विहिताः श्राद्धे सावधाना भवन्तु ते ५०

इष्टिश्राद्ध क्रतुर्दक्षो वसुः सभ्यश्च वैदिके
कालः कामोऽग्निकार्येषु काम्येषु धुरिलोचनौ ५१
पुरूरवार्द्रवश्चैव पार्वणेषु नियोजयेत् ५२
यस्यास्तु न भवेद् भ्राता न विज्ञायेत वा पिता
नोपयच्छेत तां प्राज्ञः पुत्रिकाधर्मशङ्कया ५३
अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृताम्
अस्यां यो जायते पुत्रः स मे पुत्रो भविष्यति ५४
मातुः प्रथमतः पिण्डं निर्वपेत्पुत्रिकासुतः
द्वितीयं तु पितुस्तस्यास्तृतीयं तु पितुः पितुः ५५
मृण्मयेषु च पात्रेषु श्राद्धे यो भोजयेत्पितृन्
अन्नदाता पुरोधाश्च भोक्ता च नरकं व्रजेत् ५६
अलाभे मृण्मयं दद्यादनुज्ञातस्तु तैर्द्विजैः
घृतेन प्रोक्षणं कुर्यान्मृदः पात्रं पवित्रकम् ५७
श्राद्धं कृत्वा परश्राद्धे यस्तु भुञ्जीत विह्वलः
पतन्ति पितरस्तस्य लुप्तपिण्डोदकक्रियाः ५८
श्राद्धं दत्त्वा च भुक्त्वा च अध्वानं योऽधिगच्छति
भवन्ति पितरस्तस्य तन्मासं पांसुभोजनाः ५९
पुनर्भोजनमध्वानं भाराध्ययनमैथुनम्
दानं प्रतिग्रहं होमं श्राद्धभुक्त्वाष्ट वर्जयेत् ६०

भुञ्जानस्य वर्णनम्

अध्वगामी भवेदश्वः पुनर्भोक्ता च वायसः
कर्मकृज्जायते दासः स्त्रीसङ्गेन च सूकरः ६१
दशकृत्वः पिबेदापः सावित्र्या चाभिमन्त्रिताः
ततः संध्यामुपासीत शुध्येत तदनन्तरम् ६२
आर्द्रवासास्तु यत्कुर्याद्बहिर्जानु च यत्कृतम्
तत्सर्वं निष्फलं कुर्याज्जपहोमप्रतिग्रहम् ६३

चान्द्रायणं नवश्राद्धे पराको मासिके तथा
पक्षत्रये तु कृच्छ्रं स्यात्षरामासे कृच्छ्रमेव च ६४
ऊनाब्दिके त्रिरात्रं स्यादेकाहः पुनराब्दिके
शावे मासस्तु भुक्त्वा वा पादकृच्छ्रो विधीयते ६५
सर्पविप्रहतानां च शृङ्गिदंष्ट्रिसरीसृपैः
आत्मनस्त्यागिनां चैव श्राद्धमेषां न कारयेत् ६६
गोभिर्हतं तथोद्बद्धं ब्राह्मणेन तु घातितम्
तं स्पर्शयन्ति ये विप्रा गोजाश्वाश्च भवन्ति ते ६७
अग्निदाता तथा चान्ये पाशच्छेदकराश्च ये
तप्तकृच्छ्रेण शुध्यन्ति मनुराह प्रजापतिः ६८
त्र्यहमुष्णं पिबेदापस्त्र्यहमुष्णं पयः पिबेत्
त्र्यहमुष्णं घृतं पीत्वा वायुभक्षो दिनत्रयम् ६९
गोभूहिरण्यहरणे स्त्रीणां क्षेत्रगृहस्य च
यमुद्दिश्य त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकम् ७०
उद्यताः सह धावन्ते सर्वे ये शस्त्रपाणयः
यद्यकोऽपि हनेत्तत्र सर्वे तु ब्रह्मघातकाः ७१
बहूनां शस्त्रघातानां यद्येको मर्मघातकः
सर्वे तु शुद्धिमिच्छन्ति स एको ब्रह्मघातकः ७२
पतितान्नं यदा भुङ्क्ते भुङ्क्ते चाण्डालवेश्मनि
स मासार्द्धं चरेद्वारि मासं कामकृतेन तु ७५
यो येन पतितेनैव संसर्गं याति मानवः
स तस्यैव व्रतं कुर्यात्तत्तत्सत्संसर्गविशुद्धये ७४
ब्रह्महा पातकिस्पर्शे स्नानं येन विधीयते
तेनैवोच्छिष्टसंस्पृष्टः प्राजापत्यं समाचरेत् ७५
ब्रह्महा च सुरापायी तथैव गुरुतल्पगः
महान्ति पातकान्याहुस्तत्संसर्गी च पञ्चमः ७६

स्नेहाद्वा यदि वा लोभाद्भयादज्ञानतोऽपि वा
कुर्वन्त्यनुग्रहं ये तु तत्पापं तेषु गच्छति ७७
उच्छिष्टोच्छिष्टसंस्पृष्टो ब्राह्मणस्तु कदाचन
तत्क्षणात्कुरुते स्नानमाचमेन शुचिर्भवेत् ७८
कुब्जवामनषण्डेषु गद्गदेषु जडेषु च
जात्यन्धे बधिरे मूके न दोषः परिवेदने ७९
क्लीबे देशान्तरस्थे पतिते प्रव्रजितेऽपि वा
योगशास्त्राभियुक्ते च न दोषः परिवेदने ८०
पूरणे कूपवापीनां वृक्षच्छेदनपातने
विक्रीणीते अपि ह्यश्वं गोवधं तस्य निर्दिशेत् ८१
पादेऽङ्गरोमवपनं द्विपादे श्मश्रु केवलम्
तृतीये तु शिखावर्जं शिखाछेदश्चतुर्थके ८२
चण्डालोदकसंस्पर्शे स्नानं येन विधीयते
तनैवोच्छिष्टसंस्पृष्टः प्राजापत्यं समाचरेत् ८३
चण्डालघटभाण्डस्थं यत्तोयं पिबते द्विजः
तत्क्षणात्क्षिपते यस्तु प्राजापत्यं समाचरेत् ८४
यदि न क्षिपते तोयं शरीरे तस्य जीर्यति
प्राजापत्यं न दातव्यं कृच्छ्रं सांतपनं चरेत् ८५
चरेत्सांतपनं विप्रः प्राजापत्यं तु क्षत्रियः
तदर्धं तु चरेद्वैश्यः पादं शूद्रे तु दापयेत् ८६
रजस्वला यदा स्पृष्टा श्वानसूकरवायसैः
उपोष्य रजनीमेकां पञ्चगव्येन शुध्यति ८७
आजानुतः स्नानमात्रमानाभेस्तु विशेषतः
अत ऊर्ध्वं त्रिरात्रं स्यान्मदिरास्पर्शने मतम् ८८
बालश्चैव दशाहे तु पञ्चत्वं यदि गच्छति
सद्य एव विशुध्येत नाशौचं नोदकक्रिया ८९

शावसूतक उत्पन्ने सूतकं तु यदा भवेत्
शावेन शुध्यते सूतिर्न सूतिः शावशोधिनी ९०
षष्ठेन शुध्येतैकाहं पञ्चमे त्वहमेव तु
चतुर्थे सप्तरात्रं स्यात्त्रिपुरुषं दशमेऽहनि ९१
मरणारब्धमाशौचं संयोगो यस्य नाग्निभिः
आदाहात्तस्य विज्ञेयं यस्य वैतानिको विधिः ९२
आममासं घृतं क्षौद्रं स्नेहाश्च फलसंभवाः
अन्त्यभाण्डस्थिता ह्येते निष्क्रान्ताः शुचयः स्मृताः ९३
मार्जनीरजमेष षाण्डं स्नानवस्त्रघटोदकम्
नवाम्भसि तथा चैव हन्ति पुण्यं दिवाकृतम् ९४
दिवा कपित्थच्छायायां रात्रौ दधिशमीषु च
धात्रीफलेषु सर्वत्र अलक्ष्मीर्वसते सदा ९५
यत्र यत्र च संकीर्णमात्मानं मन्यते द्विजः
तत्र तत्र तिलैर्होमो गायत्र्यष्टशतं जपेत् ९६

इति लिखितर्षिप्रोक्तं धर्मशास्त्रं समाप्तम्

समाप्तेयं लिखितस्मृतिः

Reference:
*Smṛti Sandarbha*, Vol. III, (Delhi: Nag, 1981) p. 1455.

# अथ सम्वर्त्तस्मृतिः

## अथादौ ब्रह्मचर्यवर्णनम्

श्रीगणेशाय नमः

सम्वर्त्तमेकमासीनमात्मविद्यापरायणम्
ऋषयस्तु समागम्य पप्रच्छुर्धर्मकाङ्क्षिणः  १
भगवन् श्रोतुमिच्छामः श्रेयस्कर्म द्विजोत्तम
यथावद्धर्ममाचक्ष्व शुभाशुभविवेचनम्  २
वामदेवादयः सर्वे तमपृच्छन् महौजसम्
तानब्रवीन्मुनीन् सर्वान् प्रीतात्मा श्रूयतामिति  ३
स्वभावाद्यत्र विचरेत् कृष्णसारः सदा मृगः
धर्म्यदेशः स विज्ञेयो द्विजानां धर्मसाधनम्  ४
उपनीतः सदा विप्रो गुरोस्तु हितमाचरेत्
स्रग्गन्धमधुमांसानि ब्रह्मचारी विवर्जयेत्  ५
सन्ध्यां प्रातः सनक्षत्रामुपासीत यथाविधि
सादित्यां पश्चिमां सन्ध्यामर्द्धास्तमितभास्करे  ६
तिष्ठन् पूर्वां जपं कुर्य्याद्ब्रह्मचारी समाहितः
आसीनः पश्चिमां सन्ध्यां जपं कुर्य्यादतन्द्रितः  ७
अग्निकार्य्यं ततः कुर्यान्मेधावी तदनन्तरम्
ततोऽधीयीत वेदन्तु वीक्षमाणो गुरोर्मुखम्  ८
प्रणवं प्राक्प्रयुञ्जीत व्याहृतिस्तदनन्तरम्
गायत्रीञ्चानुपूर्वेण ततो वेदं समारभेत्  ९
हस्तौ सुसंयतौ कार्य्यौ जानुभ्यामुपरिस्थितौ
गुरोरनुमतं कुर्य्यात् पठन्नान्यमतिर्भवेत्  १०
सायं प्रातस्तु भिक्षेत ब्रह्मचारी सदा व्रती
निवेद्य गुरवेऽश्नीयात् प्राङ्मुखो वाग्यतः शुचि  ११
सायं प्रातर्द्विजातीनामशनं श्रुतिचोदितम्

नान्तरा भोजनं कुर्य्यादग्निहोत्रसमो विधिः १२
आचम्यैव तु भुञ्जीत भुक्त्वा चोपस्पृशेद्द्विजः
अनाचान्तस्तु योऽश्नीयात्प्रायश्चित्तीयते तु सः १३
अनाचान्तः पिवेद्यस्तु योऽपि वा भक्षयेद्द्विजः
गायत्र्यष्टसहस्रन्तु जपं कृत्वा विशुध्यति १४
अकृत्वा पादशौचन्तु तिष्ठन् मुक्तशिखोऽपि वा
विना यज्ञोपवीतेन आचान्तोऽथ शुचिर्द्विजः १५
आचामेद् ब्राह्मतीर्थेन सोपवीती ह्युदङ्मुखः
उपवीती द्विजो नित्यं प्राङ्मुखो वाग्यतः शुचिः १६
जले जलस्थ आचामेत्स्थलाचान्तो बहिः शुचिः
बहिरन्तस्थ आचान्त एवं शुद्धिमवाप्नुयात् १७
आमणिबन्धनाद्धस्तौ पादावद्भिर्विशोधयेत्
अशब्दाभिरनुष्णाभिः स्ववर्णरसगन्धिभिः १८
हृद्गताभिरफेनाभिस्त्रिश्चतुर्वाद्भिराचमेत्
परिमृज्य द्विरास्यन्तु द्वादशाङ्गानि च स्पृशेत् १९
स्नात्वा पीत्वा तथा भुक्त्वा स्पृष्ट्वा चैव द्विजोत्तमाः
अनेन विधिना विप्र आचान्तः शुचितामियात् २०
शूद्रः शुद्ध्यति हस्तेन वैश्यो दन्तेषु वारिभिः
कण्ठागतैः क्षत्रियस्तु आचान्तः शुचिता मियात् २१
आसनारूढपादश्च कृतावशक्थिकस्तथा
आरूढपादको वापि न शुद्ध्यति कदाचन २२
उपासीत न चेत्सन्ध्यामग्निकार्य्यं न वा कृतम्
गायत्र्यष्टसहस्रन्तु जपेत्स्नात्वा समाहितः २३
सूतकान्नं नवश्राद्धं मासिकान्नं तथैव च
ब्रह्मचारी तु योऽश्नीयात्त्रिरात्रेणैव शुध्यति २४
ब्रह्मचारी तु यो गच्छेत् स्त्रियं कामप्रपीडितः

प्राजापत्यं चरेत् कृच्छ्रमथवैकं सुमन्त्रितः २५
ब्रह्मचारी तु योऽश्नीयान्मधुमांसं कथञ्चन
प्राजापत्यन्तु कृत्वासौ मौञ्जीहोमेन शुध्यति २६
निर्वपेच्च पूरोडाशं ब्रह्मचारी च पर्वणि
मन्त्रैः शाकलहोमान्सैरग्नावाज्यञ्च होमयेत् २७
ब्रह्मचारी तु यः स्कन्देत्कामतः शुक्रमात्मनः
अवकीर्णी व्रतं कुर्य्यात् स्नात्वा शुद्ध्येदकामतः २८
भिक्षाटनमतः कृत्वा स्वस्थो ह्येकात्मनः श्रुतिः
अस्नात्वा चैव यो भुङ्क्ते गायत्र्यष्टशतं जपेत् २९
शूद्रहस्तेन योऽश्नीयात् पानीयं वा पिवेत्क्वचित्
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ३०
शुष्कपर्य्युषितोच्छिष्टं भुक्त्वान्नं केशदूषितम्
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ३१
शूद्राणां भाजने भुक्त्वा भुक्त्वा वा भिन्नभाजने
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ३२
दिवा स्वपिति यः स्वस्थो ब्रह्मचारी कथञ्चन
स्नात्वा सूर्य्यं समभ्यर्च्च गायत्र्यष्टशतं जपेत् ३३
एष धर्मः समाख्यातः प्रथमाश्रमवासिनाम्
एवं संवर्त्तमानस्तु प्राप्नोति परमां गतिम् ३४
अथ द्विजोऽभ्यनुज्ञातः सवर्णां स्त्रियमुद्वहेत्
कुले महति सम्भूता लक्षणैश्च समन्विताम्
ब्राह्मेणैव विवाहेन शीलरूपगुणान्विताम् ३५
पञ्चयज्ञ विधानञ्च कुर्य्यादहरहर्द्विजः
न हापयेत्क्वचिद्विप्रः श्रेयस्कामः कदाचन ३६
हानिं तस्य तु कुर्व्वीत सदा मरणजन्मनोः ३७
विप्रो दशाहमासीत दानाध्ययनवर्जितः

क्षत्रियो द्वादशाहेन वैश्यः पञ्चदशैव तु
शूद्रः शुध्यति मासेन सम्वर्त्त वचनं यथा ३८
प्रेतस्य तु जलं देयं स्नात्वा च गोत्रजैर्बहिः
प्रथमेऽह्नि तृतीये च सप्तमे नवमे तथा ३९
चतुर्थे सञ्चयं कुर्य्यात् सर्वैस्तु गोत्रजैः सह
ततः सञ्चयनादूद्ध्र्वमङ्गस्पर्शो विधीयते ४०
चतुर्थेऽहनि विप्रस्य षष्ठे वै क्षत्रियस्य च
अष्टमे दशमे चैव स्पर्शः स्याद्वैश्यशूद्रयोः ४१
जातस्यापि विधिर्दृष्ट एष एव मनीषिभिः
दशरात्रेण शुध्यन्ति वैश्यदेवविवर्ज्जिताः ४२
पुत्रे जाते पितुः स्नानं सचैलन्तु विधीयते
माता शुध्येद्दशाहेन स्नातस्य स्पर्शनं पितुः ४३
होमस्तत्र तु कर्त्तव्यः शुष्कान्नेन फलेन च
पञ्चयज्ञविधानन्तु न कार्य्यं मृत्युजन्मनोः ४४
दशाहात्तु परं सम्यग्विप्रोऽधीयीत धर्मवित्
दानञ्च विधिना देयमशुभान्तकरं शुभम् ४५
यद्यदिष्टतमं लोके यच्चापि दयितं गृहे
तत्तद्गुणवते देयं तदेवाक्षयमिच्छता ४६
नानाविधानि द्रव्याणि धान्याति सुबहूनि च
समुद्रजानि रत्नानि नरो विगतकल्मषः
दत्त्वा विप्राय महते प्राप्नोति महतीं श्रियम् ४७
गन्धमाभरणं माल्यं यः प्रयच्छति धर्मवित्
स सुगन्धः सदा हृष्टो यत्र तत्रोपजायते ४८
श्रोत्रियाय कुलीनाय त्वर्थिने च विशेषतः
यद्दानं दीयते भक्त्या तद्भवेत्तु महत्फलम् ४९
आहूय शीलसम्पन्नं श्रुतेनाभिजनेन च

शुचिर्विप्रं महाप्राज्ञो हव्यकव्येषु पूजयेत्  ५०
नानाविधानि द्रव्याणि रसवन्तीप्सितानि च
श्रेयस्कामेन देयानि स्वर्गमक्षयमिच्छता  ५१
वस्त्रदाता सुवेशः स्याद्रौप्यदो रूपमेव हि
हिरण्यदो महच्चायुर्लभेत्तेजश्च मानवः  ५२
भूताभयप्रदानेन सर्वकामानवाप्नुयात्
दीर्घमायुश्च लभते सुखी चैव तथा भवेत्  ५३
धान्योदकप्रदायी च सर्पिर्दः सुखमश्नुते
अलङ्कृत्य त्वलङ्कारं दत्त्वा प्राप्नोति तत्फलम्  ५४
फलमूलानि विप्राय शाकानि विविधानि च
सुरभीणि च पुष्पाणि दत्त्वा प्राज्ञश्च जायते  ५५
ताम्बूलं चैव यो दद्याद्ब्राह्मणेभ्यो विचक्षणः
मेधावी सुभगः प्राज्ञो दर्शनीयश्च जायते  ५६
पादुकोपानहौ च्छत्रं शयनान्यासनानि च
विविधानि च यानानि दत्त्वा दिव्यगतिर्भवेत्  ५७
दद्याच्च शिशिरे त्वग्निं बहुकाष्ठं प्रयत्नतः
कायाग्निदीप्तिं प्राज्ञत्वं रूपसौभाग्यमाप्नुयात्  ५८
औषधं स्नेहमाहारं रोगिणां रोगशान्तये
दत्त्वा स्याद्रोगरहितः सुखी दीर्घायुरेव च  ५९
इन्धनानि च यो दद्याद्विप्रेभ्यः शिशिरागमे
नित्यं जयति संग्रामे श्रिया युक्तस्तु दीप्यते  ६०
अलङ्कृत्य तु यः कन्यां वराय सदृशाय वै
ब्राह्मीयेण विवाहेन दद्यात्तान्तु सुपूजिताम्  ६१
स कन्यायाः प्रदानेन श्रेयो विन्दति पुष्कलम्
साधुवादं लभेत् सद्भिः कीर्तिं प्राप्नोति पुष्कलाम्  ६२
ज्योतिष्टोमादिसत्राणां शतं शतगुणीकृतम्

प्राप्नोति पुरुषो दत्त्वा होममन्त्रैस्तु संस्कृताम्  ६३
अलङ्कृत्य पिता कन्यां भूषणाच्छादनासनैः
दत्त्वा स्वर्गमवाप्नोति पूजितस्तु सुरादिषु  ६४
रोमदर्शनसंप्राप्ते सोमो भुङ्क्तेऽथ कन्यकाम्
रजोदृष्ट्वा तु गन्धर्वः कुचौ दृष्ट्वा तु पावकः  ६५
अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी
दशवर्षा भवेत् कन्या अत ऊर्द्ध्वं रजस्वला  ६६
माता चैव पिता चैव ज्येष्ठो भ्राता तथैव च
त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्वलाम्  ६७
तस्माद्विवाहयेत् कन्यां यावन्नर्त्तुमती भवेत्
विवाहोऽष्टमवर्षायाः कन्यास्तु प्रशस्यते  ६८
तैलमास्तरणं प्राज्ञः पादाभ्यङ्गं ददाति यः
प्रहृष्टमानसो लोके सुखी चैव सदा भवेत्  ६९
अनड्वाहौ च यो दद्यात्कीलसीरेण संयुतौ
अलङ्कृत्य यथाशक्त्या धूर्व्वहौ शुभलक्षणौ  ७०
सर्वपापविशुद्धात्मा सर्वकामसमन्वितः
वर्षाणि वसति स्वर्गे रोमसंख्याप्रमाणतः  ७१
धेनुञ्च यो द्विजे दद्यादलङ्कृत्य पयस्विनीम्
कांस्यवस्त्रादिभिर्युक्तां स्वर्गलोके महीयते  ७२
भूमिं शस्यवतीं श्रेष्ठां ब्राह्मणे वेदपारगे
गां दत्वार्द्धप्रसूताञ्च स्वर्गलोके महीयते  ७३
अग्नेरपत्यं प्रथमं सुवर्णं भूर्वैष्णवी सूर्यसुताश्च गावः
लोकास्त्रयस्तेन भवन्ति दत्ता यः काञ्चनं गाञ्च महीञ्च दद्यात्  ७४
यावन्ति शस्यमूल्यानि आरोप्याणि च सर्वशः
नरस्तावन्ति वर्षाणि स्वर्गलोके महीयते  ७५
सर्वेषामेव दानानामेकजन्मानुगं फलम्

हाटकक्षितिगौरीणां सप्तजन्मानुगं फलम्  ७६
यो ददाति स्वर्णरौप्यैर्हेमशृङ्गीमरोगिणीम्
सवत्सां वाससा वीतां सुशीलाङ्गां पयस्विनीम्  ७७
तस्यां यावन्ति रोमाणि सवत्सायां दिवं गतः
तावद्वर्षसहस्राणि स नरो ब्रह्मणोऽन्तिके  ७८
यो ददाति वलीवर्द्दमुक्तेन विधिना शुभम्
अव्यङ्गं गोप्रदानेन फलाद्दशगुणं फलम्  ७९
जलदस्तृप्तिमतुलां वितृष्य सर्ववस्तुषु
अन्नदः सुखमाप्नोति सुतृप्तः सर्ववस्तुषु  ८०
सर्वेषामेव दानानामन्नदानं परं स्मृतम्
सर्वेषामेव जन्तूनां यतस्तज्जीवितं फलम्  ८१
यस्मादन्नात्प्रजाः सर्व्वाः कल्पे कल्पेऽसृजत्प्रभुः
तस्मादन्नात्परं दानं न भूतो न भविष्यति  ८२
अन्नदानात्परं दानं विद्यते न हि किञ्चन
अन्नाद्भूतानि जायन्ते जीवन्ति च न संशयः  ८३
मृत्तिकां गोशकृद्दर्भानुपवीतं यथोत्तरम्
दत्त्वा गुणाग्र्यविप्राय कुले महति जायते  ८४
मुखवासञ्च यो दद्याद्दन्तधावनमेव च
शुचिगन्धसमायुक्तो वाक्पटुः स सदा भवेत्  ८५
पादशौचन्तु यो दद्यात्तथा च गुदलिङ्गयोः
यः प्रयच्छति विप्राय शुद्धबुद्धिः सदा भवेत्  ८६
औषधं पथ्यमाहारं स्नेहाभ्यङ्गं प्रतिश्रयम्
यः प्रयच्छति रोगिभ्यः सर्वव्याधि विवर्जितः  ८७
गुडमिक्षुरसञ्चैव लवणं व्यञ्जनानि च
सुरभीणि च पानानि दत्त्वात्यन्तसुखी भवेत्  ८८
दानैश्च विविधैः सम्यक् पुण्यमेतदुदाहृतम्

विद्यादानेन पुरायेन ब्रह्मलोके महीयते ८९
अन्योन्यान्नप्रदा विप्रा अन्योन्यप्रतिपूजकाः
अन्योन्यं प्रतिगृह्णन्ति तारयन्ति तरन्ति च ९०
दानान्येतानि देयानि ह्यन्यानि च विशेषतः
दीनान्धकृपणादिभ्यः श्रेयस्कामेन धीमता ९१
ब्रह्मचारियतिभ्यश्च वपनं यस्तु कारयेत्
नखकर्मादिकञ्चैव चक्षुष्मान् जायते नरः ९२
देवागारे द्विजातीनां दीपं दद्याच्चतुष्पथे
मेधाविज्ञानसम्पन्नश्चक्षुष्मान् जायते नरः ९३
नित्ये नैमित्तिके काम्ये तिलान् दत्वा तु शक्तितः
प्रजावान् पशुमांश्चैव धनवान् जायते नरः ९४
यो ददात्यर्थितोविप्रे यत्तत् संप्रतिपादिते
तृणकाष्ठादिकञ्चैव गोप्रदानसमं भवेत् ९५
कृत्वा गार्ह्याणि कर्माणि स्वभर्य्यापोषणे नरः
ऋतुकालाभिगामी स्यात्प्राप्नोति परमां गतिम् ९६
उषित्वैवं गृहे विप्रो द्वितीयादाश्रमात्परम्
बलीपलितसंयुक्तस्तृतीयन्तु समाश्रयेत् ९७
गच्छेदेवं वनं प्राज्ञः स्वभार्य्यां सहचारिणीम्
गृहीत्वा चाग्निहोत्रञ्च होमं तत्र न हापयेत् ९८
कुर्य्याच्चैव पुरोडाशं वन्यैर्मेध्यैर्यथाविधि
भिक्षाञ्च भिक्षवे दद्याच्छाकमूलफलानि च ९९
कुर्य्यादध्ययनं नित्यमग्निहोत्र परायणः
इष्टिं पार्व्वायणीयाञ्च प्रकुर्य्यात्प्रतिपर्वसु १००
उषित्वैवं वने सम्यग्विधिज्ञः सर्ववस्तुषु
चतुर्थमाश्रमं गच्छेद्धुतहोमोजितेन्द्रियः १०१
अग्निमात्मनि संस्थाप्य द्विजः प्रव्रजितो भवेत्

वेदाभ्यासरतो नित्यमात्मविद्यापरायणः  १०२
अष्टौ भिक्षाः समादाय स मुनिः सप्त पञ्च वा
अद्भिः प्रक्षाल्य तत्सर्व्वं भुञ्जीत च समाहितः  १०३
अरण्ये निर्ज्जने विप्रः पुनरासीत भुक्तवान्
एकाकी चिन्तयेन्नित्यं मनोवाक्कायसंयतः  १०४
मृत्युञ्च नाभिनन्देत जीवितं वा कथञ्चन
कालमेव प्रतीक्षेत यावद्वायुः समाप्यते  १०५
संसेव्य चाश्रमान् विप्रो जितक्रोधोजितेन्द्रियः
ब्रह्मलोकमवाप्नोति वेदशास्त्रार्थविद्द्विजः  १०६
आश्रमेषु च सर्वेषु ह्युक्तः प्रासङ्गिकोविधिः
अथाभिवक्ष्ये पापानां प्रायश्चित्तं यथाविधि  १०७
ब्रह्मघ्नश्च सुरापश्च स्तेयी च गुरुतल्पगः
महापातकिनस्त्वेते तत्संयोगी च पञ्चमः  १०८
ब्राह्मघ्नस्तु वनं गच्चेत् कल्कवासाजटी ध्वजी
वन्यान्येव फलान्यश्नन् सर्व्व कामविवर्जितः  १०९
भिक्षार्थी च चरेद्ग्रामं वन्यैर्यदि न जीवति
चातुर्वर्ण्यं चरेद्भैक्षं खट्वाङ्गी संयतः पुमान्  ११०
भैक्षञ्चैव समादाय वनं गच्छेत्ततः पुनः
वनवासी सपापश्च सदाकालमतन्द्रितः  १११
ख्यापयन्नेव तत्पापं ब्रह्मघ्नः पापकृन्नरः
अनेन तु विधानेन द्वादशाब्दव्रतञ्चरेत्  ११२
संनियम्येन्द्रियग्रामं सर्वभूतहिते रतः
ब्रह्महत्यापनोदाय ततो मुच्येत किल्विषात्  ११३
अतः परं सुरापस्य प्रवक्ष्यामि विनिष्कृतिम्
श्रोतुमिच्छथ भो विप्रा वेदशास्त्रानुरूपिकाम्  ११४
गौडी पैष्टी तथा साध्वी विज्ञेया त्रिविधा सुरा

यथैवैका तथा सर्वा न पातव्या द्विजैः सदा  ११५
सुरापस्तु सुरां तप्तां पिबेत्तत्पापमोक्षकः
गोमूत्रमग्निवर्णञ्च गोमयं वा तथा विधम्  ११६
घृतञ्चैव सुतातञ्च क्षीरं वापि तथाविधम्
वत्सरं वा कणानश्नन् सर्वकामविवर्जितः  ११७
चान्द्रायणानि वा त्रीणि सुरापी व्रतमाचरेत्
मुच्यते तेन पापेन प्रायश्चित्ते कृते सति  ११८
एवं शुद्धिः सुरापस्य भवेदिति न संशयः
मद्यभाण्डोदकं पीत्वा पुनः संस्कारमर्हति  ११९
स्तेयं कृत्वा सुवर्णस्य राज्ञे शंसेत मानवः
ततो मुषलमादाय स्तेनं हन्यात्ततो नृपः  १२०
यदि जीवति स स्तेनस्ततस्तेयात् प्रमुच्यते
अरण्ये चीरवासा वा चरेद्ब्रह्महणो व्रतम्  १२१
समालिङ्गेत्स्त्रियं वापि दीप्तां कृत्वायसा कृताम्
एवं शुद्धिः कृता स्तेये साम्वर्त्तवचनं यथा  १२२
गुरुतल्पे शयानस्तु तल्पे स्वप्यादयोमये
चान्द्रायणानि वा कुर्य्याच्चत्वारि त्रीणि वा द्विजः
ततो विमुच्यते पापात्प्रायश्चित्ते कृते सति  १२३
एभिः सम्पर्कमायाति यः कश्चित्पापमोहितः
षण्मासादधिकं वापि पूर्वोक्तव्रतमाचरेत्  १२४
महापातकिसंयोगे ब्रह्महत्यादिभिर्नरः
तत्पापस्य विशुद्ध्यर्थं तस्य तस्य व्रतञ्चरेत्  १२५
क्षत्रियस्य बधं कृत्वा त्रिभिः कृच्छ्रैर्विशुध्यति
कुर्य्याच्चैवानुरूपेण त्रीणि कृच्छ्राणि संयतः  १२६
वैश्यहत्यान्तु संप्राप्तः कथञ्चित्काममोहितः
कृच्छ्रातिकृच्छ्रं कुर्व्वीत स नरो वैश्यघातकः  १२७

कुर्य्याच्छूद्रवधं प्राप्तस्तप्तकृच्छ्रं यथाविधि १२८
गोघ्नस्यातः प्रवक्ष्यामि निष्कृतिं तत्त्वतः पुमान्
गोघ्नः कुर्व्वीत संस्थानं गोष्ठे गोरूपसंस्थिते १२९
तत्रैव क्षितिशायी स्यान्मासार्द्धं संयतेन्द्रियः
शक्तुयावकपिण्याकपयोदधि सकृन्नरः १३०
एतानि क्रमतोऽश्नीयाद्द्विजस्तु पापमोक्षकः
शुद्ध्यते सार्द्धमासेन नखलोमविवर्ज्जितः १३१
स्नानं त्रिषवणं चास्य गवामनुगमस्तथा
एतत्समाहितः कुर्य्यान्नरोविगतमत्सरः १३२
सावित्रीञ्च जपेन्नित्यं पवित्राणि च शक्तितः
ततश्चीर्णव्रतः कुर्य्याद्विप्राणां भोजनं परम् १३३
भुक्तवत्सु च विप्रेषु गाञ्च दद्यात् सदक्षिणाम् १३४
व्यापादितेषु बहुषु बन्धने रोधनेऽपिवा
द्विगुणं गोव्रतं तस्य प्रायश्चित्तं विशुद्धये १३५
एका चेद्बहुभिः कैश्चिद्दैवाद्व्यापादिता क्वचित्
पादं पादन्तु हत्यायाश्चरेयुस्ते पृथक् पृथक् १३६
यन्त्रणे गोचिकित्सार्थे मूढगर्भविमोचने
यदि तत्र विपत्तिः स्यान्न स पापेन लिप्यते १३७
निशाबन्धनिरूप्येषु सर्पव्याघ्रहतेषु च
अग्निविघ्ननिपातेन प्रायश्चित्तं न विद्यते १३८
प्रायश्चित्तस्य पादन्तु रोधेषु व्रतमाचरेत्
द्वौ पादौ बन्धने चैव पादोनं कुट्टने तथा १३९
पाषाणैर्लगुडैर्दण्डैस्तथा शस्त्रादिभिर्नरः
निपातने चरेत्सर्वं प्रायश्चित्तं विशुद्धये १४०
गजञ्च तुरगं हत्वा महिषोष्ट्रकपिन्तथा
एषु कुर्व्वीत सर्वेषु सप्तरात्रमभोजनम् १४१

व्याघ्रं श्वानं तथा सिंहमृत्तं शूकरमेव च
एतान् हत्वा द्विजः कृच्छ्रं ब्राह्मणानाञ्च भोजनम्  १४२
सर्वासामेव जातीनां मृगाणां वनचारिणाम्
त्रिरात्रोपोषितस्तिष्ठेञ्जपन्वै जातवेदसम्  १४३
हंसं काकं बलाकञ्च पारावतमथापि वा
सारसञ्चासभासञ्च हत्वा त्रिदिवसं न्निपेत्  १४४
चक्रवाकं तथा क्रौञ्चं सारिकाशुकतित्तिरिम्
श्येनगृध्राबुलूकञ्च कपोतकमथापि वा  १४५
टिट्टिभं जालपादञ्च कोकिलं कुक्कुटं तथा
एवं पन्निषु सर्वेषु दिनमेकमभोजनम्  १४६
मराडूकञ्चैव हत्वा च सर्पमार्ज्जारमूषिकम्
त्रिरात्रोपोषितस्तिष्ठेत्कुर्य्याद्ब्राह्मणभोजनम्  १४७
अनस्थीन्ब्राह्मणो हत्वा प्राणायामेन शुध्यति
अस्थिमतो बधे विप्रः किञ्चिद्दद्याद्विचन्नणः  १४८
चाराडालीं यो द्विजो गच्छेत्कथञ्चित्काममोहितः
त्रिभिः कृच्छ्रैर्विशुद्धयेत प्राजापत्यानुपूर्वकैः  १४९
पुक्कसीगमनं कृत्वा कामतोऽकामतोऽपि वा
कृच्छ्रं चान्द्रायणं तस्य पावनं परमं स्मृतम्  १५०
नटीं शैलूषिकीञ्चैव रजकीं वेणुजीविनीम्
गत्वा चान्द्रायणं कुर्य्यात्तथा चर्मोपजीविनीम्  १५१
न्नत्रियामथ वैश्यां वा गच्छेद्यः काममोहितः
तस्य सान्तपनं कृच्छ्रं भवेत्पापापनोदकम्  १५२
शूद्रीं तु ब्राह्मणो गत्वा मासं मासार्द्धमेव वा
गोमूत्रयावकाहारो मासार्द्धेन विशुध्यति  १५३
विप्रस्तु ब्राह्मणीं गत्वा प्राजापत्यं समाचरेत्
न्नत्रियां न्नत्रियोगत्वा तदेव व्रतमाचरेत्  १५४

नरोगो गमनं कृत्वा कुर्य्याच्चान्द्रायणं व्रतम्  १५५
गुरोर्दुहितरं गत्वा स्वसारं पितुरेव च
तस्या दुहितरञ्चैव चरेच्चान्द्रायणं व्रतम्  १५६
मातुलानीं सनाभिञ्च मातुलस्यात्मजां स्नुषाम्
एता गत्वा स्त्रियो मोहात्पराकेण विशुध्यति  १५७
पितृव्यदारगमने भ्रातृभार्य्यागमे तथा
गुरुतल्पव्रतं कुर्य्यात्तस्यान्या निष्कृतिर्न च  १५८
पितृदाराः समारुह्य मातृवर्जं नराधमः
भगिनीं मातुलसुतां स्वसारं चान्यमातृजाम्
एतास्तिस्रः स्त्रियो गत्वा तप्तकृच्छ्रं समाचरेत्  १५९
मातरं योऽधिगच्छेच्च सुतां वा पुरुषाधमः
भगिनीञ्च निजां गत्वा निष्कृतिर्नो विधीयते  १६०
कुमारीगमने चैव व्रतमेतत्समादिशेत्
पशुवेश्याभिगमने प्राजापत्यं विधीयते  १६१
सखिभार्य्यां कुमारीञ्च श्वश्रूं वा श्यालिकां तथा
नियमस्थां व्रतस्थाञ्च योऽभिगच्छेत्स्त्रियं द्विजः
स कुर्य्यात्प्राकृतं कृच्छ्रं धेनुं दद्यात्पयस्विनीम्  १६२
रजस्वलाञ्च योगच्छेद्गर्भिणीं पतितां तथा
तस्य पापविशुद्ध्यर्थमतिकृच्छ्रं विधीयते  १६३
वेश्याञ्च ब्राह्मणो गत्वा कृच्छ्रमेकं समाचरेत्
एवं शुद्धिः समाख्याता सम्वर्त्तस्य वचो यथा  १६४
ब्राह्मणो ब्राह्मणीं गत्वा कृच्छ्रेणैकेण शुध्यति  १६५
कथञ्चिद्ब्राह्मणीं गत्वा क्षत्रियो वैश्य एव च
गोमूत्रयावकाहारी मासेनैकेन शुध्यति  १६६
ब्राह्मणी शूद्रसम्पर्के कथञ्चित्समुपागते
कृच्छ्रं चान्द्रायणं कुर्य्यात्पावनं परमं स्मृतम्  १६७

चाराडालं पुक्कशञ्चैव श्वपाकं पतितं तथा
एतान् श्रेष्ठस्त्रियो गत्वा कुर्य्युश्चान्द्रायणत्रयम्  १६८
अतःपरञ्च दुष्टानां निष्कृतिं श्रोतुमर्हथ
सन्नयस्य दुर्म्मतिः कश्चिदपत्यार्थं स्त्रियं व्रजेत्
स कुर्य्यात्कृच्छ्रमश्रान्तः षरामासन्तदनन्तरम्  १६९
विषाग्निश्यामशवलास्तेषामेवं विनिर्द्दिशेत्
स्त्रीणाञ्च तथाचरणे गर्ह्याभिगमनेषु च
पतनेषु तथैतेषु प्रायश्चित्तविधिः स्मृतः  १७०
नृणां विप्रतिपत्तौ च पावनः प्रेतराडिह  १७१
गोभिर्विप्रहते चैव तथाचैवात्मघातिनि
नाश्रुप्रपातनं कार्य्यं सद्भिः श्रेयोऽनुकाङ्क्षिभिः  १७२
एषामन्यतमं प्रेतं यो वहेत्तदहेतवे
तथोदकक्रियां कृत्वा चरेच्चान्द्रायणव्रतम्  १७३
तच्छवं केवलं स्पृष्ट्वा वस्त्रं वा केवलं यदि
पूर्वः कृच्छ्रापहारी स्यादेकाहक्षपणं तथा  १७४
महापातकिनाञ्चैव तथा चैवात्मघातिनाम्
उदकं पिराडदानञ्च श्राद्धं चैव तु यत्कृतम्
नोपतिष्ठति तत्सर्वं राक्षसैर्विप्रलुप्यते  १७५
चाराडालैस्तु हता ये च जलदंष्ट्रिसरीसृपैः
श्राद्धमेषां न कर्त्तव्यं ब्रह्मदराडहताश्च ये  १७६
कृत्वा मूत्रं पुरीषं वा भुक्तोच्छिष्टस्तथा द्विजः
श्वादि स्पृष्टो जपेद्देव्याः सहस्रं स्नानपूर्वकम्  १७७
चाराडालं पतितं स्पृष्ट्वा शवमन्त्यजमेव च
उदक्यां सूतिकां नारीं सवासाः स्नानमाचरेत्  १७८
अस्पृश्यं संस्पृशेद्यस्तु स्नानं तेन विधीयते
ऊर्द्ध्वमाचमनं प्रोक्तं द्रव्याणां प्रोक्षणं तथा  १७९

चाण्डालाद्यैस्तु संस्पृष्ट उच्छिष्टश्च द्विजोत्तमः
गोमूत्रयावकाहारः षड्रात्रेण विशुध्यति १८०
शुना पुष्पवती स्पृष्टा पुष्पवत्यान्यया तथा
शेषान्यहन्युपवसेत्स्नाता शुध्येद्घृताशनात् १८१
चाण्डालभाण्डसंस्पृष्टं पीत्वा कूपगतं जलम्
गोमूत्रयावकाहारस्त्रिरात्रेण विशुध्यति १८२
अन्त्यजैः स्वीकृते तीर्थे तडागेषु नदीषु च
शुध्यते पञ्चगव्येन पीत्वा तोयमकामतः १८३
सुराघटप्रपातोयं पीत्वाकाशजलं तथा
अहोरात्रोषितो भूत्वा पञ्चगव्यं पिबेद्द्विजः १८४
कूपे विण्मूत्रसंस्पृष्टे प्राश्य चापो द्विजातयः
त्रिरात्रेणैव शुध्यन्ति कुम्भे शान्तपनं स्मृतम् १८५
वापीकूपतडागानां दूषितानां विशोधनम्
अपां घटशतोद्धारः पञ्चगव्यञ्च निक्षिपेत् १८६
आविकैकशफोष्ट्रीणां क्षीरं प्राश्य द्विजोत्तमः
तस्य शुद्धिविधानाय त्रिरात्रं यावकं पिवेत् १८७
स्त्रीक्षीरमाजिकं पीत्वा सन्धिन्याश्चैव गोः पयः
तस्य शुद्धिस्त्रिरात्रेण विड्भक्षणाञ्च भक्षणे १८८
विण्मूत्रभक्षणे चैव प्राजापत्यं समाचरेत्
श्वकाकोच्छिष्टगोच्छिष्टभक्षणे तु त्र्यहं द्विजः १८९
विडालमूषकोच्छिष्टे पञ्चगव्यं पिवेद्द्विजः
शूद्रोच्छिष्टं तथा भुक्त्वा त्रिरात्रेणैव शुध्यति १९०
पलाण्डुलशुनं जग्ध्वा तथैव ग्रामकुक्कुटम्
छत्राकं विड्वराहञ्च चरेच्चान्द्रायणं द्विजः १९१
मानवः श्वखरोष्ट्राणां कपेर्गोमायुकङ्कयोः
प्राश्य मूत्रं पुरीषं वा चरेच्चान्द्रायणव्रतम् १९२

अन्नं पर्य्युषितं भुक्त्वा केशकीटैरुपद्रुतम्
पतितैः प्रेक्षितं वापि पञ्चगव्यं पिवेद्द्विजः १९३
अन्त्यजाभाजने भुक्त्वा ह्युदक्याभाजनेऽपि वा
गोमूत्रयावकाहारी मासार्द्धेन विशुध्यति १९४
गोमांसं मानुषञ्चैव शुनोहस्तात् समाहितम्
अभक्ष्यमेतत् सर्वन्तु भुक्त्वा चान्द्रायणं चरेत् १९५
चाण्डालस्य करे विप्रः श्वपाके पक्वशेऽपि वा
गोमूत्रयावकाहारो मासार्द्धेन विशुध्यति १९६
पतितेन सुसम्पर्के मासं मासार्द्धमेव वा
गोमूत्रयावकाहारो मासार्द्धेन विशुध्यति १९७
यत्र यत्र च सङ्कीर्णमात्मानं मन्यते द्विजः
तत्र कार्य्यस्तिलैर्होमो गायत्र्यावर्त्तनं तथा १९८
एष एव मया प्रोक्तः प्रायश्चित्तविधिः शुभः
अनादिष्टेषु पापेषु प्रायश्चित्तं तथोच्यते १९९
दानैर्होमैर्जपैर्नित्यं प्राणायामैर्द्विजोत्तमः
पातकेभ्यः प्रमुच्येत वेदाभ्यासान्न संशयः २००
सुवर्णदानं गोदानं भूमिदानं तथैव च
नाशयन्त्याशु पापानि ह्यन्यजन्मकृतान्यपि २०१
तिलधेनुञ्च यो दद्यात्संयताय द्विजन्मने
ब्रह्महत्यादिभिः पापैर्मुच्यते नात्र संशयः २०२
माघमासे तु संप्राप्ते पौर्णमास्यामुपोषितः
ब्राह्मणेभ्यस्तिलान् दत्वा सर्वपापैः प्रमुच्यते २०३
उपवासी नरो भूत्वा पौर्णमास्याञ्च कार्त्तिके
हिरण्यं वस्त्रमन्नं वा दत्वा मुच्येत दुष्कृतैः २०४
अमावास्या द्वादशी च संक्रान्तिश्च विशेषतः
एताः प्रशस्तास्तिथयो भानुवारस्तथैव च २०५

अत्र स्नानं जपो होमो ब्राह्मणानाञ्च भोजनम्
उपवासस्तथा दानमेकैकं पावयेन्नरम् २०६
स्नातः शुचिर्धौतवासाः शुद्धात्मा विजितेन्द्रियः
सात्त्विकं भावमाश्रित्य दानं दद्याद्विचक्षणः २०७
सप्तव्याहृतिभिर्होमो द्विजैः कार्य्यो हितात्मभिः
उपपातकसिद्ध्यर्थं सहस्रपरिसंख्यया २०८
महापातकसंयुक्तो लक्षहोमं सदा द्विजः
मुच्यते सर्वपापेभ्यो गायत्र्याश्चैव जापनात् २०९
अभ्यसेच्च महापुण्यां गायत्रीं वेदमातरम्
गत्वारण्ये नदीतीरे सर्वपापविशुद्धये २१०
स्नात्वा च विधिवत्तत्र प्राणानायम्य वाग्यतः
प्राणायामैस्त्रिभिः पूतो गायत्रीन्तु जपेद्द्विजः २११
अक्लिन्नवासाः स्थलगः शुचौ देशे समाहितः
पवित्रपाणिराचान्तो गायत्र्या जपमारभेत् २१२
ऐहिकामुष्मिकं लोके पापं सर्वं विशेषतः
पञ्चरात्रेण गायत्रीं जपमानो व्यपोहति २१३
गायत्र्यास्तु परं नास्ति शोधनं पापकर्मणाम् २१४
महाव्याहृतिसंयुक्तां प्राणायामेन संयुताम्
गायत्रीं प्रजपन् विप्रः सर्वपापैः प्रमुच्यते २१५
ब्रह्मचारी मिताहारः सर्वभूतहिते रतः
गायत्र्या लक्षजप्येन सर्वपापैः प्रमुच्यते २१६
अयाज्ययाजनं कृत्वा भुक्त्वा चान्नं विगर्हितम्
गायत्र्यष्टसहस्रन्तु जप्यं कृत्वा विमुच्यते २१७
अहन्यहनि योऽधीते गायत्रीं वै द्विजोत्तमः
मासेन मुच्यते पापादुरगः कञ्चुकाद्यथा २१८
गायत्रीं यः सदा विप्रो जपते नियतः शुचिः

स याति परमं स्थानं वायुभूतः खमूर्त्तिमान् २१९
प्रणवेन तु संयुक्ता व्याहृतिः सप्त नित्यशः
गायत्रीं शिरसा सार्द्धं मनसा त्रिः पठेद्द्विजः २२०
निगृह्य चात्मनः प्राणान् प्राणायामो विधीयते
प्राणायामत्रयं कुर्य्यान्नित्यमेव समाहितः २२१
मानसं वाचिकं पापं कायेनैव तु यत्कृतम्
तत्सर्वं नश्यते तूर्णं प्राणायामत्रये कृते २२२
ऋग्वेदमभ्यसेद्यस्तु यजुःशाखामथापि वा
सामानि सरहस्यानि सर्वपापैः प्रमुच्यते २२३
पावमानीं तथा कौत्सं पौरुषं सूक्तमेव च
जप्त्वा पापैः प्रमुच्येत पित्र्यञ्च मधुच्छन्दसाम् २२४
मण्डलं ब्राह्मणं रुद्रसूक्तोक्ताश्च बृहत्कथाः
वामदेव्यं बृहत्साम जप्त्वा पापैः प्रमुच्यते २२५
चान्द्रायणन्तु सर्वेषां पापानां पावनं परम्
कृत्वा शुद्धिमवाप्नोति परमं स्थानमेव च २२६
धर्मशास्त्रमिदं पुण्यं सम्वर्त्तेन तु भाषितम्
अधीत्य ब्राह्मणो गच्छेद्ब्रह्मणः सद्म शाश्वतम् २२७

इति श्रीसम्वर्त्तेनोक्तं धर्मशास्त्रं समाप्तम्

Reference:
*Smṛti Sandarbha*, Vol. I, (Delhi: Nag, 1981) p. 547.

# शङ्खस्मृतिः

श्रीगणेशाय नमः

प्रथमोऽध्यायः

अथ ब्राहणादीनां कर्मवर्णनम्

स्वम्भुवे नमस्कृत्य सृष्टिसंहारकारिणे
चातुर्वर्ण्यहितार्थाय शङ्खः शास्त्रमथाकरोत् १
यजनं याजनं दानं तथैवाध्यापनक्रियाम्
प्रतिग्रहञ्चाध्ययनं विप्रः कर्माणि कारयेत् २
दानमध्ययनञ्चैव यजनञ्च यथाविधि
क्षत्रियस्य तु वैश्यस्य कर्मेदं परिकीर्तितम् ३
क्षत्रियस्य विशेषेण प्रजानां परिपालनम्
कृपिगौरक्ष्यवाणिज्यं वैश्यस्य परिकीर्तितम् ४
शूद्रस्य द्विजशुश्रूषा सर्वशिल्पानि चाप्यथ
क्षमा सत्यं दमः शौचं सर्वेषामविशेषतः ५
ब्राह्मणः क्षत्रियो वैश्यस्त्रयो वर्णा द्विजातयः
तेषां जन्म द्वितीयस्तु विज्ञेयं मौञ्जिबन्धनम् ६
आचार्यस्तु पिता प्रोक्तः सावित्री जननी तथा
ब्रह्मक्षत्रविशाञ्चैव मौञ्जिबन्धनजन्मनि ७
वृत्त्या शूद्रसमास्तावद्विज्ञेयास्ते विचक्षणैः
यावद्वेदेन जायन्ते द्विजा ज्ञेयास्ततः परम् ८

इति शाङ्खीये धर्मशास्त्रे प्रथमोऽध्यायः

अथ द्वितीयोऽध्यायः

ब्राह्मणादीनां संस्कारवर्णनम्

गर्भस्य स्फुठताज्ञाने निषेकः परिकीर्तितः

ततस्तु स्पन्दमात्कार्यं पुंसवनं विचक्षणैः १
षष्ठेऽष्टमे वा सीमन्तो जाते वै जातकर्म च
अशौचे तु व्यतिक्रान्ते नामकर्म विधीयते
नामधेयञ्च कर्तव्यं वर्णानाञ्च समाक्षरम्
माङ्गल्यं ब्राह्मणंस्योक्तं क्षत्रियस्य बलान्वितम् २
वैश्यस्य धनसंयुक्तं शूद्रस्य तु जुगुप्सितम्
शर्मान्तं ब्राह्मणस्योक्तं वर्मान्तं क्षत्रियस्य तु ३
धनान्तं चैव वैश्यस्य दासान्तं वान्त्यजन्मनः
चतुर्थे मासि कर्तव्यमादित्यस्य प्रदर्शनम् ४
षष्ठेऽन्नप्राशनं मासि चूडा कार्या यथाकुलम्
गर्भाष्टमेऽब्दे कर्तव्यं ब्राह्मणस्योपनायनम् ५
गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः
षोडशाब्दस्तु विप्रस्य द्वाविंशः क्षत्रियस्य तु ६
विंशतिः सचतुष्का च वैश्यस्य परिकीर्तिता
नाभिभाषेत सावित्रीमत ऊर्द्ध्वं निवर्तयेत् ७
विज्ञातव्यास्त्रयोऽप्येते यथाकालमसंस्कृताः
सावित्रीपतिता व्रात्याः सर्वधर्मबहिष्कृताः ८
मौञ्जीबन्धो द्विजानान्तु क्रमान्मौञ्जी प्रकीर्तिता
मार्गवैयाघ्रवास्तानि कर्माणि ब्रह्मचारिणाम् ९
पर्णपिप्पलबिल्वानां क्रमाद्दण्डाः प्रकीर्तिताः
कर्णकेशललाटैस्तु तुल्याः प्रोक्ताः क्रमेण तु १०
अवक्राः सत्वचः सर्वे नाग्निदग्धास्तथैव च
यज्ञोपवीतं कर्पासक्षौमोर्णानां यथाक्रमम् ११
आदिमध्यावसानेषु भवच्छब्दोपलक्षितम्
भैक्षस्य वरणं प्रोक्तं वर्णानामनुपूर्वशः १२

इति शाङ्खीये धर्मशास्त्रे द्वितीयोऽध्यायः

## अथ तृतीयोऽध्यायः
## ब्रह्मचर्याद्याचारवर्णनम्

स गुरुर्यः क्रिया कृत्वा वेदमस्मै प्रयच्छति
उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः
आचारमग्निकार्यं च संध्योपासनमेव च
भृतकाध्यापको यस्तु उपाध्यायः स उच्यते १
माता पिता गुरुश्चैव पूजनीयाः सदा नृणाम्
क्रियास्तथाऽफलाः सर्वा यस्यैतेऽनादृतास्त्रयः
प्रयतः कल्यमुत्थाय स्नातो हुतहुताशनः
कुर्वीत प्रयतो भूत्वा गुरूणामभिवादनम् २
अनुज्ञातश्च गुरुणा ततोऽध्ययनमाचरेत्
कृत्वा ब्रह्माञ्जलिं पश्यन् गुरोर्वदनमानतः ३
ब्रह्मावसाने प्रारम्भे प्रणवञ्च प्रकीर्तयेत्
अनध्यायेष्वध्ययनं वर्जयेच्च प्रयत्नतः ४
चतुर्द्दशीं पञ्चदशीमष्टमीं राहुसूतकम्
उल्कापातं महीकम्पमाशौचं ग्रामविप्लवम् ५
इन्द्रप्रयागं सुरतं घनसंघातनिस्वनम्
वाद्यकोलाहलं युद्धमनध्यायान्विवर्जयेत् ६
नाधीयीताभियुक्तोऽपि प्रयत्नान्न च वेगतः
देवायतनवल्मीकश्मशानशवसन्निधौ
भैक्षचर्य्यान्तथा कुर्याद्ब्राह्मणेषु यथाविधि ७
गुरुणा चाभ्यनुज्ञातः प्राश्नीयात्प्राङ्मुखः शुचिः
हितं प्रियं गुरोः कुर्यादहङ्कारविवर्जितः ८
उपास्य पश्चिमां सन्ध्यां पूजयित्वा हुताशनम्
अभिवाद्य गुरुं पश्चाद्गुरोवचनकृद्भवेत् ९
गुरोः पूर्वं समुत्तिष्ठेच्छयीत चरमं तथा

मधुमांसाञ्जनं श्राद्धं गीतं नृत्यञ्च वर्जयेत् १०
हिंसापवादवादांश्च स्त्रीलीलां च विशेषतः
मेखलामजिनं दण्डं धारयेच्च प्रयत्नतः
अधःशायी भवेन्नित्यं ब्रह्मचारी समाहितः ११
एवं कृत्यन्तु कूर्वीत वेदस्वीकरणं बुधः
गुरुवे च धनं दत्त्वा स्नायाच्च तदनन्तरम् १२
इति शाङ्खीये धर्मशास्त्रे तृतीयोऽध्यायः

अथ चतुर्थोऽध्यायः
विवाहसंस्कारवर्णनम्

विन्देत विधिवद्भार्यामसमानार्षगोत्रजाम्
मातृतः पञ्चमीञ्चापि पितृतस्त्वथ सप्तमीम् १
ब्राह्मो दैवस्तथैवाऽऽर्षः प्राजापत्यस्तथाऽऽसुरः
गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः २
एते धर्मास्तु चत्वारः पूर्वं विप्रे प्रकीर्तिताः
गान्धर्वो राक्षसश्चैव क्षत्रियस्य प्रशस्यते ३
अप्रार्थितः प्रयत्नेन ब्राह्मस्तु परिकीर्तितः
यज्ञेषु ऋत्विजे दैवमादायार्षस्तु गोद्वयम् ४
प्रार्थितः संप्रदानेन प्राजापत्यः प्रकीर्तितः
आसुरेन्द्रविणादानाद्गान्धर्वः समयान्मिथः ५
राक्षसो युद्धहरणात्पैशाचः कन्यकाच्छलात्
तिस्रस्तु भार्य्या विप्रस्य द्वे भार्य्ये क्षत्रियस्य तु ६
एकैव भार्य्या वैश्यस्य तथा शूद्रस्य कीर्तिता
ब्राह्मणी क्षत्रिया वैश्या ब्राह्मणस्य प्रकीर्तिताः ७
क्षत्रिया चैव वैश्या च क्षत्रियस्य विधीयते
वैश्यैव भार्य्या वैश्यस्य शूद्रा शूद्रस्य कीर्तिता ८

आपद्यपि न कर्तव्या शूद्रा भार्य्या द्विजन्मना
तस्यां तस्य प्रसूतस्य निष्कृतिर्न विधीयते ९
तपस्वी यज्ञशशीलश्च सर्व धमभृतां वरः
ध्रुवं शूद्रत्वमाप्नोति शूद्रश्राद्धे त्रयोदशे १०
नीयते तु सपिण्डत्वं येषां श्राद्धं कुलोद्गतम्
सर्वे शूद्रत्वमायान्ति यदि स्वर्गजितास्तु ते ११
सपिण्डीकरणं कार्यं कुलजस्य तथा ध्रुवम्
श्राद्धं द्वादशकं कृत्वा श्राद्धे प्राप्ते त्रयोदशे १२
सपिण्डीकरणे चार्हे न च शूद्रस्तथार्हति
तस्मात्सर्वप्रयत्नेन शूद्रां भार्य्यां विवर्जयेत् १३
पाणिर्ग्राह्यः सवर्णासु गृह्णीयात्क्षत्रिया शरम्
वैश्या प्रतोदमादद्याद्वेदने त्वग्रजन्मनः १४
सा भार्य्या या वहेदग्निं सा भार्य्या या पतिव्रता
सा भार्य्या या पतिप्राणा सा भार्य्या या प्रजावती १४
लालनीया सदा भार्य्या ताडनीया तथैव च
लालिता ताडिता चैव स्त्री श्रीर्भवति नान्यथा १५
इति शाङ्खीये धर्मशास्त्रे चतुर्थोऽध्यायः

पञ्चमोऽध्यायः

पंचमहायज्ञाः गृहाश्रमिणांप्रशंसा अतिथिवर्णनम्

पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्करः
कण्डनी चोदकुम्भश्च तस्य पापस्य शान्तये १
पञ्चयज्ञविधानञ्च गृही नित्यं न हापयेत्
पञ्चयज्ञविधानेन तत्पापं तस्य नश्यति २
देवयज्ञो भूतयज्ञः पितृयज्ञस्तथैव च
ब्रह्मयज्ञो नृयज्ञश्च पञ्च यज्ञाः प्रकीर्तिताः ३

होमो दैवोवलिर्भौतः पित्र्यः पिण्डक्रियास्मृतः
स्वाध्यायो ब्रह्मयज्ञश्च नृयज्ञोऽतिथिपूजनम् ४
वानप्रस्थो ब्रह्मचारी यतिश्चैव तथा द्विजः
गृहस्थस्य प्रसादेन जीवन्त्येते यथाविधि ५
गृहस्थ एव यजते गृहस्थस्तप्यते तपः
दाता चैव गृहस्थः स्यात्तस्माच्छ्रेष्ठो गृहाश्रमी ६
यथा भर्ता प्रभुः स्त्रीणां वर्णानां ब्राह्मणो यथा
अतिथिस्तद्वदेवास्य गृहरथस्य प्रभुः स्मृतः ७
न व्रतैर्नोपवासैश्च धर्मेण विविधेन च
नारी स्वर्गमवाप्नोति प्राप्नोति पतिपूजनात् ८
न स्नानेन न होमेन नैवाग्नितर्पणात्
ब्रह्मचारी दिवं याति स याति गुरुपूजनात् ९
नाग्निशुश्रूषया क्षान्त्या स्नानेन विविधेन च
वानप्रस्थो दिवं याति याति भोजनवर्जनात् १०
न भैक्षैर्न च मौनेन शून्यागाराश्रयेण च
योगो सिद्धिमवाप्नोति यथा मैथुनवर्जनात् ११
न यज्ञैर्दक्षिणाभिश्च वह्निशुश्रूषया न च
गृही स्वर्गमवाप्नोति तथा चातिथिपूजनात् १२
तस्मात् सर्वप्रयत्नेन गृहस्थोऽतिथिमागतम्
आहारशयनाद्येन विधिवत्परिपूजयेत् १३
सायं प्रातश्च जुहुयादग्निहोत्रं यथाविधि
दर्शश्च पौर्णमासश्च जुहुयाच्च यथाविधि १४
यज्ञैर्वा पशुबन्धैश्च चातुर्मास्यैस्तथैव च
त्रैवार्षिकाधिकान्नेन पिबेत्सोममतन्द्रितः १५
इष्टिं वैश्वानरीं कुर्य्यात्तथा चाल्पधनो द्विजः
न भिक्षेत धनं शूद्रात्सर्व्वं दद्यादभीप्सितम् १६

वृत्तिन्तु न त्यजेद्विद्वानृत्विजं पूर्वमेव तु
कर्मणा जन्मना शुद्धं विद्यात्पात्रं वलीततम् १७
एतैरेव गुणैर्युक्तं धर्मार्जितधनं तथा
याजयेत्तु सदा विप्रो ग्राह्यस्तस्मात् प्रतिग्रहः १८
इति शाङ्खीये धर्मशास्त्रे पञ्चमोऽध्यायः

षष्ठोऽध्यायः

अथवानप्रस्थधर्मनिरूपणं सन्यासधर्मप्रकरणञ्च

गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः
अपत्यस्यैव चापत्यं तदाऽरण्यं समाश्रयेत् १
पुत्रेषु दारान्निक्षिप्य तया वाऽनुगतो वनम्
अग्नीनुपचरेन्नित्यं वन्यमाहारमाहरेत् २
यदाहारो भवेत्तेन पूजयेत्पितृदेवताः
तेनैव पूजयेन्नित्यमतिथिं समुपागतम् ३
ग्रामादाहृत्य चाश्नीयादष्टौ ग्रासान्समाहितः
स्वाध्यायञ्च सदा कुर्य्याज्जटाश्च विभृयात्तथा ४
तपसा शोषयेन्नित्यं स्वयञ्चैव कलेवरम्
आर्द्रवासास्तु हेमन्ते ग्रीष्मे पञ्चतपास्तथा ५
प्रावृष्याकाशशायी स्यान्नक्ताशी च सदा भवेत्
चतुर्थकालिको वास्यात्स्यात्षष्ठकालिक एव वा ६
कृच्छ्रैर्वाऽपि नयेत्कालं ब्रह्मचर्य्यञ्च पालयेत्
एवं नीत्वा वने कालं द्विजो ब्रह्माश्रमी भवेत् ७
इति शाङ्खीये धर्मशास्त्रे षष्ठोऽध्यायः

सप्तमोऽध्यायः

अथप्राणायामलक्षणंधारणध्यानयोगनिरूपणवर्णनम्

कृत्वेष्टिं विधिवत्पश्चात् सर्ववेदसदक्षिणाम्
आत्मन्यग्नीन्समारोप्य द्विजो ब्रह्माश्रमी भवेत् १
विधूमे न्यस्तमुसले व्यङ्गारे भुक्तवजने
अतीते पादसम्पाते नित्यं भिक्षां यतिश्चरेत् २
सनागारांश्चरेद्भैक्ष्यं भिक्षितं नानुभिक्षयेत्
न व्यथेत तथाऽलाभे यथा लब्धेन वर्तयेत्
नाऽऽस्वादयेत्तथैवान्नं नाश्नीयात्कस्यचिद्गृहे ३
मृण्मयालावुपात्राणि यतीनान्तु विनिर्दिशेत्
तेषां सम्मार्जनाच्छुद्धिरद्भिश्चैव प्रकीर्तिता ४
कौपीनाच्छादनं वासो विभृयादसखश्चरन्
शून्यागारनिकेतः स्याद्यत्र सायं गृहो मुनिः ५
दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत्
सत्त्यपूतां वदेद्वाचं मनःपूतं समाचरेत् ६
चन्दनैर्लिप्यतेऽङ्गं वा भस्मचूर्णैर्विगर्हितैः
कल्याणमप्यकल्याणं तयोरेव न संश्रयेत् ७
सर्वभूतहितो मैत्रः समलोष्ट्राश्मकाञ्चनः
ध्यानयोगरतो नित्यं भिक्षुर्यायात्परां गतिम् ८
जन्मना यस्तु निर्विण्णो मन्यते च तथैव च
आधिभिर्व्याधिभिश्चैव तं देवा ब्राह्मणं विदुः ९
अशुचित्वं शरीरस्य प्रियस्य च विपर्य्ययः
गर्भवासे च वसतिस्तस्मान्मुच्येत नान्यथा १०
जगदेतन्निराक्रन्दं न तु सारमनर्थकम्
भोक्तव्यमिति निर्विण्णो मुच्यते नात्र संशयः ११
प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्विषम्
प्रत्याहारैरसत्सङ्गान् ध्यानेनानैश्वरान्गुणान् १२
सव्याहृतिं सप्रणवां गायत्री शिरसा सह

त्रिःपठेदायतप्राणः प्राणायामः स उच्यते १३
मनसः संयमस्तज्ज्ञैर्धारणेति निगद्यते
संहारश्चेन्द्रियाणाञ्च प्रत्याहारः प्रकीर्तितः १४
हृदयस्थस्य योगेन देवदेवस्य दर्शनम्
ध्यानं प्रोक्तं प्रवक्षामि सर्वस्माद्योगतः शुभम् १५
हृदिस्था देवताः सर्वा हृदि प्राणः प्रतिष्ठिताः
हृदि ज्योतींषि भूयश्च हृदि सर्वं प्रतिष्टितम् १६
स्वदेहमरणिं कृत्वा प्रणवञ्चोत्तरारणिम्
ध्याननिर्मथनाभ्यान्तु विष्णुं पश्येद्धृदिस्थितम् १७
हृद्यर्कश्चन्द्रमाः सूर्य्यः सोमो मध्ये हुताशनः
तेजोमध्ये स्थितं तत्त्वं तत्त्वमध्ये स्थितोऽच्युतः १८
अणोरणीयान्महतो महीयानात्मास्य जन्तोर्न्निहितो गुहायाम्
तेजोमयं पश्यति वीतशोको धातुः प्रसादान्महिमानमात्मनः १९
वासुदेवस्तमोऽन्धानां प्रत्यक्षो नैव जायते
अज्ञानपटसंवीतैरिन्द्रियैर्विषयेप्सुभिः २०
एष वै पुरुषोविष्णुर्व्यक्ताव्यक्तः सनातनः
एव धाता विधाता च पुराणो निष्कलः शिवः २१
वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्
मन्त्रैर्विदित्वा न विभेति मृत्योर्नान्यः पन्थाविद्यतेऽयनाय २२
पृथिव्यापस्तथा तेजोवायुराकाशमेव च
पञ्चमानि विजानीयान्महाभूतानि पण्डितः २३
चक्षुः श्रोत्रे स्पर्शनञ्च रसना घ्राणमेव च
बुद्धीन्द्रियाणि ज्ञानीयात्पञ्चमानि शरीरके २४
शब्दो रूपं तथा स्पर्शो रसो गन्धस्तथैव च
इन्द्रियस्थान् विजानीयात्पञ्चैव विषयान् बुधः २५
हस्तौ पादावुपस्थञ्च जिह्वा पायुस्तथैव च

कर्मेन्द्रियाणि पञ्चैव नित्यं सति शरीरके २६
मनो बुद्धिस्तथैवाऽऽत्मा व्यक्ताव्यक्तं तथैव च
इन्द्रियेभ्यः पराणीह चत्वारि प्रवराणि च
चतुर्विंशत्यथैतानि तत्त्वानि कथितानि च
तथाऽऽत्मानं तद्व्यतीतं पुरुषं पञ्चविंशकम्
तन्तु ज्ञात्वा विमुच्यन्ते ये जनाः साधुवृत्तयः २८
इदन्तु परमं शुद्धमेतदक्षरमुत्तमम्
अशब्दरसमस्पर्शमरूपं गन्धवर्जितम् २९
निर्दुःखमसुखं शुद्धं तद्विष्णोः परमं पदम्
अजं निरञ्जनं शान्तमव्यक्तं ध्रुवमक्षरम्
अनादिनिधनं ब्रह्म तद्विष्णोः परमं पदम्
विज्ञानसारथिर्यस्तु मनःप्रग्रहबन्धनः ३०
सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्
बालाग्रशतशो भागः कल्पितस्तु सहस्रधा ३१
तस्यापि शतशो भागाज्जीवः सूक्ष्म उदाहृतः ३२
इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः
मनसस्तु परा बुद्धिर्बुद्धेरात्मा तथा परः
महतः परमव्यक्तमव्यक्तात्पुरुषः परः
पुरुषान्नं परं किञ्चित्सा काष्ठा सा परा गतिः ३३
एषु सर्वेषु भूतेषु तिष्ठत्यविरलः सदा
दृश्यते त्वग्र्यया बुध्या सूक्ष्मया सूक्ष्मदर्शिभिः ३४
इति शाङ्खीये धर्मशास्त्रे सप्तमोऽध्यायः

## अष्टमोऽध्यायः

### अथनित्यनैमित्तिकादिस्नानानां लक्षणवर्णनम्

नित्यं नैमित्तिकं कामं क्रियाङ्गं मलकर्षणम्

क्रियास्नानं तथा षष्ठं षोढा स्नानं प्रकीर्तितम् १
अस्नातः पुनरानर्हो जप्याग्निहवनादिषु
प्रातःस्नानं तदर्थं च नित्यस्नानं प्रकीर्तितम् २
चण्डालशवयूपाद्यं स्पृष्ट्वा स्नानं रजस्वलाम्
स्नानानर्हस्तु यः स्नाति स्नानं नैमित्तिकं च तत् ३
पुष्यस्नानादिकं स्नानं दैवज्ञविधिचोदितम्
तद्धि काम्यं समुद्दिष्टं नाकामस्तत्प्रयोजयेत् ४
जप्तुकामः पवित्राणि अर्चिष्यन्देवताः पितृन्
स्नानं समाचरेद्यस्तु क्रियाङ्गं तत्प्रकीर्तितम् ५
मलापकर्षणार्थं तु स्नानमभ्यङ्गपूर्वकम्
मलापकर्षणार्थाय प्रवृत्तिस्तस्य नान्यथा ६
सरित्सु देवखातेषु तीर्थेषु च नदीषु च
क्रियास्नानं समुद्दिष्टं स्नानं तत्र महाक्रिया ७
तत्र काम्यं तु कर्तव्यं यथावद्विधिचोदितम्
नित्यं नैमित्तिकं चैव क्रियाङ्गं मलकर्षणम् ८
तीर्थाभावे तु कर्तव्यमुष्णोदकपरोदकैः
स्नानं तु वह्नितप्तेन तथैव परवारिणा ९
शरीरशुद्धिर्विज्ञेया न तु स्नानफलं लभेत्
अद्भिर्गात्राणि शुध्यन्ति तीर्थस्नानात्फलं लभेत् १०
सरःसु देवखातेषु तीर्थेषु च नदीषु च
स्नानमेव क्रिया तस्मात्स्नानात्पुण्यफलं स्मृतम् ११
तीर्थं प्राप्यानुषङ्गेण स्नानं तीर्थे समाचरेत्
स्नानजं फलमाप्नोति तीर्थयात्राफलं न तु १२
सर्वतीर्थानि पुण्यानि पापघ्नानि सदा नृणाम्
परस्परानपेक्षाणि कथितानि मनीषिभिः १३
सर्वे प्रस्रवणाः पुण्याः सरांसि च शिलोच्चयाः

नद्यः पुरायास्तथा सर्वा जाह्नवी तु विशेषतः १४
यस्य पादौ च हस्तौ च मनश्चैव सुसंयतम्
विद्या तपश्च कीर्तिश्च स तीर्थफलमश्नुते १५
नृणां पापकृतां तीर्थे पापस्य शमनं भवेत्
यथोक्तफलदं तीर्थं भवेच्छुद्धात्मनां नृणाम् १६
इति शाङ्खीये धर्मशास्त्रेऽष्टमोऽध्यायः

अथ नवमोऽध्यायः

अथ क्रियास्नानविधिवर्णनम्

क्रियास्नानं प्रवक्ष्यामि यथावद्विधिपूर्वकम्
मृद्भिरद्भिश्च कर्तव्यं शौचमादौ यथाविधि १
जले निमग्न उन्मज्य उपस्पृश्य यथाविधि
जलस्याऽऽवाहनं कुर्यात्तत्प्रवक्ष्याम्यतः परम्
तीर्थस्यावाहनं कुर्य्यात्तत्प्रवक्ष्याम्यशेषतः २
प्रपद्ये वरुणं देवमम्भसां पतिमूर्ज्जितम्
याचितं देहि मे तीर्थं सर्वपापापनुत्तये ३
तीर्थमावाहयिष्यामि सर्व्वाघविनिषूदनम्
सान्निध्यमस्मिन् स्तोये च क्रियतां मदनुग्रहात् ४
रुद्रान्प्रपद्ये वरदान् सर्व्वानप्सु पदस्तथा
सर्व्वानप्सु सदश्चैव प्रपद्ये प्रयतः स्थितः ५
देवमंशुमदं वह्नि प्रपद्येऽघनिषूदनम्
आपः पुराया पवित्राश्च प्रपद्ये शरणं तथा ६
रुद्राश्चाग्निश्च सर्पश्च वरुणस्त्वाप एव च
शमयन्त्वाशु म पापं माञ्च रक्षन्तु सर्वशः ७
इत्येवमुक्त्वा कर्तव्यस्ततः संमार्जनं जले
आपो हिष्ठेति तिसृभिर्यथावदनुपूर्वशः

हिरण्यवर्णेति तिसृभिर्जगतीति चतसृभिः
शं नो देवीति तथा शं न आपस्तथैव च  ८
इदमापः प्रवहते तथा मन्त्रमुदीरयेत्
एवं सम्मार्जनं कृत्वा च्छन्दआर्षञ्च देवताः  ९
एवं मन्त्रान्समुच्चार्य च्छन्दांसि ऋषिदेवताः
अघमर्षणसूक्तञ्च प्रपठेत् प्रयतः सदा
छन्दोऽनुष्टुप् च तस्यैव ऋषिश्चैवाघमर्षणः
देवता भाववृत्तश्च पापक्षये प्रकीर्तितः  ११
ततोऽम्भसि निमग्नः स्यात्त्रिः पठेदघमर्षणम्
प्रपद्यान्मूर्द्धनि तथा महाव्याहृतिभिर्जलम्  १२
यथाश्वमेधः क्रतुराट् सर्वपापापनोदनः
तथाऽघमर्षणं सूक्तं सर्वपापप्रणाशनम्  १३
अनेन विधिना स्नात्वा स्नातवान् धौतवाससा
परिवर्जितवासास्तु तीर्थनामानि संजपेत्  १४
उदकस्याप्रदानात्तु स्नानशाटीं न पीडयेत्
अनेन विधिना स्नातस्तीर्थस्य फलमश्नुते  १५
इति शाङ्खे धर्मशास्त्रे नवमोऽध्यायः

अथ दशमोऽध्यायः

अथाचमनविधिवर्णनम्

अतः परं प्रवक्ष्यामि शुभामाचननक्रियाम्
कायं कनिष्ठिकामूले तीर्थमुक्तं मनीषिभिः  १
अङ्गुष्ठमूले च तथा प्राजापत्यं विचक्षणैः
अङ्गुल्यग्रे स्मृतं दिव्यं पित्र्यं तर्जनिमूलकम्  २
प्राजापत्येन तीर्थेन त्रिः प्राश्नीयाज्जलं द्विजः
द्विः प्रमृज्य मुखं पश्चात्खान्यद्भिः समुपस्पृशेत्  ३

हृद्गाभिः पूयते विप्रः कण्ठगाभिस्तु भूमिपः
तालुगाभिस्तथा वैश्यः शूद्रः स्पृष्टाभिरन्ततः ४
अन्तजार्नुः शुचौ देशे प्राङ्मुखः सुसमाहितः
उदङ्मुखो वा प्रयतो दिशश्चानवलोकयम् ५
अद्भिः समुद्धृताभिस्तु हीनाभिः फेनबुद्बुदैः
वह्निना चाप्यतपाभिरक्षाराभिरुपस्पृशेत् ६
तर्जन्यङ्गुष्ठयोगेन स्पृशेन्नासापुटद्वयम्
अङ्गुष्ठमव्यायोगेन स्पृशेन्नत्रद्वयं ततः ७
अङ्गुष्ठानामिकाभ्यां तु श्रवणौ समुपस्पृशेत्
कनिष्ठाङ्गुष्ठयोगेन स्पृशेत्स्कन्धद्वयं ततः ८
सर्वासामेव योगेन नाभिं च हृदयं तथा
संस्पृशेच्च तथा मूर्ध्नि एष आचमने विधिः ९
त्रिः प्राश्नीयाद्यदम्भस्तु प्रीतास्तेनास्य देवताः
ब्रह्मा विष्णुश्च रुद्रश्च भवन्तीत्यनुशुश्रुम १०
गङ्गा च यमुना चैव प्रीयेते परिमार्जनात्
नासत्यदस्त्रौ प्रीयेते स्पृष्टे नासापुटद्वये ११
स्पृष्टे लोचनयुग्मे तु प्रीयेते शशिभास्करौ
कर्णयुग्मे तथा स्पृष्टे प्रीयेते अनिलानलौ १२
स्कन्धयाः स्पर्शनादश्य प्रीयन्ते सर्वदेवताः
मूर्ध्नः संस्पर्शनादस्य प्रीतस्तु पुरुषो भवेत् १३
विना यज्ञोपवीतेन तथा मुक्तशिखो द्विजः
अप्रक्षालितपादस्तु आचान्तोऽप्यशुचिर्भवेत् १४
बहिर्जानुरुपस्पृश्य एकहस्तार्पितैर्जलैः
सोपानत्कस्तथा तिष्ठन्नैव शुद्धिमवाप्नुयात् १५
आचम्य च पुराप्रोक्तं तीर्थसंमार्जनं तु यत्
उपस्पृशेत्ततः पश्चान्मन्त्रेणानेन धर्मतः १६

अन्तश्चरति भूतेषु गुहायां विश्वतोमुखः
त्वं यज्ञस्त्वं वषट्कार आपो ज्योती रसोऽमृतम् १७
आचम्य च ततः पश्चादादित्याभिमुखो जलम्
उदु त्यं जातवेदसमिति मन्त्रेण निक्षिपेत् १८
एष एव विधिः प्रोक्तः संध्ययोश्च द्विजातिषु
पूर्वां संध्यां जपंस्तिष्ठेदासीनः पश्चिमांस्तथा १९
ततो जपेत्पवित्राणि पवित्रं वाऽथ शक्तितः
ऋषयो दीर्घसंध्यत्वाद्दीर्घमायुरवाप्नुयुः २०
सर्ववेदपवित्राणि वक्ष्याम्यहमतः परम्
येषां जपैश्च होमैश्च पूयन्ते मानवाः सदा २१
इति शाङ्खे धर्मशास्त्रे दशमोऽध्यायः

अथ एकादशोऽध्यायः
अथाघमर्षणविधिवर्णनम्

अघमर्षणं देवकृतं शुद्धवत्यस्तरत्समाः
कूष्माण्डचः पावमान्यश्च सावित्र्यश्च तथैव च १
त्र्यभिष्टं द्रुपदा चैव स्तोमानि व्याहृतिस्तथा
भारुण्डानि च सामानि गायत्री चौशनं तथा २
पुरुषव्रतं च भाषं च तथा सोमव्रतानि च
अब्लिङ्गं बार्हस्पत्यं च वाक्सूत्रममृतं तथा ३
शतरुद्रीयमथर्वशिरस्त्रिसुपर्णं महाव्रतम्
गे सूक्तमश्वसूक्तं च इन्द्रसूक्तं च सामनी ४
त्रीण्याज्यदोहानि रथंतरं च अग्निव्रतं वामदेवव्रतं च
एतानि गीतानि पुनन्तिजन्तूञ्जातिस्मरत्वं लभते यदीच्छेत् ५
इति शाङ्खे धर्मशास्त्रे एकादशोऽध्यायः

## द्वादशोऽध्यायः

## अथ गायत्रीजपविधिवर्णनम्

इति वेदपवित्राण्यभिहितानि एभ्यः सावित्री विशिष्यते १ नास्त्यघमर्षणात्परमन्तर्जले २ न सावित्र्या समं जप्यं न व्याहृतिसमं हुतम् ३ कुशमय्यामासीनः कुशोत्तरीयवान्कुशपवित्रपाणिः प्राङ्मुखः सूर्याभिमुखो वाऽक्षमालामुपादाय देवताध्यायी जपं कुर्यात् ४ सुवर्णमणिभुक्तास्फटिकपद्माक्षरुद्राक्षपुत्रजीवकानामन्यतमेनाऽऽदाय मालां कुर्यात् ५ कुशग्रन्थिं कृत्वा वामहस्तोपयमैर्वा गणयेत् ६ आदौ देवता ऋषिच्छन्दः स्मरेत् ७ ततः सप्रणवां सव्याहृतिकामादावन्ते च शिरसा गायत्रीमावर्तयेत् अथास्याः सविता देवता ऋषिर्विश्वामित्रो गायत्री छन्दः ९ ॐकारः प्रणवाख्यः १०

ॐभूः ॐभुवः ॐस्वः ॐमहः ॐजनः ॐतपः ॐसत्यमिति व्याहृतयः ११ ओमापो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवः स्वरोमिति शिरः १२ भवन्ति चात्र श्लोकाः १३

सव्याहृतिकां सप्रणवां गायत्रीं शिरसा सह
ये जपन्ति सदा तेषां न भयं विद्यते क्वचित् १४
शतं जप्त्वा तु सा देवी दिनपापप्रणाशिनी
सहस्रं जप्त्वा तु तथा पातकेभ्यः समुद्धरेत् १५
दशसहस्रं जप्त्वा तु सर्वकल्मषनाशिनी
सुवर्णस्तेयकृद्विप्रो ब्रह्महा गुरुतल्पगः १६
सुरापश्च विशुध्येत लक्षजाप्यान्न संशयः
प्राणायामत्रयं कृत्वा स्नानकाले समाहितः १७
अहोरात्रकृतात्पापात्तत्क्षणादेव मुच्यते
सव्याहृतिकाः सप्रणवाः प्राणायामास्तु षोडश १८
अपि भ्रूणहनं मासात्पुनन्त्यहरहः कृताः
हुता देवी विशेषेण सर्वकामप्रदायिनी १९

सर्वपापक्षयकरी वरदा भक्तवत्सला
शान्तिकामस्तु जुहुयात्सावित्रीमक्षतैः शुचिः २०
हन्तुकामोऽपमृत्युं च घृतेन जुहुयात्तथा
श्रीकामस्तु तथा पद्मैर्बिल्वैः काञ्चनकामुकः २१
ब्रह्मवर्चसकामस्तु पयसा जुहुयात्तथा
घृतप्लुतैस्तिलैर्वह्निं जुहुयात्सुसमाहितः २२
गायत्र्ययुतहोमाच्च सर्वपापैः प्रमुच्यते
पापात्मा लक्षहोमेन पातकेभ्यः प्रमुच्यते २३
अभीष्टं लोकमाप्नोति प्राप्नुयात्काममीप्सितम्
गायत्री वेदजननी गायत्री पापनाशिनी २४
गायत्र्या परमं नास्ति दिवि चेह च पावनम्
हस्तत्राणप्रदा देवी पततां नरकार्णवे २५
तस्मात्तामभ्यसेन्नित्यं ब्राह्मणो नियतः शुचिः
गायत्रीजाप्यनिरतं हव्यकव्येषु भोजयेत् २६
तस्मिन्न तिष्ठते पापमब्बिन्दुरिव पुष्करे २७
जपेनैव तु संसिध्येद्ब्राह्मणो नात्र संशयः
कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते २८
उपांशु स्याच्छतगुणः साहस्रो मानसः स्मृतः
नोच्चैर्जपं बुधः कुर्यात्सावित्र्यास्तु विशेषतः २९
सावित्रीजाप्यनिरतः स्वर्गमाप्नोति मानवः
गायत्रीजप्यनिरतो मोक्षोपायं च विन्दति ३०
तस्मात्सर्वप्रयत्नेन स्नातः प्रयतमानसः
गायत्रीं तु जपेद्भक्त्या सर्वपापप्रणाशिनीम् ३१
इति शाङ्खे धर्मशास्त्रे द्वादशोऽध्यायः

# त्रयोदशोऽध्यायः
## अथ तर्पणविधिवर्णनम्

स्नातः कृतजप्यस्तदनु प्राङ्मुखो
दिव्येन तीर्थेन देवानुदकेन तर्पयेत् १
अथ तर्पणविधिः २
ॐ भगवन्तं शेषं तर्पयामि ३
कालाग्निरुद्रं तु ततो रुक्मभौमं तथैव च
श्वेतभौमं ततः प्रोक्तं पातालानां च सप्तकम् ४
जम्बूद्वीपं ततः प्रोक्तं शाकद्वीपं ततः परम्
गोमेदपुष्करे तद्वच्छाकाख्यं च ततः परम् ५
शार्वरं ततः स्वधामानं ततो हिरण्यरोमाणं
ततः कल्पस्थायिनो लोकांस्तर्पयेत् ६
लवणोदकं ततः क्षीरोदं ततो घृतोदं तत इक्षूदं ततः स्वादूदं तत इति सप्तसमुद्रकं प्रत्यृचं पुरुषसूक्तेनोदकाञ्जलीन्दद्यात् पुष्पाणि च तथा भक्त्या ७ अथ कृतापसव्योदक्षिणामुखोऽन्तर्जानुः पित्र्येण पितृणां यथाश्राद्धं प्रकाममुदकं दद्यात् ८ सौवर्णेन पात्रेण राजतेनौदुम्बरेण खड्गपात्रेणान्य पात्रेण वोदकं पितृतीर्थं स्पृशन्दद्यात् ९ पित्रे पितामहाय प्रपितामहाय मात्रे पितामह्यै प्रपितामह्यं मातामहाय प्रमातः महाय मात्रे मातामह्यै प्रमातामह्यै सप्तमात्पुरुषात्पितृपक्षे यावतां नाम जानीयात्पितृपक्षाणां तर्पणं कृत्वा गुरूणां मातृपक्षाणां तर्पणं कुर्यात् १० मातृपक्षाणां तर्पणं कृत्वा संबन्धिबान्धवानां कुर्यात् तेषां कृत्वा सुहृदां कुर्यात् ११ भवन्ति चात्र श्लोकाः १२
विना रौप्यसुवर्णेन विना ताम्रतिलेन च
विना दर्भैश्च मन्त्रैश्च पितृणां नोपतिष्ठते १३
सौवर्णराजताभ्यां च खड्गेनौदुम्बरेण च
दत्तमक्षय्यतां याति पितृणां तु तिलोदकम् १४

हेम्ना तु सह यद्दत्तं क्षीरेण मधुना सह
तदप्यक्षय्यतां याति पितृणां तु तिलोदकम्  १५
कुर्यादहरहः श्राद्धमन्नाद्येनोदकेन वा
पयोमूलफलैर्वाऽपि पितृणां प्रीतिमाहवन्  १६
स्नातः संतर्पणं कृत्वा पितृणां तु तिलाम्भसा
पितृयज्ञमवाप्नोति प्रीणाति च पितृंस्तथा  १७
इति शाङ्खे धर्मशास्त्रे त्रयोदशोऽध्यायः

अथ चतुर्दशोऽध्यायः
अथ श्राद्धे ब्राह्मणपरीक्षावर्णनम्

ब्राह्मणान्न परीक्षेत दैवे कर्मणि धर्मवित्
पित्र्ये कर्मणि संप्राप्ते युक्तमाहुः परीक्षणम्  १
ब्राह्मणा ये विकर्मस्था बैडालव्रतिकास्तथा
ऊनाङ्गा अतिरिक्ताङ्गा ब्राह्मणाः पङ्क्तिदूषकाः  २
गुरूणां प्रतिकूलाश्च वेदाग्न्युत्सादिनश्च ये
गुरूणां त्यागिनश्चैव ब्राह्मणाः पङ्क्तिदूषकाः  ३
अनध्यायेष्वधीयानाः शौचाचारविवर्जिताः
शूद्रान्नरससंपुष्टा ब्राह्मणा पङ्क्तिदूषकाः  ४
षडङ्गवित्त्रिसुपर्णो बह्वृचो ज्येष्ठसामगः
त्रिणाचिकेतः पञ्चाग्निर्ब्राह्मणाः पङ्क्तिपावनाः  ५
ब्रह्मदेयानुसंतानो ब्रह्मदेयाप्रदायकः
ब्रह्मदेयापतिर्यश्च ब्राह्मणाः पङ्क्ति पावनाः  ६
ऋग्यजुःपारगो यश्च साम्नां यश्चापि पारगः
अथर्वाङ्गिरसोऽध्येता ब्राह्मणः पङ्क्तिपावनः  ७
नित्यं योगरतो विद्वान्समलोष्टाश्मकाञ्चनः
ध्यानशीलो यतिर्विद्वान्ब्राह्मणः पङ्क्तिपावनः  ८

द्वौदैवे प्राङ्मुखौ त्रीन्वा पित्र्ये चोदङ्मुखांस्तथा
भोजयेद्विविधान्विप्रानेकैकमुभयत्र वा  ९
भोजयेदथवाऽप्येकं ब्राह्मणं पङ्क्तिपावनम्
दैवे कृत्वा तु नैवेद्यं पश्चाद्वह्नौ तु तत्क्षिपेत्  १०
उच्छिष्टसंनिधौ कार्यं पिण्डनिर्वपणं बुधैः
अभावे च तथाकार्यमग्निकार्यं यथाविधि  ११
श्राद्धं कृत्वा प्रयत्नेन त्वराक्रोधविवर्जितः
उष्णमन्नं द्विजातिभ्यः श्रद्धया विनिवेदयेत्  १२
अन्यत्र पुष्पमूलेभ्यः पीठकेभ्यश्च पण्डितः
भोजयेद्विविधान्विप्रान्गन्धमाल्यसमुज्ज्वलान्  १३
यत्किंचित्पच्यते गेहे भक्ष्यं वा भोज्यमेव वा
अनिवेद्य न भोक्तव्यं पिण्डमूले कदाचन  १४
उग्रगन्धान्यगन्धानि चैत्यवृक्षभवानि च
पुष्पाणि वर्जनीयानि रक्तवर्णानि यानि च  १५
तोयोद्भवानि देयानि रक्तान्यपि विशेषतः
ऊर्णासूत्रं प्रदातव्यं कार्पासमथवा नवम्  १६
दशां विवर्जयेत्प्राज्ञो यद्यप्यहतवस्त्रजाम्
घृतेन दीपो दातव्यस्तिलतैलेन वा पुनः  १७
धूपार्थं गुग्गुलुं दद्याद्घृतयुक्तं मधूत्कटम्
चन्दनं च तथा दद्यात्पिष्ट्वा च कुङ्कुमं शुभम्  १८
भूतृणं सुरसं शिग्रुं पालकं सिन्धुकं तथा
कूष्माण्डालाबुवार्ताककोविदरांश्च वर्जयेत्  १९
पिप्पलीं मरिचं चैव तथा वै पिण्डमूलकम्
कृतं च लवणं सर्वं वंशाग्रं तु विवर्जयेत्  २०
राजमाषान्मसूरांश्च कोद्रवान्कोरदूषकान्
लोहितान्वृक्षनिर्यासान् श्राद्धकर्मणि वर्जयेत्  २१

आम्रमामलकीमिक्षं मृद्वीकादधिदाडिमान्
विदार्यश्चैव रम्भाद्या दद्याच्छ्राद्धे प्रयत्नतः २२
धानालाजे मधुयुते सक्तून्शर्करया सह
दद्याच्छ्राद्धे प्रयत्नेन शृङ्गाटकविसेतकान् २३
भोजयित्वा द्विजान्भक्त्या स्वाचान्तान्दत्तदक्षिणान्
अभिवाद्य पुनर्विप्राननुव्रज्य विसर्जयेत् २४
निमन्त्रितस्तु यः श्राद्धे मैथुनं सेवते द्विजः
श्राद्धं दत्त्वा च भुक्त्वा च युक्तः स्यान्महतैनसा २५
कालशाकं सशल्कांश्च मांसं वाध्रीणसस्य च
खड्गमांसं तथाऽनन्तं यमः प्रोवाच धर्मवित् २६
यद्ददाति गयाक्षेत्रे प्रभासे पुष्करे तथा
प्रयागे नैमिषारण्ये सर्वमानन्त्यमश्नुते २७
गङ्गायमुनयोस्तीरे पयोष्ण्याभरकण्टके
नर्मदायां गयातीरे सर्वमानन्त्यमुच्यते २८
वाराणस्यां कुरुक्षेत्रे भृगुतुङ्गे महालये
सप्तवेण्यृषि कूपे च तदप्यक्षय्यमुच्यते २९
म्लेच्छदेशे तथा रात्रौ संध्यायां च विशेषतः
न श्राद्धमाचरेत्प्राज्ञो म्लेच्छदेशे न च व्रजेत् ३०
हस्तिच्छायासु यद्दत्तं यद्दत्तं राहुदर्शने
विषुवत्ययने चैव सर्वमानन्त्यमुच्यते ३१
प्रोष्ठपद्यामतीतायां मघायुक्तां त्रयोदशीम्
प्राप्य श्राद्धं तु कर्तव्यं मधुना पायसेन वा ३२
प्रजां पुष्टिं यशः स्वर्गमारोग्यं च धनं तथा
नृणां श्राद्धैः सदा प्रीताः प्रयच्छन्ति पितामहाः ३३
इति शाङ्खे धर्मशास्त्रे चतुर्दशोऽध्यायः

## पञ्चदशोऽध्यायः

## अथ जननमरणाशौचवर्णनम्

जनने मरणे चैव सपिण्डानां द्विजोत्तमः
त्र्यहाच्छुद्धिमवाप्नोति योऽग्निवेदसमन्वितः १
सपिण्डता तु पुरुषे सप्तमे विनिवर्तते
नामधारकविप्रस्तु दशाहेन विशुध्यति २
क्षत्रियो द्वादशाहेन वैश्यः पक्षेण शुध्यति
मासेन तु तथा शूद्रः शुद्धिमाप्नोति नान्तरा ३
रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुध्यति
अजातदन्तबाले तु सद्यः शौचं विधीयते ४
अहोरात्रात्तथा शुद्धिर्बाले त्वकृतचूडके
तथैवानुपनीते तु त्र्यहाच्छुध्यन्ति बान्धवाः ५
अनूढानां तु कन्यायां तथैव शूद्रजन्मनाम्
अनूढभार्यः शूद्रस्तु षोडशाद्वत्सरात्परम् ६
मृत्युं समधिगच्छेच्चेन्मासात्तस्यापि बान्धवाः
शुद्धिं समभिगच्छेयुर्नात्र कार्या विचारणा ७
पितृवेश्मनि या कन्या रजः पश्यत्यसंस्कृता
तस्यां मृतायां नाशौचं कदाचिदपि शाम्यति ८
हीनवर्णा तु या नारी प्रमादात्प्रसवं व्रजेत्
प्रसवे मरणे तज्ज्ञमाशौचं नोपशाम्यति ९
समानं खल्वशौचं तु प्रथमेन समापयेत्
असमानं द्वितीयेन धर्मराजवचो यथा १०
देशान्तरगतः श्रुत्वा कुल्यानां मरणोद्भवौ
यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत् ११
अतीते दशरात्रे तु त्रिरात्रमशुचिर्भवेत्
तथा संवत्सरेऽतीते स्नान एव विशुध्यति १२

अनौरसेषु पुत्रेषु भार्यास्वन्यगतासु च
परपूर्वासु च स्त्रीषु त्र्यहाच्छुद्धिरिहेष्यते १३
मातामहे व्यतीते तु आचार्ये च तथा मृते
गृहे दत्तासु कन्यासु मृतासु च त्र्यहस्तथा १४
निवासराजनि प्रेते जाते दौहित्रके गृहे
आचार्यपत्नीपुत्रेषु प्रेतेषु दिवसेन च १५
मातुले पक्षिणीं रात्रिं शिष्यर्त्विग्बान्धवेषु च
सब्रह्मचारिण्येकाहमनूचाने तथा मृते १६
एकरात्रं त्रिरात्रं च षड्रात्रं मासमेव च
शूद्रे सपिण्डे वर्णानामाशौचं क्रमशः स्मृतम् १७
त्रिरात्रमथ षड्रात्रं पक्षं मासं तथैव च
वैश्ये सपिण्डे वर्णानामाशौचं क्रमशः स्मृतम् १८
सपिण्डे क्षत्रिये शुद्धिः षड्रात्रं ब्राह्मणस्य तु
वर्णानां परिशिष्टानां द्वादशाहं विनिर्दिशेत् १९
सपिण्डे ब्राह्मणे वर्णाः सर्व एवाविशेषतः
दशरात्रेण शुध्येयुरित्याह भगवान्यमः २०
भृग्वग्न्यनशनाम्भोभिर्मृतानामात्मघातिनाम्
पतितानां च नाशौचं शस्त्रविद्युद्धताश्च ये २१
यतिव्रतिब्रह्मचारिनृपकारुकदीक्षिताः
नाशौचभाजः कथिता राजाज्ञाकारिणश्च ये २२
यस्तु भुङ्क्ते पराशौचे वर्णी सोऽप्यशुचिर्भवेत्
अशौचशुद्धौ शुद्धिश्च तस्याप्युक्ता मनीषिभिः २३
पराशौचे नरो भुक्त्वा कृमियोनौ प्रजायते
भुक्त्वाऽन्नं म्रियते यस्य तस्य योनौ प्रजायते २४
दानं प्रतिग्रहो होमः स्वाध्यायः पितृकर्म च
प्रेतपिण्डक्रियावर्जमाशौचे विनिवर्तते २५

इति शाङ्खे धर्मशास्त्रे पञ्चदशोऽध्यायः

अथ षोडशोऽध्यायः

अथद्रव्यशुद्धिः मृरामयादिपात्रशुद्धिवर्णनम्

मृरामयं भाजनं सर्वं पुनः पाकेन शुध्यति
मद्यैर्मूत्रैः पुरीषैश्च ष्ठीवनैः पूयशोणितैः १
संस्पृष्टं नैव शुध्येत पुनः पाकेन मृरामयम्
एतैरेव तथा स्पृष्टं ताम्रसौवर्नराजतम् २
शुध्यत्यावर्तितं पश्चादन्यथा केवलाम्भसा
आम्लोदकेन ताम्रस्य सीसस्य त्रपुणस्तथा ३
क्षारेण शुद्धिः कांसस्य लोहस्य च विनिर्दिशेत्
मुक्तामणिप्रवालानां शुद्धिः प्रक्षालनेन तु ४
अब्जानां चैव भाराडानां सर्वस्याश्ममयस्य च
शाकवर्जं मूलफलविदलानां तथैव च ५
मार्जनाद्यज्ञपात्राणां पाणिना यज्ञकर्मणि
उष्णाम्भसा तथा शुद्धिं सस्नेहानां विनिर्दिशेत् ६
शयनासनयानानां स्फ्यशूर्पशकटस्य च
शुद्धिः संप्रोक्षणाद्यज्ञे कटमिन्धनयोस्तथा ७
मार्जनाद्वेश्मनां शुद्धिः क्षितेः शोधस्तु तत्क्षणात्
संमार्जितेन तोयेन वाससां शुद्धिरिष्यते ८
बहूनां प्रोक्षणाच्छुद्धिर्धान्यादीनां विनिर्दिशेत्
प्रोक्षणात्संहतानां च दारवाणां च तत्क्षणात् ९
सिद्धार्थकानां कल्केन शृङ्गदन्तमयस्य च
गोवालैः फलपात्राणामस्थ्नां शृङ्गवतां तथा १०
निर्यासानां गुडानां च लवणानां तथैव च
कुसुम्भकुङ्कुमानां च ऊर्णाकार्पासयोस्तथा ११

प्रोक्षणात्कथिता शुद्धिरित्याह भगवान्यमः
भूमिष्ठमुदकं शुद्धं शुचि तोयं शिलागतम्  १२
वर्णगन्धरसैर्दुष्टैर्वर्जितं यदि तद्भवेत्
शुद्धं नदीगतं तोयं सर्वदैव तथाऽऽकरः  १३
शुद्धं प्रसारितं पण्यं शुद्धे चाजाश्वयोर्मुखे
मुखवर्जं तु गौः शुद्धा मार्जारश्चाऽऽक्रमे शुचिः  १४
शय्या भार्या शिशुर्वस्त्रमुपवीतं कमण्डलुः
आत्मनः कथितं शुद्धं न शुद्धं हि परस्य च  १५
नारीणां चैव वत्सानां शकुनीनां शुनां मुखम्
रात्रौ प्रस्रवणे वृक्षे मृगयायां सदा शुचि  १६
शुद्धा भर्तुश्चतुर्थेऽह्नि स्नानेन स्त्री रजस्वला
दैवे कर्मणि पित्र्ये च पञ्चमेऽहनि शुध्यति  १७
रथ्याकर्दमतोयेन ष्ठीवनाद्येन वाऽप्यथ
नाभेरूर्ध्वं नरः स्पृष्टः सद्यः स्नानेन शुध्यति  १८
कृत्वा मूत्रं पुरीषं वा स्नात्वा भोक्तुमनास्तथा
भुक्त्वा क्षुत्वा तथा सुप्त्वा पीत्वा चाम्भोऽवगाह्य च  १९
रथ्यां वाऽऽक्रम्य वाऽऽचामेद्वासो विपरिधाय च
कृत्वा मूत्रपुरीषं च लेपगन्धापहं द्विजः  २०
उद्धृतेनाम्भसा शौचं मृदा चैव समाचरेत्
मेहने मृत्तिकाः सप्त लिङ्गे द्वे परिकीर्तिते  २१
एकस्मिन्विंशतिर्हस्ते द्वयोर्ज्ञेयाश्चतुर्दश
तिस्रस्तु मृत्तिका देयाः कृत्वा नखविशोधनम्  २२
तिस्रस्तु पादयोर्ज्ञेयाः शौचकामस्य सर्वदा
शौचमेतद्गृहस्थानां द्विगुणं ब्रह्मचारिणाम्  २३
त्रिगुणं च वनस्थानां यतीनां तु चतुर्गुणम्
मृत्तिका च विनिर्दिष्टा त्रिपर्वाऽऽपूर्यते यथा  २४

इति शाङ्खे धर्मशास्त्रे षोडशोऽध्यायः

अथ सप्तदशोऽध्यायः

अथ क्षत्रियादिवधे गवाद्यपहारे व्रतवर्णनम्

नित्यं त्रिषवणस्नायी कृत्वा प्रर्णकुटीं वने
अधःशायी जटाधारी पर्णमूलफलाशनः १
ग्रामं विशेच्च भिक्षार्थं स्वकर्म परिकीर्तयन्
एककालं समश्नीयाद्वर्षे तु द्वादशे गते २
हेमस्तेयी सुरापश्च ब्रह्महा गुरुतल्पगः
व्रतेनैतेन शुध्यन्ते महापातकिनस्त्विमे ३
यागस्थं क्षत्रियं हत्वा वेश्यं हत्वा च याजकम्
एतदेव व्रतं कुर्यादाश्रमं विनिदूषकः ४
कूटसाक्ष्यं तथैवोक्त्वा निक्षेपमपहृत्य च
एतदेव व्रतं कुर्यात्त्यक्त्वा च शरणागतम् ५
आहिताग्नेः स्त्रियं हत्वा मित्रं हत्वा तथैव च
हत्वा गर्भमविज्ञातमेतदेव व्रतं चरेत् ६
वनस्थं च द्विजं हत्वा पार्थिवं च कृतागसम्
एतदेव व्रतं कुर्याद् द्विगुणं च विशुद्धये ७
क्षत्रियस्य च पादोनं वधेऽर्धं वैश्यघातने
अर्धमेव सदा कुर्यात्स्त्रीवधे पुरुषस्तथा ८
पादं तु शूद्रहत्यायामुदक्यागमने तथा
गोवधे च तथा कुर्यात्परदारगतस्तथा ९
पशून्हत्वा तथा ग्राम्यान्मासं कृत्वा विचक्षणः
आरण्यानां बधे तद्वत्तदर्धं तु विधीयते १०
हत्वा द्विजं तथा सर्पजलेशयबिलेशयान्
सप्तरात्रं तथा कुर्याद्व्रतं ब्रह्महणस्तथा ११

अनस्थ्नां शकटं हत्वा सास्थ्नां दशशतं तथा
ब्रह्महत्याव्रतं कुर्यात्पूर्णं संवत्सरं नरः  १२
यस्य यस्य च वर्णस्य वृत्तिच्छेदं समाचरेत्
तस्य तस्य वधे प्रोक्तं प्रायश्चित्तं समाचरेत्  १३
अपहृत्ये तु वर्णानां भुवं प्राप्य प्रमादतः
प्रायश्चित्तं वधे प्रोक्तं ब्राह्मणानुमतं चरेत्  १४
गोजाश्वस्यापहरणे मणीनां रजतस्य च
जलापहरणे चैव कुर्यात्संवत्सरव्रतम्  १५
तिलानां धान्यवस्त्राणां मद्यानामामिषस्य च
संवत्सरार्धं कुर्वीत व्रतमेतत्समाहितः  १६
तृणेक्षुकाष्ठतक्राणां रसानामपहारकः
मासमेकं व्रतं कुर्याद्गन्धानां सर्पिषां तथा  १७
लवणानां गुडानां च मूलानां कुसुमस्य च
मासार्धं तु व्रतं कुर्यादेतदेव समाहितः  १८
लौहानां वैदलानां च सूत्राणां चर्मणां तथा
एकरात्रव्रतं कुर्यादेतदेव समाहितः  १९
भुक्त्वा पलाण्डुं लशुनं मद्यं च कवकानि च
नारं मलं तथा मांसं विड्वराहं खरं तथा  २०
गौधेरकुञ्जरोष्ट्रं च सवपञ्चनखं तथा
क्रव्यादं कुक्कुटं ग्राम्यं कुर्यात्संवत्सरं व्रतम्  २१
भक्ष्याः पञ्चनखास्त्वेते गोधाकच्छपशल्लकाः
खड्गश्च शशकश्चैव तान्हत्वा च चरेद्व्रतम्  २२
हंसं मद्गुं बकं काकं काकोलं खञ्जरीटकम्
मत्स्यादांश्च तथा मत्स्यान्बलाकं शुकसारिके  २३
चक्रवाकं प्लवं कोकं मण्डूकं भुजगं तथा
मासमेकं व्रतं कुर्यादेतच्चैव न भक्षयेत्  २४

राजीवान्सिंहतुण्डाश्च सशल्कांश्च तथैव च
पाठीनरोहितौ भक्ष्यौ मत्स्येषु परिकीर्तितौ २५
जलेचरांश्च जलजान्मुखाग्रनखविष्किरान्
रक्तपादाञ्जालपादान्सप्ताहं व्रतमाचरेत् २६
तित्तिरं च मयूरं च लावकं च कपिञ्जलम्
वार्ध्रीणसं वर्तकं च भक्ष्यानाह यमस्तथा २७
भुक्त्वा चोभयतोदन्तं तथैकशफदंष्ट्रिणः
तथा भुक्त्वा तु मांसं वै मासार्धं व्रतमाचरेत् २८
स्वयं मृतं वृथा मांसं माहिषं त्वाजमेव च
गोश्च क्षीरं विवत्सायाः संधिन्याश्च तथा पयः २९
संधिन्यमेध्यं भक्षित्वा पक्षं तु व्रतमाचरेत्
क्षीराणि यान्यभक्ष्याणि तद्विकाराशने बुधः ३०
सप्तरात्रं व्रतं कुर्याद्यदेतत्परिकीर्तितम्
लोहितान्वृक्षनिर्यासान्व्रश्चनप्रभवांस्तथा ३१
केवलानि च शुक्तानि तथा पर्युषितं च यत्
गुडयुक्तं तथा भुक्त्वा त्रिरात्रं च व्रती भवेत् ३२
दधि भैक्ष्यं च शुक्त्रेषु यच्चान्यद्दधिसंभवम्
गुडशुक्तं तु भक्ष्यं स्यात्ससर्पिष्कमिति स्थितिः ३३
यवगोधूमजाः सर्वे विकाराः पयसश्च ये
राजवाडवकुल्यं च भक्ष्यं पर्युषितं भवेत् ३४
सजीवपक्वमांसं च सर्वं यत्नेन वर्जयेत्
संवत्सरं व्रतं कुर्यात्प्राश्यैताञ्ज्ञानतस्तु तान् ३५
शूद्रान्नं ब्राह्मणो भुक्त्वा तथा रङ्गावतारिणः
चिकित्सकस्य क्षुद्रस्य तथा स्त्रीमृगजीविनः ३६
षण्डस्य कुलटायाश्च तथा बन्धनचारिणः
बद्धस्य चैव चोरस्य अवीरायाः स्त्रियस्तथा ३७

चर्मकारस्य वेणस्य क्लीवस्य पतितस्य च
रुक्मकारस्य धूर्तस्य तथा वार्धुषिकस्य च  ३८
कदर्यस्य नृशंसस्य वेश्यायाः कितवस्य च
गणान्नं भूमिपालान्नमन्नं चैव श्वजीविनाम्  ३९
मौञ्जिकान्नं सूतिकान्नं भुक्त्वा मासं व्रतं चरेत्
शूद्रस्य सततं भुक्त्वा षन्मासान्व्रतमाचरेत्  ४०
वैश्यस्य तु तया भुक्त्वा त्रीन्मासान्व्रतमाचरेत्
क्षत्रियस्य तथा भुक्त्वा द्वौमासौ व्रतमाचरेत्  ४१
ब्राह्मणस्य तथा भुक्त्वा मासमेकं व्रतं चरेत्
अपः सुराभाजनस्थाः पीत्वा पक्षं व्रतं चरेत्  ४२
मद्यभाण्डगताः पीत्वा सप्तरात्रं व्रतं चरेत्
शूद्रोच्छिष्टाशने मासं पक्षमेकं तथा विशः  ४३
क्षत्रियस्य तु सप्ताहं ब्रह्मणस्य तथा दिनम्
अग्रश्राद्धाशने विद्वान्मासमेकं व्रती भवेत्  ४४
परिवित्तिः परिवेत्ता च यया च परिविन्दति
व्रतं संवत्सरं कुर्युर्दातृयाजकपञ्चमाः  ४५
काकोच्छिष्टं गवाऽऽघ्रातं भुक्त्वा पक्षं व्रती भवेत्
दूषितं केशकीटैश्च मूषिकालाङ्गलेन च  ४६
मक्षिकामशकेनापि त्रिरात्रं तु व्रती भवेत्
वृथा कृसरसंयावपायसापूपशष्कुलीः  ४७
भुक्त्वा त्रिरात्रं कुर्वीत व्रतमेतत्समाहितः
नील्या चैव क्षतो विप्रः शुना दष्टस्तथैव च  ४८
त्रिरात्रं तु व्रतं कुर्यात्पुंश्चलीदशनक्षतः
पादप्रतापनं कृत्वा वह्निं कृत्वा तथाऽप्यधः  ४९
कुशैः प्रमृज्य पादौ च दिनमेकं व्रती भवेत्
नीलीवस्त्रं परी धाय भुक्त्वा स्नानार्हणस्तथा  ५०

त्रिरात्रं च व्रतं कुर्य्याच्छित्त्वा गुल्मलतास्तथा
अध्यास्य शयनं यानमासनं पादुके तथा ५१
पलाशस्य द्विजश्रेष्ठस्त्रिरात्रं तु व्रती भवेत्
वाग्दुष्टं भावदुष्टं च भाजने भावदूषिते
भुक्त्वाऽन्नं ब्राह्मणः पश्चात्त्रिरात्रं तु व्रती भवेत् ५२
क्षत्रियस्तु रणे दत्त्वा पृष्ठं प्राणपरायणः
संवत्सरव्रतं कुर्य्याच्छित्त्वा वृक्षं फलप्रदम् ५३
दिवा च मैथुनं गत्वा स्नात्वा नग्नस्तथाऽम्भसि
नग्नां परस्त्रियं दृष्ट्वा दिनमेकं व्रती भवेत् ५४
क्षिप्त्वाऽग्नावशुचि द्रव्यं तदेवाम्भसि मानवः
मासमेकं व्रतं कुर्यादुपक्रुध्य तथा गुरुम् ५५
पीतावशेषं पानीयं पीत्वा च ब्राह्मणः क्वचित्
त्रिरात्रं तु व्रतं कुर्याद्वामहस्तेन वा पुनः ५६
एकपङ्क्त्युपविष्टेषु विषमं यः प्रयच्छति
स च तावदसौ पक्षं कुर्यात्तु ब्राह्मणो व्रतम् ५७
धारयित्वा तुलाचार्यं विषमं कारयेद्वणिक्
सुरालवणमद्यानां दिनमेकं व्रती भवेत् ५८
मांसस्य विक्रयं कृत्वा कुर्याच्चैव महाव्रतम्
विक्रीय पणिना मद्यं तिलस्य च तथाऽऽचरेत् ५९
हुंकारं ब्राह्मणस्योक्त्वा त्वंकारं च गरीयसः
दिनमेकं व्रतं कुर्यात्प्रयतः सुसमाहितः ६०
प्रेतस्य प्रेतकार्याणि अकृत्वा धनहारकः
वर्णानां यद्व्रतं प्रोक्तं तद्व्रतं प्रयतश्चरेत् ६१
कृत्वा पापं न गूहेत गुह्यमानं विवर्धते
कृत्वा पापं बुधः कुर्यात्पर्षदोऽनुमतं व्रतम् ६२
तस्करश्वापदाकीर्णे बहुव्यालमृगे वने

न व्रतं ब्राह्मणः कुर्य्यात्प्राणबाधाभयात्सदा ६३
सर्वत्र जीवनं रक्षेज्जीवन्पापमपोहति
व्रतैः कृच्छ्रैश्च दानैश्च इत्याह भगवान्यमः ६४
शरीरं धर्मसर्वस्वं रक्षणीयं प्रयत्नतः
शरीरात्स्रवते धर्मः पर्वतात्सलिलं यथा ६५
आलोच्य धर्मशास्त्राणि समेत्य ब्राह्मणैः सह
प्रायश्चित्तं द्विजो दद्यात्स्वेच्छया न कथंचन ६६
इति शाङ्खे धर्मशास्त्रे सप्तदशोऽध्यायः

अथाष्टादशोऽध्यायः
अघमर्षण पराक कृच्छ्र अतिकृच्छ्र सान्तापनादिव्रतम्

त्र्यहं त्रिषवणस्नायी स्नाने स्नानेऽघमर्षणम्
निमग्नस्त्रिः पठेदप्सु न भुञ्जीत दिनत्रयम् १
वीरासनं च तिष्ठेत गां दद्याच्च पयस्विनीम्
अघमर्षणमित्येतद्व्रतं सर्वाघनाशनम् २
त्र्यहं सायं त्र्यहं प्रातस्त्र्यहमद्यादयाचितम्
त्र्यहं परं च नाश्नीयात्प्राजापत्यं चरन्व्रतम् ३
त्र्यहमुष्णं पिवेत्तोयं त्र्यहमुष्णं घृतं पिवेत्
त्र्यहमुष्णं पयः पीत्वा वायुभक्षस्त्र्यहं भवेत् ४
तप्तकृच्छ्रं विजानीयाच्छीतैः शीतमुदाहृतम्
द्वादशाहोपवासेन पराकः परिकीर्तितः ५
विधिनोदकसिद्धानि मासमश्नीत यत्नतः
स कृत्वा सोदकान्मासं कृच्छ्रं वारुणमुच्यते ६
बिल्वैरामलकैर्वाऽपि पद्माक्षैरथवा शुभैः
मासेन लोकेऽतिकृच्छ्रः कथ्यते बुद्धिसत्तमैः ७
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्

एकरात्रोपवासश्च कृच्छ्रं सांतपनं स्मृतम् ८
एतैस्तु त्र्यहमभ्यस्तं महासांतपनं स्मृतम्
पिण्याकं वामतक्राम्बुसक्तूनां प्रतिवासरम् ९
उपवासान्तराभ्यासात्तुलापुरुष उच्यते
गोपुरीषाशनो भूत्वा मासं नित्यं समाहितः १०
व्रतं तु यावकं कुर्यात्सर्वपापनुत्तये
ग्रासं चन्द्रकलावृद्ध्या प्राश्नीयाद्वर्धयन्सदा ११
ह्रासयेच्च कलाहानौ व्रतं चान्द्रायणं चरेत्
मुण्डस्त्रिषवणस्नायी अधः शायी जितेन्द्रियः १२
स्त्रीशूद्रपतितानां च वर्जयेत्परिभाषणम्
पवित्राणि जपेच्छक्त्या जुहुयाच्चैव शक्तितः १३
अयं विधिः स विज्ञेयः सर्वकृच्छ्रेषु सर्वदा
पापात्मानस्तु पापेभ्यः कृच्छ्रैः संतारिता नराः १४
गतपापादिकं यान्ति नात्र कार्या विचारणा
शङ्खप्रोक्तमिदं शास्त्रं योऽधीते बुद्धिमान्नरः
सर्वपापविनिर्मुक्तः स्वर्गलोके महीयते १६

इति शाङ्खे धर्मशास्त्रेऽष्टादशोऽध्यायः

समाप्ताचेयं शङ्खस्मृतिः

Reference:
*Smṛti Sandarbha*, Vol. III, (Delhi: Nag, 1981), pp. 1415ff.

# अथ बृहस्पतिस्मृतिः

श्रीगणेशाय नमः

तत्रादौससुवर्णपृथिवीदानफलमहत्ववर्णनम्

इष्ट्वा क्रतुशतं राजा समाप्तवरदक्षिणम्
मघवान् वाग्विदां श्रेष्ठं पर्य्यपृच्छद् बृहस्पतिम्  १
भगवन् केन दानेन सर्वतः सुखमेधते
यद्दत्तं यन्महार्घं च तन्मे ब्रूहि महातप  २
एवमिन्द्रेण पृष्टोऽसौ देवदेवपुरोहितः
वाचस्पतिर्महाप्राज्ञो बृहस्पतिरुवाच ह  ३
सुवर्णदानं रोदानं भूमिदानं च वासव
एतत् प्रयच्छमानस्तु सर्वपापैः प्रमुच्यते  ४
सुवर्णं रजतं वस्त्रं मणिरत्नं च वासव
सर्वमेव भवेद्दत्तं वसुधां यः प्रयच्छति  ५
फालकृष्टां महीं दत्त्वा सबीजां शस्यशालिनीम्
यावत् सूर्य्यकरा लोकास्तावत् स्वर्गे महीयते  ६
यत्किञ्चित् कुरुते पापं पुरुषो वृत्तिकर्शितः
अपि गोचर्म्ममात्रेण भूमिदानेन शुध्यति  ७
दशहस्तेन दण्डेन त्रिंशद्दण्डानि वर्त्तनम्
दश तान्येव विस्तारो गोचर्मे तन्महाफलम्  ८
सवृषं गोसहस्रं च यत्र तिष्ठत्यतन्द्रितम्
बालवत्सप्रसूतानां तद् गोचर्म इतिस्मृतम्  ९
विप्राय दद्याच्च गुणान्विताय तपोवियुक्ताय जितेन्द्रियाय
यावन्मही तिष्ठति सागरान्ता तावत् फलं तस्य भवेदनन्तम्  १०
यथा वीजानि रोहन्ति प्रकीर्णानि महीतले
एवं कामाः प्ररोहन्ति भूमिदानसमार्जिताः  ११
यथाप्सु पतितः सद्य स्तैलविन्दुः प्रसर्पति

एवं भूमिकृतं दानं सश्ये सश्ये प्ररोहति १२
अन्नदाः सुखिनो नित्यं वस्त्रदश्चैव रूपवान् १३
स नरः सर्वदो भूप यो ददाति वसुन्धराम्
यथा गौर्भरते वत्सं क्षारमुत्सृज्य क्षीरिणी १४
एवं दत्ता सहस्राक्ष भूमिर्भरति भूमिदम्
शङ्खं भद्रासनं छत्रं चरस्थावरवारणाः १५
भूमिदानस्य पुण्यानि फलं स्वर्गः पुरन्दर
आदित्यो वरुणो वह्निर्ब्रह्मा सोमो हुताशनः १६
शूलपाणिश्च भगवानभिनन्दति भूमिदम्
आस्फोटयन्ति पितरः प्रहर्षन्ति पितामहाः १७
भूमिदाता कुले जातः स नस्त्राता भविष्यति
त्रीण्याहुरति दानानि गावः पृथ्वी सरस्वती १८
तारयन्ति हि दातारं सर्वात्पापादसंशयम्
प्रावृता वस्त्रदा यान्ति नग्ना यान्ति त्ववस्त्रदाः १९
तृप्ता यान्त्यग्निदातारः क्षुधिता यान्त्यनन्नदाः
कांक्षन्ति पितरः सर्वे नरकाद्भयभीरवः २०
गयां यो यास्यति पुत्रः स नस्त्राता भविष्यति
एष्टव्या बहवः पुत्राः यद्येकोऽपि गयां व्रजेत् २१
यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत्
लोहितो यस्तु वर्णेन पुच्छाग्रे यस्तु पाण्डुरः २२
श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते
नीलः पाण्डुरलाङ्गूलस्तृणमुद्धरते तु यः २३
षष्टिवर्षसहस्राणि पितरस्तेन तर्पिताः
यच्च शृङ्गगतम्पङ्कं कूलस्तिष्ठति चोद्धृतम् २४
पितरस्तस्य नश्यन्ति सोमलोकं महाद्युतिम्
पृथोर्यदोर्दिलीपस्य नृगस्य नहुषस्य च २५

अन्येषाञ्च नरेन्द्राणां पुनरन्या भविष्यति
बहुभिर्वसुधा दत्ता राजभिः सगरादिभिः २६
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्
यस्तु ब्रह्मघ्नः स्त्रीघ्नो वा यस्तु वै पितृघातकः २७
गवां शतसहस्राणां हन्ता भवति दुष्कृती
स्वदत्तां परदत्तां वा यो हरेच्च वसुन्धराम् २८
श्वविष्ठायां क्रिमिर्भूत्वा पितृभिः सह पच्यते
आक्षेप्ता चानुमन्ता च तमेव नरकं व्रजेत् २९
भूमिदो भूमिहर्त्ता च नापरं पुण्यपापयोः
ऊर्द्ध्वाधो वाऽवतिष्ठेत यावदाभूतसंप्लवम् ३०
अग्नेरपत्यं प्रथमं हिरण्यं भूर्वैष्णवी सूर्यसुताश्च गावः
लोकास्त्रयस्तेन भवन्ति दत्ता यः काञ्चनं गाञ्च महीञ्च दद्यात् ३१
षडशीति सहस्राणां योजनानां वसुन्धराम्
स्वतो दत्ता तु सर्वत्र सर्वकामप्रदायिनी ३२
भूमिं यः प्रतिगृह्णाति भूमिं यश्च प्रयच्छति
उभौ तौ पुण्यकर्माणौ नियतं स्वर्गगामिनौ ३३
सर्वेषामेव दानानां एकजन्मानुगं फलम्
हाटकक्षितिगौरीणां सप्तजन्मानुगं फलम् ३४
यो न हिंस्यादहं ह्यात्मा भूतग्रामं चतुर्विधम्
तस्य देहाद्वियुक्तस्य भयं नास्ति कदाचन ३५
अन्यायेन हृता भूमियैं नरैरपहारिता
हरन्तो हारयन्तश्च हन्युस्ते सप्तमङ्कुलम् ३६
हरते हरयेद्यस्तु मन्दबुद्धिस्ततो वृतः
स बध्यो वारुणैः पाशैस्तिर्यग्योनिषु जायते ३७
अश्रुभिः पतितैस्तेषां दानानामपकीर्त्तनम्
ब्राह्मणस्य हृते क्षेत्रे हृतं त्रिपुरुषं कुलम् ३८

वापीकूपसहस्रेण अश्वमेधशतेन च
गवां कोटिप्रदानेन भूमिहर्त्ता न शुध्यति ३९
गोमेकां स्वर्णमेकं वा भूमेरप्यर्द्धमङ्गुलम्
रुन्धन्नरकमायाति यावदाभूतसंप्लवम्
हुतं दत्तं तपोऽधीतं यत्किञ्चिद्धर्मसञ्चितम् ४०
अर्द्धाङ्गुलस्य सीमाया हरणेन प्रणश्यति
गोवीथीं ग्रामरथ्याञ्च श्मशानं गोपितं तथा ४१
सम्पीडय नरकं याति यावदाभूतसंप्लवम्
ऊषरे निर्जले स्थाने प्रस्तं शस्यं विसजयेत् ४२
जलाधारश्च कर्तव्यो व्यासस्य वचनं यथा
पञ्च कन्यानृते हन्ति दश हन्ति गवानृते ४३
शतमश्वानृते हन्ति सहस्रं पुरुषानृते
हन्ति जाता न जातांश्च हिरण्यार्थेऽनृतं वदेत् ४४
सर्वं भूम्यनृते हन्ति मा स्म भूम्यनृतं वदीः
ब्रह्मस्वे मा रतिं कुर्याः प्राणैः कण्ठगतैरपि ४५
अनौषधमभेषज्यं विषमेतद्धलाहलम्
न विषं विषमित्याहुः ब्रह्मस्वं विषमुच्यते ४६
विषमेकाकिनं हन्ति ब्रह्मस्वं पुत्रपौत्रकम्
लोहखण्डाश्मचूर्णं च विषञ्च ज्वरयेन्नरम् ४७
ब्रह्मस्वं त्रिषु लोकेषु कः पुमान् ज्वरयिष्यति
मन्युप्रहरणा विप्रा राजानः शस्त्रपाणयः ४८
शस्त्रमेकाकिनं हन्ति विप्रमन्युः कुलक्षयम्
शस्त्रमेकाकिनं हन्ति विप्रमन्युः कुलक्षयम्
मन्युप्रहरणा विप्रा श्चक्रप्रहरणो हरिः ४९
चक्रात्तीव्रतरो मन्युस्तस्माद्विप्रं न कोपयेत्
अग्निदग्धाः प्ररोहन्ति सूर्यदग्धास्तथैव च ५०

मन्युदग्धस्य विप्राणामङ्कुरो न प्ररोहति
अग्निर्दहति तेजसा सूर्यो दहति रश्मिभिः ५१
राजा दहति दण्डेन विप्रो दहति मन्युना
ब्रह्मस्वेन तु यत् सौख्यं देवस्वेन तु या रतिः ५२
तद्धनं कुलनाशाय भवत्यात्मविनाशकम्
ब्रह्मस्वं ब्रह्महत्या च दरिद्रस्य च यद्धनम् ५३
गुरुमित्रहिरण्यञ्च स्वर्गस्थमपि पीडयेत्
ब्रह्मस्वेन तु यच्छिद्रं तच्छिद्रं न प्ररोहति ५४
प्रच्छादयति तच्छिद्रमन्यत्र तु विसर्पति
ब्रह्मस्वेन तु पुष्टानि साधनानि बलानि च ५५
संग्रामे तानि लीयन्ते सिकतासु यथोदकम्
श्रोत्रियाय कुलीनाय दरिद्राय च वासव ५६
सन्तुष्टाय विनीताय सर्वभूताहिताय च
वेदाभ्यासस्तपो ज्ञानमिन्द्रियाणां च संयमः ५७
ईदृशाय सुरश्रेष्ठ यदत्तं हि तदक्षयम्
आमपात्रे यथान्यस्तं क्षीरं दधि घृतं मधु ५८
विनश्येत्पात्रदौर्बल्यात्तच्च पात्रं विनश्यति
एवं गाञ्च हिरण्यञ्च वस्त्रमन्नं महीं तिलान् ५९
अविद्वान् प्रतिगृह्णाति भस्मीभवति काष्ठवत्
यस्य चैव गृहे मूर्खो दूरे चापि बहुश्रुतः ६०
बहुश्रुताय दातव्यं नास्ति मूर्खे व्यतिक्रमः
कुलं तारयते धीरः सप्त सप्त च वासव ६१
यस्तडाकं नवं कुर्य्यात् पुराणं वाऽपि खानयेत्
स सर्वं कुलमुद्धृत्य स्वर्गे लोके महीयते ६२
वापीकूपतडागानि उद्यानोपवनानि च
पुनः संस्कारकर्त्ता च लभते मौलिकं फलम् ६३

निदाघकाले पानीयं यस्य तिष्ठति वासव
स दुर्गं विषमं कृत्स्नं न कदाचिदवाप्नुयात् ६४
एकाहं तु स्थितं तोयं पृथिव्यां राजसत्तम
कुलानि तारयेत्तस्य सप्त सप्त पराण्यपि ६५
दीपालोकप्रदानेन वपुष्मान् स भवेन्नरः
प्रोक्षणीयप्रदानेन स्मृतिं मेधाञ्च विन्दति ६६
कृत्वाऽपि पापकर्म्माणि यो दद्यादन्नमर्थिने
ब्राह्मणाय विशेषेण न स पापेन लिप्यते ६७
भूमिर्गाव स्तथा दाराः प्रसह्य ह्रियते यदा
नचाऽऽवेदयते यस्तु तमाहुर्ब्रह्मघातकम् ६८
निवेदितस्तु राजा वै ब्राह्मणैर्मन्युपीडितैः
तं न तारयते यस्तु तमाहुर्ब्रह्मघातकम् ६९
उपस्थिते विवाहे च यज्ञे दाने च वासव
मोहाच्चरति विघ्नं यः स मृतो जायते क्रिमिः ७०
धनं फलति दानेन जीवितं जीवरक्षणात्
रूपमैश्वर्यमारोग्यमहिंसाफलमश्नुते ७१
फलमूलाशनात् पूज्यं स्वर्गं सत्येन लभ्यते
प्रायोपवेशनाद्राज्यं सर्वत्र सुखमश्नुते ७२
गवाढ्यः शक्रदीक्षायाः स्वर्गगामी तृणाशनः
स्त्रिय स्त्रिषवणस्नायी वायुं पीत्वा क्रतुं लभेत् ७३
नित्यस्नायी भवेदर्कः सन्ध्ये द्वे च जपन् द्विजः
न तत्साधयते राज्यं नाकपृष्ठमनाशके ७४
अग्निप्रवेशे नियतं ब्रह्मलोके महीयते
रत्नानां प्रतिसंहारे पशून् पुत्रांश्च विन्दति ७५
नाके चिरं स वसते उपवासी च यो भवेत्
सततं चैकशायी यः स लभेदीप्सिताङ्गतिम् ७६

वीरासनम् वीरशय्यां वीरस्थानमुपाश्रितः
अक्षय्यास्तस्य लोकाः स्युः सर्वकामगमास्तथा ७७
उपवासञ्च दीक्षाञ्च अभिषेकञ्च वासव
कृत्वा द्वादशवर्षाणि वीरस्थानाद्विशिष्यते ७८
अधीत्य सर्ववेदान् वै सद्यो दुःखात् प्रमुच्यते ७९
पावनं चरते धर्मं स्वर्गे लोके महीयते ८०
बृहस्पति मतं पुण्यं ये पठन्ति द्विजातयः
चत्वारि तेषां वर्धन्ते आयुर्विद्या यशो बलम् ८१

इति बृहस्पतिप्रणीतं धर्म्मशास्त्रं सम्पूर्णम्

समाप्ताचेयं बृहस्पतिस्मृतिः

Credits

Sources: K.V. Rangaswami Aiyangar, *Bṛhaspati-Smṛti (Reconstructed)*, GOS lxxxv, Baroda 1941

Typescript: Input by Yasuke Ikari and Akihiko Akamatsu

Conversion to Devanagari using Vedapad Software by Ralph Bunker

Formatted for Maharishi University of Management
Vedic Literature Collection

# अथ अत्रिस्मृतिः

श्रीगणेशाय नमः

अज्ञानतिमिरान्धस्य वृतेनानेन केशव
प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो भव १
हुताग्निहोत्रमासीनमत्रिं श्रुतवतां वरम्
उपगम्य च पृच्छन्ति ऋषयः शंसितव्रताः २
भगवन् केन दानेन जपेन नियमेन च
शुध्यन्ते पातकैर्युक्तास्तं ब्रवीषि महामुने ३
अपख्यापितदोषाणां पापानां महतां तथा
सर्वेषां चोपपातानां शुद्धिं वक्ष्यामि तत्वतः ४
प्राणायामैः पवित्रैश्च दानैर्होमैर्जपैस्तथा
शुद्धिकामाः प्रमुच्यन्ते पावकेभ्यो न संशयः
प्राणायामान् पवित्रांश्च व्याहृतीः प्रणवन्तथा
पवित्रपाणिरासीनोऽध्यभ्यस्यब्रह्म नैत्यिकम् ६
आवर्त्तयेत्सदायुक्तः प्राणायामान् पुनः पुनः
आकेशाग्रादानखान्तात्तपस्तप्यत जुत्तमम् ७
त्वक्चर्ममांसरुधिरमेदोमज्ञास्थिभिः कृताः
तथेन्द्रियकृता दोषाः दह्यन्ते प्राणनिग्रहात्
निरोधाज्ञायते वायुर्वायोरग्निर्हि जायते
तापेनापो हि जायन्ते ततोऽन्तः शुध्यते त्रिभिः ८
तथा चर्म तथानङ्गा दोषा अभ्यर्ति धर्मतः
तथेन्द्रियकृता दोषा दह्यन्ते प्राणनिग्रहात् ९
प्राणायामैर्दहेत् दोषाद्धारणाभिश्च किल्विषम्
प्रत्याहारेण विषयान्ध्यानेनानैश्वरान् गुणान् १०
न च तीव्रेण तपसा न स्वाध्यायैर्नचेज्यया
मतिंगन्तुं सुराः शक्ता योगात्संप्राप्नुवन्तियाम् ११

योगात्सम्प्राप्यते ज्ञानं योगाद्धर्मस्य लक्षणम्
योगः परं तपो नित्यं तस्माद्युक्तः सदा भवेत् १२
प्रणवाद्यास्तथा वेदाः प्रणवे पर्यवस्थिताः
वाङ्मयः प्रणवं सर्वं तस्मात्प्रणवमभ्यसेत् १३
प्रणवे विनियुक्तस्य व्याहृतीषु च सप्तसु
त्रिपदायां च गायत्र्यां न भयं विद्यते क्वचित् १४
एकाक्षरं परं ब्रह्म प्राणायामः परं तपः
ब्रह्माणी चैव गायत्री पावनं परमं स्मृतम् १५
समाहृतीकां सप्रणवां गायत्रीं शिरसा सह
त्रिः पठेदायतः प्राणः प्राणायामः स उच्यते १६
इत्यात्रेयस्मृत्यां प्रथमोऽध्यायः

अथ द्वितीयोऽध्यायः

प्राणायामांस्तथा कुर्याद्यथाविधिरतन्द्रितः
अहोरात्रिकृतात्पापात्तत्क्षणादेव शुध्यति १
कर्म्मणा मनसा वाचा यदेनः कुरुते निशि
अतिष्ठत्पूर्वसन्ध्यायां प्राणायामैस्तु शुध्यति २
प्राणायामैर्य आत्मानं संयम्यास्ते पुनः पुनः
दशद्वादशभिर्वापि चतुर्विंशात्परं तपः ३
कौत्सं जप्त्वाप इत्येतद्वासिष्ठं च तृचं प्रति
कुष्माण्डं पावमानं च सुरापोऽपि विशुद्धति ४
सकृज्जप्त्वास्य पानीयं शिवसङ्कल्पमेव च
सुवर्णमपहृत्यापि क्षणाद्भवति निर्मलः ५
हविष्मांस्तु यमभ्यस्य न तमंह इतीव च
सूक्तं तु पौरुषं जप्त्वा मुच्यते गुरुतल्पगः ६
सव्याहृतीकाः सप्रणवाः प्राणायामास्तु षोडश

अपि भ्रूणहनं मासात्पुनन्त्यहरहः कृताः ७
अपि वाप्सु निमज्जन्वा त्रिः पठेदघमर्षणम्
यथाश्वमेधः क्रतुराट् तादृशं मनुरब्रवीत् ८
आरम्भयज्ञः क्षत्रस्य हविर्यज्ञो विशामपि
परिचर्ययज्ञः शूद्रस्तु जपयज्ञो द्विजोत्तमः ९
आरम्भयज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः
उपांशु स्याच्छतगुणः सहस्रो मानसः स्मृतः १०
उपांशुस्तुचलज्जिह्वाद्धददशनच्छद ईरितः
अधरोष्ठविभागो वा विश्वासोपांशुलक्षणः
निर्विकारेण वक्त्रेण मनसा मानसः स्मृतः ११
सहस्रपरमां देवीं शतमध्यां दशावराम्
गायत्रीं यः पठेद्विप्रो न स पापेन लिप्यते १२
क्षत्रियो बाहुवीर्येण तरेदापदमात्मनः
वित्तेन वैश्यशूद्रौ तो जपहोमैर्द्विजोत्तमः १३
यथाश्वा रथहीनास्तु रथो वाश्वैर्यथा विना
एवं तपोऽप्यविद्यस्य विद्या वाप्यतपस्विनः १४
यथान्नं मधुसंयुक्तं मधु वान्येन संयुतम्
एवं तपश्च विद्या च संयुक्तं भेषजं महत् १५
विद्यातपोभ्यां संयुक्तं ब्राह्मणं जपतत्परम्
कुत्सितैरपि वर्त्तन्तमेनो न प्रतिपद्यते १६
इति आत्रेयस्मृतौ द्वितीयोऽध्यायः

यस्य कार्यशतं साग्रं कृतं वेदश्च साध्यते
सर्वं तत्तस्य वेदाग्निर्दहत्यग्निरिवेन्धनम् १
यथा जातबलो वाग्निर्दहत्यार्द्रानपि द्रुमान्
तथा दहन्ति वेदज्ञाः कर्मजन्दोषमात्मनः २

यथा महाह्रदे लोष्टं क्षिप्तं सर्वं विनश्यति
एवमात्मकृतं पापं त्रयी दहति देहिनः ३
न वेदबलमाश्रित्य पापकर्मरतिर्भवेत्
अज्ञानाच्च प्रमादाच्च दह्यते कर्म नेतरत् ४
तपस्तपति योऽरण्ये मुनिर्मूलफलाशनः
ऋचमेकाञ्च योऽधीते तच्च तानि च तत्फलम् ५
वेदाभ्यासो यथाशक्त्या महायज्ञक्रियाक्षमाः
नाशयन्त्याशु पापानि महापातकजान्यपि ६
इतिहासपुराणाभ्यां वेदं समुपवृंहयेत्
विभेत्यल्पश्रुताद्वेदान्मामयं प्रतरिष्यति ७
याजनाध्यापनाद्दानात्तथैवाहुः प्रतिग्रहात्
विप्रेषु न भवेद्दोषो ज्वलनार्कसमा हिते ८
शङ्कास्थाने समुत्पन्ने भक्ष्यभोज्यप्रतिग्रहे
आहारशुद्धिं वक्ष्यामि तन्मे निगदतः शृणु ९
सर्ववेदपवित्राणि वक्ष्याम्यह मतः परम्
येषांजपैश्च होमैश्च तिलकल्पश्च संव्रता १०
अघमर्षणं वेदवतं शुद्धवत्यः शरत्समाः
कुष्माण्डः पावमानश्च दुर्गा सावित्रिरेव च ११
शतरुद्रं धर्मशिरं त्रिसुपर्णं महाव्रतम्
अनिषङ्गादयस्तोभासामानि व्याहृतिस्तथा १२
गारुडानि च सामानि गायत्रीं रैवतं तथा
पुरुषव्रतञ्च भावञ्च तथा वेदकृतानि च १३
अव्लिङ्गा बार्हस्पत्यं च वाक्सूक्तञ्चामृतं तथा
गोसूक्तञ्चाश्वसूक्तञ्च इन्द्रशुद्धेश्च सामनि १४
त्रीण्याज्यदोहानि रथन्तरञ्च अग्नेर्व्रतं वामदेव्यं बृहच्च
एतानिजप्यानिपुनातिपापाज्ञातिस्मरत्वंलभते यदिच्छेत् १५

अग्नेरपत्यं प्रथमं हिरण्यं भूर्वैष्णवी सूर्यसुताश्च गावः
लोकास्त्रयस्ते न भवन्ति दत्ताः यः काञ्चनङ्गाञ्च महीञ्च दद्यात्  १६
सर्वेषामेव दानानामेकजन्मानुगं फलम्
हाटकक्षितिधेनूनां सप्तजन्मानुगं फलम्  १७
सर्वकामफला वृक्षा नद्यः पायसकर्दमाः
काञ्चना यत्र प्रासादास्तत्र गच्छन्ति गोप्रदाः  १८
वैशाख्यां पौर्णमास्यान्तु ब्राह्मणान् सप्त पञ्च वा
तिलक्षौद्रेण संयुक्तांस्तर्पयित्वा यथाविधि  १९
प्रीयतां धर्मराजेति यद्वा मनसि वर्त्तते
यावज्जीवकृतं पापं तत्क्षणादेव नश्यति  २०
सुवर्णनाभं यो दद्यात्सुमुखं कृतमार्गकम्
तिलैर्दद्यात्तस्य पुष्पफलं पुण्यं च यत् शृणु  २१
सा सुवर्णधरा धेनुः सशैलवनकानना
या तु सागरपर्यन्ता भवेद्दता न संशयः  २२
तिलान् कृष्णाजिने कृत्वा सुवर्णमधुसर्पिषा
ददाति यस्तु विप्राय सर्वं तरति दुष्कृतम्  २३

इति आत्रेयस्मृतौ तृतीयोऽध्यायः

अथ रहस्य प्रायश्चित्तानि व्याख्यास्यामः

सामान्यस्त्रीगमनरहस्ये रहस्य प्रक्राशे प्रकाशं पावनं अनुतिष्ठेत्  । वा--समान्यमगम्यागमनन्दुरन्नभोजनान्तौ रहस्यौ रहस्यं प्रकाशं वावनमनुतिष्ठेत्  ।  अथवाप्सुनिमज्यन् समन्दोऽयं त्रिरावृत्य शुद्धेत्  ।  गोवन्यवधे कन्यादषणे इन्द्रशुद्ध्या इत्यापः पीत्वा मुच्यते  ।
वेदस्यैवगुणं वापि सद्यः शोधनमुच्यते
एकादशगुणान्वापि रुद्रानावर्त्य शुध्यति  १
महापातकोपपातकेभ्यो मलिनीकरणेभ्यो मुच्यते

त्रिपदा नाम गायत्री वेदे वाजसनेयके
त्रिः कृत्वोऽन्तर्जले प्रोक्ता सर्वपापं व्यपोहति २
ब्राह्मणी गमने स्नात्वोदकुम्भान् ब्राह्मणाय दद्यात्
क्षत्रियावैश्यागमने तापसां त्रिरावृत्य शुद्धयति
शूद्रागमने अघमर्षणं त्रिरावृत्य शुद्धयति
गुरुदान् गत्वा वृषभ द्वादशावृत्या शुद्धयति
अपेयं पीत्वा अघमर्षणेनापः पीत्वा विशुद्धयति
अशक्तः प्रायश्चित्ते सर्वरात्रमनुशोच्य शुद्धयेत
अग्निसोम इन्द्रसोम इति जपित्वा कन्यादूषी विमुच्यते
सोमं राजानमिति जपित्वा विषदा अग्निदाश्च विमुच्यन्ते
सर्वेषामेव पापानां सङ्करे समुपस्थिते ३
दशसाहस्रमभ्यस्ता गायत्री शोधनी परा
ब्रह्महा गुरुतल्पी वाऽगम्या गामी तथैव च ४
स्वर्णन्तेयी च गोघ्नी च तथा विस्रम्भघातकः
शरणागतघाती च कूटसाक्षी त्वकार्य्यकृत् ५
एवमाद्येषु चान्येषु पापेष्वभिरतश्चिरम्
प्राणायामांस्तु यः कुर्यात्सूर्यस्योदयनं प्रति ६
सूर्यस्योदयनं प्राप्य निर्म्मला धौतकल्मषाः
भवन्ति भास्कराकारा विधूमा इव पावकाः ७
न हि ध्यानेन सदृशं पवित्रमिह विद्यते
श्वपाकेष्वपि भुञ्जानो ध्यानेनैवात्र लिप्यते ८
ध्यानमेव वरो धर्मो ध्यानमेव परं तपः
ध्यानमेव परं शौचं तस्माद्ध्यानपरो भवेत् ९
सर्वपापप्रसक्तोऽपि ध्यानं नियतमभ्यसेत्
सर्वदा ध्यानयुक्तश्च तपस्वी पंक्तिपावनः १०
पुनस्तपस्वी भवति पंक्तिपावनपावनः

## इति आत्रेयस्मृतौ चतुर्थोऽध्यायः

चतुरस्रं ब्राह्मणस्य तिर्कोणं क्षत्रियस्य तु
वर्त्तुलञ्चैव वैश्यस्य शूद्रस्याभ्युक्षणं स्मृतम्
ब्रह्मा विष्णुश्च रुद्रश्च श्रीर्हुताशन एव च १
मण्डलान्युपजीवन्ति तस्मात्कुर्वन्ति मण्डलम्
यातुधानाः पिशाचाश्च क्रूराश्चैव तु राक्षसाः २
हरन्ति रसमन्नस्य मण्डलेन विवर्जितम्
गोमयैर्मण्डलं कृत्वा भोक्तव्यमिति निश्चितम् ३
यत्र क्वपतितस्यान्नं भुक्त्वा चान्द्रायणं चरेत्
यतिश्च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ ४
तयोरन्नमदत्त्वा च भुक्त्वा चान्द्रायणं चरेत्
यतिहस्ते जलं दद्याद्भैक्षं दद्यात्पुनर्जलम् ५
तद्भैक्षं मेरुणा तुल्यं तज्जलं सागरोपमम्
वामहस्तेन यो भुङ्क्ते पयः पिवति वा द्विजः ६
सुरापानेन तत्तुल्यं मनुः स्वायम्भुवोऽब्रवीत्
हस्तदत्तास्तु ये स्नेहाल्लवणव्यञ्जनादि च ७
दातारं नोपतिष्ठन्ति भोक्ता भुञ्जीत किल्विषम्
अभोज्यं ब्राह्मणस्यान्नं वृषलेन निमन्त्रितम् ८
तथैव वृषलस्यान्नं ब्राह्मणेन निमन्त्रितम्
ब्राह्मणान्नं ददच्छूद्रः शूद्रान्नं ब्राह्मणो ददत् ९
उभावेतावभोज्यान्नौ भुक्त्वा चान्द्रायणं चरेत्
अमृतं ब्राह्मणस्यान्नं क्षत्रियान्नं पयः स्मृतम् १०
वैश्यस्य चान्नमेवान्नं शूद्रान्नं रुधिरं स्मृतम्
शूद्रान्नेनोदरस्थेन योऽधिगच्छति मैथुनम् ११
यस्यान्नं तस्यते पुत्रा अन्नाच्छुक्रं प्रवर्त्तते

शूद्रान्नरसपुष्टाङ्गोऽधीयानोऽपि च नित्यशः १२
जुह्वत् चापि जपन्वापि गतिमूर्द्धान्न विन्दति
यस्तु वेदमधीयानः शूद्रान्नमुपभुञ्जते १३
शूद्रो वेदफलं याति शूद्रत्वं चाधिगच्छति
मृतसूतकपुष्टाङ्गो द्विजः शूद्रान्नभोजनम् १४
अहमेवं न जानामि काङ्कां योनिङ्गमिष्यति
श्वानस्तु सप्तजन्मानि नवजन्मानि शूकरः १५
गृध्रो द्वादशजन्मानि इत्येवं मनुरब्रवीत्
परपाकमुपासन्ते ये द्विजा गृहमेधिनः १६
ते वै खरत्वमुष्ट्रत्वं श्वत्वञ्चैवाऽधिगच्छति
श्राद्धं दत्वा च भुक्त्वा च मैथुनं योऽधिगच्छति १७
भवन्ति पितरस्तस्य तन्मासे रेतसो भुजः
उच्छिष्टे न तु संस्पृष्टो द्रव्यहस्तः कथञ्चन १८
भूमौ निधाय तद्द्रव्यमाचान्तः शुचितामियात्
स्पृशन्ति विन्दवः पादौ य आचामयतः परान् १९
भूमिगैस्ते समाज्ञेया न तैरप्रयतो भवेत्
आचान्तोऽप्यशुचिस्तावद्यावत्पात्रमनुद्धृतम् २०
उद्धृतेप्यशुचिस्तावद्यावन्मण्डलशोधनम्
आसने पादमारोप्य ब्राह्मणो यस्तु भुञ्जते २१
मुखेन वमितं चान्नं तुल्यं गोमांसभक्षणम्
उपदंशान्नशेषं वा भोजने मुखनिःसृतम् २२
द्विजातीनामभोज्यान्नं भुक्त्वा चान्द्रायणं चरेत्
पीतशेषन्तु यत्तोयं ब्राह्मणः पिवते पुनः २३
अपेयं तद्भवेदापः पीत्वा चान्द्रायणं चरेत्
अनुवंशन्तु भुञ्जीत नानुवंशन्तु संविशेत् २४
अनुवंशन्तु भुञ्जानो दीर्घमायुरवाप्नुयात्

आर्द्रपादस्तु भुञ्जीत नार्द्रपादस्तु संविशेत् २५
आर्द्रपादस्तु भुञ्जानो दीर्घमायुरवाप्नुयात्
अनार्द्रपादः शयने दीर्घां श्रियमवाप्नुयात् २६
आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः
श्रियं प्रत्यङ्मुखे भुङ्क्ते ऋतं भुङ्क्त उदङ्मुखः २७
शावे शवगृहं गत्वा श्मशाने वान्तरेऽपि वा
आतुरं व्यञ्जनं कृत्वा दूरस्थोऽप्यशुचिर्भवेत् २८
अतिक्रान्ते दशाहे तु त्रिरात्रमशुचिर्भवेत्
सम्वत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुध्यति २९
निर्देशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च
सवासा जलमाप्लुत्य शुद्धो भवति मानवः ३०
अशुद्धं स्वयमप्यन्नं न शुद्धस्तु यदि स्पृशेत्
विशुध्यत्युपवासेन भुङ्क्ते कृच्छ्रेण स द्विजः ३१
सूतके सूतकं स्पृष्ट्वा स्नानं शावे च सूतके
सूतकेनैव शुद्धिः स्यान्मृतस्यान्निर्दशे शुचिः ३२
सूतके सूतकं स्पृष्ट्वा स्नानं शावे च सूतके
भुक्त्वा पीत्वा तदज्ञानादुपवासस्त्र्यहं भवेत् ३३
मृण्मयानाञ्च पात्राणां दशाहे शुचिरिष्यते
स्नानादिषु प्रयुक्तानां त्याग एव विधीयते ३४
सूतके मृतके चैव मृतान्ते च प्रसूतके
तस्मात्तु शङ्कताशौचे मृताशौचे न शुध्यति ३५
सूतकाद्द्विगुणं शावं शावाद्द्विगुणमार्त्तवम्
आर्त्तवाद् द्विगुणा सूतिस्ततोऽधिशवदाहकः ३६
अनुगच्छेद्यथा प्रेतं ज्ञातिमज्ञातिमेव वा
स्नात्वा सचैलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यति ३७
रजता शुध्यते नारी नदी वेगेन शुध्यति

भस्मना शुध्यते कांस्यं पुनः पाकेन मृगमयम्  ३८
नोदन्वतोऽम्भसि स्नानं क्षुरकर्म तथैव च
अन्तर्वत्न्या पतिः कुर्वन्न प्रजा भवति ध्रुवम्  ३९
दम्पती शुशुना सार्द्धं सूतके दशमेऽहनि
क्षौरं कुर्यात्ततः पूतादानभोजनयोग्यता  ४०
केशादि दूषिते तीरे न कुर्यात्तिलतर्पणम्
जलमध्ये जलं देयं पितृणां जलमिच्छताम्
घनस्थाने न दातव्यं पितृणां नोपगच्छति  ४१
रात्रिं कुर्यात् त्रिभागन्तु द्वौ भागौ पूर्व एव च
उत्तरांशः प्रभातेन युज्यते मृतसूतके  ४२
यदि पश्येदृतुंपूर्वं क्रूरवारे मृतिः स्मृता
इति पश्येत्तु भुक्त्वा तु पादुकारोहणं स्मृतम्
स्नात्वैन्द्रव्रतमादाय देवताभ्यो निवेदयेत्  ४३
अपूपं लवणं मुद्गं गुडमिश्रं तथा हविः
दत्त्वा ब्राह्मणपत्नीभ्यो निशि भोजनमेव च  ४४
चतुर्थेऽहनि कर्त्तव्यं क्षुरकर्मातियत्नतः
पुण्याहं वाचयित्वान्ते भोक्तव्यं शुद्धिमिच्छता  ४५
अपुण्याहे तु भुञ्जीत विप्रो धर्ममजानतः
तस्य जातिमयं भुङ्क्ते प्रायश्चित्तं ध्रुवं भवेत्  ४६
विवाहे वितते तन्त्रे होमकाल उपस्थिते
कन्यामृतुमतीं दृष्ट्वा कथं कुर्वन्ति याज्ञिकाः  ४७
हविस्मत्या स्नापयित्वा त्वन्यवस्त्रमलङ्कृताम्
युञ्जानामाहुतिं कृत्वा ततः कर्म प्रवर्त्तते  ४८
प्रथमेऽहनि चाण्डाली द्वितीये ब्रह्मघातकी
तृतीये रजकी प्रोक्ता चतुर्थेऽहनि शुध्यति  ४९
आर्त्तवाभिप्लुतां नारीं चण्डालं पतितं शुनम्

भोज्यान्तरे प्रयुज्यन्ते स्नात्वा मानस्तृचं जपेत् ५०
आर्त्तवाभिप्लुतां नारीं दृष्ट्वा भुङ्क्तेऽन्धकातराः
तदन्नं छर्दयित्वा तु कुशवारि पिबेदपः ५१
ये तां दत्वा तु यो भुङ्क्ते प्राजापत्यं विशोधनम्
आर्त्तवाभिप्लुतां नारीं आर्त्तवाभिप्लुताभिधः ५२
भाषयित्वा तु संमोहादुपवासस्तयोर्भवेत्
उदक्यायाः करेणाथ भुक्त्वा चान्द्रायणं चरेत् ५३
प्राजापत्यमसत्याच्चेत्त्रिरात्रं स्पृष्टभोजने
तद्धस्तभोजनञ्चैव त्रिगुणं सह भोजने ५४
चतुर्गुणं तदुच्छिष्टे पानीये त्वर्द्धमेव च
उदक्यायाः समीपस्थ मन्नं भुक्त्वात्वकामतः ५५
उपवासेन शुद्धिः स्यात्पिबेद् ब्रह्म सुवर्च्चलम्
आर्त्तवा यदि चाण्डालमुच्छिष्टेन तु पश्यति ५६
आस्नानकालं नाश्नीयादासीना वाग्यता बहिः
पादकृच्छ्रन्तु यः कुर्याद्ब्रह्मकृच्छ्रं पिबेत् पुनः ५७
ब्राह्मणान् भोजयेत्पश्चाद्विप्राणामनुशासनात्
मृतसूतकसम्पर्के ऋतुं दृष्ट्वा कथं भवेत् ५८
आस्नानकालं नाश्नीयाद्भुक्त्वा चान्द्रायणं चरेत्
आर्त्तवाभिप्लुता नारी चण्डालं स्पृशते यदि ५९
आर्त्तवाभिप्लुता नारीं आर्त्तवाभिप्लुता स्पृशेत्
स्नात्वोपवासं कुर्याच्च पञ्चगव्येन शुध्यति ६०
कृच्छ्रमेकञ्चरेत्सा तु तदर्थं चान्तरीकृते
आतुरा या ऋतुस्नाता स्नानकर्म कथं भवेत् ६१
स्नात्वा स्नात्वा पुनःस्पृश्य दशकृत्वस्त्वनातुराः
वस्त्रापनयनं कृत्वा भस्मना परिमार्जयेत् ६२
दत्त्वा तु शक्तितो दानं पुण्याहेन विशुध्यति

ब्रह्मणानां करैर्मुक्तं तोयं शिरसि धारयेत् ६३
सर्वतीर्थतटात्पुण्याद्विशिष्टतरमुच्यते
रजस्वलायाः प्रेतायाः संस्कारं नाचरेद्द्विजः ६४
ऊर्ध्वं त्रिरात्रात्स्नातायाः शावधर्मेण दाहयेत्
रजस्वले च द्वे स्पृष्टे चातुर्वर्णस्य याः स्त्रियः ६५
अतिकृच्छ्रं चरेत्पूर्वं कृच्छ्रमेकं क्रमेण तु
रजस्वलायाः स्नातायाः पुनरेव रजस्वला ६६
विंशतेर्दिवसादूर्ध्वं त्रिरात्रमशुचिर्भवेत्
प्रसूतिका तु या नारी स्नानतो विंशतेः परम् ६७
रजस्वला तु सा प्रोक्ता प्राक्तु नैमित्तिकं रजः
शुद्धा नारी शुद्धवासाः पुनरार्तवदर्शने ६८
वस्त्रं तु मलिनं त्यक्त्वा तिलमाप्लुत्य शुध्यति
आतुर स्नानसंप्राप्तौ दशकृत्वस्त्वनातुरः ६९
स्नात्वा स्नात्वा स्पृशेदेनं ततः शुद्धो भविष्यति
चन्द्रसूर्यग्रहे नाद्यात्स्नात्वा मुक्ते तु भुञ्जते ७०
अमुक्तयो रस्तगयो रद्याद्दृष्ट्वा परेऽहनि
यस्य स्वजन्मनक्षत्रे गृह्येते शशिभास्करौ ७१
व्याधिः प्रवाहे मृत्युश्च दारिद्युञ्च महद्भयम्
तस्माद्दानं च होमञ्च देवताभ्यर्चनं जपम् ७२
कुर्यात्तस्मिन् दिने युक्ते तस्य शान्तिर्भविष्यति
सर्वं गङ्गासमं तोयं राहुग्रस्ते दिवाकरे ७३
यो नरः स्नाति तत्तीर्थे समुद्रे सेतुबन्धने
उपोष्य रजनीमेकां राहुग्रस्ते दिवाकरे ७४
सप्तजन्मकृतं पापं तत्क्षणादेव नश्यति
सोमेऽप्येवं सूर्यतुल्यं तस्मात्सर्वं समाचरेत् ७५

इति आत्रेयस्मृतौ पञ्चमोऽध्यायः

इष्ट्वा क्रतुशतैरेवं देवराजो महाद्युतिः
स्वगुरुं वाग्मिनां श्रेष्ठं पर्यपृच्छद्बृहस्पतिम्  १
भगवन् केन दानेन स्वर्गतः सुखमेधते
यदक्षयं महाभाग त्वं ब्रूहि वदताम्बर  २
एवं पृष्टः स इन्द्रेण देवदेवपुरोहितः
वाचस्पतिर्महातेजो बृहस्पतिरुवाच ह  ३
हिरण्यदानं गोदानं भूमिदानञ्च वासवः
एतत्प्रयच्छमानोऽपि स्वर्गतःसुखमेधते  ४
सुवर्णं रजतं वस्त्रं मणिरत्नं वसूनि च
सर्वमेव भवेद्दत्तं वसुधां यः प्रयच्छति  ५
फलाकृष्टां महीं दद्यात्सबीजां सस्यमालिनीम्
यावत्सूर्यकरा लोके तावत्सर्गे महीयते  ५
इति आत्रेयस्मृतौ धर्मशास्त्रं सम्पूर्णम्

Reference:
*Smṛti Sandarbha*, Vol. I, (Delhi:  Nag, 1981), pp. 336ff.

# कात्यायनस्मृतिः

## श्रीसामवेदाय नमः

## प्रथमः खण्डः

## अथाचाराध्यायः

### तत्रादौ यज्ञोपवीतकर्मप्रकरणवर्णनम्

अथातो गोभिलोक्तानामन्येषां चैव कर्मणाम्
अस्पष्टानां विधिं सम्यग्दर्शयिष्ये प्रदीपवत् १
त्रिवृदूर्द्ध्ववृतं कार्यं तन्तुत्रयमधोवृतम्
त्रिवृत्तञ्चोपवीतं स्यात्तस्यैको ग्रन्थिरिष्यते २
पृष्ठवंशे च नाभ्यां च धृतं यद्विन्दते कटिम्
तद्धार्यमुपवीतं स्यान्नातोलम्बं नचोच्छ्रितम् ३
सदोपवीतिना भाव्यं सदा बद्धशिखेन च
विशिखो व्युपवातश्च यत्करोति न तत्कृतम् ४
त्रिःप्राश्यापो द्विरुन्मृज्य मुखमेतान्युपस्पृशेत्
आस्यनामाक्षिकर्णांश्च नाभिवक्षःशिरोंऽशकान् ५
संहताभिस्त्र्यङ्गुलिभिरास्यमेवमुपस्पृशेत्
अङ्गुष्ठेन प्रदेशिन्या घ्राणं चैवमुपस्पृशेत्
अङ्गुष्ठानामिकाभ्याञ्च चक्षुः श्रोत्रं पुनः पुनः ६
कनिष्ठाङ्गुष्ठयोर्न्नाभिं हृदयं तु तलेन वै
सर्वाभिस्तु शिरः पश्चाद्बाह चाग्रेण संस्पृशेत् ७
यत्रोपदिश्यते कर्म कर्तुरङ्गं न तूच्यते
दक्षिणस्तत्र विज्ञेयः कर्मणां पारगः करः ८
यत्रदिङ्गिनयमो न स्याज्जपहोमादिकर्मसु
तिस्त्रस्तत्र दिशः प्रोक्ता ऐन्द्रीसौम्यापराजिताः ९
तिष्ठन्नासीनः प्रह्वो वा नियमो यत्र नेदृशः

तदासीनेन कर्त्तव्यं न प्रह्वेण न तिष्ठता १०
गौरी पद्मा शची मेधा सावित्री विजया जया
देवसेना स्वधा स्वाहा मातरो लोकमातरः ११
हृष्टिः पुष्टिस्तथा तुष्टिरात्मदेवतया सह
गणेशेनाधिका ह्येतावृद्धौ पूज्याश्च षोडश १२
कर्मादिषु तु सर्वेषु मातरः सगणाधिपाः
पूजनीयाः प्रयत्नेन पूजिताः पूजयन्ति ताः १३
प्रतिमासु च शुभ्रासु लिखित्वा वा पटादिषु
अपिवाक्षतपुञ्जेषु नैवेद्यैश्च पृथग्विधैः १४
कुड्यलग्नां वसोर्द्धारां सप्तधारां घृतेन तु
कारयेत् पञ्चधारां वा नातिनीचां न चोच्छ्रिताम् १५
आयुष्याणि च शान्त्यर्थं जप्त्वा तत्र समाहितः
षड्भ्यः पितृभ्यस्तदनु भक्त्या श्राद्धमुपक्रमेत् १६
अनिष्ट्वा तु पितृंच्छ्राद्धे न कुर्यात्कर्म वैदिकम्
तत्रापि मातरः पूर्वं पूजनीयाः प्रयत्नतः १७
वशिष्ठोक्तो विधिः कृत्स्नो द्रष्टव्योऽत्र निरामिषः
अतः परं प्रवक्ष्यामि विशेष इह यो भवेत् १८
इति प्रथमः खण्डः

द्वितीयः खण्डः
अथ नित्यनैमित्तिक कर्म वर्णनम्

प्रातरामन्त्रितान् विप्रान् युग्मानुभयतस्तथा
उपवेश्य कुशान् दद्यादृजुनैव हि पाणिना १
हरिता यज्ञिया दर्भाः पीतकाः पाकयज्ञियाः
समूलाः पितृदैवत्याः कल्माषा वैश्वदेविकाः २
हरिता वै सपिञ्जलाः शुष्काः स्निग्धाः समाहिताः

रत्निमात्राः प्रमाणेन पितृतीर्थेन संस्तृताः ३
पिण्डार्थं ये स्तृता दर्भास्तर्पणार्थं तथैव च
धृतैः कृते च विण्मूत्रे त्यागस्तेषां विधीयते ४
दक्षिणं पातयेज्जानु देवान् परिचरन् सदा
पातयेदितरज्जानु पितॄन् परिचरन्नपि ५
निपातो नहि सव्यस्य जानुनो विद्यते क्वचित्
सदा परिचरेद्भक्त्या पितॄनप्यत्र देववत् ६
पितृभ्य इति दत्तेषु ऋौपवेश्य कुशेषु तान्
गोत्रनामभिरामन्त्र्य पितॄनर्घं प्रदापयेत् ७
नात्रापसव्यकरणं न पित्र्यं तीर्थमिष्यते
पात्राणां पूरणादीनि दैवेनैव हि कारयेत् ८
ज्येष्ठोत्तरकरान् युग्मान् कराग्राग्रपवित्रकान्
कृत्वार्घ्यं संप्रदातव्यं नैकैकस्यात्र दीयते ९
ऋनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित् १४
एतदेव हि पिञ्जल्या लक्षणं समुदाहृतम्
ऋाज्यस्योत्पवनार्थं यत्तदप्येतावदेव तु ११
एतत्प्रमाणमेवैके कौशीमेवार्द्रमंजरीम्
शुष्कां वा शीर्णकुसुमां पिञ्जलीं परिचक्षते १२
पित्र्यमन्त्रानु द्रवण ऋात्मालम्भेऽधमेक्षणे
ऋधोवायुसमुत्सर्गे प्रहासेऽनृतभाषणे १३
मार्ज्जारमशकस्पर्शे ऋाक्रुष्टे क्रोधसम्भवे
निमित्तेष्वेषु सर्वत्र कर्म कुर्वन्नपः स्पृशेत् १४
इति द्वितीयः खण्डः

## तृतीयः खराडः

### अथ त्रिविधक्रियावर्णनम्

अक्रिया त्रिविधा प्रोक्ता विद्वद्भिः कर्मकारिणाम्
अक्रिया च परोक्ता च तृतीया चायथाक्रिया १
स्वशाखाश्रयमुत्सृज्य परशाखाश्रयञ्च यः
कर्त्तुमिच्छति दुर्मेधा मोघं तत्तस्य चेष्टितम् २
यन्नाम्नातं स्वशाखायां परोक्तमविरोधि च
विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवत् ३
प्रवृत्तमन्यथा कुर्याद्यदि मोहान् कथञ्चन
यतस्तदन्यथाभूतं तत एव समापयेत् ४
समाप्ते यदि जानीयान्मयैतदयथाकृतम्
तावदेव पुनः कुर्यान्नावृत्तिः सर्वकर्मणः ५
प्रधानस्याक्रिया यत्र साङ्गं तत्क्रियते पुनः
तदङ्गस्याक्रियायाञ्च नावृत्तिर्नैव तत्क्रिया ६
मधुमध्वितियस्तत्र त्रिर्जपोऽशितुमच्छताम्
गायत्र्यनन्तरं सोऽत्र मधुमन्त्रविवर्जितः ७
नचाश्नत्सु जपेदत्र कदाचित्पितृसंहिताम्
अन्य एव जपः कार्यः सोमसामादिकः शुभः ८
यस्तत्र प्रकरोऽन्नस्य तिलवद्यववत्तथा
उच्छिष्टसन्निधौ सोऽत्र तृप्तेषु विपरीतकः ९
सम्पन्नमिति तृप्ताः स्थ प्रश्नस्थाने विधीयते
सुसम्पन्नमिति प्रोक्ते शेषमन्नं निवेदयेत् १०
प्रागग्रेष्वथ दर्भेषु आद्यमामन्त्र्य पूर्ववत्
अपः क्षिपेन्मूलदेशेऽवनेनिक्ष्वेति पात्रतः ११
द्वितीयञ्च तृतीयञ्च मध्यदेशाग्रदेशयोः
मातामहप्रभृतींस्त्रीनेतेवामेव वामतः १२

सर्वस्मादन्नमुद्धृत्य व्यञ्जनैरुपसिच्य च
संयोज्य यवकर्कन्धूदधिभिः प्राङ्मुखस्ततः १३
अवनेजनवत्पिण्डान्दत्त्वा बिल्वप्रमाणकान्
तत्पात्रक्षालनेनाथ पुनरप्यवनेजयेत् १४
इति तृतीयः खण्डः

चतुर्थः खण्डः
अथ श्राद्धप्रकरणवर्णनम्
उत्तरोत्तरदानेन पिण्डानामुत्तरोत्तरः
भवेदधश्चाधराणामधरश्राद्धकर्मणि १
तस्माच्छ्राद्धेषु सर्वेषु वृद्धिमत्स्वितरेषु च
मूलमध्याग्रदेशेषु ईषत्सक्तांश्च निर्वपेत् २
गन्धादीन्निः क्षिपेत्तूष्णीं तत आचामयेद्द्विजान्
अन्यत्राप्येष एव स्याद्यवादिरहितो विधिः ३
दक्षिणाप्लवने देशे दक्षिणाभिमुखस्य च
दक्षिणाग्रेषु दर्भेषु एषोऽन्यत्र विधिः स्मृतः ४
अथाग्रभूमिमासिञ्चेत्सुसंप्रोक्षितमस्त्विति
शिवा आपः सन्त्विति च युग्मानेवोदकेन च ५
सौमनस्यमस्त्विति च पुष्पदानमनन्तरम्
अक्षतञ्चारिष्टं चास्त्वित्यक्षतान् प्रतिपादयेत् ६
अक्षय्योदकदानं तु अर्घ्यदानवदिष्यते
षष्ठैव नित्यं तत्कुर्यान्न चतुर्थ्या कदाचन ७
अर्घ्येऽक्षय्योदके चैव पिण्डदानेऽवनेजने
तन्त्रस्य तु निवृत्तिः स्यात्स्वधावाचन एव च ८
प्रार्थनासु प्रतिप्रोक्ते सर्वास्वेव द्विजोत्तमैः
पवित्रान्तर्हितान् पिण्डान् सिञ्चेदुत्तानपात्रकृत् ९

युग्मानेव स्वस्ति वाच्यमङ्गुष्ठाग्रग्रहं सदा
कृत्वा धुर्यस्य विप्रस्य प्रणम्यानुव्रजेत्ततः १०
एषः श्राद्धविधिः कृत्स्न उक्तः संक्षेपतो मया
ये विन्दन्ति न मुह्यन्ति श्राद्धकर्मसु ते क्वचित् ११
इदं शास्त्रञ्च गुह्यञ्च परिसंख्यानमेव च
वशिष्ठोक्तञ्च यो वेद स श्राद्धं वेद नेतरः १२
इति चतुर्थः खण्डः

पञ्चमः खण्डः
अथ श्राद्धप्रकरणवर्णनम्
असकृत्वानि कर्माणि क्रियेरन् कर्मकारिभिः
प्रतिप्रयोगं नैताः स्युर्मातरः श्राद्धमेव च १
आधाने होमयोश्चैव वैश्वदेवे तथैव च
बलिकर्मणि दर्शे च पौर्णमासे तथैव च २
नवयज्ञे च यज्ञज्ञावदन्त्येवं मनीषिणः
एकमेव भवेच्छ्राद्धमेतेषु न पृथक् पृथक् ३
नाष्टकासु भवेच्छ्राद्धं न श्राद्धे श्राद्धमिष्यते
न सोष्यन्तीजातकर्म प्रोषितागतकर्मसु ४
विवाहादिः कर्मगणो य उक्तो गर्भाधानं शुश्रुम यस्य चान्ते
विवाहादावेकमेवात्र कुर्याच्छ्राद्धं नादौ कर्मणः कर्मणः स्यात् ५
प्रदोषे श्राद्धमेकं स्याद्गोनिष्क्रामप्रवेशयोः
न श्राद्धं युज्यते कर्त्तुं प्रथमे पुष्टिकर्मणि ६
हलाभियोगादिषु तु षट्सु कुर्यात्पृथक्पृथक्
प्रतिप्रयोगमप्येवानादावेकन्तु कारयेत् ७
वृहत्पत्रक्षुद्रपशुस्वस्त्यर्थं परिविन्यतोः
सूर्येन्द्वोः कर्मणी ये तु तयोः श्राद्धं न विद्यते ८

न दशाग्रन्थिके चैव विषवद्दष्टकर्मणि
कृमिदष्टचिकित्सायां नैव शेषेषु विद्यते  ९
गणशः क्रियमाणेषु मातृभ्यः पूजनं सकृत्
सकृदेव भवेच्छ्राद्धमादौ न पृथगादिषु  १०
यत्र तत्र भवेच्छ्राद्धं तत्र तत्र च मातरः
प्रासङ्गिकमिदं प्रोक्तमतः प्रकृतमुच्यते  ११
इति पञ्चमः खण्डः

षष्ठः खण्डः

अथानेककर्मवर्णनम्

आधानकाला ये प्रोक्तास्तथा यश्चाग्नियोनयः
तदाश्रयोऽग्निमादध्यादग्निमानग्रजो यदि  १
दाराधिगमनाधाने यः कुर्यादग्रजाग्निमः
परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः  २
परिवित्तिपरिवेत्तारौ नरकं गच्छतो ध्रुवम्
अपि चीर्णप्रायश्चित्तौ पादोनफलभागिनौ  ३
देशान्तरस्थक्लीवैकवृषणानसहोदरान्
वेश्यातिसक्तपतितशूद्रतुल्यातिरोगिणः  ४
जडमूकान्धवधिरकुब्जवामनकुण्ठकान्
अतिवृद्धानभार्यांश्च कृषिसक्तान्नृपस्य च  ५
धनवृद्धिप्रसक्तांश्च कामतः कारिणस्तथा
कुलटोन्मत्तचौरांश्च परिविन्दन्न दुष्यति  ६
धनवार्द्धुषिकं राजसेवकं कमकस्तथा
प्रोषितञ्च प्रतीक्षेत वर्षत्रयमपि त्वरन्  ७
प्रोषितं यद्यशृण्वानमब्दादूर्द्ध्वं समाचरेत्
आगते तु पुनस्तस्मिन् पादं तच्छुद्धये चरेत्  ८

लक्षणे प्रागगतायास्तु प्रमाणं द्वादशाङ्गुलम्
तन्मूलसक्ता योदीची तस्या एतन्नवोत्तरम्  ९
उदग्गतायाः संलग्नाः शेषाः प्रादेशमात्रिकाः
सप्तसप्ताङ्गुलांस्त्यक्त्वाकुशेनैव समुल्लिखेत्  १०
मानक्रियायामुक्तायामनुक्ते मानकर्त्तरि
मानकृद्यजमानः स्याद्विदुषामेव निश्चयः  ११
पुण्यमेवादधीताग्निं स हि सर्वैः प्रशस्यते
अनर्द्धुकत्वं यत्तस्य काम्यैस्तन्नीयते शमम्  १२
यस्य दत्ता भवेत्कन्या वाचा सत्येन केनचित्
सोऽन्त्यां समिधमाधास्यन्नादधीतैव नान्यथा  १३
अनूढैव तु सा कन्या पञ्चत्वं यदि गच्छति
न तथा व्रतलोपोऽस्य तेनैवान्यां समुद्वहेत्  १४
अथ चेन्न लभेतान्यां याचमानोऽपि कन्यकाम्
तमग्निमात्मसात्कृत्वा क्षिप्रं स्यादुत्तराश्रमी  १५
इति षष्ठः खण्डः

सप्तमः खण्डः
अथशमीगर्भाद्यनेकप्रकरणवर्णनम्
अश्वत्थो यः शमीगर्भः प्रशस्तोर्वीसमुद्भवः
तस्य या प्राङ्मुखी शाखा वोदीची वोर्द्ध्वगापि वा  १
अरणिस्तन्मयी प्रोक्ता तन्मय्येवोत्तरारणिः
सारवद्दारवञ्चत्रमोविली च प्रशस्यते  २
संसक्तमूलो यः शम्याः स शमीगर्भ उच्यते
अलाभे त्वशमीगर्भादुद्धरेदविलम्बितः  ३
चतुर्विंशतिरङ्गुष्ठदैर्घ्यं षडपि पार्थिवम्
चत्वार उच्छ्रये मानमरण्योः परिकीर्तितम्  ४

अष्टाङ्गुलः प्रमन्थः स्याच्चत्रं स्याद्द्वादशाङ्गुलम्
ओवीली द्वादशैव स्यादेतन्मन्थनयन्त्रकम्  ५
अङ्गुष्ठाङ्गुलमानन्तु यत्र यत्र यत्रोपदिश्यते
तत्र तत्र बृहत्पर्वग्रन्थिभिर्मिनुयात् सदा  ६
गोवालैः शणसंमिश्रैस्त्रिवृत्तममलात्मकम्
व्यामप्रमाणं नेत्रं स्यात् प्रमथ्यस्तेन पावकः  ७
मूर्द्धाक्षिकर्णवक्त्राणि कन्धरा चापि पञ्चमी
अङ्गुष्ठमात्राण्येतानि द्व्यङ्गुष्ठं वक्ष उच्यते  ८
अङ्गुष्ठमात्रं हृदयं त्र्यङ्गुष्ठमुदरं स्मृतम्
एकाङ्गुष्ठा कटिर्ज्ञेया द्वौ वस्तिर्द्वौ च गुह्यकम्  ९
ऊरू जङ्घे च पादौ च चतुस्त्र्येकैर्यथाक्रमम्
अरण्यवयवाह्येते याज्ञिकैः परिकीर्तिताः  १०
यत्तद्गुह्यमिति प्रोक्तं देवयोनिस्तु सोच्यते
अस्यां यो जायते वह्निः स कल्याणकृदुच्यते  ११
अन्येषु ये तु मथ्नन्ति ते रोगभयमाप्नुयुः
प्रथमे मन्थने त्वेष नियमो नोत्तरेषु च  १२
उत्तरारणिनिष्पन्नः प्रमन्थः सर्वदा भवेत्
योनिसङ्करदोषेण युज्यते ह्यन्यमन्थकृत्  १३
आर्द्रा सशुषिरा चैव घूर्णाङ्गी पाटिता तथा
न हिता यजमानानामरणिश्चोत्तरारणिः  १४
इति सप्तमः खण्डः

## अष्टमः खण्डः

अथ सयज्ञस्त्रुवसमिधलक्षणवर्णन्म्

परिधायाहतं वासः प्रावृत्य च यथाविधि
विभृयात्प्राङ्मुखो यन्त्रमावृता वक्ष्यमाणया  १

चत्रवृध्ने प्रमन्थाग्रं गाढं कृत्वा विचक्षणः
कृत्वोत्तराग्रामरणिं तद्बुध्नमुपरिन्यसेत् २
चत्राधेः कीलकाग्रस्था मोविलीमुदगग्रकाम्
विष्टम्भाद्धारयेद्यन्त्रं निष्कम्पं प्रयतः शुचिः ३
त्रिरुद्वेष्टयाथ नेत्रेण चत्रं पत्नयो हतांशुकाः
पूर्वं मथ्नन्त्यरणयान्त्याः प्राच्यग्नेः स्याद्यथा च्युतिः ४
नैकयापि विना कार्य्यमाधानं भार्य्यया द्विजैः
अकृतं तद्विजानीयात्सर्व्वान्वाचारभन्ति यत् ५
वर्णज्यैष्ठयेन वह्वीभिः सवार्णाभिश्च जन्मतः
कार्य्यमग्निच्युतेराभिः साध्वीभिर्मथनं पुनः ६
नात्र शूद्रीं प्रयुञ्जीत न द्रोहद्वेषकारिणीम्
नचैवाव्रतस्थां नान्यपुंसा च सह सङ्गताम् ७
ततः शक्ततरा पश्चादासामन्यतरापि वा
उपेतानां वान्यतमा मन्थेदग्निं निकामतः ८
जातस्य लक्षणं कृत्वा तं प्रणीय समिध्य च
आधाय समिधं चैव ब्रह्माणं चोपवेशयेत् ९
ततः पूर्णाहुतिं हुत्वा सर्वमन्त्रसमन्विताम्
गां दद्याद्यज्ञवास्त्वन्ते ब्रह्मणे वाससी तथा १०
होमपात्रमनादेशे द्रवद्रव्ये स्त्रुवः स्मृतः
पाणिरेवेतरस्मिंस्तु स्त्रुचैवात्र तु हूयते ११
खादिरो वाऽथ पालाशो द्विवितस्तिः स्त्रुवः स्मृतः
स्त्रुग्वाहुमात्रा विज्ञेया वृत्तस्तु प्रग्रहस्तयोः १२
स्त्रुवाग्रे घ्राणवत्खातं द्व्यङ्गुष्ठपरिमण्डलस्थलम्
जुह्वाः शराववत्खातं सनिर्व्वाहं षडङ्गुलं कुर्य्यात् १३
तेषां प्राक्शः कुशैः कार्य्यः संप्रमार्गोजुहुषता
प्रतापनञ्च लिप्तानां प्रक्षाल्योष्णेन वारिणा १४

प्राञ्चं प्राञ्चमुदगग्नेरुदगग्रं समीपतः
तत्तथासादयेद्द्रव्यं यद्यथा विनियुज्यते १५
आज्यं हव्यमनादेशे जुहोति च विधीयते
मन्त्रस्य देवतायाश्च प्रजापतिरिति स्थितिः १६
नाङ्गुष्ठादधिका ग्राह्या समित्स्थूलतया क्वचित्
न वियुक्ता त्वचा चैव न सकीटा न पाटिता १७
प्रादेशान्नाधिका नो न तथा न स्याद्विशाखिका
न सपर्णा न निर्व्वीर्य्या होमेषु च विजानता १८
प्रादेशद्वयमिध्मस्य प्रमाणं परिकीर्तितम्
एवंविधाः स्युरेवेह समिधः सर्वकर्म्मसु १९
समिधोऽष्टादशेध्मस्य प्रवदन्ति मनीषिणः
दर्शे च पौर्णमासे च क्रियास्वन्यासु विंशतिः २०
समिदादिषु होमेषु मन्त्रदैवतवर्जिता
पुरस्ताच्चोपरिष्टाच्च हीन्धनार्थं समिद्भवेत् २१
इध्मोऽप्येधार्थमाचार्यैर्हविराहुतिषु स्मृतः
यत्र चास्य निवृत्तिः स्यात्तत्स्पष्टीकरवाण्यहम् २२
अङ्गहोमसमित्तन्त्रसोष्यन्त्याख्येषु कर्मसु
येषां चैतदुपर्य्युक्तं तेषु तत्सदृशेषु च २३
अक्षभङ्गादिविपदि जलहोमादिकर्म्मणि
सोमाहुतिषु सर्व्वासु नैतेष्विध्म विधीयते २४
इति अष्टमः खण्डः

नवमः खण्डः
अथ सन्ध्याकालाद्युद्दिश्यकर्मवर्णनम्
सूर्य्येऽस्तशैलमप्राप्ते षट्त्रिंशद्भिः सदाङ्गुलैः
प्रादुष्करणमग्नीनां प्रातर्भासाञ्च दर्शनात् १

हस्तादूर्द्ध्वं रविर्यावत् गिरिं हित्वा न गच्छति
तावद्धोमविधिः पुरायो नात्येत्युदितहोमिनाम् २
यावत्सम्यग्न भाव्यन्ते नभस्यृत्ताणि सर्वतः
न च लौहित्यमापैति तावत्सायञ्च हूयते ३
रजोनीहारधूमाभ्रवृत्ताग्रान्तरिते रवौ
सन्ध्यामुद्दिश्य जुहुयाद् हुतमस्य न लुप्यते ४
न कुर्य्यात्त्तिप्रहोमेषु द्विजः परिसमूहनम्
विरुपात्तञ्च न जपेत् प्रवदञ्च विवर्जयेत् ५
पर्य्युत्तणञ्च सर्वत्र कर्त्तव्यमदितेन्विति
अन्ते च वामदेवस्य गानं कुर्य्यादृचस्त्रिधा ६
अहोमकेष्वपि भवेद्यथोक्तं चन्द्रदर्शनम्
वामदेव्यं गणेष्वन्ते कल्पान्ते वैश्वदेविके ७
यान्यधस्तरणान्तानि न तेषु स्तरणं भवेत्
एककार्य्यार्थसाध्यत्वात्परिधीनपि वर्जयेत् ८
वर्हिः पर्य्युत्तणं चैव वामदेव्यजपस्तथा
कृत्वाहुतिषु सर्वासु त्रिकमेतन्न विद्यते ९
हविष्येषु यवामुख्यास्तदनु व्रीहयः स्मृताः
माषकोद्रवगौरादिसर्व्वालाभेऽपि वर्जयेत् १०
पारयाहृतिर्द्वादशपर्वपारिका कंसादिना चेत्स्त्रुवमात्रपावका
दैवेन तीर्थेन च हूयते हविः स्वङ्गारिणि स्वर्च्चिषि तच्च पावके ११
योऽनर्च्चिषि जुहोत्यग्नौ व्यङ्गारिणि च मानवः
मन्दाग्निरामयावी च दरिद्रश्च स जायते १२
तस्मात्समिद्धे होतव्यं नासमिद्धे कदाचन
आरोग्यमिच्छतायुश्च श्रियमात्यन्तिकीम्पराम् १३
होतव्ये च हुते चैव पाणिसूर्पस्फ्यदारुभिः
न कुर्य्यादग्निधमनं कुर्य्याद्वा व्यजनादिना १४

मुखेनैके धमन्त्यग्निं मुखाद्ध्येषोऽध्यजायत
नाग्निं मुखेनेति च यल्लौकिके योजयन्ति तत् १५
इति नवमः खण्डः

दशमः खण्डः
अथ प्रातःकालिकस्नानादिक्रियावर्णनम्

यथाहनि तथा प्रातर्नित्यं स्नायादनातुरः
दन्तान् प्रक्षाल्य नद्यादौ गृहे चेत्तदमन्त्रवत् १
नारदाद्युक्तवार्क्षं यदाष्टाङ्गुलमपाटितम्
सत्वचं दन्तकाष्ठं स्यात्तदग्रेण प्रधावयेत् २
उत्थाय नेत्रे प्रक्षाल्य शुचिर्भूत्वा समाहितः
परिजप्य च मन्त्रेण भक्षयेद्दन्तधावनम् ३
आयुर्बलं यशोवर्च्चः प्रजाःपशुन् वसूनि च
ब्रह्मप्रज्ञाञ्च मेधाञ्च त्वन्नो देहि वनस्पत ४
यव्यद्वयं श्रावणादि सर्व्वा नद्यो रजस्वलाः
तासु स्नानं न कुर्व्वीत वर्जयित्वा समुद्रगाः ५
धनुःसहस्राण्यष्टौ तु गतिर्यासां न विद्यते
न ता नदीः शब्दवहा गर्त्तान्ताः परिकीर्तिताः ६
उपाकर्म्मणि चोत्सर्गे प्रेतस्नाने तथैव च
चन्द्रसूर्य्यग्रहे चैव रजोदोषो न विद्यते ७
वेदाश्छन्दांसि सर्व्वाणि ब्रह्माद्याश्च दिवौकसः
जलार्थिनोऽथ पितरो मरीच्याद्यास्तथर्षयः ८
उपाकर्मणि चोत्सर्गे स्नानार्थं ब्रह्मवादिनः
यियासूननुगच्छन्ति सन्तुष्टाः स्वशरीरिणः ९
समागमस्तु यत्रैषां तत्र हत्यादयोमलाः
नूनं सर्व्वे क्षयं यान्ति किमुतैकं नदीरजः १०

ऋषीणां सिच्यमानानामन्तरालं समाश्रितः
संपिबेद्यः शरीरेण पर्षन्मुक्तजलच्छटाः ११
विद्यादीन् ब्राह्मणः कामान् वरादीन् कन्यका ध्रुवम्
आमुष्मिकान्यपि सुखान्याप्नुयात्स न संशयः १२
अशुच्यशुचिना दत्तमाममन्तर्जलादिना
अनिर्गतदशाहास्तु प्रेता रक्षांसि भुञ्जते १३
स्वर्धुन्यम्भः समानि स्युः सर्वाण्यम्भांसि भूतले
कूपस्थान्यपि सोमार्कग्रहणे नात्र संशयः १४

इति दशमः खण्डः

इति कर्मप्रदीपपरिशिष्टे कात्यायनविरचिते प्रथमः प्रपाठकः

एकादशः खण्डः

अथ सन्ध्योपासनविधिवर्णनम्

अत ऊर्ध्वं प्रवक्ष्यामि सन्ध्योपासनकं विधिम्
अनर्हः कर्मणां विप्रः सन्ध्याहीनो यतः स्मृतः १
सव्ये पाणौ कुशान् कृत्वा कुर्यादाचमनक्रियाम्
ह्रस्वाः प्रचरणीयाः स्युः कुशा दीर्घास्तु वर्हिषः २
दर्भाः पवित्रमित्युक्तमतः सन्ध्यादिकर्मणि
सव्यः सोपग्रहः कार्यो दक्षिणः सपवित्रकः ३
रक्षयेद्वारिणात्मानं परिक्षिप्य समन्ततः
शिरसो माजनं कुर्यात्कुशैः सोदकविन्दुभिः ४
प्रणवो भूर्भुवःस्वश्च सावित्री च तृतीयका
अब्दैवत्यं त्र्यृचश्चैव चतुर्थमिति मार्जनम् ५
भूराद्यास्तिस्र एवैता महाव्याहृतयोऽव्ययाः
महर्जनस्तपः सत्यं गायत्री च शिरस्तथा ६
आपोज्योतीरसोमृतं ब्रह्मभूर्भुवः स्वरतिशिरः

प्रतीप्रतीकं प्रणवमुच्चारयेदन्ते च शिरसः ७
एता एतां सहानेन तथैभिर्द्दशभिः सह
त्रिर्जपेदायतप्राणः प्राणायामः स उच्यते ८
करेणोद्धृत्य सलिलं घ्राणमासज्य तत्र च
जपेदनायतासुर्वा त्रिः सकृद्वाघमर्षणम् ९
उत्थायार्कं प्रतिप्रोहेत्त्रिकेणाञ्जलिनाम्भसः
उच्चित्रमृग्द्वयेनाथ चोपतिष्ठेदनन्तरम् १०
सन्ध्याद्वयेऽप्युपस्थानमेतदाहुर्मनीषिणः
मध्ये त्वह्न उपर्यस्य विभ्राडादीच्छया जपेत् ११
तदसंसक्तपार्ष्णिर्वा एकापादर्द्धपादपि
कुर्यात्कृताञ्जलिर्वापि ऊर्द्ध्वबाहुरथापि वा १२
यत्र स्यात्कृच्छ्रभूयस्त्वं श्रेयसोऽपि मनीषिणः
भूयस्त्वं ब्रुवते तत्र कृच्छ्राच्छ्रेयो ह्यवाप्यते १३
तिष्ठेदुदयनात्पूर्वां मध्यमामपि शक्तितः
आनीतोडुद्गमाच्चान्त्यां सन्ध्यां पूर्वात्रिकं जपन् १४
एतत्सन्ध्यात्रयं प्रोक्तं ब्राह्मण्यं यत्र तिष्ठति
यस्य नास्त्यादरस्तत्र न स ब्राह्मण उच्यते १५
सन्ध्यालोपाच्च चकितः स्नानशीलश्च यः सदा
तं दोषानोपसर्पन्ति गरुत्मन्तमिवोरगाः १६
वेदमादित आरभ्य शक्तितोऽहरहर्ज्जपेत्
उपतिष्ठेत्ततो रुद्रसर्वाद्वा वैदिकाज्जपात् १७
इति एकादशः खण्डः

द्वादशः खण्डः
अथ तर्पणविधिवर्णनम्

अथाद्भिस्तर्पयेद्देवान् सतिलाभिः पितॄनपि

नमोऽन्ते तर्पयामीति आदावोमीति च ब्रुवन् १
ब्रह्माणं विष्णुं रुद्रं प्रजापतिं वेदान् देवांश्छन्दांस्यृषीन् पुराणाना-
चार्यान् गन्धर्वानितरान्मासं संवत्सरं सावयवं देवीरप्सरसो देवा-
नुगान्नागान् सागरान् पर्वतान् सरितो दिव्यान् मनुष्यानितरान् मनुष्यान्
यक्षान् रक्षांसि सुपर्णान् पिशाचान् पृथिवीमोषधीः पशून् वनस्पतीन्
भूतग्रामं चतुर्विधमित्युपवीत्यथप्राचीनावीती यमं यमपुरुषान् कव्य-
वाडनलं सोमं यममर्य्यमणमनिष्वात्तान् सोमपीथान् वर्हिषदोऽथ
स्वान् पितॄन् सकृत् सकृन्मातामाहांश्चेति प्रतिपुरुषमभ्यस्येज्येष्ठ-
भ्रातृश्वशुरपितृव्यमातुलांश्च पितृवंशमातृवंशौ ये चान्ये मत्त उदक-
मर्हन्ति तांस्तर्पयामीत्ययमवसानाञ्जलिरथ छायां यथेच्छेच्छरदात-
पात्तः परः पिपासुः क्षुधितोऽलमन्नम् ।
बालो जनित्रीं जननी च बालं योषित्पुमांसं पुरुषश्च योषाम् ३
तथा सर्वाणि भूतानि स्थावराणि चराणि च
विप्रादुदकमिच्छन्ति सर्वाभ्युदयकृद्धि सः ४
तस्मात्सदैव कर्तव्यमकुर्वन्महतैनसा
युज्यते ब्राह्मणः कुर्वन्विश्वमेतद्बिभर्त्ति हि ५
अल्पत्वाद्धोमकालस्य बहुत्वात्स्नानकर्मणः
प्रातर्न तनुयात् स्नानं होमलोपो हि गर्हितः ६
इति द्वादशखण्डः

त्रयोदशखण्डः

अथ पञ्चमहायज्ञविधिवर्णनम्

पञ्चानामथ सत्राणां महतामुच्यते विधिः
यैरिष्टा सततं विप्रः प्राप्नुयात्सद्म शाश्वतम् १
देवभूतपितृब्रह्ममनुष्याणामनुक्रमात्
महासत्राणि जानीयात् एवेह महामखाः २

अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्
होमो दैवो वलिर्भौतो नृयज्ञोऽतिथिपूजनम्  २
श्राद्धं वा पितृयज्ञः स्यात्पित्र्यो बलिरथापि वा
यश्च श्रुतिजयः प्रोक्तो ब्रह्मयज्ञः स वोच्यते  ४
स चार्वाक् तर्पणात्कार्यः पश्चाद्वा प्रातराहुतेः
वैश्वदेवावसाने वा नान्यत्रर्तौ निमित्तकात्  ५
अप्येकमाशयेद्विप्रं पितृयज्ञार्थसिद्धये
अदैवं नास्ति चेदन्यो भोक्ता भोज्यमथापि वा  ६
अप्युद्धृत्य यथाशक्त्या किञ्चिदन्नं यथाविधि
पितृभ्योऽथ मनुष्येभ्यो दद्यादहरहर्द्विजे  ७
पितृभ्य इदमित्युक्त्वा स्वधाकारमुदीरयेत्
हन्तकारं मनुष्येभ्यस्तदर्द्धे निनयेदपः  ८
मुनिभिर्द्विरसनमुक्तं विप्राणां मर्त्यवासिनां नित्यम्
अहनि च तथा तमस्विन्यां सार्द्धप्रथमयामान्तः  ९
सायं प्रातर्वैश्वदेवः कर्तव्यो बलिकर्म च
अनश्नतापि सततमन्यथा किल्विषी भवेत्  १०
अमुष्मै नम इत्येवं बलिदानं विधीयते
बलिदानप्रदानार्थं नमस्कारः कृतो यतः  ११
स्वाहाकारवषट्कारनमस्कारा दिवौकसाम्
स्वधाकारः पितृणाञ्च हन्तकारो नृणां कृतः  १२
स्वधाकारेण निनयेत् पित्र्यं बलिमतः सदा
तदध्येके नमस्कारं कुर्वते नेति गौतमः  १३
नावराद्धर्यावलयो भवन्ति महामार्जारश्रवणप्रमाणात्
एकत्र चेदविकृष्टा भवन्तीतरेतरसंसक्ताश्च  १४

इति त्रयोदशखण्डः

## चतुर्दशखराडः

## अथ ब्रह्मयज्ञविधिवर्णनम्

अथ तद्भिन्यासोवृद्धिपिराडानिवोत्तरांश्चतुरोवलीन्निदध्यात्
पृथिव्यै वायवे विश्वेभ्यो देवेभ्यः प्रजापतय इति सव्यत
एतेषामेकैकमद्भ्य ओषधिवनस्पतिभ्य आकाशाय कामायेत्येतेषामपि
मन्यव इन्द्राय वासुकये ब्रह्मण इत्येतेषामपि रक्षोजनेभ्य इति सर्वेषां
दक्षिणतः पितृभ्य इति चतुर्द्दश नित्या आशस्य प्रभृतयः काम्याः
सर्वेषामुभयतोऽद्भिः परिषेकः पिराडवच्च पश्चिमा प्रतिपत्तिः १
न स्यातां काम्यसामान्ये जुहोति बलिकर्मणी
पूर्वं नित्यविशेषोक्तं जुहोति बलिकर्मणोः २
कामान्ते च भवेयातां न तु मध्ये कदाचन
नैकस्मिन् कर्मणि तते कर्मारयत्तायते यतः ३
अग्न्यादिर्गौतमाद्युक्तो होमः शाकल एव च
अनाहिताग्नेरप्येष युज्यते बलिभिः सह ४
स्पृष्ट्वापो वीक्षमाणोऽग्निं कृताञ्जलिपुटस्ततः
वामदेव्यजपात्पूर्वं प्रार्थयेद्द्रविणोदकम् ५
आरोग्यमायुरैश्वर्य्यं धीर्धृतिः शं बलं यशः
ओजो वर्च्चः पशून् वीर्यं ब्रह्म ब्रह्मरायमेव च ६
सौभाग्यं कर्मसिद्धिञ्च कुलज्यैष्ठ्यं सुकर्तृताम्
सर्वमेतत् सर्वसाक्षिन् द्रविणोदरिरीहिणः ७
न ब्रह्मयज्ञादधिकोऽस्ति यज्ञो न तत्प्रदानात्परमस्ति दानम्
सर्वे तदन्ताः क्रतवः सदानानान्तो दृष्टः कैश्चिदस्य द्विकस्य ८
ऋचः पठन् मधुपयः कुल्याभिस्तर्पयेत् सुरान्
घृतामृतौघकुल्याभिर्यजूंष्यपि पठन् सदा ९
सामान्यपि पठन् सोमघृतकुल्याभिरन्वहम्
मेदः कुल्याभिरपि च आथर्वाङ्गिरसः पठन् १०

मांसक्षीरौदनमधुकुल्याभिस्तर्पयेत् पठन्
वाकोवाक्यं पुराणानि इतिहासानि चान्वहम् ११
ऋगादीनामन्यतममेतेषां शक्तितोऽन्वहम्
पठन्मध्वाज्यकुल्याभिः पितॄनपि च तर्पयेत् १२
ते तृप्तास्तर्पयन्त्येनं जीवन्तं प्रेतमेव च
कामचारी च भवति सर्वेषु सुरसद्मसु १३
जुर्व्वप्येनो न तं स्पृशेत् पंक्तिञ्चैव पुनाति सः
यं यं क्रतुञ्च पठति फलभाक्तस्य तस्य च १४
वसुपूर्णा वसुमती त्रिर्दानफलमाप्नुयात्
ब्रह्मयज्ञादपि ब्रह्म दानमेवातिरिच्यते १५
इति चतुर्दशखण्डः

पञ्चदशखण्डः
अथ यज्ञविधिवर्णनम्

ब्रह्मणो दक्षिणा देया यत्र या परिकीर्तिता
कर्मान्तेऽनुच्यमानापि पूर्णपात्रादिका भवेत् १
यावता बहुभोक्तुस्तु तृप्तिः पूर्णेन विद्यते
नावराद्धर्यमतः कुर्यात् पूर्णपात्रमिति स्थितिः २
विदध्याद्धौत्रमन्यश्चेद्दक्षिणार्द्धहरो भवेत्
स्वयञ्चेदुभयं कुर्यादन्यस्मै प्रातिपादयेत् ३
कुलर्त्विजमधीयानं सन्निकृष्टं तथा गुरुम्
नातिक्रामेत्सदा दित्सन् य इच्छेदात्मनो हितम् ४
अहमस्मै ददामीति एवमाभाष्य दीयते
नैतावपृष्ट्वा ददतः पात्रेऽपि फलमस्ति हि ५
दूरस्थाभ्यामपि द्वाभ्यां प्रदाय मनसा वरम्
इतरेभ्यस्ततो देयादेष दानविधिः परः ६

सन्निकृष्टगधीयानं ब्राह्मणं यो व्यतिक्रमेत्
यद्ददाति तमुल्लङ्घ्य ततस्तेयेन युज्यते ७
यस्य त्वेक गृहे मूर्खो दूरस्थश्च गुणान्वितः
गुणान्विताय दातव्यं नास्ति मूर्खे व्यतिक्रमः ८
ब्राह्मणाभिक्रमो नास्ति विप्रे वेदविवर्जिते
ज्वलन्तमग्निमुत्सृज्य न हि भस्मनि हूयते ९
आज्यस्थाली च कर्तव्या तैजसद्रव्यसम्भवा
महीमयी वा कर्तव्या सर्वास्वाज्याहुतीषु च १०
आज्यस्थाल्याः प्रमाणं तु यथाकामन्तु कारयेत्
सुदृढामव्रणां भद्रामाज्यस्थालीं प्रचक्षते ११
तिर्यगूर्द्ध्वं समिन्मात्रा दृढा नातिवृहन्मुखी
मृन्मय्यौदुम्बरी वाऽपि चरुस्थाली प्रशस्यते १२
स्वशाखोक्तः प्रसुस्विन्नो ह्यदग्धोऽकठिनः शुभः
नचातिशिथिलः पाच्यो न चरुश्चारसस्तथा १३
इध्मजातीयमिध्मार्द्धप्रमाणं मेक्षणं भवेत्
वृत्तं चाङ्गुष्ठपृथ्वग्रमवदानक्रियाक्षमम् १४
एषैव दर्वी यस्तत्र विशेषस्तमहं ब्रुवे
दर्वी द्व्यङ्गुलपृथ्वग्रा तुरीयो नन्तमेक्षमम् १५
मुषलोलूखले वार्क्षे स्वायते सुदृढे तथा
इच्छाप्रमाणे भवतः शूर्पं वैणवमेव च १६
दक्षिणं वामतो वाह्यमात्माभिमुखमेव च
करं करस्य कुर्वीत करणे न्यञ्चकर्मणः १७
कृत्वाग्न्यभिमुखौ पाणी स्वस्थानस्थौ सुसंयतौ
प्रदक्षिणं तथासीनः कुर्यात्परिसमूहनम् १८
बाहुमात्राः परिधय ऋजवः सत्वचोऽव्रणाः
त्रयो भवन्ति शीर्णाग्रा एकेषान्तु चतुर्दिशम् १९

प्रागग्रावभितः पश्चादुदग्रमथवापरम्
न्यसेत्परिधिमन्यञ्चेदुदगग्रः स पूर्वतः  २०
यथोक्तवस्त्वसम्पत्तौ ग्राह्यं तदनुकारि यत्
यवानामिव गोधूमा व्रीहीणामिव शालयः  २१
इति पञ्चदशखण्डः

षोडशखण्डः

अथ श्राद्धतिथिविशेषेणविधिवर्णनम्

पिण्डान्वाहार्यकं श्राद्धं क्षीणे राजनि शस्यते
वासरस्य तृतीयांशे नातिसन्ध्यासमीपतः  १
यदा चतुर्द्दशीयामं तुरीयमनुपूरयेत्
अमावास्या क्षीयमाणा तदैव श्राद्धमिष्यते  २
यदुक्तं यदहस्त्वेव दर्शनं नैति चन्द्रमाः
अनयापेक्षया ज्ञेयं क्षीणे राजनि चेत्यपि  ३
यच्चोक्तं दृश्यमानेऽपि तच्चतुर्द्दश्यपेक्षया
अमावास्यां प्रतीक्षेत तदन्ते वापि निर्वपेत्  ४
अष्टमेंऽशे चतुर्द्दश्याः क्षीणो भवति चन्द्रमाः
अमावास्याष्टमांशे च पुनः किल भवेदणुः  ५
आग्रहायण्यमावास्या तथा ज्यैष्ठस्य या भवेत्
विशेषमाभ्यां ब्रुवते चन्द्रचारविदो जनाः  ६
अत्रेन्दुराद्ये प्रहरेऽवतिष्ठते चतुर्थभागो न कलावशिष्टः
तदन्त एव क्षयमेति कृत्स्नमेवं ज्योतिश्चक्रविदोवदन्ति  ७
यस्मिन्नब्दे द्वादशैकश्च यव्यस्तस्मिंस्तृतीयया परिदृश्यो नोपजायते ।
एवं चारं चन्द्रमसो विदित्वा क्षीणे तस्मिन्नपराह्णे च दद्यात्  ८
सम्मिश्रा या चतुर्दश्या अामावास्या भवेत् क्वचित्
खर्वितां तां विदुः केचिद्गताध्वामिति चापरे  ९

वर्द्धमानाममावास्यां लभेच्चेदपरेऽहनि
यामांस्त्रीनधिकान् वापि पितृयज्ञस्ततो भवेत् १०
पद्मादावेव कुर्व्वीत सदा पद्मादिकं चरुम्
पूर्वाह्ण एव कुर्व्वन्ति विद्धेऽप्युन्ये मनीषिणः ११
स्वपितुः पितृकृत्येषु ह्यधिकारो न विद्यते
न जीवन्तमतिक्रम्य किञ्चिदद्यादिति श्रुतिः १२
पितामहे ध्रियन्ते च पितुः प्रेतस्य निर्वपेत्
पितुस्तस्य च वृत्तस्य जीवेच्चेत् प्रपितामहः १३
पितुः पितुः पितुश्चैव तस्यापि पितुरेव च
कुर्य्यात्पिण्डत्रयं यस्य संस्थितः प्रपितामहः १४
जीवन्तमपि दद्याद्वा प्रेतायान्नोदके द्विजः
पितुः पितृभ्यो वा दद्यात्स्वपितेत्यपरा श्रुतिः १५
पितामहः पितुः पश्चात्पञ्चत्वं यदि गच्छति
पौत्रेणैकादशाहादि कर्तव्यं श्राद्धषोडशम् १६
नैतत्पौत्रेण कर्त्तव्यं पुत्रवांश्चेत्पितामहः
पितुः सपिण्डनं कृत्वा कुर्य्यान्मासानुमासिकम् १७
असंस्कृतौ न संस्कार्यौ पूर्व्वौ पौत्रप्रपौत्रकैः
पितरं तत्र संस्कुर्य्यादिति कात्यायनोऽब्रवीत् १८
पापिष्ठमति शुद्धेन शुद्धं पापीकृतापि वा
पितामहेन पितरं संस्कुर्य्यादिति निश्चयः १९
ब्राह्मणादिहते ताते पतिते सङ्गवर्जिते
व्युत्क्रमाच्च मृते देयं येभ्य एव ददात्यसौ २०
मातुः सपिण्डीकरणं पितामह्या सहोदितम्
यथोक्तेनैव कल्पेन पुत्रिकया न चेत्सुतः २१
न योषिद्भ्यः पृथग्दद्यादवसानदिनादृते
स्वभर्तृपिण्डमात्राभ्यस्तृप्तिरासां यतः स्मृता २२

मातुः प्रथमतः पिण्डं निर्व्वपेत्पुत्रिकासुतः
द्वितीयन्तु पितुस्तस्यास्तृतीयन्तु पितुः पितुः २३
इति षोडशखण्डः

सप्तदशखण्डः
अथ श्राद्धवर्णनम्
पुरतो आत्मनः कर्षूः सा पूर्व्वा परिकीर्त्यते
मध्यमा दक्षिणेनास्यास्तद्दक्षिणतदुत्तमा १
वाय्वग्निदिङ्मुखान्तास्ताः कार्य्याः सार्द्धाङ्गुलान्तराः
तीक्ष्णान्ता यवमध्याश्च मध्यं नाव इवोत्किरेत् २
शङ्कुश्च खादिरः कार्य्यो रजतेन विभूषितः
शङ्कुश्चैवोपवेषश्च द्वादशाङ्गुल इष्यते ३
अग्न्याशाग्रैः कुशैः कार्य्यं कर्षूणां स्तरणं घनैः
दक्षिणान्तं तदग्रैस्तु पितृयज्ञो परिस्तरेत् ४
स्थगरं सुरभिर्ज्ञेयं चन्दनादि विलेपनम्
सौवीराञ्जनमित्युक्तं पिञ्जलीनां यदञ्जनम् ५
स्वस्तरे सर्व्वमासाद्य यथावदुपयुज्यते
देवपूर्वं ततः श्राद्धमत्वरः शुचिरारभेत् ६
आसनाद्यर्घपर्य्यन्तं वशिष्ठेन यथेरितम्
कृत्वा कर्म्माथ पात्रेषु उक्तं दद्यात्तिलोदकम् ७
तूष्णीं पृथगपो दत्त्वा मन्त्रेण तु तिलोदकम्
गन्धोदकञ्च दातव्यं सन्निकर्षक्रमेण तु ८
आसुरेण तु पात्रेण यस्तु दद्यात्तिलोदकम्
पितरस्तस्य नामनन्ति दश वर्षाणि पञ्च च ९
कुलालचक्रनष्पिन्नमासुरं मृण्मयं स्मृतम्
तदेव हस्तघटितं स्थाल्यादि दैविकं भवेत् १०

गन्धान्ब्राह्मणसात्कृत्वा पुष्पाण्यतु भवानि च
धूपञ्चैवानुपूर्वेण ह्यग्नौ कुर्य्यादनन्तरम् ११
अग्नौ करणहोमश्च कर्त्तव्य उपवीतिना
प्राङ्मुखेनैव देवेभ्यो जुहोतीति श्रुतिश्रुतेः १२
अपसव्येन वा कार्य्यो दक्षिणाभिमुखेन च
निरुप्य हविरन्यस्मादन्यस्मै न हि हूयते १३
स्वाहा कुर्य्यान्न चात्रान्ते न चैव जुहुयाद्धविः
स्वाहाकारेण हुत्वाग्नौ पश्चान्मन्त्रं समापयेत् १४
पित्र्ये यः पंक्तिमूर्द्धन्यस्तस्य पाणावनग्निमान्
हुत्वा मन्त्रवदन्येषां तूष्णीं पात्रेषु निःक्षिपेत् १५
नोङ्कुर्याद्धोममन्त्राणां पृथगादिषु कुत्रचित्
अन्येषाञ्चाविकृष्टानां कालेनाचमनादिना १६
सव्येन पाणिनेत्येवं यदत्र समुदीरितम्
परिग्रहणमात्रन्तत् सव्यस्यादिशति व्रतम् १७
पिञ्जूल्याद्यभिसंगृह्य दक्षिणे नेतरात् करात्
अन्वारभ्य च सव्येन कुर्यादुल्लेखनादिकम् १८
यावदर्थमुपादाय हविषोऽर्भकमर्भकम्
चरुणा सह सन्नीय पिण्डान् दातुमुपक्रमेत् १९
पितुरुत्तरकर्ष्वंशे मध्यमे मध्यमस्य तु
दक्षिणे तत्पितुश्चैव पिण्डान् पर्वणि निर्वपेत् २०
वाममावर्त्तनां केचिदुदगन्तं प्रचक्षते
सर्वां गौतमशाण्डिल्यौ शाण्डिल्यायन एव च २१
आवृत्य प्राणमायम्य पितॄन् ध्यायन् यथार्थतः
जपंस्तेनैव चावृत्य ततः प्राणं प्रमोचयेत् २२
शाकञ्च फाल्गुनाष्टम्यां स्वयं पत्न्यपि वा पचेत्
यस्तु शाकादिको होमः कार्योऽपूपाष्टकावृतः २३

अन्वाष्टक्यं मध्यमायामिति गोभिलगोतमौ
वार्कषण्डिश्च सर्वासु कौत्सो मेनेऽष्टकासु च २४
स्थालीपाकं पशुस्थाने कुर्याद्यद्यानुकल्पितम्
श्रपयेत्तं सवत्सायास्तरुण्यागोः पयस्तथा २५
इति सप्तदशः खण्डः

अष्टादशः खण्डः
अथ विवाहाग्निहोमविधानवर्णनम्

सायमादि प्रातरन्तमेकं कर्म प्रचक्षते
दर्शान्तं पौर्णमासाद्यमेकमेव मनीषीषिणः १
ऊर्द्ध्वं पूर्णाहुतेर्द्दर्शः पौर्णमासोऽपि वाग्रिमः
य आयाति स होतव्यः स एवादिरिति श्रुतिः २
ऊर्द्ध्वं पूर्णाहुतेः कुर्यात्सायं होमादनन्तरम्
वैश्वदेवन्तु पाकान्ते बलिकर्मसमन्वितम् ३
ब्राह्मणान् भोजयेत् पश्चादभिरूपान्स्वशक्तितः
यजमानस्ततोऽश्नीयादिति कात्यायनोऽब्रवीत् ४
वैवाहिकेऽग्नौ कुर्वीत सायंप्रातस्त्वतन्द्रितः
चतुर्थीकर्म कृत्वैतदेतच्छाटयायनेर्मतम् ५
ऊर्द्ध्वं पूर्णाहुतेः प्रातर्हुत्वा तां सायमाहुतिम्
प्रातर्होमस्तदैव स्यादेष एवोत्तरो विधिः ६
पौर्णमासात्यये हव्यं होता वा यदहर्भवेत्
तदहर्ज्जुहुयादेवममावास्यात्ययेऽपि च ७
अहूयमानेऽनश्नंश्चेन्नयेत्कालं समाहितः
सम्पन्ने तु यथा तत्र हूयते तदिहोच्यते ८
आहुताः परिसंख्याय पात्रे कृत्वाहुतीः सकृत्
मन्त्रेण विधिवद् हुत्वाधिकमेवापरा अपि ९

यत्र व्याहृतिभिर्होमः प्रायश्चित्तात्मको भवेत्
चतस्रस्तत्र विज्ञेयाः स्त्रीपाणिग्रहणे यथा १०
अपि वाज्ञातमित्येषा प्राजापत्यापि चाहुतिः
होतव्या त्रिविकल्पो यं प्रायश्चित्तविधिः स्मृतः ११
यद्यग्निरग्निनान्येन सम्भवेदाहितः क्वचित्
अग्नये विविचय इति जुहुयाद्वा घृताहुतिम् १२
अग्नयेऽप्सुमते चैव जुहुयाद्वैद्युतेन चेत्
अग्नये शुचये चैव जुहुयाच्चेदनग्निना १३
गृहदाहाग्निनाग्निस्तु यष्टव्यः क्षामवान् द्विजैः
दावाग्निना च संसर्गो हृदयं यदि तप्यते १४
द्विर्भूतो यदि संसृज्येत्संसृष्टमुपशामयेत्
असंसृष्टं जागरये गिरिशर्मैवमुक्तवान् १५
न स्वेऽग्नावन्यहोमः स्यान्मुक्त्वैकां समिदाहुतिम्
स्वगर्भसत्क्रियार्थाश्च यावच्चासौ प्रजायते १६
अग्निस्तु नामधेयादौ होमे सर्वत्र लौकिकः
न हि पित्रा समानीतः पुत्रस्य भवति क्वचित् १७
यस्याग्नावन्यहोमः स्यात्स वैश्वानरदैवतम्
चरुं निरुप्य जुहुयात् प्रायश्चित्तं तु तस्य तत् १८
परेणाग्नौ हुते स्वार्थं परस्याग्नौ हुते स्वयम्
पितृयज्ञात्यये चैव वैश्वदेवद्वयस्य च १९
अनिष्ट्वा नवयज्ञेन नबान्नप्राशने तथा
भोजने पतितान्नस्य चरुर्वैश्वानरो भवेत् २०
स्वपितृभ्यः पिता दद्यात् सुतसंस्कारकर्मसु
पिण्डानोद्वहनात्तेषां तायाभावे तु तत्क्रमात् २१
भूतप्रवाचने पत्नी यद्यसन्निहिता भवेत्
रजोरोगादिना तत्र कथं कुर्वन्ति याज्ञिकाः २२

महानसेऽन्नं या कुर्यात्सवर्णा तां प्रवाचयेत्
प्रणवाद्यपि वा कुर्यात् कात्यायनवचो यथा २३
याज्ञवास्तुनि मुष्ट्याञ्च स्तम्बे दर्भवटौ तथा
दर्भसंख्या न विहिता विष्टरास्तरणेषु च
इत्यष्टादशः खण्डः

एकोनविंशतिः खण्डः
अथ सकतव्यता स्त्रीधर्मवर्णनम्

निःक्षिप्याग्निं स्वदारेषु परिकल्प्यार्त्विजं तथा
प्रवसेत्कार्यवान् विप्रो मृषैव न चिरं क्वचित् १
मनसा नैत्यकं कर्म प्रवसन्नप्यतन्द्रितः
उपविश्य शुचिः सर्वं यथाकालमनुद्रवेत् २
पत्न्या चाप्यवियोगिन्या शुश्रूष्योऽग्निर्विनीतया
सौभाग्यवित्तावैधव्यकामया भर्तृभक्तया ३
या वा स्याद्वीरसूरासामाज्ञासम्पादिनी प्रिया
दक्षा प्रियंवदा शुद्धा तामत्र विनियोजयेत् ४
दिनत्रयेण वा कर्म यथा ज्यैष्ठं स्वशक्तितः
विभज्य सह वा कुर्युर्यथाज्ञानञ्च शास्त्रवत् ५
स्त्रीणां सौभाग्यतो ज्यैष्ठं विद्ययैव द्विजन्मनाम्
नहि ख्यात्या न तपसा भर्त्ता तुष्यति योषिताम् ६
भर्त्तुरादेशवर्त्तिन्या यथोमा बहुभिर्व्रतैः
अग्निश्च तोषितोऽमुत्र सा स्त्री सौभाग्यमाप्नुयात् ७
विनयावनताऽपि स्त्री भर्त्तुर्या दुर्भगा भवेत्
अमुत्रोमाग्निभतृणामवज्ञातिकृता तथा ८
श्रोत्रियं सुभगां गाञ्च साग्निमग्निचितिं तथा
प्रातरुत्थाय यः पश्येदापद्भ्यः स प्रमुच्यते ९

पापिष्टं दुर्भगामन्त्यं नग्नमुत्कृत्तनासिकम्
प्रातरुत्थाय यः पश्येत्स कालरुपयुज्यते १०
पतिमुल्लङ्घ्य मोहात्स्त्री कं कं न नरकं व्रजेत्
कृच्छ्रान्मनुष्यतां प्राप्य किं किं दुःखं न विन्दति ११
पतिशुश्रूषयैव स्त्री कान्न लोकान् समश्नुते
दिवः पुनरिहायाता सुखानामम्बुधिर्भवेत् १२
सदारोऽन्यान् पुनर्दारान् कथञ्चित् कारणान्तरात्
य इच्छेदग्निमान् कर्तुं द्युहोमोऽस्य विधीयते १३
स्वेऽग्नावेव भवेद्धोमो लौकिके न कदाचन
न ह्याहिताग्नेः स्वं कर्म लौकिकेऽग्नौ विधीयते १४
षडाहुतिकमन्येन जुहुयाद् ध्रुवदर्शनात्
न ह्यात्मनोऽर्थं स्यात्तावद्यावन्न परिणीयते १५
पुरस्तात्त्रिविकल्पं यत्प्रायश्चित्तमुदाहृतम्
तत्षडाहुतिकं शिष्टैर्यज्ञविद्भिः प्रकीर्तितम् १६

एकोनविंशतितमः खण्डः

इति कात्यायनविरचिते कर्मप्रदीपे द्वितीयः प्रपाठकः

अथ विंशः खण्डः

अथ द्वितीयादिस्त्रीकृतेसतिवैदिकाग्निवर्णनम्

असमक्षन्तु दम्पत्योर्होतव्यं नर्त्विगादिना
द्वयोरप्यसमक्षं हि भवेद् हुतमनर्थकम् १
विहायाग्निं सभार्यश्चेत्सीमामुल्लङ्घ्य गच्छति
होमकालात्यये तस्य पुनराधानमिष्यते २
अरण्योः क्षयनाशाग्निदाहेष्वग्निं समाहितः
पालयेदुपशान्तेऽस्मिन् पुनराधानमिष्यते ३
ज्येष्ठा चेद्बहुभार्यस्य अतिचारेण गच्छति

पुनराधानमत्रैक इच्छन्ति न तु गौतमः ४
दाहयित्वाग्निभिर्भार्यां सदृशीं पूर्वसंस्थिताम्
पात्रैश्चाथाग्निमादध्यात्कृतदारोऽविलम्बितः ५
एवंवृत्तां सवर्णां स्त्रीं द्विजातिः पूर्वसारिणीम्
दाहयित्वाग्निहोत्रेण यज्ञपात्रैश्च धर्मवित् ६
द्वितीयाञ्चैव यः पत्नीं दहेद्वैतानिकाग्निभिः
जीवत्यां प्रथमायान्तु ब्रह्मघ्नेन समं हि तत् ७
मृतायान्तु द्वितीयायां योऽग्निहोत्रं समुत्सृजेत्
ब्रह्मोज्झं तं विजानीयाद्यश्च कामात्समुत्सृजेत् ८
मृतायामपि भर्य्यायां वैदिकाग्निं न हि त्यजेत्
उपाधिनापि तत्कर्म यावज्जीवं समापयेत् ९
रामोऽपि कृत्वा सौवर्णीं सीतां पत्नीं यशस्विनीम्
ईजे यज्ञैर्बहुविधैः सह भ्रातृभिरच्युतः १०
यो दहेदग्निहोत्रेण स्वेन भार्य्यां कथञ्चन
सा स्त्री सम्पद्यते तेन भार्य्या वास्य पुमान् भवेत् ११
भार्य्या मरणमापन्ना देशान्तरगतापि वा
अधिकारी भवेत्पुत्रो महापातकिनि द्विजे १२
मान्या चेन्म्रियते पूर्वं भार्य्या पतिविमानिता
त्रीणि जन्मानि सा पुंस्त्वं पुरुषः स्त्रीत्वमर्हति १३
पूर्वैव योनिः पूर्वावृत्पुनराधानकर्मणि
विशेषोऽत्राग्न्युपस्थानमाज्याहुत्यष्टकं तथा १४
कृत्वा व्याहृतिहोमान्तमुपतिष्ठेत पावकम्
अध्यायः केवलाग्नेयः कस्तेजामिरमानसः १५
अग्निमीले अग्न आयाह्यग्न आयाहि वीतये
तिस्त्रोऽग्निर्ज्योतिरित्यग्निं दूतमग्ने मृडेति च १६
इत्यष्टावाहुतीर्हुत्वा यथाविध्यनुपूर्वशः

पूर्णाहुत्यादिकं सर्वमन्यत्पूर्ववदाचरेत् १७
अरण्योरल्पमप्यङ्गं यावत्तिष्ठति पूर्वयोः
न तावत्पुनराधानमन्यारण्योर्विधीयते १८
विनष्टं स्रुक् स्रुवं न्युब्जं प्रत्यक्स्थलमुदर्च्चिषि
प्रत्यगप्रञ्च मुषलं प्रहरेज्ञातवेदसि १९
इति विंशः खण्डः

अथैकविंशः खण्डः
अथ मृतदाहसंस्कारवर्णनम्
स्वयं होमासमर्थस्य समीपमुपसर्पणम्
तत्राप्यसक्तस्य सतः शयनाच्चोपवेशनम् १
हुतायां सायमाहुत्यांदुर्बलश्चेद्गृही भवेत्
प्रातर्होमस्तदैव स्याज्जीवेच्चच्छ्रः पुनर्न वा २
दुर्बलं स्नापयित्वा तु शुद्धचैलाभिसंवृतम्
दक्षिणाशिरसं भूमौ वर्हिष्मत्यां निवेशयेत् ३
घृतेनाभ्यक्तमाप्लाव्य सवस्त्रमुपवीतिनम्
चन्दनोक्षितसर्वाङ्गं सुमनोभिर्विभूषितम् ४
हिरण्यशकलान्यस्य क्षिप्त्वा छिद्रेषु सप्तसु
मुखष्वथापिधायैनं निर्हरेयुः सुतादयः ५
आमपात्रेऽन्नमादाय प्रेतमग्निपुरःसरम्
एकोऽनुगच्छेत्तस्यार्द्धमर्द्धपथ्युत्सृजेद्भुवि ६
ऊर्द्धमादहनं प्राप्त आसीनो दक्षिणामुखः
सव्यं जान्वाच्य शनकैः सतिलं पिण्डदानवत् ७
अथ पुत्रादिनाप्लुत्य कुर्याद्दारुचयं महत्
भूप्रदेशे शुचौ देशे पश्चाच्चित्यादिलक्षणे ८
तत्रोत्तानं निपात्यैनं दक्षिणाशिरसं मुखे

आज्यपूर्णां स्रुचं दद्याद्दक्षिणाग्रां नसि स्रुवम् ९
पादयोरधरां प्राचीमरणीमुरसीतराम्
पार्श्वयोः शूर्पचमसे सव्यदक्षिणयोः क्रमात् १०
मुषलेन सह न्युब्जमन्तरूर्वोरुलूखलम्
चत्रौवीलीकमत्रैवमनश्रुनयनोविभीः ११
अपसव्येन कृत्वैतद्वाग्यतः पितृदिङ्मुखः
अथाग्निं सव्यजान्वक्तो दद्याद्दक्षिणतः शनैः १२
अस्मात्त्वमधिजातोऽसि त्वदयं जायतां पुनः
असौ स्वर्गाय लोकाय स्वाहेति यजुरीरयन् १३
एवं गृहपतिर्दग्धः सर्वं तरति दुष्कृतम्
यश्चैनं दाहयेत् सोऽपि प्रजां प्राप्नोत्यनिन्दिताम् १४
यथा स्वायुधधृक्पान्थो ह्यरण्यान्यपि निर्भयः
अतिक्रम्यात्मनोऽभीष्टं स्थानमिष्टाँश्च विन्दति १५
एवमेषोऽग्निमान् यज्ञपात्रायुधविभूषितः
लोकानन्यानतिक्रम्य परं ब्रह्मैव विन्दति १६
इत्यैकविंशः खण्डः

अथ द्वाविंशः खण्डः

अथ दाहसंस्कारवर्णनम्

अथानवेक्षयेत्पापः सर्व एव शवस्पृशः
स्नात्वा सचैलमाचम्य दद्युरस्योदकं स्थले १
गोत्रनामानुवादान्ते तर्पयामीत्यनन्तरम्
दक्षिणाग्रान् कुशान् कृत्वा सतिलन्तु पृथक्पृथक् २
एवं कृतोदकान् सम्यक्सर्वान् शाद्वलसंस्थितान्
आप्लुत्य पुनराचान्तान् वदेयुस्तेऽनुयायिनः ३
मा शोकं कुरुतानित्ये सर्वस्मिन् प्राणधर्मणि

धर्मं कुरुत यत्नेन यो वः सह गमिष्यति ४
मानुष्ये कदलीस्तम्भे निःसारे सारमार्गणम्
यः करोति स संमूढो जलबुद्बुदसन्निभे ५
गन्त्री वसुमती नाशमुदधिर्दैवतानि च
फेनप्रख्यः कथं नाशं मर्त्यलोको न यास्यति ६
पञ्चधा सम्भृतः कायो यदि पञ्चत्वमागतः
कर्मभिः स्वशरीरोत्थैस्तत्र का परिदेवना ७
सर्वेऽक्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः
संयोगा विप्रयोगान्ता मरणान्तं हि जीवितम् ८
श्लेष्माश्रु बान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतोऽवशः
अतो न रोदितव्यं हि क्रियाः कार्याः प्रयत्नतः ९
एवमुक्ता व्रजेयुस्ते गृहांल्लघुपुरःसराः
स्नानाग्निस्पर्शनाज्याशैः शुध्येयुरितरे कृतैः १०
इति द्वाविंशः खण्डः

अथ त्रयोविंशः खण्डः

अथ विदेशस्थमृतपुरुषाणांदाहसंस्कारवर्णनम्

एवमेवाहिताग्नेषु पात्रन्यासादिकं भवेत्
कृष्णाजिनादिकश्चात्र विशेषः सूत्रचोदितः १
विदेशमरणेऽस्थीनि ह्याहृत्याभ्यज्य सर्पिषा
दाहयेदूर्णयाच्छाद्य पात्रन्यासादि पूर्ववत् २
अस्थ्नामलाभे पर्णानि सकलान्युक्तयावृता
भर्जयेदस्थिसंख्यानि ततः प्रभृति सूतकम् ३
महापातकसंयुक्तो दैवात्स्यादग्निमान् यदि
पुत्रादिः पालयेदग्निं युक्त आदोष संक्षयात् ४
प्रायश्चित्तं न कुर्याद्यः कुर्वन् वा म्रियते यदि

गृह्यं निर्वापयेच्छ्रौतमश्वस्येत् सपरिच्छदम्  ५
सादयेदुभयं वाप्सु ह्यद्धोग्निरभवद्यतः
पात्राणि दद्याद्विप्राय दहेदप्स्वेव वा क्षिपेत्  ६
अनयैवावृता नारी दग्धव्या या व्यवस्थिता
अग्निप्रदानमन्त्रोऽस्या न प्रयोज्य इति स्थितिः
अग्निनैव दहेद्भार्यां स्वतन्त्रां पतितां न चेत्
तदुत्तरेण पात्राणि दाहयेत्पृथगन्तिके  ८
अपरेद्युस्तृतीये वा अस्थ्नां सञ्चयनं भवेत्
यस्तत्र विधिरादिष्ट ऋषिभिः सोऽधुनोच्यते  ९
स्नानान्तं पूर्ववत्कृत्वा गव्येन पयसा ततः
सञ्चयास्थीनि सर्वाणि प्राचीनावीत्यभाषयन्  १०
शमीपलाशशाखाभ्यामुद्धृत्योद्धृत्य भस्मतः
आज्येनाभ्यज्य गव्येन सेचयेद्गन्धवारिणा  ११
मृत्पात्रसंपुटं कृत्वा सूत्रेण परिवेष्ट्य च
श्वभ्रं खात्वा शुचौ भूमौ निखनेद्दक्षिणामुखः  १२
पूरयित्वावटं पङ्कपिण्डशैबालसंयुतम्
दत्वोपरि समं शेषं कुर्यात्पूर्वाह्णकर्मणा  १३
एवमेवागृहीताग्नेः प्रेतस्य विधिरिष्यते
स्त्रीणामिवाग्निदानं स्यादथातोऽनुक्तमुच्यते  १४
इति त्रयोविंशः खण्डः

## चतुर्विंशः खण्डः
### सूतकेकर्मत्यागः षोडशश्राद्धविधानवर्णनञ्च

सूतके कर्मणां त्यागः सन्ध्यादीनां विधीयते
होमः श्रौते तु कर्तव्यः शुष्कान्ने नापि वा फलैः  १
अकृतं हावयेत् स्मार्ते तदभावे कृताकृतम्

कृतं वा हावयेदन्नमन्वारम्भविधानतः २
कृतमोदनशक्त्वादि तराडुलादि कृताकृतम्
व्रीह्यादि चाकृतं प्रोक्तमिति हव्यं त्रिधा बुधैः ३
सूतके च प्रवासे वा चाशक्तौ श्राद्धभोजने
एवमादिनिमित्तेषु हावयेदिति योजयेत् ४
न त्यजेत् सूतके कर्म ब्रह्मचारी स्वकं क्वचित्
न दीक्षरायात्परं यज्ञे न कृच्छ्रादि तपश्चरन् ५
पितर्य्यपि मृते नैषां दोषो भवति कर्हिचित्
आशौचं कर्मणोऽन्ते स्यात्त्र्यहं वा ब्रह्मचारिणः ६
श्राद्धमग्निमतः कार्य्यं दाहादेकादशेऽहनि
प्रत्याब्दिकं तु कुर्वीत प्रमीताहनि सर्वदा ७
द्वादश प्रतिमास्यानि आद्यं षारमासिके तथा
सपिराडीकरणञ्चैव एतद्वै श्राद्धषोडशम् ८
एकाहेन तु षरमासा यदा स्युरपि वा त्रिभिः
न्यूनाः संवत्सराश्चैव स्यातां षारमासिके तथा ९
यानि पञ्चदशाद्यानि अपुत्रस्येतराणि तु
एकस्मिन्नह्नि देयानि सपुत्रस्यैव सर्वदा १०
न योषायाः पतिर्दद्यादपुत्राया अपि क्वचित्
न पुत्रस्य पिता दद्यान्नानुजस्य तथाग्रजः ११
एकादशेऽह्नि निर्वर्त्य अर्वाग्दर्शाद्यथाविधि
प्रकुर्वीताग्निमान्पुत्रो मातापित्रोः सपिराडताम् १२
सपिराडीकरणादूर्द्ध्वं न दद्यात्प्रतिमासिकम्
एकोद्दिष्टेन विधिना दद्यादित्याह गौतमः १३
कर्षूसमन्वितं मुक्त्वा तथाद्यं श्राद्धषोडशम्
प्रत्यादिकञ्च शेषेषु पिराडाः स्युः षडिति स्थितिः १४
अर्घेऽक्षय्योदके चैव पिराडदानेऽवनेजने

तन्त्रस्य तु निवृत्तिः स्यात्स्वधावाचन एव च १५
ब्रह्मदराडादियुक्तानां येषां नास्त्यग्निसत्क्रिया
श्राद्धादिसत्क्रियाभाजो न भवन्तीह ते क्वचित् १६
इति चतुर्विंशः खराडः

पञ्चविंशः खराडः
नवयज्ञेनविना नवान्नभोजने प्रायश्चित्तवर्णनम्

मन्त्राम्नायेऽग्न इत्येतत्पञ्चकं लाघवार्थिभिः
पठ्यते तत्प्रयोगे स्यान्मन्त्राणामेव शिंशतिः १
अग्नेः स्थाने वायुचन्द्रसूर्य्यावहुवदूह्य च
समस्य पञ्चमीसूत्रे चतुश्चतुरितिश्रुतेः २
प्रथमे पञ्चके पापी लक्ष्मीरिति पदं भवेत्
अपि पञ्चसु मन्त्रेषु इति यज्ञविदो विदुः ३
द्वितीये तु पतिघ्नी स्यादपुत्रेति तृतीयके
चतुर्थे त्वपसव्येति इदमाहुतिविंशकम् ४
धृतिहोमे न प्रयुञ्ज्याद्योनामसु तथाष्टसु
चतुर्थ्यामध्न्य इत्येतद्योनामसु हि हूयते ५
लताग्रपल्लवो बुध्नः शुङ्गेति परिकीर्त्यते
पतिव्रता व्रतवती ब्रह्मबन्धुस्तथाऽश्रुतः ६
शिलाटु नीलमित्युक्तं ग्रथ्नः स्तवक उच्यते
कपुष्णिकाभितः केशान् मूर्ध्नि पश्चात्कपुच्छलम् ७
श्वाविच्छलाका शलली तथा वीरतरः शरः
तिलतराडुलसम्पक्वः कृषरः सोऽभिधीयते ८
नामधेये मुनिवसुपिशाचाबहुवत्सदा
यक्षाश्च पितरो देवा यष्टव्यास्तिथिदेवताः ९
आग्नेयाद्येऽथ सार्पाद्ये विशाखाद्ये तथैव च

आषाढाद्ये धनिष्ठाद्ये अश्विन्याद्ये तथैव च १०
द्वन्द्वान्येतानि बहुवद्दक्षाणां जुहुयात्सदा
द्वन्द्वद्वयं विवच्छेद्यमवशिष्टान्यथैकवत् ११
देवतास्वपि हूयन्ते बहुवत्सार्वपित्तयः
देवाश्च वसवश्चैव द्विवदेवाश्विनौ सदा १२
ब्रह्मचारी समादिष्टो गुरुणा व्रतकर्मणि
वाढमोमिति वा ब्रूयात्तत्तथैवानुपालयेत् १३
सशिखं वपनं कायमास्नानाद्ब्रह्मचारिणा
आशरीरविमोक्षाय ब्रह्मचर्य न चेद्भवेत् १४
वपनं नास्य कर्तव्यमर्वागौदानकव्रतात्
व्रतिनो वत्सरं यावत्षरामासानिति गौतमः
न गात्रोत्सादनं कुर्यादनापदि कदाचन
जलक्रीडामलङ्कारान् व्रती दराड इवाप्लवेत् १५
देवतानां विपर्यास जुहोतिषु कथं भवेत्
सर्व प्रायश्चित्तं हुत्वा क्रमेण जुहुयात्पुनः १६
संस्कारा अतिपद्येरन्स्वकालाच्चेत्कथञ्चन
हुत्वैतदेव कर्तव्या ये तूपनयनादधः १७
अनिष्ट्वा नवयज्ञेन नवान्नं योत्यकामतः
वैश्वानरश्चरुस्तस्य प्रायश्चित्तं विधीयते १८
इति पञ्चविंशतिखराडः

षड्विंशः खराडः
नवयज्ञकालाभिधानवर्णनम्

चरुः समशनीयो यस्तथा गोयज्ञकर्मणि
वृषभोत्सर्ज्जने चैव अश्वयज्ञे तथैव च १
श्रावरायां वा प्रदोषे यः कृष्यारम्भे तथैव च

कथमेतेषु निर्वापाः कथञ्चैव जुहोतयः २
देवता सङ्ख्या ग्राह्या निर्व्वापांस्तु पृथक्पृथक्
तूष्णीं द्विरेव गृह्णीयाद्धोमश्चापि पृथक्पृथक् ३
यावता होमनिर्वृत्तिर्भवेद्या यत्र कीर्तिता
शेषं चैव भवेत्किञ्चित्तावन्तं निर्वपेच्चरुम् ४
चरौ समशनीये तु पितृयज्ञे चरौ तथा
होतव्यं मेक्षणेनान्य उपस्तीर्णाभिघारितम् ५
कालः कात्यायनेनोक्तो विधिश्चैव समासतः
वृषोत्सर्गे यतो नाऽत्र गोभिलेन तु भाषितः ६
पारिभाषिक एव स्यात्कालो गोवाजियज्ञयोः
अन्यस्मादुपदेशात्तु स्वस्तरारोहणस्य च ७
अथवा मार्गपाल्येऽह्नि कालो गोयज्ञकर्मणः
नीराजनेऽह्नि वाश्वानामिति तन्त्रान्तरे विधिः ८
शरद्वसन्तयोः केचिन्नवयज्ञं प्रचक्षते
धान्यपाकवशादन्ये श्यामाकोवनिनः स्मृतः ९
आश्वयुज्यां तथा कृष्यां वास्तुकर्मणि याज्ञिकाः
यज्ञार्थतत्त्ववेत्तारो होममेवं प्रचक्षते १०
द्वे पञ्च द्वे क्रमेणैता हविराहुतयः स्मृताः
शेषा आज्येन होतव्या इति कायायनोऽब्रवीत् ११
पयोयदाज्यसंयुक्तं तत् पृषातकमुच्यते
दध्येके तदुपासाद्य कर्तव्यः पायसश्चरुः १२
व्रीहयः शालयो मुद्गा गोधूमाः सर्षपास्तिलाः
यवाश्चौषधयः सप्त विपदं घ्नन्ति धारिताः १३
संस्काराः पुरुषस्यैते स्मर्य्यन्ते गौतमादिभिः
अतोऽष्टकादयः कार्याः सर्वे कालक्रमोदिताः १४
सकृदप्यष्टकादीनि कुर्यात् कर्माणि यो द्विजः

स पंक्तिपावनो भूत्वा लोकान्प्रैति घृतश्चयुतः १५
एकाहमपि कर्मस्थो योऽग्निशुश्रूषकः शुचिः
नयत्यत्र तदेवास्य शताहं दिवि जायते १६
यस्त्वाधायाग्निमाशास्य देवादीन्नैभिरिष्टवान्
निराकर्तामरादीनां स विज्ञेयो निराकृतिः १७
इति षड्विंशः खराडः

अथ सप्तविंशः खराडः
अथ प्रायश्चित्तवर्णनम्
यच्छ्राद्धं कर्मणामादौ या चान्ते दक्षिणा भवेत्
आमावास्यं द्वितीयं यदन्वाहार्य्यं तदुच्यते १
एकसाध्येष्ववर्हिःषु न स्यात्परिसमूहनम्
नोदगासानञ्चैव क्षिप्रहोमाहि ते मताः २
अभावे व्रीहियवयोर्दध्ना वा पयसापि वा
तदभावे यवाग्वा वा जुहुयादुदकेन वा ३
रौद्रन्तु राक्षसं पित्र्यमासुरं चाभिचारिकम्
उक्त्वा मन्त्रं स्पृशेदाप आलभ्यात्मानमेव च ४
यजनीयेऽह्नि सोमश्चेद्वारुरायां दिशि दृश्यते
तत्र व्याहृतिभिर्हुत्वा दराडं दद्यात् द्विजातये ५
लवणं मधु मांसञ्च क्षारांशो येन हूयते
उपवासे न भुञ्जीत नोरुरात्रौ न किञ्चन ६
स्वकाले सायमाहुत्या अप्राप्तौ होतृहव्ययोः
प्राक्प्रातराहुतेः कालः प्रायश्चित्ते हुते सति ७
प्राक्सायमाहुतेः प्रातर्होमकालानतिक्रमः
प्राक्पौर्णमासाद्दर्शस्य प्राग्दर्शादितरस्य तु ८
वैश्वदेवे त्वतिक्रान्ते अहोरात्रमभोजनम्

प्रायश्चित्तमथो हुत्वा पुनः सन्तनुयाद्व्रतम् ९
होमद्रव्यात्यये दर्शपौर्णमासात्यये तथा
पुनरेवाग्निमादध्यादिति भार्गवशासनम् १०
अनृचो माणवो ज्ञेय एणः कृष्णमृगः स्मृतः
रुरुर्गौरमृगः प्रोक्तस्तम्बलः शोण उच्यते ११
केशान्तिको ब्राह्मणस्य दण्डः कार्यः प्रमाणतः
ललाटसंमितो राज्ञः स्यात्तु नाशान्तिको विशः १२
ऋजवस्ते तु सर्वे स्युर्व्रणाः सौम्यदर्शनाः
अनुद्वेगकरा नृणां सत्वचोऽनग्निदूषिताः १३
गौर्विशिष्टतमा विप्रैर्वेदेष्वपि निगद्यते
न ततोऽन्यद्वरं यस्मात्तस्माद्गौर्वर उच्यते १४
येषां व्रतानामन्येषु दक्षिणा न विधीयते
वरस्तत्र भवेद्दानमपि वाच्छादयेद्गुरुम् १५
अस्थानोच्छ्वासविच्छेदघोषणाध्यापनादिकम्
प्रामाणीकं श्रुतौ यत्स्याद्यातयामत्वकारि तत् १६
प्रत्यब्दं यदुपाकर्म सोत्सर्गं विधिवद्द्विजैः
क्रियते छन्दसां तेन पुनराप्यायनं भवेत् १७
अयातयामैश्छन्दोभिर्यत्कर्म क्रियते द्विजैः
क्रीडमानैरपि सदा तत्तेषां सिद्धिकारकम् १८
गायत्रीञ्च सगायत्रां वार्हस्पत्यमिति त्रिकम्
शिष्येभ्योऽनूच्य विधिवदुपाकुर्यात्ततः श्रुतिम् १९
छन्दसामेकविंशानां संहितायां यथाक्रमम्
न च्छन्दस्काभिरेवाभिर्राद्याभिर्होम इष्यते २०
पर्वभिश्चैव गानेषु ब्राह्मणेषूत्तरादिभिः
अङ्गेषु चर्चामन्त्रेषु इति षष्टिर्जुहोतयः २१

इति सप्तविंशतिः खण्डः

## अथाष्टाविंशतिः खराडः

### अथ प्रायश्चित्तवर्णनमुपाकर्मणः फलनिरूपणवर्णनम्

अन्नतास्तु यवाः प्रोक्ता भ्रष्टाधाना भवन्ति ते
भ्रष्टास्तु व्रीहयो लाजा घटाः षरिडक उच्यते १
नाधीयीत रहस्यानि सोत्तराणि विचन्नणः
नचोपनिषदश्चैव षरामासान् दन्निणायनात् २
उपाकृत्योदगयने ततोऽधीयीत धर्मवित्
उत्सर्गश्चैक एवैषां नैष्ट्यं प्रौष्ठपदेऽपि वा ३
अजातव्यञ्जना लोम्नी न तया सह संविशेत्
अयुगूः काकबन्ध्याया जातां तां न विवाहयेत् ४
संसक्तपदविन्यासस्त्रिपदः प्रक्रमः स्मृतः
स्मार्त्ते कर्मणि सर्वत्र श्रौते त्वध्वर्युणोदितः ५
यस्यां दिशि वलिं दद्यात्तामेवाभिमुखो वलिम्
श्रवणाकर्मणि भवेन्यञ्च कर्म न सर्वदा ६
बलिशेषस्य हवनमग्निप्रणयनन्तथा
प्रत्यहं न भवेयातामुल्मुकन्तु भवेत्सदा ७
वृषान्तकप्रेन्नणयोर्नवस्य हविषस्तथा
शिष्टस्य प्राशने मन्त्रस्तत्र सर्वेऽधिकारिणः ८
ब्राह्मणानामसान्निध्ये स्वयमेव पृषातकम्
अवेन्नेद्धविषः शेषं नवयज्ञेऽपि भन्नयेत् ९
सफला बदरीशाखा फलवत्यभिधीयते
धना विधिकताशङ्काः स्मृता जातशिलास्तु ताः १०
नष्टो विनष्टो मणिकः शिलानाशे तथैव च
तदैवाऽऽहृत्य संस्कार्यो न न्निपेदाग्रहायणीम् ११
श्रवणाकर्म लुप्तञ्चेत्कथञ्चित्सूतकादिना
आग्रहायणिकं कुर्याद्बलिवर्जमशेषतः १२

ऊर्द्ध्वं स्वस्तरशायी स्यान्मासमर्द्धमथापि वा
सप्तरात्रं त्रिरात्रं वा एकां वा सद्य एव वा १३
नोर्द्ध्वं मन्त्रप्रयोगः स्यान्नाग्न्यगारं नियम्यते
नाहतास्तरणञ्चैव न पार्श्वञ्चापि दक्षिणम् १४
दृढश्चेदाग्रहायण्यामावृत्तावपि कर्मणः
कुम्भौ मन्त्रवदासिञ्चेत्प्रतिकुम्भमृचं पठेत् १५
अल्पानां यो विघातः स्यात्स वाधोबहुभिः स्मृतः
प्राणसम्मित इत्यादि वाशिष्ठं बाधितं यथा १६
विरोधो यत्र वाक्यानां प्रामाण्यं तत्र भूयसाम्
तुल्यप्रमाणकत्वे तु न्याय एवं प्रकीर्तितः १७
त्रैयम्बकं करतलमपूपामण्डकाः स्मृताः
पालाशा गोलकाश्चैव लोहचूर्णञ्च चीवरम् १८
स्पृशन्ननामिकाग्रेण क्वचिदालोकयन्नपि
अनुमन्त्रणीयं सर्वत्र सदैवमनुमन्त्रयेत् १९
इत्यष्टविंशतिः खण्डः

अथैकोनत्रिंशः खण्डः
अथ श्राद्धवर्णनम्

क्षालनं दर्भकूर्चेन सर्वत्र स्रोतसां पशोः
तूष्णीमिच्छाक्रमेण स्याद्वपार्थे पार्णदारुणी १
सप्त तावन्मूर्द्धन्यानि तथा स्तनचतुष्टयम्
नाभिः श्रोणिरपानञ्च गोस्रोतांसि चतुर्द्दश २
क्षुरोमांसावदानार्थः कृत्स्ना स्विष्टकृदावृता
वपामादाय जुहुयात्तत्र मन्त्रं समापयेत् ३
हृज्जिह्वा क्रोडमस्थीनि यकृद्वृक्कौ गुदं स्तनाः
श्रोणिस्कन्धसदापार्श्वे पश्वङ्गानि प्रचक्षते ४

एकादशानामङ्गानामवदानानि सङ्ख्यया
पार्श्वस्य वृक्कसक्थ्नोश्च द्वित्वादाहुश्चतुर्दश ५
चरितार्था श्रुतिः कार्या यस्मादप्यनुकल्पतः
अतोह्यार्चेन होमः स्याच्छागपक्षे चरावपि ६
अवदानानि यावन्ति क्रियेरन् प्रस्तरेपशोः
तावतः पायसान् पिण्डान् पश्वभावेऽपि कारयेत् ७
औदनव्यञ्जनार्थन्तु पश्वभावेऽपि पायसम्
सद्रवं श्रपयेत्तद्वदन्वष्टक्येऽपि कर्मणि ८
प्राधान्यं पिण्डदानस्य केचिदाहुर्मनीषिणः
गयादौ पिण्डमात्रस्य दीयमानत्वदर्शनात् ९
भोजनस्य प्रधानत्वं वदन्त्यन्ये महर्षयः
ब्राह्मणस्य परीक्षायां महायत्नप्रदर्शनात् १०
आमश्राद्धविधानस्य विना पिण्डैः क्रियाविधिः
तदालभ्याप्यनध्यायविधानश्रवणादपि ११
विद्वन्मतमुपादाय ममाप्येतद्धृदि स्थितम्
प्राधान्यमुभयोर्यस्मात्तस्मादेष समुच्चयः १२
प्राचीनावीतिना कार्यं पित्र्येषु प्रोक्षणं पशोः
दक्षिणोद्वासनान्तञ्च चरोर्निर्वपणादिकम् १३
सन्नपश्वावदानानां प्रधानार्थो न हीतरः
प्रधानं हवनञ्चैव शेषं प्रकृतिवद्भवेत् १४
द्वीपमुन्नतमाख्यातं शादा चैवेष्टका स्मृता
कीलिनं सजलं प्रोक्तं दूरखातोदको मरुः १५
द्वारगवाक्षः सन्दर्भैः कर्द्दमभित्यन्तकोण वा
वेधैश्वानष्टं वास्तुघोरं विद्वन्मनाक्रान्तमार्गैश्च १६
वशङ्गमाबिति ब्रीहीञ्छेषश्चेति यवांस्तथा
असावित्यत्र नामोक्त्वा जुहुयात्त्विप्रहोमवत् १७

साक्षतं सुमनोयुक्तमुदकं दधिसंयुतम्
अर्घ्यं दधिमधुभ्याञ्च मधुपर्को विधीयते १८
कांस्येनैवार्हणीयस्य निनयेदर्घ्यमञ्जलौ
कांस्यापिधानं कांस्यस्थं मधुपर्कं समर्पयेत् १९

इति कात्यायनविरचिते कर्मप्रदीपे तृतीयः प्रपाठकः
इत्येकोनत्रिंशः खण्डः
समाप्ता चेयं कात्यायनस्मृतिरितिलेख्यंनास्त्यत्र
तस्मादयंग्रन्थः समाप्तोनवेत्यत्रसंदेहः

Reference:
*Smṛti Sandarbha*, Vol. III, (Delhi: Nag, 1981), pp. 1335ff.

# पराशर स्मृतिः

## प्रथमोऽध्यायः

श्रीगणेशायनमः

तत्रादौ धर्मोपदेशं तल्लक्षणञ्चाह

अथातो हिमशैलाग्रे देववदारुवनालये
व्यासमेकाग्रमासीनमपृच्छन्नृषयः पुरा १
मानुषाणां हितं धर्मं वर्तमाने कलौ युगे
शौचाचारं यथावच्च वदसत्यवती सुतः २
तच्छ्रुत्वर्षिवाक्यं तु सशिष्योऽङ्ग्यर्कसन्निभः
प्रत्युवाच महातेजाः श्रुतिस्मृतिविशारदः ३
न चाहं सर्वतत्त्वज्ञः कथं धर्मं वदाम्यहम्
अस्मत्पितैवप्रष्टव्येति व्यासः सुतोऽब्रवीत् ४
ततस्तर्षयः सर्वे धर्मतत्त्वार्थकाङ्क्षिणः
ऋषिं व्यासं पुरस्कृत्यगता बदरिकाश्रमम् ५
नाना पुष्पललाकीर्णं फलवृष्कैरलंकृतम्
नदी प्रस्त्रवणोपेतं पुण्यतीर्थोपशोभितं च ६
मृगपक्षिनिनादाढ्यं देवतायतनावृतम्
यक्षगन्धर्वसिद्धैश्च नृत्यगीतैरलंकृतम् ७
तस्मिन्नृषिसभा मध्ये शक्तिपुत्रं पराशरम्
सुखासीनं महातेजा मुनिमुख्यगणावृतम् ८
कृताञ्जलिपुटो भूत्वा व्यासस्त्वृषिभिः सह
प्रदक्षिणाभिवादैश्च स्तुतिभिः समपूजयत् ९
ततः संतुष्टहृदयः पराशरमहामुनिः
आहसुस्वागतं ब्रूहीत्यासीनो मुनिपुङ्गवः १०
कुशलं सम्यगित्युक्त्वा व्यासः पृच्छत्यनन्तरम्
यदि जानासि भक्तिं मे स्नेहाद्वा भक्तवत्सल ११

धर्मकथयमे तातानुग्राह्यो ह्यहं तव
श्रुता मे मानवा धर्मा वासिष्ठा काश्यपास्तथा १२
गर्गेया गौतमीयाश्च तथाञ्चोशनसास्मृताः
अत्रेर्विष्णोश्च संवर्तात्दक्षादङ्गिरसस्तथा १३
शातातपाच्च हारीताद्याज्ञवल्क्यात्तथैव च
आपस्तम्बकृता धर्मा शङ्खस्य लिखितस्य च १४
कात्यायनकृताश्चैव तथा प्राचेतसान्मुनेः
श्रुता ह्येते भवत्प्रोक्ताः श्रुत्यर्था मे न विस्मृताः १५
अस्मिन्मन्वन्तरे धर्माः कृतत्रेतादिके युगे
सर्वे धर्माः कृते जाताः सर्वे नष्टाः कलौ युगे १६
चातुर्वर्ण्यसमाचारं किंचित्साधारणं वद
चतुर्णामपि वर्णानां कर्तव्यं धर्मकोविदैः १७
ब्रूहि धर्मस्वरूपज्ञसूक्ष्मं स्थूलं च विस्तरात्
व्यासवाक्यावसाने तु मुनिमुख्यः पराशरः १८
धर्मस्यनिर्णयं प्राहसूक्ष्मं स्थूलं च विस्तरात्
शृणु पुत्रप्रवक्ष्यामि शृण्वन्तु मुनयस्तथा १९
कल्पे कल्पे क्षयोत्पत्त्या ब्रह्मविष्णुमहेश्वराः
श्रुतिस्मृतिसदाचारनिर्णेतारश्च सर्वदा २०
न कश्चिद्वेदकर्ता च वेदं स्मृत्वा चतुर्मुखः
तथैवधर्मान्स्मरति मनुः कल्पान्तरेऽन्तरे २१
अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरे युगे
अन्ये कलियुगे नृणां युगरूपानुसारतः २२
तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते
द्वापरे यज्ञमेवाहुः दानमेवकलौ युगे २३
कृते तु मानवा धर्मास्त्रेतायां गौतमाः स्मृताः
द्वापरे शाङ्खलिखिताः कलौ पाराशराः स्मृताः २४

त्यजेद्देशं कृतयुगे त्रेतायां ग्राममुत्सृजेत्
द्वापरे कुलमेकं तु कर्तारं तु कलौ युगे २५
कृते सम्भाषणादेवत्रेतायां स्पर्शनेन च
द्वापरे त्वन्नमादायकलौ पतति कर्मणा २६
कृते तात्कालिकः शापः त्रेतायां दशभिर्दिनैः
द्वापरे चैकमासेन कलौ संवत्सरेणतु २७
अभिगम्यकृते दानं त्रेतास्वाहूयदीयते
द्वापरे या च मानायसेवया दीयते कलौ २८
अभिगम्योत्तमं दानमाहूयैव तु मध्यमम्
अधमं या च मानायसेवादानं तु निष्फलम् २९
जितो धर्मो ह्यधर्मेणसत्यं चैवानृतेन च
जिताश्चोरैश्च राजानः स्त्रीभिश्च पुरुषाः कलौ ३०
सीदन्ति चाग्निहोत्राणि गुरुपूजा प्रणश्यति
कुमार्यश्च प्रसूयन्तेऽस्मिन्कलियुगे सदा ३१
कृते त्वस्थि गताः प्राणास्त्रेतायां मांसमाश्रिताः
द्वापरे रुधिरं चैव कलौ त्वन्नादिषु स्थिताः ३२
युगे युगे च ये धर्मास्तत्रतत्रचये द्विजाः
तेषां निन्दा न कर्तव्या युगरूपा हि ते द्विजाः ३३
युगे युगे तु सामर्थ्यं शेषं मुनिविभाषितम्
पराशरेणचाप्युक्तं प्रायश्चित्तं विधीयते ३४
अहमद्यैवतत्सर्वमनुस्मृत्यब्रवीमि वः
चातुर्वर्ण्यसमाचारं शृण्वन्त्वृषिपुङ्गवाः ३५
पराशरमतं पुण्यं पवित्रं पापनाशनम्
चिन्तितं ब्राह्मणार्थायधर्मसंस्थापनाय च ३६
चतुर्णामपि वर्णानामाचारो धर्मपालकः
आचारभ्रष्टदेहानां भवेद्धर्मः परान्मुखः ३७

षट्कर्माभिरतो नित्यं देवतातिथिपूजकः
हुतशेषं तु भुञ्जानो ब्राह्मणो नावसीदति ३८
संध्या स्नानं जपो होमो देवतातिथिपूजनम्
आतिथ्यं वैश्वदेवं च षट्कर्माणि दिने दिने ३९
इष्टो वा यदि वा द्वेष्यो मूर्खः पण्डितैववा
सम्प्राप्तो वैश्वदेवान्ते सोऽतिथिः स्वर्गसंग्रमः ४०
दूराध्वोपगतं श्रान्तं वैश्वदेवोपर्स्थितम्
अतिथिं तं विजानीयान्नातिथिः पूर्वमागतः ४१
नैकग्रामीणमतिथिं संगृह्णीत कदा च न
अनित्यमागतो यस्मात्तस्मादतिथिरुच्यते ४२
अतिथिं तत्रसम्प्राप्तं पूजयेत्स्वागतादिना
अर्घ्यासनप्रदानेन पादप्रक्षालनेन च ४३
श्रद्धया चान्न दानेन प्रियप्रश्नोत्तरेण च
गच्छन्तं चानुयानेन प्रीतिमुत्पादयेत्गृही ४४
अतिथिर्यस्यभग्नाशो गृहात्प्रतिनिवर्तते
पितरस्तस्यनाश्नन्ति दशवर्षाणि पञ्च च ४५
काष्ठभारसहस्रेणघृतकुम्भशतेन च
अतिथिर्यस्यभग्नाशस्तस्यहोमो निरर्थकः ४६
सुक्षेत्रे वापयेद्बीजं सुपात्रे निक्षिपेद्धनम्
सुक्षेत्रे च सुपात्रे च ह्युप्तं दत्तं न नश्यति ४७
न पृच्छेद्गोत्रचरणे न स्वध्यायं श्रुतं तथा
हृदये कल्पयेद्देवं सर्वदेवमयो हि सः ४८
अपूर्वः सुव्रती विप्रो ह्यपूर्वश्चातितिहिर्यथा
वेदाब्भ्यासरतो नित्यं तावपूर्वौ दिने दिने ४९
वैश्वदेवे तु सम्प्राप्ते भिक्षुके गृहमागते
उद्धृत्यवैश्वदेवार्थं भिक्षुकं तु विसर्जयेत् ५०

यतिश्च ब्रह्मचारी च पक्वान्न स्वामिनावुभौ
तयोरन्नमदत्त्वा तु भुक्त्वा चान्द्रायणं चरेत् ५१
दद्याच्च भिक्षा त्रितयं परिव्राड्ब्रह्मचारिणाम्
इच्छया च ततो दद्याद्विभवे सत्यवारितम् ५२
यति हस्ते जलं दद्याद्भैक्षं दद्यात्पुनर्जलम्
तद्भैक्ष्यं मेरुणा तुल्यं तज्जलं सागरोपमम् ५३
यस्यछत्रं हयश्चैव कुञ्जरारोहमृद्धिमत्
ऐन्द्रं स्थानमुपासीततस्मात्तं न विचारयेत् ५४
वैश्वदेवकृतं पापं शक्तो भिक्षुर्व्यपोहितुम्
न हि भिक्षुकृतान्दोषान्वैश्वदेवो व्यपोहति ५५
अकृत्वा वैश्वदेवं तु भुञ्जते ये द्विजाधमाः
सर्वे ते निष्फला ज्ञेयाः पतन्ति नरकेऽशुचौ ५६
वैश्वदेवविहीना ये आतिथ्येन बहिष्कृताः
सर्वे ते नरकं यान्ति काकयोनिं व्रजन्ति च ५७
पापो वा यदि चण्डालो विप्रघ्नः पितृग्घातकः
वैश्वदेवे तु सम्प्राप्तः सोऽअतिथिः स्वर्गसंक्रमः ५८
यो वेष्टितशिरा भुङ्क्ते यो भुङ्क्ते दक्षिणामुखः
वामपादे करं न्यस्य तद्वै रक्षांसि भुञ्जते ५९
अव्रता ह्यनधीयाना यत्रभैक्षचरा द्विजाः
तं ग्रामं दण्डयेद्राजा चोरभक्तप्रदो हि सः ६०
क्षत्रियो हि प्रजा रक्षन्शस्त्रपाणिः प्रदण्डवान्
निर्जित्यपरसैन्यानि क्षितिं धर्मेणपालयेत् ६१
पुष्पं पुष्पं विचिनुयान्मूलच्छेदं न कारयेत्
माला कारेवारामे न यथाङ्गारकारकः ६२
लाभकर्मतथा रत्नं गवां च परिपालनम्
कृषिकर्म च वाणिज्यं वैश्यवृत्तिरुदाहृता ६३

शूद्रस्यद्विजशुश्रूषा परमो धर्मोच्यते
अन्यथा कुरुते किंचित्तद्भवेत्तस्यनिष्फलम् ६४
लवणं मधुतैलं च दधितक्रं घृतं पयः
न दुष्येच्छूद्रजातीनां कुर्यात्सर्वेषु विक्रयम् ६५
विक्रीणन्मध्यमांसानि ह्यभक्षस्य च भक्षणम्
कुर्वन्न गम्यागमनं शूद्रः पतति तत्क्षणात् ६६
कपिलाक्षीरपानेन ब्राह्मणी गमनेन च
वेदाक्षरविचारेणशूद्रश्चाण्डालतां व्रजेत् ६७
इति पाराशरे धर्मशास्त्रे प्रथमोऽध्यायः

## द्वितीयोऽध्यायः
### गृहस्थाश्रमधर्मवर्णनम्

अतः परं गृहस्थस्य कर्माचारं कलौ युगे
धर्मं साधारणं शक्त्याचातुर्वर्ण्याश्रमागतम् १
तं प्रवक्ष्याम्यहं पूर्वं पराशरवचो यथा
षट्कर्मसहितो विप्रः कृषिकर्म च कारयेत् २
क्षुधितं तृषितं श्रान्तं बलीवर्दं न योजयेत्
हीनाङ्गं व्याधितं क्लीबं वृषं विप्रो न वाहयेत् ३
स्थिराङ्गं बलीवर्दः तृप्तं सुनर्दं षण्ढवर्जितम्
वाहयेद्दिवसस्यार्धं पश्चात्स्नानं समाचरेत् ४
जप्यं देवार्चनं होमं स्वाध्यायं चैवमभ्यसेत्
एकद्वित्रिचतुर्विप्रान्भोजयेत्स्नातकान्द्विजः ५
स्वयं कृष्टे तथा क्षेत्रे धान्यैश्च स्वयमर्जितैः
निर्वपेत्पञ्चयज्ञांश्च क्रतु दीक्षां च कारयेत् ६
तिला रसा न विक्रेता विक्रेता धान्यतत्समाः
विप्रस्यैवं विधा वृत्तिस्तृणकाष्ठादि विक्रयः ७

ब्राह्मणश्चेत्कृषिं कुर्यात्तन्महादोषमाप्नुयात्
संवत्सरेणयत्पापं मत्स्यघाती समाप्नुयात् ८
अयोमुखेन काष्ठेन तदेकाहेन लाङ्गली
पाशकोमत्स्य घाती च व्याधः शाकुनिकस्तथा ९
अदाता कर्षकश्चैव सर्वे ते समभागिनः
वृक्षं छित्त्वा महीं भित्वा हत्वा च कृमिकीटकान् १०
कर्षकः खलयज्ञेन सर्वपापैः प्रमुच्यते
यो न दद्याद्द्विजातिभ्यो राशिमूलमुपागतः ११
स च उरः स च पापिष्ठो ब्रह्मघ्नं तं विनिर्दिशेत्
राज्ञे दत्त्वा तु षड्भागं देवानां चैकविंशकम् १२
विप्राणां त्रिंशकं भागं सर्वपापैः प्रमुच्यते
क्षत्रियोऽपि कृषिं कृत्वा देवान्विप्रांश्च पूजयेत् १३
वैश्यः शूद्रस्तथा कुर्यात्कृषिवाणिज्यशिल्पकम्
विकर्मकुर्वते शूद्रा द्विजशुश्रूषयोज्झिताः १४
भवन्त्यल्पायुषस्ते वै निरयं यान्त्यसंशयम्
चतुर्णामपि वर्णानामेषधर्मः सनातनः १५
इति पाराशरे धर्मशास्त्रे द्वितीयोऽध्यायः

## तृतीयोऽध्यायः
## अशौचव्यवस्थावर्णनम्

अतः शुद्धिं प्रवक्ष्यामि जनने मरणे तथा
दिनत्रयेण शुध्यन्ति ब्राह्मणाः प्रेतसूतके १
क्षत्रियो द्वादशाहेन वैश्यः पञ्चदशाहकैः
शूद्रः शुध्यति मासेन पराशरवचो यथा २
उपासने तु विप्राणामङ्गशुद्धिश्च जायते
ब्राह्मणानां प्रसूतौ तु देवस्पर्शो विधीयते ३

जातौ विप्रो दशाहेन द्वादशाहेन भूमिपः
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुध्यति ४
एकाहाच्छुध्यते विप्रो योऽग्नि वेदसमन्वितः
त्र्यहात्केवलवेदस्तु द्विहीनो दशभिर्दिनैः ५
जन्मकर्मपरिभ्रष्टः संध्योपासन वर्जितः
नामधारकविप्रस्तु दशाहं सूतकी भवेत् ६
एकपिण्डास्तु दायादाः पृथग्दारनिकेतनाः
जन्मन्यपि विपत्तौ च तेषां तत्सूतकं भवेत् ७
तावत्तत्सूतकं गोत्रे चतुर्थपुरुषेणतु
दायाद्विच्छेदमाप्नोति पञ्चमो वात्मवंशजः ८
चतुर्थे दशरात्रं स्यात्षण्णिशाः पुंसि पञ्चमे
षष्ठे चतुरहाच्छुद्धिः सप्तमे तु दिनत्रयात् ९
भृग्वग्निमरणे चैव देशान्तरमृते तथा
बाले प्रेते च संन्यस्ते सद्यः शौचं विधीयते १०
देशान्तरमृतः कश्चित्सगोत्रः श्रूयते यदि
न त्रिरात्रमहो रात्रं सद्यः स्नात्वा शुचिर्भवेत् ११
देशान्तरगतो विप्रः प्रयासात्कालकारितात्
देहनाशमनुप्राप्तस्तिथिर्न ज्ञायते यदि १२
कृष्णाष्टमी त्वमावास्या कृष्णा चैकादशी च या
उदकं पिण्डदानं च तत्र श्राद्धं च कारयेत् १३
अजातदन्ता ये बाला ये च गर्भाद्विनिह्सृताः
न तेषामग्निसंस्कारो नाशौचं नोदकक्रिया १४
यदि गर्भो विपद्येतस्त्रवते वापि योषितः
यावन्मासं स्थितो गर्भो दिनं तावत्तु सूतकम् १५
आचतुर्थाद्भवेत्स्रावः पातः पञ्चमषष्ठयोः
अत ऊर्ध्वं प्रसूतिः स्याद्दशाहं सूतकं भवेत् १६

दन्तजातेऽनुजाते च कृतचूडे च संस्थिते
अग्निसंस्करणे तेषां त्रिरात्रमशुचिर्भवेत् १६
आदन्तजन्मनः सद्या चूडान्नैषिकी स्मृता
ट्रिरात्रमा व्रतादेशाद्दशरात्रमतः परम् १७
ब्रह्मचारी गृहे येषां हूयते च हुताशनः
सम्पर्कं न च कुर्वन्ति न तेषां सूतकं भवेत् १८
सम्पर्काद्दुष्यते विप्रो जनने मरणे तथा
सम्पर्काच्च निवृत्तस्यन प्रेतं नैव सूतकम् १९
शिल्पिनः कारुका वैद्यादासीदासाश्च नापिताः
राजानः श्रोत्रियाश्चैव सद्यः शौचाः प्रकीर्तिताः २०
सव्रतः सत्रपूतश्चाहिताग्निश्च यो द्विजः
राज्ञश्च सूतकं नास्ति यस्यचेच्छति पार्थिवः २१
उद्यतो निधने दाने आर्तो विप्रो निमन्त्रितः
तदर्षिभिर्दृष्टं यथाकालेन शुध्यति २२
प्रसवे गृहमेधी तु न कुर्यात्संकरं यदि
दशाहाच्छुध्यते माता त्ववगाह्यपिता शुचिः २३
सर्वेषां शावमाशौचं माता पित्रोस्तु सूतकम्
सूतकं मातुरेवस्यादुपस्पृश्यपिताशुचिः २४
यदि पत्न्यां प्रसूतायां सम्पर्कं कुरुते द्विजः
सूतकं तु भवेत्तस्ययदि विप्रः षडङ्गवित् २५
सम्पर्काज्जायते दोषो नान्यो दोषोऽस्ति वै द्विजे
तस्मात्सर्वप्रयत्नेन सम्पर्कं वर्जयेद्बुधः २६
विवाहोत्सवयज्ञेषु त्वन्तरामृतसूतके
पूर्वसंकल्पितं द्रव्यं दीयमानं न दुष्यति २७
अन्तरा दशाहस्यपुनर्मरणजन्मनी
तावत्स्यादशुचिर्विप्रो यावत्तत्स्यादनिर्दशम् २८

ब्राह्मणार्थे विपन्नानां बन्दिगोग्रहणे तथा
आहवेषु विपन्नानामेकरात्रमशौचम्  २९
द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ
परिव्राड्योगयुक्तश्चरणे चाभिमुखो हतः  ३०
यत्रयत्रहतः शूरः शत्रुभिः परिवेष्टितः
अक्षयांलभते लोकान्यदि क्लीबं न भाषते  ३१
संन्यस्तं ब्राह्मणं दृष्ट्वा स्थानाच्चलति भास्करः
एषमे मण्डलं भित्त्वा परं स्थानं प्रयास्यति  ३२
यस्तु भग्नेषु सैन्येषु विद्रवत्सु समन्ततः
परित्राता यदा गच्छेत्सच क्रतु फलं लभेत्  ३३
यस्यछेदक्षतं गात्रं शरमुद्गरयष्टिभिः
देवकन्यास्तु तं वीरं हरन्ति रमयन्ति च  ३४
देवाङ्गनासहस्राणि शूरमायोधने हतम्
त्वरमाणाः प्रधावन्ति ममभर्ता ममेति च  ३५
यं यज्ञसंघैस्तपसा च विप्राः स्वर्गैषिणो वात्रयथा यान्ति
क्षणेन यान्त्येवहि तत्रवीराः प्राणान्सुयुद्धेन परित्यजन्तः  ३६
जितेन लभ्यते लक्ष्मीर्मृतेनापि सुराङ्गनाः
क्षणध्वंसिनिकायेऽस्मिन्का चिन्ता मरणे रणे  ३७
ललाटदेशे रुधिरं स्रवच्च यस्याहवे तु प्रविशेच्च वक्त्रम्
तत्सोमपानेन किलास्यतुल्यं संग्रामयज्ञे विधिवच्च दृष्टम्  ३८
अनाथं ब्राह्मणं प्रेतं ये वहन्ति द्विजातयः
पदे पदे यज्ञफलमानुपूर्व्याल्लभन्ति ते  ३९
न तेषामशुभं किंचित्पापं वा शुभकर्मणाम्
जलावगाहनात्तेषां सद्यः शौचं विधीयते  ४०
असतोरमबन्धुं च प्रेतीभूतं द्विजोत्तमम्
वहित्वा च दहित्वा च प्राणायामेन शुध्यति  ४१

अनुगम्येच्छया प्रेतं ज्ञातिमज्ञातिमेववा
स्नात्वा सचैलं स्पृष्ट्वाग्निं घृतं प्राश्यविशुध्यति ४२
क्षत्रियं मृतमज्ञानाद्ब्राह्मणो योऽनुगच्छति
एकाहमशुचिर्भूत्वा पञ्चगव्येन शुध्यति ४३
शवं च वैश्यमज्ञानाद्ब्राह्मणे योऽनुगच्छति
कृत्वाशौचं द्विरात्रं च प्राणायामान्षडाचरेत् ४४
प्रेतीभूतं तु यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः
अनुगच्छेन्नीयमानं त्रिरात्रमशुचिर्भवेत् ४५
त्रिरात्रे तु ततः पूर्णे नदीं गत्वा समुद्रगाम्
प्राणायामशतं कृत्वा घृतं प्राश्यविशुध्यति ४६
विनिर्वर्त्यर्यदाशूद्रोदकान्तमुपर्स्थितः
द्विजैस्तदानुगन्तव्यैषधर्मः सनातनः ४७
इति पाराशरे धर्मशास्त्रे तृतीयोऽध्यायः

## चतुर्थोऽध्यायः
### अनेकविधप्रकरणप्रायश्चित्तम्

अतिमानादतिक्रोधात्स्नेहाद्वा यदिवा भयात्
उद्बध्नीयात्स्त्रीपुमान्वा गतिरेषा विधीयते १
पूयशोणितसम्पूर्णे त्वन्धे तमसि मज्जति
षष्ठीर्वर्षसहस्राणि नरकं प्रतिपद्यते २
नाशौचं नोदकं नाग्निं नाश्रुपातं च कारयेत्
वोढारोऽग्निप्रदातारः पाशच्छेदकरास्तथा ३
तप्तकृच्छ्रेणशुध्यन्तीत्येवमाहप्रजापतिः
गोभिर्हतं तथोद्बद्धं ब्राह्मणेन तु घातितम् ४
संस्पृशन्ति तु ये विप्रा वो ढारश्चाग्निदाश्च ये
अन्ये ये वानुगन्तारः पाशच्छेदकराश्च ये ५

तप्तकृच्छ्रेणशुद्धास्ते कुर्युर्ब्राह्मणभोजनम्
अनडुत्सहितां गां च दद्युर्विप्रायदक्षिणाम् ६
त्र्यहमुष्णं पिबेद्वारि त्र्यहमुष्णं पयः पिबेत्
त्र्यहमुष्णं पिबेत्सर्पिर्वायुभक्षो दिनत्रयम् ७
षट्पलं तु पिबेदम्भस्त्रिपलं तु पयः पिबेत्
पलमेकं पिबेत्सर्पिस्तप्तकृच्छ्रं विधीयते ८
यो वै समाचरेद्विप्रः पतितादिष्वकामतः
पञ्चाहं वा दशाहं वा द्वादशाहमथापि वा ९
मासार्धं मासमेकं वा मासद्वयमथापि वा
अब्दार्धमब्दमेकं वा तदूर्ध्वं चैव तत्समः १०
त्रिरात्रं प्रथमे पक्षे द्वितीये कृच्छ्रमाचरेत्
तृतीये चैव पक्षे तु कृच्छ्रं सांतपनं चरेत् ११
चतुर्थे दशरात्रं स्यात्पराकः पञ्चमे मतः
कुर्याच्चान्द्रायणं षष्ठे सप्तमे त्वैन्दवद्वयम् १२
शुद्ध्यर्थमष्टमे चैव षण्मासान्कृच्छ्रमाचरेत्
पक्षसंख्या प्रमाणेन सुवर्णान्यपिदक्षिणा १३
ऋतुस्नाता तु या नारीभर्तारं नोपसर्पति
सा मृता नरकं याति विधवा च पुनः पुनः १४
ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति
घोरायां भ्रूणहत्यायां युज्यते नात्रसंशयः १५
दरिद्रं व्याधितं मूर्खं भर्तारं यावमन्यते
सा शुनी जायते मृत्वा सूकरी च पुनः पुनः १६
पत्यौ जीवति या नार्युपोष्यव्रतमाचरेत्
आयुष्यं हरते भर्तुः सा नारी नरकं व्रजेत् १७
अपृष्ट्वा चैव भर्तारं या नारी कुरुते व्रतम्
सर्वं तद्राक्षसान्गच्छेदित्येवं मनुरब्रवीत् १८

बान्धवानां सजातीनां दुर्वृत्तं कुरुते तु या
गर्भपातं च याकुर्यान्नतां सम्भाषयेत्क्वचित् १९
यत्पापं ब्रह्महत्यायां द्विगुणं गर्भपातने
प्रायश्चित्तं न तस्याः स्यात्तस्यास्त्यागो विधीयते २०
न कार्यमावसथेन नाग्निहोत्रेणवा पुनः
सभवेत्कर्मचाराडालो यस्तु धर्मपरान्मुखः २१
ओघवाताहृतं बीजं यस्यक्षेत्रे प्ररोहति
सक्षेत्री लभते बीजं न बीजीभागमर्हति २२
तद्वत्परस्त्रियाः पुत्रौद्वौस्मृतौ कुराडगोलकौ
पत्यौ जीवति कुराडः स्यान्मृते भर्तरि गोलकः २३
औरसः क्षेत्रजश्चैव दत्तः कृत्रिमकः सुतः
दद्यान्मातापितावापि सपुत्रो दत्तको भवेत् २४
परिवित्तिः परिवेत्ता यया च परिविद्यते
सर्वे ते नरकं यान्ति दातृयाजकपञ्चमाः २५
द्वौ कृछ्रौ परिवित्तेस्तु कन्यायाः कृच्छ्रैव च
कृछ्रातिकृच्छ्रौ दातुस्तु होता चान्द्रायणं चरेत् २६
कुब्जवामनषराढेषु गद्गदेषु जडेषु च
जात्यन्धे बधिरे मूके न दोषः परिवेदने २७
पितृव्यपुत्रः सापत्नः परनारी सुतस्तथा
दाराग्निहोत्रसम्योगे न दोषः परिवेदने २८
ज्येष्ठो भ्राता यदा तिष्ठेदाधानं नैवकारयेत्
अनुज्ञातस्तु कुर्वीतशङ्खस्यवचनं यथा २९
नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ३०
मृते भर्तरि या नारी ब्रह्मचर्यव्रते स्थिता
सा मृता लभते स्वर्गं यथा ते ब्रह्मचारिणः ३१

तिस्रः कोटयोऽर्धकोटी च यानि रोमाणि मानुषे
तावत्कालं वसेत्स्वर्गे भर्तारं यानुगच्छति ३२
व्यालग्राही यथाव्यालं बलादुद्धरते बिलात्
एवं स्त्रीपतिमुद्धृत्य तेनैव सह मोदते ३३
इति पाराशरे धर्मशास्त्रे चतुर्थोऽध्यायः

अथ पञ्चमोऽध्यायः
प्रायश्चित्तवर्णनम्

वृकश्वानसृगालाद्यैर्दष्टो यस्तु द्विजोत्तमः
स्नात्वा जपेत्सगायत्रीं पवित्रां वेदमातरम् १
गवां शृङ्गोदकैः स्नानं महानद्योस्तु संगमे
समुद्रदर्शनाद्वापि शुना दष्टः शुचिर्भवेत् २
वेदविद्या व्रतस्नातः शुना दष्टो द्विजो यदि
सहिरण्योदकैः स्नात्वा घृतं प्राश्यविशुध्यति ३
सव्रतस्तु शुना दष्टो यस्त्रिरात्रमुपावसेत्
घृतं कुशोदकं पीत्वा व्रतशेषं समापयेत् ४
अव्रतः सव्रतो वापि शुना दष्टो भवेद्द्विजः
प्रणिपत्यभवेत्पूतो विप्रैश्चक्षुर्निरीक्षितः ५
शुना घ्रातावलीढस्यनखैर्विलिखितस्य च
अद्भिः प्रक्षालनं प्रोक्तमग्निना चोपचूलनम् ६
शुना तु ब्राह्मणी दष्टा जम्बुकेन वृकेणवा
उदितं ग्रहनक्षत्रं दृष्ट्वा सद्यः शुचिर्भवेत् ७
कृष्णपक्षे यदा सोमो न दृश्येतकदाचन
यां दिशं व्रजते सोमस्तां दिशं वावलोकयेत् ८
असद्ब्राह्मणके ग्रामे शुना दष्टो द्विजोत्तमः
वृषं प्रदक्षिणी कृत्यसद्यः स्नात्वा शुचिर्भवेत् ९

चण्डालेन श्वपाकेन गोभिर्विप्रैर्प्रहतो यदि
आहिताग्निर्मृतो विप्रो विषेणात्महतो यदि १०
दहेत्तं ब्राह्मणं विप्रो लोकाग्नौ मन्त्रवर्जितम्
स्पृष्ट्वा वोढ्वा च दग्ध्वा च सपिण्डेषु च सर्वथा ११
प्राजापत्यं चरेत्पश्चाद्विप्राणामनुशासनात्
दग्धास्थीनि पुनर्गृह्यक्षीरैः प्रक्षालयेद्द्विजः १२
पुनर्दहेत्स्वाग्निना तु स्वतन्त्रेण पृथक्पृथक्
आहिताग्निर्द्विजः कश्चित्प्रवसन्कालचोदितः १३
देहनाशमनुप्राप्तस्तस्याग्निर्वसते गृहे
प्रेताग्निहोत्रसंस्कारः श्रूयतामृषिपुङ्गवाः १४
कृष्णाजिनं समास्तीर्यकुशैस्तु पुरुषाकृतिम्
षट्शतानि शतं चैव पलाशानां च वृन्ततः १५
चत्वारिंशच्छिरे दद्याच्छतं कण्ठे तु विन्यसेत्
बाहुभ्यां शतकं दद्यादङ्गुलीषु दशैवतु १६
शतं तु जघने दद्याद्द्विशतं तूदरे तथा
दद्यादष्टौ वृषणयोः पञ्चमेध्रे तु विन्यसेत् १७
एकविंशतिमूरुभ्यां द्विशतं जानुजङ्घयोः
पादाङ्गुलीषु षड्दद्याद्यज्ञपात्रं ततो न्यसेत् १८
शम्यं शिश्ने विनिःक्षिप्यारणीं मुष्कयोरपि
जुहूं च दक्षिणे हस्ते वामे तूपभृतं न्यसेत् १९
कर्णे चोलूखलं दद्या पृष्ठे च मुसलं न्यसेत्
उरसि क्षिप्यदृषदं तण्डुलाज्यतिलान्मुखे २०
श्रोत्रे च प्रोक्षणीं दद्यादाज्यस्थलीं तु चक्षुषोः
कर्णे नेत्रे मुखे घ्राणे हिरण्यशकलं न्यसेत् २१
अग्निहोत्रोपकरणमशेषं तत्रनिक्षिपेत्
असौ स्वर्गायलोकायस्वाहेत्येकाहुतिं सकृत् २२

दद्यात्पुत्रोऽथवा भ्राताप्यन्यो वापि च बान्धवः
यथा दहनसंस्कारस्तथा कार्यं विचक्षणैः २३
ईदृशं तु विधिं कुर्याद्ब्रह्मलोकगतिः स्मृता
दहन्ति ये द्विजास्तं तु ते यान्ति परमां गतिम् २४
अन्यथा कुर्वते कर्मत्वात्मबुद्ध्या प्रचोदिताः
भवन्त्यल्पायुषस्ते वै पतन्ति नरकेऽशुचौ २५
इति पाराशरे धर्मशास्त्रे पञ्चमोऽध्यायः

## अथ षष्ठोऽध्यायः

### प्राणिहत्याप्रायश्चित्तवर्णनम्

अतः परं प्रवक्ष्यामि प्राणि हत्यासु निष्कृतिम्
पराशरेन पूर्वोक्ता मन्वर्थेऽपि च विस्तृताम् १
क्रौञ्चसारसहंसांश्च चक्रवाकं च कुक्कुटम्
जालपादं च शरभमहो रात्रेणशुध्यति २
बलाकाटिट्टिभौ वापि शुकपारावतावपि
अहि न क्रविघाती च शुध्यते नक्तभोजनात् ३
वृककाककपोतानां शारि तित्तिरिघातकः
अन्तर्जलोभे संध्ये प्राणायामेन शुध्यति ४
गृध्रश्येन शशादानामुलूकस्य च घातकः
अपक्वाशी दिनं तिष्ठेत्त्रिकालं मारुताशनः ५
वल्गुणी टिट्टिभानां च कोकिलाखञ्जरीटके
लाविकारक्तपक्षेषु शुध्यते नक्तभोजनात् ६
कारण्डवचकोराणां पिङ्गलाकुररस्य च
भारद्वाजादिकं हत्वा शिवं पूज्यविशुध्यति ७
भेरुण्डचाषभासांश्च पारावतकपिञ्जलौ
पक्षिणां चैव सर्वेषामहो रात्रमभोजनम् ८

हत्वा मूषकमार्जारसर्पाजगरडुण्डुभान्
कृसरं भोजयेद्विप्रांलोहदण्डस्यदक्षिणा ९
शिशुमारं तथागोधां हत्वा कूर्मं च शल्यकम्
वृन्ताकफलभक्षीचाप्यहो रात्रेणशुध्यति १०
वृकजम्बूकऋक्षाणां तरक्षश्वानघातकः
तिलप्रस्थं द्विजे दद्याद्वायुभक्षो दिनत्रयम् ११
गजस्यचतुरङ्गस्यमहिषोष्ट्रनिपातने
प्रायश्चित्तमहो रात्रं त्रिसंध्यमवगाहनम् १२
कुरङ्गं वानरं सिंहं चित्रं व्याघ्रं तु घातयन्
शुध्यते सत्रिरात्रेणविप्राणां तर्पणेन च १३
मृगरोहिद्वराहाणामवेर्बस्तस्यघातकः
अफालकृष्टमश्नीयादहो रात्रमुपोष्यसः १४
एवं चतुष्पदानां च सर्वेषां वनचारिणाम्
अहो रात्रोषितस्तिष्ठेज्जपेद्वै जातवेदसम् १५
शिल्पिनं कारुकं शूद्रं स्त्रियं वा यस्तु घातयेत्
प्राजापत्यद्वयं कृत्वा वृषैकादशदक्षिणा १६
वैश्यं वा क्षत्रियं वापि निर्दोषं योऽभिघातयेत्
सोऽपि कृच्छ्रद्वयं कुर्याद्गो विंशद्दक्षिणं ददेत् १७
वैश्यं शूद्रं क्रियासक्तं विकर्मस्थं द्विजोत्तमम्
हत्वा चान्द्रायणं तस्यत्रिंशद्गोश्चैव दक्षिणाम् १८
चण्डालं हतवान्कश्चिद्ब्राह्मणे यदि कंचन
प्राजापत्यं चरेत्कृच्छ्रं गो द्वयं दक्षिणां ददत् १९
क्षत्रियेणापि वैश्येन शूद्रेणैवेतरेणवा
चण्डालस्यवधे प्राप्ते कृच्छ्रार्धेन विशुध्यति २०
चोरौ श्वपाकचण्डालौ विप्रेणाभिहतौ यदि
अहो रात्रोषितः स्नात्वा पञ्चगव्येन शुध्यति २१

चोरौ श्वपाकचराडालौ विप्रेणाभिहतौ यदि
ग्रहो रात्रोषितः स्नात्वा पञ्चगव्येन शुध्यति २२
चराडालैः सहसुप्तं तु त्रिरात्रमुपवासयेत्
चराडालैकपथं गत्वा गायत्री स्मरणाच्छुचिः २३
चराडालदर्शने सद्यादित्यमवलोकयेत्
चराडालस्पर्शने चैव सचैलं स्नानमाचरेत् २४
चराडालखातवापीषु पीत्वा सलिलमग्रजः
ग्रज्ञानाच्चैकभक्तेन त्वहो रात्रेणशुध्यति २५
चराडालभाराडसंस्पृष्टं पीत्वा कूपगतं जलम्
गो मूत्रयावकाहारस्त्रिरात्राच्छुद्धिमाप्नुयात् २६
चराडालघटसंस्थं तु यत्तोयं पिबति द्विजः
तत्त्क्षणात्त्क्षिपते यस्तु प्राजापत्यं समाचरेत् २७
यदि नक्षिपते तोयं शरीरे यस्यजीर्यति
प्राजापत्यं न दातव्यं कृच्छ्रं सांतपनं चरेत् २८
चरेत्सांतपनं विप्रः प्राजापत्यमनन्तरः
तदर्धं तु चरेद्वैश्यः पादं शूद्रस्तदाचरेत् २९
भाराडस्थमन्त्यजानां तु जलं दधिपयः पिबेत्
ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैव प्रमादतः ३०
ब्रह्मकूर्चोपवासेन द्विजातीनां तु निष्कृतिः
शूद्रस्यचोपवासेन तथा दानेन शक्तितः ३१
भुङ्क्तेऽज्ञानाद्द्विजश्रेष्ठश्चराडालान्नं कथंचन
गोमूत्रयावकाहारो दशरात्रेणशुध्यति ३२
एकैकं ग्रासमश्नीयाद्गोमूत्रयावकस्य च
दशाहं नियमस्थस्यव्रतं तत्तु विनिर्दिशेत् ३३
ग्रविज्ञानातस्तु चराडालो यत्रवेश्मनि तिष्ठति
विज्ञाते तूपसन्नस्य द्विजाः कुर्वन्त्यनुग्रहम् ३४

मुनिवक्त्रोद्गतान्धर्मान्गायन्तो वेदपारगाः
पतन्तमुद्धरेयुस्तं धर्मज्ञाः पापसंकरात् ३५
दध्ना च सर्पिषा चैव क्षीरगोमूत्रयावकम्
भुञ्जीतसहसर्वैश्च त्रिसंध्यमवगाहनम् ३६
त्र्यहं भुञ्जीतदध्ना च त्र्यहं भुञ्जीतसर्पिषा
त्र्यहं क्षीरेणभुञ्जीतैकैकेन दिनत्रयम् ३७
भावदुष्टं न भुञ्जीतनोच्छिष्टं कृमिदूषितम्
दधिक्षीरस्यत्रिपलं पलमेकं घृतस्यतु ३८
भस्मना तु भवेच्छुद्धिरुभयोस्ताम्रकांस्ययोः
जलशौचेन वस्त्राणां परित्यागेन मृण्मयम् ३९
कुसुम्भगुडकार्पासलवणं तैलसर्पिषी
द्वारे कृत्वा तु धान्यानि दद्याद्वेश्मनि पावकम् ४०
एवं शुद्धस्ततः पश्चात्कुर्याद्ब्राह्मणतर्पणम्
त्रिंशतं गोवृषं चैकं दद्याद्विप्रेषु दक्षिणाम् ४१
पुनर्लेपनखातेन होमजप्येन शुध्यति
आधारेणच विप्राणां भूमिदोषो न विद्यते ४२
चण्डालैः सहसम्पर्कं मासं मासार्धमेववा
गोमूत्रयावकाहारो मासार्धेन विशुध्यति ४३
रजकी चर्मकारी च लुब्धकी वेणुजीविनी
चातुर्वर्ण्यस्य च गृहे त्वविज्ञाता तु तिष्थति ४४
ज्ञात्वा तु निष्कृतिं कुर्यात्पूर्वोक्तस्यार्धमेव च
गृहदाहं न कुर्वीतशेषं सर्वं च कारयेत् ४५
गृहस्याभ्यन्तरं गच्छेच्चण्डालो यदि कस्यचित्
तमगाराद्विनिर्वास्यमृद्भाण्डं तु विसर्जयेत् ४६
रसपूर्णं तु यद्भाण्डं न त्यजेत्तु कदाचन
गोमयेन तु सम्मिश्रैर्जलैः प्रोक्षेद्गृहं तथा ४७

ब्राह्मणस्यव्रणद्वारे पूयशोणितसम्भवे
कृमिरुत्पद्यते यस्यप्रायश्चित्तं कथं भवेत् ४८
गवां मूत्रपुरीषेणदध्ना क्षीरेणसर्पिषा
त्र्यहं स्नात्वा च पीत्वा च कृमि दुष्टः शुचिर्भवेत् ४९
क्षत्रियोऽपि सुवर्णस्यपञ्चमाषान्प्रदायतु
गोदक्षिणां तु वैश्यस्याप्युपवासं विनिर्दिशेत् ५०
शूद्राणां नोपवासः स्याच्छूद्रो दानेन शुध्यति
अच्छिद्रमिति यद्वाक्यं वदन्ति क्षितिदेवताः ५१
प्रणम्यशिरसा ग्राह्यमग्निष्टोमफलं हि तत्
जपच्छिद्रं तपच्छिद्रं यच्छिद्रं यज्ञकर्मणि ५२
सर्वं भवति निश्छिद्रं ब्राह्मणैरुपपादितम्
व्याधि व्यसनिनि श्रान्ते दुर्भिक्षे डामरे तथा ५३
उपवासो व्रतं होमो द्विजसम्पादितानि वै
अथवा ब्राह्मणास्तुष्टाः सर्वं कुर्वन्त्यनुग्रहम् ५४
सर्वान्कामानवाप्नोति द्विजसम्पादितैरिह
दुर्बलेऽनुग्रहः प्रोक्तस्तथा वै बालवृद्धयोः ५५
अतोऽन्यथा भवेद्दोषः तस्मान्नानुग्रहः स्मृतः
स्नेहाद्वा यदिवा लोभाद्भयादज्ञानतोऽपि वा ५६
कुर्वन्त्यनुग्रहं ये तु तत्पापं तेषु गच्छति
शरीरस्यात्यये प्राप्ते वदन्ति नियमं तु ये ५७
महत्कार्योपरोधेन न स्वस्थस्यकदाचन
स्वस्थस्यमूढाः कुर्वन्ति वदन्त्यनियमं तु ये ५८
ते तस्यविघ्नकर्तारः पतन्ति नरकेऽशुचौ
स्वयमेवव्रतं कृत्वा ब्राह्मणं योऽवमन्यते ५९
वृथा तस्योपवासः स्यान्न सपुण्येन युज्यते
सैवनियमो ग्राह्यो यद्येकोऽपि वदेद्द्विजः ६०

कुर्याद्वाक्यं द्विजानां त्वन्यथा भ्रूणहा भवेत्
ब्राह्मणा जङ्गमं तीर्थं तीर्थभूता हि साधवः ६१
तेदां वाक्योदकेनैवशुध्यन्ति मलिना जनाः
ब्राह्मणा यानि भाषन्ते मन्यन्ते तानि देवताः ६२
सर्वदेवमयो विप्रो न तद्वचनमन्यथा
उपवासो व्रतं चैव स्नानं तीर्थं जपस्तपः ६३
विप्रसम्पादितं यस्यसम्पूर्णं तस्यतत्फलम्
अन्नाद्ये कीटसम्युक्ते मक्षिका केशदूषिते ६४
तदन्तरा स्पृशेच्चापस्तदन्नं भस्मना स्पृशेत्
भुञ्जानश्चैव यो विप्रः पादं हस्तेन संस्पृशेत् ६५
स्वमुच्छिष्टमसौ भुङ्क्ते पाणिना मुक्तभाजने
पादुकास्थो न भुञ्जीतपर्यङ्के संस्थितोऽपि वा ६६
श्वानचण्डालदृष्टौ च भोजनं परिवर्जयेत्
यदन्नं प्रतिषिद्धं स्यादन्नशुद्धिस्तथैव च ६७
यथा पराशरेणोक्तं तथैवाहं वदामि वः
शृतं द्रोणाढकस्यान्नं काकश्वानोपघातितम् ६८
केनेदं शुध्यते चेति ब्राह्मणेभ्यो निवेदयेत्
काकश्वानावलीढं तु द्रोणान्नं न परित्यजेत् ६९
वेदवेदाङ्गविद्विप्रैर्धर्मशास्त्रानुपालकैः
प्रस्था द्वात्रिंशतिर्द्रोणः स्मृतो द्विप्रस्थाढकः ७०
ततो द्रोणाढकस्यान्नं श्रुतिस्मृतिविदो विदुः
काकश्वानावलीढं तु गवाघ्रातं खरेणवा ७१
स्वल्पमन्नं त्यजेद्विप्रः शुद्धिर्द्रोणाढके भवेत्
अन्नस्योद्धृत्यतन्मात्रं यच्चलाला हतं भवेत् ७२
सुवर्णोदकमभ्युन्द्यहुताशेनैवतापयेत्
हुताशनेन संस्पृष्टं सुवर्णसलिलेन च ७३

विप्राणां ब्रह्मघोषेणभोज्यं भवति तत्क्षणात्
स्नेहो वा गोरसो वापि तत्रशुद्धिः कथं भवेत् ७४
अल्पं परित्यजेत्तत्रस्नेहस्योत्पवनेन च
अनलज्वालया शुद्धिर्गोरसस्यविधीयते ७५
इति पाराशरे धर्मशास्त्रे षष्ठोऽध्यायः

## अथ सप्तमोऽध्यायः

### द्रव्यशुद्धिवर्णनम्

अथातो द्रव्यशुद्धिस्तु पराशरवचो यथा
दारवाणां पात्राणां तक्षणाच्छुद्धिरिष्यते १
भस्मना शुध्यते कांस्यं ताम्रमम्लेन शुध्यति
रजसा शुध्यते नारी विकलं या न गच्छति २
नदी वेगेन शुध्येतलोपो यदि न दृश्यते
वापी कूपतडागेषु दूषितेषु कथंचन ३
उद्धृत्यवैघटशतं पञ्चगव्येन शुध्यति
अष्टवर्षा भवेद्गौरी न ववर्षा तु रोहिणी ४
दशवर्षा भवेत्कन्यात ऊर्ध्वं रजस्वला
प्राप्ते तु द्वादशे वर्षे यः कन्यां न प्रयच्छति ५
मासिमासिरजस्तस्याः पिबन्ति पितरः स्वयम्
माता चैव पिता चैव ज्येष्ठो भ्राता तथैव च ६
त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्वलाम्
यस्तां समुद्वहेत्कन्यां ब्राह्मणो मदमोहितः ७
असम्भाष्यो ह्यपाङ्क्तेयः सविप्रो वृषली पतिः
यः करोत्येकरात्रेणवृषली सेवनं द्विजः ८
सभैक्षभुग्जपन्नित्यं त्रिर्वर्षैर्विशुध्यति
अस्तं गते यदा सूर्ये चण्डालं पतितं स्त्रियम् ९

सूतिकां स्पृशतश्चैव कथं शुद्धिर्विधीयते
जातवेदः सुवर्णं च सोममार्गं विलोक्य च १०
ब्राह्मणानुमतश्चैव स्नानं कृत्वा विशुध्यति
स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी ब्राह्मणी तथा ११
तावत्तिष्ठेन्निराहारा त्रिरात्रेणैवशुध्यति
स्पृष्ट्त्वा रजस्वलान्योन्यं ब्राह्मणी क्षत्रिया तथा १२
अर्धकृच्छ्रं चरेत्पूर्वा पादमेकमनन्तरा
स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी वैश्यजा तथा १३
पादहीनं चरेत्पूर्वा पादमेकमनन्तरा
स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी शूद्रजा तथा १४
कृच्छ्रेणशुध्यते पूर्वा शूद्रा दानेन शुध्यति
स्नाता रजस्वलाया तु चतुर्थेऽहनि शुध्यति १५
कुर्याद्रजोनिवृत्तौ तु दैवपित्र्यादि कर्म च
रोगेणयद्रजः स्त्रीणामन्वहं तु प्रवर्तते १६
नाशुचिः सा ततस्तेन तत्स्याद्वैकालिकं मतम्
साध्वाचारा न तावत्स्याद्रजो यावत्प्रवर्तते १७
रजोनिवृत्तौ गम्या स्त्रीगृहकर्मणि चैव हि
प्रथमेऽहनि चराडाली द्वितीये ब्रह्मघातिनी १८
तृतीये रजकी प्रोक्ता चतुर्थेऽहनि शुध्यति
आतुरे स्नानोत्पन्ने दशकृत्वो ह्यनातुरः १९
स्नात्वा स्नात्वा स्पृशेदेनं ततः शुध्येत्सातुरः
उच्छिष्टोच्छिष्टसंस्पृष्टः शुना शूद्रेणवा द्विजः २०
उपोष्यरजनीमेकां पञ्चगव्येन शुध्यति
अनुच्छिष्टेन शूद्रेणस्पर्शे स्नानं विधीयते २१
तेनोच्छिष्टेन संस्पृष्टः प्राजापत्यं समाचरेत्
भस्मना शुध्यते कांस्यं सुरया यन्न लिप्यते २२

सुरा मात्रेणसंस्पृष्टं शुध्यतेऽग्न्युपलेखनैः
गवाघ्रातानि कांस्यानि श्वकाकोपहतानि च २३
शुध्यन्ति दशभिः क्षारैः शूद्रोच्छिष्टनि यानि च
गण्डूषं पादशौचं च कृत्वा वै कांस्यभाजने २४
षण्मासान्भुविनिःक्षिप्योद्धृत्यपुनराहरेत्
आयसेष्वायसानां च सीसस्याग्नौ विशोधनम् २५
डन्तमस्थि तथा भृङ्गं रूप्यं सौवर्णभाजनम्
मणिपाषाणपात्राणीत्येतान्प्रक्षालयेज्जलैः २६
पाषाणे तु पुनर्घर्षः शुद्धिरेवमुदाहृता
मृण्मये दहनाच्छुद्धिर्धान्यानां मार्जनादपि २७
वेणुवल्कलचीराणां क्षौमकार्पासवाससाम्
और्णनेत्रपटानां च प्रोक्षणाच्छुद्धिरिष्यते २८
मुञ्जोपस्करशूर्पाणां शणस्यफलचर्मणाम्
तृणकाष्ठस्यरज्जूणामुदकाभ्युक्षणं मतम् २९
तूलिकाद्युपधानानि रक्तवस्त्रादिकानि च
शोषयित्वातपेनैवप्रोक्षणाच्छुद्धितामियुः ३०
मार्जारमक्षिका कीटपतङ्गकृमिदर्दुराः
मेध्यामेध्यं स्पृशन्तोऽपि नोच्छिष्टं मनुरब्रवीत् ३१
महीं स्पृष्ट्वागतं तोयं याश्चाप्यन्योन्यविप्रुषः
भुक्तोच्छिष्टं तथा स्नेहं नोच्छिष्टं मनुरब्रवीत् ३२
ताम्बूलेक्षु फले चैव भुक्तस्नेहानुलेपने
मधुपर्के च सोमे च नोच्छिष्टं धर्मतो विदुः ३३
रथ्या कर्दमतोयानि नावः पन्थास्तृणानि च
मारुतार्केणशुध्यन्ति पक्वेष्टकचितानि च ३४
अदुष्टा संतता धारा वातोद्धूताश्चरेणवः
स्त्रियो वृद्धाश्च बालाश्च न दुष्यन्ति कदाचन ३५

देशभङ्गे प्रवासे वा व्याधिषु व्यसनेष्वपि
रक्षेदेवस्वदेहादि पश्चाद्धर्मं समाचरेत् ३६
येन केन च धर्मेण मृदुना दारुणेन वा
उद्धरेद्दीनमात्मानं समर्थो धर्ममाचरेत् ३७
आपत्काले तु निस्तीर्णे शौचाचारं तु चिन्तयेत्
शुद्धिं समुद्धरेत्पश्चात्स्वस्थो धर्मं समाचरेत् ३८
इति पाराशरे धर्मशास्त्रे सप्तमोऽध्यायः

अष्टमोऽध्यायः
धर्माचरणवर्णनम्

गवां बन्धनयोक्त्रेषु भवेन्मृत्युरकामतः
अकामकृतपापस्यप्रायश्चित्तं कथं भवेत् १
वेदवेदाङ्गविदुषां धर्मशास्त्रं विजानताम्
स्वकर्मरतविप्राणां स्वकं पापं निवेदयेत् २
सावित्र्याश्चापि गायत्र्याः संध्योपास्त्यग्निकार्ययोः
अज्ञानात्कृषिकर्तारो ब्राह्मणानामधारकाः ३
अव्रतानाममन्त्राणां जातिमात्रोपजीविनाम्
सहस्रशः समेतानां परिषत्त्वं न विद्यते ४
यद्वदन्ति तमो मूढा मूर्खा धर्ममतद्विदः
तत्पापं शतधा भूत्वा तद्वक्तॄनधिगच्छति ५
अज्ञात्वा धर्मशास्त्राणि प्रायश्चित्तं ददाति यः
प्रायश्चित्ती भवेत्पूतः किल्बिषं पर्षदि व्रजेत् ६
चत्वारो वा त्रयो वापि यं ब्रूयुर्वेदपारगाः
सधर्मेति विज्ञेयो नेतरैस्तु सहस्रशः ७
प्रमाणमार्गं मार्गन्तो ये धर्मं प्रवदन्ति वै
तेषामुद्विजते पापं सद्भूतगुणवादिनाम् ८

यथाश्मनि स्थितं तोयं मारुतार्केणशुध्यति
एवं परिषदादेशान्नाशयेत्तस्यदुष्कृम्  ९
नैवगच्छति कर्तारं नैवगच्छति पर्षदम्
मारुतार्कादि सम्योगात्पापं नश्यति तोयवत्  १०
चत्वारो वा त्रयो वापि वेदवन्तोऽग्निहोत्रिणः
ब्राह्मणां समर्था ये परिषत्साभिधीयते  ११
अनाहिताग्नयो येऽन्ये वेदवेदाङ्गपारगाः
पञ्चत्रयो वा धर्मज्ञाः परिषत्सा प्रकीर्तिता  १२
मुनीनामात्मविद्यानां द्विजानां यज्ञयाजिनाम्
वेदव्रतेषु स्नातानामेकोऽपि परिषद्भवेत्  १३
पञ्चपूर्वं मया प्रोक्तास्तेषां चासम्भवे त्रयः
स्ववृत्तिपरितुष्टो ये परिषत्सा प्रकीर्तिता  १४
अत ऊर्ध्वं तु ये विप्राः केवलं नामधारकाः
परिषत्त्वं नतेष्वस्ति सहस्रगुणितेष्वपि  १५
यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः
ब्राह्मणस्त्वनधीयानस्त्रयस्ते नामधारकाः  १६
ग्रामस्थानं यथा शून्यं यथा कूपस्तु निर्जलः
यथा हुतमनग्नौ चामन्त्रो ब्राह्मणस्तथा  १७
यथा षण्ढोऽफलः स्त्रीषु यथा गौरूषराफला
यथा चाज्ञेऽफलं दानं तथा विप्रोऽनृचोऽफलः  १८
चित्रकर्मयथानेकैरङ्गैरुन्मील्यते शनैः
ब्राह्मण्यमपि तद्वद्धि संस्कारैर्मन्त्रपुर्वकैः  १९
प्रायश्चित्तं प्रयच्छन्ति ये द्विजा नामधारकाः
ते द्विजा पापकर्माणः समेता नरकं ययुः  २०
ये पठन्ति द्विजा वेदं पञ्चयज्ञरताश्च ये
त्रैलोक्यं तारयन्त्येते पञ्चेन्द्रियरतापि  २१

सम्प्रणीतः श्मशानेषु दीप्तोऽग्निः सर्वभक्षकः
एवं च वेदविद्विप्रः सर्वभक्षोऽपि दैवतम्  २२
अमेध्यानि तु सर्वाणि प्रक्षिप्यन्ते यथोदके
तथैवकिल्बिषं सर्वं प्रक्षिपेच्च द्विजानले  २३
गायत्री रहितो विप्रः शूद्रादप्यशुचिर्भवेत्
गारत्री ब्रह्मतत्त्वज्ञाः सम्पूज्यन्ते जनैर्द्विजाः  २४
दुह्शीलोऽपि द्विजः पूज्यो न तु शूद्रो जितेन्द्रियः
कः परित्यज्यगां दुष्टां दुहेच्छीरवतीं खरीम्  २५
धर्मशास्त्ररथारूढा वेदखड्गधरा द्विजाः
क्रीड्र्थमपि यद्ब्रूयुः सधर्मः परमः स्मृतः  २६
चातुर्वेद्यो विकल्पी चाङ्गविद्धर्मपाठकः
त्रयश्चाश्रमो मुख्याः पर्षदेषा दशावरा  २७
राज्ञश्चानुमते स्थित्वा प्रायश्चितं विनिर्दिशेत्
स्वयमेवन कर्तव्यं कर्तव्या स्वल्पनिष्कृतिः  २८
ब्राह्मणांस्तानतिक्रम्यराजा कर्तुं यदिच्छति
तत्पापं शतधा भूत्वा राजानमनुगच्छति  २९
प्रायश्चित्तं सदा दद्याद्देवतायतनाग्रतः
आत्मकृच्छ्रं ततः कृत्वा जपेद्वै वेदमातरम्  ३०
सशिखं वपनं कृत्वा त्रिसंध्यमवगाहनम्
गवां मध्ये वसेद्रात्रौ दिवा गाश्चाप्यनुव्रजेत्  ३१
उष्णे वर्षति शीते वा मारुते वाति वा भृशम्
न कुर्वीतात्मनस्त्राणं गोरकृत्वा तु शक्तितः  ३२
आत्मनो यदि वान्येषां गृहे क्षेत्रे खलेऽथवा
भक्षयन्तीं न कथयेत्पिबन्तं चैव वत्सकम्  ३३
पिबन्तीषु पिबेत्तोयं संविशन्तीषु संविशेत्
पतितां पङ्कमग्नां वा सर्वप्राणैः समुद्धरेत्  ३४

ब्राह्मणार्थे गवार्थे वा यस्तु प्राणान्परित्यजेत्
मुच्यते ब्रह्महत्याया गोप्ता गोर्ब्राह्मणस्य च  ३५
गोधनस्यानुरूपेणप्राजापत्यं विनिर्दिशेत्
प्राजापत्यं ततः कृच्छ्रं विभजेत्तच्चतुर्विधम्  ३६
एकाहमेकभक्ताशी एकाहं नक्तभोजनः
अयाचिताश्येकमहरेकाहं मारुताशनः  ३७
दिनद्वयं चैकभक्तो द्विदिनं चैकभोजनः
दिनद्वयमयाचीस्याद्द्विदिनं मारुताशनः  ३८
त्रिदिनं चैकभक्ताशी त्रिदिनं नक्तभोजनः
दिनत्रयमयाची स्यात्त्रिदिनं मारुताशनः  ३९
चतुरहं चैकभक्ताशी चतुरहं नक्तभोजनः
चतुर्दिनमयाची स्याच्चतुरहं मारुताशनः  ४०
प्रायश्चित्ते ततचीर्णे कुर्याद्ब्राह्मणभोजनम्
विप्राणां दक्षिणां दद्यात्पवित्राणि जपेद्द्विजः  ४१
ब्राह्मणान्भोजयित्वा तु गोघ्नः शुद्धो न संशयः  ४२
इति पाराशरे धर्मशास्त्रेऽष्टमोऽध्यायः

## नवमोऽध्यायः
## गोसेवोपदेशवर्णनम्

गवां सम्रक्षणार्थाय न दुष्येद्रोधबन्धयोः
तद्वधं तु नतं विद्यात्कामाकामकृतं तथा  १
दण्डादूर्ध्वं यदन्येन प्रहाराद्यदि पातयेत्
प्रायश्चित्तं तदा प्रोक्तं द्विगुणं गोवधे चरेत्  २
रोधबन्धनयोक्त्राणि घातश्चेति चतुर्विधम्
एकपादं चरेद्रोधे द्वौ पादौ बन्धने चरेत्  ३
योत्रेषु पादहीनं स्याच्चरेत्सर्वं निपातने

गोवाटे वा गृहेए वापि दुर्गे वाप्यसमस्थले ४
नदीष्वथसमुद्रेषु त्वन्येषु न नदी मुखे
दग्धदेशे मृता गावः स्तम्भनाद्रोधोच्यते ५
योक्त्रदामकदोरैश्च कराढाभरणभूषणैः
गृहे वापि वने वापि बद्धा स्याद्गओर्मृता यदि ६
तदेवबन्धनं विद्यात्कामाकामकृतं च यत्
हले वा शकटे पङ्क्तौ पृष्ठे वा पीडितो नरैः ७
गोपतिर्मृत्युमाप्नोति योक्त्रो भवति तद्विधः
मत्तः प्रमत्तोन्मत्तश्चेतनो वाप्यचेतनः ८
कामाकामकृतक्रोधो दराडैर्हन्यादथोपलैः
प्रहृता वा मृता वापि तद्धि हेतुर्निपातने ९
मूर्छितः पतितो वापि दराडेनाभिहितः सतु
उत्थितस्तु यदा गच्छेत्पञ्चसप्तदशैववा १०
ग्रासं वा यदि गृह्णीयात्तोयं वापि पिबेद्यदि
पूर्वं व्याध्युपसृष्टश्चेत्प्रायश्चित्तं न विद्यते ११
पिराडस्थे पादमेकं तु द्वौ पादौ गर्भसम्मिते
पादोनं व्रतमुद्दिष्टं हत्वा गर्भमचेतनम् १२
पादेऽङ्गरोमवपनं द्विपादे श्मश्रुणोऽपि च
त्रिपादे तु शिखा वर्जं सशिखं तु निपातने १३
पादे वस्त्रयुगं चैव द्विपादे कांस्यभाजनम्
त्रिपादे गोवृषं दद्याच्चतुर्थे गोद्वयं स्मृतम् १४
निष्पन्न सर्वगात्रस्तु दृश्यते वा सचेतनः
अङ्गप्रत्यङ्गसम्पूर्णो द्विगुणं गोव्रतं चरेत् १५
पाषाणेनाथदराडेन गावो येनाभिघातिताः
शृङ्गभङ्गे चरेत्पादं द्वौ पादौ नेत्रघातने १६
पाषाणेनाथदराडेन गावो येनाभिघातिताः

शृङ्गभङ्गे चरेत्पादं द्वौ पादौ नेत्रघातने १७
लाङ्गूले पादकृच्छ्रं तु द्वौ पादावस्थिभञ्जने
त्रिपादं चैव कर्णे तु चरेत्सर्वं निपातने १८
शृङ्गभङ्गेऽस्थि भङ्गे चकटि भङ्गे तथैव च
यदि जीवति षण्मासान्प्रायश्चित्तं न विद्यते १९
व्रणभङ्गे च कर्तव्यः स्नेहाभ्यङ्गस्तु पाणिना
यवसश्चोपहर्तव्यो यावद्दृढबलो भवेत् २०
यावत्सम्पूर्णसर्वाङ्गस्तावत्तं पोषयेन्नरः
गोरूपं ब्राह्मणस्याग्रे नमस्कृत्वा विसर्जयेत् २१
यद्यसम्पूर्णसर्गाङ्गो हीनदेहो भवेत्तदा
गोघातकस्यतस्यार्थं प्रायश्चित्तं विनिर्दिशेत् २२
काष्ठलोष्टकपाषाणैः शस्त्रेणैवोद्धतो बलात्
व्यापादयति यो गां तु तस्यशुद्धिं विनिर्दिशेत् २३
चरेत्सांतपनं काष्ठे प्राजापत्यं तु लोष्टके
तप्तकृच्छ्रं तु पाषाणे सस्त्रे चैवातिकृच्छ्रकम् २४
पञ्चसंतपने गावः प्राजापत्ये तथा त्रयः
तप्तकृच्छ्रे भवन्त्यष्टावतिकृच्छ्रे त्रयोदश २५
प्रमापणे प्राणभृतां दद्यात्तत्प्रतिरूपकम्
तस्यानुरूपं मूल्यं वा दद्यादित्यब्रवीन्मनुः २६
अन्यत्राङ्कनलक्ष्मभ्यां वाहने मोचने तथा
सायं संगोपनार्थं च न दुष्येद्रोधबन्धयोः २७
अतिदाहेऽतिवाहे च नासिका भेदने तथा
नदी पर्वतसंचारे प्रायश्चित्तं विनिर्दिशेत् २८
अतिदाहे चरेत्पादं द्वौ पादौ वाहने चरेत्
नासिक्ये पदहीनं तु चरेत्सर्वं निपातने २९
दहानात्तु विपद्यतेऽनड्वान्योक्त्रयन्त्रितः

उक्तं पराशरेणैवह्येकपादं यथा विधि ३०
रोधनं बन्धनं चैव भारः प्रहरणं तथा
दुर्गप्रेरणयोक्त्रं च निमित्तानि वधस्यषट् ३१
बन्धपाशसुगुप्ताङ्गो म्रियते यदि गोपशुः
भवने तस्यपापी स्यात्प्रायश्चित्तार्धमर्हति ३२
न नारि केलैर्न च शाणवालैः न वापि मौञ्जैर्न च वल्कशृङ्खलैः
एतैस्तु गावो न निबन्धनीया बद्धवापि तिष्ठेत्परशुं गृहीत्वा ३३
कुशैः काशैश्च बध्नीयाद्गोपशुं दक्षिणामुखम्
पाशलग्नाग्निदग्धासु प्रायश्चित्तं न विद्यते ३४
यदि तत्रभवेत्काष्ठं प्रायश्चित्तं कथं भवेत्
जपित्वा पावनीं देवीं मुच्यते तत्रकिल्बिषात् ३५
प्रेरयन्कूपवापीषु वृक्षच्छेदेषु पातयन्
गवाशनेषु विक्रीणंस्ततः प्राप्नोति गोवधम् ३६
आराधितस्तु यः कश्चिद्भिन्नकक्षो यदा भवेत्
श्रवणं हृदयं भिन्नं मग्नो वा कूपसंकटे ३७
कूपादुत्क्रमणे चैव भग्नो वा ग्रीवपादयोः
सैवम्रियते तत्रत्रीन्पादांस्तु समाचरेत् ३८
कूपखाटे तटाबन्धे नदी बन्धे प्रपासु च
पानीयेषु विपन्नानां प्रायश्चित्तं न विद्यते ३९
कूपखाते तटा खाते दीर्घखाते तथैव च
अन्येषु धर्मखातेषु प्रायश्चित्तं न विद्यते ४०
वेश्मद्वारे निवासेषु यो नरः खातमिच्छति
स्वकार्यगृहखतेषु प्रायश्चित्तं विनिर्दिशेत् ४१
निशिबन्धनिरुद्धेषु सर्पव्याघ्रहतेषु च
अग्निविद्युद्विपन्नानां प्रायश्चित्तं न विद्यते ४२
ग्रामघाते शरौघेणवेश्मभङ्गान्निपातने

अतिवृष्टि हतानां च प्रायश्चित्तं न विद्यते ४३
संग्रामे प्रहतानां च ये दग्धा वेश्मकेषु च
दावाग्नि ग्रामघातेषु प्रायश्चित्तं न विद्याते ४४
यन्त्रिता गौश्चिकित्सार्थं मूढगर्भविमोचने
यत्ने कृते विपद्येतप्रायश्चित्तं न विद्र्यते ४५
व्यापन्नानां बहूनां च बन्धने रोधनेऽपि वा
भिषन्मिथ्योपचारे च प्रायश्चित्तं विनिर्दिशेत् ४६
गोवृषाणां विपत्तौ च यावन्तः प्रेक्षका जनाः
अनिवारयतां तेषां सर्वेषां पातकं भवेत् ४७
एको हतो यैर्बहुभिः समेतैर्न ज्ञायते यस्यहतोऽभिघातात्
दिव्येन तेषामुपलभ्यहन्ता निवर्तनीयो नृपसन्नियुक्तैः ४८
एका चेद्बहुभिः काचिद्दैवाद्व्यापादिता यदि
पादं पादं तु हत्यायाश्चरेयुस्ते पृथक्पृथक् ४९
हते तु रुधिरं दृश्यं व्याधि ग्रस्तः कृशो भवेत्
लाला भवति दष्टेष्वेवमन्वेषणं भवेत् ५०
ग्रासार्थं चोदितो वाप्यध्वानं नैवगच्छति
मनुना चैवमेकेन सर्वशास्त्राणि जानता ५१
प्रायश्चित्तं तु तेनोक्तं गोघ्नश्चान्द्रायणं चरेत्
केशानां रक्षणार्थाय द्विगुणं व्रतमाचरेत् ५२
द्विगुणे व्रतादिष्टे द्विगुणा दक्षिणा भवेत्
राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः ५३
अकृत्वा वपनं तस्यप्रायश्चित्तं विनिर्दिशेत्
सर्वान्केशान्समुद्धृत्यछेदयेदङ्गुलद्वयम् ५४
एवं नारी कुमारीणां शिरसो मुण्डनं स्मृतम्
न स्त्रियाः केशवपनं न दूरे शयनाशनम् ५५
न च गोष्ठे वसेद्रात्रौ न दिवा गानुव्रजेत्

नदीषु संगमे चैवारगयेषु विशेषतः ५६
न स्त्रीणामजिनं वासो व्रतमेवसमाचरेत्
त्रिसंध्यं स्नानमित्युक्तं सुराणामर्चनं तथा ५७
बन्धुमध्ये व्रतं तासां कृच्छ्रचान्द्रायणादिकम्
गृहेषु सततं तिष्ठेच्छुचिर्नियममाचरेत् ५८
इहयो गोवधं कृत्वा प्रछादयितुमिच्छति
सयाति नरकं घोरं कालसूत्रमसंशयम् ५९
विमुक्तो नरकात्तस्मान्मर्त्यलोके प्रजायते
क्लीबो दुःखी च कुष्ठी च सप्तजन्मानि वै नरः ६०
तस्मातर्पकाशयेत्पापं स्वधर्मं सततं चरेत्
स्त्रीबालभृत्यगोविप्रेष्वतिकोपं विवर्जयेत् ६१
इति पाराशरे धर्मशास्त्रे नवमोऽध्यायः

## दशमोऽध्यायः

### अगम्यागमनप्रायश्चित्तवर्णनम्

चातुर्वर्ण्येषु सर्वेषु हितां वक्ष्यामि निष्कृतिम्
अगम्या गमने चैव शुद्ध्यै चान्द्रायणं चरेत् १
एकैकं ह्रासयेद्ग्रासं कृष्णे शुल्के च वर्धयेत्
अमावास्यां न भुञ्जीतह्येषचान्द्रायणो विधिः २
कुक्कुटाराडा प्रमाणं तु ग्रासं वै परिकल्पयेत्
अन्याथा भावदोषेण न धर्मो न च शुध्यति ३
प्रायश्चित्तं ततश्चीर्णे कुर्याद्ब्रह्मणभोजनम्
गोद्वयं वस्त्रयुग्मं च दद्याद्विप्रेषु दक्षिणाम् ४
चराडालीं वा श्वपाकीं वा ह्यभिगच्छति यो द्विजः
त्रिरात्रमुपवासित्वा विप्राणामनुशासनम् ५
सशिखं पवनं कृत्वा प्राजापत्यद्वयं चरेत्

गोद्वयं दक्षिणां दद्याच्छुद्धिं पाराशरोऽब्रवीत् ६
क्षत्रियो वाथवैश्यो वा चण्डालीं गच्छतो यदि
प्राजापत्यद्वयं कुर्याद्दद्याद्गोमिथुन द्वयम् ७
श्वपाकीं वाथचण्डालीं शूद्रो वा यदि गच्छति
प्राजापत्यं चरेत्कृच्छ्रं चतुर्गोमिथुनं ददेत् ८
मातरं यदि गच्छेत्तु भगिनीं स्वसुतां तथा
एतास्तु मोहितो गत्वा त्रीणि कृच्छ्राणि संचरेत् ९
चान्द्रायणत्रयं कुर्याच्छिश्नच्छेदेन शुध्यति
मातृष्वसृगमे चैवमात्ममेध्रनिकर्तनम् १०
अज्ञानेन तु यो गच्छेत्कुर्याच्चान्द्रायणद्वयाम्
दशगोमिथुनं दद्याच्छुद्धिं पारशरोऽब्रवीत् ११
पितृदारान्समारुह्यमातुराप्तां तु भ्रातृजाम्
गुरुपात्नीं स्नुषां चैव भ्रातृभार्यां तथैवच १२
मातुलानीं सगोत्रां च प्राजापत्यत्रयं चरेत्
गोद्वयं दक्षिणां दद्याच्छुध्यते नात्रसंशयः १३
पशुवेष्यादि गमने महिष्युष्ट्री कपीस्तथा
खरीं च सूकरीं गत्वा प्राजापत्यव्रतं चरेत् १४
गोगामी च त्रिरात्रेणगामेकां ब्राह्मणे ददन्
महिष्युष्ट्री खरी गामी त्वहो रात्रेणशुध्यति १५
डामरे समरे वापि दुर्भिक्षे वा जनक्षये
बन्दिग्राहे भयार्ता वा सदा स्वस्त्रीं निरीक्षयेत् १६
चण्डालैः सहसम्पर्कं या नारी कुरुते ततः
विप्रान्दशवरान्कृत्वा स्वकं दोषं प्रकाशयेत् १७
आकण्ठसम्मिते कूपे गोमयोदककर्दमे
तत्रस्थित्वा निराहारा त्वहो रात्रेणनिष्क्रमेत् १८
सशिखं वपनं कृत्वा भुञ्जीयाद्यावकौदनम्

त्रिरात्रमुपवासित्वा त्वेकरात्रं जले वसेत् १९
शंखपुष्पी लतामूलं पत्रं वा कुसुमं फलम्
सुवर्णं पञ्चगव्यंच क्वाथयित्वा पिबेज्जलम् २०
एकभक्तं चरेत्पश्चाद्यावत्पुष्पवती भवेत्
व्रतं चरति तद्यावत्तावत्संवसते बहिः २१
प्रायश्चित्ते ततश्चीर्णे कुर्याद्ब्राह्मणभोजानम्
गोद्वयं दक्षिणां दद्यच्छुद्धिं पाराशरोऽब्रवीत् २२
चातुर्वर्ण्यस्यनारीणां कृच्छ्रं चान्द्रायणं व्रतम्
यथा भूमिस्तथा नारी तस्मात्तां न तु दूषयेत् २३
बन्दिग्राहेणया भुक्ता हत्वा बद्ध्वा बलाद्भयात्
कृत्वा सांतपनं कृच्छ्रं शुध्येत्पाराशरोऽब्रवीत् २४
सकृद्भुक्ता तु या नारी नेच्छन्ती पापकर्मभिः
प्राजापत्येन शुध्येतर्तु प्रस्त्रवणेन च २५
पतत्यर्धं शरीरस्ययस्यभार्यासुरां पिबेत्
पतितार्धशरीरस्यनिष्कृतिर्न विधीयते २६
गायत्रीं जपमानस्तु कृच्छ्रं सांतपनं चरेत्
गायत्रीं गोमयं क्षीरं दधिसर्पिः कुशोदकम् २७
एकरात्रोपवासश्च कृच्छ्रं सांतपनं स्मृतम्
जारेण जनयेद्गर्भं मृतेऽव्यक्ते गते पतौ २८
तां त्यजेदपरे राष्ट्रे पतितां पापकारिणीम्
ब्राह्मणी तु यदा गच्छेत्परपुंसा समन्विता २९
सा तु नष्टा विनिर्दिष्टा न तस्यागमनं पुनः
कामान्मोहात्तु या गच्छेत्त्यक्त्वा बन्धून्सुतान्पतिम् ३०
सा तु नष्टा परे लोके मानुषेषु विशेषतः
मदमोहगता नारी क्रोधाद्दण्डादिताडिता ३१
अद्वितीया गता चैव पुनरागमनं भवेत्

दशमे तु दिने प्राप्ते प्रायश्चित्तं न विद्यते  ३२
दशाहं न त्यजेन्नारीं त्यजेन्नष्टश्रुतां तथा
भर्ता चैव चरेत्कृच्छ्रं कृच्छार्धं चैव बान्धवाः  ३३
तेषां भुक्त्वा च पीत्वा चाहो रात्रेणशुध्यति
ब्राह्मणी तु यदा गच्छेत्परपुंसा विवर्जिता  ३४
गत्वा पुंसां शतं याति जयेयुस्तां तु गोत्रिणः
पुंसो यदि गृहे गच्छेत्तदशुद्धं गृहं भवेत्  ३५
पतिमातृगृहं यच्च जारस्यैवतु तद्गृहम्
उल्लिख्यतद्गृहं पश्चात्पञ्चगव्येन सेचयेत्  ३६
त्यजेच्च मृण्मयं पात्रं वस्त्रं काष्ठं च शोधयेत्
सम्भारान्पञ्चगव्येन सर्वान्गोबालैश्च फलोद्भवान् ३७
ताम्राणि पञ्चगव्येन कांस्यानि दशभस्मभिः
प्रायश्चित्तं चरेद्विप्रो ब्राह्मणैरुपपादितम्  ३८
गोद्वयं दक्षिणां दद्यात्प्राजापत्यद्वयं चरेत्
इतरेषामहो रात्रं पञ्चगव्यं च शोधनम्  ३९
उपवासैर्व्रतैः पुण्यैः स्नानसंध्यार्च नादिभिः
जपहोमदया दानैः शुध्यन्ते ब्राह्मणादयः  ४०
आकाशं वायुरग्निश्च मेध्यं भूमिगतं जलम्
न प्रदुष्यन्ति दर्भाश्च यज्ञेषु चमसा यथा  ४१
इति पाराशरे धर्मशास्त्रे दशमोऽध्यायः

## एकादशोऽध्यायः
## अभक्ष्यभक्षणप्रायश्चित्तवर्णनम्

अमेध्यरेतो गोमांसं चण्डालान्नमथापि वा
यदि भुक्तं तु विप्रेणकृच्छ्रं चान्द्रायणं चरेत्  १

तथैवक्षत्रियो वैश्योऽप्यर्धं चान्द्रायणं चरेत्
शूद्रोऽप्येवं यदा भुङ्क्ते प्राजापत्यं समाचरेत् २
पञ्चगव्यं पिबेच्छूद्रो ब्रह्मकूर्चं पिबेद्द्विजः
एकद्वित्रिचतुर्गा वा दद्याद्विप्राद्यनुक्रमात् ३
शूद्रान्नं सूतकान्नं चाभोज्यस्यान्नमेव च
शङ्कितं प्रतिषिद्धान्नं पूर्वोच्छिष्टं तथैव च ४
यदि भुक्तं तु विप्रेणाज्ञानादापदापि वा
ज्ञात्वा समाचरेत्कृच्छ्रं ब्रह्मकूर्चं तु पावनम् ५
बालैर्न कुलमार्जारैरन्नमुच्छिष्टं यदा
तिलदर्भोदकैः प्रोक्ष्यशुध्यते नात्रसंशयः ६
एकपङ्क्त्युपविष्टानां विप्राणां सहभोजने
यद्येकोऽपि त्यजेत्पात्रं शेषमन्नं न भोजयेत् ७
मोहाद्भुञ्जीतयस्तत्रपङ्क्तावुच्छिष्टभोजने
प्रायश्चित्तं चरेद्विप्रः कृच्छ्रं सांतपनं तथा ८
पीयूषं श्वेतलशुनं वृन्ताकफलगृञ्जने
पलाण्डुवृक्षनिर्यासदेवस्वकवकानि च ९
उष्ट्रीक्षीरमविक्षीरमज्ञानाद्भुञ्जते द्विजः
त्रिरात्रमुपवासेन पञ्चगव्येन शुध्यति १०
मण्डूकं भक्षयित्वा तु मूषिकामांसमेव च
ज्ञात्वा विप्रस्त्वहो रात्रं यावकान्नेन शुध्यति ११
क्षत्रियश्चापि वैश्यश्च क्रियावन्तौ शुचिव्रतौ
तद्गृहे तु द्विजैर्भोज्यं हव्यकव्येषु नित्यशः १२
घृतं तैलं तथा क्षीरं भक्ष्यं स्नेहेन पाचितम्
गत्वा नदी तटे विप्रो भुञ्जीयाच्छूद्रभोजनम् १३
मद्यमांसरतं नित्यं नीचकर्मप्रवर्तकम्
तं शूद्रं वर्जयेद्विप्रः श्वपाकमिवदूरतः १४

द्विजशुश्रूषणरतान्मद्यमांसविवर्जितान्
स्वकर्मणि रतान्नित्यं नतान्शूद्रान्त्यजेद्द्विजः १५
अज्ञानाद्भुञ्जते विप्राः सूतके मृतकेऽपि वा
प्रायश्चित्तं कथं तेषां वर्णे वर्णे विनिर्दिशेत् १६
गायव्यष्टसहस्रेणशुद्धिः स्याच्छूद्रसूतके
वैश्ये पञ्चसहस्रेण त्रिसहस्रेणक्षत्रिये १७
ब्राह्मणस्ययदा भुङ्क्ते द्वे सहस्रे तु दापयेत्
अथवा वामदैव्येन साम्नैवैकेन शुध्यति १८
शुष्कान्नं गोरसं स्नेहं शूद्रवेश्मनागतम्
पक्वं विप्रगृहे भुक्तं भोज्यं तन्मनुरब्रवीत् १९
आपत्कालेषु विप्रेणभुक्तं शूद्रगृहे यदि
मनस्तापेन शुध्येतद्रुपदां वा जपेच्छतम् २०
दासनापितगो पालकुलमित्रार्धसीरिणः
एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत् २१
शूद्रकन्या समुत्पन्ने ब्राह्मणेन तु संस्कृतः
संस्कारात्तु भवेद्दासः असंस्कारात्तु नापितः २२
क्षत्रियाच्छूद्रकन्यायां समुत्पन्नस्तु यः सुतः
सगोपालेति ज्ञेयो भोज्यो विप्रैर्नसंशयः २३
वैश्यकन्या समुत्पन्नो ब्राह्मणेन तु संस्कृतः
साह्यार्धिकेति ज्ञेयो भोज्यो विप्रैर्न संशयः २४
भाण्डस्थितमभोज्येषु जलं दधिघृतं पयः
अकामतस्तु यो भुङ्क्ते प्रायश्चित्तं कथं भवेत् २५
ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वोपसर्पति
ब्रह्मकूर्चोपवासेन याज्यवर्णस्यनिष्कृतिः २६
शूद्राणां नोपवासः स्याच्छूद्रो दानेन शुध्यति
ब्रह्मकूर्चमहो रात्रं श्वपाकमपि शोधयेत् २७

गोमूत्रं गोमयं क्षीरं दधिसर्पिः कुशोदकम्
निर्दिष्टं पञ्चगव्यं तु पवित्रं पापशोधनम् २८
गोमूत्रं कृष्णवर्णायाः श्वेतायाश्चैव गोमयम्
पयश्च ताम्रवर्णाया रक्ताया गृह्यते दधि २९
कपिलायाघृतं ग्राह्यं सर्वं कापिलमेववा
मूत्रमेकपलं दद्यादङ्गुष्ठार्धं तु गोमयम् ३०
क्षीरं सप्तपलं दद्याद्दधित्रिपलमुच्यते
घृतमेकपलं दद्यात्पलमेकं कुशोदकम् ३१
गायत्र्यादायगोमूत्रं गन्धद्वारेति गोमयम्
आप्यायस्वेतिचक्षीरं दधिक्राव्णस्तथा दधि ३२
तेजोऽसि शुक्रमित्याज्यं देवस्यत्वा कुशोदकम्
पञ्चगव्यमृचा पूतं स्थापयेदग्निसन्निधौ ३३
आपो हि ष्ठेति चालोड्यमानस्तोकेति मन्त्रयेत्
सप्तावरास्तु ये दर्भाछिन्नाग्राः शुकत्विषः ३४
एतैरुद्धृत्यहोतव्यं पञ्चगव्यं यथा विधि
इरावतीदं विष्णुर्मानस्तोकेति शंवती ३५
एताभिश्चैव होतव्यं हुतशेषं पिबेद्द्विजः
आलोड्यप्रणवेनैवनिर्मन्थ्यप्रणवेन तु ३६
उद्धृत्यप्रणवेनैवपिबेच्च प्रणवेन तु
यत्त्वस्थिगतं पापं देहे तिष्ठति देहिनाम् ३७
ब्रह्मकूर्चो दहेत्सर्वं प्रदीप्ताग्निरिवेन्धनम्
पवित्रं त्रिषु लोकेषु देवताभिरधिष्ठितम् ३८
वरुणश्चैव गोमूत्रे गोमये हव्यवाहनः
दध्निवायुः समुद्दिष्टः सोमः क्षीरे घृते रविः ३९
पिबतः पतितं तोयं भाजने मुखनिह्सृतम्
अपेयं तद्विजानीयात्पीत्वा चान्द्रायणं चरेत् ४०

कूपे च पतितं दृष्ट्वा श्वसृगालौ च मर्कटम्
अस्थिचर्मादिपतितं पीत्वामेध्यापो द्विजः ४१
नारं तु कुणपं काकं विड्वराहखरोष्ट्रकम्
गावयं सौप्रतीकं च मायूरं खाड्गकं तथा ४२
वैय्याघ्रमार्क्षं सैंहं वा कूपे यदि निमज्जति
तटाकस्याथदुष्टस्यपीतं स्यादुदकं यदि ४३
प्रायश्चित्तं भवेत्पुंसः क्रमेणैतेन सर्वशः
विप्रः शुध्येत्त्रिरात्रेणक्षत्रियस्तु दिनद्वयात् ४४
एकाहेन तु वैश्यस्तु शूद्रो नक्तेन शुध्यति
परपाकनिवृत्तस्यपरपाकरतस्य च ४५
अपचस्य च भुक्त्वान्नं द्विजश्चान्द्रायणं चरेत्
अपचस्य च यद्दानं दातुश्चास्य कुतः फलम् ४६
दाताप्रतिग्रहीता च तौ द्वौ निरयगामिनौ
गृहीत्वाग्निं समारोप्यपञ्च यज्ञान्न निर्वपेत् ४७
परपाकनिवृत्तोऽसौ मुनिभिः परिकीर्तितः
पञ्चयज्ञान्स्वयं कृत्वा परान्नेनोपजीवति ४८
सततं प्रातरुत्थायपरपाकरतस्तु सः
गृहस्थधर्मा यो विप्रो ददाति परिवर्जितः ४९
ऋषिभिर्धर्मतत्त्वज्ञैरपचः परिकीर्तितः
युगे युगे तु धर्मास्तेषु तेषु च ये द्विजाः ५०
तेषां निन्दा न कर्तव्या युगरूपा हि ते द्विजाः
हुं कारं ब्राह्मणस्योक्त्वा त्वं कारं च गरीयसः ५१
स्नात्वा तिष्ठन्नहः शेषमभिवाद्यप्रसादयेत्
ताडयित्वा तृणेनापि कण्ठे बद्ध्वापि वाससा ५२
विवादेनापि निर्जित्यप्रणिपत्यप्रसादयेत्
अवगूर्यत्वहो रात्रं त्रिरात्रं क्षितिपातने ५३

अतिकृच्छ्रं च रुधिरे कृच्छ्रोऽभ्यन्तरशोणिते
न वाहमतिकृच्छ्री स्यात्पाणिपूरान्न भोजनः ५४
त्रिरात्रमुपवासी स्यादतिकृच्छ्रः सोच्यते
सर्वेषामेवपापानां संकरे समुपस्थिते ५५
दशसाहस्रमभ्यस्ता गायत्री शोधनं परम् ५६
इति पाराशरे धर्मशास्त्रे एकादशोऽध्यायः

द्वादशोऽध्यायः

तत्रादौ--पुनः संस्कारादिप्रायश्चित्तवर्णनम्
दुःस्वप्नं यदि पश्येत्तु वान्ते तु क्षुरकर्मणि
मैथुने प्रेतधूमे च स्नानमेवविधीयते १
अज्ञानात्प्राश्यविरामूत्रं सुरा संस्पृष्टमेव च
पुनः संस्कारमर्हन्ति त्रयोवर्णा द्विजातयः २
अजिनं मेखला दण्डो भैक्षचर्या व्रतानि च
निवर्तन्ते द्विजातीनां पुनः संस्कारकर्मणि ३
विरामूत्रभोजी शुध्यं प्राजापत्यं समाचरेत्
पञ्चगव्यं च कुर्वीतस्नात्वा पीत्वा शुचिर्भवेत् ४
जलाग्निपतने चैव प्रव्रज्यानाशकेषु च
प्रत्यावसितवर्णानां कथं शुद्धिर्विधीयते ५
प्राजपत्यद्वयेनैवतीर्थाभिगनमेन च
वृषैकादशदानेन वर्णाः शुध्यन्ति ते त्रयः ६
ब्राह्मणस्यप्रवक्ष्यामि वनं गत्वा चतुष्पथे
सशिखं वपनं कृत्वा प्राजापत्यद्वयं चरेत् ७
गोद्वयं दक्षिणां दद्याच्छुद्धिं स्वायम्भुवोऽब्रवीत्
मुच्यते तेन पापेन ब्राह्मणत्वं च गच्छति ८
स्नानानि पञ्चपुन्यानि कीर्तितानि मनीषिभिः

आग्नेयं वारुणं ब्राह्मं वायव्यं दिव्यमेव च ९
आग्नेयं भस्मना स्नानमवगाह्यतु वारुणम्
आपो हि ष्ठेति च ब्राह्मं वायव्यं गोरजः स्मृतम् १०
यत्तु सातपवर्षेणतत्स्नानं दिव्यमुच्यते
तत्रस्नात्वा तु गङ्गायां स्नातो भवति मानवः ११
स्नातुं यान्तं द्विजं सर्वे देवाः पितृगणैः सह
वायुभूतास्तु गच्छन्ति तृषार्ताः सलिलार्थिनः १२
निराशास्ते निवर्तन्ते वस्त्रनिष्पीडने कृते
तस्मान्नपीडयेद्वस्त्रमकृत्वा पितृतर्पणम् १३
रोमकूपेऽववस्थाप्ययस्तिलैर्तर्पयेत्पितॄन्
पितरस्तर्पितास्तेन रुधिरेणमलेन च १४
अवधुनोति यः केशान्स्नात्वा यस्तूत्सृजेन्मलं
आचामेद्वा जलस्थेऽपि सबाह्यः पितृदैवतैः १५
शिरः प्रावृत्त्यकण्ठं वा मुक्तकच्छशिखोऽपि वा
विना यज्ञोपवीतेनाचान्तोऽप्यशुचिर्भवेत् १६
जले स्थलस्थो नाचामेज्जलस्थश्च बहिः स्थले
उभे स्पृष्ट्वा समाचान्तोभयत्रशुचिर्भवेत् १७
स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे
आचान्तः पुनराचामेद्वासो विपरिधाय च १८
क्षुते निष्ठीवनेए चैव दन्तोच्छिष्टे तथानृते
पतितानां च सम्भाषे दक्षिणं श्रवणं स्पृशेत् १९
प्रभासादीनि तीर्थानि गङ्गाद्याः सरितस्तथा
विप्रस्यदक्षिणे कर्णे सन्तीति मनुरब्रवीत् २०
अग्निरापश्च वेदाश्च सोमसूर्यानिलास्तथा
सर्वैवतु विप्रस्यश्रोते तिष्ठन्ति दक्षिणे २१
भास्करस्यकरैः पूतं दिवा स्नानं प्रशस्याते

अप्रशस्तं निशिस्नानं राहोरन्यत्रदर्शनात् २२
स्नानं दानं जपो होमः कर्तव्यो राहुदर्शने
अन्यदा त्वशुची रात्रिस्तस्मात्तां परिवर्जयेत् २३
मरुतो वसवो रुद्रादित्याश्चैव देवताः
सर्वे सोमे प्रलीयन्ते तस्माद्दानं तु तद्ग्रहे २४
खलयज्ञे विवाहे च संक्रान्तौ ग्रहणे तथा
शर्वर्यां दानमस्त्येवनान्यत्रैवविधीयते २५
पुत्रजन्मजि यज्ञे च तथा चात्ययकर्मणि
राहोश्च दर्शने दानं प्रशस्तं नान्यदा निशि २६
महा निशा तु विज्ञेया मध्यस्थं प्रहरद्वयम्
प्रदोषपश्चिमौ यामौ दिनवत्स्नानमाचरेत् २७
चैत्यवृक्षश्चितिर्यूपश्चण्डालः सोमविक्रयी
एतांस्तु ब्राह्मणः स्पृष्ट्वा सवासाजलमाविशेत् २८
अस्थिसंचयनात्पूर्वं रुदित्वा स्नानमाचरेत्
अन्तर्दशाहे विप्रस्यह्यूर्ध्वमाचमनं भवेत् २९
सर्वं गङ्गा समं तोयं राहुग्रस्ते दिवा करे
सोमग्रहे तथैवोक्तं स्नानदानादि कर्मसु ३०
कुशैः पूतं तु यत्स्नानं कुशेनोपस्पृशेद्द्विजः
कुशेन चोद्धृतं तोयं सोमपानसमं भवेत् ३१
अग्निकार्यात्परिभ्रष्टाः संध्योपासनवर्जिताः
वेदं चैवानधीयानास्सर्वे ते वृषलाः स्मृताः ३२
तस्माद्वृषलभीतेन ब्राह्मणेन विशेषतः
अध्येतव्योऽप्येकदेशो यदि सर्वं न शक्यते ३३
शूद्रान्न रसपुष्टस्याप्यधीयानस्यनित्यशः
जपतो जुह्वतो वापि गतिरूर्ध्वा न विद्यते ३४
शूद्रान्नं शूद्रसम्पर्कः शूद्रेणतु सहासनम्

शूद्राज्ज्ञानागमश्चैव ज्वलन्तमपि पातयेत्  ३५
यः शूद्र्या पाचयेन्नित्यं शूद्री च गृहमेधिनी
वर्जितः पितृदेवेभ्यो रौरवं याति सद्विजः  ३६
मृतसूतकपुष्टाङ्गोद्विजः शूद्रान्न भोजनः
अहं तन्न विजानामि कां कां योनिं गमिष्यति  ३७
गृध्रो द्वादशजन्मानि दशजन्मानि सूकरः
श्वयोनौ सप्तजन्मा स्यादित्येवं मनुरब्रवीत्  ३८
दक्षिणार्थं तु यो विप्रः शूद्रस्यजुहुयाद्धविः
ब्राह्मणस्तु भवेच्छूद्रः शूद्रस्तु ब्राह्मणो भवेत्  ३९
मौनव्रतं समाश्रित्यासीनो न वदेद्द्विजः
भुञ्जानो हि वदेद्यस्तु तदन्नं परिवर्जयेत्  ४०
अर्धे भुक्ते तु यो विप्रः तस्मिन्पात्रे जलं पिबेत्
हतं दैवं च पित्र्यं चात्मानं चोपघातयेत्  ४१
भुञ्जानेषु तु विप्रेषु योऽग्रे पात्रं विमुञ्चति
समूढः सच पापिष्ठो ब्रह्मघ्नः सखलूच्यते  ४२
भाजनेषु च तिष्ठत्सु स्वस्ति कुर्वन्ति ये द्विजाः
न देवास्तृप्तिमायान्ति निराशाः पितरस्तथा  ४३
अस्नात्वा नैवभुञ्जीताजप्त्वाग्निमहूय च
पर्णपृष्ठे न भुञ्जीतरात्रौ दीपं विना तथा  ४४
गृहस्थस्तु दया युक्तो धर्ममेवानुचिन्तयेत्
पोष्यवर्गार्थसिद्ध्यर्थं न्यायवर्ती सुबुद्धिमान् ४५
न्यायोपार्जितवित्तेन कर्तव्यं ह्यात्मरक्षणम्
अन्यायेन तु यो जीवेत्सर्वकर्मबहिष्कृतः  ४६
अग्निचित्कपिला सत्री राजा भिक्षुर्महोदधिः
दृष्टमात्राः पुनन्त्येते तस्मात्पश्येत्तु नित्यशः  ४७
अरणिं कृष्णमार्जारं चन्दनं सुमणिं घृतम्

तिलान्कृष्णाजिनं छागं गृहे चैतानि रक्षयेत् ४८
गवां शतं सैकवृषं यत्रतिष्ठत्ययन्त्रितम्
तत्क्षेत्रं दशगणितं गोचर्मपरिकीर्तितम् ४९
ब्रह्महत्यादिभिर्मर्त्यो मनो वाक्कायकर्मजैः
एतद्गोचर्मदानेन मुच्यते सर्वकिल्बिषैः ५०
कुटुम्बिने दरिद्रायश्रोत्रियायविशेषतः
यद्दानं दीयते तस्मै तद्दानं शुभकारकम् ५१
वापी कूपतडागाद्यैर्वाजपेयशतैर्मुखैः
गवां कोटिप्रदानेन भूमिहर्ता न शुध्यति ५२
अष्टादशदिनादर्वाक्स्नानमेवरजस्वला
अत ऊर्ध्वं त्रिरात्रं स्यादुशना मुनिरब्रवीत् ५३
युगं युगद्वयं चैव त्रियुगं च चतुर्युगम्
चाण्डालसूतिकोदक्या पतितानामधः क्रमात् ५४
ततः सन्निधिमात्रेणसचैलं स्नानमाचरेत्
स्नात्वावलोकयेत्सूर्यमज्ञानात्स्पृशते यदि ५५
विद्यमानेषु हस्तेषु ब्राह्मणो ज्ञानदुर्बलः
तोयं पिबति वक्त्रेणश्वयोनौ जायते ध्रुवम् ५६
यस्तु क्रुद्धः पुमान्ब्रूयाज्जायायास्त्वगम्यताम्
पुनरिच्छति चेदेनां विप्रमध्ये तु श्रावयेत् ५७
श्रान्तः क्रुद्धस्तमोऽन्धो वा क्षुत्पिपासा भयार्दितः
दानं पुण्यमकृत्वा तु प्रायश्चित्तं दिनत्रयम् ५८
उपस्पृशेत्त्रिषवणं महानद्युपसंगमे
चीर्णान्ते चैव गां दद्याद्ब्राह्मणान्भोजयेद्दश ५९
दुराचारस्यविप्रस्यनिषिद्धाचरणस्य च
अन्नं भुक्त्वा द्विजः कुर्याद्दिनमेकमभोजनम् ६०
सदाचारस्यविप्रस्यतथा वेदान्तवेदिनः

भुक्त्वान्नं मुच्यते पापादहोरात्रान्तरान्नरः ६१
ऊर्ध्वोच्छिष्टमधो उच्छिष्टमन्तरिक्षमृतौ तथा
कृच्छ्रत्रयं प्रकुर्वीताशौचमरणे तथा ६२
कृच्छ्रं देव्ययुतं चैव प्राणायामशतद्वयम्
पुण्यतीर्थेऽनार्द्रशिरः स्नानं द्वादशसंख्यया ६३
द्वियोजने तीर्थयात्रा कृच्छ्रमेकं प्रकल्पितम्
गृहस्थः कामतः कुर्याद्रेतः स्खलनः भुवि ६४
सहस्रं तु जपेद्देव्याः प्राणायामैस्त्रिभिः सह
चतुर्विद्योपपन्नस्तु विधिवद्ब्रह्मघातके ६५
समुद्रसेतु गमनं प्रायश्चित्तं विनिर्दिशेत्
सेतुबन्धपथे भिक्षां चातुर्वर्ण्यात्समाचरेत् ६६
वर्जयित्वा विकर्मस्थान्छत्रोपानद्विवर्जितः
अहं दुष्कृतकर्मा वै महापातककारकः ६७
गृहद्वारेषु तिष्ठामि भिक्षार्थी ब्रह्मघातकः
गोकुलेषु वसेच्चैव ग्रामेषु नगरेषु वा ६८
तपो वनेषु तीर्थेषु नदीप्रस्रवणेषु वा
एतेषु ख्यापयन्नेनः पुण्यं गत्वा तु सागरम् ६९
दशयोजनविस्तीर्णं शतयोजनमायतम्
रामचन्द्रसमादिष्टनलसंचयसंचितम् ७०
सेतुं दृष्ट्वा समुद्रस्यब्रह्महत्यां व्यपोहति
सेतुं दृष्ट्वा विशुद्धात्मा त्ववगाहेतसागरम् ७१
यजेतवाश्वमेधेन राजा तु पृथिवीपतिः
पुनः प्रत्यागते वेश्मवासार्थमुपसर्पति ७२
सपुत्रः सहभृत्यैश्च कुर्याद्ब्राह्मणभोजनम्
गाश्चैवैकशतं दद्याच्चतुर्विध्येषु दक्षिणाम् ७३
ब्राह्मणानां प्रसादेन ब्रह्महा तु विमुच्यते

सवनस्थां स्त्रियं हत्वा ब्रह्महत्या व्रतं चरेत् ७४
मद्यपश्च द्विजः कुर्यान्नदीं गत्वा समुद्रगाम्
चान्द्रायणे ततश्चीर्णे कुर्याद्ब्राह्मणभोजनम् ७५
अनडुत्सहितां गां च दद्याद्विप्रेषु दक्षिणाम्
सुरापानं सकृत्कृत्वाग्निवर्णां सुरां पिबेत् ७६
सपावयेदथात्मानमिहलोके परत्र च
अपहृत्यसुवर्णं तु ब्राह्मणस्यततः स्वयम् ७७
गच्छेन्मुसलमादायराजाभ्याशं वधायतु
ततः शुद्धिमवाप्नोति राज्ञासौ मुक्तैव च ७८
कामतस्तु कृतं यत्स्यान्नान्यथा वधमर्हति
आसनाच्छयनाद्यानात्सम्भाषात्सहभोजनात् ७९
संक्रामन्ति हि पापानि तैलबिन्दुरिवाम्भसि
चान्द्रायणं यावकं तु तुलापुरुषैव च ८०
गवां चैवानुगमनं सर्वपापप्रणाशनम्
एतत्पराशरं शास्त्रं श्लोकानां शतपञ्चकम् ८१
द्विनवत्यासमायुक्तं धर्मसास्त्रस्यसंग्रहः
यथाध्ययन कर्माणि धर्मशास्त्रमिदं तथा ८२
अध्येतव्यं प्रयत्नेन नियतं स्वर्गगामिना ८३

इति पाराशरे धर्मशास्त्रे द्वादशोऽध्यायः

समाप्ता चेयं पराशरसंहिता

Credits

Sources: On the basis of the edition BSS no. 47, with partial collation of the edition BI 298 (repr. 1973-4).

Typescript: Input by Muneo Tokunaga

Conversion to Devanagari using Vedapad Software by Ralph Bunker

Formatted for Maharishi University of Management Vedic Literature Collection

# मनुस्मृति

## प्रथमोऽध्यायः

मनुमेकाग्रमासीनमभिगम्य महर्षयः
प्रतिपूज्य यथान्यायमिदं वचनमब्रुवन्  १
भगवन्सर्ववर्णानां यथावदनुपूर्वशः
अन्तरप्रभवानां च धर्मान्नो वक्तुमर्हसि  २
त्वमेको ह्यस्य सर्वस्य विधानस्य स्वयंभुवः
अचिन्त्यस्याप्रमेयस्य कार्य तत्त्वार्थवित्प्रभो  ३
स तैः पृष्टस्तथा सम्यगमितौजा महात्मभिः
प्रत्युवाचार्च्य तान्सर्वान्महर्षीश्रूयतामिति  ४
आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः  ५
ततः स्वयंभूर्भगवानव्यक्तो व्यञ्जयन्निदम्
महाभूतादि वृत्तौजाः प्रादुरासीत्तमोनुदः  ६
योऽसावतीन्द्रियग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः
सर्वभूतमयोऽचिन्त्यः स एव स्वयमुद्बभौ  ७
सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः
अप एव ससर्जादौ तासु वीर्यमवासृजत्  ८
तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्
तस्मिञ् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः  ९
आपो नरा इति प्रोक्तापो वै नरसूनवः
ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः  १०
यत्तत्कारणमव्यक्तं नित्यं सदसदात्मकं
तद्विसृष्टः स पुरुषो लोके ब्रह्मेति कीर्त्यते  ११
तस्मिन्नण्डे स भगवानुषित्वा परिवत्सरम्
स्वयमेवात्मनो ध्यानात्तदण्डमकरोद्द्विधा  १२

ताभ्यां स शकलाभ्यां च दिवं भूमिं च निर्ममे
मध्ये व्योम दिशश्चाष्टावपां स्थानं च शाश्वतम्  १३
उद्बबर्हात्मनश्चैव मनः सदसदात्मकम्
मनसश्चाप्यहंकारमभिमन्तारमीश्वरम्  १४
महान्तमेव चात्मानं सर्वाणि त्रिगुणानि च
व्ययाणां ग्रहीतृणि शनैः पञ्चेन्द्रियाणि च  १५
तेषां त्ववयवान्सूक्ष्मान्षण्णामप्यमितौजसाम्
संनिवेश्यात्ममात्रासु सर्वभूतानि निर्ममे  १६
यन्मूर्त्यवयवाः सूक्ष्मास्तानीमान्याश्रयन्ति षट्
तस्माच्छरीरमित्याहुस्तस्य मूर्तिं मनीषिणः  १७
तदाविशन्ति भूतानि महान्ति सह कर्मभिः
मनश्चावयवैः सूक्ष्मैः सर्वभूतकृदव्ययम्  १८
तेषामिदं तु सप्तानां पुरुषाणां महौजसाम्
सूक्ष्माभ्यो मूर्तिमात्राभ्यः संभवत्यव्ययाद्व्ययम्  १९
आद्याद्यस्य गुणं त्वेषामवाप्नोति परः परः
यो यो यावतिथश्चैषां स स तावद्गुणः स्मृतः  २०
सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक्
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे  २१
कर्मात्मनां च देवानां सोऽसृजत्प्राणिनां प्रभुः
साध्यानां च गणं सूक्ष्मं यज्ञं चैव सनातनम्  २२
अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम्
दुदोह यज्ञसिद्ध्यर्थमृग्यजुस्सामलक्षणम्  २३
कालं कालविभक्तीश्च नक्षत्राणि ग्रहांस्तथा
सरितः सागरान्शैलान्समानि विषमानि च  २४
तपो वाचं रतिं चैव कामं च क्रोधमेव च
सृष्टिं ससर्ज चैवेमां स्रष्टुमिच्छन्निमाः प्रजाः  २५

कर्मणां च विवेकार्थं धर्माधर्मौ व्यवेचयत्
द्वन्द्वैरयोजयच्चेमाः सुखदुःखादिभिः प्रजाः २६
अराव्यो मात्रा विनाशिन्यो दशार्धानां तु याः स्मृताः
ताभिः सार्धमिदं सर्वं संभवत्यनुपूर्वशः २७
यं तु कर्मणि यस्मिन्स न्ययुङ्क्त प्रथमं प्रभुः
स तदेव स्वयं भेजे सृज्यमानः पुनः पुनः २८
हिंस्राहिंस्रे मृदुक्रूरे धर्माधर्मावृतानृते
यद्यस्य सोऽदधात्सर्गे तत्तस्य स्वयमाविशत् २९
यथर्तुलिङ्गान्यृतवः स्वयमेवर्तुपर्यये
स्वानि स्वान्यभिपद्यन्ते तथा कर्माणि देहिनः ३०
लोकानां तु विवृद्ध्यर्थं मुखबाहूरुपादतः
ब्राह्मणं क्षत्रियं वैश्यं शूद्रं च निरवर्तयत् ३१
द्विधा कृत्वात्मनो देहमर्धेन पुरुषोऽभवत्
अर्धेन नारी तस्यां स विराजमसृजत्प्रभुः ३२
तपस्तप्त्वासृजद्यं तु स स्वयं पुरुषो विराट्
तं मां वित्तास्य सर्वस्य स्रष्टारं द्विजसत्तमाः ३३
अहं प्रजाः सिसृक्षुस्तु तपस्तप्त्वा सुदुश्चरम्
पतीन्प्रजानामसृजं महर्षीनादितो दश ३४
मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम्
प्रचेतसं वसिष्ठं च भृगुं नारदमेव च ३५
एते मनूंस्तु सप्तान्यानसृजन्भूरितेजसः
देवान्देवनिकायांश्च महर्षींश्चामितौजसः ३६
यक्षरक्षस्पिशाचांश्च गन्धर्वाप्सरसोऽसुरान्
नागान्सर्पान्सुपर्णांश्च पितॄणांश्च पृथग्गणम् ३७
विद्युतोऽशनिमेघांश्च रोहितेन्द्रधनूंषि च
उल्कानिर्घातकेतूंश्च ज्योतींष्युच्चावचानि च ३८

किन्नरान्वानरान्मत्स्यान्विविधांश्च विहङ्गमान्
पशून्मृगान्मनुष्यांश्च व्यालांश्चोभयतोदतः ३९
कृमिकीटपतङ्गांश्च यूकामक्षिकमत्कुणम्
सर्वं च दंशमशकं स्थावरं च पृथग्विधम् ४०
एवमेतैरिदं सर्वं मद्नियोगान्महात्मभिः
यथाकर्म तपोयोगात्सृष्टं स्थावरजङ्गमम् ४१
येषां तु यादृषं कर्म भूतानामिह कीर्तितम्
तत्तथा वोऽभिधास्यामि क्रमयोगं च जन्मनि ४२
पशवश्च मृगाश्चैव व्यालाश्चोभयतोदतः
रक्षांसि च पिशाचाश्च मनुष्याश्च जरायुजाः ४३
अण्डाजाः पक्षिणः सर्पा नक्रा मत्स्याश्च कच्छपाः
यानि चैवं प्रकाराणि स्थलजान्यौदकानि च ४४
स्वेदजं दंशमशकं यूकामक्षिकमत्कुणम्
ऊष्मणश्चोपजायन्ते यच्चान्यत्किं चिदीदृषम् ४५
उद्भिज्जाः स्थावराः सर्वे बीजकाण्डप्ररोहिणः
ओषध्यः फलपाकान्ता बहुपुष्पफलोपगाः ४६
अपुष्पाः फलवन्तो ये ते वनस्पतयः स्मृताः
पुष्पिणः फलिनश्चैव वृक्षास्तूभयतः स्मृताः ४७
गुच्छगुल्मं तु विविधं तथैव तृणजातयः
बीजकाण्डरुहाण्येव प्रताना वल्ल्य एव च ४८
तमसा बहुरूपेण वेष्टिताः कर्महेतुना
अन्तःसंज्ञा भवन्त्येते सुखदुःखसमन्विताः ४९
एतदन्तास्तु गतयो ब्रह्माद्याः समुदाहृताः
घोरेऽस्मिन्भूतसंसारे नित्यं सततयायिनि ५०
एवं सर्वं स सृष्ट्वेदं मां चाचिन्त्यपराक्रमः
आत्मन्यन्तर्दधे भूयः कालं कालेन पीडयन् ५१

यदा स देवो जागर्ति तदेवं चेष्टते जगत्
यदा स्वपिति शान्तात्मा तदा सर्वं निमीलति ५२
तस्मिन्स्वपिति तु स्वस्थे कर्मात्मानः शरीरिणः
स्वकर्मभ्यो निवर्तन्ते मनश्च ग्लानिमृच्छति ५३
युगपत्तु प्रलीयन्ते यदा तस्मिन्महात्मनि
तदायं सर्वभूतात्मा सुखं स्वपिति निर्वृतः ५४
तमोऽयं तु समाश्रित्य चिरं तिष्ठति सेन्द्रियः
न च स्वं कुरुते कर्म तदोत्क्रामति मूर्तितः ५५
यदाणुमात्रिको भूत्वा बीजं स्थास्नु चरिष्णु च
समाविशति संसृष्टस्तदा मूर्तिं विमुञ्चति ५६
एवं स जाग्रत्स्वप्नाभ्यामिदं सर्वं चराचरम्
संजीवयति चाजस्रं प्रमापयति चाव्ययः ५७
इदं शास्त्रं तु कृत्वासौ मामेव स्वयमादितः
विधिवद्ग्राहयामास मरीच्यादींस्त्वहं मुनीन् ५८
एतद्वोऽयं भृगुः शास्त्रं श्रावयिष्यत्यशेसतः
एतद्धि मत्तोऽधिजगे सर्वमेषोऽखिलं मुनिः ५९
ततस्तथा स तेनोक्तो महर्षिमनुना भृगुः
तानब्रवीदृषीन्सर्वान्प्रीतात्मा श्रूयतामिति ६०
स्वायंभुवस्यास्य मनोः षड्वंश्या मनवोऽपरे
सृष्टवन्तः प्रजाः स्वाः स्वा महात्मानो महौजसः ६१
स्वारोचिषश्चोत्तमश्च तामसो रैवतस्तथा
चाक्षुषश्च महातेजा विवस्वत्सुत एव च ६२
स्वायंभुवाद्याः सप्तैते मनवो भूरितेजसः
स्वे स्वेऽन्तरे सर्वमिदमुत्पाद्यापुश्चराचरम् ६३
निमेषा दश चाष्टौ च काष्ठा त्रिंशत्तु ताः कला
त्रिंशत्कला मुहूर्तः स्यादहोरात्रं तु तावतः ६४

अहोरात्रे विभजते सूर्यो मानुषदैविके
रात्रिः स्वप्नाय भूतानां चेष्टायै कर्मणामहः ६५
पित्र्ये रात्र्यहनी मासः प्रविभागस्तु पक्षयोः
कर्मचेष्टास्वहः कृष्णः शुक्लः स्वप्नाय शर्वरी ६६
दैवे रात्र्यहनी वर्षं प्रविभागस्तयोः पुनः
अहस्तत्रोदगयनं रात्रिः स्याद्दक्षिणायनम् ६७
ब्राह्मस्य तु क्षपाहस्य यत्प्रमाणं समासतः
एकैकशो युगानां तु क्रमशस्तन्निबोधत ६८
चत्वार्याहुः सहस्राणि वर्षाणां तत्कृतं युगम्
तस्य तावच्छती संध्या संध्यांशश्च तथाविधः ६९
इतरेषु ससंध्येषु ससंध्यांशेषु च त्रिषु
एकापायेन वर्तन्ते सहस्राणि शतानि च ७०
यदेतत्परिसंख्यातमादावेव चतुर्युगम्
एतद्द्वादशसाहस्रं देवानां युगमुच्यते ७१
दैविकानां युगानां तु सहस्रं परिसंख्यया
ब्राह्ममेकमहर्ज्ञेयं तावतीं रात्रिमेव च ७२
तद्वै युगसहस्रान्तं ब्राह्मं पुण्यमहर्विदुः
रात्रिं च तावतीमेव तेऽहोरात्रविदो जनाः ७३
तस्य सोऽहर्निशस्यान्ते प्रसुप्तः प्रतिबुध्यते
प्रतिबुद्धश्च सृजति मनः सदसदात्मकम् ७४
मनः सृष्टिं विकुरुते चोद्यमानं सिसृक्षया
आकाशं जायते तस्मात्तस्य शब्दं गुणं विदुः ७५
आकाशात्तु विकुर्वाणात्सर्वगन्धवहः शुचिः
बलवाञ् जायते वायुः स वै स्पर्शगुणो मतः ७६
वायोरपि विकुर्वाणाद्विरोचिष्णु तमोनुदम्
ज्योतिरुत्पद्यते भास्वत्तद्रूपगुणमुच्यते ७७

ज्योतिषश्च विकुर्वाणादापो रसगुणाः स्मृताः
अद्भ्यो गन्धगुणा भूमिरित्येषा सृष्टिरादितः ७८
यद्प्राग्द्वादशसाहस्रमुदितं दैविकं युगम्
तदेकसप्ततिगुणं मन्वन्तरमिहोच्यते ७९
मन्वन्तराण्यसंख्यानि सर्गः संहार एव च
क्रीडन्निवैतत्कुरुते परमेष्ठी पुनः पुनः ८०
चतुष्पात्सकलो धर्मः सत्यं चैव कृते युगे
नाधर्मेणागमः कश्चिन्मनुष्यान्प्रति वर्तते ८१
इतरेष्वागमाद्धर्मः पादशस्त्ववरोपितः
चौरिकानृतमायाभिर्धर्मश्चापैति पादशः ८२
अरोगाः सर्वसिद्धार्थाश्चतुर्वर्षशतायुषः
कृते त्रेतादिषु ह्येषां आयुर्ह्रसति पादशः ८३
वेदोक्तमायुर्मर्त्यानामाशिषश्चैव कर्मणाम्
फलन्त्यनुयुगं लोके प्रभावश्च शरीरिणाम् ८४
अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरेऽपरे
अन्ये कलियुगे नृणां युगह्रासानुरूपतः ८५
तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते
द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे ८६
सर्वस्यास्य तु सर्गस्य गुप्त्यर्थं स महाद्युतिः
मुखबाहूरुपज्ञानां पृथक्कर्माण्यकल्पयत् ८७
अध्यापनमध्ययनं यजनं याजनं तथा
दानं प्रतिग्रहं चैव ब्राह्मणानामकल्पयत् ८८
प्रजानां रक्षणं दानमिज्याध्ययनमेव च
विषयेष्वप्रसक्तिश्च क्षत्रियस्य समासतः ८९
पशूनां रक्षणं दानमिज्याध्ययनमेव च
वणिक्पथं कुसीदं च वैश्यस्य कृषिमेव च ९०

एकमेव तु शूद्रस्य प्रभुः कर्म समादिशत्
एतेषामेव वर्णानां शुश्रूषामनसूयया ९१
ऊर्ध्वं नाभेर्मेध्यतरः पुरुषः परिकीर्तितः
तस्मान्मेध्यतमं त्वस्य मुखमुक्तं स्वयंभुवा ९२
उत्तमाङ्गोद्भवाज्ज्येष्ठ्याद्ब्रह्मणश्चैव धारणात्
सर्वस्यैवास्य सर्गस्य धर्मतो ब्राह्मणः प्रभुः ९३
तं हि स्वयंभूः स्वादास्यात्तपस्तप्त्वादितोऽसृजत्
हव्यकव्याभिवाह्याय सर्वस्यास्य च गुप्तये ९४
यस्यास्येन सदाश्नन्ति हव्यानि त्रिदिवौकसः
कव्यानि चैव पितरः किं भूतमधिकं ततः ९५
भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः
बुद्धिमत्सु नराः श्रेष्ठा नरेषु ब्राह्मणाः स्मृताः ९६
ब्राह्मणेषु च विद्वांसो विद्वत्सु कृतबुद्धयः
कृतबुद्धिषु कर्तारः कर्तृषु ब्रह्मवेदिनः ९७
उत्पत्तिरेव विप्रस्य मूर्तिर्धर्मस्य शाश्वती
स हि धर्मार्थमुत्पन्नो ब्रह्मभूयाय कल्पते ९८
ब्राह्मणो जायमानो हि पृथिव्यामधिजायते
ईश्वरः सर्वभूतानां धर्मकोशस्य गुप्तये ९९
सर्वं स्वं ब्राह्मणस्येदं यत्किं चिज्जगतीगतं
श्रैष्ठ्येनाभिजनेनेदं सर्वं वै ब्राह्मणोऽर्हति १००
स्वमेव ब्राह्मणो भुङ्क्ते स्वं वस्ते स्वं ददाति च
आनृशंस्याद्ब्राह्मणस्य भुञ्जते हीतरे जनाः १०१
तस्य कर्मविवेकार्थं शेषाणामनुपूर्वशः
स्वायंभुवो मनुर्धीमानिदं शास्त्रमकल्पयत् १०२
विदुषा ब्राह्मणेनेदमध्येतव्यं प्रयत्नतः
शिश्येभ्यश्च प्रवक्तव्यं सम्यङ् नान्येन केन चित् १०३

इदं शास्त्रमधीयानो ब्राह्मणः शंसितव्रतः
मनोवाग्देहजैर्नित्यं कर्मदोषैर्न लिप्यते १०४
पुनाति पङ्क्तिं वंश्यांश्च सप्तसप्त परावरान्
पृथिवीमपि चैवेमां कृत्स्नामेकोऽपि सोऽर्हति १०५
इदं स्वस्त्ययनं श्रेष्ठमिदं बुद्धिविवर्धनम्
इदं यशस्यमायुष्यमिदं निःश्रेयसं परम् १०६
अस्मिन्धर्मोऽखिलेनोक्तो गुणदोषौ च कर्मणाम्
चतुर्णामपि वर्णानामाचारश्चैव शाश्वतः १०७
आचारः परमो धर्मः श्रुत्युक्तः स्मार्त एव च
तस्मादस्मिन्सदा युक्तो नित्यं स्यादात्मवान्द्विजः १०८
आचाराद्विच्युतो विप्रो न वेदफलमश्नुते
आचारेण तु संयुक्तः सम्पूर्णफलभाज् भवेत् १०९
एवमाचारतो दृष्ट्वा धर्मस्य मुनयो गतिं
सर्वस्य तपसो मूलमाचारं जगृहुः परम् ११०
जगतश्च समुत्पत्तिं संस्कारविधिमेव च
व्रतचर्योपचारं च स्नानस्य च परं विधिम् १११
दाराधिगमनं चैव विवाहानां च लक्षणम्
महायज्ञविधानं च श्राद्धकल्पं च शाश्वतम् ११२
वृत्तीनां लक्षणं चैव स्नातकस्य व्रतानि च
भक्ष्याभक्ष्यं च शौचं च द्रव्याणां शुद्धिमेव च ११३
स्त्रीधर्मयोगं तापस्यं मोक्षं संन्यासमेव च
राज्ञश्च धर्ममखिलं कार्याणां च विनिर्णयम् ११४
साक्षिप्रश्नविधानं च धर्मं स्त्रीपुंसयोरपि
विभागधर्मं द्यूतं च कण्टकानां च शोधनम् ११५
वैश्यशूद्रोपचारं च संकीर्णानां च संभवम्
आपद्धर्मं च वर्णानां प्रायश्चित्तविधिं तथा ११६

संसारगमनं चैव त्रिविधं कर्मसंभवम्
निःश्रेयसं कर्मणां च गुणदोषपरीक्षणम् ११७
देशधर्माञ्जातिधर्मान्कुलधर्मांश्च शाश्वतान्
पाषण्डगणधर्मांश्च शास्त्रेऽस्मिन्नुक्तवान्मनुः ११८
यथेदमुक्तवान्शास्त्रं पुरा पृष्टो मनुर्मया
तथेदं यूयमप्यद्य मत्सकाशान्निबोधत ११९

## द्वितीयोऽध्यायः

विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिः
हृदयेनाभ्यनुज्ञातो यो धर्मस्तं निबोधत १
कामात्मता न प्रशस्ता न चैवेहास्त्यकामता
काम्यो हि वेदाधिगमः कर्मयोगश्च वैदिकः २
संकल्पमूलः कामो वै यज्ञाः संकल्पसंभवाः
व्रतानि यमधर्माश्च सर्वे संकल्पजाः स्मृताः ३
अकामस्य क्रिया का चिद्दृश्यते नेह कर्हि चित्
यद्यद्धि कुरुते किं चित्तत्तत्कामस्य चेष्टितम् ४
तेषु सम्यग्वर्तमानो गच्छत्यमरलोकताम्
यथा संकल्पितांश्चेह सर्वान्कामान्समश्नुते ५
वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ६
यः कश्चित्कस्य चिद्धर्मो मनुना परिकीर्तितः
स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः ७
सर्वं तु समवेक्ष्येदं निखिलं ज्ञानचक्षुषा
श्रुतिप्रामाण्यतो विद्वान्स्वधर्मे निविशेत वै ८
श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन्हि मानवः
इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम् ९

श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः
ते सर्वार्थेष्वमीमांस्ये ताभ्यां धर्मो हि निर्बभौ  १०
योऽवमन्येत ते मूले हेतुशास्त्राश्रयाद्द्विजः
स साधुभिर्बहिष्कार्यो नास्तिको वेदनिन्दकः  ११
वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम्  १२
अर्थकामेष्वसक्तानां धर्मज्ञानं विधीयते
धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः  १३
श्रुतिद्वैधं तु यत्र स्यात्तत्र धर्मावुभौ स्मृतौ
उभावपि हि तौ धर्मौ सम्यगुक्तौ मनीषिभिः  १४
उदितेऽनुदिते चैव समयाध्युषिते तथा
सर्वथा वर्तते यज्ञ इतीयं वैदिकी श्रुतिः  १५
निषेकादिश्मशानान्तो मन्त्रैर्यस्योदितो विधिः
तस्य शास्त्रेऽधिकारोऽस्मिञ् ज्ञेयो नान्यस्य कस्य चित्  १६
सरस्वतीदृशद्वत्योर्देवनद्योर्यदन्तरम्
तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते  १७
तस्मिन्देशे य आचारः पारम्पर्यक्रमागतः
वर्णानां सान्तरालानां स सदाचार उच्यते  १८
कुरुक्षेत्रं च मत्स्याश्च पञ्चालाः शूरसेनकाः
एष ब्रह्मर्षिदेशो वै ब्रह्मावर्तादनन्तरः  १९
एतद्देशप्रसूतस्य सकाशादग्रजन्मनः
स्वं स्वं चरित्रं शिक्षेरन्पृथिव्यां सर्वमानवाः  २०
हिमवद्विन्ध्ययोर्मध्यं यत्प्राग्विनशनादपि
प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः  २१
आ समुद्रात्तु वै पूर्वादा समुद्राच्च पश्चिमात्
तयोरेवान्तरं गिर्योरार्यावर्तं विदुर्बुधाः  २२

कृष्णसारस्तु चरति मृगो यत्र स्वभावतः
स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्त्वतः परः २३
एतान्द्विजातयो देशान्संश्रयेरन्प्रयत्नतः
शूद्रस्तु यस्मिन्कस्मिन्वा निवसेद्वृत्तिकर्शितः २४
एषा धर्मस्य वो योनिः समासेन प्रकीर्तिता
संभवश्चास्य सर्वस्य वर्णधर्मान्निबोधत २५
वैदिकैः कर्मभिः पुण्यैर्निषेकादिर्द्विजन्मनाम्
कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च २६
गार्भैर्होमैर्जातकर्मचौडमौञ्जीनिबन्धनैः
बैजिकं गार्भिकं चैनो द्विजानामपमृज्यते २७
स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया सुतैः
महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः २८
प्राङ् नाभिवर्धनात्पुंसो जातकर्म विधीयते
मन्त्रवत्प्राशनं चास्य हिरण्यमधुसर्पिषाम् २९
नामधेयं दशम्यां तु द्वादश्यां वास्य कारयेत्
पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते ३०
मङ्गल्यं ब्राह्मणस्य स्यात्क्षत्रियस्य बलान्वितम्
वैश्यस्य धनसंयुक्तं शूद्रस्य तु जुगुप्सितम् ३१
शर्मवद्ब्राह्मणस्य स्याद्राज्ञो रक्षासमन्वितम्
वैश्यस्य पुष्टिसंयुक्तं शूद्रस्य प्रेष्यसंयुतम् ३२
स्त्रीणां सुखोद्यमक्रूरं विस्पष्टार्थं मनोहरम्
मङ्गल्यं दीर्घवर्णान्तमाशीर्वादाभिधानवत् ३३
चतुर्थे मासि कर्तव्यं शिशोर्निष्क्रमणं गृहात्
षष्ठेऽन्नप्राशनं मासि यद्वेष्टं मङ्गलं कुले ३४
चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः
प्रथमेऽब्दे तृतीये वा कर्तव्यं श्रुतिचोदनात् ३५

गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम्
गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः ३६
ब्रह्मवर्चसकामस्य कार्यो विप्रस्य पञ्चमे
राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे ३७
आ षोदशाद्ब्राह्मणस्य सावित्री नातिवर्तते
आ द्वाविंशात्क्षत्रबन्धोरा चतुर्विंशतेर्विशः ३८
अत ऊर्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः
सावित्रीपतिता व्रात्या भवन्त्यार्यविगर्हिताः ३९
नैतैरपूतैर्विधिवदापद्यपि हि कर्हि चित्
ब्राह्मान्यौनांश्च संबन्धान्नाचरेद्ब्राह्मणः सह ४०
कार्ष्णरौरवबास्तानि चर्माणि ब्रह्मचारिणः
वसीरन्नानुपूर्व्येण शाणक्षौमाविकानि च ४१
मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्या विप्रस्य मेखला
क्षत्रियस्य तु मौर्वी ज्या वैश्यस्य शणतान्तवी ४२
मुञ्जालाभे तु कर्तव्याः कुशाश्मन्तकबल्वजैः
त्रिवृता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव वा ४३
कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृत्
शणसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम् ४४
ब्राह्मणो बैल्वपालाशौ क्षत्रियो वाटखादिरौ
पैलवाउदुम्बरौ वैश्यो दण्डानर्हन्ति धर्मतः ४५
केशान्तिको ब्राह्मणस्य दण्डः कार्यः प्रमाणतः
ललाटसम्मितो राज्ञः स्यात्तु नासान्तिको विशः ४६
ऋजवस्ते तु सर्वे स्युरव्रणाः सौम्यदर्शनाः
अनुद्वेगकरा नृणां सत्वचोऽनग्निदूषिताः ४७
प्रतिगृह्येप्सितं दण्डमुपस्थाय च भास्करम्
प्रदक्षिणं परीत्याग्निं चरेद्भैक्षं यथाविधि ४८

भवत्पूर्वं चरेद्भैक्षमुपनीतो द्विजोत्तमः
भवन्मध्यं तु राजन्यो वैश्यस्तु भवदुत्तरम् ४९
मातरं वा स्वसारं वा मातुर्वा भगिनीं निजाम्
भिक्षेत भिक्षां प्रथमं या चैनं नावमानयेत् ५०
समाहृत्य तु तद्भैक्षं यावदन्नममायया
निवेद्य गुरवेऽश्नीयादाचम्य प्राङ्मुखः शुचिः ५१
आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः
श्रियं प्रत्यङ्मुखो भुङ्क्ते ऋतं भुङ्क्ते ह्युदङ्मुखः ५२
उपस्पृश्य द्विजो नित्यमन्नमद्यात्समाहितः
भुक्त्वा चोपस्पृशेत्सम्यगद्भिः खानि च संस्पृशेत् ५३
पूजयेदशनं नित्यमद्याच्चैतदकुत्सयन्
दृष्ट्वा हृष्येत्प्रसीदेच्च प्रतिनन्देच्च सर्वशः ५४
पूजितं ह्यशनं नित्यं बलमूर्जं च यच्छति
अपूजितं तु तद्भुक्तमुभयं नाशयेदिदम् ५५
नोच्छिष्टं कस्य चिद्दद्यान्नाद्यादेतत्तथान्तरा
न चैवात्यशनं कुर्यान्न चोच्छिष्टः क्व चिद्व्रजेत् ५६
अनारोग्यमनायुष्यमस्वर्ग्यं चातिभोजनम्
अपुण्यं लोकविद्विष्टं तस्मात्तत्परिवर्जयेत् ५७
ब्राह्मेण विप्रस्तीर्थेन नित्यकालमुपस्पृशेत्
कायत्रैदशिकाभ्यां वा न पित्र्येण कदा चन ५८
अङ्गुष्ठमूलस्य तले ब्राह्मं तीर्थं प्रचक्षते
कायमङ्गुलिमूलेऽग्रे देवं पित्र्यं तयोरधः ५९
त्रिराचामेदपः पूर्वं द्विः प्रमृज्यात्ततो मुखम्
खानि चैव स्पृशेदद्भिरात्मानं शिर एव च ६०
अनुष्णाभिरफेनाभिरद्भिस्तीर्थेन धर्मवित्
शौचेप्सुः सर्वदाचामेदेकान्ते प्रागुदङ्मुखः ६१

हृद्गाभिः पूयते विप्रः कण्ठगाभिस्तु भूमिपः
वैश्योऽद्भिः प्राशिताभिस्तु शूद्रः स्पृष्टाभिरन्ततः ६२
उद्धृते दक्षिने पाणावुपवीत्युच्यते द्विजः
सव्ये प्राचीनावीती निवीती कण्ठसज्जने ६३
मेखलामजिनं दण्डमुपवीतं कमण्डलुम्
अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि मन्त्रवत् ६४
केशान्तः षोडशे वर्षे ब्राह्मणस्य विधीयते
राजन्यबन्धोर्द्वाविंशे वैश्यस्य द्व्यधिके मतः ६५
अमन्त्रिका तु कार्येयं स्त्रीणामावृदशेषतः
संस्कारार्थं शरीरस्य यथाकालं यथाक्रमम् ६६
वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः स्मृतः
पतिसेवा गुरौ वासो गृहार्थोऽग्निपरिक्रिया ६७
एष प्रोक्तो द्विजातीनामौपनायनिको विधिः
उत्पत्तिव्यञ्जकः पुण्यः कर्मयोगं निबोधत ६८
उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः
आचारमग्निकार्यं च संध्योपासनमेव च ६९
अध्येष्यमाणस्त्वाचान्तो यथाशास्त्रमुदङ्मुखः
ब्रह्माञ्जलिकृतोऽध्याप्यो लघुवासा जितेन्द्रियः ७०
ब्रह्मारम्भेऽवसाने च पादौ ग्राह्यौ गुरोः सदा
संहत्य हस्तावध्येयं स हि ब्रह्माञ्जलिः स्मृतः ७१
व्यत्यस्तपाणिना कार्यमुपसंग्रहणं गुरोः
सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन च दक्षिणः ७२
अध्येष्यमाणं तु गुरुर्नित्यकालमतन्द्रितः
अधीष्व भो इति ब्रूयाद्विरामोऽस्त्विति चारमेत् ७३
ब्रह्मनः प्रणवं कुर्यादादावन्ते च सर्वदा
स्त्रवत्यनोंकृतं पूर्वं परस्ताच्च विशीर्यति ७४

प्राक्कूलान्पर्युपासीनः पवित्रैश्चैव पावितः
प्राणायामैस्त्रिभिः पूतस्तत ओंकारमर्हति ७५
अकारं चाप्युकारं च मकारं च प्रजापतिः
वेदत्रयान्निरदुहद्भूर्भुवः स्वरितीति च ७६
त्रिभ्य एव तु वेदेभ्यः पादं पादमदूदुहत्
तदित्यृचोऽस्याः सावित्र्याः परमेष्ठी प्रजापतिः ७७
एतदक्षरमेतां च जपन्व्याहृतिपूर्विकाम्
संध्ययोर्वेदविद्विप्रो वेदपुण्येन युज्यते ७८
सहस्रकृत्वस्त्वभ्यस्य बहिरेतत्त्रिकं द्विजः
महतोऽप्येनसो मासात्त्वचेवाहिर्विमुच्यते ७९
एतयर्चा विसंयुक्तः काले च क्रियया स्वया
ब्रह्मक्षत्रियवैश्यो निर्गर्हणां याति साधुषु ८०
ओंकारपूर्विकास्तिस्रो महाव्याहृतयोऽव्ययाः
त्रिपदा चैव सावित्री विज्ञेयं ब्रह्मणो मुखम् ८१
योऽधीतेऽहन्यहन्येतां त्रीणि वर्षाण्यतन्द्रितः
स ब्रह्म परमभ्येति वायुभूतः खमूर्तिमान् ८२
एकाक्षरं परं ब्रह्म प्राणायामः परं तपः
सावित्र्यास्तु परं नास्ति मौनात्सत्यं विशिष्यते ८३
क्षरन्ति सर्वा वैदिक्यो जुहोतियजतिक्रियाः
अक्षरं दुष्करं ज्ञेयं ब्रह्म चैव प्रजापतिः ८४
विधियज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः
उपांशुः स्याच्छतगुणः साहस्रो मानसः स्मृतः ८५
ये पाकयज्ञाश्चत्वारो विधियज्ञसमन्विताः
सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोडशीम् ८६
जप्येनैव तु संसिध्येद्ब्राह्मणो नात्र संशयः
कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ८७

इन्द्रियाणां विचरतां विषयेष्वपहारिषु
संयमे यत्नमातिष्ठेद्विद्वान्यन्तेव वाजिनाम् ८८
एकादशेन्द्रियाण्याहुर्यानि पूर्वे मनीषिणः
तानि सम्यक्प्रवक्ष्यामि यथावदनुपूर्वशः ८९
श्रोत्रं त्वक् चक्षुषी जिह्वा नासिका चैव पञ्चमी
पायूपस्थं हस्तपादं वाक् चैव दशमी स्मृता ९०
बुद्धीन्द्रियाणि पञ्चैषां श्रोत्रादीन्यनुपूर्वशः
कर्मेन्द्रियाणि पञ्चैषां पाय्वादीनि प्रचक्षते ९१
एकादशं मनो ज्ञेयं स्वगुणेनोभयात्मकम्
यस्मिन् जिते जितावेतौ भवतः पञ्चकौ गणौ ९२
इन्द्रियाणां प्रसङ्गेन दोषमृच्छत्यसंशयम्
संनियम्य तु तान्येव ततः सिद्धिं निगच्छति ९३
न जातु कामः कामानामुपभोगेन शाम्यति
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ९४
यश्चैतान्प्राप्नुयात्सर्वान्यश्चैतान्केवलांस्त्यजेत्
प्रापणात्सर्वकामानां परित्यागो विशिष्यते ९५
न तथैतानि शक्यन्ते संनियन्तुमसेवया
विषयेषु प्रजुष्टानि यथा ज्ञानेन नित्यशः ९६
वेदास्त्यागश्च यज्ञाश्च नियमाश्च तपांसि च
न विप्रदुष्टभावस्य सिद्धिं गच्छति कर्हि चित् ९७
श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः
न हृष्यति ग्लायति वा स विज्ञेयो जितेन्द्रियः ९८
इन्द्रियाणां तु सर्वेषां यद्येकं क्षरतीन्द्रियम्
तेनास्य क्षरति प्रज्ञा दृतेः पादादिवोदकम् ९९
वशे कृत्वेन्द्रियग्रामं संयम्य च मनस्तथा
सर्वान्संसाधयेदर्थानक्षिण्वन्योगतस्तनुम् १००

पूर्वां संध्यां जपांस्तिष्ठेत्सावित्रीमार्कदर्शनात्
पश्चिमां तु समासीनः सम्यगृक्षविभावनात्  १०१
पूर्वां संध्यां जपंस्तिष्ठन्नैशमेनो व्यपोहति
पश्चिमां तु समासीनो मलं हन्ति दिवाकृतम्  १०२
न तिष्ठति तु यः पूर्वां नोपास्ते यश्च पश्चिमाम्
स शूद्रवद्बहिष्कार्यः सर्वस्माद्द्विजकर्मणः  १०३
अपां समीपे नियतो नैत्यकं विधिमास्थितः
सावित्रीमप्यधीयीत गत्वारण्यं समाहितः  १०४
वेदोपकरणे चैव स्वाध्याये चैव नैत्यके
नानुरोधोऽस्त्यनध्याये होममन्त्रेषु चैव हि  १०५
नैत्यके नास्त्यनध्यायो ब्रह्मसत्त्रं हि तत्स्मृतम्
ब्रह्माहुतिहुतं पुण्यमनध्यायवषट्कृतम्  १०६
यः स्वाध्यायमधीतेऽब्दं विधिना नियतः शुचिः
तस्य नित्यं क्षरत्येष पयो दधि घृतं मधु  १०७
अग्नीन्धनं भैक्षचर्यामधःशय्यां गुरोर्हितम्
आ समावर्तनात्कुर्यात्कृतोपनयनो द्विजः  १०८
आचार्यपुत्रः शुश्रूषुर्ज्ञानदो धार्मिकः शुचिः
आप्तः शक्तोऽर्थदः साधुः स्वोऽध्याप्या दश धर्मतः  १०९
नापृष्टः कस्य चिद्ब्रूयान्न चान्यायेन पृच्छतः
जानन्नपि हि मेधावी जडवल् लोक आचरेत्  ११०
अधर्मेण च यः प्राह यश्चाधर्मेण पृच्छति
तयोरन्यतरः प्रैति विद्वेषं वाधिगच्छति  १११
धर्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा
तत्र विद्या न वप्तव्या शुभं बीजमिवऊषरे  ११२
विद्ययैव समं कामं मर्तव्यं ब्रह्मवादिना
आपद्यपि हि घोरायां न त्वेनामिरिणे वपेत्  ११३

विद्या ब्राह्मणमेत्याह शेवधिस्तेऽस्मि रक्ष माम्
असूयकाय मां मादास्तथा स्यां वीर्यवत्तमा १९४
यमेव तु शुचिं विद्यान्नियतब्रह्मचारिणम्
तस्मै मां ब्रूहि विप्राय निधिपायाप्रमादिने १९५
ब्रह्म यस्त्वननुज्ञातमधीयानादवाप्नुयात्
स ब्रह्मस्तेयसंयुक्तो नरकं प्रतिपद्यते १९६
लौकिकं वैदिकं वापि तथाध्यात्मिकमेव वा
आददीत यतो ज्ञानं तं पूर्वमभिवादयेत् १९७
सावित्रीमात्रसारोऽपि वरं विप्रः सुयन्त्रितः
नायन्त्रितस्त्रिवेदोऽपि सर्वाशी सर्वविक्रयी १९८
शय्यासनेऽध्याचरिते श्रेयसा न समाविशेत्
शय्यासनस्थश्चैवैनं प्रत्युत्थायाभिवादयेत् १९९
ऊर्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति
प्रत्युत्थानाभिवादाभ्यां पुनस्तान्प्रतिपद्यते १२०
अभिवादनशीलस्य नित्यं वृद्धोपसेविनः
चत्वारि तस्य वर्धन्ते आयुर्धर्मो यशो बलम् १२१
अभिवादात्परं विप्रो ज्यायांसमभिवादयन्
असौ नामाहमस्मीति स्वं नाम परिकीर्तयेत् १२२
नामधेयस्य ये के चिदभिवादं न जानते
तान्प्राज्ञोऽहमिति ब्रूयात्स्त्रियः सर्वास्तथैव च १२३
भोःशब्दं कीर्तयेदन्ते स्वस्य नाम्नोऽभिवादने
नाम्नां स्वरूपभावो हि भोभावर्षिभिः स्मृतः १२४
आयुष्मान्भव सौम्येति वाच्यो विप्रोऽभिवादने
अकारश्चास्य नाम्नोऽन्ते वाच्यः पूर्वाक्षरः प्लुतः १२५
यो न वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनम्
नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः १२६

ब्राह्मणं कुशलं पृच्छेत्क्षत्रबन्धुमनामयम्
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च १२७
अवाच्यो दीक्षितो नाम्ना यवीयानपि यो भवेत्
भोभवत्पूर्वकं त्वेनमभिभाषेत धर्मवित् १२८
परपत्नी तु या स्त्री स्यादसंबन्धा च योनितः
तां ब्रूयाद्भवतीत्येवं सुभगे भगिनीति च १२९
मातुलांश्च पितृव्यांश्च श्वशुरानृत्विजो गुरून्
असावहमिति ब्रूयात्प्रत्युत्थाय यवीयसः १३०
मातृश्वसा मातुलानी श्वश्रूरथ पितृश्वसा
संपूज्या गुरुपत्नीवत्समास्ता गुरुभार्यया १३१
भ्रातुर्भार्योपसंग्राह्या सवर्णाहन्यहन्यपि
विप्रोष्य तूपसंग्राह्या ज्ञातिसंबन्धियोषितः १३२
पितुर्भगिन्यां मातुश्च ज्यायस्यां च स्वसर्यपि
मातृवद्वृत्तिमातिष्ठेन्माता ताभ्यो गरीयसी १३३
दशाब्दाख्यं पौरसख्यं पञ्चाब्दाख्यं कलाभृताम्
त्र्यब्दपूर्वं श्रोत्रियाणां स्वल्पेनापि स्वयोनिषु १३४
ब्राह्मणं दशवर्षं तु शतवर्षं तु भूमिपम्
पितापुत्रौ विजानीयाद्ब्राह्मणस्तु तयोः पिता १३५
वित्तं बन्धुर्वयः कर्म विद्या भवति पञ्चमी
एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम् १३६
पञ्चानां त्रिषु वर्णेषु भूयांसि गुणवन्ति च
यत्र स्युः सोऽत्र मानार्हः शूद्रोऽपि दशमीं गतः १३७
चक्रिणो दशमीस्थस्य रोगिणो भारिणः स्त्रियाः
स्नातकस्य च राज्ञश्च पन्था देयो वरस्य च १३८
तेषां तु समावेतानां मान्यौ स्नातकपार्थिवौ
राजस्नातकयोश्चैव स्नातको नृपमानभाक् १३९

उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते १४०
एकदेशं तु वेदस्य वेदाङ्गान्यपि वा पुनः
योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते १४१
निषेकादीनि कर्माणि यः करोति यथाविधि
संभावयति चान्नेन स विप्रो गुरुरुच्यते १४२
अग्न्याधेयं पाकयज्ञानग्निष्टोमादिकान्मखान्
यः करोति वृतो यस्य स तस्यर्त्विगिहोच्यते १४३
य आवृणोत्यवितथं ब्रह्मणा श्रवणावुभौ
स माता स पिता ज्ञेयस्तं न द्रुह्येत्कदा चन १४४
उपाध्यायान्दशाचार्य आचार्याणां शतं पिता
सहस्रं तु पितॄन्माता गौरवेणातिरिच्यते १४५
उत्पादकब्रह्मदात्रोर्गरीयान्ब्रह्मदः पिता
ब्रह्मजन्म हि विप्रस्य प्रेत्य चेह च शाश्वतम् १४६
कामान्माता पिता चैनं यदुत्पादयतो मिथः
संभूतिं तस्य तां विद्याद्यद्योनावभिजायते १४७
आचार्यस्त्वस्य यां जातिं विधिवद्वेदपारगः
उत्पादयति सावित्र्या सा सत्या साजरामरा १४८
अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः
तमपीह गुरुं विद्याच्छ्रुतोपक्रियया तया १४९
ब्राह्मस्य जन्मनः कर्ता स्वधर्मस्य च शासिता
बालोऽपि विप्रो वृद्धस्य पिता भवति धर्मतः १५०
अध्यापयामास पितॄन्शिशुराङ्गिरसः कविः
पुत्रका इति होवाच ज्ञानेन परिगृह्य तान् १५१
ते तमर्थमपृच्छन्त देवानागतमन्यवः
देवाश्चैतान्समेत्योचुर्न्याय्यं वः शिशुरुक्तवान् १५२

अज्ञो भवति वै बालः पिता भवति मन्त्रदः
अज्ञं हि बालमित्याहुः पितेत्येव तु मन्त्रदम् १५३
न हायनैर्न पलितैर्न वित्तेन न बन्धुभिः
ऋषयश्चक्रिरे धर्मं योऽनूचानः स नो महान् १५४
विप्राणां ज्ञानतो ज्यैष्ठ्यं क्षत्रियाणां तु वीर्यतः
वैश्यानां धान्यधनतः शूद्राणामेव जन्मतः १५५
न तेन वृद्धो भवति येनास्य पलितं शिरः
यो वै युवाप्यधीयानस्तं देवाः स्थविरं विदुः १५६
यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः
यश्च विप्रोऽनधीयानस्त्रयस्ते नाम बिभ्रति १५७
यथा षण्ढोऽफलः स्त्रीषु यथा गौर्गवि चाफला
यथा चाज्ञेऽफलं दानं तथा विप्रोऽनृचोऽफलः १५८
अहिंसयैव भूतानां कार्यं श्रेयोऽनुशासनम्
वाक् चैव मधुरा श्लक्ष्णा प्रयोज्या धर्ममिच्छता १५९
यस्य वाग्मनसी शुद्धे सम्यग्गुप्ते च सर्वदा
स वै सर्वमवाप्नोति वेदान्तोपगतं फलम् १६०
नारुंतुदः स्यादार्तोऽपि न परद्रोहकर्मधीः
ययास्योद्विजते वाचा नालोक्यां तामुदीरयेत् १६१
सम्मानाद्ब्राह्मणो नित्यमुद्विजेत विषादिव
अमृतस्येव चाकाङ्क्षेदवमानस्य सर्वदा १६२
सुखं ह्यवमतः शेते सुखं च प्रतिबुध्यते
सुखं चरति लोकेऽस्मिन्नवमन्ता विनश्यति १६३
अनेन क्रमयोगेन संस्कृतात्मा द्विजः शनैः
गुरौ वसन्सञ्चिनुयाद्ब्रह्माधिगमिकं तपः १६४
तपोविशेषैर्विविधैर्व्रतैश्च विधिचोदितैः
वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना १६५

वेदमेव सदाभ्यस्येत्तपस्तप्स्यन्द्विजोत्तमः
वेदाभ्यासो हि विप्रस्य तपः परमिहोच्यते १६६
आ हैव स नखाग्रेभ्यः परमं तप्यते तपः
यः स्रग्व्यपि द्विजोऽधीते स्वाध्यायं शक्तितोऽन्वहम् १६७
योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः १६८
मातुरग्रेऽधिजननं द्वितीयं मौञ्जिबन्धने
तृतीयं यज्ञदीक्षायां द्विजस्य श्रुतिचोदनात् १६९
तत्र यद्ब्रह्मजन्मास्य मौञ्जीबन्धनचिह्नितम्
तत्रास्य माता सावित्री पिता त्वाचार्य उच्यते १७०
वेदप्रदानादाचार्यं पितरं परिचक्षते
न ह्यस्मिन्युज्यते कर्म किञ् चिदा मौञ्जिबन्धनात् १७१
नाभिव्याहारयेद्ब्रह्म स्वधानिनयनादृते
शूद्रेण हि समस्तावद्यावद्वेदे न जायते १७२
कृतोपनयनस्यास्य व्रतादेशनमिष्यते
ब्रह्मणो ग्रहणं चैव क्रमेण विधिपूर्वकम् १७३
यद्यस्य विहितं चर्म यत्सूत्रं या च मेखला
यो दण्डो यच्च वसनं तत्तदस्य व्रतेष्वपि १७४
सेवेतेमांस्तु नियमान्ब्रह्मचारी गुरौ वसन्
सन्नियम्येन्द्रियग्रामं तपोवृद्ध्यर्थमात्मनः १७५
नित्यं स्नात्वा शुचिः कुर्याद्देवर्षिपितृतर्पणम्
देवताभ्यर्चनं चैव समिदाधानमेव च १७६
वर्जयेन्मधु मांसं च गन्धं माल्यं रसान्स्त्रियः
शुक्तानि यानि सर्वाणि प्राणिनां चैव हिंसनम् १७७
अभ्यङ्गमञ्जनं चाक्ष्णोरुपानश्छत्रधारणम्
कामं क्रोधं च लोभं च नर्तनं गीतवादनम् १७८

द्यूतं च जनवादं च परिवादं तथानृतम्
स्त्रीणां च प्रेक्षणालम्भमुपघातं परस्य च १७९
एकः शयीत सर्वत्र न रेतः स्कन्दयेत्क्व चित्
कामाद्धि स्कन्दयन्रेतो हिनस्ति व्रतमात्मनः १८०
स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः
स्नात्वार्कमर्चयित्वा त्रिः पुनर्मामित्यृचं जपेत् १८१
उदकुम्भं सुमनसो गोशकृन्मृत्तिकाकुशान्
आहरेद्यावदर्थानि भैक्षं चाहरहश्चरेत् १८२
वेदयज्ञैरहीनानां प्रशस्तानां स्वकर्मसु
ब्रह्मचार्याहरेद्भैक्षं गृहेभ्यः प्रयतोऽन्वहम् १८३
गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु
अलाभे त्वन्यगेहानां पूर्वं पूर्वं विवर्जयेत् १८४
सर्वं वापि चरेद्ग्रामं पूर्वोक्तानामसंभवे
नियम्य प्रयतो वाचमभिशस्तांस्तु वर्जयेत् १८५
दूरादाहृत्य समिधः सन्निदध्याद्विहायसि
सायंप्रातश्च जुहुयात्ताभिरग्निमतन्द्रितः १८६
अकृत्वा भैक्षचरणमसमिध्य च पावकं
अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत् १८७
भैक्षेण वर्तयेन्नित्यं नैकान्नादी भवेद्व्रती
भैक्षेण व्रतिनो वृत्तिरुपवाससमा स्मृता १८८
व्रतवद्देवदैवत्ये पित्र्ये कर्मण्यथर्षिवत्
काममभ्यर्थितोऽश्नीयाद्व्रतमस्य न लुप्यते १८९
ब्राह्मणस्यैव कर्मैतदुपदिष्टं मनीषिभिः
राजन्यवैश्ययोस्त्वेवं नैतत्कर्म विधीयते १९०
चोदितो गुरुणा नित्यमप्रचोदित एव वा
कुर्यादध्ययने यत्नमाचार्यस्य हितेषु च १९१

शरीरं चैव वाचं च बुद्धीन्द्रियमनांसि च
नियम्य प्राञ्जलिस्तिष्ठेद्वीक्षमाणो गुरोर्मुखम्  १९२
नित्यमुद्धृतपाणिः स्यात्साध्वाचारः सुसंवृतः
आस्यतामिति चोक्तः सन्नासीताभिमुखं गुरोः  १९३
हीनान्नवस्त्रवेषः स्यात्सर्वदा गुरुसन्निधौ
उत्तिष्ठेत्प्रथमं चास्य चरमं चैव संविशेत्  १९४
प्रतिश्रावणसंभाषे शयानो न समाचरेत्
नासीनो न च भुञ्जानो न तिष्ठन्न पराङ्मुखः  १९५
आसीनस्य स्थितः कुर्यादभिगच्छंस्तु तिष्ठतः
प्रत्युद्गम्य त्वाव्रजतः पश्चाद्धावंस्तु धावतः  १९६
पराङ्मुखस्याभिमुखो दूरस्थस्यैत्य चान्तिकम्
प्रणम्य तु शयानस्य निदेशे चैव तिष्ठतः  १९७
नीचं शय्यासनं चास्य नित्यं स्याद्गुरुसन्निधौ
गुरोस्तु चक्षुर्विषये न यथेष्टासनो भवेत्  १९८
नोदाहरेदस्य नाम परोक्षमपि केवलम्
न चैवास्यानुकुर्वीत गतिभाषितचेष्टितम्  १९९
गुरोर्यत्र परिवादो निन्दा वापि प्रवर्तते
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः  २००
परीवादात्खरो भवति श्वा वै भवति निन्दकः
परिभोक्ता कृमिर्भवति कीटो भवति मत्सरी  २०१
दूरस्थो नार्चयेदेनं न क्रुद्धो नान्तिके स्त्रियाः
यानासनस्थश्चैवैनमवरुह्याभिवादयेत्  २०२
प्रतिवातेऽनुवाते च नासीत गुरुणा सह
असंश्रवे चैव गुरोर्न किं चिदपि कीर्तयेत्  २०३
गोऽश्वोष्ट्रयानप्रासादप्रस्तरेषु कटेषु च
आसीत गुरुणा सार्धं शिलाफलकनौषु च  २०४

गुरोर्गुरौ सन्निहिते गुरुवद्वृत्तिमाचरेत्
न चानिसृष्टो गुरुणा स्वान्गुरूनभिवादयेत् २०५
विद्यागुरुष्वेवमेव नित्या वृत्तिः स्वयोनिषु
प्रतिषेधत्सु चाधर्माद्धितं चोपदिशत्स्वपि २०६
श्रेयःसु गुरुवद्वृत्तिं नित्यमेव समाचरेत्
गुरुपुत्रेषु चार्येषु गुरोश्चैव स्वबन्धुषु २०७
बालः समानजन्मा वा शिष्यो वा यज्ञकर्मणि
अध्यापयन्गुरुसुतो गुरुवन्मानमर्हति २०८
उत्सादनं च गात्राणां स्नापनोच्छिष्टभोजने
न कुर्याद्गुरुपुत्रस्य पादयोश्चावनेजनम् २०९
गुरुवत्प्रतिपूज्याः स्युः सवर्णा गुरुयोषितः
असवर्णास्तु सम्पूज्याः प्रत्युत्थानाभिवादनैः २१०
अभ्यञ्जनं स्नापनं च गात्रोत्सादनमेव च
गुरुपत्न्या न कार्याणि केशानां च प्रसाधनम् २११
गुरुपत्नी तु युवतिर्नाभिवाद्येह पादयोः
पूर्णविंशतिवर्षेण गुणदोषौ विजानता २१२
स्वभाव एष नारीणां नराणामिह दूषणम्
अतोऽर्थान्न प्रमाद्यन्ति प्रमदासु विपश्चितः २१३
अविद्वांसमलं लोके विद्वांसमपि वा पुनः
प्रमदा ह्युत्पथं नेतुं कामक्रोधवशानुगम् २१४
मात्रा स्वस्रा दुहित्रा वा न विविक्तासनो भवेत्
बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति २१५
कामं तु गुरुपत्नीनां युवतीनां युवा भुवि
विधिवद्वन्दनं कुर्यादसावहमिति ब्रुवन् २१६
विप्रोष्य पादग्रहणमन्वहं चाभिवादनम्
गुरुदारेषु कुर्वीत सतां धर्ममनुस्मरन् २१७

यथा खनन्खनित्रेण नरो वार्यधिगच्छति
तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति २१८
मुण्डो वा जटिलो वा स्यादथ वा स्याच्छिखाजटः
नैनं ग्रामेऽभिनिम्लोचेत्सूर्यो नाभ्युदियात्क्व चित् २१९
तं चेदभ्युदियात्सूर्यः शयानं कामचारतः
निम्लोचेद्वाप्यविज्ञानाज् जपन्नुपवसेद्दिनम् २२०
सूर्येण ह्यभिनिर्मुक्तः शयानोऽभ्युदितश्च यः
प्रायश्चित्तमकुर्वाणो युक्तः स्यान्महतैनसा २२१
आचम्य प्रयतो नित्यमुभे संध्ये समाहितः
शुचौ देशे जपञ्जप्यमुपासीत यथाविधि २२२
यदि स्त्री यद्यवरजः श्रेयः किं चित्समाचरेत्
तत्सर्वमाचरेद्युक्तो यत्र चास्य रमेन्मनः २२३
धर्मार्थावुच्यते श्रेयः कामार्थौ धर्म एव च
अर्थ एवेह वा श्रेयस्त्रिवर्ग इति तु स्थितिः २२४
आचार्यश्च पिता चैव माता भ्राता च पूर्वजः
नार्तेनाप्यवमन्तव्या ब्राह्मणेन विशेषतः २२५
आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः
माता पृथिव्या मूर्तिस्तु भ्राता स्वो मूर्तिरात्मनः २२६
यं मातापितरौ क्लेशं सहेते संभवे नृणाम्
न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैरपि २२७
तयोर्नित्यं प्रियं कुर्यादाचार्यस्य च सर्वदा
तेष्वेव त्रिषु तुष्टेषु तपः सर्वं समाप्यते २२८
तेषां त्रयाणां शुश्रूषा परमं तप उच्यते
न तैरनभ्यनुज्ञातो धर्ममन्यं समाचरेत् २२९
त एव हि त्रयो लोकास्त एव त्रय आश्रमाः
त एव हि त्रयो वेदास्त एवोक्तास्त्रयोऽग्नयः २३०

पिता वै गार्हपत्योऽग्निर्माताग्निर्दक्षिणः स्मृतः
गुरुराहवनीयस्तु साग्नित्रेता गरीयसी २३१
त्रिष्वप्रमाद्यन्नेतेषु त्रींलोकान्विजयेद्गृही
दीप्यमानः स्ववपुषा देववद्दिवि मोदते २३२
इमं लोकं मातृभक्त्या पितृभक्त्या तु मध्यमम्
गुरुशुश्रूषया त्वेवं ब्रह्मलोकं समश्नुते २३३
सर्वे तस्यादृता धर्मा यस्यैते त्रय आदृताः
अनादृतास्तु यस्यैते सर्वास्तस्याफलाः क्रियाः २३४
यावत्त्रयस्ते जीवेयुस्तावन्नान्यं समाचरेत्
तेष्वेव नित्यं शुश्रूषां कुर्यात्प्रियहिते रतः २३५
तेषामनुपरोधेन पारत्र्यं यद्यदाचरेत्
तत्तन्निवेदयेत्तेभ्यो मनोवचनकर्मभिः २३६
त्रिष्वेतेष्वितिकृत्यं हि पुरुषस्य समाप्यते
एष धर्मः परः साक्षादुपधर्मोऽन्य उच्यते २३७
श्रद्दधानः शुभां विद्यामाददीतावरादपि
अन्त्यादपि परं धर्मं स्त्रीरत्नं दुष्कुलादपि २३८
विषादप्यमृतं ग्राह्यं बालादपि सुभाषितम्
अमित्रादपि सद्वृत्तममेध्यादपि काञ्चनम् २३९
स्त्रियो रत्नान्यथो विद्या धर्मः शौचं सुभाषितम्
विविधानि च शील्पानि समादेयानि सर्वतः २४०
अब्राह्मणादध्यायनमापत्काले विधीयते
अनुव्रज्या च शुश्रूषा यावदध्यायनं गुरोः २४१
नाब्राह्मणे गुरौ शिष्यो वासमात्यन्तिकं वसेत्
ब्राह्मणे वाननूचाने काङ्क्षन्गातिमनुत्तमाम् २४२
यदि त्वात्यन्तिकं वासं रोचयेत गुरोः कुले
युक्तः परिचरेदेनमा शरीरविमोक्षणात् २४३

आ समाप्तेः शरीरस्य यस्तु शुश्रूषते गुरुम्
स गच्छत्यञ्जसा विप्रो ब्रह्मणः सद्म शाश्वतम्  २४४
न पूर्वं गुरवे किं चिदुपकुर्वीत धर्मवित्
स्नास्यंस्तु गुरुणाज्ञप्तः शक्त्या गुर्वर्थमाहरेत्  २४५
क्षेत्रं हिरण्यं गामश्वं छत्रोपानहमासनम्
धान्यं शाकं च वासांसि गुरवे प्रीतिमावहेत्  २४६
आचार्ये तु खलु प्रेते गुरुपुत्रे गुणान्विते
गुरुदारे सपिण्डे वा गुरुवद्वृत्तिमाचरेत्  २४७
एतेष्वविद्यमानेषु स्थानासनविहारवान्
प्रयुञ्जानोऽग्निशुश्रूषां साधयेद्देहमात्मनः  २४८
एवं चरति यो विप्रो ब्रह्मचर्यमविप्लुतः
स गच्छत्युत्तमस्थानं न चेह जायते पुनः  २४९

## तृतीयोऽध्यायः

षट्त्रिंशदाब्दिकं चर्यं गुरौ त्रैवेदिकं व्रतम्
तदर्धिकं पादिकं वा ग्रहणान्तिकमेव वा  १
वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम्
अविप्लुतब्रह्मचर्यो गृहस्थाश्रममावसेत्  २
तं प्रतीतं स्वधर्मेण ब्रह्मदायहरं पितुः
स्रग्विणं तल्प आसीनमर्हयेत्प्रथमं गवा  ३
गुरुणानुमतः स्नात्वा समावृत्तो यथाविधि
उद्वहेत द्विजो भार्यां सवर्णां लक्षणान्विताम्  ४
असपिण्डा च या मातुरसगोत्रा च या पितुः
सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने  ५
महान्त्यपि समृद्धानि गोऽजाविधनधान्यतः
स्त्रीसंबन्धे दशैतानि कुलानि परिवर्जयेत्  ६

हीनक्रियं निष्पुरुषं निश्छन्दो रोमशार्शसम्
क्षयामयाव्यपस्मारिश्वित्रिकुष्ठिकुलानि च ७
नोद्वहेत्कपिलां कन्यां नाधिकाङ्गीं न रोगिणीम्
नालोमिकां नातिलोमां न वाचाटां न पिङ्गलाम् ८
नर्क्षवृक्षनदीनाम्नीं नान्त्यपर्वतनामिकाम्
न पक्ष्यहिप्रेष्यनाम्नीं न च भीषननामिकाम् ९
अव्यङ्गाङ्गीं सौम्यनाम्नीं हंसवारणगामिनीम्
तनुलोमकेशदशनां मृद्वङ्गीमुद्वहेत्स्त्रियम् १०
यस्यास्तु न भवेद्भ्राता न विज्ञायेत वा पिता
नोपयच्छेत तां प्राज्ञः पुत्रिकाधर्मशङ्कया ११
सवर्णाग्रे द्विजातीनां प्रशस्ता दारकर्मणि
कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशोऽवराः १२
शूद्रैव भार्या शूद्रस्य सा च स्वा च विशः स्मृते
ते च स्वा चैव राज्ञश्च ताश्च स्वा चाग्रजन्मनः १३
न ब्राह्मणक्षत्रिययोरापद्यपि हि तिष्ठतोः
कस्मिंश्चिदपि वृत्तान्ते शूद्रा भार्योपदिश्यते १४
हीनजातिस्त्रियं मोहादुद्वहन्तो द्विजातयः
कुलान्येव नयन्त्याशु ससन्तानानि शूद्रताम् १५
शूद्रावेदी पतत्यत्रेरुतथ्यतनयस्य च
शौनकस्य सुतोत्पत्त्या तदपत्यतया भृगोः १६
शूद्रां शयनमारोप्य ब्राह्मणो यात्यधोगतिम्
जनयित्वा सुतं तस्यां ब्राह्मण्यादेव हीयते १७
दैवपित्र्यातिथेयानि तत्प्रधानानि यस्य तु
नाश्नन्ति पितृदेवास्तन्न च स्वर्गं स गच्छति १८
वृषलीफेनपीतस्य निःश्वासोपहतस्य च
तस्यां चैव प्रसूतस्य निष्कृतिर्न विधीयते १९

चतुर्णामपि वर्णानं प्रेत्य चेह हिताहितान्
अष्टाविमान्समासेन स्त्रीविवाहान्निबोधत २०
ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः
गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः २१
यो यस्य धर्म्यो वर्णस्य गुणदोषौ च यस्य यौ
तद्वः सर्वं प्रवक्ष्यामि प्रसवे च गुणागुणान् २२
षड् आनुपूर्व्या विप्रस्य क्षत्रस्य चतुरोऽवरान्
विश्शूद्रयोस्तु तानेव विद्याद्धर्म्यानराक्षसान् २३
चतुरो ब्राह्मणस्याद्यान्प्रशस्तान्कवयो विदुः
राक्षसं क्षत्रियस्यैकमासुरं वैश्यशूद्रयोः २४
पञ्चानां तु त्रयो धर्म्या द्वावधर्म्यौ स्मृताविह
पैशाचश्चासुरश्चैव न कर्तव्यौ कदा चन २५
पृथक् पृथग्वा मिश्रौ वा विवाहौ पूर्वचोदितौ
गान्धर्वो राक्षसश्चैव धर्म्यौ क्षत्रस्य तौ स्मृतौ २६
आच्छाद्य चार्चयित्वा च श्रुतशीलवते स्वयम्
आहूय दानं कन्याया ब्राह्मो धर्मः प्रकीर्तितः २७
यज्ञे तु वितते सम्यगृत्विजे कर्म कुर्वते
अलङ्कृत्य सुतादानं दैवं धर्मं प्रचक्षते २८
एकं गोमिथुनं द्वे वा वरादादाय धर्मतः
कन्याप्रदानं विधिवदार्षो धर्मः स उच्यते २९
सहोभौ चरतां धर्ममिति वाचानुभाष्य च
कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः ३०
ज्ञातिभ्यो द्रविणं दत्त्वा कन्यायै चैव शक्तितः
कन्याप्रदानं स्वाच्छन्द्यादासुरो धर्म उच्यते ३१
इच्छयान्योन्यसंयोगः कन्यायाश्च वरस्य च
गान्धर्वः स तु विज्ञेयो मैथुन्यः कामसंभवः ३२

हत्वा छित्त्वा च भित्त्वा च क्रोशन्तीं रुदन्तीं गृहात्
प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते ३३
सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति
स पापिष्ठो विवाहानां पैशाचश्चाष्टमोऽधमः ३४
अद्भिरेव द्विजाग्र्याणां कन्यादानं विशिष्यते
इतरेषां तु वर्णानामितरेतरकाम्यया ३५
यो यस्यैषां विवाहानां मनुना कीर्तितो गुणः
सर्वं शृणुत तं विप्राः सर्वं कीर्तयतो मम ३६
दश पूर्वान्परान्वंश्यानात्मानं चैकविंशकम्
ब्राह्मीपुत्रः सुकृतकृन्मोचयत्येनसः पितॄन् ३७
दैवोढाजः सुतश्चैव सप्त सप्त परावरान्
आर्षोढाजः सुतस्त्रींस्त्रीन्षट् षट् कायोढजः सुतः ३८
ब्राह्मादिषु विवाहेषु चतुर्ष्वेवानुपूर्वशः
ब्रह्मवर्चस्विनः पुत्रा जायन्ते शिष्टसम्मताः ३९
रूपसत्त्वगुणोपेता धनवन्तो यशस्विनः
पर्याप्तभोगा धर्मिष्ठा जीवन्ति च शतं समाः ४०
इतरेषु तु शिष्टेषु नृशंसानृतवादिनः
जायन्ते दुर्विवाहेषु ब्रह्मधर्मद्विषः सुताः ४१
अनिन्दितैः स्त्रीविवाहैरनिन्द्या भवति प्रजा
निन्दितैर्निन्दिता नृणां तस्मान्निन्द्यान्विवर्जयेत् ४२
पाणिग्रहणसंस्कारः सवर्णासूपदिश्यते
असवर्णास्वयं ज्ञेयो विधिरुद्वाहकर्मणि ४३
शरः क्षत्रियया ग्राह्यः प्रतोदो वैश्यकन्यया
वसनस्य दशा ग्राह्या शूद्रयोत्कृष्टवेदने ४४
ऋतुकालाभिगामी स्यात्स्वदारनिरतः सदा
पर्ववर्जं व्रजेच्चैनां तद्व्रतो रतिकाम्यया ४५

ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोडश स्मृताः
चतुर्भिरितरैः सार्धमहोभिः सद्विगर्हितैः ४६
तासामाद्याश्चतस्रस्तु निन्दितैकादशी च या
त्रयोदशी च शेषास्तु प्रशस्ता दशरात्रयः ४७
युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु
तस्माद्युग्मासु पुत्रार्थी संविशेदार्तवे स्त्रियम् ४८
पुमान्पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियाः
समेऽपुमान्पुंस्त्रियौ वा क्षीणेऽल्पे च विपर्ययः ४९
निन्द्यास्वष्टासु चान्यासु स्त्रियो रात्रिषु वर्जयन्
ब्रह्मचार्येव भवति यत्र तत्राश्रमे वसन् ५०
न कन्यायाः पिता विद्वान्गृह्णीयाच्छुल्कमण्वपि
गृह्णन्शुल्कं हि लोभेन स्यान्नरोऽपत्यविक्रयी ५१
स्त्रीधनानि तु ये मोहादुपजीवन्ति बान्धवाः
नारी यानानि वस्त्रं वा ते पापा यान्त्यधोगतिम् ५२
आर्षे गोमिथुनं शुल्कं के चिदाहुर्मृषैव तत्
अल्पोऽप्येवं महान्वापि विक्रयस्तावदेव सः ५३
यासां नाददते शुल्कं ज्ञातयो न स विक्रयः
अर्हणं तत्कुमारीणामानृशंस्यं च केवलम् ५४
पितृभिर्भ्रातृभिश्चैताः पतिभिर्देवरैस्तथा
पूज्या भूषयितव्याश्च बहुकल्याणमीप्सुभिः ५५
यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ५६
शोचन्ति जामयो यत्र विनश्यत्याशु तत्कुलम्
न शोचन्ति तु यत्रैता वर्धते तद्धि सर्वदा ५७
जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः
तानि कृत्याहतानीव विनश्यन्ति समन्ततः ५८

तस्मादेताः सदा पूज्या भूषणाच्छादनाशनैः
भूतिकामैर्नरैर्नित्यं सत्करेषूत्सवेषु च ५९
संतुष्टो भार्यया भर्ता भर्त्रा भार्या तथैव च
यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम् ६०
यदि हि स्त्री न रोचेत पुमांसं न प्रमोदयेत्
अप्रमोदात्पुनः पुंसः प्रजनं न प्रवर्तते ६१
स्त्रियां तु रोचमानायां सर्वं तद्रोचते कुलं
तस्यां त्वरोचमानायां सर्वमेव न रोचते ६२
कुविवाहैः क्रियालोपैर्वेदानध्ययनेन च
कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च ६३
शिल्पेन व्यवहारेण शूद्रापत्यैश्च केवलैः
गोभिरश्वैश्च यानैश्च कृष्या राजोपसेवया ६४
अयाज्ययाजनैश्चैव नास्तिक्येन च कर्मणाम्
कुलान्याशु विनश्यन्ति यानि हीनानि मन्त्रतः ६५
मन्त्रतस्तु समृद्धानि कुलान्यल्पधनान्यपि
कुलसंख्यां च गच्छन्ति कर्षन्ति च महद्यशः ६६
वैवाहिकेऽग्नौ कुर्वीत गृह्यं कर्म यथाविधि
पञ्चयज्ञविधानं च पक्तिं चान्वाहिकीं गृही ६७
पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः
कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन् ६८
तासां क्रमेण सर्वासां निष्कृत्यर्थं महर्षिभिः
पञ्च क्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम् ६९
अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ७०
पञ्चैतान्यो महायज्ञान्न हापयति शक्तितः
स गृहेऽपि वसन्नित्यं सूनादोषैर्न लिप्यते ७१

देवतातिथिभृत्यानां पितॄणामात्मनश्च यः
न निर्वपति पञ्चानामुच्छ्वसन्न स जीवति ७२
अहुतं च हुतं चैव तथा प्रहुतमेव च
ब्राह्म्यं हुतं प्राशितं च पञ्चयज्ञान्प्रचक्षते ७३
जपोऽहुतो हुतो होमः प्रहुतो भौतिको बलिः
ब्राह्म्यं हुतं द्विजाग्र्यार्चा प्राशितं पितृतर्पणम् ७४
स्वाध्याये नित्ययुक्तः स्याद्दैवे चैवेह कर्मणि
दैवकर्मणि युक्तो हि बिभर्तीदं चराचरम् ७५
अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते
आदित्याज् जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ७६
यथा वायुं समाश्रित्य वर्तन्ते सर्वजन्तवः
तथा गृहस्थमाश्रित्य वर्तन्ते सर्व आश्रमाः ७७
यस्मात्त्रयोऽप्याश्रमिणो ज्ञानेनान्नेन चान्वहम्
गृहस्थेनैव धार्यन्ते तस्माज् ज्येष्ठाश्रमो गृही ७८
स संधार्यः प्रयत्नेन स्वर्गमक्षयमिच्छता
सुखं चेहेच्छतात्यन्तं योऽधार्यो दुर्बलेन्द्रियैः ७९
ऋषयः पितरो देवा भूतान्यतिथयस्तथा
आशासते कुटुम्बिभ्यस्तेभ्यः कार्यं विजानता ८०
स्वाध्यायेनार्चयेतर्षीन्होमैर्देवान्यथाविधि
पितॄन्श्राद्धैश्च नॄनन्नैर्भूतानि बलिकर्मणा ८१
कुर्यादहरहः श्राद्धमन्नाद्येनोदकेन वा
पयोमूलफलैर्वापि पितृभ्यः प्रीतिमावहन् ८२
एकमप्याशयेद्विप्रं पित्रर्थे पाञ्चयज्ञिके
न चैवात्राशयेत्किं चिद्वैश्वदेवं प्रति द्विजम् ८३
वैश्वदेवस्य सिद्धस्य गृह्येऽग्नौ विधिपूर्वकम्
आभ्यः कुर्याद्देवताभ्यो ब्राह्मणो होममन्वहम् ८४

अग्नेः सोमस्य चैवादौ तयोश्चैव समस्तयोः
विश्वेभ्यश्चैव देवेभ्यो धन्वन्तरय एव च ८५
कुह्वै चैवानुमत्यै च प्रजापतय एव च
सह द्यावापृथिव्योश्च तथा स्विष्टकृतेऽन्ततः ८६
एवं सम्यग्घविर्हुत्वा सर्वदिक्षु प्रदक्षिणम्
इन्द्रान्तकाप्पतीन्दुभ्यः सानुगेभ्यो बलिं हरेत् ८७
मरुद्भ्य इति तु द्वारि क्षिपेदप्स्वद्भ्य इत्यपि
वनस्पतिभ्य इत्येवं मुसलोलूखले हरेत् ८८
उच्छीर्षके श्रियै कुर्याद्भद्रकाल्यै च पादतः
ब्रह्मवास्तोष्पतिभ्यां तु वास्तुमध्ये बलिं हरेत् ८९
विश्वेभ्यश्चैव देवेभ्यो बलिमाकाश उत्क्षिपेत्
दिवाचरेभ्यो भूतेभ्यो नक्तंचारिभ्य एव च ९०
पृष्ठवास्तुनि कुर्वीत बलिं सर्वात्मभूतये
पितृभ्यो बलिशेषं तु सर्वं दक्षिणतो हरेत् ९१
शूनां च पतितानां च श्वपचां पापरोगिणाम्
वयसानां कृमीणां च शनकैर्निर्वपेद्भुवि ९२
एवं यः सर्वभूतानि ब्राह्मणो नित्यमर्चति
स गच्छति परं स्थानं तेजोमूर्तिः पथर्जुना ९३
कृत्वैतद्बलिकर्मैवमतिथिं पूर्वमाशयेत्
भिक्षां च भिक्षवे दद्याद्विधिवद्ब्रह्मचारिणे ९४
यत्पुण्यफलमाप्नोति गां दत्त्वा विधिवद्गुरोः
तत्पुण्यफलमाप्नोति भिक्षां दत्त्वा द्विजो गृही ९५
भिक्षामप्युदपात्रं वा सत्कृत्य विधिपूर्वकम्
वेदतत्त्वार्थविदुषे ब्राह्मणायोपपादयेत् ९६
नश्यन्ति हव्यकव्यानि नराणामविजानताम्
भस्मीभूतेषु विप्रेषु मोहाद्दत्तानि दातृभिः ९७

विद्यातपः समृद्धेषु हुतं विप्रमुखाग्निषु
निस्तारयति दुर्गाच्च महतश्चैव किल्बिषात्  ९८
संप्राप्ताय त्वतिथये प्रदद्यादासनोदके
अन्नं चैव यथाशक्ति सत्कृत्य विधिपूर्वकम्  ९९
शिलानप्युञ्छतो नित्यं पञ्चाग्नीनपि जुह्वतः
सर्वं सुकृतमादत्ते ब्राह्मणोऽनर्चितो वसन्  १००
तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदा चन  १०१
एकरात्रं तु निवसन्नतिथिर्ब्राह्मणः स्मृतः
अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते  १०२
नैकग्रामीणमतिथिं विप्रं साङ्गतिकं तथा
उपस्थितं गृहे विद्याद्भार्या यत्राग्नयोऽपि वा  १०३
उपासते ये गृहस्थाः परपाकमबुद्धयः
तेन ते प्रेत्य पशुतां व्रजन्त्यन्नादिदायिनः  १०४
अप्रणोद्योऽतिथिः सायं सूर्योढो गृहमेधिना
काले प्राप्तस्त्वकाले वा नास्यानश्नन्गृहे वसेत्  १०५
न वै स्वयं तदश्नीयादतिथिं यन्न भोजयेत्
धन्यं यशस्यमायुष्यं स्वर्ग्यं वातिथिपूजनम्  १०६
आसनावसथौ शय्यामनुव्रज्यामुपासनाम्
उत्तमेषूत्तमं कुर्याद्धीइने हीनं समे समम्  १०७
वैश्वदेवे तु निर्वृत्ते यद्यन्योऽतिथिराव्रजेत्
तस्याप्यन्नं यथाशक्ति प्रदद्यान्न बलिं हरेत्  १०८
न भोजनार्थं स्वे विप्रः कुलगोत्रे निवेदयेत्
भोजनार्थं हि ते शंसन्वान्ताशीत्युच्यते बुधैः  १०९
न ब्राह्मणस्य त्वतिथिर्गृहे राजन्य उच्यते
वैश्यशूद्रौ सखा चैव ज्ञातयो गुरुरेव च  ११०

यदि त्वतिथिधर्मेण क्षत्रियो गृहमाव्रजेत्
भुक्तवत्सु च विप्रेषु कामं तमपि भोजयेत् १११
वैश्यशूद्रावपि प्राप्तौ कुटुम्बेऽतिथिधर्मिणौ
भोजयेत्सह भृत्यैस्तावानृशंस्यं प्रयोजयन् ११२
इतरानपि सख्यादीन्सम्प्रीत्या गृहमागतान्
प्रकृत्यान्नं यथाशक्ति भोजयेत्सह भार्यया ११३
सुवासिनीः कुमारीश्च रोगिणो गर्भिणीः स्त्रियः
अतिथिभ्योऽग्र एवैतान्भोजयेदविचारयन् ११४
अदत्त्वा तु य एतेभ्यः पूर्वं भुङ्क्तेऽविचक्षणः
स भुञ्जानो न जानाति श्वगृध्रैर्जग्धिमात्मनः ११५
भुक्तवत्स्वथ विप्रेषु स्वेषु भृत्येषु चैव हि
भुञ्जीयातां ततः पश्चादवशिष्टं तु दम्पती ११६
देवानृषीन्मनुष्यांश्च पितॄन्गृह्याश्च देवताः
पूजयित्वा ततः पश्चाद्गृहस्थः शेषभुग्भवेत् ११७
अघं स केवलं भुङ्क्ते यः पचत्यात्मकारणात्
यज्ञशिष्टाशनं ह्येतत्सतामन्नं विधीयते ११८
राजर्त्विक्स्नातकगुरून्प्रियश्वशुरमातुलान्
अर्हयेन्मधुपर्केण परिसंवत्सरात्पुनः ११९
राजा च श्रोत्रियश्चैव यज्ञकर्मण्युपस्थितौ
मधुपर्केण संपूज्यौ न त्वयज्ञ इति स्थितिः १२०
सायं त्वन्नस्य सिद्धस्य पत्न्यमन्त्रं बलिं हरेत्
वैश्वदेवं हि नामैतत्सायं प्रातर्विधीयते १२१
पितृयज्ञं तु निर्वर्त्य विप्रश्चन्द्रक्षयेऽग्निमान्
पिण्डान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकम् १२२
पितॄणां मासिकं श्राद्धमन्वाहार्यं विदुर्बुधाः
तच्चामिषेण कर्तव्यं प्रशस्तेन प्रयत्नतः १२३

तत्र ये भोजनीयाः स्युर्ये च वर्ज्या द्विजोत्तमाः
यावन्तश्चैव यैश्चान्नैस्तान्प्रवक्ष्याम्यशेषतः १२४
द्वौ दैवे पितृकार्ये त्रीनेकैकमुभयत्र वा
भोजयेत्सुसमृद्धोऽपि न प्रसज्जेत विस्तरे १२५
सत्क्रियां देशकालौ च शौचं ब्राह्मणसंपदः
पञ्चैतान्विस्तरो हन्ति तस्मान्नेहेत विस्तरम् १२६
प्रथिता प्रेतकृत्यैषा पित्र्यं नाम विधुक्षये
तस्मिन्युक्तस्यैति नित्यं प्रेतकृत्यैव लौकिकी १२७
श्रोत्रियायैव देयानि हव्यकव्यानि दातृभिः
अर्हत्तमाय विप्राय तस्मै दत्तं महाफलम् १२८
एकैकमपि विद्वांसं दैवे पित्र्ये च भोजयेत्
पुष्कलं फलमाप्नोति नामन्त्रज्ञान्बहूनपि १२९
दूरादेव परीक्षेत ब्राह्मणं वेदपारगम्
तीर्थं तद्धव्यकव्यानां प्रदाने सोऽतिथिः स्मृतः १३०
सहस्रं हि सहस्राणामनृचां यत्र भुञ्जते
एकस्तान्मन्त्रवित्प्रीतः सर्वानर्हति धर्मतः १३१
ज्ञानोत्कृष्टाय देयानि कव्यानि च हवींषि च
न हि हस्तावसृग्दिग्धौ रुधिरेणैव शुध्यतः १३२
यावतो ग्रसते ग्रासान्हव्यकव्येष्वमन्त्रवित्
तावतो ग्रसते प्रेतो दीप्तशूलर्ष्ट्ययोगुडान् १३३
ज्ञाननिष्ठा द्विजाः के चित्तपोनिष्ठास्तथापरे
तपःस्वाध्यायनिष्ठाश्च कर्मनिष्ठास्तथापरे १३४
ज्ञाननिष्ठेषु कव्यानि प्रतिष्ठाप्यानि यत्नतः
हव्यानि तु यथान्यायं सर्वेष्वेव चतुर्ष्वपि १३५
अश्रोत्रियः पिता यस्य पुत्रः स्याद्वेदपारगः
अश्रोत्रियो वा पुत्रः स्यात्पिता स्याद्वेदपारगः १३६

ज्यायांसमनयोर्विद्याद्यस्य स्याच्छ्रोत्रियः पिता
मन्त्रसंपूजनार्थं तु सत्कारमितरोऽर्हति १३७
न श्राद्धे भोजयेन्मित्रं धनैः कार्योऽस्य संग्रहः
नारिं न मित्रं यं विद्यात्तं श्राद्धे भोजयेद्द्विजम् १३८
यस्य मित्रप्रधानानि श्राद्धानि च हवींषि च
तस्य प्रेत्य फलं नास्ति श्राद्धेषु च हविःषु च १३९
यः संगतानि कुरुते मोहाच्छ्राद्धेन मानवः
स स्वर्गाच्च्यवते लोकाच्छ्राद्धमित्रो द्विजाधमः १४०
संभोजानि साभिहिता पैशाची दक्षिणा द्विजैः
इहैवास्ते तु सा लोके गौरन्धेवैकवेश्मनि १४१
यथेरिणे बीजमुप्त्वा न वप्ता लभते फलम्
तथानृचे हविर्दत्त्वा न दाता लभते फलम् १४२
दातॄन्प्रतिग्रहीतॄंश्च कुरुते फलभागिनः
विदुषे दक्षिणां दत्त्वा विधिवत्प्रेत्य चेह च १४३
कामं श्राद्धेऽर्चयेन्मित्रं नाभिरूपमपि त्वरिम्
द्विषता हि हविर्भुक्तं भवति प्रेत्य निष्फलम् १४४
यत्नेन भोजयेच्छ्राद्धे बह्वृचं वेदपारगम्
शाखान्तगमथाध्वर्युं छन्दोगं तु समाप्तिकम् १४५
एषामन्यतमो यस्य भुञ्जीत श्राद्धमर्चितः
पितॄणां तस्य तृप्तिः स्याच्छाश्वती साप्तपौरुषी १४६
एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः
अनुकल्पस्त्वयं ज्ञेयः सदा सद्भिरनुष्ठितः १४७
मातामहं मातुलं च स्वस्रीयं श्वशुरं गुरुम्
दौहित्रं विट्पतिं बन्धुमृत्विग्याज्यौ च भोजयेत् १४८
न ब्राह्मणं परीक्षेत दैवे कर्मणि धर्मवित्
पित्र्ये कर्मणि तु प्राप्ते परीक्षेत प्रयत्नतः १४९

ये स्तेनपतितक्लीबा ये च नास्तिकवृत्तयः
तान्हव्यकव्ययोर्विप्राननर्हान्मनुरब्रवीत्  १५०
जटिलं चानधीयानं दुर्बालं कितवं तथा
याजयन्ति च ये पूगांस्तांश्च श्राद्धे न भोजयेत्  १५१
चिकित्सकान्देवलकान्मांसविक्रयिणस्तथा
विपणेन च जीवन्तो वर्ज्याः स्युर्हव्यकव्ययोः  १५२
प्रेष्यो ग्रामस्य राज्ञश्च कुनखी श्यावदन्तकः
प्रतिरोद्धा गुरोश्चैव त्यक्ताग्निर्वार्धुषिस्तथा  १५३
यक्ष्मी च पशुपालश्च परिवेत्ता निराकृतिः
ब्रह्मद्विष्परिवित्तिश्च गणाभ्यन्तर एव च  १५४
कुशीलवोऽवकीर्णी च वृषलीपतिरेव च
पौनर्भवश्च काणश्च यस्य चोपपतिर्गृहे  १५५
भृतकाध्यापको यश्च भृतकाध्यापितस्तथा
शूद्रशिष्यो गुरुश्चैव वाग्दुष्टः कुण्डगोलकौ  १५६
अकारणे परित्यक्ता मातापित्रोर्गुरोस्तथा
ब्राह्मैर्यौनैश्च संबन्धैः संयोगं पतितैर्गतः  १५७
अगारदाही गरदः कुण्डाशी सोमविक्रयी
समुद्रयायी बन्दी च तैलिकः कूटकारकः  १५८
पित्रा विवदमानश्च कितवो मद्यपस्तथा
पापरोग्यभिशस्तश्च दाम्भिको रसविक्रयी  १५९
धनुःशराणां कर्ता च यश्चाग्रेदिधिषूपतिः
मित्रध्रुग्द्यूतवृत्तिश्च पुत्राचार्यस्तथैव च  १६०
भ्रामरी गन्डमाली च श्वित्र्यथो पिशुनस्तथा
उन्मत्तोऽन्धश्च वर्ज्याः स्युर्वेदनिन्दक एव च  १६१
हस्तिगोऽश्वोष्ट्रदमको नक्षत्रैर्यश्च जीवति
पक्षिणां पोषको यश्च युद्धाचार्यस्तथैव च  १६२

स्रोतसां भेदको यश्च तेषां चावरणे रतः
गृहसंवेशको दूतो वृक्षारोपक एव च १६३
श्वक्रीडी श्येनजीवी च कन्यादूषक एव च
हिंस्रो वृषलवृत्तिश्च गणानां चैव याजकः १६४
आचारहीनः क्लीबश्च नित्यं याचनकस्तथा
कृषिजीवी श्लीपदी च सद्भिर्निन्दित एव च १६५
औरभ्रिको माहिषिकः परपूर्वापतिस्तथा
प्रेतनिर्यापकश्चैव वर्जनीयाः प्रयत्नतः १६६
एतान्विगर्हिताचारानपाङ्क्तेयान्द्विजाधमान्
द्विजातिप्रवरो विद्वानुभयत्र विवर्जयेत् १६७
ब्राह्मणो त्वनधीयानस्तृणाग्निरिव शाम्यति
तस्मै हव्यं न दातव्यं न हि भस्मनि हूयते १६८
अपाङ्क्तदाने यो दातुर्भवत्यूर्ध्वं फलोदयः
दैवे हविषि पित्र्ये वा तं प्रवक्ष्याम्यशेषतः १६९
अव्रतैर्यद्द्विजैर्भुक्तं परिवेत्रादिभिस्तथा
अपाङ्क्तेयैर्यदन्यैश्च तद्वै रक्षांसि भुञ्जते १७०
दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते
परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः १७१
परिवित्तिः परिवेत्ता यया च परिविद्यते
सर्वे ते नरकं यान्ति दातृयाजकपञ्चमाः १७२
भ्रातुर्मृतस्य भार्यायां योऽनुरज्येत कामतः
धर्मेणापि नियुक्तायां स ज्ञेयो दिधिषूपतिः १७३
परदारेषु जायेते द्वौ सुतौ कुण्डगोलकौ
पत्यौ जीवति कुण्डः स्यान्मृते भर्तरि गोलकः १७४
तौ तु जातौ परक्षेत्रे प्राणिनौ प्रेत्य चेह च
दत्तानि हव्यकव्यानि नाशयन्ति प्रदायिनाम् १७५

अपाङ्क्त्यो यावतः पङ्क्त्यान्भुञ्जानाननुपश्यति
तावतां न फलं तत्र दाता प्राप्नोति बालिशः १७६
वीक्ष्यान्धो नवतेः काणः षष्टेः श्वित्री शतस्य तु
पापरोगी सहस्रस्य दातुर्नाशयते फलम् १७७
यावतः संस्पृशेदङ्गैर्ब्राह्मणान्शूद्रयाजकः
तावतां न भवेद्दातुः फलं दानस्य पौर्तिकम् १७८
वेदविच्चापि विप्रोऽस्य लोभात्कृत्वा प्रतिग्रहम्
विनाशं व्रजति क्षिप्रमामपात्रमिवाम्भसि १७९
सोमविक्रयिणे विष्ठा भिषजे पूयशोणितम्
नष्टं देवलके दत्तमप्रतिष्ठं तु वार्धुषौ १८०
यत्तु वाणिजके दत्तं नेह नामुत्र तद्भवेत्
भस्मनीव हुतं द्रव्यं तथा पौनर्भवे द्विजे १८१
इतरेषु त्वपाङ्क्त्येषु यथोद्दिष्टेष्वसाधुषु
मेदोऽसृङ्मांसमज्जास्थि वदन्त्यन्नं मनीषिणः १८२
अपाङ्क्त्योपहता पङ्क्तिः पाव्यते यैर्द्विजोत्तमैः
तान्निबोधत कार्त्स्न्येन द्विजाग्र्यान्पङ्क्तिपावनान् १८३
अग्र्याः सर्वेषु वेदेषु सर्वप्रवचनेषु च
श्रोत्रियान्वयजाश्चैव विज्ञेयाः पङ्क्तिपावनाः १८४
त्रिणाचिकेतः पञ्चाग्निस्त्रिसुपर्णः षडङ्गवित्
ब्रह्मदेयात्मसन्तानो ज्येष्ठसामग एव च १८५
वेदार्थवित्प्रवक्ता च ब्रह्मचारी सहस्रदः
शतायुश्चैव विज्ञेया ब्राह्मणाः पङ्क्तिपावनाः १८६
पूर्वेद्युरपरेद्युर्वा श्राद्धकर्मण्युपस्थिते
निमन्त्रयेत त्र्यवरान्सम्यग्विप्रान्यथोदितान् १८७
निमन्त्रितो द्विजः पित्र्ये नियतात्मा भवेत्सदा
न च छन्दांस्यधीयीत यस्य श्राद्धं च तद्भवेत् १८८

निमन्त्रितान्हि पितर उपतिष्ठन्ति तान्द्विजान्
वायुवच्चानुगच्छन्ति तथासीनानुपासते १८९
केतितस्तु यथान्यायं हव्ये कव्ये द्विजोत्तमः
कथं चिदप्यतिक्रामन्पापः सूकरतां व्रजेत् १९०
आमन्त्रितस्तु यः श्राद्धे वृशल्या सह मोदते
दातुर्यद्दुष्कृतं किं चित्तत्सर्वं प्रतिपद्यते १९१
अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः
न्यस्तशस्त्रा महाभागाः पितरः पूर्वदेवताः १९२
यस्मादुत्पत्तिरेतेषां सर्वेषामप्यशेषतः
ये च यैरुपचर्याः स्युर्नियमैस्तान्निबोधत १९३
मनोर्हैरण्यगर्भस्य ये मरीच्यादयः सुताः
तेषामृषीणां सर्वेषां पुत्राः पितृगणाः स्मृताः १९४
विराट्सुताः सोमसदः साध्यानां पितरः स्मृताः
अग्निष्वात्ताश्च देवानां मारीचा लोकविश्रुताः १९५
दैत्यदानवयक्षाणां गन्धर्वोरगरक्षसाम्
सुपर्णकिन्नराणां च स्मृता बर्हिषदोऽत्रिजाः १९६
सोमपा नाम विप्राणां क्षत्रियाणां हविर्भुजः
वैश्यानामाज्यपा नाम शूद्राणां तु सुकालिनः १९७
सोमपास्तु कवेः पुत्रा हविष्मन्तोऽङ्गिरःसुताः
पुलस्त्यस्याज्यपाः पुत्रा वसिष्ठस्य सुकालिनः १९८
अग्निदग्धानग्निदग्धान्काव्यान्बर्हिषदस्तथा
अग्निष्वात्तांश्च सौम्यांश्च विप्राणामेव निर्दिशेत् १९९
य एते तु गणा मुख्याः पितॄणां परिकीर्तिताः
तेषामपीह विज्ञेयं पुत्रपौत्रमनन्तकम् २००
ऋषिभ्यः पितरो जाताः पितृभ्यो देवमानवाः
देवेभ्यस्तु जगत्सर्वं चरं स्थाण्वनुपूर्वशः २०१

राजतैर्भाजनैरेषामथो वा रजतान्वितैः
वार्यपि श्रद्धया दत्तमक्षयायोपकल्पते २०२
दैवकार्याद्द्विजातीनां पितृकार्यं विशिष्यते
दैवं हि पितृकार्यस्य पूर्वमाप्यायनं स्मृतम् २०३
तेषामारक्षभूतं तु पूर्वं दैवं नियोजयेत्
रक्षांसि विप्रलुम्पन्ति श्राद्धमारक्षवर्जितम् २०४
दैवाद्यन्तं तदीहेत पित्राद्यन्तं न तद्भवेत्
पित्राद्यन्तं त्वीहमानः क्षिप्रं नश्यति सान्वयः २०५
शुचिं देशं विविक्तं च गोमयेनोपलेपयेत्
दक्षिणाप्रवणं चैव प्रयत्नेनोपपादयेत् २०६
अवकाशेषु चोक्षेषु जलतीरेषु चैव हि
विविक्तेषु च तुष्यन्ति दत्तेन पितरः सदा २०७
आसनेषूपक्लृप्तेषु बर्हिष्मत्सु पृथक्पृथक्
उपस्पृष्टोदकान्सम्यग्विप्रांस्तानुपवेशयेत् २०८
उपवेश्य तु तान्विप्रानासनेष्वजुगुप्सितान्
गन्धमाल्यैः सुरभिभिरर्चयेद्दैवपूर्वकम् २०९
तेषामुदकमानीय सपवित्रांस्तिलानपि
अग्नौ कुर्यादनुज्ञातो ब्राह्मणो ब्राह्मणैः सह २१०
अग्नेः सोमयमाभ्यां च कृत्वाप्यायनमादितः
हविर्दानेन विधिवत्पश्चात्संतर्पयेत्पितॄन् २११
अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेत्
यो ह्यग्निः स द्विजो विप्रैर्मन्त्रदर्शिभिरुच्यते २१२
अक्रोधनान्सुप्रसादान्वदन्त्येतान्पुरातनान्
लोकस्याप्यायने युक्तान्श्राद्धदेवान्द्विजोत्तमान् २१३
अपसव्यमग्नौ कृत्वा सर्वमावृत्य विक्रमम्
अपसव्येन हस्तेन निर्वपेदुदकं भुवि २१४

त्रींस्तु तस्माद्धविःशेषात्पिरडान्कृत्वा समाहितः
औदकेनैव विधिना निर्वपेद्दक्षिणामुखः २१५
न्युप्य पिरडांस्ततस्तांस्तु प्रयतो विधिपूर्वकम्
तेषु दर्भेषु तं हस्तं निर्मृज्याल्लेपभागिनाम् २१६
आचम्योदक्परावृत्य त्रिरायम्य शनैरसून्
षड् ऋतूंश्च नमस्कुर्यात्पितृनेव च मन्त्रवत् २१७
उदकं निनयेच्छेषं शनैः पिरडान्तिके पुनः
अवजिघ्रेच्च तान्पिरडान्यथान्युप्तान्समाहितः २१८
पिरडेभ्यस्त्वल्पिकां मात्रां समादायानुपूर्वशः
तानेव विप्रानासीनान्विधिवत्पूर्वमाशयेत् २१९
ध्रियमाणे तु पितरि पूर्वेषामेव निर्वपेत्
विप्रवद्वापि तं श्राद्धे स्वकं पितरमाशयेत् २२०
पिता यस्य निवृत्तः स्याज्जीवेच्चापि पितामहः
पितुः स नाम सङ्कीर्त्य कीर्तयेत्प्रपितामहम् २२१
पितामहो वा तच्छ्राद्धं भुञ्जीतेत्यब्रवीन्मनुः
कामं वा समनुज्ञातः स्वयमेव समाचरेत् २२२
तेषां दत्त्वा तु हस्तेषु सपवित्रं तिलोदकम्
तत्पिरडाग्रं प्रयच्छेत स्वधैषामस्त्विति ब्रुवन् २२३
पाणिभ्यां तूपसंगृह्य स्वयमन्नस्य वर्धितम्
विप्रान्तिके पितृन्ध्यायन्शनकैरुपनिक्षिपेत् २२४
उभयोर्हस्तयोर्मुक्तं यदन्नमुपनीयते
तद्विप्रलुम्पन्त्यसुराः सहसा दुष्टचेतसः २२५
गुणांश्च सूपशाकाद्यान्पयो दधि घृतं मधु
विन्यसेत्प्रयतः पूर्वं भूमावेव समाहितः २२६
भक्ष्यं भोज्यं च विविधं मूलानि च फलानि च
हृद्यानि चैव मांसानि पानानि सुरभीणि च २२७

उपनीय तु तत्सर्वं शनकैः सुसमाहितः
परिवेषयेत प्रयतो गुणान्सर्वान्प्रचोदयन्   २२८
नास्त्रमापातयेज्जातु न कुप्येन्नानृतं वदेत्
न पादेन स्पृशेदन्नं न चैतदवधूनयेत्  २२९
अस्त्रं गमयति प्रेतान्कोपोऽरीननृतं शुनः
पादस्पर्शस्तु रक्षांसि दुष्कृतीनवधूननम्  २३०
यद्यद्रोचेत विप्रेभ्यस्तत्तद्दद्यादमत्सरः
ब्रह्मोद्याश्च कथाः कुर्यात्पितृणामेतदीप्सितम्  २३१
स्वाध्यायं श्रावयेत्पित्र्ये धर्मशास्त्राणि चैव हि
आख्यानानीतिहासांश्च पुराणानि खिलानि च  २३२
हर्षयेद्ब्राह्मणांस्तुष्टो भोजयेच्च शनैःशनैः
अन्नाद्येनासकृच्चैतान्गुणैश्च परिचोदयेत्  २३३
व्रतस्थमपि दौहित्रं श्राद्धे यत्नेन भोजयेत्
कुतपं चासनं दद्यात्तिलैश्च विकिरेन्महीम्  २३४
त्रीणि श्राद्धे पवित्राणि दौहित्रः कुतपस्तिलाः
त्रीणि चात्र प्रशंसन्ति शौचमक्रोधमत्वराम्  २३५
अत्युष्णं सर्वमन्नं स्याद्भुञ्जीरंस्ते च वाग्यताः
न च द्विजातयो ब्रूयुर्दात्रा पृष्टा हविर्गुणान्   २३६
यावदुष्मा भवत्यन्नं यावदश्नन्ति वाग्यताः
पितरस्तावदश्नन्ति यावन्नोक्ता हविर्गुणाः  २३७
यद्वेष्टितशिरा भुङ्क्ते यद्भुङ्क्ते दक्षिणामुखः
सोपानत्कश्च यद्भुङ्क्ते तद्वै रक्षांसि भुञ्जते  २३८
चाण्डालश्च वराहश्च कुक्कुटः श्वा तथैव च
रजस्वला च षण्ढश्च नेक्षेरन्नश्नतो द्विजान्   २३९
होमे प्रदाने भोज्ये च यदेभिरभिवीक्ष्यते
दैवे हविषि पित्र्ये वा तद्गच्छत्ययथातथम्  २४०

घ्राणेन सूकरो हन्ति पक्षवातेन कुक्कुटः
श्वा तु दृष्टिनिपातेन स्पर्शेणावरवर्णजः २४१
खञ्जो वा यदि वा काणो दातुः प्रेष्योऽपि वा भवेत्
हीनातिरिक्तगात्रो वा तमप्यपनयेत्पुनः २४२
ब्राह्मणं भिक्षुकं वापि भोजनार्थमुपस्थितम्
ब्राह्मणैरभ्यनुज्ञातः शक्तितः प्रतिपूजयेत् २४३
सार्ववर्णिकमन्नाद्यं संनीयाप्लाव्य वारिणा
समुत्सृजेद्भुक्तवतामग्रतो विकिरन्भुवि २४४
असंस्कृतप्रमीतानां त्यागिनां कुलयोषिताम्
उच्छिष्टं भागधेयं स्याद्दर्भेषु विकिरश्च यः २४५
उच्छेषणं भूमिगतमजिह्मस्याशठस्य च
दासवर्गस्य तत्पित्र्ये भागधेयं प्रचक्षते २४६
आसपिण्डक्रियाकर्म द्विजातेः संस्थितस्य तु
अदैवं भोजयेच्छ्राद्धं पिण्डमेकं च निर्वपेत् २४७
सहपिण्डक्रियायां तु कृतायामस्य धर्मतः
अनयैवावृता कार्यं पिण्डनिर्वपनं सुतैः २४८
श्राद्धं भुक्त्वा य उच्छिष्टं वृषलाय प्रयच्छति
स मूढो नरकं याति कालसूत्रमवाक्शिराः २४९
श्राद्धभुग्वृषलीतल्पं तदहर्योऽधिगच्छति
तस्याः पुरीषे तं मासं पितरस्तस्य शेरते २५०
पृष्ट्वा स्वदितमित्येवं तृप्तानाचामयेत्ततः
आचान्तांश्चानुजानीयादभितो रम्यतामिति २५१
स्वधास्त्वित्येव तं ब्रूयुर्ब्राह्मणास्तदनन्तरम्
स्वधाकारः परा ह्याषीः सर्वेषु पितृकर्मसु २५२
ततो भुक्तवतां तेषामन्नशेषं निवेदयेत्
यथा ब्रूयुस्तथा कुर्यादनुज्ञातस्ततो द्विजैः २५३

पित्र्ये स्वदितमित्येव वाच्यं गोष्ठे तु सुश्रृतम्
संपन्नमित्यभ्युदये दैवे रुचितमित्यपि २५४
अपराह्णस्तथा दर्भा वास्तुसंपादनं तिलाः
सृष्टिर्मृष्टिर्द्विजाश्चाग्र्याः श्राद्धकर्मसु संपदः २५५
दर्भाः पवित्रं पूर्वाह्णो हविष्याणि च सर्वशः
पवित्रं यच्च पूर्वोक्तं विज्ञेया हव्यसंपदः २५६
मुन्यन्नानि पयः सोमो मांसं यच्चानुपस्कृतम्
अक्षारलवणं चैव प्रकृत्या हविरुच्यते २५७
विसृज्य ब्राह्मणांस्तांस्तु नियतो वाग्यतः शुचिः
दक्षिणां दिशमाकाङ्क्षन्याचेतेमान्वरान्पितॄन् २५८
दातारो नोऽभिवर्धन्तां वेदाः संततिरेव च
श्रद्धा च नो मा व्यगमद्बहुदेयं च नोऽस्त्विति २५९
एवं निर्वपणं कृत्वा पिण्डांस्तांस्तदनन्तरम्
गां विप्रमजमग्निं वा प्राशयेदप्सु वा क्षिपेत् २६०
पिण्डनिर्वपणं के चित्परस्तादेव कुर्वते
वयोभिः खादयन्त्यन्ये प्रक्षिपन्त्यनलेऽप्सु वा २६१
पतिव्रता धर्मपत्नी पितृपूजनतत्परा
मध्यमं तु ततः पिण्डमद्यात्सम्यक् सुतार्थिनी २६२
आयुष्मन्तं सुतं सूते यशोमेधासमन्वितम्
धनवन्तं प्रजावन्तं सात्त्विकं धार्मिकं तथा २६३
प्रक्षाल्य हस्तावाचाम्य ज्ञातिप्रायं प्रकल्पयेत्
ज्ञातिभ्यः सत्कृतं दत्त्वा बान्धवानपि भोजयेत् २६४
उच्छेषणं तु तत्तिष्ठेद्यावद्विप्रा विसर्जिताः
ततो गृहबलिं कुर्यादिति धर्मो व्यवस्थितः २६५
हविर्यच्चिररात्राय यच्चानन्त्याय कल्पते
पितृभ्यो विधिवद्दत्तं तत्प्रवक्ष्याम्यशेषतः २६६

तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेन वा
दत्तेन मासं तृप्यन्ति विधिवत्पितरो नृनाम्  २६७
द्वौ मासौ मत्स्यमांसेन त्रीन्मासान्हारिणेन तु
औरभ्रेणाथ चतुरः शाकुनेनाथ पञ्च वै  २६८
षण्मासांश्छागमांसेन पार्षतेन च सप्त वै
अष्टावेनस्य मांसेन रौरवेण नवैव तु  २६९
दशमासांस्तु तृप्यन्ति वराहमहिषामिषैः
शशकूर्मयोस्तु मांसेन मासानेकादशैव तु  २७०
संवत्सरं तु गव्येन पयसा पायसेन च
वार्ध्रीणसस्य मांसेन तृप्तिर्द्वादशवार्षिकी  २७१
कालशाकं महाशल्काः खड्गलोहामिषं मधु
आनन्त्यायैव कल्प्यन्ते मुन्यन्नानि च सर्वशः  २७२
यत्किं चिन्मधुना मिश्रं प्रदद्यात्तु त्रयोदशीम्
तदप्यक्षयमेव स्याद्वर्षासु च मघासु च  २७३
अपि नः स कुले भूयाद्यो नो दद्यात्त्रयोदशीम्
पायसं मधुसर्पिर्भ्यां प्राक् छाये कुञ्जरस्य च  २७४
यद्यद्ददाति विधिवत्सम्यक् श्रद्धासमन्वितः
तत्तत्पितृणां भवति परत्रानन्तमक्षयम्  २७५
कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीम्
श्राद्धे प्रशस्तास्तिथयो यथैता न तथेतराः  २७६
युक्षु कुर्वन्दिनर्क्षेषु सर्वान्कामान्समश्नुते
अयुक्षु तु पितॄन्सर्वान्प्रजां प्राप्नोति पुष्कलाम्  २७७
यथा चैवापरः पक्षः पूर्वपक्षाद्विशिष्यते
तथा श्राद्धस्य पूर्वाह्णादपराह्णो विशिष्यते  २७८
प्राचीनावीतिना सम्यगपसव्यमतन्द्रिणा
पित्र्यमा निधनात्कार्यं विधिवद्दर्भपाणिना  २७९

रात्रौ श्राद्धं न कुर्वीत राक्षसी कीर्तिता हि सा
संध्ययोरुभयोश्चैव सूर्ये चैवाचिरोदिते २८०
अनेन विधिना श्राद्धं त्रिरब्दस्येह निर्वपेत्
हेमन्तग्रीष्मवर्षासु पाञ्चयज्ञिकमन्वहम् २८१
न पैतृयज्ञियो होमो लौकिकेऽग्नौ विधीयते
न दर्शेन विना श्राद्धमाहिताग्नेर्द्विजन्मनः २८२
यदेव तर्पयत्यद्भिः पितॄन्स्नात्वा द्विजोत्तमः
तेनैव कृत्स्नमाप्नोति पितृयज्ञक्रियाफलम् २८३
वसून्वदन्ति तु पितॄन्रुद्रांश्चैव पितामहान्
प्रपितामहांस्तथादित्यान्श्रुतिरेषा सनातनी २८४
विघसाशी भवेन्नित्यं नित्यं वामृतभोजनः
विघसो भुक्तशेषं तु यज्ञशेषं तथामृतम् २८५
एतद्वोऽभिहितं सर्वं विधानं पाञ्चयज्ञिकम्
द्विजातिमुख्यवृत्तीनां विधानं श्रूयतामिति २८६

## चतुर्थोऽध्यायः

चतुर्थमायुषो भागमुषित्वाद्यं गुरौ द्विजाः
द्वितीयमायुषो भागं कृतदारो गृहे वसेत् १
अद्रोहेणैव भूतानामल्पद्रोहेण वा पुनः
या वृत्तिस्तां समास्थाय विप्रो जीवेदनापदि २
यात्रामात्रप्रसिद्ध्यर्थं स्वैः कर्मभिरगर्हितैः
अक्लेशेन शरीरस्य कुर्वीत धनसंचयम् ३
ऋतामृताभ्यां जीवेत्तु मृतेन प्रमृतेन वा
सत्यानृताभ्यामपि वा न श्ववृत्त्या कदा चन ४
ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम्
मृतं तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतम् ५

सत्यानृतं तु वाणिज्यं तेन चैवापि जीव्यते
सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेत् ६
कुसूलधान्यको वा स्यात्कुम्भीधान्यक एव वा
त्र्यहैहिको वापि भवेदश्वस्तनिक एव वा ७
चतुर्णामपि चैतेषां द्विजानां गृहमेधिनाम्
ज्यायान्परः परो ज्ञेयो धर्मतो लोकजित्तमः ८
षट्कर्मैको भवत्येषां त्रिभिरन्यः प्रवर्तते
द्वाभ्यामेकश्चतुर्थस्तु ब्रह्मसत्त्रेण जीवति ९
वर्तयंश्च शिलोञ्छाभ्यामग्निहोत्रपरायणः
इष्टीः पार्वायणान्तीयाः केवला निर्वपेत्सदा १०
न लोकवृत्तं वर्तेत वृत्तिहेतोः कथं चन
अजिह्मामशथां शुद्धां जीवेद्ब्राह्मणजीविकाम् ११
संतोषं परमास्थाय सुखार्थी संयतो भवेत्
संतोषमूलं हि सुखं दुःखमूलं विपर्ययः १२
अतोऽन्यतमया वृत्त्या जीवंस्तु स्नातको द्विजः
स्वर्गायुष्ययशस्यानि व्रताणीमानि धारयेत् १३
वेदोदितं स्वकं कर्म नित्यं कुर्यादतन्द्रितः
तद्धि कुर्वन्यथाशक्ति प्राप्नोति परमां गतिम् १४
नेहेतार्थान्प्रसङ्गेन न विरुद्धेन कर्मणा
न विद्यमानेष्वर्थेषु नार्त्यामपि यतस्ततः १५
इन्द्रियार्थेषु सर्वेषु न प्रसज्येत कामतः
अतिप्रसक्तिं चैतेषां मनसा संनिवर्तयेत् १६
सर्वान्परित्यजेदर्थान्स्वाध्यायस्य विरोधिनः
यथा तथाध्यापयंस्तु सा ह्यस्य कृतकृत्यता १७
वयसः कर्मणोऽर्थस्य श्रुतस्याभिजनस्य च
वेषवाग्बुद्धिसारूप्यमाचरन्विचरेदिह १८

बुद्धिवृद्धिकराग्याशु धन्यानि च हितानि च
नित्यं शास्त्राग्यवेक्षेत निगमांश्चैव वैदिकान्  १९
यथा यथा हि पुरुषः शास्त्रं समधिगच्छति
तथा तथा विजानाति विज्ञानं चास्य रोचते  २०
ऋषियज्ञं देवयज्ञं भूतयज्ञं च सर्वदा
नृयज्ञं पितृयज्ञं च यथाशक्ति न हापयेत्  २१
एतानेके महायज्ञान्यज्ञशास्त्रविदो जनाः
अनीहमानाः सततमिन्द्रियेष्वेव जुह्वति  २२
वाच्येके जुह्वति प्राणं प्राणे वाचं च सर्वदा
वाचि प्राणे च पश्यन्तो यज्ञनिर्वृत्तिमक्षयाम्  २३
ज्ञानेनैवापरे विप्रा यजन्त्येतैर्मखैः सदा
ज्ञानमूलां क्रियामेषां पश्यन्तो ज्ञानचक्षुषा  २४
अग्निहोत्रं च जुहुयादाद्यन्ते द्युनिशोः सदा
दर्शेन चार्धमासान्ते पौर्णमासेन चैव हि  २५
सस्यान्ते नवसस्येष्ट्या तथर्त्वन्ते द्विजोऽध्वरैः
पशुना त्वयनस्यादौ समान्ते सौमिकैर्मखैः  २६
नानिष्ट्वा नवसस्येष्ट्या पशुना चाग्निमान्द्विजः
नवान्नमद्यान्मांसं वा दीर्घमायुर्जिजीविषुः  २७
नवेनानर्चिता ह्यस्य पशुहव्येन चाग्नयः
प्राणानेवात्तुमिच्छन्ति नवान्नामिषगर्धिनः  २८
आसनाशनशय्याभिरद्भिर्मूलफलेन वा
नास्य कश्चिद्वसेद्गेहे शक्तितोऽनर्चितोऽतिथिः  २९
पाषाग्डिनो विकर्मस्थान्बैडालव्रतिकान्शठान्
हैतुकान्बकवृत्तींश्च वाग्मात्रेणापि नार्चयेत्  ३०
वेदविद्याव्रतस्नातान्श्रोत्रियान्गृहमेधिनः
पूजयेद्धव्यकव्येन विपरीतांश्च वर्जयेत्  ३१

शक्तितोऽपचमानेभ्यो दातव्यं गृहमेधिना
संविभागश्च भूतेभ्यः कर्तव्योऽनुपरोधतः ३२
राजतो धनमन्विच्छेत्संसीदन्स्नातकः क्षुधा
याज्यान्तेवासिनोर्वापि न त्वन्यत इति स्थितिः ३३
न सीदेत्स्नातको विप्रः क्षुधा शक्तः कथं चन
न जीर्णमलवद्वासा भवेच्च विभवे सति ३४
क्लृप्तकेशनखश्मश्रुर्दान्तः शुक्लाम्बरः शुचिः
स्वाध्याये चैव युक्तः स्यान्नित्यमात्महितेषु च ३५
वैणवीं धारयेद्यष्टिं सोदकं च कमण्डलुम्
यज्ञोपवीतं वेदं च शुभं रौक्मे च कुण्डले ३६
नेक्षेतोद्यन्तमादित्यं नास्तं यान्तं कदा चन
नोपसृष्टं न वारिस्थं न मध्यं नभसो गतम् ३७
न लङ्घयेद्वत्सतन्त्रीं न प्रधावेच्च वर्षति
न चोदके निरीक्षेत स्वरूपमिति धारणा ३८
मृदं गां दैवतं विप्रं घृतं मधु चतुष्पथम्
प्रदक्षिणानि कुर्वीत प्रज्ञातांश्च वनस्पतीन् ३९
नोपगच्छेत्प्रमत्तोऽपि स्त्रियमार्तवदर्शने
समानशयने चैव न शयीत तया सह ४०
रजसाभिप्लुतां नारीं नरस्य ह्युपगच्छतः
प्रज्ञा तेजो बलं चक्षुरायुश्चैव प्रहीयते ४१
तां विवर्जयतस्तस्य रजसा समभिप्लुताम्
प्रज्ञा तेजो बलं चक्षुरायुश्चैव प्रवर्धते ४२
नाश्नीयाद्भार्यया सार्धं नैनामीक्षेत चाश्नतीम्
क्षुवतीं जृम्भमाणां वा न चासीनां यथासुखम् ४३
नाञ्जयन्तीं स्वके नेत्रे न चाभ्यक्तामनावृताम्
न पश्येत्प्रसवन्तीं च तेजस्कामो द्विजोत्तमः ४४

नान्नमद्यादेकवासा न नग्नः स्नानमाचरेत्
न मूत्रं पथि कुर्वीत न भस्मनि न गोव्रजे ४५
न फालकृष्टे न जले न चित्यां न च पर्वते
न जीर्णदेवायतने न वल्मीके कदा चन ४६
न ससत्त्वेषु गर्तेषु न गच्छन्नपि न स्थितः
न नदीतीरमासाद्य न च पर्वतमस्तके ४७
वाय्वग्निविप्रमादित्यमपः पश्यंस्तथैव गाः
न कदा चन कुर्वीत विण्मूत्रस्य विसर्जनम् ४८
तिरस्कृत्योच्चरेत्काष्ठलोष्ठपत्रतृणादिना
नियम्य प्रयतो वाचं संवीताङ्गोऽवगुण्ठितः ४९
मूत्रोच्चारसमुत्सर्गं दिवा कुर्यादुदङ्मुखः
दक्षिणाभिमुखो रात्रौ संध्यायोश्च यथा दिवा ५०
छायायामन्धकारे वा रात्रावहनि वा द्विजः
यथासुखमुखः कुर्यात्प्राणबाधभयेषु च ५१
प्रत्यग्निं प्रतिसूर्यं च प्रतिसोमोदकद्विजम्
प्रतिगु प्रतिवातं च प्रज्ञा नश्यति मेहतः ५२
नाग्निं मुखेनोपधमेन्नग्नां नेक्षेत च स्त्रियम्
नामेध्यं प्रक्षिपेदग्नौ न च पादौ प्रतापयेत् ५३
अधस्तान्नोपदध्याच्च न चैनमभिलङ्घयेत्
न चैनं पादतः कुर्यान्न प्राणाबाधमाचरेत् ५४
नाश्नीयात्संधिवेलायां न गच्छेन्नापि संविशेत्
न चैव प्रलिखेद्भूमिं नात्मनोऽपहरेत्स्रजम् ५५
नाप्सु मूत्रं पुरीषं वा ष्ठीवनं वा समुत्सृजेत्
अमेध्यलिप्तमन्यद्वा लोहितं वा विषाणि वा ५६
नैकः सुप्याच्छून्यगेहे न श्रेयांसं प्रबोधयेत्
नोदक्ययाभिभाषेत यज्ञं गच्छेन्न चावृतः ५७

अग्न्यगारे गवां गोष्ठे ब्राह्मणानां च संनिधौ
स्वाध्याये भोजने चैव दक्षिनं पाणिमुद्धरेत् ५८
न वारयेद्गां धयन्तीं न चाचक्षीत कस्य चित्
न दिवीन्द्रायुधं दृष्ट्वा कस्य चिद्दर्शयेद्बुधः ५९
नाधर्मिके वसेद्ग्रामे न व्याधिबहुले भृशम्
नैकः प्रपद्येताध्वानं न चिरं पर्वते वसेत् ६०
न शूद्रराज्ये निवसेन्नाधार्मिकजनावृते
न पाषण्डिगणाक्रान्ते नोपसृष्टेऽन्त्यजैर्नृभिः ६१
न भुञ्जीतोद्धृतस्नेहं नातिसौहित्यमाचरेत्
नातिप्रगे नातिसायं न सायं प्रातराशितः ६२
न कुर्वीत वृथाचेष्टां न वार्यञ्जलिना पिबेत्
नोत्सङ्गे भक्षयेद्भक्ष्यान्न जातु स्यात्कुतूहली ६३
न नृत्येदथ वा गायेन्न वादित्राणि वादयेत्
नास्फोटयेन्न च क्ष्वेडेन्न च रक्तो विरावयेत् ६४
न पादौ धावयेत्कांस्ये कदा चिदपि भाजने
न भिन्नभाण्डे भुञ्जीत न भावप्रतिदूषिते ६५
उपानहौ च वासश्च धृतमन्यैर्न धारयेत्
उपवीतमलङ्कारं स्रजं करकमेव च ६६
नाविनीतैर्भजेद्धुर्यैर्न च क्षुध्व्याधिपीडितैः
न भिन्नशृङ्गाक्षिखुरैर्न वालधिविरूपितैः ६७
विनीतैस्तु व्रजेन्नित्यमाशुगैर्लक्षणान्वितैः
वर्णरूपोपसंपन्नैः प्रतोदेनातुदन्भृशम् ६८
बालातपः प्रेतधूमो वर्ज्यं भिन्नं तथासनम्
न छिन्द्यान्नखरोमाणि दन्तैर्नोत्पाटयेन्नखान् ६९
न मृल्लोष्टं च मृद्नीयान्न छिन्द्यात्करजैस्तृणम्
न कर्म निष्फलं कुर्यान्नायत्यामसुखोदयम् ७०

लोष्ठमर्दी तृणच्छेदी नखखादी च यो नरः
स विनाशं व्रजत्याशु सूचकाशुचिरेव च  ७१
न विगर्ह्य कथां कुर्याद्बहिर्माल्यं न धारयेत्
गवां च यानं पृष्ठेन सर्वथैव विगर्हितम्  ७२
अद्वारेण च नातीयाद्ग्रामं वा वेश्म वावृतम्
रात्रौ च वृक्षमूलानि दूरतः परिवर्जयेत्  ७३
नाक्षैर्दीव्येत्कदा चित्तु स्वयं नोपानहौ हरेत्
शयनस्थो न भुञ्जीत न पाणिस्थं न चासने  ७४
सर्वं च तिलसंबद्धं नाद्यादस्तमिते रवौ
न च नग्नः शयीतेह न चोच्छिष्टः क्व चिद्व्रजेत्  ७५
आर्द्रपादस्तु भुञ्जीत नार्द्रपादस्तु संविशेत्
आर्द्रपादस्तु भुञ्जानो दीर्घमायुरवाप्नुयात्  ७६
अचक्षुर्विषयं दुर्गं न प्रपद्येत कर्हि चित्
न विष्मूत्रमुदीक्षेत न बाहुभ्यां नदीं तरेत्  ७७
अधितिष्ठेन्न केशांस्तु न भस्मास्थिकपालिकाः
न कार्पासास्थि न तुषान्दीर्घमायुर्जिजीविषुः  ७८
न संवसेच्च पतितैर्न चाण्डालैर्न पुल्कसैः
न मूर्खैर्नावलिप्तैश्च नान्त्यैर्नान्त्यावसायिभिः  ७९
न शूद्राय मतिं दद्यान्नोच्छिष्टं न हविष्कृतम्
न चास्योपदिशेद्धर्मं न चास्य व्रतमादिशेत्  ८०
यो ह्यस्य धर्ममाचष्टे यश्चैवादिशति व्रतम्
सोऽसंवृतं नाम तमः सह तेनैव मज्जति  ८१
न संहताभ्यां पाणिभ्यां कण्डूयेदात्मनः शिरः
न स्पृशेच्चैतदुच्छिष्टो न च स्नायाद्विना ततः  ८२
केशग्रहान्प्रहारांश्च शिरस्येतान्विवर्जयेत्
शिरःस्नातश्च तैलेन नाङ्गं किं चिदपि स्पृशेत्  ८३

न राज्ञः प्रतिगृह्णीयादराजन्यप्रसूतितः
सूनाचक्रध्वजवतां वेशेनैव च जीवताम् ८४
दशसूनासमं चक्रं दशचक्रसमो ध्वजः
दशध्वजसमो वेशो दशवेशसमो नृपः ८५
दश सूणासहस्राणि यो वाहयति सौनिकः
तेन तुल्यः स्मृतो राजा घोरस्तस्य प्रतिग्रहः ८६
यो राज्ञः प्रतिगृह्णाति लुब्धस्योच्छास्त्रवर्तिनः
स पर्यायेण यातीमान्नरकानेकविंशतिम् ८७
तामिस्रमन्धतामिस्रं महारौरवरौरवौ
नरकं कालसूत्रं च महानरकमेव च ८८
संजीवनं महावीचिं तपनं संप्रतापनम्
संहातं च सकाकोलं कुड्मलं प्रतिमूर्तिकम् ८९
लोहशङ्कुमृजीषं च पन्थानं शाल्मलीं नदीम्
असिपत्रवनं चैव लोहदारकमेव च ९०
एतद्विदन्तो विद्वांसो ब्राह्मणा ब्रह्मवादिनः
न राज्ञः प्रतिगृह्णन्ति प्रेत्य श्रेयोऽभिकाङ्क्षिणः ९१
ब्राह्मे मुहूर्ते बुध्येत धर्मार्थौ चानुचिन्तयेत्
कायक्लेशांश्च तन्मूलान्वेदतत्त्वार्थमेव च ९२
उत्थायावश्यकं कृत्वा कृतशौचः समाहितः
पूर्वां संध्यां जपंस्तिष्ठेत्स्वकाले चापरां चिरम् ९३
ऋषयो दीर्घसंध्यत्वाद्दीर्घमायुरवाप्नुयुः
प्रज्ञां यशश्च कीर्तिं च ब्रह्मवर्चसमेव च ९४
श्रावण्यां प्रौष्ठपद्यां वाप्युपाकृत्य यथाविधि
युक्तश्छन्दांस्यधीयीत मासान्विप्रोऽर्धपञ्चमान् ९५
पुष्ये तु छन्दसां कुर्याद्बहिरुत्सर्जनं द्विजः
माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमेऽहनि ९६

यथाशास्त्रं तु कृत्वैवमुत्सर्गं छन्दसां बहिः
विरमेत्पक्षिणीं रात्रिं तदेवैकमहर्निशम्  ९७
अत ऊर्ध्वं तु छन्दांसि शुक्लेषु नियतः पठेत्
वेदाङ्गानि च सर्वाणि कृष्णपक्षेषु संपठेत्  ९८
नाविस्पष्टमधीयीत न शूद्रजनसन्निधौ
न निशान्ते परिश्रान्तो ब्रह्माधीत्य पुनः स्वपेत्  ९९
यथोदितेन विधिना नित्यं छन्दस्कृतं पठेत्
ब्रह्म छन्दस्कृतं चैव द्विजो युक्तो ह्यनापदि  १००
इमान्नित्यमनध्यायानधीयानो विवर्जयेत्
अध्यापनं च कुर्वाणः शिष्याणां विधिपूर्वकम्  १०१
कर्णश्रवेऽनिले रात्रौ दिवा पांसुसमूहने
एतौ वर्षास्वनध्यायावध्यायज्ञाः प्रचक्षते  १०२
विद्युत्स्तनितवर्षेषु महोल्कानां च संप्लवे
आकालिकमनध्यायमेतेषु मनुरब्रवीत्  १०३
एतांस्त्वभ्युदितान्विद्याद्यदा प्रादुष्कृताग्निषु
तदा विद्यादनध्यायमनृतौ चाभ्रदर्शने  १०४
निर्घाते भूमिचलने ज्योतिषां चोपसर्जने
एतानाकालिकान्विद्यादनध्यायानृतावपि  १०५
प्रादुष्कृतेष्वग्निषु तु विद्युत्स्तनितनिःस्वने
सज्योतिः स्यादनध्यायः शेषे रात्रौ यथा दिवा  १०६
नित्यानध्याय एव स्याद्ग्रामेषु नगरेषु च
धर्मनैपुण्यकामानां पूतिगन्धे च सर्वदा  १०७
अन्तर्गतशवे ग्रामे वृषलस्य च सन्निधौ
अनध्यायो रुद्यमाने समवाये जनस्य च  १०८
उदके मध्यरात्रे च विण्मूत्रस्य विसर्जने
उच्छिष्टः श्राद्धभुक् चैव मनसापि न चिन्तयेत्  १०९

प्रतिगृह्य द्विजो विद्वानेकोद्दिष्टस्य केतनम्
त्र्यहं न कीर्तयेद्ब्रह्म राज्ञो राहोश्च सूतके ११०
यावदेकानुदिष्टस्य गन्धो लेपश्च तिष्ठति
विप्रस्य विदुषो देहे तावद्ब्रह्म न कीर्तयेत् १११
शयानः प्रौढपादश्च कृत्वा चैवावसक्थिकाम्
नाधीयीतामिषं जग्ध्वा सूतकान्नाद्यमेव च ११२
नीहारे बाणशब्दे च संध्ययोरेव चोभयोः
अमावास्याचतुर्दश्योः पौर्णमास्यष्टकासु च ११३
अमावास्या गुरुं हन्ति शिष्यं हन्ति चतुर्दशी
ब्रह्माष्टकपौर्णमास्यौ तस्मात्ताः परिवर्जयेत् ११४
पांसुवर्षे दिशां दाहे गोमायुविरुते तथा
श्वखरोष्ट्रे च रुवति पङ्क्तौ च न पठेद्द्विजः ११५
नाधीयीत श्मशानान्ते ग्रामान्ते गोव्रजेऽपि वा
वसित्वा मैथुनं वासः श्राद्धिकं प्रतिगृह्य च ११६
प्राणि वा यदि वाप्राणि यत्किं चिच्छ्राद्धिकं भवेत्
तदालभ्याप्यनध्यायः पाण्यास्यो हि द्विजः स्मृतः ११७
चोरैरुपद्रुते ग्रामे संभ्रमे चाग्निकारिते
आकालिकमनध्यायं विद्यात्सर्वाद्भुतेषु च ११८
उपाकर्मणि चोत्सर्गे त्रिरात्रं क्षेपणं स्मृतम्
अष्टकासु त्वहोरात्रमृत्वन्तासु च रात्रिषु ११९
नाधीयीताश्वमारूढो न वृक्षं न च हस्तिनम्
न नावं न खरं नोष्ट्रं नेरिणस्थो न यानगः १२०
न विवादे न कलहे न सेनायां न संगरे
न भुक्तमात्रे नाजीर्णे न वमित्वा न शुक्तके १२१
अतिथिं चाननुज्ञाप्य मारुते वाति वा भृशम्
रुधिरे च स्रुते गात्राच्छस्त्रेण च परिक्षते १२२

सामध्वनावृग्यजुषी नाधीयीत कदा चन
वेदस्याधीत्य वाप्यन्तमारण्यकमधीत्य च  १२३
ऋग्वेदो देवदैवत्यो यजुर्वेदस्तु मानुषः
सामवेदः स्मृतः पित्र्यस्तस्मात्तस्याशुचिर्ध्वनिः  १२४
एतद्विद्वन्तो विद्वांसस्त्रयीनिष्कर्षमन्वहम्
क्रमतः पूर्वमभ्यस्य पश्चाद्वेदमधीयते  १२५
पशुमण्डूकमार्जारश्वसर्पनकुलाखुभिः
अन्तरागमने विद्यादनध्यायमहर्निशम्  १२६
द्वावेव वर्जयेन्नित्यमनध्यायौ प्रयत्नतः
स्वाध्यायभूमिं चाशुद्धमात्मानं चाशुचिं द्विजः  १२७
अमावास्यामष्टमीं च पौर्णमासीं चतुर्दशीम्
ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नातको द्विजः  १२८
न स्नानमाचरेद्भुक्त्वा नातुरो न महानिशि
न वासोभिः सहाजस्रं नाविज्ञाते जलाशये  १२९
देवतानां गुरो राज्ञः स्नातकाचार्ययोस्तथा
नाक्रामेत्कामतश्छायां बभ्रुणो दीक्षितस्य च  १३०
मध्यंदिनेऽर्धरात्रे च श्राद्धं भुक्त्वा च सामिषम्
संध्ययोरुभयोश्चैव न सेवेत चतुष्पथम्  १३१
उद्वर्तनमपस्नानं विष्मूत्रे रक्तमेव च
श्लेश्मनिष्ठचूतवान्तानि नाधितिष्ठेत्तु कामतः  १३२
वैरिणं नोपसेवेत सहायं चैव वैरिणः
अधार्मिकं तस्करं च परस्यैव च योषितं  १३३
न हीदृशमनायुष्यं लोके किं चन विद्यते
यादृशं पुरुषस्येह परदारोपसेवनम्  १३४
क्षत्रियं चैव सर्पं च ब्राह्मणं च बहुश्रुतम्
नावमन्येत वै भूष्णुः कृशानपि कदा चन  १३५

एतत्त्रयं हि पुरुषं निर्दहेदवमानितम्
तस्मादेतत्त्रयं नित्यं नावमन्येत बुद्धिमान् १३६
नात्मानमवमन्येत पुर्वाभिरसमृद्धिभिः
ग्रा मृत्योः श्रियमन्विच्छेन्नैनां मन्येत दुर्लभाम् १३७
सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम्
प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः १३८
भद्रं भद्रमिति ब्रूयाद्भद्रमित्येव वा वदेत्
शुष्कवैरं विवादं च न कुर्यात्केन चित्सह १३९
नातिकल्यं नातिसायं नातिमध्यंदिने स्थिते
नाज्ञातेन समं गच्छेन्नैको न वृषलैः सह १४०
हीनाङ्गानतिरिक्ताङ्गान्विद्याहीनान्वयोऽधिकान्
रूपद्रविणहीनांश्च जातिहीनांश्च नाक्षिपेत् १४१
न स्पृशेत्पाणिनोच्छिष्टो विप्रो गोब्राह्मणानलाण्
न चापि पश्येदशुचिः सुस्थो ज्योतिर्गणान्दिवा १४२
स्पृष्ट्वैतानशुचिर्नित्यमद्भिः प्राणानुपस्पृशेत्
गात्राणि चैव सर्वाणि नाभिं पाणितलेन तु १४३
ग्रनातुरः स्वानि खानि न स्पृशेदनिमित्ततः
रोमाणि च रहस्यानि सर्वाण्येव विवर्जयेत् १४४
मङ्गलाचारयुक्तः स्यात्प्रयतात्मा जितेन्द्रियः
जपेच्च जुहुयाच्चैव नित्यमग्निमतन्द्रितः १४५
मङ्गलाचारयुक्तानां नित्यं च प्रयतात्मनाम्
जपतां जुह्वतां चैव विनिपातो न विद्यते १४६
वेदमेवाभ्यसेन्नित्यं यथाकालमतन्द्रितः
तं ह्यस्याहुः परं धर्ममुपधर्मोऽन्य उच्यते १४७
वेदाभ्यासेन सततं शौचेन तपसैव च
ग्रद्रोहेण च भूतानां जातिं स्मरति पौर्विकीम् १४८

पौर्विकीं संस्मरन्जातिं ब्रह्मैवाभ्यस्यते पुनः
ब्रह्माभ्यासेन चाजस्त्रमनन्तं सुखमश्नुते १४९
सावित्रान्शान्तिहोमांश्च कुर्यात्पर्वसु नित्यशः
पितॄंश्चैवाष्टकास्वर्चैन्नित्यमन्वष्टकासु च १५०
दूरादावसथान्मूत्रं दूरात्पादावसेचनम्
उच्छिष्तान्ननिषेकं च दूरादेव समाचरेत् १५१
मैत्रं प्रसाधनं स्नानं दन्तधावनमञ्जनम्
पूर्वाह्ण एव कुर्वीत देवतानां च पूजनम् १५२
दैवतान्यभिगच्छेत्तु धार्मिकांश्च द्विजोत्तमान्
ईश्वरं चैव रक्षार्थं गुरूनेव च पर्वसु १५३
अभिवादयेद्वृद्धांश्च दद्याच्चैवासनं स्वकम्
कृताञ्जलिरुपासीत गच्छतः पृष्ठतोऽन्वियात् १५४
श्रुतिस्मृत्युदितं सम्यङ्ग निबद्धं स्वेषु कर्मसु
धर्ममूलं निषेवेत सदाचारमतन्द्रितः १५५
आचाराल्लभते ह्यायुराचारादीप्सिताः प्रजाः
आचाराद्धनमक्षय्यमाचारो हन्त्यलक्षणम् १५६
दुराचारो हि पुरुषो लोके भवति निन्दितः
दुःखभागी च सततं व्याधितोऽल्पायुरेव च १५७
सर्वलक्षणहीनोऽपि यः सदाचारवान्नरः
श्रद्दधानोऽनसूयश्च शतं वर्षाणि जीवति १५८
यद्यत्परवशं कर्म तत्तद्यत्नेन वर्जयेत्
यद्यदात्मवशं तु स्यात्तत्तत्सेवेत यत्नतः १५९
सर्वं परवशं दुःखं सर्वमात्मवशं सुखम्
एतद्विद्यात्समासेन लक्षणं सुखदुःखयोः १६०
यत्कर्म कुर्वतोऽस्य स्यात्परितोषोऽन्तरात्मनः
तत्प्रयत्नेन कुर्वीत विपरीतं तु वर्जयेत् १६१

आचार्यं च प्रवक्तारं पितरं मातरं गुरुम्
न हिंस्याद्ब्राह्मणान्गाश्च सर्वांश्चैव तपस्विनः १६२
नास्तिक्यं वेदनिन्दां च देवतानां च कुत्सनम्
द्वेषं दम्भं च मानं च क्रोधं तैक्ष्ण्यं च वर्जयेत् १६३
परस्य दण्डं नोद्यच्छेत्क्रुद्धो नैनं निपातयेत्
अन्यत्र पुत्राच्छिष्याद्वा शिष्ट्यर्थं ताडयेत्तु तौ १६४
ब्राह्मणायावगुर्यैव द्विजातिर्वधकाम्यया
शतं वर्षाणि तामिस्रे नरके परिवर्तते १६५
ताडयित्वा तृणेनापि संरम्भान्मतिपूर्वकम्
एकविंशतीमाजातीः पापयोनिषु जायते १६६
अयुध्यमानस्योत्पाद्य ब्राह्मणस्यासृगङ्गतः
दुःखं सुमहदाप्नोति प्रेत्याप्राज्ञतया नरः १६७
शोणितं यावतः पांसून्संगृह्णाति महीतलात्
तावतोऽब्दानमुत्रान्यैः शोणितोत्पादकोऽद्यते १६८
न कदा चिद्द्विजे तस्माद्विद्वानवगुरेदपि
न ताडयेत्तृणेनापि न गात्रात्स्रावयेदसृक् १६९
अधार्मिको नरो यो हि यस्य चाप्यनृतं धनम्
हिंसारतश्च यो नित्यं नेहासौ सुखमेधते १७०
न सीदन्नपि धर्मेण मनोऽधर्मे निवेशयेत्
अधार्मिकानां पापानामाशु पश्यन्विपर्ययम् १७१
नाधर्मश्चरितो लोके सद्यः फलति गौरिव
शनैरावर्त्यमानस्तु कर्तुर्मूलानि कृन्तति १७२
यदि नात्मनि पुत्रेषु न चेत्पुत्रेषु नप्तृषु
न त्वेव तु कृतोऽधर्मः कर्तुर्भवति निष्फलः १७३
अधर्मेणैधते तावत्ततो भद्राणि पश्यति
ततः सपत्नान्जयति समूलस्तु विनश्यति १७४

सत्यधर्मार्यवृत्तेषु शौचे चैवारमेत्सदा
शिष्यांश्च शिष्याद्धर्मेण वाग्बाहूदरसंयतः   १७५
परित्यजेदर्थकामौ यौ स्यातां धर्मवर्जितौ
धर्मं चाप्यसुखोदर्कं लोकसंक्रुष्टमेव च   १७६
न पाणिपादचपलो न नेत्रचपलोऽनृजुः
न स्याद्वाक्चपलश्चैव न परद्रोहकर्मधीः   १७७
येनास्य पितरो याता येन याताः पितामहाः
तेन यायात्सतां मार्गं तेन गच्छन्न रिष्यति   १७८
ऋत्विक्पुरोहिताचार्यैर्मातुलातिथिसंश्रितैः
बालवृद्धातुरैर्वैद्यैर्ज्ञातिसंबन्धिबान्धवैः   १७९
मातापितृभ्यां जामीभिर्भ्रात्रा पुत्रेण भार्यया
दुहित्रा दासवर्गेण विवादं न समाचरेत्   १८०
एतैर्विवादान्संत्यज्य सर्वपापैः प्रमुच्यते
एतैर्जितैश्च जयति सर्वांलोकानिमान्गृही   १८१
आचार्यो ब्रह्मलोकेशः प्राजापत्ये पिता प्रभुः
अतिथिस्त्विन्द्रलोकेशो देवलोकस्य चर्त्विजः   १८२
जामयोऽप्सरसां लोके वैश्वदेवस्य बान्धवाः
संबन्धिनो ह्यपां लोके पृथिव्यां मातृमातुलौ   १८३
आकाशेशास्तु विज्ञेया बालवृद्धकृशातुराः
भ्राता ज्येष्ठः समः पित्रा भार्या पुत्रः स्वका तनुः   १८४
छाया स्वो दासवर्गश्च दुहिता कृपणं परम्
तस्मादेतैरधिक्षिप्तः सहेतासंज्वरः सदा   १८५
प्रतिग्रहसमर्थोऽपि प्रसङ्गं तत्र वर्जयेत्
प्रतिग्रहेण ह्यस्याशु ब्राह्मं तेजः प्रशाम्यति  १८६
न द्रव्याणामविज्ञाय विधिं धर्म्यं प्रतिग्रहे
प्राज्ञः प्रतिग्रहं कुर्यादवसीदन्नपि क्षुधा  १८७

हिरण्यं भूमिमश्वं गामन्नं वासस्तिलान्घृतम्
प्रतिगृह्णन्नविद्वांस्तु भस्मीभवति दारुवत् १८८
हिरण्यमायुरन्नं च भूर्गौश्चाप्योषतस्तनुम्
अश्वश्चक्षुस्त्वचं वासो घृतं तेजस्तिलाह् प्रजाः १८९
अतपास्त्वनधीयानः प्रतिग्रहरुचिर्द्विजः
अम्भस्यश्मप्लवेनेव सह तेनैव मज्जति १९०
तस्मादविद्वान्बिभियाद्यस्मात्तस्मात्प्रतिग्रहात्
स्वल्पकेनाप्यविद्वान्हि पङ्के गौरिव सीदति १९१
न वार्यपि प्रयच्छेत्तु बैडालव्रतिके द्विजे
न बकव्रतिके पापे नावेदविदि धर्मवित् १९२
त्रिष्वप्येतेषु दत्तं हि विधिनाप्यर्जितं धनम्
दातुर्भवत्यनर्थाय परत्रादातुरेव च १९३
यथा प्लवेनाउपलेन निमज्जत्युदके तरन्
तथा निमज्जतोऽधस्तादज्ञौ दातृप्रतीच्छकौ १९४
धर्मध्वजी सदा लुब्धश्छाद्मिको लोकदम्भकः
बैडालव्रतिको ज्ञेयो हिंस्रः सर्वाभिसंधकः १९५
अधोदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः
शठो मिथ्याविनीतश्च बकव्रतचरो द्विजः १९६
ये बकव्रतिनो विप्रा ये च मार्जारलिङ्गिनः
ते पतन्त्यन्धतामिस्रे तेन पापेन कर्मणा १९७
न धर्मस्यापदेशेन पापं कृत्वा व्रतं चरेत्
व्रतेन पापं प्रच्छाद्य कुर्वन्स्त्रीशूद्रदम्भनम् १९८
प्रेत्येह चेदृशा विप्रा गर्ह्यन्ते ब्रह्मवादिभिः
छद्मना चरितं यच्च व्रतं रक्षांसि गच्छति १९९
अलिङ्गी लिङ्गिवेषेण यो वृत्तिमुपजीवति
स लिङ्गिनां हरत्येनस्तिर्यग्योनौ च जायते २००

परकीयनिपानेषु न स्नायाद्धि कदा चन
निपानकर्तुः स्नात्वा तु दुष्कृतांशेन लिप्यते २०१
यानशय्यासनान्यस्य कूपोद्यानगृहाणि च
अदत्तान्युपयुञ्जान एनसः स्यात्तुरीयभाक् २०२
नदीषु देवखातेषु तडागेषु सरःसु च
स्नानं समाचरेन्नित्यं गर्तप्रस्रवणेषु च २०३
यमान्सेवेत सततं न नित्यं नियमान्बुधः
यमान्पतत्यकुर्वाणो नियमान्केवलान्भजन् २०४
नाश्रोत्रियतते यज्ञे ग्रामयाजिकृते तथा
स्त्रिया क्लीबेन च हुते भुञ्जीत ब्राह्मणः क्व चित् २०५
अश्लीकमेतत्साधूनां यत्र जुह्वत्यमी हविः
प्रतीपमेतद्देवानां तस्मात्तत्परिवर्जयेत् २०६
मत्तक्रुद्धातुराणां च न भुञ्जीत कदा चन
केशकीटावपन्नं च पदा स्पृष्टं च कामतः २०७
भ्रूणघ्नावेक्षितं चैव संस्पृष्टं चाप्युदक्यया
पतत्रिणावलीढं च शुना संस्पृष्टमेव च २०८
गवा चान्नमुपघ्रातं घुष्टान्नं च विशेषतः
गणान्नं गणिकान्नं च विदुषा च जुगुप्सितम् २०९
स्तेनगायनयोश्चान्नं तक्ष्णो वार्धुषिकस्य च
दीक्षितस्य कदर्यस्य बद्धस्य निगडस्य च २१०
अभिशस्तस्य षण्ढस्य पुंश्चल्या दाम्भिकस्य च
शुक्तं पर्युषितं चैव शूद्रस्योच्छिष्टमेव च २११
चिकित्सकस्य मृगयोः क्रूरस्योच्छिष्टभोजिनः
उग्रान्नं सूतिकान्नं च पर्याचान्तमनिर्दशम् २१२
अनर्चितं वृथामांसमवीरायाश्च योषितः
द्विषदन्नं नगर्यन्नं पतितान्नमवक्षुतम् २१३

पिशुनानृतिनोश्चान्नं क्रतुविक्रयिणस्तथा
शैलूषतुन्नवायान्नं कृतघ्नस्यान्नमेव च २१४
कर्मारस्य निषादस्य रङ्गावतारकस्य च
सुवर्णकर्तुर्वेणस्य शस्त्रविक्रयिणस्तथा २१५
श्ववतां शौण्डिकानां च चैलनिर्णेजकस्य च
रञ्जकस्य नृशंसस्य यस्य चोपपतिर्गृहे २१६
मृष्यन्ति ये चोपपतिं स्त्रीजितानां च सर्वशः
अनिर्दशं च प्रेतान्नमतुष्टिकरमेव च २१७
राजान्नं तेज आदत्ते शूद्रान्नं ब्रह्मवर्चसम्
आयुः सुवर्णकारान्नं यशश्चर्मावकर्तिनः २१८
कारुकान्नं प्रजां हन्ति बलं निर्णेजकस्य च
गणान्नं गणिकान्नं च लोकेभ्यः परिकृन्तति २१९
पूयं चिकित्सकस्यान्नं पुंश्चल्यास्त्वन्नमिन्द्रियम्
विष्ठा वार्धुषिकस्यान्नं शस्त्रविक्रयिणो मलम् २२०
य एतेऽन्ये त्वभोज्यान्नाः क्रमशः परिकीर्तिताः
तेषां त्वगस्थिरोमाणि वदन्त्यन्नं मनीषिणः २२१
भुक्त्वातोऽन्यतमस्यान्नममत्या क्षपणं त्र्यहम्
मत्या भुक्त्वाचरेत्कृच्छ्रं रेतोविण्मूत्रमेव च २२२
नाद्याच्छूद्रस्य पक्वान्नं विद्वानश्राद्धिनो द्विजः
आददीताममेवास्मादवृत्तावेकरात्रिकम् २२३
श्रोत्रियस्य कदर्यस्य वदान्यस्य च वार्धुषेः
मीमांसित्वोभयं देवाः सममन्नमकल्पयन् २२४
तान्प्रजापतिराहैत्य मा कृध्वं विषमं समम्
श्रद्धापूतं वदान्यस्य हतमश्रद्धयेतरत् २२५
श्रद्धयेष्टं च पूर्तं च नित्यं कुर्यादतन्द्रितः
श्रद्धाकृते ह्यक्षये ते भवतः स्वागतैर्धनैः २२६

दानधर्मं निषेवेत नित्यमैष्टिकपौर्तिकम्
परितुष्टेन भावेन पात्रमासाद्य शक्तितः २२७
यत्किं चिदपि दातव्यं याचितेनानसूयया
उत्पत्स्यते हि तत्पात्रं यत्तारयति सर्वतः २२८
वारिदस्तृप्तिमाप्नोति सुखमक्षय्यमन्नदः
तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमम् २२९
भूमिदो भूमिमाप्नोति दीर्घमायुर्हिरण्यदः
गृहदोऽग्र्याणि वेश्मानि रूप्यदो रूपमुत्तमम् २३०
वासोदश्चन्द्रसालोक्यमश्विसालोक्यमश्वदः
अनडुहः श्रियं पुष्टां गोदो ब्रध्नस्य विष्टपम् २३१
यानशय्याप्रदो भार्यामैश्वर्यमभयप्रदः
धान्यदः शाश्वतं सौख्यं ब्रह्मदो ब्रह्मसार्ष्टिताम् २३२
सर्वेषामेव दानानां ब्रह्मदानं विशिष्यते
वार्यन्नगोमहीवासस्तिलकाञ्चनसर्पिषाम् २३३
येन येन तु भावेन यद्यद्दानं प्रयच्छति
तत्तत्तेनैव भावेन प्राप्नोति प्रतिपूजितः २३४
योऽर्चितं प्रतिगृह्णाति ददात्यर्चितमेव वा
तावुभौ गच्छतः स्वर्गं नरकं तु विपर्यये २३५
न विस्मयेत तपसा वदेदिष्ट्वा च नानृतम्
नार्तोऽप्यपवदेद्विप्रान्न दत्त्वा परिकीर्तयेत् २३६
यज्ञोऽनृतेन क्षरति तपः क्षरति विस्मयात्
आयुर्विप्रापवादेन दानं च परिकीर्तनात् २३७
धर्मं शनैः संचिनुयाद्वल्मीकमिव पुत्तिकाः
परलोकसहायार्थं सर्वभूतान्यपीडयन् २३८
नामुत्र हि सहायार्थं पिता माता च तिष्ठतः
न पुत्रदारं न ज्ञातिर्धर्मस्तिष्ठति केवलः २३९

एकः प्रजायते जन्तुरेक एव प्रलीयते
एकोऽनुभुङ्क्ते सुकृतमेक एव च दुष्कृतम्  २४०
मृतं शरीरमुत्सृज्य काष्ठलोष्टसमं क्षितौ
विमुखा बान्धवा यान्ति धर्मस्तमनुगच्छति  २४१
तस्माद्धर्मं सहायार्थं नित्यं संचिनुयाच्छनैः
धर्मेण हि सहायेन तमस्तरति दुस्तरम्  २४२
धर्मप्रधानं पुरुषं तपसा हतकिल्बिषम्
परलोकं नयत्याशु भास्वन्तं खशरीरिणम्  २४३
उत्तमैरुत्तमैर्नित्यं संबन्धानाचरेत्सह
निनीषुः कुलमुत्कर्षमधमानधमांस्त्यजेत्  २४४
उत्तमानुत्तमानेव गच्छन्हीनांस्तु वर्जयन्
ब्राह्मणः श्रेष्ठतामेति प्रत्यवायेन शूद्रताम्  २४५
दृढकारी मृदुर्दान्तः क्रूराचारैरसंवसन्
अहिंस्रो दमदानाभ्यां जयेत्स्वर्गं तथाव्रतः  २४६
एधोदकं मूलफलमन्नमभ्युद्यतं च यत्
सर्वतः प्रतिगृह्णीयान्मध्वथाभयदक्षिणाम्  २४७
आहृताभ्युद्यतां भिक्षां पुरस्तादप्रचोदिताम्
मेने प्रजापतिर्ग्राह्यामपि दुष्कृतकर्मणः  २४८
नाश्नन्ति पितरस्तस्य दशवर्षाणि पञ्च च
न च हव्यं वहत्यग्निर्यस्तामभ्यवमन्यते  २४९
शय्यां गृहान्कुशान्गन्धानपः पुष्पं मणीन्दधि
धाना मत्स्यान्पयो मांसं शाकं चैव न निर्णुदेत्  २५०
गुरून्भृत्यांश्चोज्जिहीर्षन्नर्चिष्यन्देवतातिथीन्
सर्वतः प्रतिगृह्णीयान्न तु तृप्येत्स्वयं ततः  २५१
गुरुषु त्वभ्यतीतेषु विना वा तैर्गृहे वसन्
आत्मनो वृत्तिमन्विच्छन्गृह्णीयात्साधुतः सदा  २५२

आर्धिकः कुलमित्रं च गोपालो दासनापितौ
एते शूद्रेषु भोज्यान्ना याश्चात्मानं निवेदयेत्  २५३
यादृशोऽस्य भवेदात्मा यादृशं च चिकीर्षितम्
यथा चोपचरेदेनं तथात्मानं निवेदयेत्  २५४
योऽन्यथा सन्तमात्मानमन्यथा सत्सु भाषते
स पापकृत्तमो लोके स्तेन आत्मापहारकः  २५५
वाच्यर्था नियताः सर्वे वाग्मूला वाग्विनिःसृताः
तांस्तु यः स्तेनयेद्वाचं स सर्वस्तेयकृन्नरः  २५६
महर्षिपितृदेवानां गत्वानृण्यं यथाविधि
पुत्रे सर्वं समासज्य वसेन्माध्यस्थ्यमास्श्रितः  २५७
एकाकी चिन्तयेन्नित्यं विविक्ते हितमात्मनः
एकाकी चिन्तयानो हि परं श्रेयोऽधिगच्छति  २५८
एषोदिता गृहस्थस्य वृत्तिर्विप्रस्य शाश्वती
स्नातकव्रतकल्पश्च सत्त्ववृद्धिकरः शुभः  २५९
अनेन विप्रो वृत्तेन वर्तयन्वेदशास्त्रवित्
व्यपेतकल्मषो नित्यं ब्रह्मलोके महीयते  २६०

## पञ्चमोऽध्यायः

श्रुत्वैतानृषयो धर्मान्स्नातकस्य यथोदितान्
इदमूचुर्महात्मानमनलप्रभवं भृगुम्  १
एवं यथोक्तं विप्राणां स्वधर्ममनुतिष्ठताम्
कथं मृत्युः प्रभवति वेदशास्त्रविदां प्रभो  २
स तानुवाच धर्मात्मा महर्षीन्मानवो भृगुः
श्रूयतां येन दोषेण मृत्युर्विप्रान्जिघांसति  ३
अनभ्यासेन वेदानामाचारस्य च वर्जनात्
आलस्यादन्नदोषाच्च मृत्युर्विप्राञ् जिघांसति  ४

लशुनं गृञ्जनं चैव पलाण्डुं कवकानि च
अभक्ष्याणि द्विजातीनाममेध्यप्रभवानि च ५
लोहितान्वृक्षनिर्यासान्वृश्चनप्रभवांस्तथा
शेलुं गव्यं च पेयूषं प्रयत्नेन विवर्जयेत् ६
वृथा कृसरसंयावं पायसापूपमेव च
अनुपाकृतमांसानि देवान्नानि हवींषि च ७
अनिर्दशाया गोः क्षीरमौष्ट्रमैकशफं तथा
आविकं संधिनीक्षीरं विवत्सायाश्च गोः पयः ८
आरण्यानां च सर्वेषां मृगाणां माहिषं विना
स्त्रीक्षीरं चैव वर्ज्यानि सर्वशुक्तानि चैव हि ९
दधि भक्ष्यं च शुक्तेषु सर्वं च दधिसंभवम्
यानि चैवाभिषूयन्ते पुष्पमूलफलैः शुभैः १०
क्रव्यादाशकुनान्सर्वांन्तथा ग्रामनिवासिनः
अनिर्दिष्टांश्चैकशफांष् टिट्टिभं च विवर्जयेत् ११
कलविङ्कं प्लवं हंसं चक्राह्वं ग्रामकुक्कुटम्
सारसं रज्जुवालं च दात्यूहं शुकसारिके १२
प्रतुदाञ् जालपादांश्च कोयष्टिनखविष्किरान्
निमज्जतश्च मत्स्यादान्सौनं वल्लूरमेव च १३
बकं चैव बलाकां च काकोलं खञ्जरीटकम्
मत्स्यादान्विड्वराहांश्च मत्स्यानेव च सर्वशः १४
यो यस्य मांसमश्नाति स तन्मांसाद उच्यते
मत्स्यादः सर्वमांसादस्तस्मान्मत्स्यान्विवर्जयेत् १५
पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः
राजीवान्सिंहतुण्डाश्च सशल्कांश्चैव सर्वशः १६
न भक्षयेदेकचरानज्ञातांश्च मृगद्विजान्
भक्ष्येष्वपि समुद्दिष्टान्सर्वान्पञ्चनखांस्तथा १७

श्वाविधं शल्यकं गोधां खड्गकूर्मशशांस्तथा
भक्ष्यान्पञ्चनखेष्वाहुरनुष्ट्रांश्चैकतोदतह्  १८
छत्राकं विड्वराहं च लशुनं ग्रामकुक्कुटम्
पलाण्डुं गृञ्जनं चैव मत्या जग्ध्वा पतेद्द्विजः  १९
अमत्यैतानि षड् जग्ध्वा कृच्छ्रं सान्तपनं चरेत्
यतिचान्द्रायणं वापि शेषेषूपवसेदहः  २०
संवत्सरस्यैकमपि चरेत्कृच्छ्रं द्विजोत्तमः
अज्ञातभुक्तशुद्ध्यर्थं ज्ञातस्य तु विषेशतः  २१
यज्ञार्थं ब्राह्मणैर्वध्याः प्रशस्ता मृगपक्षिणः
भृत्यानां चैव वृत्त्यर्थमगस्त्यो ह्याचरत्पुरा  २२
बभूवुर्हि पुरोडाशा भक्ष्याणां मृगपक्षिणाम्
पुराणेष्वपि यज्ञेषु ब्रह्मक्षत्रसवेषु च  २३
यत्किं चित्स्नेहसंयुक्तं भक्ष्यं भोज्यमगर्हितम्
तत्पर्युषितमप्याद्यं हविःशेषं च यद्भवेत्  २४
चिरस्थितमपि त्वाद्यमस्नेहाक्तं द्विजातिभिः
यवगोधूमजं सर्वं पयसश्चैव विक्रिया  २५
एतदुक्तं द्विजातीनां भक्ष्याभक्ष्यमशेषतः
मांसस्यातः प्रवक्ष्यामि विधिं भक्षणवर्जने  २६
प्रोक्षितं भक्षयेन्मांसं ब्राह्मणानां च काम्यया
यथाविधि नियुक्तस्तु प्राणानामेव चात्यये  २७
प्राणस्यान्नमिदं सर्वं प्रजापतिरकल्पयत्
स्थावरं जङ्गमं चैव सर्वं प्राणस्य भोजनम्  २८
चराणामन्नमचरा दंष्ट्रिणामप्यदंष्ट्रिणः
अहस्ताश्च सहस्तानां शूराणां चैव भीरवः  २९
नात्ता दुष्यत्यदन्नाद्यान्प्राणिनोऽहन्यहन्यपि
धात्रैव सृष्टा ह्याद्याश्च प्राणिनोऽत्तार एव च  ३०

यज्ञाय जग्धिर्मांसस्येत्येष दैवो विधिः स्मृतः
अतोऽन्यथा प्रवृत्तिस्तु राक्षसो विधिरुच्यते ३१
क्रीत्वा स्वयं वाप्युत्पाद्य परोपकृतमेव वा
देवान्पितॄंश्चार्चयित्वा खादन्मांसं न दुष्यति ३२
नाद्यादविधिना मांसं विधिज्ञोऽनापदि द्विजः
जग्ध्वा ह्यविधिना मांसं प्रेतस्तैरद्यतेऽवशः ३३
न तादृशं भवत्येनो मृगहन्तुर्धनार्थिनः
यादृशं भवति प्रेत्य वृथामांसानि खादतः ३४
नियुक्तस्तु यथान्यायं यो मांसं नात्ति मानवः
स प्रेत्य पशुतां याति संभवानेकविंशतिम् ३५
असंस्कृतान्पशून्मन्त्रैर्नाद्याद्विप्रः कदा चन
मन्त्रैस्तु संस्कृतानद्याच्छाश्वतं विधिमास्थितः ३६
कुर्याद्घृतपशुं सङ्गे कुर्यात्पिष्टपशुं तथा
न त्वेव तु वृथा हन्तुं पशुमिच्छेत्कदा चन ३७
यावन्ति पशुरोमाणि तावत्कृत्वो ह मारणम्
वृथापशुघ्नः प्राप्नोति प्रेत्य जन्मनि जन्मनि ३८
यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयंभुवा
यज्ञोऽस्य भूत्यै सर्वस्य तस्माद्यज्ञे वधोऽवधः ३९
ओषध्यः पशवो वृक्षास्तिर्यञ्चः पक्षिणस्तथा
यज्ञार्थं निधनं प्राप्ताः प्राप्नुवन्त्युत्सृतीः पुनः ४०
मधुपर्के च यज्ञे च पितृदैवतकर्मणि
अत्रैव पशवो हिंस्या नान्यत्रेत्यब्रवीन्मनुः ४१
एष्वर्थेषु पशून्हिंसन्वेदतत्त्वार्थविद्द्विजः
आत्मानं च पशुं चैव गमयत्युत्तमं गतिम् ४२
गृहे गुरावरण्ये वा निवसन्नात्मवान्द्विजः
नावेदविहितां हिंसामापद्यपि समाचरेत् ४३

या वेदविहिता हिंसा नियतास्मिंश्चराचरे
अहिंसामेव तां विद्याद्वेदाद्धर्मो हि निर्बभौ ४४
योऽहिंसकानि भूतानि हिनस्त्यात्मसुखेच्छया
स जीवांश्च मृतश्चैव न क्व चित्सुखमेधते ४५
यो बन्धनवधक्लेशान्प्राणिनां न चिकीर्षति
स सर्वस्य हितप्रेप्सुः सुखमत्यन्तमश्नुते ४६
यद्ध्यायति यत्कुरुते रतिं बध्नाति यत्र च
तदवाप्नोत्ययत्नेन यो हिनस्ति न किं चन ४७
नाकृत्वा प्राणिनां हिंसां मांसमुत्पद्यते क्व चित्
न च प्राणिवधः स्वर्ग्यस्तस्मान्मांसं विवर्जयेत् ४८
समुत्पत्तिं च मांसस्य वधबन्धौ च देहिनाम्
प्रसमीक्ष्य निवर्तेत सर्वमांसस्य भक्षणात् ४९
न भक्षयति यो मांसं विधिं हित्वा पिशाचवत्
न लोके प्रियतां याति व्याधिभिश्च न पीड्यते ५०
अनुमन्ता विशसिता निहन्ता क्रयविक्रयी
संस्कर्ता चोपहर्ता च खादकश्चेति घातकाः ५१
स्वमांसं परमांसेन यो वर्धयितुमिच्छति
अनभ्यर्च्य पितॄन्देवांस्ततोऽन्यो नास्त्यपुण्यकृत् ५२
वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समाः
मांसानि च न खादेद्यस्तयोः पुण्यफलं समम् ५३
फलमूलाशनैर्मेध्यैर्मुन्यन्नानां च भोजनैः
न तत्फलमवाप्नोति यन्मांसपरिवर्जनात् ५४
मां स भक्षयितामुत्र यस्य मांसमिहाद्म्यहम्
एतन्मांसस्य मांसत्वं प्रवदन्ति मनीषिणः ५५
न मांसभक्षणे दोषो न मद्ये न च मैथुने
प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला ५६

प्रेतशुद्धिं प्रवक्ष्यामि द्रव्यशुद्धिं तथैव च
चतुर्णामपि वर्णानां यथावदनुपूर्वशः ५७
दन्तजातेऽनुजाते च कृतचूडे च संस्थिते
अशुद्धा बान्धवाः सर्वे सूतके च तथोच्यते ५८
दशाहं शावमाशौचं सपिण्डेषु विधीयते
अर्वाक् संचयनादस्थ्नां त्र्यहमेकाहमेव वा ५९
सपिण्डता तु पुरुषे सप्तमे विनिवर्तते
समानोदकभावस्तु जन्मनाम्नोरवेदने ६०
यथेदं शावमाशौचं सपिण्डेषु विधीयते
जननेऽप्येवमेव स्यान्निपुणं शुद्धिमिच्छताम् ६१
सर्वेषां शावमाशौचं मातापित्रोस्तु सूतकम्
सूतकं मातुरेव स्यादुपस्पृश्य पिता शुचिः ६२
निरस्य तु पुमान्शुक्रमुपस्पृस्यैव शुध्यति
बैजिकादभिसंबन्धादनुरुन्ध्यादघं त्र्यहम् ६३
अह्ना चैकेन रात्र्या च त्रिरात्रैरेव च त्रिभिः
शवस्पृशो विशुध्यन्ति त्र्यहादुदकदायिनः ६४
गुरोः प्रेतस्य शिष्यस्तु पितृमेधं समाचरन्
प्रेतहारैः समं तत्र दशरात्रेण शुध्यति ६५
रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुध्यति
रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला ६६
नृणामकृतचूडानां विशुद्धिर्नैशिकी स्मृता
निर्वृत्तचूडकानां तु त्रिरात्राच्छुद्धिरिष्यते ६७
ऊनद्विवार्षिकं प्रेतं निदध्युर्बान्धवा बहिः
अलंकृत्य शुचौ भूमावस्थिसंचयनादृते ६८
नास्य कार्योऽग्निसंस्कारो न च कार्योदकक्रिया
अरण्ये काष्ठवत्त्यक्त्वा क्षपेयुस्त्र्यहमेव तु ६९

नात्रिवर्षस्य कर्तव्या बान्धवैरुदकक्रिया
जातदन्तस्य वा कुर्युर्नाम्नि वापि कृते सति ७०
सब्रह्मचारिण्येकाहमतीते क्षपणं स्मृतम्
जन्मन्येकोदकानां तु त्रिरात्राच्छुद्धिरिष्यते ७१
स्त्रीणामसंस्कृतानां तु त्र्यहाच्छुध्यन्ति बान्धवाः
यथोक्तेनैव कल्पेन शुध्यन्ति तु सनाभयः ७२
अक्षारलवणान्नाः स्युर्निमज्जेयुश्च ते त्र्यहम्
मांसाशनं च नाश्नीयुः शयीरंश्च पृथक् क्षितौ ७३
संनिधावेष वै कल्पः शावाशौचस्य कीर्तितः
असंनिधावयं ज्ञेयो विधिः संबन्धिबान्धवैः ७४
विगतं तु विदेशस्थं शृणुयाद्यो ह्यनिर्दशम्
यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत् ७५
अतिक्रान्ते दशाहे च त्रिरात्रमशुचिर्भवेत्
संवत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुध्यति ७६
निर्दशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च
सवासा जलमाप्लुत्य शुद्धो भवति मानवः ७७
बाले देशान्तरस्थे च पृथक्पिण्डे च संस्थिते
सवासा जलमाप्लुत्य सद्य एव विशुध्यति ७८
अन्तर्दशाहे स्यातां चेत्पुनर्मरणजन्मनी
तावत्स्यादशुचिर्विप्रो यावत्तत्स्यादनिर्दशम् ७९
त्रिरात्रमाहुराशौचमाचार्ये संस्थिते सति
तस्य पुत्रे च पत्न्यां च दिवारात्रमिति स्थितिः ८०
श्रोत्रिये तूपसंपन्ने त्रिरात्रमशुचिर्भवेत्
मातुले पक्षिणीं रात्रिं शिष्यर्त्विग्बान्धवेषु च ८१
प्रेते राजनि सज्योतिर्यस्य स्याद्विषये स्थितः
अश्रोत्रिये त्वहः कृत्स्नमनूचाने तथा गुरौ ८२

शुद्ध्येद्विप्रो दशाहेन द्वादशाहेन भूमिपः
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुध्यति ८३
न वर्धयेदघाहानि प्रत्यूहेन्नाग्निषु क्रियाः
न च तत्कर्म कुर्वाणः सनाभ्योऽप्यशुचिर्भवेत् ८४
दिवाकीर्तिमुदक्यां च पतितं सूतिकां तथा
शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा स्नानेन शुध्यति ८५
आचम्य प्रयतो नित्यं जपेदशुचिदर्शने
सौरान्मन्त्रान्यथोत्साहं पावमानीश्च शक्तितः ८६
नारं स्पृष्ट्वास्थि सस्नेहं स्नात्वा विप्रो विशुध्यति
आचम्यैव तु निःस्नेहं गामालभ्यार्कमीक्ष्य वा ८७
आदिष्टी नोदकं कुर्यादा व्रतस्य समापनात्
समाप्ते तूदकं कृत्वा त्रिरात्रेणैव शुध्यति ८८
वृथासंकरजातानां प्रव्रज्यासु च तिष्ठताम्
आत्मनस्त्यागिनां चैव निवर्तेतोदकक्रिया ८९
पाषण्डमाश्रितानां च चरन्तीनां च कामतः
गर्भभर्तृद्रुहां चैव सुरापीनां च योषिताम् ९०
आचार्यं स्वमुपाध्यायं पितरं मातरं गुरुम्
निर्हृत्य तु व्रती प्रेतान्न व्रतेन वियुज्यते ९१
दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत्
पश्चिमोत्तरपूर्वैस्तु यथायोगं द्विजन्मनः ९२
न राज्ञामघदोषोऽस्ति व्रतिनां न च सत्त्रिणाम्
ऐन्द्रं स्थानमुपासीना ब्रह्मभूता हि ते सदा ९३
राज्ञो महात्मिके स्थाने सद्यःशौचं विधीयते
प्रजानां परिरक्षार्थमासनं चात्र कारणम् ९४
डिम्भाहवहतानां च विद्युता पार्थिवेन च
गोब्राह्मणस्य चैवार्थे यस्य चेच्छति पार्थिवः ९५

सोमाग्न्यर्कानिलेन्द्राणां वित्ताप्पत्योर्यमस्य च
अष्टानां लोकपालानां वपुर्धारयते नृपः ९६
लोकेशाधिष्ठितो राजा नास्याशौचं विधीयते
शौचाशौचं हि मर्त्यानां लोकेभ्यः प्रभवाप्ययौ ९७
उद्यतैराहवे शस्त्रैः क्षत्रधर्महतस्य च
सद्यः संतिष्ठते यज्ञस्तथाशौचमिति स्थितिः ९८
विप्रः शुध्यत्यपः स्पृष्ट्वा क्षत्रियो वाहनायुधम्
वैश्यः प्रतोदं रश्मीन्वा यष्टिं शूद्रः कृतक्रियः ९९
एतद्वोऽभिहितं शौचं सपिण्डेषु द्विजोत्तमाः
असपिण्डेषु सर्वेषु प्रेतशुद्धिं निबोधत १००
असपिण्डं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत्
विशुध्यति त्रिरात्रेण मातुराप्तांश्च बान्धवान् १०१
यद्यन्नमत्ति तेषां तु दशाहेनैव शुध्यति
अनदन्नन्नमह्नैव न चेत्तस्मिन्गृहे वसेत् १०२
अनुगम्येच्छया प्रेतं ज्ञातिमज्ञातिमेव च
स्नात्वा सचैलः स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यति १०३
न विप्रं स्वेषु तिष्ठत्सु मृतं शूद्रेण नाययेत्
अस्वर्ग्या ह्याहुतिः सा स्याच्छूद्रसंस्पर्शदूषिता १०४
ज्ञानं तपोऽग्निराहारो मृन्मनो वार्युपाञ्जनम्
वायुः कर्मार्ककालौ च शुद्धेः कर्तॄणि देहिनाम् १०५
सर्वेषामेव शौचानामर्थशौचं परं स्मृतं
योऽर्थे शुचिर्हि स शुचिर्न मृद्वारिशुचिः शुचिः १०६
क्षान्त्या शुध्यन्ति विद्वांसो दानेनाकार्यकारिणः
प्रच्छन्नपापा जप्येन तपसा वेदवित्तमाः १०७
मृत्तोयैः शुध्यते शोध्यं नदी वेगेन शुध्यति
रजसा स्त्री मनोदुष्टा संन्यासेन द्विजोत्तमाः १०८

अद्भिर्गात्राणि शुध्यन्ति मनः सत्येन शुध्यति
विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुध्यति १०९
एष शौचस्य वः प्रोक्तः शरीरस्य विनिर्णयः
नानाविधानां द्रव्याणां शुद्धेः शृणुत निर्णयम् ११०
तैजसानां मणीनां च सर्वस्याश्ममयस्य च
भस्मनाद्भिर्मृदा चैव शुद्धिरुक्ता मनीषिभिः १११
निर्लेपं काञ्चनं भाण्डमद्भिरेव विशुध्यति
अब्जमश्ममयं चैव राजतं चानुपस्कृतम् ११२
अपामग्नेश्च संयोगाद्धैमं रौप्यं च निर्बभौ
तस्मात्तयोः स्वयोन्यैव निर्णेको गुणवत्तरः ११३
ताम्रायस्कांस्यरैत्यानां त्रपुणः सीसकस्य च
शौचं यथार्हं कर्तव्यं क्षाराम्लोदकवारिभिः ११४
द्रवाणां चैव सर्वेषां शुद्धिरुत्पवनं स्मृतम्
प्रोक्षणं संहतानां च दारवाणां च तक्षणम् ११५
मार्जनं यज्ञपात्राणां पाणिना यज्ञकर्मणि
चमसानां ग्रहाणां च शुद्धिः प्रक्षालनेन तु ११६
चरूणां स्रुक्स्रुवाणां च शुद्धिरुष्णेन वारिणा
स्फ्यशूर्पशकटानां च मुसलोलूखलस्य च ११७
अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवाससाम्
प्रक्षालनेन त्वल्पानामद्भिः शौचं विधीयते ११८
चैलवच्चर्मणां शुद्धिर्वैदलानां तथैव च
शाकमूलफलानां च धान्यवच्छुद्धिरिष्यते ११९
कौशेयाविकयोरूषैः कुतपानामरिष्टकैः
श्रीफलैरंशुपट्टानां क्षौमाणां गौरसर्षपैः १२०
क्षौमवच्छङ्खशृङ्गाणामस्थिदन्तमयस्य च
शुद्धिर्विजानता कार्या गोमूत्रेणोदकेन वा १२१

प्रोक्षणात्तृणकाष्ठं च पलालं चैव शुध्यति
मार्जनोपाञ्जनैर्वेश्म पुनःपाकेन मृन्मयम् १२२
मद्यैर्मूत्रैः पुरीषैर्वा ष्ठीवनैह् पूयशोणितैः
संस्पृष्टं नैव शुद्ध्येत पुनःपाकेन मृन्मयम् १२३
संमार्जनोपाञ्जनेन सेकेनोल्लेखनेन च
गवां च परिवासेन भूमिः शुध्यति पञ्चभिः १२४
पक्षिजग्धं गवा घ्रातमवधूतमवक्षुतम्
दूषितं केशकीटैश्च मृत्प्रक्षेपेण शुध्यति १२५
यावन्नापैत्यमेध्याक्ताद्गन्धो लेपश्च तत्कृतः
तावन्मृद्वारि चादेयं सर्वासु द्रव्यशुद्धिषु १२६
त्रीणि देवाः पवित्राणि ब्राह्मणानामकल्पयन्
अदृष्टमद्भिर्निर्णिक्तं यच्च वाचा प्रशस्यते १२७
आपः शुद्धा भूमिगता वैतृष्ण्यं यासु गोर्भवेत्
अव्याप्ताश्चेदमेध्येन गन्धवर्णरसान्विताः १२८
नित्यं शुद्धः कारुहस्तः पण्ये यच्च प्रसारितम्
ब्रह्मचारिगतं भैक्ष्यं नित्यं मेध्यमिति स्थितिः १२९
नित्यमास्यं शुचि स्त्रीणां शकुनिः फलपातने
प्रस्रवे च शुचिर्वत्सः श्वा मृगग्रहणे शुचिः १३०
श्वभिर्हतस्य यन्मांसं शुचि तन्मनुरब्रवीत्
क्रव्याद्भिश्च हतस्यान्यैश्चण्डालाद्यैश्च दस्युभिः १३१
ऊर्ध्वं नाभेर्यानि खानि तानि मेध्यानि सर्वशः
यान्यधस्तान्यमेध्यानि देहाच्चैव मलाश्च्युताः १३२
मक्षिका विप्रुषश्छाया गौरश्वः सूर्यरश्मयः
रजो भूर्वायुरग्निश्च स्पर्शे मेध्यानि निर्दिशेत् १३३
विण्मूत्रोत्सर्गशुद्ध्यर्थं मृद्वार्यादेयमर्थवत्
दैहिकानां मलानां च शुद्धिषु द्वादशस्वपि १३४

वसा शुक्रमसृज्मज्ञा मूत्रविष्घ्राणकर्णविष्
श्लेश्म अश्रु दूषिका स्वेदो द्वादशैते नृणां मलाः १३५
एका लिङ्गे गुदे तिस्रस्तथैकत्र करे दश
उभयोः सप्त दातव्या मृदः शुद्धिमभीप्सता १३६
एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम्
त्रिगुणं स्याद्वनस्थानां यतीनां तु चतुर्गुणम् १३७
कृत्वा मूत्रं पुरीषं वा खान्याचान्त उपस्पृशेत्
वेदमध्येष्यमाणश्च अन्नमश्नंश्च सर्वदा १३८
त्रिराचामेदपः पूर्वं द्विः प्रमृज्यात्ततो मुखम्
शरीरं शौचमिच्छन्हि स्त्री शूद्रस्तु सकृत्सकृत् १३९
शूद्राणां मासिकं कार्यं वपनं न्यायवर्तिनाम्
वैश्यवच्छौचकल्पश्च द्विजोच्छिष्टं च भोजनम् १४०
नोच्छिष्टं कुर्वते मुख्या विप्रुषोऽङ्गं न यान्ति याः
न श्मश्रूणि गतान्यास्यं न दन्तान्तरधिष्ठितम् १४१
स्पृशन्ति बिन्दवः पादौ य आचामयतः परान्
भौमिकैस्ते समा ज्ञेया न तैराप्रयतो भवेत् १४२
उच्छिष्टेन तु संस्पृष्टो द्रव्यहस्तः कथं चन
अनिधायैव तद्द्रव्यमाचान्तः शुचितामियात् १४३
वान्तो विरिक्तः स्नात्वा तु घृतप्राशनमाचरेत्
आचामेदेव भुक्त्वान्नं स्नानं मैथुनिनः स्मृतम् १४४
सुप्त्वा क्षुत्वा च भुक्त्वा च निष्ठीव्योक्त्वानृतानि च
पीत्वापोऽध्येष्यमाणश्च आचामेत्प्रयतोऽपि सन् १४५
एषां शौचविधिः कृत्स्नो द्रव्यशुद्धिस्तथैव च
उक्तो वः सर्ववर्णानां स्त्रीणां धर्मान्निबोधत १४६
बालया वा युवत्या वा वृद्धया वापि योषिता
न स्वातन्त्र्येण कर्तव्यं किं चिद्कार्यं गृहेष्वपि १४७

बाल्ये पितुर्वशे तिष्ठेत्पाणिग्राहस्य यौवने
पुत्राणां भर्तरि प्रेते न भजेत्स्त्री स्वतन्त्रताम्  १४८
पित्रा भर्त्रा सुतैर्वापि नेच्छेद्विरहमात्मनः
एषां हि विरहेण स्त्री गर्ह्ये कुर्यादुभे कुले  १४९
सदा प्रहृष्टया भाव्यं गृहकार्ये च दक्षया
सुसंस्कृतोपस्करया व्यये चामुक्तहस्तया  १५०
यस्मै दद्यात्पिता त्वेनां भ्राता वानुमते पितुः
तं शुश्रूषेत जीवन्तं संस्थितं च न लङ्घयेत्  १५१
मङ्गलार्थं स्वस्त्ययनं यज्ञश्चासां प्रजापतेः
प्रयुज्यते विवाहे तु प्रदानं स्वाम्यकारणम्  १५२
अनृतावृतुकाले च मन्त्रसंस्कारकृत्पतिः
सुखस्य नित्यं दातेह परलोके च योषितः  १५३
विशीलः कामवृत्तो वा गुणैर्वा परिवर्जितः
उपचार्यः स्त्रिया साध्व्या सततं देववत्पतिः  १५४
नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणम्
पतिं शुश्रूषते येन तेन स्वर्गे महीयते  १५५
पाणिग्राहस्य साध्वी स्त्री जीवतो वा मृतस्य वा
पतिलोकमभीप्सन्ती नाचरेत्किं चिदप्रियम्  १५६
कामं तु क्षपयेद्देहं पुष्पमूलफलैः शुभैः
न तु नामापि गृह्णीयात्पत्यौ प्रेते परस्य तु  १५७
आसीता मरणात्क्षान्ता नियता ब्रह्मचारिणी
यो धर्म एकपत्नीनां काङ्क्षन्ती तमनुत्तमम्  १५८
अनेकानि सहस्राणि कुमारब्रह्मचारिणाम्
दिवं गतानि विप्राणामकृत्वा कुलसंततिम्  १५९
मृते भर्तरि साध्वी स्त्री ब्रह्मचर्ये व्यवस्थिता
स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः  १६०

अपत्यलोभाद्या तु स्त्री भर्तारमतिवर्तते
सेह निन्दामवाप्नोति परलोकाच्च हीयते १६१
नान्योत्पन्ना प्रजास्तीह न चाप्यन्यपरिग्रहे
न द्वितीयश्च साध्वीनां क्व चिद्भर्तोपदिश्यते १६२
पतिं हित्वापकृष्टं स्वमुत्कृष्टं या निषेवते
निन्द्यैव सा भवेल् लोके परपूर्वेति चोच्यते १६३
व्यभिचारात्तु भर्तुः स्त्री लोके प्राप्नोति निन्द्यताम्
शृगालयोनिं प्राप्नोति पापरोगैश्च पीड्यते १६४
पतिं या नाभिचरति मनोवाग्देहसंयुता
सा भर्तृलोकमाप्नोति सद्भिः साध्वीति चोच्यते १६५
अनेन नारी वृत्तेन मनोवाग्देहसंयता
इहाग्र्यां कीर्तिमाप्नोति पतिलोकं परत्र च १६६
एवं वृत्तां सवर्णां स्त्रीं द्विजातिः पूर्वमारिणीम्
दाहयेदग्निहोत्रेण यज्ञपात्रैश्च धर्मवित् १६७
भार्यायै पूर्वमारिण्यै दत्त्वाग्नीनन्त्यकर्मणि
पुनर्दारक्रियां कुर्यात्पुनराधानमेव च १६८
अनेन विधिना नित्यं पञ्चयज्ञान्न हापयेत्
द्वितीयमायुषो भागं कृतदारो गृहे वसेत् १६९

षष्ठोऽध्यायः

एवं गृहाश्रमे स्थित्वा विधिवत्स्नातको द्विजः
वने वसेत्तु नियतो यथावद्विजितेन्द्रियः १
गृहस्थस्तु यथा पश्येद्वलीपलितमात्मनः
अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत् २
संत्यज्य ग्राम्यमाहारं सर्वं चैव परिच्छदम्
पुत्रेषु भार्यां निक्षिप्य वनं गच्छेत्सहैव वा ३

अग्निहोत्रं समादाय गृह्यं चाग्निपरिच्छदम्
ग्रामादरण्यं निःसृत्य निवसेन्नियतेन्द्रियः ४
मुन्यन्नैर्विविधैर्मेध्यैः शाकमूलफलेन वा
एतानेव महायज्ञान्निर्वपेद्विधिपूर्वकम् ५
वसीत चर्म चीरं वा सायं स्नायात्प्रगे तथा
जटाश्च बिभृयान्नित्यं श्मश्रुलोमनखानि च ६
यद्भक्ष्यं स्याद्ततो दद्याद्बलिं भिक्षां च शक्तितः
अम्मूलफलभिक्षाभिरर्चयेदाश्रमागतान् ७
स्वाध्याये नित्ययुक्तः स्याद्दान्तो मैत्रः समाहितः
दाता नित्यमनादाता सर्वभूतानुकम्पकः ८
वैतानिकं च जुहुयादग्निहोत्रं यथाविधि
दर्शमस्कन्दयन्पर्व पौर्णमासं च योगतः ९
ऋक्षेष्ट्याग्रयणं चैव चातुर्मास्यानि चाहरेत्
तुरायणं च क्रमशो दक्षस्यायनमेव च १०
वासन्तशारदैर्मेध्यैर्मुन्यन्नैः स्वयमाहृतैः
पुरोडाशांश्चरूंश्चैव विधिवन्निर्वपेत्पृथक् ११
देवताभ्यस्तु तद्धुत्वा वन्यं मेध्यतरं हविः
शेषमात्मनि युञ्जीत लवणं च स्वयं कृतम् १२
स्थलजाउदकशाकानि पुष्पमूलफलानि च
मेध्यवृक्षोद्भवान्यद्यात्स्नेहांश्च फलसंभवान् १३
वर्जयेन्मधु मांसं च भौमानि कवकानि च
भूस्तृणं शिग्रुकं चैव श्लेश्मातकफलानि च १४
त्यजेदाश्वयुजे मासि मुन्यन्नं पूर्वसंचितम्
जीर्णानि चैव वासांसि शाकमूलफलानि च १५
न फालकृष्टमश्नीयादुत्सृष्टमपि केन चित्
न ग्रामजातान्यार्तोऽपि मूलाणि च फलानि च १६

अग्निपक्वाशनो वा स्यात्कालपक्वभुज् एव वा
अश्मकुट्टो भवेद्वापि दन्तोलूखलिकोऽपि वा १७
सद्यः प्रक्षालको वा स्यान्माससंचयिकोऽपि वा
षण्मासनिचयो वा स्यात्समानिचय एव वा १८
नक्तं चान्नं समश्नीयाद्दिवा वाहृत्य शक्तितः
चतुर्थकालिको वा स्यात्स्याद्वाप्यष्टमकालिकः १९
चान्द्रायणविधानैर्वा शुक्लकृष्णे च वर्तयेत्
पक्षान्तयोर्वाप्यश्नीयाद्यवागूं क्वथितां सकृत् २०
पुष्पमूलफलैर्वापि केवलैर्वर्तयेत्सदा
कालपक्वैः स्वयं शीर्णैर्वैखानसमते स्थितः २१
भूमौ विपरिवर्तेत तिष्ठेद्वा प्रपदैर्दिनम्
स्थानासनाभ्यां विहरेत्सवनेषूपयन्नपः २२
ग्रीष्मे पञ्चतपास्तु स्याद्वर्षास्वभ्रावकाशिकः
आर्द्रवासास्तु हेमन्ते क्रमशो वर्धयंस्तपः २३
उपस्पृशंस्त्रिषवणं पितॄन्देवांश्च तर्पयेत्
तपश्चरंश्चोग्रतरं शोषयेद्देहमात्मनः २४
अग्नीनात्मनि वैतानान्समारोप्य यथाविधि
अनग्निरनिकेतः स्यान्मुनिर्मूलफलाशनः २५
अप्रयत्नः सुखार्थेषु ब्रह्मचारी धराशयः
शरणेष्वममश्चैव वृक्षमूलनिकेतनः २६
तापसेष्वेव विप्रेषु यात्रिकं भैक्षमाहरेत्
गृहमेधिषु चान्येषु द्विजेषु वनवासिषु २७
ग्रामादाहृत्य वाश्नीयादष्टौ ग्रासान्वने वसन्
प्रतिगृह्य पुटेनैव पाणिना शकलेन वा २८
एताश्चान्याश्च सेवेत दीक्षा विप्रो वने वसन्
विविधाश्चाउपनिषदीरात्मसंसिद्धये श्रुतीः २९

ऋषिभिर्ब्राह्मणैश्चैव गृहस्थैरेव सेविताः
विद्यातपोविवृद्ध्यर्थं शरीरस्य च शुद्धये  ३०
अपराजितां वास्थाय व्रजेद्दिशमजिह्मगः
आ निपाताच्छरीरस्य युक्तो वार्यनिलाशनः  ३१
आसां महर्षिचर्याणां त्यक्त्वान्यतमया तनुम्
वीतशोकभयो विप्रो ब्रह्मलोके महीयते  ३२
वनेषु च विहृत्यैवं तृतीयं भागमायुषः
चतुर्थमायुषो भागं त्यक्त्वा सङ्गान्परिव्रजेत्  ३३
आश्रमादाश्रमं गत्वा हुतहोमो जितेन्द्रियः
भिक्षाबलिपरिश्रान्तः प्रव्रजन्प्रेत्य वर्धते  ३४
ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्
अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः  ३५
अधीत्य विधिवद्वेदान्पुत्रांश्चोत्पाद्य धर्मतः
इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत्  ३६
अनधीत्य द्विजो वेदाननुत्पाद्य तथा सुतान्
अनिष्ट्वा चैव यज्ञैश्च मोक्षमिच्छन्व्रजत्यधः  ३७
प्राजापत्यं निरुप्येष्टिं सर्ववेदसदक्षिणाम्
आत्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजेद्गृहात्  ३८
यो दत्त्वा सर्वभूतेभ्यः प्रव्रजत्यभयं गृहात्
तस्य तेजोमया लोका भवन्ति ब्रह्मवादिनः  ३९
यस्मादण्वपि भूतानां द्विजान्नोत्पद्यते भयम्
तस्य देहाद्विमुक्तस्य भयं नास्ति कुतश्चन  ४०
अगारादभिनिष्क्रान्तः पवित्रोपचितो मुनिः
समुपोढेषु कामेषु निरपेक्षः परिव्रजेत्  ४१
एक एव चरेन्नित्यं सिद्ध्यर्थमसहायवान्
सिद्धिमेकस्य संपश्यन्न जहाति न हीयते  ४२

अनग्निरनिकेतः स्याद्ग्राममन्नार्थमाश्रयेत्
उपेक्षकोऽसंकुसुको मुनिर्भावसमाहितः ४३
कपालं वृक्षमूलानि कुचेलमसहायता
समता चैव सर्वस्मिन्नेतन्मुक्तस्य लक्षणम् ४४
नाभिनन्देत मरणं नाभिनन्देत जीवितम्
कालमेव प्रतीक्षेत निर्वेशं भृतको यथा ४५
दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत्
सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत् ४६
अतिवादांस्तितिक्षेत नावमन्येत कं चन
न चेमं देहमाश्रित्य वैरं कुर्वीत केन चित् ४७
क्रुद्ध्यन्तं न प्रतिक्रुध्येदाक्रुष्टः कुशलं वदेत्
सप्तद्वारावकीर्णां च न वाचमनृतां वदेत् ४८
अध्यात्मरतिरासीनो निरपेक्षो निरामिषः
आत्मनैव सहायेन सुखार्थी विचरेदिह ४९
न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया
नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हि चित् ५०
न तापसैर्ब्राह्मणैर्वा वयोभिरपि वा श्वभिः
आकीर्णं भिक्षुकैर्वान्यैरगारमुपसंव्रजेत् ५१
क्लृप्तकेशनखश्मश्रुः पात्री दण्डी कुसुम्भवान्
विचरेन्नियतो नित्यं सर्वभूतान्यपीडयन् ५२
अतैजसानि पात्राणि तस्य स्युर्निर्व्रणानि च
तेषामद्भिः स्मृतं शौचं चमसानामिवाध्वरे ५३
अलाबुं दारुपात्रं च मृण्मयं वैदलं तथा
एताणि यतिपात्राणि मनुः स्वायंभुवोऽब्रवीत् ५४
एककालं चरेद्भैक्षं न प्रसज्जेत विस्तरे
भैक्षे प्रसक्तो हि यतिर्विषयेष्वपि सज्जति ५५

विधूमे सन्नमुसले व्यङ्गारे भुक्तवज्ञने
वृत्ते शरावसंपाते भिक्षां नित्यं यतिश्चरेत् ५६
अलाभे न विषदी स्याल्लाभे चैव न हर्षयेत्
प्राणयात्रिकमात्रः स्यान्मात्रासङ्गाद्विनिर्गतः ५७
अभिपूजितलाभांस्तु जुगुप्सेतैव सर्वशः
अभिपूजितलाभैश्च यतिर्मुक्तोऽपि बध्यते ५८
अल्पान्नाभ्यवहारेण रहःस्थानासनेन च
ह्रियमाणानि विषयैरिन्द्रियाणि निवर्तयेत् ५९
इन्द्रियाणां निरोधेन रागद्वेशक्षयेण च
अहिंसया च भूतानाममृतत्वाय कल्पते ६०
अवेक्षेत गतीर्नृणां कर्मदोषसमुद्भवाः
निरये चैव पतनं यातनाश्च यमक्षये ६१
विप्रयोगं प्रियैश्चैव संयोगं च तथाप्रियैः
जरया चाभिभवनं व्याधिभिश्चोपपीडनं ६२
देहादुत्क्रमणं चाष्मात्पुनर्गर्भे च संभवम्
योनिकोटिसहस्रेषु सृतीश्चास्यान्तरात्मनः ६३
अधर्मप्रभवं चैव दुःखयोगं शरीरिणाम्
धर्मार्थप्रभवं चैव सुखसंयोगमक्षयम् ६४
सूक्ष्मतां चान्ववेक्षेत योगेन परमात्मनः
देहेषु च समुत्पत्तिमुत्तमेष्वधमेषु च ६५
दूषितोऽपि चरेद्धर्मं यत्र तत्राश्रमे रतः
समः सर्वेषु भूतेषु न लिङ्गं धर्मकारणम् ६६
फलं कतकवृक्षस्य यद्यप्यम्बुप्रसादकम्
न नामग्रहणादेव तस्य वारि प्रसीदति ६७
संरक्षणार्थं जन्तूनां रात्रावहनि वा सदा
शरीरस्यात्यये चैव समीक्ष्य वसुधां चरेत् ६८

अह्ना रात्र्या च याञ् जन्तून्हिनस्त्यज्ञानतो यतिः
तेषां स्नात्वा विशुद्ध्यर्थं प्राणायामान्षड् आचरेत् ६९
प्राणायामा ब्राह्मणस्य त्रयोऽपि विधिवत्कृताः
व्याहृतिप्रणवैर्युक्ता विज्ञेयं परमं तपः ७०
दह्यन्ते ध्मायमानानां धातूनां हि यथा मलाः
तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात् ७१
प्राणायमैर्दहेद्दोषान्धारणाभिश्च किल्बिषम्
प्रत्याहारेण संसर्गान्ध्यानेनानीश्वरान्गुणान् ७२
उच्चावचेषु भूतेषु दुर्ज्ञेयामकृतात्मभिः
ध्यानयोगेन संपश्येद्गतिमस्यान्तरात्मनः ७३
सम्यग्दर्शनसंपन्नः कर्मभिर्न निबध्यते
दर्शनेन विहीनस्तु संसारं प्रतिपद्यते ७४
अहिंसयेन्द्रियासङ्गैर्वैदिकैश्चैव कर्मभिः
तपसश्चरणैश्चोग्रैः साधयन्तीह तत्पदम् ७५
अस्थिस्थूणं स्नायुयुतं मांसशोणितलेपनम्
चर्मावनद्धं दुर्गन्धि पूर्णं मूत्रपुरीषयोः ७६
जराशोकसमाविष्टं रोगायतनमातुरम्
रजस्वलमनित्यं च भूतावासमिमं त्यजेत् ७७
नदीकूलं यथा वृक्षो वृक्षं वा शकुनिर्यथा
तथा त्यजन्निमं देहं कृच्छ्राद्ग्राहाद्विमुच्यते ७८
प्रियेषु स्वेषु सुकृतमप्रियेषु च दुष्कृतम्
विसृज्य ध्यानयोगेन ब्रह्माभ्येति सनातनम् ७९
यदा भावेन भवति सर्वभावेषु निःस्पृहः
तदा सुखमवाप्नोति प्रेत्य चेह च शाश्वतम् ८०
अनेन विधिना सर्वांस्त्यक्त्वा सङ्गान्शनैः शनैः
सर्वद्वन्द्वविनिर्मुक्तो ब्रह्मण्येवावतिष्ठते ८१

ध्यानिकं सर्वमेवैतद्यदेतदभिशब्दितम्
न ह्यनध्यात्मवित्कश्चित्क्रियाफलमुपाश्नुते ८२
अधियज्ञं ब्रह्म जपेदाधिदैविकमेव च
आध्यात्मिकं च सततं वेदान्ताभिहितं च यत् ८३
इदं शरणमज्ञानामिदमेव विजानताम्
इदमन्विच्छतां स्वर्गमिदमानन्त्यमिच्छताम् ८४
अनेन क्रमयोगेन परिव्रजति यो द्विजः
स विधूयेह पाप्मानं परं ब्रह्माधिगच्छति ८५
एष धर्मोऽनुशिष्टो वो यतीनां नियतात्मनाम्
वेदसंन्यासिकानां तु कर्मयोगं निबोधत ८६
ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा
एते गृहस्थप्रभवाश्चत्वारः पृथगाश्रमाः ८७
सर्वेऽपि क्रमशस्त्वेते यथाशास्त्रं निषेविताः
यथोक्तकारिणं विप्रं नयन्ति परमां गतिम् ८८
सर्वेषामपि चैतेषां वेदस्मृतिविधानतः
गृहस्थ उच्यते श्रेष्ठः स त्रीनेतान्बिभर्ति हि ८९
यथा नदीनदाः सर्वे सागरे यान्ति संस्थितिम्
तथैवाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम् ९०
चतुर्भिरपि चैवैतैर्नित्यमाश्रमिभिर्द्विजैः
दशलक्षणको धर्मः सेवितव्यः प्रयत्नतः ९१
धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ९२
दश लक्षणानि धर्मस्य ये विप्राः समधीयते
अधीत्य चानुवर्तन्ते ते यान्ति परमां गतिम् ९३
दशलक्षणकं धर्ममनुतिष्ठन्समाहितः
वेदान्तं विधिवच्छ्रुत्वा संन्यसेदनृणो द्विजः ९४

संन्यस्य सर्वकर्माणि कर्मदोषानपानुदन्
नियतो वेदमभ्यस्य पुत्रैश्वर्ये सुखं वसेत् ९५
एवं संन्यस्य कर्माणि स्वकार्यपरमोऽस्पृहः
संन्यासेनापहत्यैनः प्राप्नोति परमं गतिम् ९६
एष वोऽभिहितो धर्मो ब्राह्मणस्य चतुर्विधः
पुण्योऽक्षयफलः प्रेत्य राज्ञां धर्मं निबोधत ९७

## सप्तमोऽध्यायः

राजधर्मान्प्रवक्ष्यामि यथावृत्तो भवेन्नृपः
संभवश्च यथा तस्य सिद्धिश्च परमा यथा १
ब्राह्मं प्राप्तेन संस्कारं क्षत्रियेण यथाविधि
सर्वस्यास्य यथान्यायं कर्तव्यं परिरक्षणम् २
अराजके हि लोकेऽस्मिन्सर्वतो विद्रुतो भयात्
रक्षार्थमस्य सर्वस्य राजानमसृजत्प्रभुः ३
इन्द्रानिलयमार्काणामग्नेश्च वरुणस्य च
चन्द्रवित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः ४
यस्मादेषां सुरेन्द्राणां मात्राभ्यो निर्मितो नृपः
तस्मादभिभवत्येष सर्वभूतानि तेजसा ५
तपत्यादित्यवच्चैष चक्षूंषि च मनांसि च
न चैनं भुवि शक्नोति कश्चिदप्यभिवीक्षितुम् ६
सोऽग्निर्भवति वायुश्च सोऽर्कः सोमः स धर्मराट्
स कुबेरः स वरुणः स महेन्द्रः प्रभावतः ७
बालोऽपि नावमान्तव्यो मनुष्य इति भूमिपः
महती देवता ह्येषा नररूपेण तिष्ठति ८
एकमेव दहत्यग्निर्नरं दुरुपसर्पिणम्
कुलं दहति राजाग्निः सपशुद्रव्यसंचयम् ९

कार्यं सोऽवेद्य शक्तिं च देशकालौ च तत्त्वतः
कुरुते धर्मसिद्ध्यर्थं विश्वरूपं पुनः पुनः १०
यस्य प्रसादे पद्मा श्रीर्विजयश्च पराक्रमे
मृत्युश्च वसति क्रोधे सर्वतेजोमयो हि सः ११
तं यस्तु द्वेष्टि संमोहात्स विनश्यत्यसंशयम्
तस्य ह्याशु विनाशाय राजा प्रकुरुते मनः १२
तस्माद्धर्मं यमिष्टेषु स व्यवस्येन्नराधिपः
अनिष्टं चाप्यनिष्टेषु तं धर्मं न विचालयेत् १३
तस्यार्थे सर्वभूतानां गोप्तारं धर्ममात्मजम्
ब्रह्मतेजोमयं दण्डमसृजत्पूर्वमीश्वरः १४
तस्य सर्वाणि भूतानि स्थावराणि चराणि च
भयाद्भोगाय कल्पन्ते स्वधर्मान्न चलन्ति च १५
तं देशकालौ शक्तिं च विद्यां चावेक्ष्य तत्त्वतः
यथार्हतः संप्रणयेन्नरेष्वन्यायवर्तिषु १६
स राजा पुरुषो दण्डः स नेता शासिता च सः
चतुर्णामाश्रमाणां च धर्मस्य प्रतिभूः स्मृतः १७
दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति
दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः १८
समीक्ष्य स धृतः सम्यक् सर्वा रञ्जयति प्रजाः
असमीक्ष्य प्रणीतस्तु विनाशयति सर्वतः १९
यदि न प्रणयेद्राजा दण्डं दण्ड्येष्वतन्द्रितः
शूले मत्स्यानिवापक्ष्यन्दुर्बलान्बलवत्तराः २०
अद्यात्काकः पुरोडाशं श्वा च लिह्याद्धविस्तथा
स्वाम्यं च न स्यात्कस्मिंश्चित्प्रवर्तेताधरोत्तरम् २१
सर्वो दण्डजितो लोको दुर्लभो हि शुचिर्नरः
दण्डस्य हि भयात्सर्वं जगद्भोगाय कल्पते २२

देवदानवगन्धर्वा रक्षांसि पतगोरगाः
तेऽपि भोगाय कल्पन्ते दण्डेनैव निपीडिताः २३
दुष्येयुः सर्ववर्णाश्च भिद्येरन्सर्वसेतवः
सर्वलोकप्रकोपश्च भवेद्दण्डस्य विभ्रमात् २४
यत्र श्यामो लोहिताक्षो दण्डश्चरति पापहा
प्रजास्तत्र न मुह्यन्ति नेता चेत्साधु पश्यति २५
तस्याहुः संप्रणेतारं राजानं सत्यवादिनम्
समीक्ष्यकारिणं प्राज्ञं धर्मकामार्थकोविदम् २६
तं राजा प्रणयन्सम्यक् त्रिवर्गेणाभिवर्धते
कामात्मा विषमः क्षुद्रो दण्डेनैव निहन्यते २७
दण्डो हि सुमहत्तेजो दुर्धरश्चाकृतात्मभिः
धर्माद्विचलितं हन्ति नृपमेव सबान्धवम् २८
ततो दुर्गं च राष्ट्रं च लोकं च सचराचरम्
अन्तरिक्षगतांश्चैव मुनीन्देवांश्च पीडयेत् २९
सोऽसहायेन मूढेन लुब्धेनाकृतबुद्धिना
न शक्यो न्यायतो नेतुं सक्तेन विषयेषु च ३०
शुचिना सत्यसंधेन यथाशास्त्रानुसारिणा
प्रणेतुं शक्यते दण्डः सुसहायेन धीमता ३१
स्वराष्ट्रे न्यायवृत्तः स्याद्भृशदण्डश्च शत्रुषु
सुहृत्स्वजिह्मः स्निग्धेषु ब्राह्मणेषु क्षमान्वितः ३२
एवंवृत्तस्य नृपतेः शिलोञ्छेनापि जीवतः
विस्तीर्यते यशो लोके तैलबिन्दुरिवाम्भसि ३३
अतस्तु विपरीतस्य नृपतेरजितात्मनः
संक्षिप्यते यशो लोके घृतबिन्दुरिवाम्भसि ३४
स्वे स्वे धर्मे निविष्टानां सर्वेषामनुपूर्वशः
वर्णानामाश्रमाणां च राजा सृष्टोऽभिरक्षिता ३५

तेन यद्यत्सभृत्येन कर्तव्यं रक्षता प्रजाः
तत्तद्वोऽहं प्रवक्ष्यामि यथावदनुपूर्वशः ३६
ब्राह्मणान्पर्युपासीत प्रातरुत्थाय पार्थिवः
त्रैविद्यवृद्धान्विदुषस्तिष्ठेत्तेषां च शासने ३७
वृद्धांश्च नित्यं सेवेत विप्रान्वेदविदः शुचीन्
वृद्धसेवी हि सततं रक्षोभिरपि पूज्यते ३८
तेभ्योऽधिगच्छेद्विनयं विनीतात्मापि नित्यशः
विनीतात्मा हि नृपतिर्न विनश्यति कर्हि चित् ३९
बहवोऽविनयान्नष्टा राजानः सपरिच्छदाः
वनस्था अपि राज्यानि विनयात्प्रतिपेदिरे ४०
वेनो विनष्टोऽविनयान्नहुषश्चैव पार्थिवः
सुदाः पैजवनश्चैव सुमुखो निमिरेव च ४१
पृथुस्तु विनयाद्राज्यं प्राप्तवान्मनुरेव च
कुबेरश्च धनैश्वर्यं ब्राह्मण्यं चैव गाधिजः ४२
त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिं च शाश्वतीम्
आन्वीक्षिकीं चात्मविद्यां वार्तारम्भांश्च लोकतः ४३
इन्द्रियाणां जये योगं समातिष्ठेद्दिवानिशम्
जितेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः ४४
दश कामसमुत्थानि तथाष्टौ क्रोधजानि च
व्यसनानि दुरन्तानि प्रयत्नेन विवर्जयेत् ४५
कामजेषु प्रसक्तो हि व्यसनेषु महीपतिः
वियुज्यतेऽर्थधर्माभ्यां क्रोधजेष्वात्मनैव तु ४६
मृगयाक्षो दिवास्वप्नः परिवादः स्त्रियो मदः
तौर्यत्रिकं वृथाट्या च कामजो दशको गणः ४७
पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम्
वाग्दण्डजं च पारुष्यं क्रोधजोऽपि गणोऽष्टकः ४८

द्वयोरप्येतयोर्मूलं यं सर्वे कवयो विदुः
तं यत्नेन जयेल्लोभं तज्जावेतावुभौ गणौ ४९
पानमक्षाः स्त्रियश्चैव मृगया च यथाक्रमम्
एतत्कष्टतमं विद्याच्चतुष्कं कामजे गणे ५०
दण्डस्य पातनं चैव वाक्पारुष्यार्थदूषणे
क्रोधजेऽपि गणे विद्यात्कष्टमेतत्त्रिकं सदा ५१
सप्तकस्यास्य वर्गस्य सर्वत्रैवानुषङ्गिणः
पूर्वं पूर्वं गुरुतरं विद्याद्व्यसनमात्मवान् ५२
व्यसनस्य च मृत्योश्च व्यसनं कष्टमुच्यते
व्यसन्यधोऽधो व्रजति स्वर्यात्यव्यसनी मृतः ५३
मौलान्शास्त्रविदः शूरांलब्धलक्षान्कुलोद्भवान्
सचिवान्सप्त चाष्टौ वा प्रकुर्वीत परीक्षितान् ५४
अपि यत्सुकरं कर्म तदप्येकेन दुष्करम्
विशेषतोऽसहायेन किं तु राज्यं महोदयम् ५५
तैः सार्धं चिन्तयेन्नित्यं सामान्यं संधिविग्रहम्
स्थानं समुदयं गुप्तिं लब्धप्रशमनानि च ५६
तेषां स्वं स्वमभिप्रायमुपलभ्य पृथक् पृथक्
समस्तानां च कार्येषु विदध्याद्धितमात्मनः ५७
सर्वेषां तु विशिष्टेन ब्राह्मणेन विपश्चिता
मन्त्रयेत्परमं मन्त्रं राजा षाड्गुण्यसंयुतम् ५८
नित्यं तस्मिन्समाश्वस्तः सर्वकार्याणि निःक्षिपेत्
तेन सार्धं विनिश्चित्य ततः कर्म समारभेत् ५९
अन्यानपि प्रकुर्वीत शुचीन्प्राज्ञानवस्थितान्
सम्यगर्थसमाहर्तॄनमात्यान्सुपरीक्षितान् ६०
निर्वर्तेतास्य यावद्भिरितिकर्तव्यता नृभिः
तावतोऽतन्द्रितान्दक्षान्प्रकुर्वीत विचक्षणान् ६१

तेषामर्थे नियुञ्जीत शूरान्दक्षान्कुलोद्गतान्
शुचीनाकरकर्मान्ते भीरूनन्तर्निवेशने ६२
दूतं चैव प्रकुर्वीत सर्वशास्त्रविशारदम्
इङ्गिताकारचेष्टज्ञं शुचिं दक्षं कुलोद्गतम् ६३
अनुरक्तः शुचिर्दक्षः स्मृतिमान्देशकालवित्
वपुष्मान्वीतभीर्वाग्मी दूतो राज्ञः प्रशस्यते ६४
अमात्ये दण्ड आयत्तो दण्डे वैनयिकी क्रिया
नृपतौ कोशराष्ट्रे च दूते संधिविपर्ययौ ६५
दूत एव हि संधत्ते भिनत्त्येव च संहतान्
दूतस्तत्कुरुते कर्म भिद्यन्ते येन मानवः ६६
स विद्यादस्य कृत्येषु निर्गूढेङ्गितचेष्टितैः
आकारमिङ्गितं चेष्टां भृत्येषु च चिकीर्षितम् ६७
बुद्ध्वा च सर्वं तत्त्वेन परराजचिकीर्षितम्
तथा प्रयत्नमातिष्ठेद्यथात्मानं न पीडयेत् ६८
जाङ्गलं सस्यसंपन्नमार्यप्रायमनाविलम्
रम्यमानतसामन्तं स्वाजीव्यं देशमावसेत् ६९
धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव वा
नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत्पुरम् ७०
सर्वेण तु प्रयत्नेन गिरिदुर्गं समाश्रयेत्
एषां हि बाहुगुण्येन गिरिदुर्गं विशिष्यते ७१
त्रीण्याद्यान्याश्रितास्त्वेषां मृगगर्ताश्रयाप्चराः
त्रीण्युत्तराणि क्रमशः प्लवंगमनरामराः ७२
यथा दुर्गाश्रितानेतान्नोपहिंसन्ति शत्रवः
तथारयो न हिंसन्ति नृपं दुर्गसमाश्रितम् ७३
एकः शतं योधयति प्राकारस्थो धनुर्धरः
शतं दशसहस्राणि तस्माद्दुर्गं विधीयते ७४

तत्स्यादायुधसंपन्नं धनधान्येन वाहनैः
ब्राह्मणैः शिल्पिभिर्यन्त्रैर्यवसेनोदकेन च ७५
तस्य मध्ये सुपर्याप्तं कारयेद्गृहमात्मनः
गुप्तं सर्वर्तुकं शुभ्रं जलवृक्षसमन्वितम् ७६
तदध्यास्योद्वहेद्भार्यां सवर्णां लक्षणान्विताम्
कुले महति संभूतां हृद्यां रूपगुणान्वीताम् ७७
पुरोहितं च कुर्वीत वृणुयादेव चर्त्विजः
तेऽस्य गृह्याणि कर्माणि कुर्युर्वैतानिकानि च ७८
यजेत राजा क्रतुभिर्विविधैराप्तदक्षिणैः
धर्मार्थं चैव विप्रेभ्यो दद्याद्भोगान्धनानि च ७९
सांवत्सरिकमाप्तैश्च राष्ट्रादाहारयेद्बलिम्
स्याच्चाम्नायपरो लोके वर्तेत पितृवन्नृषु ८०
अध्यक्षान्विविधान्कुर्यात्तत्र तत्र विपश्चितः
तेऽस्य सर्वाण्यवेक्षेरन्नृणां कार्याणि कुर्वताम् ८१
आवृत्तानां गुरुकुलाद्विप्राणां पूजको भवेत्
नृपाणामक्षयो ह्येष निधिर्ब्राह्मोऽभिधीयते ८२
न तं स्तेना न चामित्रा हरन्ति न च नश्यति
तस्माद्राज्ञा निधातव्यो ब्राह्मणेष्वक्षयो निधिः ८३
न स्कन्दते न व्यथते न विनश्यति कर्हि चित्
वरिष्ठमग्निहोत्रेभ्यो ब्राह्मणस्य मुखे हुतम् ८४
सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे
प्राधीते शतसाहस्रमनन्तं वेदपारगे ८५
पात्रस्य हि विशेषेण श्रद्दधानतयैव च
अल्पं वा बहु वा प्रेत्य दानस्य फलमश्नुते ८६
देशकालविधानेन द्रव्यं श्रद्धासमन्वितम्
पात्रे प्रदीयते यत्तु तद्धर्मस्य प्रसाधनम्

समोत्तमाधमै राजा त्वाहूतः पालयन्प्रजाः
न निवर्तेत संग्रामात्क्षात्रं धर्ममनुस्मरन्  ८७
संग्रामेष्वनिवर्तित्वं प्रजानां चैव पालनम्
शुश्रूषा ब्राह्मणानां च राज्ञां श्रेयस्करं परम्  ८८
आहवेषु मिथोऽन्योन्यं जिघांसन्तो महीक्षितः
युध्यमानाः परं शक्त्या स्वर्गं यान्त्यपराङ्मुखाः  ८९
न कूटैरायुधैर्हन्याद्युध्यमानो रणे रिपून्
न कर्णिभिर्नापि दिग्धैर्नाग्निज्वलिततेजनैः  ९०
न च हन्यात्स्थलारूढं न क्लीबं न कृताञ्जलिम्
न मुक्तकेशं नासीनं न तवास्मीति वादिनम्  ९१
न सुप्तं न विसंनाहं न नग्नं न निरायुधम्
नायुध्यमानं पश्यन्तं न परेण समागतम्  ९२
नायुधव्यसनप्राप्तं नार्तं नातिपरिक्षतं
न भीतं न परावृत्तं सतां धर्ममनुस्मरन्  ९३
यस्तु भीतः परावृत्तः संग्रामे हन्यते परैः
भर्तुर्यद्दुष्कृतं किं चित्तत्सर्वं प्रतिपद्यते  ९४
यच्चास्य सुकृतं किं चिदमुत्रार्थमुपार्जितम्
भर्ता तत्सर्वमादत्ते परावृत्तहतस्य तु  ९५
रथाश्वं हस्तिनं छत्रं धनं धान्यं पशून्स्त्रियः
सर्वद्रव्याणि कुप्यं च यो यज् जयति तस्य तत्  ९६
राज्ञश्च दद्युरुद्धारमित्येषा वैदिकी श्रुतिः
राज्ञा च सर्वयोधेभ्यो दातव्यमपृथग्जितम्  ९७
एषोऽनुपस्कृतः प्रोक्तो योधधर्मः सनातनः
अस्माद्धर्मान्न च्यवेत क्षत्रियो घ्नन्रणे रिपून् ९८
अलब्धं चैव लिप्सेत लब्धं रक्षेत्प्रयत्नतः
रक्षितं वर्धयेच्चैव वृद्धं पात्रेषु निक्षिपेत्  ९९

एतच्चतुर्विधं विद्यात्पुरुषार्थप्रयोजनम्
अस्य नित्यमनुष्ठानं सम्यक् कुर्यादतन्द्रितः १००
अलब्धमिच्छेद्दण्डेन लब्धं रक्षेदवेक्षया
रक्षितं वर्धयेद्वृद्ध्या वृद्धं पात्रेषु निक्षिपेत् १०१
नित्यमुद्यतदण्डः स्यान्नित्यं विवृतपौरुषः
नित्यं संवृतसंवार्यो नित्यं छिद्रानुसार्यरेः १०२
नित्यमुद्यतदण्डस्य कृत्स्नमुद्विजते जगत्
तस्मात्सर्वाणि भूतानि दण्डेनैव प्रसाधयेत् १०३
अमाययैव वर्तेत न कथं चन मायया
बुध्येतारिप्रयुक्तां च मायां नित्यं सुसंवृतः १०४
नास्य छिद्रं परो विद्याद्विद्याच्छिद्रं परस्य च
गूहेत्कूर्म इवाङ्गानि रक्षेद्विवरमात्मनः १०५
बकवच्चिन्तयेदर्थान्सिंहवच्च पराक्रमे
वृकवच्चावलुम्पेत शशवच्च विनिष्पतेत् १०६
एवं विजयमानस्य येऽस्य स्युः परिपन्थिनः
तानानयेद्वशं सर्वान्सामादिभिरुपक्रमैः १०७
यदि ते तु न तिष्ठेयुरुपायैः प्रथमैस्त्रिभिः
दण्डेनैव प्रसह्यैतान्शनकैर्वशमानयेत् १०८
सामादीनामुपायानां चतुर्णामपि पण्डिताः
सामदण्डौ प्रशंसन्ति नित्यं राष्ट्राभिवृद्धये १०९
यथोद्धरति निर्दाता कक्षं धान्यं च रक्षति
तथा रक्षेन्नृपो राष्ट्रं हन्याच्च परिपन्थिनः ११०
मोहाद्राजा स्वराष्ट्रं यः कर्षयत्यनवेक्षया
सोऽचिराद्भ्रश्यते राज्याज्जीविताच्च सबान्धवः १११
शरीरकर्षणात्प्राणाः क्षीयन्ते प्राणिनां यथा
तथा राज्ञामपि प्राणाः क्षीयन्ते राष्ट्रकर्षणात् ११२

राष्ट्रस्य संग्रहे नित्यं विधानमिदमाचरेत्
सुसंगृहीतराष्ट्रे हि पार्थिवः सुखमेधते ११३
द्वयोस्त्रयाणां पञ्चानां मध्ये गुल्ममधिष्ठितम्
तथा ग्रामशतानां च कुर्याद्राष्ट्रस्य संग्रहम् ११४
ग्रामस्याधिपतिं कुर्याद्दशग्रामपतिं तथा
विंशतीशं शतेशं च सहस्रपतिमेव च ११५
ग्रामदोषान्समुत्पन्नान्ग्रामिकः शनकैः स्वयम्
शंसेद्ग्रामदशेशाय दशेशो विंशतीशिने ११६
विंशतीशस्तु तत्सर्वं शतेशाय निवेदयेत्
शंसेद्ग्रामशतेशस्तु सहस्रपतये स्वयम् ११७
यानि राजप्रदेयानि प्रत्यहं ग्रामवासिभिः
अन्नपानेन्धनादीनि ग्रामिकस्तान्यवाप्नुयात् ११८
दशी कुलं तु भुञ्जीत विंशी पञ्च कुलानि च
ग्रामं ग्रामशताध्यक्षः सहस्राधिपतिः पुरम् ११९
तेषां ग्राम्याणि कार्यानि पृथक्कार्याणि चैव हि
राज्ञोऽन्यः सचिवः स्निग्धस्तानि पश्येदतन्द्रितः १२०
नगरे नगरे चैकं कुर्यात्सर्वार्थचिन्तकम्
उच्चैःस्थानं घोररूपं नक्षत्राणामिव ग्रहम् १२१
सताननुपरिक्रामेत्सर्वानेव सदा स्वयम्
तेषां वृत्तं परिणयेत्सम्यग्राष्ट्रेषु तच्चरैः १२२
राज्ञो हि रक्षाधिकृताः परस्वादायिनः शठाः
भृत्या भवन्ति प्रायेण तेभ्यो रक्षेदिमाः प्रजाः १२३
ये कार्यिकेभ्योऽर्थमेव गृह्णीयुः पापचेतसः
तेषां सर्वस्वमादाय राजा कुर्यात्प्रवासनम् १२४
राजा कर्मसु युक्तानां स्त्रीणां प्रेष्यजनस्य च
प्रत्यहं कल्पयेद्वृत्तिं स्थानं कर्मानुरूपतः १२५

पणो देयोऽवकृष्टस्य षड् उत्कृष्टस्य वेतनम्
षाण्मासिकस्तथाच्छादो धान्यद्रोणस्तु मासिकः १२६
क्रयविक्रयमध्वानं भक्तं च सपरिव्ययम्
योगक्षेमं च संप्रेक्ष्य वणिजो दापयेत्करान् १२७
यथा फलेन युज्येत राजा कर्ता च कर्मणाम्
तथावेक्ष्य नृपो राष्ट्रे कल्पयेत्सततं करान् १२८
यथाल्पाल्पमदन्त्याद्यं वार्योकोवत्सषट्पदाः
तथाल्पाल्पो ग्रहीतव्यो राष्ट्राद्राज्ञाब्दिकः करः १२९
पञ्चाशद्भाग आदेयो राज्ञा पशुहिरण्ययोः
धान्यानामष्टमो भागः षष्ठो द्वादश एव वा १३०
आददीताथ षड्भागं द्रुमांसमधुसर्पिषाम्
गन्धौषधिरसानां च पुष्पमूलफलस्य च १३१
पत्रशाकतृणानां च चर्मणां वैदलस्य च
मृन्मयानां च भाण्डानां सर्वस्याश्ममयस्य च १३२
म्रियमाणोऽप्याददीत न राजा श्रोत्रियात्करम्
न च क्षुधास्य संसीदेच्छ्रोत्रियो विषये वसन् १३३
यस्य राज्ञस्तु विषये श्रोत्रियः सीदति क्षुधा
तस्यापि तत्क्षुधा राष्ट्रमचिरेनैव सीदति १३४
श्रुतवृत्ते विदित्वास्य वृत्तिं धर्म्यां प्रकल्पयेत्
संरक्षेत्सर्वतश्चैनं पिता पुत्रमिवाउरसम् १३५
संरक्ष्यमाणो राज्ञा यं कुरुते धर्ममन्वहम्
तेनायुर्वर्धते राज्ञो द्रविणं राष्ट्रमेव च १३६
यत्किं चिदपि वर्षस्य दापयेत्करसंज्ञितम्
व्यवहारेण जीवन्तं राजा राष्ट्रे पृथग्जनम् १३७
कारुकान्शिल्पिनश्चैव शूद्रांश्चात्मोपजीविनः
एकैकं कारयेत्कर्म मासि मासि महीपतिः १३८

नोच्छिन्द्यादात्मनो मूलं परेषां चातितृष्णया
उच्छिन्दन्ह्यात्मनो मूलमाट्मानं तांश्च पीदयेत् १३९
तीक्ष्णश्चैव मृदुश्च स्यात्कार्यं वीक्ष्य महीपतिः
तीक्ष्णश्चैव मृदुश्चैव राज भवति सम्मतः १४०
अमात्यमुख्यं धर्मज्ञं प्राज्ञं दान्तं कुलोद्गतम्
स्थापयेदासने तस्मिन्खिन्नः कार्येक्षणे नृणाम् १४१
एवं सर्वं विधायेदमितिकर्तव्यमात्मनः
युक्तश्चैवाप्रमत्तश्च परिरक्षेदिमाः प्रजाः १४२
विक्रोशन्त्यो यस्य राष्ट्राध्रियन्ते दस्युभिः प्रजाः
संपश्यतः सभृत्यस्य मृतः स न तु जीवति १४३
क्षत्रियस्य परो धर्मः प्राजानामेव पालनम्
निर्दिष्टफलभोक्ता हि राजा धर्मेण युज्यते १४४
उत्थाय पश्चिमे यामे कृतशौचः समाहितः
हुताग्निर्ब्राह्मणांश्चार्च्य प्रविशेत्स शुभां सभाम् १४५
तत्र स्थितः प्रजाः सर्वाः प्रतिनन्द्य विसर्जयेत्
विसृज्य च प्रजाः सर्वा मन्त्रयेत्सह मन्त्रिभिः १४६
गिरिपृष्ठं समारुह्य प्रसादं वा रहोगतः
अरण्ये निःशलाके वा मन्त्रयेदविभावितः १४७
यस्य मन्त्रं न जानन्ति समागम्य पृथग्जनाः
स कृत्स्नां पृथिवीं भुङ्क्ते कोशहीनोऽपि पार्थिवः १४८
जडमूकान्धबधिरांस्तैर्यग्योनान्वयोऽतिगान्
स्त्रीम्लेच्छव्याधितव्यङ्गान्मन्त्रकालेऽपसारयेत् १४९
भिन्दन्त्यवमता मन्त्रं तैर्यग्योनास्तथैव च
स्त्रियश्चैव विशेषेण तस्मात्तत्रादृतो भवेत् १५०
मध्यंदिनेऽर्धरात्रे वा विश्रान्तो विगतक्लमः
चिन्तयेद्धर्मकामार्थान्सार्धं तैरेक एव वा १५१

परस्परविरुद्धानां तेषां च समुपार्जनम्
कन्यानां संप्रदानं च कुमाराणां च रक्षणं १५२
दूतसंप्रेषणं चैव कार्यशेषं तथैव च
अन्तःपुरप्रचारं च प्रणिधीनां च चेष्टितम् १५३
कृत्स्नं चाष्टविधं कर्म पञ्चवर्गं च तत्त्वतः
अनुरागापरागौ च प्रचारं मण्डलस्य च १५४
मध्यमस्य प्रचारं च विजीगिषोश्च चेष्टितम्
उदासीनप्रचारं च शत्रोश्चैव प्रयत्नतः १५५
एताः प्रकृतयो मूलं मण्डलस्य समासतः
अष्टौ चान्याः समाख्याता द्वादशैव तु ताः स्मृताः १५६
अमात्यराष्ट्रदुर्गार्थदण्डाख्याः पञ्च चापराः
प्रत्येकं कथिता ह्येताः संक्षेपेण द्विसप्ततिः १५७
अनन्तरमरिं विद्यादरिसेविनमेव च
अरेरनन्तरं मित्रमुदासीनं तयोः परम् १५८
तान्सर्वानभिसंदध्यात्सामादिभिरुपक्रमैः
व्यस्तैश्चैव समस्तैश्च पौरुषेण नयेन च १५९
संधिं च विग्रहं चैव यानमासनमेव च
द्वैधीभावं संश्रयं च षड्गुणांश्चिन्तयेत्सदा १६०
आसनं चैव यानं च संधिं विग्रहमेव च
कार्यं वीक्ष्य प्रयुञ्जीत द्वैधं संश्रयमेव च १६१
संधिं तु द्विविधं विद्याद्राजा विग्रहमेव च
उभे यानासने चैव द्विविधः संश्रयः स्मृतः १६२
समानयानकर्मा च विपरीतस्तथैव च
तदा त्वायतिसंयुक्तः संधिर्ज्ञेयो द्विलक्षणः १६३
स्वयंकृतश्च कार्यार्थमकाले काल एव वा
मित्रस्य चैवापकृते द्विविधो विग्रहः स्मृतः १६४

एकाकिनश्चात्ययिके कार्ये प्राप्ते यदृच्छया
संहतस्य च मित्रेण द्विविधं यानमुच्यते १६५
क्षीणस्य चैव क्रमशो दैवात्पूर्वकृतेन वा
मित्रस्य चानुरोधेन द्विविधं स्मृतमासनम् १६६
बलस्य स्वामिनश्चैव स्थितिः कार्यार्थसिद्धये
द्विविधं कीर्त्यते द्वैधं षाड्गुण्यगुणवेदिभिः १६७
अर्थसंपादनार्थं च पीड्यमानस्य शत्रुभिः
साधुषु व्यपदेशश्च द्विविधः संश्रयः स्मृतः १६८
यदावगच्छेदायत्यामाधिक्यं ध्रुवमात्मनः
तदात्वे चाल्पिकां पीडां तदा संधिं समाश्रयेत् १६९
यदा प्रहृष्टा मन्येत सर्वास्तु प्रकृतीर्भृशम्
अत्युच्छ्रितं तथात्मानं तदा कुर्वीत विग्रहम् १७०
यदा मन्येत भावेन हृष्टं पुष्टं बलं स्वकम्
परस्य विपरीतं च तदा यायाद्रिपुं प्रति १७१
यदा तु स्यात्परिक्षीणो वाहनेन बलेन च
तदासीत प्रयत्नेन शनकैः सान्त्वयन्नरीन् १७२
मन्येतारिं यदा राजा सर्वथा बलवत्तरम्
तदा द्विधा बलं कृत्वा साधयेत्कार्यमात्मनः १७३
यदा परबलानां तु गमनीयतमो भवेत्
तदा तु संश्रयेत्क्षिप्रं धार्मिकं बलिनं नृपम् १७४
निग्रहं प्रकृतीनां च कुर्याद्योऽरिबलस्य च
उपसेवेत तं नित्यं सर्वयत्नैर्गुरुं यथा १७५
यदि तत्रापि संपश्येद्दोषं संश्रयकारितम्
सुयुद्धमेव तत्रापि निर्विशङ्कः समाचरेत् १७६
सर्वोपायैस्तथा कुर्यान्नीतिज्ञः पृथिवीपतिः
यथास्याभ्यधिका न स्युर्मित्रोदासीनशत्रवः १७७

आयतिं सर्वकार्याणां तदात्वं च विचारयेत्
अतीतानां च सर्वेषां गुणदोषौ च तत्त्वतः १७८
आयत्यां गुणदोषज्ञस्तदात्वे क्षिप्रनिश्चयः
अतीते कार्यशेषज्ञः शत्रुभिर्नाभिभूयते १७९
यथैनं नाभिसंदध्युर्मित्रोदासीनशत्रवः
तथा सर्वं संविदध्यादेष सामासिको नयः १८०
तदा तु यानमातिष्ठेदरिराष्ट्रं प्रति प्रभुः
तदानेन विधानेन यायादरिपुरं शनैः १८१
मार्गशीर्षे शुभे मासि यायाद्यात्रां महीपतिः
फाल्गुनं वाथ चैत्रं वा मासौ प्रति यथाबलम् १८२
अन्येष्वपि तु कालेषु यदा पश्येद्ध्रुवं जयम्
तदा यायाद्विगृह्यैव व्यसने चोत्थिते रिपोः १८३
कृत्वा विधानं मूले तु यात्रिकं च यथाविधि
उपगृह्यास्पदं चैव चारान्सम्यग्विधाय च १८४
संशोध्य त्रिविधं मार्गं षड्विधं च बलं स्वकम्
सांपरायिककल्पेन यायादरिपुरं प्रति १८५
शत्रुसेविनि मित्रे च गूढे युक्ततरो भवेत्
गतप्रत्यागते चैव स हि कष्टतरो रिपुः १८६
दण्डव्यूहेन तन्मार्गं यायात्तु शकटेन वा
वराहमकराभ्यां वा सूच्या वा गरुडेन वा १८७
यतश्च भयमाशङ्केत्ततो विस्तारयेद्बलम्
पद्मेन चैव व्यूहेन निविशेत सदा स्वयम् १८८
सेनापतिबलाध्यक्षौ सर्वदिक्षु निवेशयेत्
यतश्च भयमाशङ्केत्प्राचीं तां कल्पयेद्दिशम् १८९
गुल्मांश्च स्थापयेदाप्तान्कृतसंज्ञान्समन्ततः
स्थाने युद्धे च कुशलानभीरूनविकारिणः १९०

संहतान्योधयेदल्पान्कामं विस्तारयेद्बहून्
सूच्या वज्रेण चैवैतान्व्यूहेन व्यूह्य योधयेत् १९१
स्यन्दनाश्वैः समे युध्येदनूपे नौ द्विपैस्तथा
वृक्षगुल्मावृते चापैरसिचर्मायुधैः स्थले १९२
कुरुक्षेत्रांश्च मत्स्यांश्च पञ्चालान्शूरसेनजान्
दीर्घांल् लघूंश्चैव नरानग्रानीकेषु योजयेत् १९३
प्रहर्षयेद्बलं व्यूह्य तांश्च सम्यक् परीक्षयेत्
चेष्टाश्चैव विजानीयादरीन्योधयतामपि १९४
उपरुध्यारिमासीत राष्ट्रं चास्योपपीडयेत्
दूषयेच्चास्य सततं यवसान्नोदकेन्धनम् १९५
भिन्द्याच्चैव तडागानि प्राकारपरिखास्तथा
समवस्कन्दयेच्चैनं रात्रौ वित्रासयेत्तथा १९६
उपजप्यानुपजपेद्बुध्येतैव च तत्कृतम्
युक्ते च दैवे युध्येत जयप्रेप्सुरपेतभीः १९७
साम्ना दानेन भेदेन समस्तैरथ वा पृथक्
विजेतुं प्रयतेतारीन्न युद्धेन कदा चन १९८
अनित्यो विजयो यस्माद्दृश्यते युध्यमानयोः
पराजयश्च संग्रामे तस्माद्युद्धं विवर्जयेत् १९९
त्रयाणामप्युपायानां पूर्वोक्तानामसंभवे
तथा युध्येत संपन्नो विजयेत रिपून्यथा २००
जित्वा संपूजयेद्देवान्ब्राह्मणांश्चैव धार्मिकान्
प्रदद्यात्परिहारार्थं ख्यापयेदभयानि च २०१
सर्वेषां तु विदित्वैषां समासेन चिकीर्षितम्
स्थापयेत्तत्र तद्वंश्यं कुर्याच्च समयक्रियाम् २०२
प्रमाणानि च कुर्वीत तेषां धर्मान्यथोदितान्
रत्नैश्च पूजयेदेनं प्रधानपुरुषैः सह २०३

आदानमप्रियकरं दानं च प्रियकारकम्
अभीप्सितानामर्थानां काले युक्तं २०४
सर्वं कर्मेदमायत्तं विधाने दैवमानुषे
तयोर्दैवमचिन्त्यं तु मानुषे विद्यते क्रिया २०५
दैवेन विधिना युक्तं मानुष्यं यत्प्रवर्तते
परिक्लेशेन महता तदर्थस्य समाधकम्
संयुक्तस्यापि दैवेन पुरुषकारेण वर्जितम्
विना पुरुषकारेण फलं क्षेत्रं प्रयच्छति
चन्द्रार्काद्या ग्रहा वायुरग्निरापस्तथैव च
इह दैवेन साध्यन्ते पौरुषेण प्रयत्नतः
सह वापि व्रजेद्युक्तः संधिं कृत्वा प्रयत्नतः
मित्रं हिरण्यं भूमिं वा संपश्यंस्त्रिविधं फलम् २०६
पार्ष्णिग्राहं च संप्रेक्ष्य तथाक्रन्दं च मण्डले
मित्रादथाप्यमित्राद्वा यात्राफलमवाप्नुयात् २०७
हिरण्यभूमिसंप्राप्त्या पार्थिवो न तथैधते
यथा मित्रं ध्रुवं लब्ध्वा कृशमप्यायतिक्षमम् २०८
धर्मज्ञं च कृतज्ञं च तुष्टप्रकृतिमेव च
अनुरक्तं स्थिरारम्भं लघुमित्रं प्रशस्यते २०९
प्राज्ञं कुलीनं शूरं च दक्षं दातारमेव च
कृतज्ञं धृतिमन्तं च कष्टमाहुररिं बुधाः २१०
आर्यता पुरुषज्ञानं शौर्यं करुणवेदिता
स्थौललक्ष्यं च सततमुदासीनगुणोदयः २११
क्सेम्यां सस्यप्रदां नित्यं पशुवृद्धिकरीमपि
परित्यजेन्नृपो भूमिमात्मार्थमविचारयन् २१२
आपदर्थं धनं रक्षेद्दारान्रक्षेद्धनैरपि
आत्मानं सततं रक्षेद्दारैरपि धनैरपि २१३

सह सर्वाः समुत्पन्नाः प्रसमीद्व्यापदो भृशम्
संयुक्तांश्च वियुक्तांश्च सर्वोपायान्सृजेद्बुधः २१४
उपेतारमुपेयं च सर्वोपायांश्च कृत्स्नशः
एतत्त्रयं समाश्रित्य प्रयतेतार्थसिद्धये २१५
एवं सर्वमिदं राजा सह सम्मन्त्र्य मन्त्रिभिः
व्यायम्याप्लुत्य मध्याह्ने भोक्तुमन्तःपुरं विशेत् २१६
तत्रात्मभूतैः कालज्ञैरहार्यैः परिचारकैः
सुपरीक्षितमनाद्यमद्यान्मन्त्रैर्विषापहैः २१७
विषघ्नैरगदैश्चास्य सर्वद्रव्याणि योजयेत्
विषघ्नानि च रत्नानि नियतो धारयेत्सदा २१८
परीक्षिताः स्त्रियश्चैनं व्यजनोदकधूपनैः
वेषाभरणसंशुद्धाः स्पृशेयुः सुसमाहिताः २१९
एवं प्रयत्नं कुर्वीत यानशय्यासनाशने
स्नाने प्रसाधने चैव सर्वालङ्कारकेषु च २२०
भुक्तवान्विहरेच्चैव स्त्रीभिरन्तःपुरे सह
विहृत्य तु यथाकालं पुनः कार्याणि चिन्तयेत् २२१
अलंकृतश्च संपश्येदायुधीयं पुनर्जनम्
वाहनानि च सर्वाणि शस्त्राण्याभरणानि च २२२
संध्यां चोपास्य शृणुयादन्तर्वेश्मनि शस्त्रभृत्
रहस्याख्यायिनां चैव प्रणिधीनां च चेष्टितम् २२३
गत्वा कक्षान्तरं त्वन्यत्समनुज्ञाप्य तं जनम्
प्रविशेद्भोजनार्थं च स्त्रीवृतोऽन्तःपुरं पुनः २२४
तत्र भुक्त्वा पुनः किं चित्तूर्यघोषैः प्रहर्षितः
संविशेत्तं यथाकालमुत्तिष्ठेच्च गतक्लमः २२५
एतद्विधानमातिष्ठेदरोगः पृथिवीपतिः
अस्वस्थः सर्वमेतत्तु भृत्येषु विनियोजयेत् २२६

## अष्टमोऽध्यायः

व्यवहारान्दिदृक्षुस्तु ब्राह्मणैः सह पार्थिवः
मन्त्रज्ञैर्मन्त्रिभिश्चैव विनीतः प्रविशेत्सभाम् १
तत्रासीनः स्थितो वापि पाणिमुद्यम्य दक्षिणम्
विनीतवेषाभरणः पश्येत्कार्याणि कार्यिणाम् २
प्रत्यहं देशदृष्टैश्च शास्त्रदृष्टैश्च हेतुभिः
अष्टादशसु मार्गेषु निबद्धानि पृथक् पृथक् ३
तेषामाद्यमृणादानं निक्षेपोऽस्वामिविक्रयः
संभूय च समुत्थानं दत्तस्यानपकर्म च ४
वेतनस्यैव चादानं संविदश्च व्यतिक्रमः
क्रयविक्रयानुशयो विवादः स्वामिपालयोः ५
सीमाविवादधर्मश्च पारुष्ये दण्डवाचिके
स्तेयं च साहसं चैव स्त्रीसंग्रहणमेव च ६
स्त्रीपुंधर्मो विभागश्च द्यूतमाह्वय एव च
पदान्यष्टादशैतानि व्यवहारस्थिताविह ७
एषु स्थानेषु भूयिष्ठं विवादं चरतां नृणाम्
धर्मं शाश्वतमाश्रित्य कुर्यात्कार्यविनिर्णयम् ८
यदा स्वयं न कुर्यात्तु नृपतिः कार्यदर्शनम्
तदा नियुञ्ज्याद्विद्वांसं ब्राह्मणं कार्यदर्शने ९
सोऽस्य कार्याणि संपश्येत्सभ्यैरेव त्रिभिर्वृतः
सभामेव प्रविश्याग्र्यामासीनः स्थित एव वा १०
यस्मिन्देशे निषीदन्ति विप्रा वेदविदस्त्रयः
राज्ञश्चाधिकृतो विद्वान्ब्रह्मणस्तां सभां विदुः ११
धर्मो विद्धस्त्वधर्मेण सभां यत्रोपतिष्ठते
शल्यं चास्य न कृन्तन्ति विद्धास्तत्र सभासदः १२
सभां वा न प्रवेष्टव्यं वक्तव्यं वा समञ्जसम्

अब्रुवन्विब्रुवन्वापि नरो भवति किल्बिषी १३
यत्र धर्मो ह्यधर्मेण सत्यं यत्रानृतेन च
हन्यते प्रेक्षमाणानां हतास्तत्र सभासदः १४
धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः
तस्माद्धर्मो न हन्तव्यो मा नो धर्मो हतो ऽवधीत् १५
वृषो हि भगवान्धर्मस्तस्य यः कुरुते ह्यलम्
वृषलं तं विदुर्देवास्तस्माद्धर्मं न लोपयेत् १६
एक एव सुहृद्धर्मो निधानेऽप्यनुयाति यः
शरीरेण समं नाशं सर्वमन्यद्धि गच्छति १७
पादोऽधर्मस्य कर्तारं पादः साक्षिणमृच्छति
पादः सभासदः सर्वान्पादो राजानमृच्छति १८
राजा भवत्यनेनास्तु मुच्यन्ते च सभासदः
एनो गच्छति कर्तारं निन्दार्हो यत्र निन्द्यते १९
जातिमात्रोपजीवी वा कामं स्याद्ब्राह्मणब्रुवः
धर्मप्रवक्ता नृपतेर्न शूद्रः कथं चन २०
यस्य शूद्रस्तु कुरुते राज्ञो धर्मविवेचनम्
तस्य सीदति तद्राष्ट्रं पङ्के गौरिव पश्यतः २१
यद्राष्ट्रं शूद्रभूयिष्ठं नास्तिकाक्रान्तमद्विजम्
विनश्यत्याशु तत्कृत्स्नं दुर्भिक्षव्याधिपीडितम् २२
धर्मासनमधिष्ठाय संवीताङ्गः समाहितः
प्रणम्य लोकपालेभ्यः कार्यदर्शनमारभेत् २३
अर्थानर्थावुभौ बुद्ध्वा धर्माधर्मौ च केवलौ
वर्णक्रमेण सर्वाणि पश्येत्कार्याणि कार्यिणाम् २४
बाह्यैर्विभावयेल्लिङ्गैर्भावमन्तर्गतं नृणाम्
स्वरवर्णेङ्गिताकारैश्चक्षुषा चेष्टितेन च २५
आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च

नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः २६
बालदायादिकं रिक्थं तावद्राजानुपालयेत्
यावत्स स्यात्समावृत्तो यावच्चातीतशैशवः २७
वशापुत्रासु चैवं स्याद्रक्षणं निष्कुलासु च
पतिव्रतासु च स्त्रीषु विधवास्वातुरासु च २८
जीवन्तीनां तु तासां ये तद्धरेयुः स्वबान्धवाः
तान्शिष्याच्चौरदण्डेन धार्मिकः पृथिवीपतिः २९
प्रणष्टस्वामिकं रिक्थं राजा त्र्यब्दं निधापयेत्
अर्वाक् त्र्यब्दाद्धरेत्स्वामी परेण नृपतिर्हरेत् ३०
ममेदमिति यो ब्रूयात्सोऽनुयोज्यो यथाविधि
संवाद्य रूपसंख्यादीन्स्वामी तद्द्रव्यमर्हति ३१
अवेदयानो नष्टस्य देशं कालं च तत्त्वतः
वर्णं रूपं प्रमाणं च तत्समं दण्डमर्हति ३२
आददीताथ षड्भागं प्रनष्टाधिगतान्नृपः
दशमं द्वादशं वापि सतां धर्ममनुस्मरन् ३३
प्रनष्टाधिगतं द्रव्यं तिष्ठेद्युक्तैरधिष्ठितम्
यांस्तत्र चौरान्गृह्णीयात्तान्राजेभेन घातयेत् ३४
ममायमिति यो ब्रूयान्निधिं सत्येन मानवः
तस्याददीत षड्भागं राजा द्वादशमेव वा ३५
अनृतं तु वदन्दण्ड्यः स्ववित्तस्यांशमष्टमम्
तस्यैव वा निधानस्य संख्ययाल्पीयसीं कलाम् ३६
विद्वांस्तु ब्राह्मणो दृष्ट्वा पूर्वोपनिहितं निधिम्
अशेषतोऽप्याददीत सर्वस्याधिपतिर्हि सः ३७
यं तु पश्येन्निधिं राजा पुराणं निहितं क्षितौ
तस्माद्द्विजेभ्यो दत्त्वार्धमर्धं कोशे प्रवेशयेत् ३८
निधीनां तु पुराणानां धातूनामेव च क्षितौ

अर्धभाग्रक्षणाद्राजा भूमेरधिपतिर्हि सः  ३९
दातव्यं सर्ववर्णेभ्यो राज्ञा चौरैर्हृतं धनम्
राजा तदुपयुञ्जानश्चौरस्याप्नोति किल्बिषम्  ४०
जातिजानपदान्धर्मान्श्रेणीधर्मांश्च धर्मवित्
समीक्ष्य कुलधर्मांश्च स्वधर्मं प्रतिपादयेत्  ४१
स्वानि कर्माणि कुर्वाणा दूरे सन्तोऽपि मानवाः
प्रिया भवन्ति लोकस्य स्वे स्वे कर्मण्यवस्थिताः  ४२
नोत्पादयेत्स्वयं कार्यं राजा नाप्यस्य पुरुषः
न च प्रापितमन्येन ग्रसेदर्थं कथं चन  ४३
यथा नयत्यसृक्पातैर्मृगस्य मृगयुः पदम्
नयेत्तथानुमानेन धर्मस्य नृपतिः पदम्  ४४
सत्यमर्थं च संपश्येदात्मानमथ साक्षिणः
देशं रूपं च कालं च व्यवहारविधौ स्थितः  ४५
सद्भिराचरितं यत्स्याद्धार्मिकैश्च द्विजातिभिः
तद्देशकुलजातीनामविरुद्धं प्रकल्पयेत्  ४६
अधमर्णार्थसिद्ध्यर्थमुत्तमर्णेन चोदितः
दापयेद्धनिकस्यार्थमधमर्णाद्विभावितम्  ४७
यैर्यैरुपायैरर्थं स्वं प्राप्नुयादुत्तमर्णिकः
तैस्तैरुपायैः संगृह्य दापयेदधमर्णिकम्  ४८
धर्मेण व्यवहारेण छलेनाचरितेन च
प्रयुक्तं साधयेदर्थं पञ्चमेन बलेन च  ४९
यः स्वयं साधयेदर्थमुत्तमर्णोऽधमर्णिकात्
न स राज्ञाभियोक्तव्यः स्वकं संसाधयन्धनम्  ५०
अर्थेऽपव्ययमानं तु करणेन विभावितम्
दापयेद्धनिकस्यार्थं दण्डलेशं च शक्तितः  ५१
अपह्नवेऽधमर्णस्य देहीत्युक्तस्य संसदि

अभियोक्ता दिशेद्देश्यं करणं वान्यदुद्दिशेत् ५२
अदेश्यं यश्च दिशति निर्दिश्यापह्नुते च यः
यश्चाधरोत्तरानर्थान्विगीतान्नावबुध्यते ५३
अपदिश्यापदेश्यं च पुनर्यस्त्वपधावति
सम्यक् प्रणिहितं चार्थं पृष्टः सन्नाभिनन्दति ५४
असंभाष्ये साक्षिभिश्च देशे संभाषते मिथः
निरुच्यमानं प्रश्नं च नेच्छेद्यश्चापि निष्पतेत् ५५
ब्रूहीत्युक्तश्च न ब्रूयादुक्तं च न विभावयेत्
न च पूर्वापरं विद्यात्तस्मादर्थात्स हीयते ५६
साक्षिणः सन्ति मेत्युक्त्वा दिशेत्युक्तो दिशेन्न यः
धर्मस्थः कारणैरेतैर्हीनं तमपि निर्दिशेत् ५७
अभियोक्ता न चेद्ब्रूयाद्बध्यो दण्ड्यश्च धर्मतः
न चेत्त्रिपक्षात्प्रब्रूयाद्धर्मं प्रति पराजितः ५८
यो यावन्निह्नुवीतार्थं मिथ्या यावति वा वदेत्
तौ नृपेण ह्यधर्मज्ञौ दाप्यो तद्द्विगुणं दमम् ५९
पृष्टोऽपव्ययमानस्तु कृतावस्थो धनैषिणा
त्र्यवरैः साक्षिभिर्भाव्यो नृपब्राह्मणसंनिधौ ६०
यादृशा धनिभिः कार्या व्यवहारेषु साक्षिणः
तादृशान्संप्रवक्ष्यामि यथा वाच्यमृतं च तैः ६१
गृहिणः पुत्रिणो मौलाः क्षत्रविश्शूद्रयोनयः
अर्थ्युक्ताः साक्ष्यमर्हन्ति न ये के चिदनापदि ६२
आप्ताः सर्वेषु वर्णेषु कार्याः कार्येषु साक्षिणः
सर्वधर्मविदोऽलुब्धा विपरीतांस्तु वर्जयेत् ६३
नार्थसंबन्धिनो नाप्ता न सहाया न वैरिणः
न दृष्टदोषाः कर्तव्या न व्याध्यार्ता न दूषिताः ६४
न साक्षी नृपतिः कार्यो न कारुककुशीलवौ

न श्रोत्रियो न लिङ्गस्थो न सङ्गेभ्यो विनिर्गतः ६५
नाध्यधीनो न वक्तव्यो न दस्युर्न विकर्मकृत्
न वृद्धो न शिशुर्नैको नान्त्यो न विकलेन्द्रियः ६६
नार्तो न मत्तो नोन्मत्तो न क्षुत्तृष्णोपपीडितः
न श्रमार्तो न कामार्तो न क्रुद्धो नापि तस्करः ६७
स्त्रीणां साक्ष्यं स्त्रियः कुर्युर्द्विजानां सदृशा द्विजाः
शूद्राश्च सन्तः शूद्राणामन्त्यानामन्त्ययोनयः ६८
अनुभावी तु यः कश्चित्कुर्यात्साक्ष्यं विवादिनाम्
अन्तर्वेश्मन्यरण्ये वा शरीरस्यापि चात्यये ६९
स्त्रियाप्यसंभावे कार्यं बालेन स्थविरेण वा
शिष्येण बन्धुना वापि दासेन भृतकेन वा ७०
बालवृद्धातुराणां च साक्ष्येषु वदतां मृषा
जानीयादस्थिरां वाचमुत्सिक्तमनसां तथा ७१
साहसेषु च सर्वेषु स्तेयसंग्रहणेषु च
वाग्दण्डयोश्च पारुष्ये न परीक्षेत साक्षिणः ७२
बहुत्वं परिगृह्णीयात्साक्षिद्वैधे नराधिपः
समेषु तु गुणोत्कृष्टान्गुणिद्वैधे द्विजोत्तमान् ७३
समक्षदर्शनात्साक्ष्यं श्रवणाच्चैव सिध्यति
तत्र सत्यं ब्रुवन्साक्षी धर्मार्थाभ्यां न हीयते ७४
साक्षी दृष्टश्रुतादन्यद्विब्रुवन्नार्यसंसदि
अवाङ्‌ नरकमभ्येति प्रेत्य स्वर्गाच्च हीयते ७५
यत्रानिबद्धोऽपीक्षेत शृणुयाद्वापि किं चन
पृष्टस्तत्रापि तद्ब्रूयाद्यथादृष्टं यथाश्रुतम् ७६
एकोऽलुब्धस्तु साक्षी स्याद्बह्वयः शुच्योऽपि न स्त्रियः
स्त्रीबुद्धेरस्थिरत्वात्तु दोषैश्चान्येऽपि ये वृताः ७७
स्वभावेनैव यद्ब्रूयुस्तद्ग्राह्यं व्यावहारिकम्

अतो यदन्यद्विब्रूयुर्धर्मार्थं तदपार्थकम् ७८
सभान्तः साक्षिणः प्राप्तानर्थिप्रत्यर्थिसंनिधौ
प्राड्विवाकोऽनुयुञ्जीत विधिनानेन सान्त्वयन् ७९
यद्द्वयोरनयोर्वेत्थ कार्येऽस्मिंश्चेष्टितं मिथः
तद्ब्रूत सर्वं सत्येन युष्माकं ह्यत्र साक्षिता ८०
सत्यं साक्ष्ये ब्रुवन्साक्षी लोकान् आप्नोत्यपुष्कलान्
इह चानुत्तमां कीर्तिं वागेषा ब्रह्मपूजिता ८१
साक्ष्येऽनृतं वदन्पाशैर्बध्यते वारुणैर्भृशम्
विवशः शतमाजातीस्तस्मात्साक्ष्यं वदेदृतम् ८२
सत्येन पूयते साक्षी धर्मः सत्येन वर्धते
तस्मात्सत्यं हि वक्तव्यं सर्ववर्णेषु साक्षिभिः ८३
आत्मैव ह्यात्मनः साक्षी गतिरात्मा तथात्मनः
मावमंस्थाः स्वमात्मानं नृणां साक्षिणमुत्तमम् ८४
मन्यन्ते वै पापकृतो न कश्चित्पश्यतीति नः
तांस्तु देवाः प्रपश्यन्ति स्वस्यैवान्तरपूरुषः ८५
द्यौर्भूमिरापो हृदयं चन्द्रार्काग्नियमानिलाः
रात्रिः संध्ये च धर्मश्च वृत्तज्ञाः सर्वदेहिनाम् ८६
देवब्राह्मणसांनिध्ये साक्ष्यं पृच्छेदृतं द्विजान्
उदङ्मुखान्प्राङ्मुखान्वा पूर्वाह्णे वै शुचिः शुचीन् ८७
ब्रूहीति ब्राह्मणं पृच्छेत्सत्यं ब्रूहीति पार्थिवम्
गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः ८८
ब्रह्मघ्नो ये स्मृता लोका ये च स्त्रीबालघातिनः
मित्रद्रुहः कृतघ्नस्य ते ते स्युर्ब्रुवतो मृषा ८९
जन्मप्रभृति यत्किं चित्पुण्यं भद्र त्वया कृतम्
तत्ते सर्वं शुनो गच्छेद्यदि ब्रूयास्त्वमन्यथा ९०
एकोऽहमस्मीत्यात्मानं यस्त्वं कल्याण मन्यसे

नित्यं स्थितस्ते हृद्येष पुण्यपापेक्षिता मुनिः ९१
यमो वैवस्वतो देवो यस्तवैष हृदि स्थितः
तेन चेदविवादस्ते मा गङ्गां मा कुरून्गमः ९२
नग्नो मुण्डः कपालेन च भिक्षार्थी क्षुत्पिपासितः
अन्धः शत्रुकुलं गच्छेद्यः साक्ष्यमनृतं वदेत् ९३
अवाक्शिरास्तमस्यन्धे किल्बिषी नरकं व्रजेत्
यः प्रश्नं वितथं ब्रूयात्पृष्टः सन्धर्मनिश्चये ९४
अन्धो मत्स्यानिवाश्नाति स नरः कण्टकैः सह
यो भाषतेऽर्थवैकल्यमप्रत्यक्षं सभां गतः ९५
यस्य विद्वान्हि वदतः क्षेत्रज्ञो नाभिशङ्कते
तस्मान्न देवाः श्रेयांसं लोकेऽन्यं पुरुषं विदुः ९६
यावतो बान्धवान्यस्मिन्हन्ति साक्ष्येऽनृतं वदन्
तावतः संख्यया तस्मिन्शृणु सौम्यानुपूर्वशः ९७
पञ्च पश्वनृते हन्ति दश हन्ति गवानृते
शतमश्वानृते हन्ति सहस्रं पुरुषानृते ९८
हन्ति जातानजातांश्च हिरण्यार्थेऽनृतं वदन्
सर्वं भूम्यनृते हन्ति मा स्म भूम्यनृतं वदीः ९९
अप्सु भूमिवदित्याहुः स्त्रीणां भोगे च मैथुने
अब्जेषु चैव रत्नेषु सर्वेष्वश्ममयेषु च १००
एतान्दोषानवेक्ष्य त्वं सर्वाननृतभाषणे
यथाश्रुतं यथादृष्टं सर्वमेवाञ्जसा वद १०१
गोरक्षकान्वाणिजिकांस्तथा कारुकुशीलवान्
प्रेष्यान्वार्धुषिकांश्चैव विप्रान्शूद्रवदाचरेत् १०२
तद्वदन्धर्मतोऽर्थेषु जानन्नप्यन्यथा नरः
न स्वर्गाच्च्यवते लोकाद्दैवीं वाचं वदन्ति ताम् १०३
शूद्रविश्क्षत्रविप्राणां यत्रर्तोक्तौ भवेद्वधः

तत्र वक्तव्यमनृतं तद्धि सत्याद्विशिष्यते  १०४
वाग्दैवत्यैश्च चरुभिर्यजेरंस्ते सरस्वतीम्
अनृतस्यैनसस्तस्य कुर्वाणा निष्कृतिं पराम्  १०५
कूष्माण्डैर्वापि जुहुयाद्धृतमग्नौ यथाविधि
उदित्यृचा वा वारुण्या तृचेनाब्दैवतेन वा   १०६
त्रिपक्षादब्रुवन्साक्ष्यमृणादिषु नरोऽगदः
तदृणं प्राप्नुयात्सर्वं दशबन्धं च सर्वतः  १०७
यस्य दृश्येत सप्ताहादुक्तवाक्यस्य साक्षिणः
रोगोऽग्निर्ज्ञातिमरणमृणं दाप्यो दमं च सः  १०८
असाक्षिकेषु त्वर्थेषु मिथो विवादमानयोः
अविन्दंस्तत्त्वतः सत्यं शपथेनापि लम्भयेत्  १०९
महर्षिभिश्च देवैश्च कार्यार्थं शपथाः कृताः
वसिष्ठश्चापि शपथं शेपे पैजवने नृपे  ११०
न वृथा शपथं कुर्यात्स्वल्पेऽप्यर्थे नरो बुधः
वृथा हि शपथं कुर्वन्प्रेत्य चेह च नश्यति  १११
कामिनीषु विवाहेषु गवां भक्ष्ये तथेन्धने
ब्राह्मणाभ्युपपत्तौ च शपथे नास्ति पातकम्  ११२
सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः
गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः  ११३
अग्निं वाहारयेदेनमप्सु चैनं निमज्जयेत्
पुत्रदारस्य वाप्येनं शिरांसि स्पर्शयेत्पृथक्  ११४
यमिद्धो न दहत्यग्निरापो नोन्मज्जयन्ति च
न चार्तिमृच्छति क्षिप्रं स ज्ञेयः शपथे शुचिः  ११५
वत्सस्य ह्यभिशस्तस्य पुरा भ्रात्रा यवीयसा
नाग्निर्ददाह रोमापि सत्येन जगतः स्पशः  ११६
यस्मिन्यस्मिन्विवादे तु कौटसाक्ष्यं कृतं भवेत्

तत्तत्कार्यं निवर्तेत कृतं चाप्यकृतं भवेत् ११७
लोभान्मोहाद्भयान्मैत्रात्कामात्क्रोधात्तथैव च
अज्ञानाद्बालभावाच्च साक्ष्यं वितथमुच्यते ११८
एषामन्यतमे स्थाने यः साक्ष्यमनृतं वदेत्
तस्य दण्डविशेषांस्तु प्रवक्ष्याम्यनुपूर्वशः ११९
लोभात्सहस्रं दण्ड्यस्तु मोहात्पूर्वं तु साहसम्
भयाद्द्वौ मध्यमौ दण्डौ मैत्रात्पूर्वं चतुर्गुणम् १२०
कामाद्दशगुणं पूर्वं क्रोधात्तु त्रिगुणं परम्
अज्ञानाद्द्वे शते पूर्णे बालिश्याच्छतमेव तु १२१
एतानाहुः कौटसाक्ष्ये प्रोक्तान्दण्डान्मनीषिभिः
धर्मस्याव्यभिचारार्थमधर्मनियमाय च १२२
कौटसाक्ष्यं तु कुर्वाणांस्त्रीन्वर्णान्धार्मिको नृपः
प्रवासयेद्दण्डयित्वा ब्राह्मणं तु विवासयेत् १२३
दश स्थानानि दण्डस्य मनुः स्वयंभुवोऽब्रवीत्
त्रिषु वर्णेषु यानि स्युरक्षतो ब्राह्मणो व्रजेत् १२४
उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमम्
चक्षुर्नासा च कर्णौ च धनं देहस्तथैव च १२५
अनुबन्धं परिज्ञाय देशकालौ च तत्त्वतः
सारापराधो चालोक्य दण्डं दण्ड्येषु पातयेत् १२६
अधर्मदण्डनं लोके यशोघ्नं कीर्तिनाशनम्
अस्वर्ग्यं च परत्रापि तस्मात्तत्परिवर्जयेत् १२७
अदण्ड्यान्दण्डयन्राजा दण्ड्यांश्चैवाप्यदण्डयन्
अयशो महदाप्नोति नरकं चैव गच्छति १२८
वाग्दण्डं प्रथमं कुर्याद्धिग्दण्डं तदनन्तरम्
तृतीयं धनदण्डं तु वधदण्डमतः परम् १२९
वधेनापि यदा त्वेतान्निग्रहीतुं न शक्नुयात्

तदैषु सर्वमप्येतत्प्रयुञ्जीत चतुष्टयम्  १३०
लोकसंव्यवहारार्थं याः संज्ञाः प्रथिता भुवि
ताम्ररूप्यसुवर्णानां ताः प्रवक्ष्याम्यशेषतः  १३१
जालान्तरगते भानौ यत्सूक्ष्मं दृश्यते रजः
प्रथमं तत्प्रमाणानां त्रसरेणुं प्रचक्षते  १३२
त्रसरेणवोऽष्टौ विज्ञेया लिक्षैका परिमाणतः
ता राजसर्षपस्तिस्रस्ते त्रयो गौरसर्षपः  १३३
सर्षपाः षड् यवो मध्यस्त्रियवं त्वेककृष्णलम्
पञ्चकृष्णलको माषस्ते सुवर्णस्तु षोडश  १३४
पलं सुवर्णाश्चत्वारः पलानि धरणं दश
द्वे कृष्णले समधृते विज्ञेयो रौप्यमाषकः  १३५
ते षोडश स्याद्धरणं पुराणश्चैव राजतः
कार्षापणस्तु विज्ञेयस्ताम्रिकः कार्षिकः पणः  १३६
धरणानि दश ज्ञेयः शतमानस्तु राजतः
चतुःसौवर्णिको निष्को विज्ञेयस्तु प्रमाणतः  १३७
पणानां द्वे शते सार्धे प्रथमः साहसः स्मृतः
मध्यमः पञ्च विज्ञेयः सहस्रं त्वेव चोत्तमः  १३८
ऋणे देये प्रतिज्ञाते पञ्चकं शतमर्हति
अपह्नवे तद्द्विगुणं तन्मनोरनुशासनम्  १३९
वसिष्ठविहितां वृद्धिं सृजेद्वित्तविवर्धिनीम्
अशीतिभागं गृह्णीयान्मासाद्वार्धुषिकः शते  १४०
द्विकं शतं वा गृह्णीयात्सतां धर्ममनुस्मरन्
द्विकं शतं हि गृह्णानो न भवत्यर्थकिल्बिषी  १४१
द्विकं त्रिकं चतुष्कं च पञ्चकं च शतं समम्
मासस्य वृद्धिं गृह्णीयाद्वर्णानामनुपूर्वशः  १४२
न त्वेवाधौ सोपकारे कौसीदीं वृद्धिमाप्नुयात्

न चाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रयः १४३
न भोक्तव्यो बलादाधिर्भुञ्जानो वृद्धिमुत्सृजेत्
मूल्येन तोषयेच्चैनमाधिस्तेनोऽन्यथा भवेत् १४४
आधिश्चोपनिधिश्चोभौ न कालात्ययमर्हतः
अवहार्यौ भवेतां तौ दीर्घकालमवस्थितौ १४५
संप्रीत्या भुज्यमानानि न नश्यन्ति कदा चन
धेनुरुष्ट्रो वहन्नश्वो यश्च दम्यः प्रयुज्यते १४६
यत्किं चिद्दशवर्षाणि संनिधौ प्रेक्षते धनी
भुज्यमानं परैस्तूष्णीं न स तल्लब्धुमर्हति १४७
अजडश्चेदपोगण्डो विषये चास्य भुज्यते
भग्नं तद्व्यवहारेण भोक्ता तद्द्रव्यमर्हति १४८
आधिः सीमा बालधनं निक्षेपोपनिधिः स्त्रियः
राजस्वं श्रोत्रियस्वं च न भोगेन प्रणश्यति १४९
यः स्वामिनाननुज्ञातमाधिं भूङ्क्तेऽविचक्षणः
तेनार्धवृद्धिर्मोक्तव्या तस्य भोगस्य निष्कृतिः १५०
कुसीदवृद्धिर्द्वैगुण्यं नात्येति सकृदाहृता
धान्ये सदे लवे वाह्ये नातिक्रामति पञ्चताम् १५१
कृतानुसारादधिका व्यतिरिक्ता न सिध्यति
कुसीदपथमाहुस्तं पञ्चकं शतमर्हति १५२
नातिसांवत्सरीं वृद्धिं न चादृष्टां पुनर्हरेत्
चक्रवृद्धिः कालवृद्धिः कारिता कायिका च या १५३
ऋणं दातुमशक्तो यः कर्तुमिच्छेत्पुनः क्रियाम्
स दत्त्वा निर्जितां वृद्धिं करणं परिवर्तयेत् १५४
अदर्शयित्वा तत्रैव हिरण्यं परिवर्तयेत्
यावती संभवेद्वृद्धिस्तावतीं दातुमर्हति १५५
चक्रवृद्धिं समारूढो देशकालव्यवस्थितः

अतिक्रामन्देशकालौ न तत्फलमवाप्नुयात्  १५६
समुद्रयानकुशला देशकालार्थदर्शिनः
स्थापयन्ति तु यां वृद्धिं सा तत्राधिगमं प्रति  १५७
यो यस्य प्रतिभूस्तिष्ठेद्दर्शनायेह मानवः
अदर्शयन्स तं तस्य प्रयच्छेत्स्वधनादृणम्  १५८
प्रातिभाव्यं वृथादानमाक्षिकं सौरिकां च यत्
दण्डशुल्कावशेषं च न पुत्रो दातुमर्हति  १५९
दर्शनप्रातिभाव्ये तु विधिः स्यात्पूर्वचोदितः
दानप्रतिभुवि प्रेते दायादानपि दापयेत्  १६०
अदातरि पुनर्दाता विज्ञातप्रकृतावृणम्
पश्चात्प्रतिभुवि प्रेते परीप्सेत्केन हेतुना  १६१
निरादिष्टधनश्चेत्तु प्रतिभूः स्यादलंधनः
स्वधनादेव तद्द्यान्निरादिष्ट इति स्थितिः  १६२
मत्तोन्मत्तार्ताध्यधीनैर्बालेन स्थविरेण वा
असंबद्धकृतश्चैव व्यावहारो न सिध्यति   १६३
सत्या न भाषा भवति यद्यपि स्यात्प्रतिष्ठिता
बहिश्चेद्भाष्यते धर्मान्नियताद्व्यवहारिकात्  १६४
योगाधमनविक्रीतं योगदानप्रतिग्रहम्
यत्र वाप्युपधिं पश्येत्तत्सर्वं विनिवर्तयेत्  १६५
ग्रहीता यदि नष्टः स्यात्कुटुम्बार्थे कृतो व्ययः
दातव्यं बान्धवैस्तत्स्यात्प्रविभक्तैरपि स्वतः  १६६
कुटुम्बार्थेऽध्यधीनोऽपि व्यवहारं यमाचरेत्
स्वदेशे वा विदेशे वा तं ज्यायान्न विचालयेत्  १६७
बलाद्दत्तं बलाद्भुक्तं बलाद्यच्चापि लेखितम्
सर्वान्बलकृतानर्थानकृतान्मनुरब्रवीत्  १६८
त्रयः परार्थे क्लिश्यन्ति साक्षिणः प्रतिभूः कुलम्

चत्वारस्तूपचीयन्ते विप्र आढ्यो वणिङ् नृपः  १६९
अनादेयं नाददीत परिक्षीणोऽपि पार्थिवः
न चादेयं समृद्धोऽपि सूक्ष्ममप्यर्थमुत्सृजेत्  १७०
अनादेयस्य चादानादादेयस्य च वर्जनात्
दौर्बल्यं ख्याप्यते राज्ञः स प्रेत्येह च नश्यति  १७१
स्वादानाद्वर्णसंसर्गात्त्वबलानां च रक्षणात्
बलं संजायते राज्ञः स प्रेत्येह च वर्धते  १७२
तस्माद्यम इव स्वामी स्वयं हित्वा प्रियाप्रिये
वर्तेत याम्यया वृत्त्या जितक्रोधो जितेन्द्रियः  १७३
यस्त्वधर्मेण कार्याणि मोहात्कुर्यान्नराधिपः
अचिरात्तं दुरात्मानं वशे कुर्वन्ति शत्रवः  १७४
कामक्रोधौ तु संयम्य योऽर्थान्धर्मेण पश्यति
प्रजास्तमनुवर्तन्ते समुद्रमिव सिन्धवः  १७५
यः साधयन्तं छन्देन वेदयेद्धनिकं नृपे
स राज्ञा तच्चतुर्भागं दाप्यस्तस्य च तद्धनम्  १७६
कर्मणापि समं कुर्याद्धनिकायाधमर्णिकः
समोऽवकृष्टजातिस्तु दद्याच्छ्रेयांस्तु तच्छनैः  १७७
अनेन विधिना राजा मिथो विवदतां नृणाम्
साक्षिप्रत्ययसिद्धानि कार्याणि समतां नयेत्  १७८
कुलजे वृत्तसंपन्ने धर्मज्ञे सत्यवादिनि
महापक्षे धनिन्यार्ये निक्षेपं निक्षिपेद्बुधः  १७९
यो यथा निक्षिपेद्धस्ते यमर्थं यस्य मानवः
स तथैव ग्रहीतव्यो यथा दायस्तथा ग्रहः  १८०
यो निक्षेपं याच्यमानो निक्षेप्तुर्न प्रयच्छति
स याच्यः प्राड्विवाकेन तन्निक्षेप्तुरसंनिधौ  १८१
साक्ष्यभावे प्रणिधिभिर्वयोरूपसमन्वितैः

अपदेशैश्च संन्यस्य हिरण्यं तस्य तत्त्वतः १८२
स यदि प्रतिपद्येत यथान्यस्तं यथाकृतम्
न तत्र विद्यते किं चिद्यत्परैरभियुज्यते १८३
तेषां न दद्याद्यदि तु तद्धिरण्यं यथाविधि
उभौ निगृह्य दाप्यः स्यादिति धर्मस्य धारणा १८४
निक्षेपोपनिधी नित्यं न देयौ प्रत्यनन्तरे
नश्यतो विनिपाते तावनिपाते त्वनाशिनौ १८५
स्वयमेव तु यौ दद्यान्मृतस्य प्रत्यनन्तरे
न स राज्ञाभियोक्तव्यो न निक्षेप्तुश्च बन्धुभिः १८६
अच्छलेनैव चान्विच्छेत्तमर्थं प्रीतिपूर्वकम्
विचार्य तस्य वा वृत्तं साम्नैव परिसाधयेत् १८७
निक्षेपेष्वेषु सर्वेषु विधिः स्यात्परिसाधने
समुद्रे नाप्नुयात्किं चिद्यदि तस्मान्न संहरेत् १८८
चौरैर्हृतं जलेनोढमग्निना दग्धमेव वा
न दद्याद्यदि तस्मात्स न संहरति किं चन १८९
निक्षेपस्यापहर्तारमनिक्षेप्तारमेव च
सर्वैरुपायैरन्विच्छेच्छपथैश्चैव वैदिकैः १९०
यो निक्षेपं नार्पयति यश्चानिक्षिप्य याचते
तावुभौ चौरवच्छास्यौ दाप्यौ वा तत्समं दमम् १९१
निक्षेपस्यापहर्तारं तत्समं दापयेद्दमम्
तथोपनिधिहर्तारमविशेषेण पार्थिवः १९२
उपधाभिश्च यः कश्चित्परद्रव्यं हरेन्नरः
ससहायः स हन्तव्यः प्रकाशं विविधैर्वधैः १९३
निक्षेपो यः कृतो येन यावांश्च कुलसंनिधौ
तावानेव स विज्ञेयो विब्रुवन्दण्डमर्हति १९४
मिथो दायः कृतो येन गृहीतो मिथ एव वा

मिथ एव प्रदातव्यो यथा दायस्तथा ग्रहः १९५
निक्षिप्तस्य धनस्यैवं प्रीत्योपनिहितस्य च
राजा विनिर्णयं कुर्यादक्षिण्वन्न्यासधारिणम् १९६
विक्रीणीते परस्य स्वं योऽस्वामी स्वाम्यसम्मतः
न तं नयेत साक्ष्यं तु स्तेनमस्तेनमानिनम् १९७
अवहार्यो भवेच्चैव सान्वयः षट्शतं दमम्
निरन्वयोऽनपसरः प्राप्तः स्याच्चौरकिल्बिषम् १९८
अस्वामिना कृतो यस्तु दायो विक्रय एव वा
अकृतः स तु विज्ञेयो व्यवहारे यथा स्थितिः १९९
संभोगो दृश्यते यत्र न दृश्येतागमः क्व चित्
आगमः कारणं तत्र न संभोग इति स्थितिः २००
विक्रयाद्यो धनं किं चिद्गृह्णीयत्कुलसंनिधौ
क्रयेण स विशुद्धं हि न्यायतो लभते धनम् २०१
अथ मूलमनाहार्यं प्रकाशक्रयशोधितः
अदण्ड्यो मुच्यते राज्ञा नाष्टिको लभते धनम् २०२
नान्यदन्येन संसृष्टरूपं विक्रयमर्हति
न चासारं न च न्यूनं न दूरेण तिरोहितम् २०३
अन्यां चेद्दर्शयित्वान्या वोढुः कन्या प्रदीयते
उभे त एकशुल्केन वहेदित्यब्रवीन्मनुः २०४
नोन्मत्ताया न कुष्ठिन्या न च या स्पृष्टमैथुना
पूर्वं दोषानभिख्याप्य प्रदाता दण्डमर्हति २०५
ऋत्विग्यदि वृतो यज्ञे स्वकर्म परिहापयेत्
तस्य कर्मानुरूपेण देयोऽंशः सहकर्तृभिः २०६
दक्षिणासु च दत्तासु स्वकर्म परिहापयन्
कृत्स्नमेव लभेतांशमन्येनैव च कारयेत् २०७
यस्मिन्कर्मणि यास्तु स्युरुक्ताः प्रत्यङ्गदक्षिणाः

स एव ता आददीत भजेरन्सर्व एव वा २०८
रथं हरेच्चाध्वर्युर्ब्रह्माधाने च वाजिनम्
होता वापि हरेदश्वमुद्गाता चाप्यनः क्रये २०९
सर्वेषामर्धिनो मुख्यास्तदर्धेनार्धिनोऽपरे
तृतीयिनस्तृतीयांशाश्चतुर्थांशाश्च पादिनः २१०
संभूय स्वानि कर्माणि कुर्वद्भिरिह मानवैः
अनेन विधियोगेन कर्तव्यांशप्रकल्पना २११
धर्मार्थं येन दत्तं स्यात्कस्मै चिद्याचते धनम्
पश्चाच्च न तथा तत्स्यान्न देयं तस्य तद्भवेत् २१२
यदि संसाधयेत्तत्तु दर्पाल्लोभेन वा पुनः
राज्ञा दाप्यः सुवर्णं स्यात्तस्य स्तेयस्य निष्कृतिः २१३
दत्तस्यैषोदिता धर्म्या यथावदनपक्रिया
अत ऊर्ध्वं प्रवक्ष्यामि वेतनस्यानपक्रियाम् २१४
भृतो नार्तो न कुर्याद्यो दर्पात्कर्म यथोदितम्
स दण्ड्यः कृष्णलान्यष्टौ न देयं चास्य वेतनम् २१५
आर्तस्तु कुर्यात्स्वस्थः सन्यथाभाषितमादितः
स दीर्घस्यापि कालस्य तल्लभेतैव वेतनम् २१६
यथोक्तमार्तः सुस्थो वा यस्तत्कर्म न कारयेत्
न तस्य वेतनं देयमल्पोनस्यापि कर्मणः २१७
एष धर्मोऽखिलेनोक्तो वेतनादानकर्मणः
अत ऊर्ध्वं प्रवक्ष्यामि धर्मं समयभेदिनाम् २१८
यो ग्रामदेशसंघानां कृत्वा सत्येन संविदम्
विसंवदेन्नरो लोभात्तं राष्ट्राद्विप्रवासयेत् २१९
निगृह्य दापयेच्चैनं समयव्यभिचारिणम्
चतुःसुवर्णान्षण्निष्कांश्शतमानं च राजकम् २२०
एतद्दण्डविधिं कुर्याद्धार्मिकः पृथिवीपतिः

ग्रामजातिसमूहेषु समयव्यभिचारिणाम्  २२१
क्रीत्वा विक्रीय वा किं चिद्यस्येहानुशयो भवेत्
सोऽन्तर्दशाहात्तद्द्रव्यं दद्याच्चैवाददीत वा  २२२
परेण तु दशाहस्य न दद्यान्नापि दापयेत्
आददानो ददच्चैव राज्ञा दण्ड्यौ शतानि षट्  २२३
यस्तु दोषवतीं कन्यामनाख्याय प्रयच्छति
तस्य कुर्यान्नृपो दण्डं स्वयं षण्णवतिं पणान्  २२४
अकन्येति तु यः कन्यां ब्रूयाद्द्वेषेण मानवः
स शतं प्राप्नुयाद्दण्डं तस्या दोषमदर्शयन्  २२५
पाणिग्रहणिका मन्त्राः कन्यास्वेव प्रतिष्ठिताः
नाकन्यासु क्व चिन्नृणां लुप्तधर्मक्रिया हि ताः  २२६
पाणिग्रहणिका मन्त्रा नियतं दारलक्षणम्
तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे  २२७
यस्मिन्यस्मिन्कृते कार्ये यस्येहानुशयो भवेत्
तमनेन विधानेन धर्म्ये पथि निवेशयेत्  २२८
पशुषु स्वामिनां चैव पालानां च व्यतिक्रमे
विवादं संप्रवक्ष्यामि यथावद्धर्मतत्त्वतः  २२९
दिवा वक्तव्यता पाले रात्रौ स्वामिनि तद्गृहे
योगक्षेमेऽन्यथा चेत्तु पालो वक्तव्यतामियात्  २३०
गोपः क्षीरभृतो यस्तु स दुह्याद्दशतो वराम्
गोस्वाम्यनुमते भृत्यः सा स्यात्पालेऽभृते भृतिः  २३१
नष्टं विनष्टं कृमिभिः श्वहतं विषमे मृतम्
हीनं पुरुषकारेण प्रदद्यात्पाल एव तु  २३२
विघुष्य तु हृतं चौरैर्न पालो दातुमर्हति
यदि देशे च काले च स्वामिनः स्वस्य शंसति  २३३
कर्णौ चर्म च वालांश्च बस्तिं स्नायुं च रोचनाम्

पशुषु स्वामिनां दद्यान्मृतेष्वङ्गानि दर्शयेत्   २३४
अजाविके तु संरुद्धे वृकैः पाले त्वनायति
यां प्रसह्य वृको हन्यात्पाले तत्किल्बिषं भवेत्  २३५
तासां चेदवरुद्धानां चरन्तीनां मिथो वने
यामुत्प्लुत्य वृको हन्यान्न पालस्तत्र किल्बिषी  २३६
धनुःशतं परीहारो ग्रामस्य स्यात्समन्ततः
शम्यापातास्त्रयो वापि त्रिगुणो नगरस्य तु  २३७
तत्रापरिवृतं धान्यं विहिंस्युः पशवो यदि
न तत्र प्रणयेद्दण्डं नृपतिः पशुरक्षिणाम्  २३८
वृतिं तत्र प्रकुर्वीत यामुष्ट्रो न विलोकयेत्
छिद्रं च वारयेत्सर्वं श्वसूकरमुखानुगम्   २३९
पथि क्षेत्रे परिवृते ग्रामान्तीयेऽथ वा पुनः
सपालः शतदण्डार्हो विपालान्वारयेत्पशून्  २४०
क्षेत्रेष्वन्येषु तु पशुः सपादं पणमर्हति
सर्वत्र तु सदो देयः क्षेत्रिकस्येति धारणा  २४१
अनिर्दशाहां गां सूतां वृषान्देवपशूंस्तथा
सपालान्वा विपालान्वा न दण्ड्यान्मनुरब्रवीत्  २४२
क्षेत्रियस्यात्यये दण्डो भागाद्दशगुणो भवेत्
ततोऽर्धदण्डो भृत्यानामज्ञानात्क्षेत्रिकस्य तु  २४३
एतद्विधानमातिष्ठेद्धार्मिकः पृथिवीपतिः
स्वामिनां च पशूनां च पालानां च व्यतिक्रमे  २४४
सीमां प्रति समुत्पन्ने विवादे ग्रामयोर्द्वयोः
ज्येष्ठे मासि नयेत्सीमां सुप्रकाशेषु सेतुषु  २४५
सीमावृक्षांश्च कुर्वीत न्यग्रोधाश्वत्थकिंशुकान्
शाल्मलीन्सालतालांश्च क्षीरिणश्चैव पादपान्  २४६
गुल्मान्वेणूंश्च विविधाञ्शमीवल्लीस्थलानि च

शरान्कुब्जकगुल्मांश्च तथा सीमा न नश्यति २४७
तडागान्युदपानानि वाप्यः प्रस्रवणानि च
सीमासंधिषु कार्याणि देवतायतनानि च २४८
उपछन्नानि चान्यानि सीमालिङ्गानि कारयेत्
सीमाज्ञाने नृणां वीक्ष्य नित्यं लोके विपर्ययम् २४९
अश्मनोऽस्थीनि गोवालांस्तुषान्भस्म कपालिकाः
करीषमिष्टकाङ्गारांश्शर्करा वालुकास्तथा २५०
यानि चैवंप्रकाराणि कालाद्भूमिर्न भक्षयेत्
तानि संधिषु सीमायामप्रकाशानि कारयेत् २५१
एतैर्लिङ्गैर्नयेत्सीमां राजा विवदमानयोः
पूर्वभुक्त्या च सततमुदकस्यागमेन च २५२
यदि संशय एव स्याल्लिङ्गानामपि दर्शने
साक्षिप्रत्यय एव स्यात्सीमावादविनिर्णयः २५३
ग्रामीयककुलानां च समक्षं सीम्नि साक्षिणः
प्रष्टव्याः सीमलिङ्गानि तयोश्चैव विवादिनोः २५४
ते पृष्तास्तु यथा ब्रूयुः समस्ताः सीम्नि निश्चयम्
निबध्नीयात्तथा सीमां सर्वांस्तांश्चैव नामतः २५५
शिरोभिस्ते गृहीत्वोर्वीं स्रग्विणो रक्तवाससः
सुकृतैः शापिथाः स्वैः स्वैर्नयेयुस्ते समञ्जसम् २५६
यथोक्तेन नयन्तस्ते पूयन्ते सत्याक्षिणः
विपरीतं नयन्तस्तु दाप्याः स्युर्द्विशतं दमम् २५७
साक्ष्यभावे तु चत्वारो ग्रामाः सामन्तवासिनः
सीमाविनिर्णयं कुर्युः प्रयता राजसंनिधौ २५८
सामन्तानामभावे तु मौलानां सीम्नि साक्षिणाम्
इमानप्यनुयुञ्जीत पुरुषान्वनगोचरान् २५९
व्याधान्शाकुनिकान्गोपान्कैवर्तान्मूलखानकान्

व्यालग्राहानुञ्छवृत्तीनन्यांश्च वनचारिणः २६०
ते पृष्टास्तु यथा ब्रूयुः सीमासंधिषु लक्षणम्
तत्तथा स्थापयेद्राजा धर्मेण ग्रामयोर्द्वयोः २६१
क्षेत्रकूपतडागानामारामस्य गृहस्य च
सामन्तप्रत्ययो ज्ञेयः सीमासेतुविनिर्णयः २६२
सामन्ताश्चेन्मृषा ब्रूयुः सेतौ विवादतां नृणाम्
सर्वे पृथक् पृथग्दण्ड्या राज्ञा मध्यमसाहसम् २६३
गृहं तडागमारामं क्षेत्रं वा भीषया हरन्
शतानि पञ्च दण्ड्यः स्यादज्ञानाद्द्विशतो दमः २६४
सीमायामविषह्यायां स्वयं राजैव धर्मवित्
प्रदिशेद्भूमिमेकेषामुपकारादिति स्थितिः २६५
एषोऽखिलेनाभिहितो धर्मः सीमाविनिर्णये
अत ऊर्ध्वं प्रवक्ष्यामि वाक्पारुष्यविनिर्णयम् २६६
शतं ब्राह्मणमाक्रुश्य क्षत्रियो दण्डमर्हति
वैश्योऽप्यर्धशतं द्वे वा शूद्रस्तु वधमर्हति २६७
पञ्चाशद्ब्राह्मणो दण्ड्यः क्षत्रियस्याभिशंसने
वैश्ये स्यादर्धपञ्चाशच्छूद्रे द्वादशको दमः २६८
समवर्णे द्विजातीनां द्वादशैव व्यतिक्रमे
वादेष्ववचनीयेषु तदेव द्विगुणं भवेत् २६९
एकजातिर्द्विजातींस्तु वाचा दारुणया क्षिपन्
जिह्वायाः प्राप्नुयाच्छेदं जघन्यप्रभवो हि सः २७०
नामजातिग्रहं त्वेषामभिद्रोहेण कुर्वतः
निक्षेप्योऽयोमयः शङ्कुर्ज्वलन्नास्ये दशाङ्गुलः २७१
धर्मोपदेशं दर्पेण विप्राणामस्य कुर्वतः
तप्तमासेचयेत्तैलं वक्त्रे श्रोत्रे च पार्थिवः २७२
श्रुतं देशं च जातिं च कर्म शरीरमेव च

वितथेन ब्रुवन्दर्पाद्दाप्यः स्याद्द्विशतं दमम् २७३
काणं वाप्यथ वा खञ्जमन्यं वापि तथाविधम्
तथ्येनापि ब्रुवन्दाप्यो दण्डं कार्षापणावरम् २७४
मातरं पितरं जायां भ्रातरं तनयं गुरुम्
आक्षारयन्शतं दाप्यः पन्थानं चाददद्गुरोः २७५
ब्राह्मणक्षत्रियाभ्यां तु दण्डः कार्यो विजानता
ब्राह्मणे साहसः पूर्वः क्षत्रिये त्वेव मध्यमः २७६
विश्शूद्रयोरेवमेव स्वजातिं प्रति तत्त्वतः
छेदवर्जं प्रणयनं दण्डस्येति विनिश्चयः २७७
एष दण्डविधिः प्रोक्तो वाक्पारुष्यस्य तत्त्वतः
अत ऊर्ध्वं प्रवक्ष्यामि दण्डपारुष्यनिर्णयम् २७८
येन केन चिदङ्गेन हिंस्याच्चेच्छ्रेष्ठमन्त्यजः
छेत्तव्यं तद्तदेवास्य तन्मनोरनुशासनम् २७९
पाणिमुद्यम्य दण्डं वा पाणिच्छेदनमर्हति
पादेन प्रहरन्कोपात्पादच्छेदनमर्हति २८०
सहासनमभिप्रेप्सुरुत्कृष्टस्यापकृष्टजः
कट्यां कृताङ्को निर्वास्यः स्फिचं वास्यावकर्तयेत् २८१
अवनिष्ठीवतो दर्पाद्द्वावोष्ठौ छेदयेन्नृपः
अवमूत्रयतो मेढ्रमवशर्धयतो गुदम् २८२
केशेषु गृह्णतो हस्तौ छेदयेदविचारयन्
पादयोर्दाढिकायां च ग्रीवायां वृषणेषु च २८३
त्वग्भेदकः शतं दण्ड्यो लोहितस्य च दर्शकः
मांसभेत्ता तु षट्निष्कान्प्रवास्यस्त्वस्थिभेदकः २८४
वनस्पतीनां सर्वेषामुपभोगो यथा यथा
यथा तथा दमः कार्यो हिंसायामिति धारणा २८५
मनुष्याणां पशूनां च दुःखाय प्रहृते सति

यथा यथा महद्दुःखं दरडं कुर्यात्तथा तथा २८६
अङ्गावपीडनायां च व्रणशोनितयोस्तथा
समुत्थानव्ययं दाप्यः सर्वदरडमथापि वा २८७
द्रव्याणि हिंस्याद्यो यस्य ज्ञानतोऽज्ञानतोऽपि वा
स तस्योत्पादयेत्तुष्टिं राज्ञे दद्याच्च तत्समम् २८८
चर्मचार्मिकभाराडेषु काष्ठलोष्टमयेषु
मूल्यात्पञ्चगुणो दराडः पुष्पमूलफलेषु च २८९
यानस्य चैव यातुश्च यानस्वामिन एव च
दशातिवर्तनान्याहुः शेषे दराडो विधीयते २९०
छिन्ननास्ये भग्नयुगे तिर्यक्प्रतिमुखागते
अक्षभङ्गे च यानस्य चक्रभङ्गे तथैव च २९१
छेदने चैव यन्त्राणां योक्त्ररश्म्योस्तथैव च
आक्रन्दे चाप्यपैहीति न दराडं मनुरब्रवीत् २९२
यत्रापवर्तते युग्यं वैगुरयात्प्राजकस्य तु
तत्र स्वामी भवेद्दराड्यो हिंसायां द्विशतं दमम् २९३
प्राजकश्चेद्भवेदाप्तः प्राजको दराडमर्हति
युग्यस्थाः प्राजकेऽनाप्ते सर्वे दराड्याः शतं शतम् २९४
स चेत्तु पथि संरुद्धः पशुभिर्वा रथेन वा
प्रमापयेत्प्राणभृतस्तत्र दराडोऽविचारितः २९५
मनुष्यमारणे क्षिप्रं चौरवत्किल्बिषं भवेत्
प्राणभृत्सु महत्स्वर्धं गोगजोष्ट्रहयादिषु २९६
क्षुद्रकाणां पशूनां तु हिंसायां द्विशतो दमः
पञ्चाशत्तु भवेद्दराडः शुभेषु मृगपक्षिषु २९७
गर्धभाजाविकानां तु दराडः स्यात्पञ्चमाषिकः
माषिकस्तु भवेद्दराडः श्वसूकरनिपातने २९८
भार्या पुत्रश्च दासश्च प्रेष्यो भ्रात्रा च सोदरः

प्राप्तापराधास्ताड्याः स्यू रज्ज्वा वेणुदलेन वा  २९९
पृष्ठतस्तु शरीरस्य नोत्तमाङ्गे कथं चन
अतोऽन्यथा तु प्रहरन्प्राप्तः स्याच्चौरकिल्बिषम्  ३००
एषोऽखिलेनाभिहितो दण्डपारुष्यनिर्णयः
स्तेनस्यातः प्रवक्ष्यामि विधिं दण्डविनिर्णये  ३०१
परमं यत्नमातिष्ठेत्स्तेनानां निग्रहे नृपः
स्तेनानां निग्रहादस्य यशो राष्ट्रं च वर्धते  ३०२
अभयस्य हि यो दाता स पूज्यः सततं नृपः
सत्रं हि वर्धते तस्य सदैवाभयदक्षिणम्  ३०३
सर्वतो धर्मषड्भागो राज्ञो भवति रक्षतः
अधर्मादपि षड्भागो भवत्यस्य ह्यरक्षतः  ३०४
यदधीते यद्यजते यद्ददाति यदर्चति
तस्य षड्भागभाग्राजा सम्यग्भवति रक्षणात्  ३०५
रक्षन्धर्मेण भूतानि राजा वध्यांश्च घातयन्
यजतेऽहरहर्यज्ञैः सहस्रशतदक्षिणैः  ३०६
योऽरक्षन्बलिमादत्ते करं शुल्कं च पार्थिवः
प्रतिभागं च दण्डं च स सद्यो नरकं व्रजेत्  ३०७
अरक्षितारं राजानं बलिषड्भागहारिणम्
तमाहुः सर्वलोकस्य समग्रमलहारकम्  ३०८
अनपेक्षितमर्यादं नास्तिकं विप्रलुंपकम्
अरक्षितारमत्तारं नृपं विद्यादधोगतिम्  ३०९
अधार्मिकं त्रिभिर्न्यायैर्निगृह्णीयात्प्रयत्नतः
निरोधनेन बन्धेन विविधेन वधेन च  ३१०
निग्रहेण हि पापानां साधूनां संग्रहेण च
द्विजातय इवेज्याभिः पूयन्ते सततं नृपाः  ३११
क्षन्तव्यं प्रभुणा नित्यं क्षिपतां कार्यिणां नृणाम्

बालवृद्धातुराणां च कुर्वता हितमात्मनः ३१२
यः क्षिप्तो मर्षयत्यार्तैस्तेन स्वर्गे महीयते
यस्त्वैश्वर्यान्न क्षमते नरकं तेन गच्छति ३१३
राजा स्तेनेन गन्तव्यो मुक्तकेशेन धावता
आचक्षाणेन तत्स्तेयमेवंकर्मास्मि शाधि माम् ३१४
स्कन्धेनादाय मुसलं लगुडं वापि खादिरम्
शक्तिं चोभयतस्तीक्ष्णामायसं दण्डमेव वा ३१५
शासनाद्वा विमोक्षाद्वा स्तेनः स्तेयाद्विमुच्यते
अशासित्वा तु तं राजा स्तेनस्याप्नोति किल्बिषम् ३१६
अन्नादे भ्रूणहा मार्ष्टि पत्यौ भार्यापचारिणी
गुरौ शिष्यश्च याज्यश्च स्तेनो राजनि किल्बिषम् ३१७
राजभिः कृतदण्डास्तु कृत्वा पापानि मानवाः
निर्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा ३१८
यस्तु रज्जुं घटं कूपाद्धरेद्भिन्द्याच्च यः प्रपाम्
स दण्डं प्राप्नुयान्माषं तच्च तस्मिन्समाहरेत् ३१९
धान्यं दशभ्यः कुम्भेभ्यो हरतोऽभ्यधिकं वधः
शेषेऽप्येकादशगुणं दाप्यस्तस्य च तद्धनम् ३२०
तथा धरिममेयानां शतादभ्यधिके वधः
सुवर्णरजतादीनामुत्तमानां च वाससाम् ३२१
पञ्चाशतस्त्वभ्यधिके हस्तच्छेदनमिष्यते
शेषे त्वेकादशगुणं मूल्याद्दण्डं प्रकल्पयेत् ३२२
पुरुषाणां कुलीनानां नारीणां च विशेषतः
मुख्यानां चैव रत्नानां हरणे वधमर्हति ३२३
महापशूनां हरणे शस्त्राणामौषधस्य च
कालमासाद्य कार्यं च दण्डं राजा प्रकल्पयेत् ३२४
गोषु ब्राह्मणसंस्थासु छुरिकायाश्च भेदने

पशूनां हरणे चैव सद्यः कार्योऽर्धपादिकः ३२५
सूत्रकार्पासकिरवानां गोमयस्य गुडस्य च
दध्नः क्षीरस्य तक्रस्य पानीयस्य तृणस्य च ३२६
वेणुवैदलभाराडानां लवणानां तथैव च
मृरामयानां च हरणे मृदो भस्मन एव च ३२७
मत्स्यानां पक्षिणां चैव तैलस्य च घृतस्य च
मांसस्य मधुनश्चैव यच्चान्यत्पशुसंभवम् ३२८
अन्येषां चैवमादीनां मद्यानामोदनस्य च
पक्वान्नानां च सर्वेषां तन्मुल्याद्द्विगुणो दमः ३२९
पुष्पेषु हरिते धान्ये गुल्मवल्लीनगेषु च
अन्येष्वपरिपूतेषु दराडः स्यात्पञ्चकृष्णलः ३३०
परिपूतेषु धान्येषु शाकमूलफलेषु च
निरन्वये शतं दराडः सान्वयेऽर्धशतं दमः ३३१
स्यात्साहसं त्वन्वयवत्प्रसभं कर्म यत्कृतम्
निरन्वयं भवेत्स्तेयं हृत्वापव्ययते च यत् ३३२
यस्त्वेतान्युपक्लृप्तानि द्रव्याणि स्तेनयेन्नरः
तमाद्यं दराडयेद्राजा यश्चाग्निं चोरयेद्गृहात् ३३३
येन येन यथाङ्गेन स्तेनो नृषु विचेष्टते
तत्तदेव हरेत्तस्य प्रत्यादेशाय पार्थिवः ३३४
पिताचार्यः सुहृन्माता भार्या पुत्रः पुरोहितः
नादराड्यो नाम राज्ञोऽस्ति यः स्वधर्मे न तिष्ठति ३३५
कार्षापणं भवेद्दराड्यो यत्रान्यः प्राकृतो जनः
तत्र राजा भवेद्दराड्यः सहस्रमिति धारणा ३३६
अष्टापाद्यं तु शूद्रस्य स्तेये भवति किल्बिषम्
षोडशैव तु वैश्यस्य द्वात्रिंशत्क्षत्रियस्य च ३३७
ब्राह्मणस्य चतुःषष्टिः पूर्णं वापि शतं भवेत्

द्विगुणा वा चतुःषष्टिस्तद्दोषगुणविद्धि सः ३३८
वानस्पत्यं मूलफलं दार्वग्न्यर्थं तथैव च
तृणं च गोभ्यो ग्रासार्थमस्तेयं मनुरब्रवीत् ३३९
योऽदत्तादायिनो हस्ताल्लिप्सेत ब्राह्मणो धनम्
याजनाध्यापनेनापि यथा स्तेनस्तथैव सः ३४०
द्विजोऽध्वगः क्षीणवृत्तिर्द्वाविक्षू द्वे च मूलके
आददानः परक्षेत्रान्न दण्डं दातुमर्हति ३४१
असंदितानां संदाता संदितानां च मोक्षकः
दासाश्वरथहर्ता च प्राप्तः स्याच्चोरकिल्बिषम् ३४२
अनेन विधिना राजा कुर्वाणः स्तेननिग्रहम्
यशोऽस्मिन्प्राप्नुयाल्लोके प्रेत्य चानुत्तमं सुखम् ३४३
ऐन्द्रं स्थानमभिप्रेप्सुर्यशश्चाक्षयमव्ययम्
नोपेक्षेत क्षणमपि राजा साहसिकं नरम् ३४४
वाग्दुष्टात्तस्कराच्चैव दण्डेनैव च हिंसतः
साहसस्य नरः कर्ता विज्ञेयः पापकृत्तमः ३४५
साहसे वर्तमानं तु यो मर्षयति पार्थिवः
स विनाशं व्रजत्याशु विद्वेषं चाधिगच्छति ३४६
न मित्रकारणाद्राजा विपुलाद्वा धनागमात्
समुत्सृजेत्साहसिकान्सर्वभूतभयावहान् ३४७
शस्त्रं द्विजातिभिर्ग्राह्यं धर्मो यत्रोपरुध्यते
द्विजातीनां च वर्णानां विप्लवे कालकारिते ३४८
आत्मनश्च परित्राणे दक्षिणानां च संगरे
स्त्रीविप्राभ्युपपत्तौ च घ्नन्धर्मेण न दुष्यति ३४९
गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम्
आततायिनमायान्तं हन्यादेवाविचारयन् ३५०
नाततायिवधे दोषो हन्तुर्भवति कश्चन

प्रकाशं वाप्रकाशं वा मन्युस्तं मन्युमृच्छति  ३५१
परदाराभिमर्शेषु प्रवृत्तान्नॄन्महीपतिः
उद्वेजनकरैर्दण्डैश्छिन्नयित्वा प्रवासयेत्  ३५२
तत्समुत्थो हि लोकस्य जायते वर्णसंकरः
येन मूलहरोऽधर्मः सर्वनाशाय कल्पते  ३५३
परस्य पत्न्या पुरुषः संभाषां योजयन्रहः
पूर्वमाक्षारितो दोषैः प्राप्नुयात्पूर्वसाहसम्  ३५४
यस्त्वनाक्षारितः पूर्वमभिभाषते कारणात्
न दोषं प्राप्नुयात्किं चिन्न हि तस्य व्यतिक्रमः  ३५५
परस्त्रियं योऽभिवदेत्तीर्थेऽरण्ये वनेऽपि वा
नदीनां वापि संभेदे स संग्रहणमाप्नुयात्  ३५६
उपचारक्रिया केलिः स्पर्शो भूषणवाससाम्
सह खट्वासनं चैव सर्वं संग्रहणं स्मृतम्  ३५७
स्त्रियं स्पृशेददेशे यः स्पृष्टो वा मर्षयेत्तया
परस्परस्यानुमते सर्वं संग्रहणं स्मृतम्  ३५८
अब्राह्मणः संग्रहणे प्राणान्तं दण्डमर्हति
चतुर्णामपि वर्णानां दारा रक्ष्यतमाः सदा  ३५९
भिक्षुका बन्दिनश्चैव दीक्षिताः कारवस्तथा
संभाषनं सह स्त्रीभिः कुर्युरप्रतिवारिताः  ३६०
न संभाषां परस्त्रीभिः प्रतिषिद्धः समाचरेत्
निषिद्धो भाषमाणस्तु सुवर्णं दण्डमर्हति  ३६१
नैष चारणदारेषु विधिर्नात्मोपजीविषु
सज्जयन्ति हि ते नारीर्निगूढाश्चारयन्ति च  ३६२
किं चिदेव तु दाप्यः स्यात्संभाषां ताभिराचरन्
प्रैष्यासु चैकभक्तासु रहः प्रव्रजितासु च  ३६३
योऽकामां दूषयेत्कन्यां स सद्यो वधमर्हति

सकामां दूषयंस्तुल्यो न वधं प्राप्नुयान्नरः ३६४
कन्याम्भजन्तीमुत्कृष्टं न किं चिदपि दापयेत्
जघन्यं सेवमानां तु संयतां वासयेद्गृहे ३६५
उत्तमां सेवमानस्तु जघन्यो वधमर्हति
शुल्कं दद्यात्सेवमानः समामिच्छेत्पिता यदि ३६६
अभिषह्य तु यः कन्यां कुर्याद्दर्पेण मानवः
तस्याशु कर्त्ये अङ्गुल्यौ दण्डं चार्हति षट्शतम् ३६७
सकामां दूषयंस्तुल्यो नाङ्गुलिछेदमाप्नुयात्
द्विशतं तु दमं दाप्यः प्रसङ्गविनिवृत्तये ३६८
कन्यैव कन्यां या कुर्यात्तस्याः स्याद्द्विशतो दमः
शुल्कं च द्विगुणं दद्याच्छिफाश्चैवाप्नुयाद्दश ३६९
या तु कन्यां प्रकुर्यात्स्त्री सा सद्यो मौण्ड्यमर्हति
अङ्गुल्योरेव वा छेदं खरेणोद्वहनं तथा ३७०
भर्तारं लङ्घयेद्या तु स्त्री ज्ञातिगुणदर्पिता
तां श्वभिः खादयेद्राजा संस्थाने बहुसंस्थिते ३७१
पुमांसं दाहयेत्पापं शयने तप्त आयसे
अभ्यादध्युश्च काष्ठानि तत्र दह्येत पापकृत् ३७२
संवत्सराभिशस्तस्य दुष्टस्य द्विगुणो दमः
व्रात्यया सह संवासे चाण्डाल्या तावदेव तु ३७३
शूद्रो गुप्तमगुप्तं वा द्वैजातं वर्णमावसन्
अगुप्तमङ्गसर्वस्वैर्गुप्तं सर्वेण हीयते ३७४
वैश्यः सर्वस्वदण्डः स्यात्संवत्सरनिरोधतः
सहस्रं क्षत्रियो दण्ड्यो मौण्ड्यं मूत्रेण चार्हति ३७५
ब्राह्मणीं यद्यगुप्तां तु गच्छेतां वैश्यपार्थिवौ
वैश्यं पञ्चशतं कुर्यात्क्षत्रियं तु सहस्रिणम् ३७६
उभावपि तु तावेव ब्राह्मण्या गुप्तया सह

विप्लुतौ शूद्रवद्दण्ड्यौ दग्धव्यौ वा कटाग्निना ३७७
सहस्रं ब्राह्मणो दण्ड्यो गुप्तां विप्रां बलाद्व्रजन्
शतानि पञ्च दण्ड्यः स्यादिच्छन्त्या सह संगतः ३७८
मौण्ड्यं प्राणान्तिकं दण्डो ब्राह्मणस्य विधीयते
इतरेषां तु वर्णानां दण्डः प्राणान्तिको भवेत् ३७९
न जातु ब्राह्मणं हन्यात्सर्वपापेष्वपि स्थितम्
राष्ट्रादेनं बहिः कुर्यात्समग्रधनमक्षतम् ३८०
न ब्राह्मणवधाद्भूयानधर्मो विद्यते भुवि
तस्मादस्य वधं राजा मनसापि न चिन्तयेत् ३८१
वैश्यश्चेत्क्षत्रियां गुप्तां वैश्यां वा क्षत्रियो व्रजेत्
यो ब्राह्मण्यामगुप्तायां तावुभौ दण्डमर्हतः ३८२
सहस्रं ब्राह्मणो दण्डं दाप्यो गुप्ते तु ते व्रजन्
शूद्रायां क्षत्रियविशोः साहस्रो वै भवेद्दमः ३८३
क्षत्रियायामगुप्तायां वैश्ये पञ्चशतं दमः
मूत्रेण मौण्ड्यमिच्छेत्तु क्षत्रियो दण्डमेव वा ३८४
अगुप्ते क्षत्रियावैश्ये शूद्रां वा ब्राह्मणो व्रजन्
शतानि पञ्च दण्ड्यः स्यात्सहस्रं त्वन्त्यजस्त्रियम् ३८५
यस्य स्तेनः पुरे नास्ति नान्यस्त्रीगो न दुष्टवाक्
न साहसिकदण्डघ्नो स राजा शक्रलोकभाक् ३८६
एतेषां निग्रहो राज्ञः पञ्चानां विषये स्वके
सांराज्यकृत्सजात्येषु लोके चैव यशस्करः ३८७
ऋत्विजं यस्त्यजेद्याज्यो याज्यं च र्त्विक् त्यजेद्यदि
शक्तं कर्मण्यदुष्टं च तयोर्दण्डः शतं शतम् ३८८
न माता न पिता न स्त्री न पुत्रस्त्यागमर्हति
त्यजन्नपतितानेतान्राज्ञा दण्ड्यः शतानि षट् ३८९
आश्रमेषु द्विजातीनां कार्ये विवदतां मिथः

न विब्रूयान्नृपो धर्मं चिकीर्षन्हितमात्मनः ३९०
यथार्हमेतानभ्यर्च्य ब्राह्मणैः सह पार्थिवः
सान्त्वेन प्रशमय्यादौ स्वधर्मं प्रतिपादयेत् ३९१
प्रतिवेश्यानुवेश्यौ च कल्याणे विंशतिद्विजे
अर्हावभोजयन्विप्रो दण्डमर्हति माषकम् ३९२
श्रोत्रियः श्रोत्रियं साधुं भूतिकृत्येष्वभोजयन्
तदन्नं द्विगुणं दाप्यो हिरण्यं चैव माषकम् ३९३
अन्धो जडः पीठसर्पी सप्तत्या स्थविरश्च यः
श्रोत्रियेषूपकुर्वंश्च न दाप्याः केन चित्करम् ३९४
श्रोत्रियं व्याधितार्तौ च बालवृद्धावकिंचनम्
महाकुलीनमार्यं च राजा संपूजयेत्सदा ३९५
शाल्मलीफलके श्लक्ष्णे नेनिज्यान्नेजकः शनैः
न च वासांसि वासोभिर्निर्हरेन्न च वासयेत् ३९६
तन्तुवायो दशपलं दद्यादेकपलाधिकम्
अतोऽन्यथा वर्तमानो दाप्यो द्वादशकं दमम् ३९७
शुल्कस्थानेषु कुशलाः सर्वपण्यविचक्षणाः
कुर्युरर्घं यथापण्यं ततो विंशं नृपो हरेत् ३९८
राज्ञः प्रख्यातभाण्डानि प्रतिषिद्धानि यानि च
ताणि निर्हरतो लोभात्सर्वहारं हरेन्नृपः ३९९
शुल्कस्थानं परिहरन्नकाले क्रयविक्रयी
मिथ्यावादी च संख्याने दाप्योऽष्टगुणमत्ययम् ४००
आगमं निर्गमं स्थानं तथा वृद्धिक्षयावुभौ
विचार्य सर्वपण्यानां कारयेत्क्रयविक्रयौ ४०१
पञ्चरात्रे पञ्चरात्रे पक्षे पक्षेऽथ वा गते
कुर्वीत चैषां प्रत्यक्षमर्घसंस्थापनं नृपः ४०२
तुलामानं प्रतीमानं सर्वं च स्यात्सुलक्षितम्

षट्सु षट्सु च मासेषु पुनरेव परीक्षयेत् ४०३
पणं यानं तरे दाप्यं पौरुषोऽर्धपणं तरे
पादं पशुश्च योषिच्च पादार्धं रिक्तकः पुमान् ४०४
भाण्डपूर्णानि यानानि तार्यं दाप्यानि सारतः
रिक्तभाण्डानि यत्किं चित्पुमांसश्चापरिच्छदाः ४०५
दीर्घाध्वनि यथादेशं यथाकालं तरो भवेत्
नदीतीरेषु तद्विद्यात्समुद्रे नास्ति लक्षणम् ४०६
गर्भिणी तु द्विमासादिस्तथा प्रव्रजितो मुनिः
ब्राह्मणा लिङ्गिनश्चैव न दाप्यास्तारिकं तरे ४०७
यन्नावि किं चिद्दाशानां विशीर्येतापराधतः
तद्दाशैरेव दातव्यं समागम्य स्वतोऽंशतः ४०८
एष नौयायिनामुक्तो व्यवहारस्य निर्णयः
दाशापराधतस्तोये दैविके नास्ति निग्रहः ४०९
वाणिज्यं कारयेद्वैश्यं कुसीदं कृषिमेव च
पशूनां रक्षणं चैव दास्यं शूद्रं द्विजन्मनाम् ४१०
क्षत्रियं चैव वैश्यं च ब्राह्मणो वृत्तिकर्शितौ
बिभृयादानृशंस्येन स्वानि कर्माणि कारयेत् ४११
दास्यं तु कारयंलोभाद्ब्राह्मणः संस्कृतान्द्विजान्
अनिच्छतः प्राभवत्याद्राज्ञा दण्ड्यः शतानि षट् ४१२
शूद्रं तु कारयेद्दास्यं क्रीतमक्रीतमेव वा
दास्यायैव हि सृष्टोऽसौ ब्राह्मणस्य स्वयंभुवा ४१३
न स्वामिना निसृष्टोऽपि शूद्रो दास्याद्विमुच्यते
निसर्गजं हि तत्तस्य कस्तस्मात्तदपोहति ४१४
ध्वजाहृतो भक्तदासो गृहजः क्रीतदत्त्रिमौ
पैत्रिको दण्डदासश्च सप्तैते दासयोनयः ४१५
भार्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः

यत्ते समधिगच्छन्ति यस्य ते तस्य तद्धनम्  ४१६
विस्रब्धं ब्राह्मणः शूद्राद्द्रव्योपादानमाचरेत्
न हि तस्यास्ति किं चित्स्वं भर्तृहार्यधनो हि सः  ४१७
वैश्यशूद्रौ प्रयत्नेन स्वानि कर्माणि कारयेत्
तौ हि च्युतौ स्वकर्मभ्यः क्षोभयेतामिदं जगत्  ४१८
अहन्यहन्यवेक्षेत कर्मान्तान्वाहनानि च
आयव्ययौ च नियतावाकरान्कोशमेव च  ४१९
एवं सर्वानिमान्राजा व्यवहारान्समापयन्
व्यपोह्य किल्बिषं सर्वं प्राप्नोति परमां गतिम्  ४२०

## नवमोऽध्यायः

पुरुषस्य स्त्रियाश्चैव धर्मे वर्त्मनि तिष्ठतोः
संयोगे विप्रयोगे च धर्मान्वक्ष्यामि शाश्वतान्  १
अस्वतन्त्राः स्त्रियः कार्याः पुरुषैः स्वैर्दिवानिशम्
विषयेषु च सज्जन्त्यः संस्थाप्या आत्मनो वशे  २
पिता रक्षति कौमारे भर्ता रक्षति यौवने
रक्षन्ति स्थविरे पुत्रा न स्त्री स्वातन्त्र्यमर्हति  ३
कालेऽदाता पिता वाच्यो वाच्यश्चानुपयन्पतिः
मृते भर्तरि पुत्रस्तु वाच्यो मातुररक्षिता  ४
सूक्ष्मेभ्योऽपि प्रसङ्गेभ्यः स्त्रियो रक्ष्या विशेषतः
द्वयोर्हि कुलयोः शोकमावहेयुररक्षिताः  ५
इमं हि सर्ववर्णानां पश्यन्तो धर्ममुत्तमम्
यतन्ते रक्षितुं भार्यां भर्तारो दुर्बला अपि  ६
स्वां प्रसूतिं चरित्रं च कुलमात्मानमेव च
स्वं च धर्मं प्रयत्नेन जायां रक्षन्हि रक्षति  ७
पतिर्भार्यां संप्रविश्य गर्भो भूत्वेह जायते

जायायास्तद्धि जायात्वं यदस्यां जायते पुनः  ८
यादृशं भजते हि स्त्री सुतं सूते तथाविधम्
तस्मात्प्रजाविशुद्ध्यर्थं स्त्रियं रक्षेत्प्रयत्नतः  ९
न कश्चिद्योषितः शक्तः प्रसह्य परिरक्षितुम्
एतैरुपाययोगैस्तु शक्यास्ताः परिरक्षितुम्  १०
अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत्
शौचे धर्मेऽन्नपक्त्यां च पारिणाह्यस्य वेक्षणे  ११
अरक्षिता गृहे रुद्धाः पुरुषैराप्तकारिभिः
आत्मानमात्मना यास्तु रक्षेयुस्ताः सुरक्षिताः  १२
पानं दुर्जनसंसर्गः पत्या च विरहोऽटनम्
स्वप्नोऽन्यगेहवासश्च नारीसंदूषणानि षट्  १३
नैता रूपं परीक्षन्ते नासां वयसि संस्थितिः
सुरूपं वा विरूपं वा पुमानित्येव भुञ्जते  १४
पौंश्चल्याच्चलचित्ताच्च नैस्नेह्याच्च स्वभावतः
रक्षिता यत्नतोऽपीह भर्तृष्वेता विकुर्वते  १५
एवं स्वभावं ज्ञात्वासां प्रजापतिनिसर्गजम्
परमं यत्नमातिष्ठेत्पुरुषो रक्षणं प्रति  १६
शय्यासनमलङ्कारं कामं क्रोधमनार्जवम्
द्रोहभावं कुचर्यां च स्त्रीभ्यो मनुरकल्पयत्  १७
नास्ति स्त्रीणां क्रिया मन्त्रैरिति धर्मे व्यवस्थितिः
निरिन्द्रिया ह्यमन्त्राश्च स्त्रीभ्यो ऽनृतमिति स्थितिः  १८
तथा च श्रुतयो बह्व्यो निगीता निगमेष्वपि
स्वालक्षण्यपरीक्षार्थं तासां शृणुत निष्कृतीः  १९
यन्मे माता प्रलुलुभे विचरन्त्यपतिव्रता
तन्मे रेतः पिता वृङ्क्तामित्यस्यैतन्निदर्शनम्  २०
ध्यायत्यनिष्टं यत्किं चित्पाणिग्राहस्य चेतसा

तस्यैष व्यभिचारस्य निह्नवः सम्यगुच्यते २१
यादृग्गुणेन भर्त्रा स्त्री संयुज्येत यथाविधि
तादृग्गुणा सा भवति समुद्रेणेव निम्नगा २२
अक्षमाला वसिष्ठेन संयुक्ताधमयोनिजा
शारङ्गी मन्दपालेन जगामाभ्यर्हणीयताम् २३
एताश्चान्याश्च लोकेऽस्मिन्नपकृष्टप्रसूतयः
उत्कर्षं योषितः प्राप्ताः स्वैः स्वैर्भर्तृगुणैः शुभैः २४
एषोदिता लोकयात्रा नित्यं स्त्रीपुंसयोः शुभा
प्रेत्येह च सुखोदर्कान्प्रजाधर्मान्निबोधत २५
प्रजनार्थं महाभागाः पूजार्हा गृहदीप्तयः
स्त्रियः श्रियश्च गेहेषु न विशेषोऽस्ति कश्चन २६
उत्पादनमपत्यस्य जातस्य परिपालनम्
प्रत्यहं लोकयात्रायाः प्रत्यक्षं स्त्री निबन्धनम् २७
अपत्यं धर्मकार्याणि शुश्रूषा रतिरुत्तमा
दाराधीनस्तथा स्वर्गः पितृणामात्मनश्च ह २८
पतिं या नाभिचरति मनोवाग्देहसंयता
सा भर्तृलोकानाप्नोति सद्भिः साध्वीति चोच्यते २९
व्यभिचारात्तु भर्तुः स्त्री लोके प्राप्नोति निन्द्यताम्
सृगालयोनिं चाप्नोति पापरोगैश्च पीड्यते ३०
पुत्रं प्रत्युदितं सद्भिः पूर्वजैश्च महर्षिभिः
विश्वजन्यमिमं पुण्यमुपन्यासं निबोधत ३१
भर्तरि पुत्रं विजानन्ति श्रुतिद्वैधं तु कर्तरि
आहुरुत्पादकं के चिदपरे क्षेत्रिणं विदुः ३२
क्षेत्रभूता स्मृता नारी बीजभूतः स्मृतः पुमान्
क्षेत्रबीजसमायोगात्संभवः सर्वदेहिनाम् ३३
विशिष्टं कुत्र चिद्बीजं स्त्रीयोनिस्त्वेव कुत्र चित्

उभयं तु समं यत्र सा प्रसूतिः प्रशस्यते  ३४
बीजस्य चैव योन्याश्च बीजमुत्कृष्टमुच्यते
सर्वभूतप्रसूतिर्हि बीजलक्षणलक्षिता  ३५
यादृशं तूप्यते बीजं क्षेत्रे कालोपपादिते
तादृग्रोहति तत्तस्मिन्बीजं स्वैर्व्यञ्जितं गुणैः  ३६
इयं भूमिर्हि भूतानां शाश्वती योनिरुच्यते
न च योनिगुणान्कांश्चिद्बीजं पुष्यति पुष्टिषु  ३७
भूमावप्येककेदारे कालोप्तानि कृषीवलैः
नानारूपाणि जायन्ते बीजानीह स्वभावतः  ३८
व्रीहयः शालयो मुद्गास्तिला माषास्तथा यवाः
यथाबीजं प्ररोहन्ति लशुनानीक्षवस्तथा  ३९
अन्यदुप्तं जातमन्यदित्येतन्नोपपद्यते
उप्यते यद्धि यद्बीजं तत्तदेव प्ररोहति  ४०
तत्प्राज्ञेन विनीतेन ज्ञानविज्ञानवेदिना
आयुष्कामेन वप्तव्यं न जातु परयोषिति  ४१
अत्र गाथा वायुगीताः कीर्तयन्ति पुराविदः
यथा बीजं न वप्तव्यं पुंसा परपरिग्रहे  ४२
नश्यतीषुर्यथा विद्धः खे विद्धमनुविध्यतः
तथा नश्यति वै क्षिप्रं बीजं परपरिग्रहे  ४३
पृथोरपीमां पृथिवीं भार्यां पूर्वविदो विदुः
स्थाणुच्छेदस्य केदारमाहुः शाल्यवतो मृगम्  ४४
एतावानेव पुरुषो यज्जायात्मा प्रजेति ह
विप्राः प्राहुस्तथा चैतद्यो भर्ता सा स्मृताङ्गना  ४५
न निष्क्रयविसर्गाभ्यां भर्तुर्भार्या विमुच्यते
एवं धर्मं विजानीमः प्राक् प्रजापतिनिर्मितम्  ४६
सकृदंशो निपतति सकृत्कन्या प्रदीयते

सकृदाह ददानीति त्रीण्येतानि सतां सकृत् ४७
यथा गोऽश्वोष्ट्रदासीषु महिष्यजाविकासु च
नोत्पादकः प्रजाभागी तथैवान्याङ्गनास्वपि ४८
येऽक्षेत्रिणो बीजवन्तः परक्षेत्रप्रवापिणः
ते वै सस्यस्य जातस्य न लभन्ते फलं क्व चित् ४९
यदन्यगोषु वृषभो वत्सानां जनयेच्छतम्
गोमिनामेव ते वत्सा मोघं स्कन्दितमार्षभम् ५०
तथैवाक्षेत्रिणो बीजं परक्षेत्रप्रवापिणः
कुर्वन्ति क्षेत्रिणामर्थं न बीजी लभते फलम् ५१
फलं त्वनभिसंधाय क्षेत्रिणां बीजिनां तथा
प्रत्यक्षं क्षेत्रिणामर्थो बीजाद्योनिर्गलीयसी ५२
क्रियाभ्युपगमात्त्वेतद्बीजार्थं यत्प्रदीयते
तस्येह भागिनौ दृष्टौ बीजी क्षेत्रिक एव च ५३
ओघवाताहृतं बीजं यस्य क्षेत्रे प्ररोहति
क्षेत्रिकस्यैव तद्बीजं न वप्ता लभते फलम् ५४
एष धर्मो गवाश्वस्य दास्युष्ट्राजाविकस्य च
विहंगमहिषीणां च विज्ञेयः प्रसवं प्रति ५५
एतद्वः सारफल्गुत्वं बीजयोन्योः प्रकीर्तितम्
अतः परं प्रवक्ष्यामि योषितां धर्ममापदि ५६
भ्रातुर्ज्येष्ठस्य भार्या या गुरुपत्न्यनुजस्य सा
यवीयसस्तु या भार्या स्नुषा ज्येष्ठस्य सा स्मृता ५७
ज्येष्ठो यवीयसो भार्यां यवीयान्वाग्रजस्त्रियम्
पतितौ भवतो गत्वा नियुक्तावप्यनापदि ५८
देवराद्वा सपिण्डाद्वा स्त्रिया सम्यग्नियुक्तया
प्रजेप्सिताधिगन्तव्या संतानस्य परिक्षये ५९
विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि

एकमुत्पादयेत्पुत्रं न द्वितीयं कथं चन ६०
द्वितीयमेके प्रजनं मन्यन्ते स्त्रीषु तद्विदः
अनिर्वृतं नियोगार्थं पश्यन्तो धर्मतस्तयोः ६१
विधवायां नियोगार्थे निर्वृत्ते तु यथाविधि
गुरुवच्च स्नुषावच्च वर्तेयातां परस्परम् ६२
नियुक्तौ यौ विधिं हित्वा वर्तेयातां तु कामतः
तावुभौ पतितौ स्यातां स्नुषागगुरुतल्पगौ ६३
नान्यस्मिन्विधवा नारी नियोक्तव्या द्विजातिभिः
अन्यस्मिन्हि नियुञ्जाना धर्मं हन्युः सनातनम् ६४
नोद्वाहिकेषु मन्त्रेषु नियोगः कीर्त्यते क्व चित्
न विवाहविधावुक्तं विधवावेदनं पुनः ६५
अयं द्विजैर्हि विद्वद्भिः पशुधर्मो विगर्हितः
मनुष्याणामपि प्रोक्तो वेने राज्यं प्रशासति ६६
स महीमखिलां भुञ्जन्राजर्षिप्रवरः पुरा
वर्णानां संकरं चक्रे कामोपहतचेतनः ६७
ततः प्रभृति यो मोहात्प्रमीतपतिकां स्त्रियम्
नियोजयत्यपत्यार्थं तं विगर्हन्ति साधवः ६८
यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः
तामनेन विधानेन निजो विन्देत देवरः ६९
यथाविध्यधिगम्यैनां शुक्लवस्त्रां शुचिव्रताम्
मिथो भजेता प्रसवात्सकृत्सकृदृतावृतौ ७०
न दत्त्वा कस्य चित्कन्यां पुनर्दद्याद्विचक्षणः
दत्त्वा पुनः प्रयच्छन्हि प्राप्नोति पुरुषानृतम् ७१
विधिवत्प्रतिगृह्यापि त्यजेत्कन्यां विगर्हिताम्
व्याधितां विप्रदुष्टां वा छद्मना चोपपादिताम् ७२
यस्तु दोषवतीं कन्यामनाख्यायोपपादयेत्

तस्य तद्वितथं कुर्यात्कन्यादातुर्दुरात्मनः ७३
विधाय वृत्तिं भार्यायाः प्रवसेत्कार्यवान्नरः
अवृत्तिकर्शिता हि स्त्री प्रदुष्येत्स्थितिमत्यपि ७४
विधाय प्रोषिते वृत्तिं जीवेन्नियममास्थिता
प्रोषिते त्वविधायैव जीवेच्छिल्पैरगर्हितैः ७५
प्रोषितो धर्मकार्यार्थं प्रतीक्ष्योऽष्टौ नरः समाः
विद्यार्थं षड् यशोऽर्थं वा कामार्थं त्रींस्तु वत्सरान् ७६
संवत्सरं प्रतीक्षेत द्विषन्तीं योषितं पतिः
ऊर्ध्वं संवत्सरात्त्वेनां दायं हृत्वा न संवसेत् ७७
अतिक्रामेत्प्रमत्तं या मत्तं रोगार्तमेव वा
सा त्रीन्मासान्परित्याज्या विभूषणपरिच्छदा ७८
उन्मत्तं पतितं क्लीबमबीजं पापरोगिणम्
न त्यागोऽस्ति द्विषन्त्याश्च न च दायापवर्तनम् ७९
मद्यपासाधुवृत्ता च प्रतिकूला च या भवेत्
व्याधिता वाधिवेत्तव्या हिंस्रार्थघ्नी च सर्वदा ८०
वन्ध्याष्टमेऽधिवेद्याब्दे दशमे तु मृतप्रजा
एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी ८१
या रोगिणी स्यात्तु हिता संपन्ना चैव शीलतः
सानुज्ञाप्याधिवेत्तव्या नावमान्या च कर्हि चित् ८२
अधिविन्ना तु या नारी निर्गच्छेद्रुषिता गृहात्
सा सद्यः संनिरोद्धव्या त्याज्या वा कुलसंनिधौ ८३
प्रतिषिद्धापि चेद्या तु मद्यमभ्युदयेष्वपि
प्रेक्षासमाजं गच्छेद्वा सा दण्ड्या कृष्णलानि षट् ८४
यदि स्वाश्चापराश्चैव विन्देरन्योषितो द्विजाः
तासां वर्णक्रमेण स्याज्ज्येष्ठ्यं पूजा च वेश्म च ८५
भर्तुः शरीरशुश्रूषां धर्मकार्यं च नैत्यकम्

स्वा चैव कुर्यात्सर्वेषां नास्वजातिः कथं चन   ८६
यस्तु तत्कारयेन्मोहात्सजात्या स्थितयान्यया
यथा ब्राह्मणचाण्डालः पूर्वदृष्टस्तथैव सः  ८७
उत्कृष्टायाभिरूपाय वराय सदृशाय च
अप्राप्तामपि तां तस्मै कन्यां दद्याद्यथाविधि  ८८
काममा मरणात्तिष्ठेद्गृहे कन्यर्तुमत्यपि
न चैवैनां प्रयच्छेत्तु गुणहीनाय कर्हि चित्  ८९
त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमती सती
ऊर्ध्वं तु कालादेतस्माद्विन्देत सदृशं पतिम्  ९०
अदीयमाना भर्तारमधिगच्छेद्यदि स्वयम्
नैनः किं चिदवाप्नोति न च यं साधिगच्छति  ९१
अलङ्कारं नाददीत पित्र्यं कन्या स्वयंवरा
मातृकं भ्रातृदत्तं वा स्तेना स्याद्यदि तं हरेत्  ९२
पित्रे न दद्याच्छुल्कं तु कन्यामृतुमतीं हरन्
स च स्वाम्यादतिक्रामेदृतूनां प्रतिरोधनात्  ९३
त्रिंशद्वर्षो वहेत्कन्यां हृद्यां द्वादशवार्षिकीम्
त्र्यष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वरः  ९४
देवदत्तां पतिर्भार्यां विन्दते नेच्छयात्मनः
तां साध्वीं बिभृयान्नित्यं देवानां प्रियमाचरन्  ९५
प्रजनार्थं स्त्रियः सृष्टाः संतानार्थं च मानवः
तस्मात्साधारणो धर्मः श्रुतौ पत्न्या सहोदितः  ९६
कन्यायां दत्तशुल्कायां म्रियेत यदि शुल्कदः
देवराय प्रदातव्या यदि कन्यानुमन्यते  ९७
आददीत न शूद्रोऽपि शुल्कं दुहितरं ददन्
शुल्कं हि गृह्णन्कुरुते छन्नं दुहितृविक्रयम्  ९८
एतत्तु न परे चक्रुर्नापरे जातु साधवः

यदन्यस्य प्रतिज्ञाय पुनरन्यस्य दीयते ९९
नानुशुश्रुम जात्वेतत्पूर्वेष्वपि हि जन्मसु
शुल्कसंज्ञेन मूल्येन छन्नं दुहितृविक्रयम् १००
अन्योन्यस्याव्यभिचारो भवेदामरणान्तिकः
एष धर्मः समासेन ज्ञेयः स्त्रीपुंसयोः परः १०१
तथा नित्यं यतेयातां स्त्रीपुंसौ तु कृतक्रियौ
यथा नाभिचरेतां तौ वियुक्तावितरेतरम् १०२
एष स्त्रीपुंसयोरुक्तो धर्मो वो रतिसंहितः
आपद्यपत्यप्राप्तिश्च दायधर्मं निबोधत १०३
ऊर्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः समम्
भजेरन्पैतृकं रिक्थमनीशास्ते हि जीवतोः १०४
ज्येष्ठ एव तु गृह्णीयात्पित्र्यं धनमशेषतः
शेषास्तमुपजीवेयुर्यथैव पितरं तथा १०५
ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः
पितॄणामनृणश्चैव स तस्मात्सर्वमर्हति १०६
यस्मिन्नृणं संनयति येन चानन्त्यमश्नुते
स एव धर्मजः पुत्रः कामजानितरान्विदुः १०७
पितेव पालयेत्पूत्रान्ज्येकठो भ्रातॄण् यवीयसः
पुत्रवच्चापि वर्तेरन्ज्येष्ठे भ्रातरि धर्मतः १०८
ज्येष्ठः कुलं वर्धयति विनाशयति वा पुनः
ज्येष्ठः पूज्यतमो लोके ज्येष्ठः सद्भिरगर्हितः १०९
यो ज्येष्ठो ज्येष्ठवृत्तिः स्यान्मातेव स पितेव सः
अज्येष्ठवृत्तिर्यस्तु स्यात्स संपूज्यस्तु बन्धुवत् ११०
एवं सह वसेयुर्वा पृथग्वा धर्मकाम्यया
पृथग्विवर्धते धर्मस्तस्माद्धर्म्या पृथक्क्रिया १११
ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरम्

ततोऽर्धं मध्यमस्य स्यात्तुरीयं तु यवीयसः १११२
ज्येष्ठश्चैव कनिष्ठश्च संहरेतां यथोदितम्
येऽन्ये ज्येष्ठकनिष्ठाभ्यां तेषां स्यान्मध्यमं धनम् ११३
सर्वेषां धनजातानामाददीताग्र्यमग्रजः
यच्च सातिशयं किं चिद्दशतश्चाप्नुयाद्वरम् ११४
उद्धारो न दशस्वस्ति संपन्नानां स्वकर्मसु
यत्किं चिदेव देयं तु ज्यायसे मानवर्धनम् ११५
एवं समुद्धृतोद्धारे समानंशान्प्रकल्पयेत्
उद्धारेऽनुद्धृते त्वेषामियं स्यादंशकल्पना ११६
एकाधिकं हरेज्ज्येष्ठः पुत्रोऽध्यर्धं ततोऽनुजः
अंशमंशं यवीयांस इति धर्मो व्यवस्थितः ११७
स्वेभ्योऽंशेभ्यस्तु कन्याभ्यः प्रदद्युर्भ्रातरः पृथक्
स्वात्स्वादंशाच्चतुर्भागं पतिताः स्युरदित्सवः ११८
अजाविकं सैकशफं न जातु विषमं भजेत्
अजाविकं तु विषमं ज्येष्ठस्यैव विधीयते ११९
यवीयाञ्ज्येष्ठभार्यायां पुत्रमुत्पादयेद्यदि
समस्तत्र विभागः स्यादिति धर्मो व्यवस्थितः १२०
उपसर्जनं प्रधानस्य धर्मतो नोपपद्यते
पिता प्रधानं प्रजने तस्माद्धर्मेण तं भजेत् १२१
पुत्रः कनिष्ठो ज्येष्ठायां कनिष्ठायां च पूर्वजः
कथं तत्र विभागः स्यादिति चेत्संशयो भवेत् १२२
एकं वृषभमुद्धारं संहरेत स पूर्वजः
ततोऽपरे ज्येष्ठवृषास्तदूनानां स्वमातृतः १२३
ज्येष्ठस्तु जातो ज्येष्ठायां हरेद्वृषभषोडशाः
ततः स्वमातृतः शेषा भजेरन्निति धारणा १२४
सदृशस्त्रीषु जातानां पुत्राणामविशेषतः

न मातृतो ज्यैष्ठ्यमस्ति जन्मतो ज्यैष्ठ्यमुच्यते १२५
जन्मज्येष्ठेन चाह्वानं सुब्रह्मण्यास्वपि स्मृतम्
यमयोश्चैव गर्भेषु जन्मतो ज्येष्ठता स्मृता १२६
अपुत्रोऽनेन विधिना सुतां कुर्वीत पुत्रिकाम्
यदपत्यं भवेदस्यां तन्मम स्यात्स्वधाकरम् १२७
अनेन तु विधानेन पुरा चक्रेऽथ पुत्रिकाः
विवृद्ध्यर्थं स्ववंशस्य स्वयं दक्षः प्रजापतिः १२८
ददौ स दश धर्माय कश्यपाय त्रयोदश
सोमाय राज्ञे सत्कृत्य प्रीतात्मा सप्तविंशतिम् १२९
यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा
तस्यामात्मनि तिष्ठन्त्यां कथमन्यो धनं हरेत् १३०
मातुस्तु यौतकं यत्स्यात्कुमारीभाग एव सः
दौहित्र एव च हरेदपुत्रस्याखिलं धनम् १३१
दौहित्रो ह्यखिलं रिक्थमपुत्रस्य पितुर्हरेत्
स एव दद्याद्द्वौ पिण्डौ पित्रे मातामहाय च १३२
पौत्रदौहित्रयोर्लोके न विशेषोऽस्ति धर्मतः
तयोर्हि मातापितरौ संभूतौ तस्य देहतः १३३
पुत्रिकायां कृतायां तु यदि पुत्रोऽनुजायते
समस्तत्र विभागः स्याज्ज्येष्ठता नास्ति हि स्त्रियाः १३४
अपुत्रायां मृतायां तु पुत्रिकायां कथं चन
धनं तत्पुत्रिकाभर्ता हरेतैवाविचारयन् १३५
अकृता वा कृता वापि यं विन्देत्सदृशात्सुतम्
पौत्री मातामहस्तेन दद्यात्पिण्डं हरेद्धनम् १३६
पुत्रेण लोकाञ्जयति पौत्रेणानन्त्यमश्नुते
अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपम् १३७
पुन्नाम्नो नरकाद्यस्मात्त्रायते पितरं सुतः

तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवा १३८
पौत्रदौहित्रयोर्लोके विशेषो नोपपद्यते
दौहित्रोऽपि ह्यमुत्रैनं संतारयति पौत्रवत् १३९
मातुः प्रथमतः पिण्डं निर्वपेत्पुत्रिकासुतः
द्वितीयं तु पितुस्तस्यास्तृतीयं तत्पितुः पितुः १४०
उपपन्नो गुणैः सर्वैः पुत्रो यस्य तु दत्त्रिमः
स हरेतैव तद्रिक्थं संप्राप्तोऽप्यन्यगोत्रतः १४१
गोत्ररिक्थे जनयितुर्न हरेद्दत्त्रिमः क्व चित्
गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा १४२
अनियुक्तासुतश्चैव पुत्रिण्याप्तश्च देवरात्
उभौ तौ नार्हतो भागं जारजातककामजौ १४३
नियुक्तायामपि पुमान्नार्यां जातोऽविधानतः
नैवार्हः पैतृकं रिक्थं पतितोत्पादितो हि सः १४४
हरेत्तत्र नियुक्तायां जातः पुत्रो यथाउरसः
क्षेत्रिकस्य तु तद्बीजं धर्मतः प्रसवश्च सः १४५
धनं यो बिभृयाद्भ्रातुर्मृतस्य स्त्रियमेव च
सोऽपत्यं भ्रातुरुत्पाद्य दद्यात्तस्यैव तद्धनम् १४६
या नियुक्तान्यतः पुत्रं देवराद्वाप्यवाप्नुयात्
तं कामजमरिक्थीयं वृथोत्पन्नं प्रचक्षते १४७
एतद्विधानं विज्ञेयं विभागस्यैकयोनिषु
बह्वीषु चैकजातानां नानास्त्रीषु निबोधत १४८
ब्राह्मणस्यानुपूर्व्येण चतस्रस्तु यदि स्त्रियः
तासां पुत्रेषु जातेषु विभागेऽयं विधिः स्मृतः १४९
कीनाशो गोवृषो यानमलङ्कारश्च वेश्म च
विप्रस्याउद्धारिकं देयमेकांशश्च प्रधानतः १५०
त्र्यंशं दायाद्धरेद्विप्रो द्वावंशौ क्षत्रियासुतः

वैश्याजः सार्धमेवांशमंशं शूद्रासुतो हरेत् १५१
सर्वं वा रिक्थजातं तद्दशधा परिकल्प्य च
धर्म्यं विभागं कुर्वीत विधिनानेन धर्मवित् १५२
चतुरोऽंशान्हरेद्विप्रस्त्रीनंशान्क्षत्रियासुतः
वैश्यापुत्रो हरेद्द्व्यंशं अंशं शूद्रासुतो हरेत् १५३
यद्यपि स्यात्तु सत्पुत्रो ऽप्यसत्पुत्रो ऽपि वा भवेत्
नाधिकं दशमाद्दद्याच्छूद्रापुत्राय धर्मतः १५४
ब्राह्मणक्षत्रियविशां शूद्रापुत्रो न रिक्थभाक्
यदेवास्य पिता दद्यात्तदेवास्य धनं भवेत् १५५
समवर्णासु वा जाताः सर्वे पुत्रा द्विजन्मनाम्
उद्धारं ज्यायसे दत्त्वा भजेरन्नितरे समम् १५६
शूद्रस्य तु सवर्णैव नान्या भार्या विधीयते
तस्यां जाताः समांशाः स्युर्यदि पुत्रशतं भवेत् १५७
पुत्रान्द्वादश यानाह नृणां स्वायंभुवो मनुः
तेषां षड् बन्धुदायादाः षड् अदायादबान्धवाः १५८
औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च
गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट् १५९
कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा
स्वयंदत्तश्च शौद्रश्च षड् अदायादबान्धवाः १६०
यादृशं फलमाप्नोति कुप्लवैः संतरञ्जलम्
तादृशं फलमाप्नोति कुपुत्रैः संतरंस्तमः १६१
यद्येकरिक्थिनौ स्यातामौरसक्षेत्रजौ सुतौ
यस्य यत्पैतृकं रिक्थं स तद्गृह्णीत नेतरः १६२
एक एवाउरसः पुत्रः पित्र्यस्य वसुनः प्रभुः
शेषाणामानृशंस्यार्थं प्रदद्यात्तु प्रजीवनम् १६३
षष्ठं तु क्षेत्रजस्यांशं प्रदद्यात्पैतृकाद्धनात्

औरसो विभजन्दायं पित्र्यं पञ्चममेव वा १६४
औरसक्षेत्रजौ पुत्रौ पितृरिक्थस्य भागिनौ
दशापरे तु क्रमशो गोत्ररिक्थांशभागिनः १६५
स्वक्षेत्रे संस्कृतायां तु स्वयमुत्पादयेद्धि यम्
तमौरसं विजानीयात्पुत्रं प्राथमकल्पिकम् १६६
यस्तल्पजः प्रमीतस्य क्लीबस्य व्याधितस्य वा
स्वधर्मेण नियुक्तायां स पुत्रः क्षेत्रजः स्मृतः १६७
माता पिता वा दद्यातां यमद्भिः पुत्रमापदि
सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्त्रिमः सुतः १६८
सदृशं तु प्रकुर्याद्यं गुणदोषविचक्षणम्
पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयश्च कृत्रिमः १६९
उत्पद्यते गृहे यस्तु न च ज्ञायेत कस्य सः
स गृहे गूढ उत्पन्नस्तस्य स्याद्यस्य तल्पजः १७०
मातापितृभ्यामुत्सृष्टं तयोरन्यतरेण वा
यं पुत्रं परिगृह्णीयादपविद्धः स उच्यते १७१
पितृवेश्मनि कन्या तु यं पुत्रं जनयेद्रहः
तं कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवम् १७२
या गर्भिणी संस्क्रियते ज्ञाताज्ञातापि वा सती
वोढुः स गर्भो भवति सहोढ इति चोच्यते १७३
क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात्
स क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि वा १७४
या पत्या वा परित्यक्ता विधवा वा स्वयेच्छया
उत्पादयेत्पुनर्भूत्वा स पौनर्भव उच्यते १७५
सा चेदक्षतयोनिः स्याद्गतप्रत्यागतापि वा
पौनर्भवेन भर्त्रा सा पुनः संस्कारमर्हति १७६
मातापितृविहीनो यस्त्यक्तो वा स्यादकारणात्

आत्मानमर्पयेद्यस्मै स्वयंदत्तस्तु स स्मृतः १७७
यं ब्राह्मणस्तु शूद्रायां कामादुत्पादयेत्सुतम्
स पारयन्नेव शवस्तस्मात्पारशवः स्मृतः १७८
दास्यां वा दासदास्यां वा यः शूद्रस्य सुतो भवेत्
सोऽनुज्ञातो हरेदंशमिति धर्मो व्यवस्थितः १७९
क्षेत्रजादीन्सुतानेतानेकादश यथोदितान्
पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः १८०
य एतेऽभिहिताः पुत्राः प्रसङ्गादन्यबीजजाः
यस्य ते बीजतो जातास्तस्य ते नेतरस्य तु १८१
भ्रातॄणामेकजातानामेकश्चेत्पुत्रवान्भवेत्
सर्वांस्तांस्तेन पुत्रेण पुत्रिणो मनुरब्रवीत् १८२
सर्वासामेकपत्नीनामेका चेत्पुत्रिणी भवेत्
सर्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुः १८३
श्रेयसः श्रेयसोऽलाभे पापीयान्रिक्थमर्हति
बहवश्चेत्तु सदृशाः सर्वे रिक्थस्य भागिनः १८४
न भ्रातरो न पितरः पुत्रा रिक्थहराः पितुः
पिता हरेदपुत्रस्य रिक्थं भ्रातर एव च १८५
त्रयाणामुदकं कार्यं त्रिषु पिण्डः प्रवर्तते
चतुर्थः संप्रदातैषां पञ्चमो नोपपद्यते १८६
अनन्तरः सपिण्डाद्यस्तस्य तस्य धनं भवेत्
अत ऊर्ध्वं सकुल्यः स्यादाचार्यः शिष्य एव वा १८७
सर्वेषामप्यभावे तु ब्राह्मणा रिक्थभागिनः
त्रैविद्याः शुचयो दान्तास्तथा धर्मो न हीयते १८८
अहार्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिः
इतरेषां तु वर्णानां सर्वाभावे हरेन्नृपः १८९
संस्थितस्यानपत्यस्य सगोत्रात्पुत्रमाहरेत्

तत्र यद्रिक्थजातं स्यात्तत्तस्मिन्प्रतिपादयेत्  १९०
द्वौ तु यौ विवदेयातां द्वाभ्यां जातौ स्त्रिया धने
तयोर्यद्यस्य पित्र्यं स्यात्तत्स गृह्णीत नेतरः  १९१
जनन्यां संस्थितायां तु समं सर्वे सहोदराः
भजेरन्मातृकं रिक्थं भगिन्यश्च सनाभयः  १९२
यास्तासां स्युर्दुहितरस्तासामपि यथार्हतः
मातामह्या धनात्किं चित्प्रदेयं प्रीतिपूर्वकम्  १९३
अध्यग्न्यध्यावाहनिकं दत्तं च प्रीतिकर्मणि
भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतम्  १९४
अन्वाधेयं च यद्दत्तं पत्या प्रीतेन चैव यत्
पत्यौ जीवति वृत्तायाः प्रजायास्तद्धनं भवेत्  १९५
ब्राह्मदैवार्षगान्धर्वप्राजापत्येषु यद्वसु
अप्रजायामतीतायां भर्तुरेव तदिष्यते  १९६
यत्त्वस्याः स्याद्धनं दत्तं विवाहेष्वासुरादिषु
अप्रजायामतीतायां मातापित्रोस्तदिष्यते  १९७
स्त्रियां तु यद्भवेद्वित्तं पित्रा दत्तं कथं चन
ब्राह्मणी तद्धरेत्कन्या तदपत्यस्य वा भवेत्  १९८
न निर्हारं स्त्रियः कुर्युः कुटुम्बाद्बहुमध्यगात्
स्वकादपि च वित्ताद्धि स्वस्य भर्तुरनाज्ञया  १९९
पत्यौ जीवति यः स्त्रीभिरलङ्कारो धृतो भवेत्
न तं भजेरन्दायादा भजमानाः पतन्ति ते  २००
अनंशौ क्लीबपतितौ जात्यन्धबधिरौ तथा
उन्मत्तजडमूकाश्च ये च के चिन्निरिन्द्रियाः  २०१
सर्वेषामपि तु न्याय्यं दातुं शक्त्या मनीषिणा
ग्रासाच्छादनमत्यन्तं पतितो ह्यददद्भवेत्  २०२
यद्यर्थिता तु दारैः स्यात्क्लीबादीनां कथं चन

तेषामुत्पन्नतन्तूनामपत्यं दायमर्हति २०३
यत्किं चित्पितरि प्रेते धनं ज्येष्ठोऽधिगच्छति
भागो यवीयसां तत्र यदि विद्यानुपालिनः २०४
अविद्यानां तु सर्वेषां ईहातश्चेद्धनं भवेत्
समस्तत्र विभागः स्यादपित्र्य इति धारणा २०५
विद्याधनं तु यद्यस्य तत्तस्यैव धनं भवेत्
मैत्र्यमौद्वाहिकं चैव माधुपर्किकमेव च २०६
भ्रातॄणां यस्तु नेहेत धनं शक्तः स्वकर्मणा
स निर्भाज्यः स्वकादंशात्किं चिद्दत्त्वोपजीवनम् २०७
अनुपघ्नन्पितृद्रव्यं श्रमेण यदुपार्जितम्
स्वयमीहितलब्धं तन्नाकामो दातुमर्हति २०८
पैतृकं तु पिता द्रव्यमनवाप्तं यदाप्नुयात्
न तत्पुत्रैर्भजेत्सार्धमकामः स्वयमर्जितम् २०९
विभक्ताः सह जीवन्तो विभजेरन्पुनर्यदि
समस्तत्र विभागः स्याज्ज्यैष्ठ्यं तत्र न विद्यते २१०
येषां ज्येष्ठः कनिष्ठो वा हीयेतांशप्रदानतः
म्रियेतान्यतरो वापि तस्य भागो न लुप्यते २११
सोदर्या विभजेरंस्तं समेत्य सहिताः समम्
भ्रातरो ये च संसृष्टा भागिन्यश्च सनाभयः २१२
यो ज्येठो विनिकुर्वीत लोभाद्भ्रातॄन्यवीयसः
सोऽज्येष्ठः स्यादभागश्च नियन्तव्यश्च राजभिः २१३
सर्व एव विकर्मस्था नार्हन्ति भ्रातरो धनम्
न चादत्त्वा कनिष्ठेभ्यो ज्येष्ठः कुर्वीत यौतकम् २१४
भ्रातॄणामविभक्तानां यद्युत्थानं भवेत्सह
न पुत्रभागं विषमं पिता दद्यात्कथं चन २१५
ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव हरेद्धनम्

संसृष्टास्तेन वा ये स्युर्विभजेत स तैः सह २१६
अनपत्यस्य पुत्रस्य माता दायमवाप्नुयात्
मातर्यपि च वृत्तायां पितुर्माता हरेद्धनम् २१७
ऋणे धने च सर्वस्मिन्प्रविभक्ते यथाविधि
पश्चाद्दृश्येत यत्किं चित्तत्सर्वं समतां नयेत् २१८
वस्त्रं पत्रमलङ्कारं कृतान्नमुदकं स्त्रियः
योगक्षेमं प्रचारं च न विभाज्यं प्रचक्षते २१९
अयमुक्तो विभागो वः पुत्राणां च क्रियाविधिः
क्रमशः क्षेत्रजादीनां द्यूतधर्मं निबोधत २२०
द्यूतं समाह्वयं चैव राजा राष्ट्रान्निवारयेत्
राजान्तकरणावेतौ द्वौ दोषौ पृथिवीक्षिताम् २२१
प्रकाशमेतत्तास्कर्यं यद्देवनसमाह्वयौ
तयोर्नित्यं प्रतीघाते नृपतिर्यत्नवान्भवेत् २२२
अप्राणिभिर्यत्क्रियते तल्लोके द्यूतमुच्यते
प्राणिभिः क्रियते यस्तु स विज्ञेयः समाह्वयः २२३
द्यूतं समाह्वयं चैव यः कुर्यात्कारयेत वा
तान्सर्वान्घातयेद्राजा शूद्रांश्च द्विजलिङ्गिनः २२४
कितवान्कुशीलवान्क्रूरान्पाषण्डस्थांश्च मानवान्
विकर्मस्थान्शौण्डिकांश्च क्षिप्रं निर्वासयेत्पुरात् २२५
एते राष्ट्रे वर्तमाना राज्ञः प्रछन्नतस्कराः
विकर्मक्रियया नित्यं बाधन्ते भद्रिकाः प्रजाः २२६
द्यूतमेतत्पुरा कल्पे दृष्टं वैरकरं महत्
तस्माद्द्यूतं न सेवेत हास्यार्थमपि बुद्धिमान् २२७
प्रच्छन्नं वा प्रकाशं वा तन्निषेवेत यो नरः
तस्य दण्डविकल्पः स्याद्यथेष्टं नृपतेस्तथा २२८
क्षत्रविश्शूद्रयोनिस्तु दण्डं दातुमशक्नुवन्

आनृण्यं कर्मणा गच्छेद्विप्रो दद्याच्छनैः शनैः २२९
स्त्रीबालोन्मत्तवृद्धानां दरिद्राणां च रोगिणाम्
शिफाविदलरज्ज्वाद्यैर्विदध्यान्नृपतिर्दमम् २३०
ये नियुक्तास्तु कार्येषु हन्युः कार्याणि कार्यिणाम्
धनोष्मणा पच्यमानास्तान्निःस्वान्कारयेन्नृपः २३१
कूटशासनकर्तॄंश्च प्रकृतीनां च दूषकान्
स्त्रीबालब्राह्मणघ्नांश्च हन्याद्द्विष्सेविनस्तथा २३२
तीरितं चानुशिष्टं च यत्र क्व चन यद्भवेत्
कृतं तद्धर्मतो विद्यान्न तद्भूयो निवर्तयेत् २३३
अमात्याः प्राड्विवाको वा यत्कुर्युः कार्यमन्यथा
तत्स्वयं नृपतिः कुर्यात्तान्सहस्रं च दण्डयेत् २३४
ब्रह्महा च सुरापश्च स्तेयी च गुरुतल्पगः
एते सर्वे पृथग्ज्ञेया महापातकिनो नराः २३५
चतुर्णामपि चैतेषां प्रायश्चित्तमकुर्वताम्
शारीरं धनसंयुक्तं दण्डं धर्म्यं प्रकल्पयेत् २३६
गुरुतल्पे भगः कार्यः सुरापाने सुराध्वजः
स्तेये च श्वपदं कार्यं ब्रह्महण्यशिराः पुमान् २३७
असंभोज्या ह्यसंयाज्या असंपाठ्या ऽविवाहिनः
चरेयुः पृथिवीं दीनाः सर्वधर्मबहिष्कृताः २३८
ज्ञातिसंबन्धिभिस्त्वेते त्यक्तव्याः कृतलक्षणाः
निर्दया निर्नमस्कारास्तन्मनोरनुशासनम् २३९
प्रायश्चित्तं तु कुर्वाणाः सर्ववर्णा यथोदितम्
नाङ्क्या राज्ञा ललाटे स्युर्दाप्यास्तूत्तमसाहसम् २४०
आगःसु ब्राह्मणस्यैव कार्यो मध्यमसाहसः
विवास्यो वा भवेद्राष्ट्रात्सद्रव्यः सपरिच्छदः २४१
इतरे कृतवन्तस्तु पापान्येतान्यकामतः

सर्वस्वहारमर्हन्ति कामतस्तु प्रवासनम् २४२
नाददीत नृपः साधुर्महापातकिनो धनम्
आददानस्तु तल्लोभात्तेन दोषेण लिप्यते २४३
अप्सु प्रवेश्य तं दण्डं वरुणायोपपादयेत्
श्रुतवृत्तोपपन्ने वा ब्राह्मणे प्रतिपादयेत् २४४
ईशो दण्डस्य वरुणो राज्ञां दण्डधरो हि सः
ईशः सर्वस्य जगतो ब्राह्मणो वेदपारगः २४५
यत्र वर्जयते राजा पापकृद्भ्यो धनागमम्
तत्र कालेन जायन्ते मानवा दीर्घजीविनः २४६
निष्पद्यन्ते च सस्यानि यथोप्तानि विशां पृथक्
बालाश्च न प्रमीयन्ते विकृतं च न जायते २४७
ब्राह्मणान्बाधमानं तु कामादवरवर्णजम्
हन्याच्चित्रैर्वधोपायैरुद्वेजनकरैर्नृपः २४८
यावानवध्यस्य वधे तावान्वध्यस्य मोक्षणे
अधर्मो नृपतेर्दृष्टो धर्मस्तु विनियच्छतः २४९
उदितोऽयं विस्तरशो मिथो विवादमानयोः
अष्टादशसु मार्गेषु व्यवहारस्य निर्णयः २५०
एवं धर्म्याणि कार्याणि सम्यक् कुर्वन्महीपतिः
देशानलब्धान्लिप्सेत लब्धांश्च परिपालयेत् २५१
सम्यग्निविष्टदेशस्तु कृतदुर्गश्च शास्त्रतः
कण्टकोद्धरणे नित्यमातिष्ठेद्यत्नमुत्तमम् २५२
रक्षनादार्यवृत्तानां कण्टकानां च शोधनात्
नरेन्द्रास्त्रिदिवं यान्ति प्रजापालनतत्पराः २५३
अशासंस्तस्करान्यस्तु बलिं गृह्णाति पार्थिवः
तस्य प्रक्षुभ्यते राष्ट्रं स्वर्गाच्च परिहीयते २५४
निर्भयं तु भवेद्यस्य राष्ट्रं बाहुबलाश्रितम्

तस्य तद्वर्धते नित्यं सिच्यमान इव द्रुमः २५५
द्विविधांस्तस्करान्विद्यात्परद्रव्यापहारकान्
प्रकाशांश्चाप्रकाशांश्च चारचक्षुर्महीपतिः २५६
प्रकाशवञ्चकास्तेषां नानापण्योपजीविनः
प्रच्छन्नवञ्चकास्त्वेते ये स्तेनाटविकादयः २५७
उत्कोचकाश्चाउपधिका वञ्चकाः कितवास्तथा
मङ्गलादेशवृत्ताश्च भद्राश्चेक्षणिकैः सह २५८
असम्यक्कारिणश्चैव महामात्राश्चिकित्सकाः
शिल्पोपचारयुक्ताश्च निपुणाः पण्ययोषितः २५९
एवमादीन्विजानीयात्प्रकाशांल् लोककण्टकान्
निगूढचारिणश्चान्याननार्यानार्यलिङ्गिनः २६०
तान्विदित्वा सुचरितैर्गूढैस्तत्कर्मकारिभिः
चारैश्चानेकसंस्थानैः प्रोत्साद्य वशमानयेत् २६१
तेषां दोषानभिख्याप्य स्वे स्वे कर्मणि तत्त्वतः
कुर्वीत शासनं राजा सम्यक् सारापराधतः २६२
न हि दण्डादृते शक्यः कर्तुं पापविनिग्रहः
स्तेनानां पापबुद्धीनां निभृतं चरतां क्षितौ २६३
सभाप्रपापूपशालावेशमद्यान्नविक्रयाः
चतुष्पथांश्चैत्यवृक्षाः समाजाः प्रेक्षणानि च २६४
जीर्णोद्यानान्यरण्यानि कारुकावेशनानि च
शून्यानि चाप्यगाराणि वनान्युपवनानि च २६५
एवंविधान्नृपो देशान्गुल्मैः स्थावरजङ्गमैः
तस्करप्रतिषेधार्थं चारैश्चाप्यनुचारयेत् २६६
तत्सहायैरनुगतैर्नानाकर्मप्रवेदिभिः
विद्यादुत्सादयेच्चैव निपुणैः पूर्वतस्करैः २६७
भक्ष्यभोज्योपदेशैश्च ब्राह्मणानां च दर्शनैः

शौर्यकर्मापदेशैश्च कुर्युस्तेषां समागमम्  २६८
ये तत्र नोपसर्पेयुर्मूलप्रणिहिताश्च ये
तान्प्रसह्य नृपो हन्यात्समित्रज्ञातिबान्धवान्  २६९
न होढेन विना चौरं घातयेद्धार्मिको नृपः
सहोढं सोपकरणं घातयेदविचारयन्  २७०
ग्रामेष्वपि च ये के चिच्चौराणां भक्तदायकाः
भाण्डावकाशदाश्चैव सर्वांस्तानपि घातयेत्  २७१
राष्ट्रेषु रक्षाधिकृतान्सामन्तांश्चैव चोदितान्
अभ्याघातेषु मध्यस्थाशिष्याच्चौरानिव द्रुतम्  २७२
यश्चापि धर्मसमयात्प्रच्युतो धर्मजीवनः
दण्डेनैव तमप्योषेत्स्वकाद्धर्माद्धि विच्युतम्   २७३
ग्रामघाते हिताभङ्गे पथि मोषाभिदर्शने
शक्तितो नाभिधावन्तो निर्वास्याः सपरिच्छदाः  २७४
राज्ञः कोशापहर्तॄंश्च  प्रतिकूलेषु च स्थितान्
घातयेद्विविधैर्दण्डैररीणां चोपजापकान्  २७५
संधिं छित्त्वा तु ये चौर्यं रात्रौ कुर्वन्ति तस्कराः
तेषां छित्त्वा नृपो हस्तौ तीक्ष्णे शूले निवेशयेत्  २७६
अङ्गुलीर्ग्रन्थिभेदस्य छेदयेत्प्रथमे ग्रहे
द्वितीये हस्तचरणौ तृतीये वधमर्हति  २७७
अग्निदान्भक्तदांश्चैव तथा शस्त्रावकाशदान्
संनिधातॄंश्च मोषस्य हन्याच्चौरमिवेश्वरः  २७८
तडागभेदकं हन्यादप्सु शुद्धवधेन वा
यद्वापि प्रतिसंस्कुर्याद्दाप्यस्तूत्तमसाहसम्  २७९
कोष्ठागारायुधागारदेवतागारभेदकान्
हस्त्यश्वरथहर्तॄंश्च हन्यादेवाविचारयन्  २८०
यस्तु पूर्वनिविष्टस्य तडागस्योदकं हरेत्

आगमं वाप्यपां भिन्द्यात्स दाप्यः पूर्वसाहसम्  २८१
समुत्सृजेद्राजमार्गे यस्त्वमेध्यमनापदि
स द्वौ कार्षापणौ दद्यादमेध्यं चाशु शोधयेत्  २८२
आपद्गतोऽथ वा वृद्धा गर्भिणी बाल एव वा
परिभाषणमर्हन्ति तच्च शोध्यमिति स्थितिः  २८३
चिकित्सकानां सर्वेषां मिथ्याप्रचरतां दमः
अमानुषेषु प्रथमो मानुषेषु तु मध्यमः  २८४
संक्रमध्वजयष्टीनां प्रतिमानां च भेदकः
प्रतिकुर्याच्च तत्सर्वं पञ्च दद्याच्छतानि च  २८५
अदूषितानां द्रव्याणां दूषणे भेदने तथा
मणीनामपवेधे च दण्डः प्रथमसाहसः  २८६
समैर्हि विषमं यस्तु चरेद्वै मूल्यतोऽपि वा
समाप्नुयाद्दमं पूर्वं नरो मध्यममेव वा  २८७
बन्धनानि च सर्वाणि राजा मार्गे निवेशयेत्
दुःखिता यत्र दृश्येरन्विकृताः पापकारिणह्  २८८
प्राकारस्य च भेत्तारं परिखाणां च पूरकम्
द्वाराणां चैव भङ्क्तारं क्षिप्रमेव प्रवासयेत्  २८९
अभिचारेषु सर्वेषु कर्तव्यो द्विशतो दमः
मूलकर्मणि चानाप्तेः कृत्यासु विविधासु च   २९०
अबीजविक्रयी चैव बीजोत्कृष्टा तथैव च
मर्यादाभेदकश्चैव विकृतं प्राप्नुयाद्वधम्  २९१
सर्वकण्टकपापिष्ठं हेमकारं तु पार्थिवः
प्रवर्तमानमन्याये छेदयेल्लवशः क्षुरैः  २९२
सीताद्रव्यापहरणे शस्त्राणामौषधस्य च
कालमासाद्य कार्यं च राजा दण्डं प्रकल्पयेत्  २९३
स्वाम्यमात्यौ पुरं राष्ट्रं कोशदण्डौ सुहृत्तथा

सप्त प्रकृतयो ह्येताः सप्ताङ्गं राज्यमुच्यते २९४
सप्तानां प्रकृतीनां तु राज्यस्यासां यथाक्रमम्
पूर्वं पूर्वं गुरुतरं जानीयाद्व्यसनं महत् २९५
सप्ताङ्गस्येह राज्यस्य विष्टब्धस्य त्रिदण्डवत्
अन्योन्यगुणवैशेष्यान्न किं चिदतिरिच्यते २९६
तेषु तेषु तु कृत्येषु तत्तदङ्गं विशिष्यते
येन यत्साध्यते कार्यं तत्तस्मिन्श्रेष्ठमुच्यते २९७
चारेणोत्साहयोगेन क्रिययैव च कर्मणाम्
स्वशक्तिं परशक्तिं च नित्यं विद्यान्महीपतिः २९८
पीडनानि च सर्वाणि व्यसनानि तथैव च
आरभेत ततः कार्यं संचिन्त्य गुरुलाघवम् २९९
आरभेतैव कर्माणि श्रान्तः श्रान्तः पुनः पुनः
कर्माण्यारभमाणं हि पुरुषं श्रीर्निषेवते ३००
कृतं त्रेतायुगं चैव द्वापरं कलिरेव च
राज्ञो वृत्तानि सर्वाणि राजा हि युगमुच्यते ३०१
कलिः प्रसुप्तो भवति स जाग्रद्द्वापरं युगम्
कर्मस्वभ्युद्यतस्त्रेता विचरंस्तु कृतं युगम् ३०२
इन्द्रस्यार्कस्य वायोश्च यमस्य वरुणस्य च
चन्द्रस्याग्नेः पृथिव्याश्च तेजोवृत्तं नृपश्चरेत् ३०३
वार्षिकांश्चतुरो मासान्यथेन्द्रोऽभिप्रवर्षति
तथाभिवर्षेत्स्वं राष्ट्रं कामैरिन्द्रव्रतं चरन् ३०४
अष्टौ मासान्यथादित्यस्तोयं हरति रश्मिभिः
तथा हरेत्करं राष्ट्रान्नित्यमर्कव्रतं हि तत् ३०५
प्रविश्य सर्वभूतानि यथा चरति मारुतः
तथा चारैः प्रवेष्टव्यं व्रतमेतद्धि मारुतम् ३०६
यथा यमः प्रियद्वेष्यौ प्राप्ते काले नियच्छति

तथा राज्ञा नियन्तव्याः प्रजास्तद्धि यमव्रतम् ३०७
वरुणेन यथा पाशैर्बद्ध एवाभिदृश्यते
तथा पापान्निगृह्णीयाद्व्रतमेतद्धि वारुणम् ३०८
परिपूर्णं यथा चन्द्रं दृष्ट्वा हृष्यन्ति मानवाः
तथा प्रकृतयो यस्मिन्स चान्द्रव्रतिको नृपः ३०९
प्रतापयुक्तस्तेजस्वी नित्यं स्यात्पापकर्मसु
दुष्टसामन्तहिंस्रश्च तदाग्नेयं व्रतं स्मृतम् ३१०
यथा सर्वाणि भूतानि धरा धारयते समम्
तथा सर्वाणि भूतानि बिभ्रतः पार्थिवं व्रतम् ३११
एतैरुपायैरन्यैश्च युक्तो नित्यमतन्द्रितः
स्तेनान्राजा निगृह्णीयात्स्वराष्ट्रे पर एव च ३१२
परामप्यापदं प्राप्तो ब्राह्मणान्न प्रकोपयेत्
ते ह्येनं कुपिता हन्युः सद्यः सबलवाहनम् ३१३
यैः कृतः सर्वभक्ष्योऽग्निरपेयश्च महोदधिः
क्षयी चाप्यायितः सोमः को न नश्येत्प्रकोप्य तान् ३१४
लोकानन्यान्सृजेयुर्ये लोकपालांश्च कोपिताः
देवान्कुर्युरदेवांश्च कः क्षिण्वंस्तान्समृध्नुयात् ३१५
यानुपाश्रित्य तिष्ठन्ति लोका देवाश्च सर्वदा
ब्रह्म चैव धनं येषां को हिंस्यात्ताञ् जिजीविषुः ३१६
अविद्वांश्चैव विद्वांश्च ब्राह्मणो दैवतं महत्
प्रणीतश्चाप्रणीतश्च यथाग्निर्दैवतं महत् ३१७
श्मशानेष्वपि तेजस्वी पावको नैव दुष्यति
हूयमानश्च यज्ञेषु भूय एवाभिवर्धते ३१८
एवं यद्यप्यनिष्टेषु वर्तन्ते सर्वकर्मसु
सर्वथा ब्राह्मणाः पूज्याः परमं दैवतं हि तत् ३१९
क्षत्रस्यातिप्रवृद्धस्य ब्राह्मणान्प्रति सर्वशः

ब्रह्मैव संनियन्तृ स्यात्क्षत्रं हि ब्रह्मसंभवम्  ३२०
अद्भ्योऽग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितम्
तेषां सर्वत्रगं तेजः स्वासु योनिषु शाम्यति  ३२१
नाब्रह्म क्षत्रमृध्नोति नाक्षत्रं ब्रह्म वर्धते
ब्रह्म क्षत्रं च संपृक्तमिह चामुत्र वर्धते  ३२२
दत्त्वा धनं तु विप्रेभ्यः सर्वदण्डसमुत्थितम्
पुत्रे राज्यं समासृज्य कुर्वीत प्रायणं रणे  ३२३
एवं चरन्सदा युक्तो राजधर्मेषु पार्थिवः
हितेषु चैव लोकस्य सर्वान्भृत्यान्नियोजयेत्  ३२४
एषोऽखिलः कर्मविधिरुक्तो राज्ञः सनातनः
इमं कर्मविधिं विद्यात्क्रमशो वैश्यशूद्रयोः  ३२५
वैश्यस्तु कृतसंस्कारः कृत्वा दारपरिग्रहम्
वार्तायां नित्ययुक्तः स्यात्पशूनां चैव रक्षणे  ३२६
प्रजापतिर्हि वैश्याय सृष्ट्वा परिददे पशून्
ब्राह्मणाय च राज्ञे च सर्वाः परिददे प्रजाः  ३२७
न च वैश्यस्य कामः स्यान्न रक्षेयं पशूनिति
वैश्ये चेच्छति नान्येन रक्षितव्याः कथं चन  ३२८
मणिमुक्ताप्रवालानां लोहानां तान्तवस्य च
गन्धानां च रसानां च विद्यादर्घबलाबलम्  ३२९
बीजानामुप्तिविच्च स्यात्क्षेत्रदोषगुणस्य च
मानयोगं च जानीयात्तुलायोगांश्च सर्वशः  ३३०
सारासारं च भाण्डानां देशानां च गुणागुणान्
लाभालाभं च पण्यानां पशूनां परिवर्धनम्  ३३१
भृत्यानां च भृतिं विद्याद्भाषाश्च विविधा नृणां
द्रव्याणां स्थानयोगांश्च क्रयविक्रयमेव च  ३३२
धर्मेण च द्रव्यवृद्धावातिष्ठेद्यत्नमुत्तमम्

दद्याच्च सर्वभूतानामन्नमेव प्रयत्नतः ३३३
विप्राणां वेदविदुषां गृहस्थानां यशस्विनाम्
शुश्रूषैव तु शूद्रस्य धर्मो नैश्रेयसः परः ३३४
शुचिरुत्कृष्टशुश्रूषुर्मृदुवागनहंकृतः
ब्राह्मणाद्याश्रयो नित्यमुत्कृष्टां जातिमश्नुते ३३५
एषोऽनापदि वर्णानामुक्तः कर्मविधिः शुभः
आपद्यपि हि यस्तेषां क्रमशस्तन्निबोधत ३३६

## दशमोऽध्यायः

अधीयीरंस्त्रयो वर्णाः स्वकर्मस्था द्विजातयः
प्रब्रूयाद्ब्राह्मणस्त्वेषां नेतराविति निश्चयः १
सर्वेषां ब्राह्मणो विद्याद्वृत्त्युपायान्यथाविधि
प्रब्रूयादितरेभ्यश्च स्वयं चैव तथा भवेत् २
वैशेष्यात्प्रकृतिश्रैष्ठ्यान्नियमस्य च धारणात्
संस्कारस्य विशेषाच्च वर्णानां ब्राह्मणः प्रभुः ३
ब्राह्मणः क्षत्रियो वैश्यस्त्रयो वर्णा द्विजातयः
चतुर्थ एकजातिस्तु शूद्रो नास्ति तु पञ्चमः ४
सर्ववर्णेषु तुल्यासु पत्नीष्वक्षतयोनिषु
आनुलोम्येन संभूता जात्या ज्ञेयास्त एव ते ५
स्त्रीष्वनन्तरजातासु द्विजैरुत्पादितान्सुतान्
सदृशानेव तानाहुर्मातृदोषविगर्हितान् ६
अनन्तरासु जातानां विधिरेष सनातनः
द्व्येकान्तरासु जातानां धर्म्यं विद्यादिमं विधिम् ७
ब्राह्मणाद्वैश्यकन्यायामम्बष्ठो नाम जायते
निषादः शूद्रकन्यायां यः पारशव उच्यते ८
क्षत्रियाच्छूद्रकन्यायां क्रूराचारविहारवान्

क्षत्रशूद्रवपुर्जन्तुरुग्रो नाम प्रजायते ९
विप्रस्य त्रिषु वर्णेषु नृपतेर्वर्णयोर्द्वयोः
वैश्यस्य वर्णे चैकस्मिन्षड् एतेऽपसदाः स्मृताः १०
क्षत्रियाद्विप्रकन्यायां सूतो भवति जातितः
वैश्यान्मागधवैदेहौ राजविप्राङ्गनासुतौ ११
शूद्रादायोगवः क्षत्ता चण्डालश्चाधमो नृणाम्
वैश्यराजन्यविप्रासु जायन्ते वर्णसंकराः १२
एकान्तरे त्वानुलोम्यादम्बष्ठोग्रौ यथा स्मृतौ
क्षत्तृवैदेहकौ तद्वत्प्रातिलोम्येऽपि जन्मनि १३
पुत्रा येऽनन्तरस्त्रीजाः क्रमेणोक्ता द्विजन्मनाम्
ताननन्तरनाम्नस्तु मातृदोषात्प्रचक्षते १४
ब्राह्मणादुग्रकन्यायामावृतो नाम जायते
आभीरोऽम्बष्ठकन्यायामायोगव्यां तु धिग्वणः १५
आयोगवश्च क्षत्ता च चण्डालश्चाधमो नृणाम्
प्रातिलोम्येन जायन्ते शूद्रादपसदास्त्रयः १६
वैश्यान्मागधवैदेहौ क्षत्रियात्सूत एव तु
प्रतीपमेते जायन्ते परेऽप्यपसदास्त्रयः १७
जातो निषादाच्छूद्रायां जात्या भवति पुक्कसः
शूद्राज् जातो निषाद्यां तु स वै कुक्कुटकः स्मृतः १८
क्षत्तुर्जातस्तथोग्रायां श्वपाक इति कीर्त्यते
वैदेहकेन त्वम्बष्ठ्यामुत्पन्नो वेण उच्यते १९
द्विजातयः सवर्णासु जनयन्त्यव्रतांस्तु यान्
तान्सावित्रीपरिभ्रष्टान्व्रात्यानिति विनिर्दिशेत् २०
व्रात्यात्तु जायते विप्रात्पापात्मा भूर्जकण्टकः
आवन्त्यवाटधानौ च पुष्पधः शैख एव च २१
झल्लो मल्लश्च राजन्याद्व्रात्यान्निच्छिविरेव च

नटश्च करणश्चैव खसो द्रविड एव च  २२
वैश्यात्तु जायते व्रात्यात्सुधन्वाचार्य एव च
कारुषश्च विजन्मा च मैत्रः सात्वत एव च  २३
व्यभिचारेण वर्णानामवेद्यावेदनेन च
स्वकर्मणां च त्यागेन जायन्ते वर्णसंकराः  २४
संकीर्णयोनयो ये तु प्रतिलोमानुलोमजाः
अन्योन्यव्यतिषक्ताश्च तान्प्रवक्ष्याम्यशेषतः  २५
सूतो वैदेहकश्चैव चण्डालश्च नराधमः
मागधः  तथायोगव एव च क्षत्रजातिश्च  २६
एते षट् सदृशान्वर्णाञ् जनयन्ति स्वयोनिषु
मातृजात्यां प्रसूयन्ते प्रवारासु च योनिषु  २७
यथा त्रयाणां वर्णानां द्वयोरात्मास्य जायते
आनन्तर्यात्स्वयोन्यां तु तथा बाह्येष्वपि क्रमात्  २८
ते चापि बाह्यान्सुबहूंस्ततोऽप्यधिकदूषितान्
परस्परस्य दारेषु जनयन्ति विगर्हितान्  २९
यथैव शूद्रो ब्राह्मण्यां बाह्यं जन्तुं प्रसूयते
तथा बाह्यतरं बाह्यश्चातुर्वर्ण्ये प्रसूयते  ३०
प्रतिकूलं वर्तमाना बाह्या बाह्यतरान्पुनः
हीना हीनान्प्रसूयन्ते वर्णान्पञ्चदशैव तु  ३१
प्रसाधनोपचारज्ञमदासं दासजीवनम्
सैरिन्ध्रं वागुरावृत्तिं सूते दस्युरयोगवे  ३२
मैत्रेयकं तु वैदेहो माधूकं संप्रसूयते
नृन्प्रशंसत्यजस्रं यो घण्टाताडोऽरुणोदये  ३३
निषादो मार्गवं सूते दासं नौकर्मजीविनम्
कैवर्तमिति यं प्राहुरार्यावर्तनिवासिनः  ३४
मृतवस्त्रभृत्स्व्नारीषु गर्हितान्नाशनासु च

भवन्त्यायोगवीष्वेते जातिहीनाः पृथक् त्रयः ३५
कारावरो निषादात्तु चर्मकारः प्रसूयते
वैदेहिकादन्ध्रमेदौ बहिर्ग्रामप्रतिश्रयौ ३६
चराडालात्पाराडुसोपाकस्त्वक्सारव्यवहारवान्
ग्राहिराडिको निषादेन वैदेह्यामेव जायते ३७
चराडालेन तु सोपाको मूलव्यसनवृत्तिमान्
पुक्कस्यां जायते पापः सदा सज्जनगर्हितः ३८
निषादस्त्री तु चराडालात्पुत्रमन्त्यावसायिनम्
श्मशानगोचरं सूते बाह्यानामपि गर्हितम् ३९
संकरे जातयस्त्वेताः पितृमातृप्रदर्शिताः
प्रछन्ना वा प्रकाशा वा वेदितव्याः स्वकर्मभिः ४०
स्वजातिजानन्तरजाः षट् सुता द्विजधर्मिणः
शूद्राणां तु सधर्माणः सर्वेऽपध्वंसजाः स्मृताः ४१
तपोबीजप्रभावैस्तु ते गच्छन्ति युगे युगे
उत्कर्षं चापकर्षं च मनुष्येष्विह जन्मतः ४२
शनकैस्तु क्रियालोपादिमाः क्षत्रियजातयः
वृषलत्वं गता लोके ब्राह्मणादर्शनेन च ४३
पौराड्रकाश्चौड्रद्रविडाः काम्बोजा यवनाः शकाः
पारदापह्लवाश्चीनाः किराता दरदाः खशाः ४४
मुखबाहूरुपद्जानां या लोके जातयो बहिः
म्लेच्छवाचश्चार्यवाचः सर्वे ते दस्यवः स्मृताः ४५
ये द्विजानामपसदा ये चापध्वंसजाः स्मृताः
ते निन्दितैर्वर्तयेयुर्द्विजानामेव कर्मभिः ४६
सूतानामश्वसारथ्यमम्बष्ठानां चिकित्सनम्
वैदेहकानां स्त्रीकार्यं मागधानां वणिक्पथः ४७
मत्स्यघातो निषादानां त्वष्टिस्त्वायोगवस्य च

मेदान्ध्रचुञ्चुमद्गूनामारण्यपशुहिंसनम् ४८
क्षत्त्रुग्रपुक्कसानां तु बिलौकोवधबन्धनम्
धिग्वणानां चर्मकार्यं वेणानां भाण्डवादनम् ४९
चैत्यद्रुमश्मशानेषु शैलेषूपवनेषु च
वसेयुरेते विज्ञाता वर्तयन्तः स्वकर्मभिः ५०
चण्डालश्वपचानां तु बहिर्ग्रामात्प्रतिश्रयः
अपपात्राश्च कर्तव्या धनमेषां श्वगर्दभम् ५१
वासांसि मृतचैलानि भिन्नभाण्डेषु भोजनम्
कार्ष्णायसमलङ्कारः परिव्रज्या च नित्यशः ५२
न तैः समयमन्विच्छेत्पुरुषो धर्ममाचरन्
व्यवहारो मिथस्तेषां विवाहः सदृशैः सह ५३
अन्नमेषां पराधीनं देयं स्याद्भिन्नभाजने
रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च ५४
दिवा चरेयुः कार्यार्थं चिह्निता राजशासनैः
अबान्धवं शवं चैव निर्हरेयुरिति स्थितिः ५५
वध्यांश्च हन्युः सततं यथाशास्त्रं नृपाज्ञया
वध्यवासांसि गृह्णीयुः शय्याश्चाभरणानि च ५६
वर्णापेतमविज्ञातं नरं कलुषयोनिजम्
आर्यरूपमिवानार्यं कर्मभिः स्वैर्विभावयेत् ५७
अनार्यता निष्ठुरता क्रूरता निष्क्रियात्मता
पुरुषं व्यञ्जयन्तीह लोके कलुषयोनिजम् ५८
पित्र्यं वा भजते शीलं मातुर्वोभयमेव वा
न कथं चन दुर्योनिः प्रकृतिं स्वां नियच्छति ५९
कुले मुख्येऽपि जातस्य यस्य स्याद्योनिसंकरः
संश्रयत्येव तच्छीलं नरोऽल्पमपि वा बहु ६०
यत्र त्वेते परिध्वंसाज् जायन्ते वर्णदूषकाः

राष्ट्रिकैः सह तद्राष्ट्रं क्षिप्रमेव विनश्यति   ६१
ब्राह्मणार्थे गवार्थे वा देहत्यागोऽनुपस्कृतः
स्त्रीबालाभ्युपपत्तौ च बाह्यानां सिद्धिकारणम्   ६२
अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः
एतं सामासिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः  ६३
शूद्रायां ब्राह्मणाज् जातः श्रेयसा चेत्प्रजायते
अश्रेयान्श्रेयसीं जातिं गच्छत्या सप्तमाद्युगात्  ६४
शूद्रो ब्राह्मणतामेति ब्राह्मणश्चैति शूद्रताम्
क्षत्रियाज् जातमेवं तु विद्याद्वैश्यात्तथैव च  ६५
अनार्यायां समुत्पन्नो ब्राह्मणात्तु यदृच्छया
ब्राह्मण्यामप्यनार्यात्तु श्रेयस्त्वं क्वेति चेद्भवेत्  ६६
जातो नार्यामनार्यायामार्यादार्यो भवेद्गुणैः
जातोऽप्यनार्यादार्यायामनार्य इति निश्चयः  ६७
तावुभावप्यसंस्कार्याविति धर्मो व्यवस्थितः
वैगुण्याज् जन्मनः पूर्व उत्तरः प्रतिलोमतः   ६८
सुबीजं चैव सुक्षेत्रे जातं संपद्यते यथा
तथार्याज् जात आर्यायां सर्वं संस्कारमर्हति  ६९
बीजमेके प्रशंसन्ति क्षेत्रमन्ये मनीषिणः
बीजक्षेत्रे तथैवान्ये तत्रेयं तु व्यवस्थितिः  ७०
अक्षेत्रे बीजमुत्सृष्टमन्तरैव विनश्यति
अबीजकमपि क्षेत्रं केवलं स्थण्डिलं भवेत्  ७१
यस्माद्बीजप्रभावेण तिर्यग्जा ऋषयोऽभवन्
पूजिताश्च प्रशस्ताश्च तस्माद्बीजं प्रशस्यते   ७२
अनार्यमार्यकर्माणमार्यं चानार्यकर्मिणम्
संप्रधार्याब्रवीद्धाता न समौ नासमाविति  ७३
ब्राह्मणा ब्रह्मयोनिस्था ये स्वकर्मण्यवस्थिताः

ते सम्यगुपजीवेयुः षट् कर्माणि यथाक्रमम् ७४
अध्यापनमध्ययनं यजनं याजनं तथा
दानं प्रतिग्रहश्चैव षट् कर्माण्यग्रजन्मनः ७५
षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका
याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः ७६
त्रयो धर्मा निवर्तन्ते ब्राह्मणात्क्षत्रियं प्रति
अध्यापनं याजनं च तृतीयश्च प्रतिग्रहः ७७
वैश्यं प्रति तथैवैते निवर्तेरन्निति स्थितिः
न तौ प्रति हि तान्धर्मान्मनुराह प्रजापतिः ७८
शस्त्रास्त्रभृत्त्वं क्षत्रस्य वणिक्पशुकृषिर्विषः
आजीवनार्थं धर्मस्तु दानमध्ययनं यजिः ७९
वेदाभ्यासो ब्राह्मणस्य क्षत्रियस्य च रक्षणम्
वार्ताकर्मैव वैश्यस्य विशिष्टानि स्वकर्मसु ८०
अजीवंस्तु यथोक्तेन ब्राह्मणः स्वेन कर्मणा
जीवेत्क्षत्रियधर्मेण स ह्यस्य प्रत्यनन्तरः ८१
उभाभ्यामप्यजीवंस्तु कथं स्यादिति चेद्भवेत्
कृषिगोरक्षमास्थाय जीवेद्वैश्यस्य जीविकाम् ८२
वैश्यवृत्त्यापि जीवंस्तु ब्राह्मणः क्सत्रियोऽपि वा
हिंसाप्रायां पराधीनां कृषिं यत्नेन वर्जयेत् ८३
कृषिं साध्विति मन्यन्ते सा वृत्तिः सद्विगर्हिताः
भूमिं भूमिशयांश्चैव हन्ति काष्ठमयोमुखम् ८४
इदं तु वृत्तिवैकल्यात्त्यजतो धर्मनैपुणं
विशॄपण्यमुद्धृतोद्धारं विक्रेयं वित्तवर्धनम् ८५
सर्वान्रसानपोहेत कृतान्नं च तिलैः सह
अश्मनो लवणं चैव पशवो ये च मानुषाः ८६
सर्वं च तान्तवं रक्तं शाणक्षौमाविकानि च

अपि चेत्स्युररक्तानि फलमूले तथौषधीः ८७
अपः शस्त्रं विषं मांसं सोमं गन्धांश्च सर्वशः
क्षीरं क्षौद्रं दधि घृतं तैलं मधु गुडं कुशान् ८८
आरण्यांश्च पशून्सर्वान्दंष्ट्रिणश्च वयांसि च
मद्यं नीलिं च लाक्षां च सर्वांश्चैकशफांस्तथा ८९
काममुत्पाद्य कृष्यां तु स्वयमेव कृषीवलः
विक्रीणीत तिलान्शूद्रान्धर्मार्थमचिरस्थितान् ९०
भोजनाभ्यञ्जनाद्दानाद्यदन्यत्कुरुते तिलैः
कृमिभूतः श्वविष्ठायां पितृभिः सह मज्जति ९१
सद्यः पतति मांसेन लाक्षया लवणेन च
त्र्यहेण शूद्रो भवति ब्राह्मणः क्षीरविक्रयात् ९२
इतरेषां तु पण्यानां विक्रयादिह कामतः
ब्राह्मणः सप्तरात्रेण वैश्यभावं नियच्छति ९३
रसा रसैर्निमातव्या न त्वेव लवणं रसैः
कृतान्नं च कृतान्नेन तिला धान्येन तत्समाः ९४
जीवेदेतेन राजन्यः सर्वेणाप्यनयं गतः
न त्वेव ज्यायंसीं वृत्तिमभिमन्येत कर्हि चित् ९५
यो लोभादधमो जात्या जीवेदुत्कृष्टकर्मभिः
तं राजा निर्धनं कृत्वा क्षिप्रमेव प्रवासयेत् ९६
वरं स्वधर्मो विगुणो न पारक्यः स्वनुष्ठितः
परधर्मेण जीवन्हि सद्यः पतति जातितः ९७
वैश्योऽजीवन्स्वधर्मेण शूद्रवृत्त्यापि वर्तयेत्
अनाचरन्नकार्याणि निवर्तेत च शक्तिमान् ९८
अशक्नुवंस्तु शुश्रूषां शूद्रः कर्तुं द्विजन्मनाम्
पुत्रदारात्ययं प्राप्तो जीवेत्कारुककर्मभिः ९९
यैः कर्मभिः प्रचरितैः शुश्रूष्यन्ते द्विजातयः

तानि कारुककर्माणि शिल्पानि विविधानि च १००
वैश्यवृत्तिमनातिष्ठन्ब्राह्मणः स्वे पथि स्थितः
अवृत्तिकर्षितः सीदन्निमं धर्मं समाचरेत् १०१
सर्वतः प्रतिगृह्णीयाद्ब्राह्मणस्त्वनयं गतः
पवित्रं दुष्यतीत्येतद्धर्मतो नोपपद्यते १०२
नाध्यापनाद्याजनाद्वा गर्हिताद्वा प्रतिग्रहात्
दोषो भवति विप्राणां ज्वलनाम्बुसमा हि ते १०३
जीवितात्ययमापन्नो योऽन्नमत्ति ततस्ततः
आकाशमिव पङ्केन न स पापेन लिप्यते १०४
अजीगर्तः सुतं हन्तुमुपासर्पद्बुभुक्षितः
न चालिप्यत पापेन क्षुत्प्रतीकारमाचरन् १०५
श्वमांसमिच्छनार्तोऽत्तुं धर्माधर्मविचक्षणः
प्राणानां परिरक्षार्थं वामदेवो न लिप्तवान् १०६
भरद्वाजः क्षुधार्तस्तु सपुत्रो विजने वने
बह्वीर्गाः प्रतिजग्राह वृधोस्तक्ष्णो महातपाः १०७
क्षुधार्तश्चात्तुमभ्यागाद्विश्वामित्रः श्वजाघनीम्
चण्डालहस्तादादाय धर्माधर्मविचक्षणः १०८
प्रतिग्रहाद्याजनाद्वा तथैवाध्यापनादपि
प्रतिग्रहः प्रत्यवरः प्रेत्य विप्रस्य गर्हितः १०९
याजनाध्यापने नित्यं क्रियेते संस्कृतात्मनाम्
प्रतिग्रहस्तु क्रियते शूद्रादप्यन्त्यजन्मनः ११०
जपहोमैरपैत्येनो याजनाध्यापनैः कृतम्
प्रतिग्रहनिमित्तं तु त्यागेन तपसैव च १११
शिलोञ्छमप्याददीत विप्रोऽजीवन्यतस्ततः
प्रतिग्रहाच्छिलः श्रेयांस्ततोऽप्युञ्छः प्रशस्यते ११२
सीदद्भिः कुप्यमिच्छद्भिर्धने वा पृथिवीपतिः

याच्यः स्यात्स्नातकैर्विप्रैरदित्संस्त्यागमर्हति १९३
अकृतं च कृतात्क्षेत्राद्गौरजाविकमेव च
हिरण्यं धान्यमन्नं च पूर्वं पूर्वमदोषवत् ११४
सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः
प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च ११५
विद्या शिल्पं भृतिः सेवा गोरक्ष्यं विपणिः कृषिः
धृतिर्भैक्षं कुसीदं च दश जीवनहेतवः ११६
ब्राह्मणः क्षत्रियो वापि वृद्धिं नैव प्रयोजयेत्
कामं तु खलु धर्मार्थं दद्यात्पापीयसेऽल्पिकाम् ११७
चतुर्थमाददानोऽपि क्षत्रियो भागमापदि
प्रजा रक्षन्परं शक्त्या किल्बिषात्प्रतिमुच्यते ११८
स्वधर्मो विजयस्तस्य नाहवे स्यात्पराङ्मुखः
शस्त्रेण वैश्यान्रक्षित्वा धर्म्यमाहारयेद्बलिम् ११९
धान्येऽष्टमं विशां शुल्कं विंशं कार्षापणावरम्
कर्मोपकरणाः शूद्राः कारवः शिल्पिनस्तथा १२०
शूद्रस्तु वृत्तिमाकाङ्क्षन्क्षत्रमाराधयेद्यदि
धनिनं वाप्युपाराध्य वैश्यं शूद्रो जिजीविषेत् १२१
स्वर्गार्थमुभयार्थं वा विप्रानाराधयेत्तु सः
जातब्राह्मणशब्दस्य सा ह्यस्य कृतकृत्यता १२२
विप्रसेवैव शूद्रस्य विशिष्टं कर्म कीर्त्यते
यदतोऽन्यद्धि कुरुते तद्भवत्यस्य निष्फलम् १२३
प्रकल्प्या तस्य तैर्वृत्तिः स्वकुटुम्बाद्यथार्हतः
शक्तिं चावेक्ष्य दाक्ष्यं च भृत्यानां च परिग्रहम् १२४
उच्छिष्टमन्नं दातव्यं जीर्णानि वसनानि च
पुलाकाश्चैव धान्यानां जीर्णाश्चैव परिच्छदाः १२५
न शूद्रे पातकं किं चिन्न च संस्कारमर्हति

नास्याधिकारो धर्मेऽस्ति न धर्मात्प्रतिषेधनम्  १२६
धर्मेप्सवस्तु धर्मज्ञाः सतां वृत्तमनुष्ठिताः
मन्त्रवर्ज्यं न दुष्यन्ति प्रशंसां प्राप्नुवन्ति च   १२७
यथा यथा हि सद्वृत्तमातिष्ठत्यनसूयकः
तथा तथेमं चामुं च लोकं प्राप्नोत्यनिन्दितः  १२८
शक्तेनापि हि शूद्रेण न कार्यो धनसंचयः
शूद्रो हि धनमासाद्य ब्राह्मणानेव बाधते  १२९
एते चतुर्णां वर्णानामापद्धर्माः प्रकीर्तिताः
यान्सम्यगनुतिष्ठन्तो व्रजन्ति परमं गतिम्  १३०
एष धर्मविधिः कृत्स्नश्चातुर्वर्ण्यस्य कीर्तितः
अतः परं प्रवक्ष्यामि प्रायश्चित्तविधिं शुभम्  १३१

## एकादशोऽध्यायः

सान्तानिकं यक्ष्यमाणमध्वगं सार्ववेदसम्
गुर्वर्थं पितृमात्रर्थं स्वाध्यायार्थ्युपतापिनः  १
न वै तान्स्नातकान्विद्याद्ब्राह्मणान्धर्मभिक्षुकान्
निःस्वेभ्यो देयमेतेभ्यो दानं विद्याविशेषतः  २
एतेभ्यो हि द्विजाग्र्येभ्यो देयमन्नं सदक्षिणम्
इतरेभ्यो बहिर्वेदि कृतान्नं देयमुच्यते  ३
सर्वरत्नानि राजा तु यथार्हं प्रतिपादयेत्
ब्राह्मणान्वेदविदुषो यज्ञार्थं चैव दक्षिणाम्  ४
कृतदारोऽपरान्दारान्भिक्षित्वा योऽधिगच्छति
रतिमात्रं फलं तस्य द्रव्यदातुस्तु संततिः  ५
धनानि तु यथाशक्ति विप्रेषु प्रतिपादयेत्
वेदवित्सु विविक्तेषु प्रेत्य स्वर्गं समश्नुते  ६
यस्य त्रैवार्षिकं भक्तं पर्याप्तं भृत्यवृत्तये

अधिकं वापि विद्येत स सोमं पातुमर्हति ७
अतः स्वल्पीयसि द्रव्ये यः सोमं पिबति द्विजः
स पीतसोमपूर्वोऽपि न तस्याप्नोति तत्फलम् ८
शक्तः परजने दाता स्वजने दुःखजीविनि
मध्वापातो विषास्वादः स धर्मप्रतिरूपकः ९
भृत्यानामुपरोधेन यत्करोत्यौर्ध्वदेहिकम्
तद्भवत्यसुखोदर्कं जीवतश्च मृतस्य च १०
यज्ञश्चेत्प्रतिरुद्धः स्यादेकेनाङ्गेन यज्वनः
ब्राह्मणस्य विशेषेन धार्मिके सति राजनि ११
यो वैश्यः स्याद्बहुपशुर्हीनक्रतुरसोमपः
कुटुम्बात्तस्य तद्द्रव्यमाहरेद्यज्ञसिद्धये १२
आहरेत्त्रीणि वा द्वे वा कामं शूद्रस्य वेश्मनः
न हि शूद्रस्य यज्ञेषु कश्चिदस्ति परिग्रहः १३
योऽनाहिताग्निः शतगुरयज्वा च सहस्रगुः
तयोरपि कुटुम्बाभ्यामाहरेदविचारयन् १४
आदाननित्याच्चादातुराहरेदप्रयच्छतः
तथा यशोऽस्य प्रथते धर्मश्चैव प्रवर्धते १५
तथाऐव सप्तमे भक्ते भक्तानि षड् अनश्नता
अश्वस्तनविधानेन हर्तव्यं हीनकर्मणः १६
खलात्क्षेत्रादगाराद्वा यतो वाप्युपलभ्यते
आख्यातव्यं तु तत्तस्मै पृच्छते यदि पृच्छति १७
ब्राह्मणस्वं न हर्तव्यं क्षत्रियेण कदा चन
दस्युनिष्क्रिययोस्तु स्वमजीवन्हर्तुमर्हति १८
योऽसाधुभ्योऽर्थमादाय साधुभ्यः संप्रयच्छति
स कृत्वा प्लवमात्मानं संतारयति तावुभौ १९
यद्धनं यज्ञशीलानां देवस्वं तद्विदुर्बुधाः

अयज्वनां तु यद्वित्तमासुरस्वं तदुच्यते  २०
न तस्मिन्धारयेद्दण्डं धार्मिकः पृथिवीपतिः
क्षत्रियस्य हि बालिश्याद्ब्राह्मणः सीदति क्षुधा  २१
तस्य भृत्यजनं ज्ञात्वा स्वकुटुम्बान्महीपतिः
श्रुतशीले च विज्ञाय वृत्तिं धर्म्यां प्रकल्पयेत्  २२
कल्पयित्वास्य वृत्तिं च रक्षेदेनं समन्ततः
राजा हि धर्मषड्भागं तस्मात्प्राप्नोति रक्षितात्  २३
न यज्ञार्थं धनं शूद्राद्विप्रो भिक्षेत कर्हि चित्
यजमानो हि भिक्षित्वा चण्डालः प्रेत्य जायते  २४
याज्ञार्थमर्थं भिक्षित्वा यो न सर्वं प्रयच्छति
स याति भासतां विप्रः काकतां वा शतं समाः  २५
देवस्वं ब्राह्मणस्वं वा लोभेनोपहिनस्ति यः
स पापात्मा परे लोके गृध्रोच्छिष्टेन जीवति  २६
इष्टिं वैश्वानरीं नित्यं निर्वपेदब्दपर्यये
क्लृप्तानां पशुसोमानां निष्कृत्यर्थमसंभवे  २७
आपत्कल्पेन यो धर्मं कुरुतेऽनापदि द्विजः
स नाप्नोति फलं तस्य परत्रेति विचारितम्  २८
विश्वैश्च देवैः साध्यैश्च ब्राह्मणैश्च महर्षिभिः
आपत्सु मरणाद्भीतैर्विधेः प्रतिनिधिः कृतः  २९
प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्तते
न सांपरायिकं तस्य दुर्मतेर्विद्यते फलम्  ३०
न ब्राह्मणो वेदयेत किं चिद्राजनि धर्मवित्
स्ववीर्येणैव तान्शिष्यान्मानवानपकारिणः  ३१
स्ववीर्याद्राजवीर्याच्च स्ववीर्यं बलवत्तरम्
तस्मात्स्वेनैव वीर्येण निगृह्णीयादरीन्द्विजः  ३२
श्रुतीरथर्वाङ्गिरसीः कुर्यादित्यविचारयन्

वाक्शस्त्रं वै ब्राह्मणस्य तेन हन्यादरीन्द्विजः ३३
क्षत्रियो बाहुवीर्येण तरेदापदमात्मनः
धनेन वैश्यशूद्रौ तु जपहोमैर्द्विजोत्तमः ३४
विधाता शासिता वक्ता मैत्रो ब्राह्मण उच्यते
तस्मै नाकुशलं ब्रूयान्न शुष्कां गिरमीरयेत् ३५
न वै कन्या न युवतिर्नाल्पविद्यो न बालिशः
होता स्यादग्निहोत्रस्य नार्तो नासंस्कृतस्तथा ३६
नरके हि पतन्त्येते जुह्वन्तः स च यस्य तत्
तस्माद्वैतानकुशलो होता स्याद्वेदपारगः ३७
प्राजापत्यमदत्त्वाश्वमग्न्याधेयस्य दक्षिणाम्
अनाहिताग्निर्भवति ब्राह्मणो विभवे सति ३८
पुण्यान्यन्यानि कुर्वीत श्रद्दधानो जितेन्द्रियः
न त्वल्पदक्षिणैर्यज्ञैर्यजेतेह कथं चन ३९
इन्द्रियाणि यशः स्वर्गमायुः कीर्तिं प्रजाः पशून्
हन्त्यल्पदक्षिणो यज्ञस्तस्मान्नाल्पधनो यजेत् ४०
अग्निहोत्र्यपविध्याग्नीन्ब्राह्मणः कामकारतः
चान्द्रायणं चरेन्मासं वीरहत्यासमं हि तत् ४१
ये शूद्रादधिगम्यार्थमग्निहोत्रमुपासते
ऋत्विजस्ते हि शूद्राणां ब्रह्मवादिषु गर्हिताः ४२
तेषां सततमज्ञानां वृषलाग्न्युपसेविनाम्
पदा मस्तकमाक्रम्य दाता दुर्गाणि संतरेत् ४३
अकुर्वन्विहितं कर्म निन्दितं च समाचरन्
प्रसक्तश्चेन्द्रियार्थेषु प्रायश्चित्तीयते नरः ४४
अकामतः कृते पापे प्रायश्चित्तं विदुर्बुधाः
कामकारकृतेऽप्याहुरेके श्रुतिनिदर्शनात् ४५
अकामतः कृतं पापं वेदाभ्यासेन शुध्यति

कामतस्तु कृतं मोहात्प्रायश्चित्तैः पृथग्विधैः ४६
प्रायश्चित्तीयतां प्राप्य दैवात्पूर्वकृतेन वा
न संसर्गं व्रजेत्सद्भिः प्रायश्चित्तेऽकृते द्विजः ४७
इह दुश्चरितैः के चित्के चित्पूर्वकृतैस्तथा
प्राप्नुवन्ति दुरात्मानो नरा रूपविपर्ययम् ४८
सुवर्णचौरः कौनख्यं सुरापः श्यावदन्तताम्
ब्रह्महा क्षयरोगित्वं दौश्चर्म्यं गुरुतल्पगः ४९
पिशुनः पौतिनासिक्यं सूचकः पूतिवक्त्रताम्
धान्यचौरोऽङ्गहीनत्वमातिरैक्यं तु मिश्रकः ५०
अन्नहर्तामयावित्वं मौक्यं वागपहारकः
वस्त्रापहारकः श्वैत्र्यं पङ्गुतामश्वहारकः ५१
एवं कर्मविशेषेण जायन्ते सद्विगर्हिताः
जडमूकान्धबधिरा विकृताकृतयस्तथा ५२
चरितव्यमतो नित्यं प्रायश्चित्तं विशुद्धये
निन्द्यैर्हि लक्षणैर्युक्ता जायन्तेऽनिष्कृतैनसः ५३
ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः
महान्ति पातकान्याहुः संसर्गश्चापि तैः सह ५४
अनृतं च समुत्कर्षे राजगामि च पैशुनम्
गुरोश्चालीकनिर्बन्धः समानि ब्रह्महत्यया ५५
ब्रह्मोज्झता वेदनिन्दा कौटसाक्ष्यं सुहृद्वधः
गर्हितानाद्ययोर्जग्धिः सुरापानसमानि षट् ५६
निक्षेपस्यापहरणं नराश्वरजतस्य च
भूमिवज्रमणीनां च रुक्मस्तेयसमं स्मृतम् ५७
रेतःसेकः स्वयोनीषु कुमारीष्वन्त्यजासु च
सख्युः पुत्रस्य च स्त्रीषु गुरुतल्पसमं विदुः ५८
गोवधोऽयाज्यसंयाज्यं पारदार्यात्मविक्रयः

गुरुमातृपितृत्यागः स्वाध्यायाग्न्योः सुतस्य च ५९
परिवित्तितानुजेऽनूढे परिवेदनमेव च
तयोर्दानं च कन्यायास्तयोरेव च याजनम् ६०
कन्याया दूषणं चैव वार्धुष्यं व्रतलोपनम्
तडागारामदाराणामपत्यस्य च विक्रयः ६१
व्रात्यता बान्धवत्यागो भृत्याध्यापनमेव च
भृत्या चाध्ययनादानमपण्यानां च विक्रयः ६२
सर्वाकारेष्वधीकारो महायन्त्रप्रवर्तनम्
हिंसौषधीनां स्त्र्याजीवोऽभिचारो मूलकर्म च ६३
इन्धनार्थमशुष्काणां द्रुमाणामवपातनम्
आत्मार्थं च क्रियारम्भो निन्दितान्नादनं तथा ६४
अनाहिताग्निता स्तेयमृणानामनपक्रिया
असच्छाष्त्राधिगमनं कौशीलव्यस्य च क्रिया ६५
धान्यकुप्यपशुस्तेयं मद्यपस्त्रीनिषेवणम्
स्त्रीशूद्रविश्क्षत्रवधो नास्तिक्यं चोपपातकम् ६६
ब्राह्मणस्य रुजः कृत्वा घ्रातिरघ्रेयमद्ययोः
जैह्म्यं च मैथुनं पुंसि जातिभ्रंशकरं स्मृतम् ६७
खराश्वोष्ट्रमृगेभानामजाविकवधस्तथा
संकरीकरणं ज्ञेयं मीनाहिमहिषस्य च ६८
निन्दितेभ्यो धनादानं वाणिज्यं शूद्रसेवनम्
अपात्रीकरणं ज्ञेयमसत्यस्य च भाषणम् ६९
कृमिकीटवयोहत्या मद्यानुगतभोजनम्
फलैधःकुसुमस्तेयमधैर्यं च मलावहम् ७०
एतान्येनांसि सर्वाणि यथोक्तानि पृथक् पृथक्
यैर्यैर्व्रतैरपोह्यन्ते तानि सम्यङ्ग निबोधत ७१
ब्रह्महा द्वादश समाः कुटीं कृत्वा वने वसेत्

भैक्षाश्यात्मविशुद्ध्यर्थं कृत्वा शवशिरो ध्वजम् ७२
लक्ष्यं शस्त्रभृतां वा स्याद्विदुषामिच्छयात्मनः
प्रास्येदात्मानमग्नौ वा समिद्धे त्रिरवाक्शिराः ७३
यजेत वाश्वमेधेन स्वर्जिता गोसवेन वा
अभिजिद्विश्वजिद्भ्यां वा त्रिवृताग्निष्टुतापि वा ७४
जपन्वान्यतमं वेदं योजनानां शतं व्रजेत्
ब्रह्महत्यापनोदाय मितभुङ् नियतेन्द्रियः ७५
सर्वस्वं वेदविदुषे ब्राह्मणायोपपादयेत्
धनं हि जीवनायालं गृहं वा सपरिच्छदम् ७६
हविष्यभुग्वानुसरेत्प्रतिस्रोतः सरस्वतीम्
जपेद्वा नियताहारस्त्रिर्वै वेदस्य संहिताम् ७७
कृतवापनो निवसेद्ग्रामान्ते गोव्रजेऽपि वा
आश्रमे वृक्षमूले वा गोब्राह्मणहिते रतः ७८
ब्राह्मणार्थे गवार्थे वा सद्यः प्राणान्परित्यजेत्
मुच्यते ब्रह्महत्याया गोप्ता गोर्ब्राह्मणस्य च ७९
त्रिवारं प्रतिरोद्धा वा सर्वस्वमवजित्य वा
विप्रस्य तन्निमित्ते वा प्राणालाभे विमुच्यते ८०
एवं दृढव्रतो नित्यं ब्रह्मचारी समाहितः
समाप्ते द्वादशे वर्षे ब्रह्महत्यां व्यपोहति ८१
शिष्ट्वा वा भूमिदेवानां नरदेवसमागमे
स्वमेनोऽवभृथस्नातो हयमेधे विमुच्यते ८२
धर्मस्य ब्राह्मणो मूलमग्रं राजन्य उच्यते
तस्मात्समागमे तेषामेनो विख्याप्य शुध्यति ८३
ब्रह्मणः संभवेनैव देवानामपि दैवतम्
प्रमाणं चैव लोकस्य ब्रह्मात्रैव हि कारणम् ८४
तेषां वेदविदो ब्रूयुस्त्रयोऽप्येनः सुनिष्कृतिम्

सा तेषां पावनाय स्यात्पवित्रा विदुषां हि वाक् ८५
अतोऽन्यतममास्थाय विधिं विप्रः समाहितः
ब्रह्महत्याकृतं पापं व्यपोहत्यात्मवत्तया ८६
हत्वा गर्भमविज्ञातमेतदेव व्रतं चरेत्
राजन्यवैश्यौ चेजानावात्रेयीमेव च स्त्रियम् ८७
उक्त्वा चैवानृतं साक्ष्ये प्रतिरुध्य गुरुं तथा
अपहृत्य च निःक्षेपं कृत्वा च स्त्रीसुहृद्वधम् ८८
इयं विशुद्धिरुदिता प्रमाप्याकामतो द्विजम्
कामतो ब्राह्मणवधे निष्कृतिर्न विधीयते ८९
सुरां पीत्वा द्विजो मोहादग्निवर्णां सुरां पिबेत्
तया स काये निर्दग्धे मुच्यते किल्बिषात्ततः ९०
गोमूत्रमग्निवर्णं वा पिबेदुदकमेव वा
पयो घृतं वा मरणाद्गोशकृद्रसमेव वा ९१
कणान्वा भक्षयेदब्दं पिण्याकं वा सकृन्निशि
सुरापानापनुत्त्यर्थं वालवासा जटी ध्वजी ९२
सुरा वै मलमन्नानां पाप्मा च मलमुच्यते
तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत् ९३
गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा
यथैवैका तथा सर्वा न पातव्या द्विजोत्तमैः ९४
यक्षरक्षःपिशाचान्नं मद्यं मांसं सुरासवम्
तद्ब्राह्मणेन नात्तव्यं देवानामश्नता हविः ९५
अमेध्ये वा पतेन्मत्तो वैदिकं वाप्युदाहरेत्
अकार्यमन्यत्कुर्याद्वा ब्राह्मणो मदमोहितः ९६
यस्य कायगतं ब्रह्म मद्येनाप्लाव्यते सकृत्
तस्य व्यपैति ब्राह्मण्यं शूद्रत्वं च स गच्छति ९७
एषा विचित्राभिहिता सुरापानस्य निष्कृतिः

अत ऊर्ध्वं प्रवक्ष्यामि सुवर्णस्तेयनिष्कृतिम्  ९८
सुवर्णस्तेयकृद्विप्रो राजानमभिगम्य तु
स्वकर्म ख्यापयन्ब्रूयान्मां भवाननुशास्त्विति  ९९
गृहीत्वा मुसलं राजा सकृद्धन्यात्तु तं स्वयम्
वधेन शुध्यति स्तेनो ब्राह्मणस्तपसैव तु  १००
तपसापनुनुत्सुस्तु सुवर्णस्तेयजं मलम्
चीरवासा द्विजोऽरण्ये चरेद्ब्रह्महणो व्रतम्  १०१
एतैर्व्रतैरपोहेत पापं स्तेयकृतं द्विजः
गुरुस्त्रीगमनीयं तु व्रतैरेभिरपानुदेत्  १०२
गुरुतल्प्यभिभाष्यैनस्तप्ते स्वप्यादयोमये
सूर्मीं ज्वलन्तीं स्वाश्लिष्येन्मृत्युना स विशुध्यति  १०३
स्वयं वा शिश्नवृषणावुत्कृत्याधाय चाञ्जलौ
नैरृतीं दिशमातिष्ठेदा निपातादजिह्मगः  १०४
खट्वाङ्गी चीरवासा वा श्मश्रुलो विजने वने
प्राजापत्यं चरेत्कृच्छ्रमब्दमेकं समाहितः  १०५
चान्द्रायणं वा त्रीन्मासानभ्यस्येन्नियतेन्द्रियः
हविष्येण यवाग्वा वा गुरुतल्पापनुत्तये  १०६
एतैर्व्रतैरपोहेयुर्महापातकिनो मलम्
उपपातकिनस्त्वेवमेभिर्नानाविधैर्व्रतैः  १०७
उपपातकसंयुक्तो गोघ्नो मासं यवान्पिबेत्
कृतवापो वसेद्गोष्ठे चर्मणा तेन संवृतः  १०८
चतुर्थकालमश्नीयादक्षारलवणं मितम्
गोमूत्रेणाचरेत्स्नानं द्वौ मासौ नियतेन्द्रियः  १०९
दिवानुगच्छेद्गास्तास्तु तिष्ठन्नूर्ध्वं रजः पिबेत्
शुश्रूषित्वा नमस्कृत्य रात्रौ वीरासनं वसेत्  ११०
तिष्ठन्तीष्वनुतिष्ठेत्तु व्रजन्तीष्वप्यनुव्रजेत्

आसीनासु तथासीनो नियतो वीतमत्सरः १११
आतुरामभिशस्तां वा चौरव्याघ्रादिभिर्भयैः
पतितां पङ्कलग्नं वा सर्वोपायैर्विमोचयेत् ११२
उष्णे वर्षति शीते वा मारुते वाति वा भृशम्
न कुर्वीतात्मनस्त्राणं गोरकृत्वा तु शक्तितः ११३
आत्मनो यदि वान्येषां गृहे क्षेत्रेऽथ वा खले
भक्षयन्तीं न कथयेत्पिबन्तं चैव वत्सकम् ११४
अनेन विधिना यस्तु गोघ्नो गामनुगच्छति
स गोहत्याकृतं पापं त्रिभिर्मासैर्व्यपोहति ११५
वृषभैकादशा गाश्च दद्यात्सुचरितव्रतः
अविद्यमाने सर्वस्वं वेदविद्भ्यो निवेदयेत् ११६
एतदेव व्रतं कुर्युरुपपातकिनो द्विजाः
अवकीर्णिवर्ज्यं शुद्ध्यर्थं चान्द्रायणमथापि वा ११७
अवकीर्णी तु काणेन गर्दभेन चतुष्पथे
पाकयज्ञविधानेन यजेत निर्ऋतिं निशि ११८
हुत्वाग्नौ विधिवद्धोमानन्ततश्च समेत्यृचा
वातेन्द्रगुरुवह्नीनां जुहुयात्सर्पिषाहुतीः ११९
कामतो रेतसः सेकं व्रतस्थस्य द्विजन्मनः
अतिक्रमं व्रतस्याहुर्धर्मज्ञा ब्रह्मवादिनः १२०
मारुतं पुरुहूतं च गुरुं पावकमेव च
चतुरो व्रतिनोऽभ्येति ब्राह्मं तेजोऽवकीर्णिनः १२१
एतस्मिन्नेनसि प्राप्ते वसित्वा गर्दभाजिनम्
सप्तागारांश्चरेद्भैक्षं स्वकर्म परिकीर्तयन् १२२
तेभ्यो लब्धेन भैक्षेण वर्तयन्नेककालिकम्
उपस्पृशंस्त्रिषवणं त्वब्देन स विशुध्यति १२३
जातिभ्रंशकरं कर्म कृत्वान्यतममिच्छया

चरेत्सांतपनं कृच्छ्रं प्राजापत्यमनिच्छया १२४
संकरापात्रकृत्यासु मासं शोधनमैन्दवम्
मलिनीकरणीयेषु तप्तः स्याद्यावकैस्त्र्यहम् १२५
तुरीयो ब्रह्महत्यायाः क्षत्रियस्य वधे स्मृतः
वैश्येऽष्टमांशो वृत्तस्थे शूद्रे ज्ञेयस्तु षोडशः १२६
अकामतस्तु राजन्यं विनिपात्य द्विजोत्तमः
वृषभैकसहस्रा गा दद्यात्सुचरितव्रतः १२७
त्र्यब्दं चरेद्वा नियतो जटी ब्रह्महणो व्रतम्
वसन्दूरतरे ग्रामाद्वृक्षमूलनिकेतनः १२८
एतदेव चरेदब्दं प्रायश्चित्तं द्विजोत्तमः
प्रमाप्य वैश्यं वृत्तस्थं दद्याच्चैकशतं १२९
एतदेव व्रतं कृत्स्नं षण्मासान्शूद्रहा चरेत्
वृषभैकादशा वापि दद्याद्विप्राय गाः सिताः १३०
मार्जारनकुलौ हत्वा चाषं मण्डूकमेव च
श्वगोधोलूककाकांश्च शूद्रहत्याव्रतं चरेत् १३१
पयः पिबेत्त्रिरात्रं वा योजनं वाध्वनो व्रजेत्
उपस्पृशेत्स्रवन्त्यां वा सूक्तं वाब्दैवतं जपेत् १३२
अभ्रिं कार्ष्णायसीं दद्यात्सर्पं हत्वा द्विजोत्तमः
पलालभारकं षण्ढे सैसकं चैकमाषकम् १३३
घृतकुम्भं वराहे तु तिलद्रोणं तु तित्तिरौ
शुके द्विहायनं वत्सं क्रौञ्चं हत्वा त्रिहायनम् १३४
हत्वा हंसं बलाकां च बकं बर्हिणमेव च
वानरं श्येनभासौ च स्पर्शयेद्ब्राह्मणाय गाम् १३५
वासो दद्याद्धयं हत्वा पञ्च नीलान्वृषान्गजम्
अजमेषावनड्वाहं खरं हत्वैकहायनम् १३६
क्रव्यादांस्तु मृगान्हत्वा धेनुं दद्यात्पयस्विनीम्

अक्रव्यादान्वत्सतरीमुष्ट्रं हत्वा तु कृष्णलम्  १३७
जीनकार्मुकबस्तावीन्पृथग्दद्याद्विशुद्धये
चतुर्णामपि वर्णानां नारीर्हत्वानवस्थिताः  १३८
दानेन वधनिर्णेकं सर्पादीनामशक्नुवन्
एकैकशश्चरेत्कृच्छ्रं द्विजः पापापनुत्तये  १३९
अस्थिमतां तु सत्त्वानां सहस्रस्य प्रमापणे
पूर्णे चानस्यनस्थ्नां तु शूद्रहत्याव्रतं चरेत्  १४०
किं चिदेव तु विप्राय दद्यादस्थिमतां वधे
अनस्थ्नां चैव हिंसायां प्राणायामेन शुध्यति  १४१
फलदानां तु वृक्षाणां छेदने जप्यमृक्शतम्
गुल्मवल्लीलतानां च पुष्पितानां च वीरुधाम्  १४२
अन्नाद्यजानां सत्त्वानां रसजानां च सर्वशः
फलपुष्पोद्भवानां च घृतप्राशो विशोधनम्  १४३
कृष्तजानामोषधीनां जातानां च स्वयं वने
वृथालम्भेऽनुगच्छेद्गां दिनमेकं पयोव्रतः  १४४
एतैर्व्रतैरपोह्यं स्यादेनो हिंसासमुद्भवम्
ज्ञानाज्ञानकृतं कृत्स्नं शृणुतानाद्यभक्षणे  १४५
अज्ञानाद्वारुणीं पीत्वा संस्कारेणैव शुध्यति
मतिपूर्वमनिर्देश्यं प्राणान्तिकमिति स्थितिः  १४६
अपः सुराभाजनस्था मद्यभाण्डस्थितास्तथा
पञ्चरात्रं पिबेत्पीत्वा शङ्खपुष्पीशृतं पयः  १४७
स्पृष्ट्वा दत्त्वा च मदिरां विधिवत्प्रतिगृह्य च
शूद्रोच्छिष्टाश्च पीत्वापः कुशवारि पिबेत्त्र्यहम्  १४८
ब्राह्मणस्तु सुरापस्य गन्धमाघ्राय सोमपः
प्राणानप्सु त्रिरायम्य घृतं प्राश्य विशुध्यति  १४९
अज्ञानात्प्राश्य विण्मूत्रं सुरासंस्पृष्टमेव च

पुनः संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः १५०
वपनं मेखला दण्डो भैक्षचर्या व्रतानि च
निवर्तन्ते द्विजातीनां पुनःसंस्कारकर्मणि १५१
अभोज्यानां तु भुक्त्वान्नं स्त्रीशूद्रोच्छिष्टमेव च
जग्ध्वा मांसमभक्ष्यं च सप्तरात्रं यवान्पिबेत् १५२
शुक्तानि च कषायांश्च पीत्वा मेध्यान्यपि द्विजः
तावद्भवत्यप्रयतो यावत्तन्न व्रजत्यधः १५३
विड्वराहखरोष्ट्राणां गोमायोः कपिकाकयोः
प्राश्य मूत्रपुरीषाणि द्विजश्चान्द्रायणं चरेत् १५४
शुष्काणि भुक्त्वा मांसानि भौमानि कवकानि च
अज्ञातं चैव सूनास्थमेतदेव व्रतं चरेत् १५५
क्रव्यादसूकरोष्ट्राणां कुक्कुटानां च भक्षणे
नरकाकखराणां च तप्तकृच्छ्रं विशोधनम् १५६
मासिकान्नं तु योऽश्नीयादसमावर्तको द्विजः
स त्रीण्यहान्युपवसेदेकाहं चोदके वसेत् १५७
ब्रह्मचारी तु योऽश्नीयान्मधु मांसं कथं चन
स कृत्वा प्राकृतं कृच्छ्रं व्रतशेषं समापयेत् १५८
बिडालकाकाखूच्छिष्टं जग्ध्वा श्वनकुलस्य च
केशकीटावपन्नं च पिबेद्ब्रह्मसुवर्चलाम् १५९
अभोज्यमन्नं नात्तव्यमात्मनः शुद्धिमिच्छता
अज्ञानभुक्तं तूत्तार्यं शोध्यं वाप्याशु शोधनैः १६०
एषोऽनाद्यादनस्योक्तो व्रतानां विविधो विधिः
स्तेयदोषापहर्तॄणां व्रतानां श्रूयतां विधिः १६१
धान्यान्नधनचौर्याणि कृत्वा कामाद्द्विजोत्तमः
स्वजातीयगृहादेव कृच्छ्राब्देन विशुध्यति १६२
मनुष्याणां तु हरणे स्त्रीणां क्षेत्रगृहस्य च

कूपवापीजलानां च शुद्धिश्चान्द्रायणं स्मृतम् १६३
द्रव्याणामल्पसाराणां स्तेयं कृत्वान्यवेश्मतः
चरेत्सांतपनं कृच्छ्रं तन्निर्यात्यात्मशुद्धये १६४
भक्ष्यभोज्यापहरणे यानशय्यासनस्य च
पुष्पमूलफलानां च पञ्चगव्यं विशोधनम् १६५
तृणकाष्ठद्रुमाणां च शुष्कान्नस्य गुडस्य च
चेलचर्मामिषाणां च त्रिरात्रं स्यादभोजनम् १६६
मणिमुक्ताप्रवालानां ताम्रस्य रजतस्य च
अयःकांस्योपलानां च द्वादशाहं कणान्नता १६७
कार्पासकीटजोर्णानां द्विशफैकशफस्य च
पक्षिगन्धौषधीनां च रज्ज्वाश्चैव त्र्यहं पयः १६८
एतैर्व्रतैरपोहेत पापं स्तेयकृतं द्विजः
अगम्यागमनीयं तु व्रतैरेभिरपानुदेत् १६९
गुरुतल्पव्रतं कुर्याद्रेतः सिक्त्वा स्वयोनिषु
सख्युः पुत्रस्य च स्त्रीषु कुमारीष्वन्त्यजासु च १७०
पैतृस्वसेयीं भगिनीं स्वस्त्रीयां मातुरेव च
मातुश्च भ्रातुस्तनयां गत्वा चान्द्रायणं चरेत् १७१
एतास्तिस्रस्तु भार्यार्थे नोपयच्छेत्तु बुद्धिमान्
ज्ञातित्वेनानुपेयास्ताः पतति ह्युपयन्नधः १७२
अमानुषीषू पुरुष उदक्यायामयोनिषु
रेतः सिक्त्वा जले चैव कृच्छ्रं सांतपनं चरेत् १७३
मैथुनं तु समासेव्य पुंसि योषिति वा द्विजः
गोयानेऽप्सु दिवा चैव सवासाः स्नानमाचरेत् १७४
चण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च
पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छति १७५
विप्रदुष्टां स्त्रियं भर्ता निरुन्ध्यादेकवेश्मनि

यत्पुंसः परदारेषु तच्चैनां चारयेद्व्रतम्  १७६
सा चेत्पुनः प्रदुष्येत्तु सदृशेनोपमन्त्रिता
कृच्छ्रं चान्द्रायणं चैव तदस्याः पावनं स्मृतम्  १७७
यत्करोत्येकरात्रेण वृषलीसेवनाद्द्विजः
तद्भैक्ष्यभुग्जपन्नित्यं त्रिभिर्वर्षैर्व्यपोहति  १७८
एषा पापकृतामुक्ता चतुर्णामपि निष्कृतिः
पतितैः संप्रयुक्तानामिमाः शृणुत निष्कृतीः  १७९
संवत्सरेण पतति पतितेन सहाचरन्
याजनाध्यापनाद्यौनान्न तु यानासनाशनात्  १८०
यो येन पतितेनैषां संसर्गं याति मानवः
स तस्यैव व्रतं कुर्यात्तत्संसर्गविशुद्धये  १८१
पतितस्योदकं कार्यं सपिण्डैर्बान्धवैर्बहिः
निन्दितेऽहनि सायाह्ने ज्ञातिऋत्विज्गुरुसंनिधौ  १८२
दासी घटमपां पूर्णं पर्यस्येत्प्रेतवत्पदा
अहोरात्रमुपासीरन्नशौचं बान्धवैः सह  १८३
निवर्तेरंश्च तस्मात्तु संभाषणसहासने
दायाद्यस्य प्रदानं च यात्रा चैव हि लौकिकी  १८४
ज्येष्ठता च निवर्तेत ज्येष्ठावाप्यं च यद्धनम्
ज्येष्ठांशं प्राप्नुयाच्चास्य यवीयान्गुणतोऽधिकः  १८५
प्रायश्चित्ते तु चरिते पूर्णकुम्भमपां नवम्
तेनैव सार्धं प्रास्येयुः स्नात्वा पुण्ये जलाशये  १८६
स त्वप्सु तं घटं प्रास्य प्रविश्य भवनं स्वकम्
सर्वाणि ज्ञातिकार्याणि यथापूर्वं समाचरेत्  १८७
एतदेव विधिं कुर्याद्योषित्सु पतितास्वपि
वस्त्रान्नपानं देयं तु वसेयुश्च गृहान्तिके  १८८
एनस्विभिरनिर्णिक्तैर्नार्थं किं चित्सहाचरेत्

कृतनिर्णेजनांश्चैव न जुगुप्सेत कर्हि चित् १८९
बालघ्नांश्च कृतघ्नांश्च विशुद्धानपि धर्मतः
शरणागतहन्तॄंश्च स्त्रीहन्तॄंश्च न संवसेत् १९०
येषां द्विजानां सावित्री नानूच्येत यथाविधि
तांश्चारयित्वा त्रीन्कृच्छ्रान्यथाविध्युपनाययेत् १९१
प्रायश्चित्तं चिकीर्षन्ति विकर्मस्थास्तु ये द्विजाः
ब्रह्मणा च परित्यक्तास्तेषामप्येतदादिशेत् १९२
यद्गर्हितेनार्जयन्ति कर्मणा ब्राह्मणा धनम्
तस्योत्सर्गेण शुध्यन्ति जप्येन तपसैव च १९३
जपित्वा त्रीणि सावित्र्याः सहस्राणि समाहितः
मासं गोष्ठे पयः पीत्वा मुच्यतेऽसत्प्रतिग्रहात् १९४
उपवासकृशं तं तु गोव्रजात्पुनरागतम्
प्रणतं प्रति पृच्छेयुः साम्यं सौम्येच्छसीति किम् १९५
सत्यमुक्त्वा तु विप्रेषु विकिरेद्यवसं गवाम्
गोभिः प्रवर्तिते तीर्थे कुर्युस्तस्य परिग्रहम् १९६
व्रात्यानां याजनं कृत्वा परेषामन्त्यकर्म च
अभिचारमहीनं च त्रिभिः कृच्छ्रैर्व्यपोहति १९७
शरणागतं परित्यज्य वेदं विप्लाव्य च द्विजः
संवत्सरं यवाहारस्तत्पापमपसेधति १९८
श्वशृगालखरैर्दष्टो ग्राम्यैः क्रव्याद्भिरेव च
नराश्वोष्ट्रवराहैश्च प्राणायामेन शुध्यति १९९
षष्ठान्नकालता मासं संहिताजप एव वा
होमाश्च सकला नित्यमपाङ्क्त्यानां विशोधनम् २००
उष्ट्रयानं समारुह्य खरयानं तु कामतः
स्नात्वा तु विप्रो दिग्वासाः प्राणायामेन शुध्यति २०१
विनाद्भिरप्सु वाप्यार्तः शारीरं संनिषेव्य च

सचैलो बहिराप्लुत्य गामालभ्य विशुध्यति २०२
वेदोदितानां नित्यानां कर्मणां समतिक्रमे
स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम् २०३
हुङ्कारं ब्राह्मणस्योक्त्वा त्वम्कारं च गरीयसः
स्नात्वानश्नन्नहः शेषमभिवाद्य प्रसादयेत् २०४
ताडयित्वा तृणेनापि कण्ठे वाबध्य वाससा
विवादे वा विनिर्जित्य प्रणिपत्य प्रसादयेत् २०५
अवगूर्य त्वब्दशतं सहस्रमभिहत्य च
जिघांसया ब्राह्मणस्य नरकं प्रतिपद्यते २०६
शोणितं यावतः पांसून्संगृह्णाति महीतले
तावन्त्यब्दसहस्राणि तत्कर्ता नरके वसेत् २०७
अवगूर्य चरेत्कृच्छ्रमतिकृच्छ्रं निपातने
कृच्छ्रातिकृच्छ्रौ कुर्वीत विप्रस्योत्पाद्य शोणितम् २०८
अनुक्तनिष्कृतीनां तु पापानामपनुत्तये
शक्तिं चावेक्ष्य पापं च प्रायश्चित्तं प्रकल्पयेत् २०९
यैरभ्युपायैरेनांसि मानवो व्यपकर्षति
तान्वोऽभ्युपायान्वक्ष्यामि देवर्षिपितृसेवितान् २१०
त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितम्
त्र्यहं परं च नाश्नीयात्प्राजापत्यं चरन्द्विजः २११
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्
एकरात्रोपवासश्च कृच्छ्रं सांतपनं स्मृतम् २१२
एकैकं ग्रासमश्नीयात्त्र्यहाणि त्रीणि पूर्ववत्
त्र्यहं चोपवसेदन्त्यमतिकृच्छ्रं चरन्द्विजः २१३
तप्तकृच्छ्रं चरन्विप्रो जलक्षीरघृतानिलान्
प्रतित्र्यहं पिबेदुष्णान्सकृत्स्नायी समाहितः २१४
यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनम्

पराको नाम कृच्छ्रोऽयं सर्वपापापनोदनः  २१५
एकैकं ह्रासयेत्पिण्डं कृष्णे शुक्ले च वर्धयेत्
उपस्पृशंस्त्रिषवणमेतच्चान्द्रायणं स्मृतम्  २१६
एतमेव विधिं कृत्स्नमाचरेद्यवमध्यमे
शुक्लपक्षादिनियतश्चरंश्चान्द्रायणं व्रतम्  २१७
अष्टावष्टौ समश्नीयात्पिण्डान्मध्यंदिने स्थिते
नियतात्मा हविष्याशी यतिचान्द्रायणं चरन्  २१८
चतुरः प्रातरश्नीयात्पिण्डान्विप्रः समाहितः
चतुरोऽस्तमिते सूर्ये शिशुचान्द्रायणं स्मृतम्  २१९
यथा कथं चित्पिण्डानां तिस्रोऽशीतीः समाहितः
मासेनाश्नन्हविष्यस्य चन्द्रस्यैति सलोकताम्  २२०
एतद्रुद्रास्तथादित्या वसवश्चाचरन्व्रतम्
सर्वाकुशलमोक्षाय मरुतश्च महर्षिभिः  २२१
महाव्याहृतिभिर्होमः कर्तव्यः स्वयमन्वहम्
अहिंसा सत्यमक्रोधमार्जवं च समाचरेत्  २२२
त्रिरह्नस्त्रिर्निशायां च सवासा जलमाविशेत्
स्त्रीशूद्रपतितांश्चैव नाभिभाषेत कर्हि चित्  २२३
स्थानासनाभ्यां विहरेदशक्तोऽधः शयीत वा
ब्रह्मचारी व्रती च स्याद्गुरुदेवद्विजार्चकः  २२४
सावित्रीं च जपेन्नित्यं पवित्राणि च शक्तितः
सर्वेष्वेव व्रतेष्वेवं प्रायश्चित्तार्थमादृतः  २२५
एतैर्द्विजातयः शोध्या व्रतैराविष्कृतैनसः
अनाविष्कृतपापांस्तु मन्त्रैर्होमैश्च शोधयेत्  २२६
ख्यापनेनानुतापेन तपसाध्ययनेन च
पापकृन्मुच्यते पापात्तथा दानेन चापदि  २२७
यथा यथा नरोऽधर्मं स्वयं कृत्वानुभाषते

तथा तथा त्वचेवाहिस्तेनाधर्मेण मुच्यते २२८
यथा यथा मनस्तस्य दुष्कृतं कर्म गर्हति
तथा तथा शरीरं तत्तेनाधर्मेण मुच्यते २२९
कृत्वा पापं हि संतप्य तस्मात्पापात्प्रमुच्यते
नैवं कुर्यां पुनरिति निवृत्त्या पूयते तु सः २३०
एवं संचिन्त्य मनसा प्रेत्य कर्मफलोदयम्
मनोवाग्मूर्तिभिर्नित्यं शुभं कर्म समाचरेत् २३१
अज्ञानाद्यदि वा ज्ञानात्कृत्वा कर्म विगर्हितम्
तस्माद्विमुक्तिमन्विच्छन्द्वितीयं न समाचरेत् २३२
यस्मिन्कर्मण्यस्य कृते मनसः स्यादलाघवम्
तस्मिंस्तावत्तपः कुर्याद्यावत्तुष्टिकरं भवेत् २३३
तपोमूलमिदं सर्वं दैवमानुषकं सुखम्
तपोमध्यं बुधैः प्रोक्तं तपोऽन्तं वेददर्शिभिः २३४
ब्राह्मणस्य तपो ज्ञानं तपः क्षत्रस्य रक्षणम्
वैश्यस्य तु तपो वार्ता तपः शूद्रस्य सेवनम् २३५
ऋषयः संयतात्मानः फलमूलानिलाशनाः
तपसैव प्रपश्यन्ति त्रैलोक्यं सचराचरम् २३६
औषधान्यगदो विद्या दैवी च विविधा स्थितिः
तपसैव प्रसिध्यन्ति तपस्तेषां हि साधनम् २३७
यद्दुस्तरं यद्दुरापं यद्दुर्गं यच्च दुष्करम्
सर्वं तु तपसा साध्यं तपो हि दुरतिक्रमम् २३८
महापातकिनश्चैव शेषाश्चाकार्यकारिणः
तपसैव सुतप्तेन मुच्यन्ते किल्बिषात्ततः २३९
कीटाश्चाहिपतंगाश्च पशवश्च वयांसि च
स्थावराणि च भूतानि दिवं यान्ति तपोबलात् २४०
यत्किं चिदेनः कुर्वन्ति मनोवाग्मूर्तिभिर्जनाः

तत्सर्वं निर्दहन्त्याशु तपसैव तपोधनाः २४१
तपसैव विशुद्धस्य ब्राह्मणस्य दिवौकसः
इज्याश्च प्रतिगृह्णन्ति कामान्संवर्धयन्ति च २४२
प्रजापतिरिदं शास्त्रं तपसैवासृजत्प्रभुः
तथैव वेदानृषयस्तपसा प्रतिपेदिरे २४३
इत्येतत्तपसो देवा महाभाग्यं प्रचक्षते
सर्वस्यास्य प्रपश्यन्तस्तपसः पुण्यमुत्तमम् २४४
वेदाभ्यासोऽन्वहं शक्त्या महायज्ञक्रिया क्षमा
नाशयन्त्याशु पापानि महापातकजान्यपि २४५
यथैधस्तेजसा वह्निः प्राप्तं निर्दहति क्षणात्
तथा ज्ञानाग्निना पापं सर्वं दहति वेदवित् २४६
इत्येतदेनसामुक्तं प्रायश्चित्तं यथाविधि
अत ऊर्ध्वं रहस्यानां प्रायश्चित्तं निबोधत २४७
सव्याहृतिप्रणवकाः प्राणायामास्तु षोडश
अपि भ्रूणहनं मासात्पुनन्त्यहरहः कृताः २४८
कौत्सं जप्त्वाप इत्येतद्वसिष्ठं च प्रतीत्यृचम्
माहित्रं शुद्धवत्यश्च सुरापोऽपि विशुध्यति २४९
सकृज्जप्त्वास्यवामीयं शिवसंकल्पमेव च
अपहृत्य सुवर्णं तु क्षणाद्भवति निर्मलः २५०
हविष्पान्तीयमभ्यस्य न तमं ह इतीति च
जपित्वा पौरुषं सूक्तं मुच्यते गुरुतल्पगः २५१
एनसां स्थूलसूक्ष्माणां चिकीर्षन्नपनोदनम्
अवेत्यृचं जपेदब्दं यत्किं चेदमितीति वा २५२
प्रतिगृह्याप्रतिग्राह्यं भुक्त्वा चान्नं विगर्हितम्
जपंस्तरत्समन्दीयं पूयते मानवस्त्र्यहात् २५३
सोमारौद्रं तु बह्वेनाः मासमभ्यस्य शुध्यति

स्रवन्त्यामाचरन्स्नानमर्यम्णामिति च तृचम् २५४
अब्दार्धमिन्द्रमित्येतदेनस्वी सप्तकं जपेत्
अप्रशस्तं तु कृत्वाप्सु मासमासीत भैक्षभुक् २५५
मन्त्रैः शाकलहोमीयैरब्दं हुत्वा घृतं द्विजः
सुगुर्वप्यपहन्त्येनो जप्त्वा वा नम इत्यृचम् २५६
महापातकसंयुक्तोऽनुगच्छेद्गाः समाहितः
अभ्यस्याब्दं पावमानीर्भैक्षाहारो विशुध्यति २५७
अरण्ये वा त्रिरभ्यस्य प्रयतो वेदसंहिताम्
मुच्यते पातकैः सर्वैः पराकैः शोधितस्त्रिभिः २५८
त्र्यहं तूपवसेद्युक्तस्त्रिरह्नोऽभ्युपयन्नपः
मुच्यते पातकैः सर्वैस्त्रिर्जपित्वाघमर्षणम् २५९
यथाश्वमेधः क्रतुराज्सर्वपापापनोदनः
तथाघमर्षणं सूक्तं सर्वपापापनोदनम् २६०
हत्वा लोकानपीमांस्त्रीनश्नन्नपि यतस्ततः
ऋग्वेदं धारयन्विप्रो नैनः प्राप्नोति किं चन २६१
ऋक्संहितां त्रिरभ्यस्य यजुषां वा समाहितः
साम्नां वा सरहस्यानां सर्वपापैः प्रमुच्यते २६२
यथा महाह्रदं प्राप्य क्षिप्तं लोष्टं विनश्यति
तथा दुश्चरितं सर्वं वेदे त्रिवृति मज्जति २६३
ऋचो यजूंषि चान्यानि सामानि विविधानि च
एष ज्ञेयस्त्रिवृद्वेदो यो वेदैनं स वेदवित् २६४
आद्यं यत्त्र्यक्षरं ब्रह्म त्रयी यस्मिन्प्रतिष्ठिता
स गुह्योऽन्यस्त्रिवृद्वेदो यस्तं वेद स वेदवित् २६५

## द्वादशोऽध्यायः

चातुर्वर्ण्यस्य कृत्स्नोऽयमुक्तो धर्मस्त्वयानघः

कर्मणां फलनिर्वृत्तिं शंस नस्तत्त्वतः पराम् १
स तानुवाच धर्मात्मा महर्षीन्मानवो भृगुः
अस्य सर्वस्य शृणुत कर्मयोगस्य निर्णयम् २
शुभाशुभफलं कर्म मनोवाग्देहसंभवम्
कर्मजा गतयो नृणामुत्तमाधममध्यमः ३
तस्येह त्रिविधस्यापि त्र्यधिष्ठानस्य देहिनः
दशलक्षणयुक्तस्य मनो विद्यात्प्रवर्तकम् ४
परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनम्
वितथाभिनिवेशश्च त्रिविधं कर्म मानसम् ५
पारुष्यमनृतं चैव पैशुन्यं चापि सर्वशः
असंबद्धप्रलापश्च वाग्मयं स्याच्चतुर्विधम् ६
अदत्तानामुपादानं हिंसा चैवाविधानतः
परदारोपसेवा च शारीरं त्रिविधं स्मृतम् ७
मानसं मनसैवायमुपभुङ्क्ते शुभाशुभम्
वाचा वाचा कृतं कर्म कायेनैव च कायिकम् ८
शरीरजैः कर्मदोषैर्याति स्थावरतां नरः
वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम् ९
वाग्दण्डोऽथ मनोदण्डः कायदण्डस्तथैव च
यस्यैते निहिता बुद्धौ त्रिदण्डीति स उच्यते १०
त्रिदण्डमेतन्निक्षिप्य सर्वभूतेषु मानवः
कामक्रोधौ तु संयम्य ततः सिद्धिं नियच्छति ११
योऽस्यात्मनः कारयिता तं क्षेत्रज्ञं प्रचक्षते
यः करोति तु कर्माणि स भूतात्मोच्यते बुधैः १२
जीवसंज्ञोऽन्तरात्मान्यः सहजः सर्वदेहिनाम्
येन वेदयते सर्वं सुखं दुःखं च जन्मसु १३
तावुभौ भूतसंपृक्तौ महान्क्षेत्रज्ञ एव च

उच्चावचेषु भूतेषु स्थितं तं व्याप्य तिष्ठतः १४
असंख्या मूर्तयस्तस्य निष्पतन्ति शरीरतः
उच्चावचानि भूतानि सततं चेष्टयन्ति याः १५
पञ्चभ्य एव मात्राभ्यः प्रेत्य दुष्कृतिनां नृणाम्
शरीरं यातनार्थीयमन्यदुत्पद्यते ध्रुवम् १६
तेनानुभूय ता यामीः शरीरेणेह यातनाः
तास्वेव भूतमात्रासु प्रलीयन्ते विभागशः १७
सोऽनुभूयासुखोदर्कान्दोषान्विषयसङ्गजान्
व्यपेतकल्मषोऽभ्येति तावेवोभौ महौजसौ १८
तौ धर्मं पश्यतस्तस्य पापं चातन्द्रितौ सह
याभ्यां प्राप्नोति संपृक्तः प्रेत्येह च सुखासुखम् १९
यद्याचरति धर्मं स प्रायशोऽधर्ममल्पशः
तैरेव चावृतो भूतैः स्वर्गे सुखमुपाश्नुते २०
यदि तु प्रायशोऽधर्मं सेवते धर्ममल्पशः
तैर्भूतैः स परित्यक्तो यामीः प्राप्नोति यातनाः २१
यामीस्ता यातनाः प्राप्य स जीवो वीतकल्मषः
तान्येव पञ्च भूतानि पुनरप्येति भागशः २२
एता दृष्ट्वास्य जीवस्य गतीः स्वेनैव चेतसा
धर्मतोऽधर्मतश्चैव धर्मे दध्यात्सदा मनः २३
सत्त्वं रजस्तमश्चैव त्रीन्विद्यादात्मनो गुणान्
यैर्व्याप्येमान्स्थितो भावान्महान्सर्वानशेषतः २४
यो यदैषां गुणो देहे साकल्येनातिरिच्यते
स तदा तद्गुणप्रायं तं करोति शरीरिणम् २५
सत्त्वं ज्ञानं तमोऽज्ञानं रागद्वेषौ रजः स्मृतम्
एतद्व्याप्तिमदेतेषां सर्वभूताश्रितं वपुः २६
तत्र यत्प्रीतिसंयुक्तं किं चिदात्मनि लक्षयेत्

प्रशान्तमिव शुद्धाभं सत्त्वं तदुपधारयेत् २७
यत्तु दुःखसमायुक्तमप्रीतिकरमात्मनः
तद्रजो प्रतीपं विद्यात्सततं हारि देहिनाम् २८
यत्तु स्यान्मोहसंयुक्तमव्यक्तं विषयात्मकम्
अप्रतर्क्यमविज्ञेयं तमस्तदुपधारयेत् २९
त्रयाणामपि चैतेषां गुणानां यः फलोदयः
अग्र्यो मध्यो जघन्यश्च तं प्रवक्ष्याम्यशेषतः ३०
वेदाभ्यासस्तपो ज्ञानं शौचमिन्द्रियनिग्रहः
धर्मक्रियात्मचिन्ता च सात्त्विकं गुणलक्षणम् ३१
आरम्भरुचिताधैर्यमसत्कार्यपरिग्रहः
विषयोपसेवा चाजस्रं राजसं गुणलक्षणम् ३२
लोभः स्वप्नोऽधृतिः क्रौर्यं नास्तिक्यं भिन्नवृत्तिता
याचिष्णुता प्रमादश्च तामसं गुणलक्षणम् ३३
त्रयाणामपि चैतेषां गुणानां त्रिषु तिष्ठताम्
इदं सामासिकं ज्ञेयं क्रमशो गुणलक्षणम् ३४
यत्कर्म कृत्वा कुर्वंश्च करिष्यंश्चैव लज्जति
तज् ज्ञेयं विदुषा सर्वं तामसं गुणलक्षणम् ३५
येनास्मिन्कर्मना लोके ख्यातिमिच्छति पुष्कलाम्
न च शोचत्यसंपत्तौ तद्विज्ञेयं तु राजसम् ३६
यत्सर्वेणेच्छति ज्ञातुं यन्न लज्जति चाचरन्
येन तुष्यति चात्मास्य तत्सत्त्वगुणलक्षणम् ३७
तमसो लक्षणं कामो रजसस्त्वर्थ उच्यते
सत्त्वस्य लक्षणं धर्मः श्रैष्ठ्यमेषां यथोत्तरम् ३८
येन यस्तु गुणेनैषां संसरान्प्रतिपद्यते
तान्समासेन वक्ष्यामि सर्वस्यास्य यथाक्रमम् ३९
देवत्वं सात्त्विका यान्ति मनुष्यत्वं च राजसाः

तिर्यक्त्वं तामसा नित्यमित्येषा त्रिविधा गतिः ४०
त्रिविधा त्रिविधैषा तु विज्ञेया गौणिकी गतिः
अधमा मध्यमाग्र्या च कर्मविद्याविशेषतः ४१
स्थावराः कृमिकीटाश्च मत्स्याः सर्पाः सकच्छपाः
पशवश्च मृगाश्चैव जघन्या तामसी गतिः ४२
हस्तिनश्च तुरङ्गाश्च शूद्रा म्लेच्छाश्च गर्हिताः
सिंहा व्याघ्रा वराहाश्च मध्यमा तामसी गतिः ४३
चारणाश्च सुपर्णाश्च पुरुषाश्चैव दाम्भिकाः
रक्षांसि च पिशाचाश्च तामसीषूत्तमा गतिः ४४
झल्ला मल्ला नटाश्चैव पुरुषाः शस्त्रवृत्तयः
द्यूतपानप्रसक्ताश्च जघन्या राजसी गतिः ४५
राजानः क्षत्रियाश्चैव राज्ञां चैव पुरोहिताः
वादयुद्धप्रधानाश्च मध्यमा राजसी गतिः ४६
गन्धर्वा गुह्यका यक्षा विबुधानुचराश्च ये
तथैवाप्सरसः सर्वा राजसीषूत्तमा गतिः ४७
तापसा यतयो विप्रा ये च वैमानिका गणाः
नक्षत्राणि च दैत्याश्च प्रथमा सात्त्विकी गतिः ४८
यज्वान ऋषयो देवा वेदा ज्योतींषि वत्सराः
पितरश्चैव साध्याश्च द्वितीया सात्त्विकी गतिः ४९
ब्रह्मा विश्वसृजो धर्मो महानव्यक्तमेव च
उत्तमां सात्त्विकीमेतां गतिमाहुर्मनीषिणः ५०
एष सर्वः समुद्दिष्टस्त्रिप्रकारस्य कर्मणः
त्रिविधस्त्रिविधः कृत्स्नः संसारः सार्वभौतिकः ५१
इन्द्रियाणां प्रसङ्गेन धर्मस्यासेवनेन च
पापान्संयान्ति संसारानविद्वांसो नराधमाः ५२
यां यां योनिं तु जीवोऽयं येन येनेह कर्मणा

क्रमशो याति लोकेऽस्मिंस्तत्तत्सर्वं निबोधत  ५३
बहून्वर्षगणान्घोरान्नरकान्प्राप्य तत्क्षयात्
संसारान्प्रतिपद्यन्ते महापातकिनस्त्विमान्  ५४
श्वसूकरखरोष्ट्राणां गोऽजाविमृगपक्षिणां
चण्डालपुक्कसानां च ब्रह्महा योनिमृच्छति  ५५
कृमिकीटपतङ्गानां विष्भुजां चैव पक्षिणाम्
हिंस्राणां चैव सत्त्वानां सुरापो ब्राह्मणो व्रजेत्  ५६
लूताहिसरटानां च तिरश्चां चाम्बुचारिणाम्
हिंस्राणां च पिशाचानां स्तेनो विप्रः सहस्रशः  ५७
तृणगुल्मलतानां च क्रव्यादां दंष्ट्रिणामपि
क्रूरकर्मकृतां चैव शतशो गुरुतल्पगः  ५८
हिंस्रा भवन्ति क्रव्यादाः कृमयोऽमेध्यभक्षिणः
परस्परादिनः स्तेनाः प्रेत्यान्त्यस्त्रीनिषेविणः  ५९
संयोगं पतितैर्गत्वा परस्यैव च योषितम्
अपहृत्य च विप्रस्वं भवति ब्रह्मराक्षसः  ६०
मणिमुक्ताप्रवालानि हृत्वा लोभेन मानवः
विविधाणि च रत्नानि जायते हेमकर्तृषु  ६१
धान्यं हृत्वा भवत्याखुः कांस्यं हंसो जलं प्लवः
मधु दंशः पयः काको रसं श्वा नकुलो घृतम्  ६२
मांसं गृध्रो वपां मद्गुस्तैलं तैलपकः खगः
चीरीवाकस्तु लवणं बलाका शकुनिर्दधि  ६३
कौशेयं तित्तिरिर्हृत्वा क्षौमं हृत्वा तु दर्दुरः
कार्पासतान्तवं क्रौञ्चो गोधा गां वाग्गुदो गुडम्  ६४
छुच्छुन्दरिः शुभान्गन्धान्पत्रशाकं तु बर्हिणः
श्वावित्कृतान्नं विविधमकृतान्नं तु शल्यकः  ६५
बको भवति हृत्वाग्निं गृहकारी ह्युपस्करम्

रक्तानि हृत्वा वासांसि जायते जीवजीवकः ६६
वृको मृगेभं व्याघ्रोऽश्वं फलमूलं तु मर्कटः
स्त्रीमृक्षः स्तोकको वारि यानान्युष्ट्रः पशूनजः ६७
यद्वा तद्वा परद्रव्यमपहृत्य बलान्नरः
अवश्यं याति तिर्यक्त्वं जग्ध्वा चैवाहुतं हविः ६८
स्त्रियोऽप्येतेन कल्पेन हृत्वा दोषमवाप्नुयुः
एतेषामेव जन्तूनां भार्यात्वमुपयान्ति ताः ६९
स्वेभ्यः स्वेभ्यस्तु कर्मभ्यश्च्युता वर्णा ह्यनापदि
पापान्संसृत्य संसारान्प्रेष्यतां यान्ति शत्रुषु ७०
वान्ताश्युल्कामुखः प्रेतो विप्रो धर्मात्स्वकाच्च्युतः
अमेध्यकुणपाशी च क्षत्रियः कटपूतनः ७१
मैत्राक्षज्योतिकः प्रेतो वैश्यो भवति पूयभुक्
चैलाशकश्च भवति शूद्रो धर्मात्स्वकाच्च्युतः ७२
यथा यथा निषेवन्ते विषयान्विषयात्मकाः
तथा तथा कुशलता तेषां तेषूपजायते ७३
तेऽभ्यासात्कर्मणां तेषां पापानामल्पबुद्धयः
संप्राप्नुवन्ति दुःखानि तासु तास्विह योनिषु ७४
तामिस्रादिषु चोग्रेषु नरकेषु विवर्तनम्
असिपत्रवनादीनि बन्धनछेदनानि च ७५
विविधाश्चैव संपीडाः काकोलूकैश्च भक्षणम्
करम्भवालुकातापान्कुम्भीपाकांश्च दारुणान् ७६
संभवांश्च वियोनीषु दुःखप्रायासु नित्यशः
शीतातपाभिघातांश्च विविधानि भयानि च ७७
असकृद्गर्भवासेषु वासं जन्म च दारुणम्
बन्धनानि च काष्ठानि परप्रेष्यत्वमेव च ७८
बन्धुप्रियवियोगांश्च संवासं चैव दुर्जनैः

द्रव्यार्जनं च नाशं च मित्रामित्रस्य चार्जनम्  ७९
जरां चैवाप्रतीकारां व्याधिभिश्चोपपीडनम्
क्लेशांश्च विविधांस्तांस्तान्मृत्युमेव च दुर्जयम्  ८०
यादृशेन तु भावेन यद्यत्कर्म निषेवते
तादृशेन शरीरेण तत्तत्फलमुपाश्नुते  ८१
एष सर्वः समुद्दिष्टः कर्मणां वः फलोदयः
नैःश्रेयसकरं कर्म विप्रस्येदं निबोधत  ८२
वेदाभ्यासस्तपो ज्ञानमिन्द्रियाणां च संयमः
अहिंसा गुरुसेवा च निःश्रेयसकरं परम्  ८३
सर्वेषामपि चैतेषां शुभानामिह कर्मणाम्
किं चिच्छ्रेयस्करतरं कर्मोक्तं पुरुषं प्रति  ८४
सर्वेषामपि चैतेषामात्मज्ञानं परं स्मृतम्
तद्ध्यग्र्यं सर्वविद्यानां प्राप्यते ह्यमृतं ततः  ८५
षण्णामेषां तु सर्वेषां कर्मणां प्रेत्य चेह च
श्रेयस्करतरं ज्ञेयं सर्वदा कर्म वैदिकम्  ८६
वैदिके कर्मयोगे तु सर्वाण्येतान्यशेषतः
अन्तर्भवन्ति क्रमशस्तस्मिंस्तस्मिन्क्रियाविधौ  ८७
सुखाभ्युदयिकं चैव नैःश्रेयसिकमेव च
प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम्  ८८
इह चामुत्र वा काम्यं प्रवृत्तं कर्म कीर्त्यते
निष्कामं ज्ञातपूर्वं तु निवृत्तमुपदिश्यते  ८९
प्रवृत्तं कर्म संसेव्य देवानामेति साम्यताम्
निवृत्तं सेवमानस्तु भूतान्यत्येति पञ्च वै  ९०
सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि
समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छति  ९१
यथोक्तान्यपि कर्माणि परिहाय द्विजोत्तमः

आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवान् ९२
एतद्धि जन्मसाफल्यं ब्राह्मणस्य विशेषतः
प्राप्यैतत्कृतकृत्यो हि द्विजो भवति नान्यथा ९३
पितृदेवमनुष्याणां वेदश्चक्षुः सनातनम्
अशक्यं चाप्रमेयं च वेदशास्त्रमिति स्थितिः ९४
या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः
सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृताः ९५
उत्पद्यन्ते च्यवन्ते च यान्यतोऽन्यानि कानि चित्
तान्यर्वाक्कालिकतया निष्फलान्यनृतानि च ९६
चातुर्वर्ण्यं त्रयो लोकाश्चत्वारश्चाश्रमाः पृथक्
भूतं भव्यं भविष्यं च सर्वं वेदात्प्रसिध्यति ९७
शब्दः स्पर्शश्च रूपं च रसो गन्धश्च पञ्चमः
वेदादेव प्रसूयन्ते प्रसूतिर्गुणकर्मतः ९८
बिभर्ति सर्वभूतानि वेदशास्त्रं सनातनम्
तस्मादेतत्परं मन्ये यज्जन्तोरस्य साधनम् ९९
सेनापत्यं च राज्यं च दण्डनेतृत्वमेव च
सर्वलोकाधिपत्यं च वेदशास्त्रविदर्हति १००
यथा जातबलो वह्निर्दहत्यार्द्रानपि द्रुमान्
तथा दहति वेदज्ञः कर्मजं दोषमात्मनः १०१
वेदशास्त्रार्थतत्त्वज्ञो यत्र तत्राश्रमे वसन्
इहैव लोके तिष्ठन्स ब्रह्मभूयाय कल्पते १०२
अज्ञेभ्यो ग्रन्थिनः श्रेष्ठा ग्रन्थिभ्यो धारिणो वराः
धारिभ्यो ज्ञानिनः श्रेष्ठा ज्ञानिभ्यो व्यवसायिनः १०३
तपो विद्या च विप्रस्य निःश्रेयसकरं परम्
तपसा किल्बिषं हन्ति विद्ययामृतमश्नुते १०४
प्रत्यक्षं चानुमानं च शास्त्रं च विविधागमम्

त्रयं सुविदितं कार्यं धर्मशुद्धिमभीप्सता १०५
आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना
यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः १०६
नैःश्रेयसमिदं कर्म यथोदितमशेषतः
मानवस्यास्य शास्त्रस्य रहस्यमुपदिश्यते १०७
अनाम्नातेषु धर्मेषु कथं स्यादिति चेद्भवेत्
यं शिष्टा ब्राह्मणा ब्रूयुः स धर्मः स्यादशङ्कितः १०८
धर्मेणाधिगतो यैस्तु वेदः सपरिबृंहणः
ते शिष्टा ब्राह्मणा ज्ञेयाः श्रुतिप्रत्यक्षहेतवः १०९
दशावरा वा परिषद्यं धर्मं परिकल्पयेत्
त्र्यवरा वापि वृत्तस्था तं धर्मं न विचालयेत् ११०
त्रैविद्यो हेतुकस्तर्की नैरुक्तो धर्मपाठकः
त्रयश्चाश्रमिणः पूर्वे परिषत्स्याद्दशावरा १११
ऋग्वेदविद्यजुर्विच्च सामवेदविदेव च
त्र्यवरा परिषद्ज्ञेया धर्मसंशयनिर्णये ११२
एकोऽपि वेदविद्धर्मं यं व्यवस्येद्द्विजोत्तमः
स विज्ञेयः परो धर्मो नाज्ञानामुदितोऽयुतैः ११३
अव्रतानाममन्त्राणां जातिमात्रोपजीविनाम्
सहस्रशः समेतानां परिषत्त्वं न विद्यते ११४
यं वदन्ति तमोभूता मूर्खा धर्ममतद्विदः
तत्पापं शतधा भूत्वा तद्वक्तॄननुगच्छति ११५
एतद्वोऽभिहितं सर्वं निःश्रेयसकरं परम्
अस्मादप्रच्युतो विप्रः प्राप्नोति परमां गतिम् ११६
एवं स भगवान्देवो लोकानां हितकाम्यया
धर्मस्य परमं गुह्यं ममेदं सर्वमुक्तवान् ११७
सर्वमात्मनि संपश्येत्सच्चासच्च समाहितः

सर्वं ह्यात्मनि संपश्यन्नाधर्मे कुरुते मनः ११८
आत्मैव देवताः सर्वाः सर्वमात्मन्यवस्थितम्
आत्मा हि जनयत्येषां कर्मयोगं शरीरिणाम् ११९
खं संनिवेशयेत्खेषु चेष्टनस्पर्शनेऽनिलम्
पक्तिदृष्ट्योः परं तेजः स्नेहेऽपो गां च मूर्तिषु १२०
मनसीन्दुं दिशः श्रोत्रे क्रान्ते विष्णुं बले हरम्
वाच्यग्निं मित्रमुत्सर्गे प्रजने च प्रजापतिम् १२१
प्रशासितारं सर्वेषामणीयांसमणोरपि
रुक्माभं स्वप्नधीगम्यं विद्यात्तं पुरुषं परम् १२२
एतमेके वदन्त्यग्निं मनुमन्ये प्रजापतिम्
इन्द्रमेके परे प्राणमपरे ब्रह्म शाश्वतम् १२३
एष सर्वाणि भूतानि पञ्चभिर्व्याप्य मूर्तिभिः
जन्मवृद्धिक्षयैर्नित्यं संसारयति चक्रवत् १२४
एवं यः सर्वभूतेषु पश्यत्यात्मानमात्मना
स सर्वसमतामेत्य ब्रह्माभ्येति परं पदम् १२५
इत्येतन्मानवं शास्त्रं भृगुप्रोक्तं पठन्द्विजः
भवत्याचारवान्नित्यं यथेष्टां प्राप्नुयाद्गतिम् १२६

## समाप्तं मानवं धर्मशास्त्रम्

Credits

Sources: 1. *Manusmṛti with the Sanskrit commentary Manvarthamuktāvalī of Kullūka Bhaṭṭa*, ed N.L. Sāstrī 1983.

2. *Manusmṛti*, Kashi Skt. Series 114, ed. Haragovinda Śāstrī.

3. *Manusmṛti with the Commentary of Medātithi*, 2 vols. calcutta 1967.

4. *Manusmṛti with the "Manubhāṣya" of Medhātithi*, ed L. Gaṇgānātha Jhā, Goi 1932, 1939, repr. 1992.

Typescript: Typed, analyzed and proofread by M. Yano and Y. Ikari
Conversion to Devanagari using Vedapad Software by Ralph Bunker

# ऋौशनस स्मृतिः

## ऋथ ऋौशनस संहिता

श्रीगरोशाय नमः

### ऋथानुलोमप्रतिलोमजात्यन्तराणां निरूपणवर्णनम्

ऋतः परं प्रवक्ष्यामि जातिवृत्तिविधानकम्
ऋनुलोमविधानञ्च प्रतिलोमविधिं तथा १
सान्तरालकसंयुक्तं सर्वं संक्षिप्य चोच्यते
नृपाद्ब्राह्मणकन्यायां विवाहेषु समन्वयात् २
जातः सूतोऽत्र निर्द्दिष्टः प्रतिलोमविधिर्द्विजः
वेदानहस्तथा चैषां धर्माणामनुबोधकः ३
सूताद्विप्र प्रसूतायां सूतो वेणुक उच्यते
नृपायामेव तस्यैव जातो यश्चर्मकारकः ४
ब्राह्मरायां क्षत्रियाच्चौर्याद्रथकारः प्रजायते
वृत्तञ्च शूद्रवृत्तस्य द्विजत्वं प्रतिषिध्यते ५
यानानां ये च वोढारस्तेषाञ्च परिचारकाः
शूद्रवृत्त्या तु जीवन्ति न क्षात्रं धर्ममाचरेत् ६
ब्राह्मरायां वैश्यसंसर्गाज्जातोमागध उच्यते
वन्दित्वं ब्राह्मणानाञ्च क्षत्रियाणां विशेषतः ७
प्रशंसावृत्तिको जीवेद्वैश्यप्रेष्यकरस्तथा
ब्राह्मरायां शूद्रसंसर्गाज्जातश्चाराडाल उच्यते ८
सीसमाभरणं तस्य कार्ष्णायसमथापि वा
वध्रीं कराठे समावध्य झल्लरीं कक्षतोऽपि वा ९
मल्लापकर्षणं ग्रामे पूर्वाह्णे परिशुद्धिकम्
नापराह्णे प्रविष्टोऽपि वहिर्ग्रामाच्च नैर्ऋते १०
पिराडीभूता भवन्त्यत्र नोचेद् बध्या विशेषतः
चाराडालाद्वैश्यकन्यायां जातः श्वप च उच्यते ११

श्वमांसभक्षणं तेषां श्वान एव च तद्बलम्
नृपायां वैश्यसंसर्गादायोगव इति स्मृतः १२
तन्तुवाया भवन्त्येव वसुकांस्योपजीविनः
शीलिकाः केचिदत्रैव जीवनं वस्त्रनिर्मिते १३
आयोगवेन विप्रायां जातास्ताम्रोपजीविनः
तस्यैव नृपकन्यायां जातः सूनिक उच्यते १४
सूनिकस्य नृपायान्तु जाता उद्बन्धकाः स्मृताः
निर्णेजयेयुर्वस्त्राणि अस्पृश्याश्च भवन्त्यतः १५
नृपायां वैश्यतश्चौर्यात्पुलिन्दः परिकीर्तितः
पशुवृत्तिभवेत्तस्य हन्युस्तान् दुष्टसत्वकान् १६
नृपायां शूद्रसंसर्गाज्ञातः पक्कश उच्यते
सुरावृत्तिं समारुह्य मधुविक्रयकर्मणा १७
कृतकानां सुराणाञ्च विक्रेता याचको भवेत्
पुक्कशाद्वैश्यकन्यायां जातो रजक उच्यते १८
नृपायां शूद्रतश्चौर्याज्ञातो रञ्जक उच्यते
वैश्यायां रञ्जकाज्ञातो नर्त्तको गायको भवेत् १९
वैश्यायां शूद्रसंसर्गाज्ञातो वैदेहिकः स्मृतः
अजानां पालनं कुर्यान्महिषीणां गवामपि २०
दधिक्षीराज्यतक्राणां विक्रयाज्ञीवनं भवेत्
वैदेहिकात्तु विप्रायां जाताश्चर्मोपजीविनः २१
नृपायामेव तस्यैव स्नचिकः पाचकः स्मृतः
वैश्यायां शूद्रतश्चौर्याजातश्चक्री च उच्यते २२
तैलपिष्टकजीवी तु लवणं भावयन् पुनः
विधिना ब्राह्मणः प्राप्य नृपायान्तु समन्त्रकम् २३
जातः सुवर्ण इत्युक्तः सानुलोमद्विजः स्मृतः
अथ वर्णक्रियां कुर्वन्नित्यनैमित्तिकीं क्रियाम् २४

अश्वं रथं हस्तिनं वा वाहयेद्वा नृपाज्ञया
सैनापत्यञ्च भैषज्यं कुर्याञ्जीवेत्तु वृत्तिषु २५
नृपायां विप्रतश्चौर्यात्संजातो यो भिषक्स्मृतः
अभिषिक्तनृपस्याज्ञां परिपाल्येत्तु वैद्यकम् २६
आयुर्वेदमथाष्टाङ्गं तन्त्रोक्तं धर्ममाचरेत्
ज्यौतिषं गणितं वाऽपि कायिकीं वृत्तिमाचरेत् २७
नृपायां विधिना विप्राज्ञातो नृप इति स्मृतः
नृपायां नृपसंसर्गात्प्रमादाद्गूढजातकः २८
सोऽपि क्षत्रिय एव स्यादभिषेके च वर्जितः
अभिषेकं विना प्राप्य गोज इत्यभिधायकः २९
सर्वन्तु राजवृत्तस्य शस्यते पदवन्दनम्
पुनर्भूकरणे राज्ञां नृपकानीन एव च ३०
वैश्यायां विधिना विप्राज्ञातो ह्यम्वष्ठ उच्यते
कृष्याजीवो भवेत्तस्य तथैवाग्नेयवृत्तिकः ३१
ध्वजिनी जीविका वाऽपि अम्बष्ठाः शस्त्रजीविनः
वैश्यायां विप्रतश्चौर्यात्कुम्भकारः स उच्यते ३२
कुलालवृत्त्या जीवेत नापिता वा भवन्त्यतः
सूतके प्रेतके वाऽपि दीक्षाकालेऽथ वापनम् ३३
नाभेरूर्द्ध्वं तु वपनं तस्मान्नापित उच्यते
कायस्थ इति जीवेत्तु विचरेच्च इतस्ततः ३४
काकाल्लौल्यं यमात्क्रौर्यं स्थपतेरथ कृन्तनम्
आद्याक्षराणि संगृह्य कायस्थ इति कीर्तितः ३५
शूद्रायां विधिना विप्राज्ञातः पारशवोमतः
भद्रकादीन् समाश्रित्य जीवेयुः पूजकाः स्मृताः ३६
शिवाद्यागमविद्याद्यैस्तथामण्डलवृत्तिभिः
तस्यां वै चौरसो वृत्तो निषादो जात उच्यते ३७

वने दुष्टमृगान् हत्वा जीवनं मांसविक्रयम्
नृपाज्ञातोऽथ वैश्यायां गृह्यायां विधिना सुतः ३८
वैश्यवृत्या तु जीवेत क्षात्रधर्मं न चाचरेत्
तस्यां तस्यैव चौरेण मणिकारः प्रजायते ३९
मणीनां राजतां कुर्यान्मुक्तानां वेधनक्रियाम्
प्रवालानाञ्च सूत्रित्वं शाखानां बलयक्रियाम् ४०
शूद्रस्य विप्रसंसर्गाज्जात उग्र इति स्मृतः
नृपस्य दण्डधारः स्याद्दण्डं दण्ड्येषु सञ्चरेत् ४१
तस्यैव चौरसंवृस्या जातः शुण्डक उच्यते
जातदुष्टान् समारोप्य शुण्डाकर्मणि योजयेत् ४२
शूद्रायां वैश्यसंसर्गाद्विधिना सूचकः स्मृतः
सूचकाद्विप्रकन्यायां जातस्तक्षक उच्यते ४३
शिल्पकर्माणि चान्यानि प्रासादलक्षणं तथा
नृपायामेव तस्यैव जातो यो मत्स्यबाधकः ४४
शूद्रायां वैश्यतश्चौर्यात् कटकार इति स्मृतः
वशिष्ठशापात्त्रेतायां केचित् पारशवास्तथा ४५
वैखानसेन केचित्तु केचिद्भागवतेन च
वेदशास्त्राबलम्वास्ते भविष्यन्ति कलौ युगे ४६
कटकारास्ततः पश्चान्नारायणगणाः स्मृताः
शाखा वैखानसेनोक्ता तन्त्रमार्गविधिक्रियाः ४७
निषेकाद्याः श्मशानान्ताः क्रियाः पूजाङ्गसूचिकाः
पञ्चरात्रेण वा प्राप्तं प्रोक्तं धर्मं समाचरेत् ४८
शूद्रादेव तु शूद्रायां जातः शूद्र इति स्मृतः
द्विजशुश्रूषणपरः पाकयज्ञपरान्वितः ४९
सच्छूद्रं तं विजानीयादसच्छूद्रस्ततोऽन्यथा
चौर्यात्काकवचो ज्ञेयश्चाश्वानां तृणवाहकः ५०

एतत्संक्षेपतः प्रोक्तं जातिवृत्तिविभागशः
जात्यन्तराणि दृश्यन्ते संकल्पादित एव तु ५१

इत्यौशनसं धर्मशास्त्रं समाप्तम्

शुक्रसंहिता समाप्ता

Reference:
*Smṛti Sandarbha*, Vol. III, (Delhi: Nag, 1981), pp. 1544ff.

# वृद्धहारीतस्मृतिः

श्रीगणेशायनमः

## प्रथमोऽध्यायः

### अथ पञ्चसंस्कारप्रतिपादनवर्णनम्

अम्बरीषस्तु तं गत्वा हारीतस्याश्रमं नृपः
ववन्दे तं महात्मानं बालार्कसदृशप्रभम् १
संपृष्टः कुशलस्तेन पूजितः परमासने
उपविष्टस्ततो विप्रमुवाच नृपनन्दनः २
भगवन् सर्वधर्म्मज्ञ तत्ववेदविदाम्वर
पृच्छामि त्वां महाभाग परमं धर्ममव्ययम् ३
ब्रूहि वर्णाश्रमाणान्तु नित्यनैमित्तिकक्रियाः
कर्तव्या मुनिशार्द्दूल नारीणाञ्च नृपस्य च ४
स्वरूपं जीवपरयोः कथं मोक्षपथस्य च
तत्प्राप्ते साधनं ब्रह्मन् वक्तुमर्हसि सुव्रत ५
एवमुक्तस्तु विप्रर्षिस्तेन राजर्षिणा तदा
उवाच परमप्रीत्या नमस्कृत्य जनार्दनम् ६
हारीत उवाच
शृणु राजन् प्रवक्ष्यामि सर्वं वेदोपवृंहितम्
यदुक्तं ब्रह्मणा पूर्वं पृच्छतो मम भूपते ७
तद्ब्रवीमि परं धर्मं शृणुष्वैकाग्रमानसः
सर्वेषामेव देवानामनादिः पुरुषोत्तमः ८
ईश्वरस्तु स एवान्ये जगतो विभुरव्ययः
नारायणो वासुदेवो विष्णुर्ब्रह्मात्मनो हरिः ९
स्रष्टा धाता विधाता च स एव परमेश्वरः
हिरण्यगर्भः सविता गुणधृङ्‌ निर्गुणोऽव्ययः १०
परमात्मा परं ब्रह्म परं ज्योतिः परात्परः

इन्द्रः प्रजापतिः सूर्यः शिवो वह्निः सनातनः ११
सर्व्वात्मकः सर्वसुहृत्सर्वभृद्भूतभावनः
यमी च भगवान्कृष्णो मुकुन्दोऽनन्त एव च १२
यज्ञो यज्ञपतिर्यज्वा ब्रह्मण्यो ब्रह्मणः पतिः
स एष पुण्डरीकाक्षः श्रीशो नाथोऽधिपो महान् १३
सहस्रमूर्द्धा विश्वात्मा सहस्रकरपादवान्
यद्गत्वा न विवर्तन्ते तद्धाम परमं हरेः १४
चतुर्भिः शोभनोपायैः साध्योऽयं सुमहात्मनः
तुरीयपदयोर्भक्त्या सुसिद्धोऽयमुदाहृतः १५
तं स्वीकुर्वन्ति विद्वांसः स्वस्वरूपतया सदा
नैसर्गिकं हि सर्वेषां दास्यमेव हरेः सदा १६
स्वाम्यं परस्वरूपं स्याद्दास्यं जीवस्य सर्वदा
प्रकृत्या त्वात्मनो रूपं स्वाम्यं दास्यमिति स्थितिः १७
दास्यमेव परं धर्मं दास्यमेव परं हितम्
दास्येनैव भवेन्मुक्तिरन्यथा निरयं भवेत् १८
विष्णोर्दास्यं परा भक्तिमेषां तु न भवेत् क्वचित्
तेषामेव हि संसृष्टं निरयं ब्रह्मणा नृप १९
नारायणस्य दासा ये न भवन्ति नराधमाः
जीवन्त एव चाण्डाला भविष्यन्ति न संशयः २०
तस्माद्दास्यं परां भक्तिमालभ्य नृपसत्तम
नित्यं नैमित्तिकं सर्वं कुर्य्यात्प्रीत्यै हरेः सदा २१
तस्य स्वरूपं रूपञ्च गुणांश्चापि विभूतयः
ज्ञात्वा समर्च्चयेद्विष्णुं यावज्जीवमतन्द्रितः २२
तमेव मनसा ध्यायेद्वाचा सङ्कीर्तयेत्प्रभुम्
जपेच्च जुहुयाद्भक्तो तद्वानेकविलक्षणः २३
शङ्खचक्रोर्ध्व पुण्ड्रादिधारणं दास्यलक्षणम्

तन्नामकरणञ्चैव वैष्णवन्तदिहोच्यते २४
अवैष्णवाश्च ये विप्रा हर्षदास्ते नराधमाः
तेषां तु नरके वासः कल्पकोटिशतैरपि २५
तदादि वर्षसञ्चारी मन्त्ररत्नार्थतत्ववित्
वैष्णवः स जगत्पूज्यो याति विष्णोः परं पदम् २५
अचक्रधारी यो विप्रो बहुवेदश्रुतोऽपि वा
स जीवन्नेव चण्डालो मृतो निरयमाप्नुयात् २६
तस्मात्ते हरिसंस्काराः कर्त्तव्या धर्मकाङ्क्षिणाम्
अयमेव परं धर्म्मः प्रधानं सर्वकर्म्मणाम् २७

इति वृद्धहारीतस्मृत्यां विशिष्टधर्म्मशास्त्रे पञ्चसंस्कार-
प्रतिपादनं नाम प्रथमोऽध्यायः

## द्वितीयोऽध्यायः

## अथ पुण्ड्रसंस्कारवर्णनम्

अम्बरीष उवाच
भगवन् वैष्णवाः पञ्च संस्काराः सर्व्वकर्मणाम्
प्रधानमिति यञ्चोक्तं सर्वैरेव महर्षिभिः १
तद्विधानं ममाचक्ष्व विस्तरेणैव सुव्रत
हारीत उवाच
शृणु राजन् प्रवक्ष्यामि निर्मला वैष्णवाः क्रियाः २
यदुक्तं ब्रह्मणा पूर्वं वसिष्ठाद्यैश्च वैष्णवैः
संस्काराणां तु सर्वेषामाद्यं चक्रादिधारणम् ३
तत्कर्तव्यं हि सर्वेषां विधीनां वै द्विजन्मनाम्
आचार्यं संश्रयेत् पूर्वमनघं वैष्णवं द्विजम् ४
शुद्धसत्वगुणोपेतं नवेज्याकर्मकारणम्
सत्सम्प्रदायसंयुक्तं मन्त्ररत्नार्थकोविदम् ५

ज्ञानवैराग्यसंपन्नं वेदवेदाङ्गपारगम्
शासितारं सदाचार्यैः सर्वधर्मविदांवरम् ६
महाभागवतं विप्रं सदाचारनिषेवणम्
आलोक्य सर्वशास्त्राणि पुराणानि च वैष्णवाः ७
तदर्थमाचरेद्यस्तु स आचार्य उदाहृतः
आस्तिक्यमानसं सद्भिरुपेतं धर्मवत्सलम् ८
श्रद्दधानं सदाचारं गुरुशुश्रूषतत्परम्
सम्वत्सरं प्रतीक्ष्यार्थे तं शिष्यं शासयेद्गुरुः ९
तस्याऽऽदौ पञ्च संस्कारान्कुर्यात्सम्यग्विधानतः
प्रातः स्नात्वा शुचौ देशे पूजयित्वा जनार्दनम् १०
स्नातं शिष्यं समानीय तेनैव सह देशिकः
स्नाप्य पञ्चामृतैर्गव्यैश्चक्रादीनर्चयेत्ततः ११
पुष्पैर्धूपैश्च दीपैश्च नैवेद्यैर्विविधैरपि
तत्तत्प्रकाशकैर्मन्त्रैरर्चयेत्पुरतो हरेः १२
अग्नौहोमं प्रकुर्व्वीत इध्माधानादिपूर्वकम्
पौरुषेण तु सूक्तेन पायसं घृतमिश्रितम् १३
आज्येन मूलमन्त्रेण हुत्वा चाष्टोत्तरं शतम्
वैष्णव्या चैव गायत्र्या जुहुयात्प्रयतो गुरुः १४
पश्चादग्नौ विनिक्षिप्य चक्राद्यायुधपञ्चकम्
पूजयित्वा सहस्रारं ध्यात्वा तद्वह्निमण्डले १५
षडक्षरेण जुहुयादाज्यं विंशतिसंख्यया
सर्वैश्च हेतिमन्त्रैश्च एकैकाज्याहुतिं क्रमात् १६
ततः प्रदक्षिणं कृत्वा स शिष्यो वह्निमात्मवान्
नमस्कृत्वा ततो विष्णुं जप्त्वा मन्त्रवरं शुभम् १७
प्राङ्मुखं तु समासीनं शिष्यमेकाग्रचेतसम्
प्रतपेच्चक्रशङ्खौ द्वौ हेतिभिर्मन्त्रमुच्चरन् १८

दक्षिणे तु भुजे चक्रं वामांशे शङ्खमेव च
गदां च भालमध्ये तु हृदये नन्दकं तदा १९
मस्तके तु तथा शार्ङ्गमङ्कयेद्विमलं तदा
पश्चात्प्रक्षाल्य तोयेन पुनः पूजां समाचरेत् २०
होमशेषं समाप्याथ वैष्णवान् भोजयेत्ततः
एवं तापः क्रियाः कार्याः वैष्णव्यः कल्मषापहाः २१
प्रधानं वैष्णवं तेषां तापसंस्कारमुत्तमम्
तापसंस्कारमात्रेण परां सिद्धिमवाप्नुयात् २२
केचित्तु चक्रशङ्खौ द्वौ प्रतप्तौ बाहुमूलयोः
धारयन्ति महात्मानश्चक्रमेकं तु चापरे २३
वैष्णवानां तु हेतीनां प्रधानं चक्रमुच्यते
तेनैव बाहुमूले तु प्रतप्तेनाङ्कयेद्बुधः २४
जात पुत्रे पिता स्नात्वा होमं कृत्वा विधानतः
तेनाग्निनैव सन्तप्रचक्रेण भुजमूलयोः २५
अङ्कयित्वा शिशोः पश्चान्नाम कुर्याच्च वैष्णवम्
पश्चात्सर्वाणि कर्माणि कुर्वीतास्य विधानतः २६
अङ्कयित्वा स चक्रेण यत्किञ्चित्कर्म सञ्चरेत्
तत्सर्वं याति वैकल्यमिष्टापूर्तादिकं नृप २७
कारयेन्मन्त्रदीक्षायां चक्राद्याः पञ्च हेतयः
चक्रं वै कर्मसिध्यर्थं जातकर्मणि धारयेत् २८
अचक्रधारी विप्रस्तु सर्वकर्मसु गर्हितः
अवैष्णवः समापन्नो नरकं चाधिगच्छति २९
चक्रादिचिह्नरहितं प्राकृतं कलुषान्वितम्
अवैष्णवस्तु तं दूरात् श्वपाकमिव सन्त्यजेत् ३०
अवैष्णवस्तु यो विप्रः श्वपाकादधमः स्मृतः
अश्राद्धे यो ह्यपाङ्क्तेयो रौरवं नरकं व्रजेत् ३१

अवैष्णवस्तु यो विप्रः सर्वधर्मयुतोऽपि वा
गवां षण्डति विज्ञेयः सर्वकर्मसु नार्हति  ३२
तस्माच्चक्रं विधानेन तप्तं वै धारयेद्द्विजः
सर्वाश्रमेषु वसतां स्त्रीणां च श्रुतिचोदनात्  ३३
अनायुधासो असुरा अदेवा इति वै श्रुतिः
चक्रेण तामपवप इत्यचा समुदाहृतम्  ३४
अपेत्थमङ्कमित्युक्तं वपेति श्रवणं तदा
तस्माद्वै तप्तचक्रस्य चाङ्कनं मुनिभिः श्रुतम्
पवित्रं विततं ब्राह्मं प्रभोर्गात्रे तु धारितम्  ३५
श्रुत्यैव चाङ्कयेद्गात्रे तद्ब्रह्मसमवाप्तये
यत्ते पवित्रमर्चिष्यमग्नेर्वीतमनन्तरा  ३६
ब्रह्मेति निहितन्नैव ब्रह्मणो श्रुतिवृंहितम्
पवित्रमिति चैवाग्निरग्निर्वै चक्रमुच्यते  ३७
अग्निरेव सहस्रारः सहस्रा नेमिरुच्यते
नेमितप्ततनुः सूर्यो ब्रह्मणा समतां व्रजन्  ३८
यत्ते पवित्रमर्चिष्यमग्नेस्तु न सुनिहितः
दक्षिणे तु भुजे विप्रो बिभृयाद्वै सुदर्शनम्  ३९
सव्ये तु शङ्खं विभृयादिति ब्रह्मविदो विदुः
इत्यादिश्रुतिभिः प्रोक्तं विष्णोश्चक्रस्य धारणम्  ४०
पुराणेष्वितिहासेषु सात्विकेषु स्मृतिष्वपि
शङ्खचक्रोर्द्धपुण्ड्रादिरहितं ब्राह्मणं नृप  ४१
यः श्राद्धे भोजयेद्विप्रः पितृणां तस्य दुर्गतिः
शङ्खचक्रोर्ध्वपुण्ड्रादिचिह्नैः प्रियतमैर्हरेः  ४२
रहितः सर्वधर्मेभ्यश्च्युतो नरकमाप्नुयात्
रुद्रार्चनं त्रिपुण्ड्रस्य धारणं यत्र दृश्यते  ४३
तच्छूद्राणां विधिः प्रोक्तो न द्विजानां कदाचन

प्रतिलोमानुलोमानां दुर्गागणसुभैरवाः ४४
पूजानीया यथार्हेण विल्वचन्दनधारिणम्
यक्षराक्षसभूतानि विद्याधरगणास्तदा ४५
चण्डालानामर्चनीया मद्यमांसनिषेवणाम्
स्ववर्णविहितं धर्ममेवं ज्ञात्वा समाचरेत् ४६
रुद्रार्च्चनाद्ब्राह्मणस्तु शूद्रेण समतां व्रजेत्
यक्षभूतार्च्चनात्सद्यश्चण्डालत्वमवाप्नुयात् ४७
न भस्म धारयेद्विप्रः परमापद्गतोऽपि वा
मोहाद्वै विभृयाद्यस्तु ससुरापो भवेद्ध्रुवम् ४८
तिर्यक्पुण्ड्रधरं विप्रं पट्टाम्वरधरं तथा
श्वपाक इव वीक्षेत न सम्भाषेत कुत्रचित्
तस्माद्द्विजातिभिर्धार्य्यं मूर्द्धपुण्ड्रंविधानतः ४९
मृदा शुभ्रेण सततं सान्तरालं मनोहरम्
स्नात्वा शुद्धेऽपि पूर्वाह्णे विष्णुमभ्यर्च्य देशिकः ५०
स्नातं शिष्यं समाहूय होमं कुर्वीत पूर्ववत्
परोमात्रेति सूक्तेन पायसं मधुमिश्रितम् ५१
हुत्वाऽथमूलमन्त्रेण शतमष्टोत्तरं घृतम्
स्थण्डिले तु ततः पश्चान्मण्डलानि यदा क्रमात् ५२
दीक्ष्वष्टमध्ये चत्वारि विन्यसेत् पुरतो हरेः
विलिखेत्तत्र पुण्ड्रादि विस्तारायामभेदतः ५३
तेष्वर्चयेत्ततो धीमान् केशवादीननुक्रमात्
तत्र तत्र च तन्मूर्तिं ध्यात्वा मन्त्रैः समर्च्चयेत् ५४
गन्धपुष्पादि सकलं मन्त्रेणैवार्चयेद्गुरुम्
प्रदक्षिणामनुव्रज्य स शिष्यः प्रणमेत्तथा ५५
तद्वाहौ निक्षिपेच्छिष्यः केशवादीननुक्रमात्
हृदि विन्यस्य पुण्ड्राणि गुरूक्तानि स वैष्णवः ५६

शुभ्रेणैव मृदा पश्चाद्विभृयात्सुसमाहितः
त्रिसन्ध्यासु मृदा विप्रो यागकाले विशेषतः  ५७
श्राद्धे दाने तथा होमे स्वाध्याये पितृतर्पणे
श्रद्धालुरूर्द्ध्वपुण्ड्राणि विभृयाद्द्विजसत्तमः  ५८
श्राद्धो होमस्तथा दानं स्वाध्यायः पितृतर्पणम्
भस्मीभवति तत्सर्वमूर्ध्वपुण्ड्म्विना कृतम्  ५९
ऊर्ध्वपुण्ड्रं विना यस्तु श्राद्धं कुर्व्वीत स द्विजः
सर्वं तद्राक्षसैर्नीतं नरकं चाधिगच्छति  ६०
ऊर्ध्वपुण्ड्रविहीनन्तु यः श्राद्धे भोजयेद्द्विजम्
अश्नन्ति पितरस्तस्य विण्मूत्रं नात्र संशयः  ६१
तस्मात्तु सततं धार्यमूर्ध्वपुण्ड्रं द्विजन्मना
धारयेन्न तिर्यक्पुण्ड्रमापद्यपि कदाचन  ६२
तिर्यक्पुण्ड्रधरं विप्रं चण्डालमिव सन्त्यजेत्
सोऽनर्हः सर्वकृत्येषु सर्वलोकेषु गर्हितः  ६३
ऊर्ध्वपुण्ड्रविहीनः सन्सन्ध्याकर्म्म समाचरेत्
सर्वं तद्राक्षसैर्नीतं नरकञ्च स गच्छति  ६४
यदि स्यात्तु मनुष्याणामूर्ध्वपुण्ड्रविवर्जितम्
द्रष्टव्यन्नव तत्किञ्चित् श्मशानमिव तद्भवेत्  ६५
ऊर्ध्वपुण्ड्रं मृदा शुभ्रं ललाटे यस्य दृश्यते
चण्डालोऽपि हि शुद्धात्मा विष्णुलोके महीयते  ६६
ऊर्ध्वपुण्ड्रस्य मध्ये तु ललाटे सुमनोहरे
लक्ष्म्या सह समासीनो रमते तत्र वै हरिः  ६७
निरन्तरालं यः कुर्य्यादूर्ध्वपुण्ड्रं द्विजाधमः
स हि तत्र स्थितं विष्णुं श्रियञ्चैव व्यपोहति  ६८
अथेदमूर्ध्वपुण्ड्रन्तु यः करोति द्विजाधमः
कल्पकोटिसहस्राणि रौरवं नरकं व्रजेत्  ६९

तस्माद्रागान्वितं पुराड्रन्धरेद्विष्णुपदाकृति
ललाटादिषु चाङ्गेषु सर्व्वकर्मसु वैष्णवः ७०
नासिकामूलमारभ्य ललाटान्तेषु विन्यसेत्
अङ्गुलद्वयमात्रन्तु मध्यच्छिद्रं प्रकल्पयेत् ७१
पार्श्वे चाङ्गुलमात्रन्तु विन्यसेद्द्विजसत्तमः
पुराड्राणामन्तराले तु हारिद्रां धारयेच्छ्रियम् ७२
ललाटे पृष्ठयोः कराठे भुजयोरुभयोरपि
चतुरङ्गुलमात्रन्तु विभृयादायकं द्विजः ७३
उरस्यष्टाङ्गुलं धार्यं भुजयोरायतं तदा
उदरे पार्श्वयोर्न्नित्यमायतन्तु दशाङ्गुलम् ७४
केशवादि नमोऽन्तैश्च प्रणवाद्यैरनुक्रमात्
ललाटे केशवं रूपं कुक्षौ नारायणं न्यसेत् ७५
वक्ष स्थले माधवञ्च गोविन्दं कराठदेशतः
विष्णुञ्च दक्षिणे पार्श्वे वाह्वोश्च मधुसूदनम् ७६
त्रिविक्रमन्तु वामांसे वामनं वामपार्श्वतः
श्रीधरं वामवाहौ तु हृषीकेशं तदा भुजे ७७
पृष्ठे च पद्मनाभन्तु ग्रीवे दामोदरं तदा
तत्प्रक्षालनतोयेन वासुदेवेति मूर्धनि ७८
केशवस्तु सुवर्णाभः शङ्खचक्रगदाधरः
शुक्लाम्बरधरः सौम्यो मुक्ताभरणभूषितः ७९
नारायणो घनश्यामः शङ्खचक्रगदासिभृत्
पीतवासा मणिमयैर्भूषणैरुपशोभितः ८०
माधवश्चोत्पलप्रख्यश्चक्रशार्ङ्गगदासिभृत्
चित्रमाल्याम्बरधरः पुराडरीकनिभेक्षणः ८१
गोविन्दः शशिवर्णः स्यात्पद्मशङ्खगदासिभृत्
रक्तारविन्दपादाब्जस्तप्तकाञ्चनभूषणः ८२

गौरवर्णो भवेद्विष्णुश्चक्रशङ्खहलासिभृत्
क्षौमाम्बरधरः स्रग्वी केयूराङ्गदभूषितः ८३
अरविन्दनिभः श्रीमान् मधुजित्कमलाननः
चक्रं शार्ङ्गञ्च मुसलं पद्मं दोर्भिर्विभर्त्यसौ ८४
त्रिविक्रमो रक्तवर्णः शङ्खचक्रगदासिभृत्
किरीटहारकेयूरकुण्डलैश्च विराजितः ८५
वामनः कुन्दवर्णः स्यात् पुण्डरीकायतेक्षणः
दोर्भिर्वज्रं गदां चक्रं पद्मं हैमं विभर्त्यसौ ८६
श्रीधरः पुण्डरीकाख्यश्चक्रशार्ङ्गी च पद्मधृक्
रक्तारविन्दनयनो मुक्तादामविभूषितः ८७
विद्युद्वर्णो हृषीकेशश्चक्रशार्ङ्गहलासिभृत्
रक्तमाल्याम्बरधरः पुण्डरीकावतंसकः ८८
इन्दनीलनिभश्चक्रशङ्खपद्मगदाधरः
पद्मनाभः पीतवासाश्चित्रमाल्यानुलेपनः
दामोदरः सार्वभौमः पद्मशार्ङ्गासिशङ्खभृत् ८९
पीतवासा विशालाक्षो नानारत्नविभूषितः
एवं पुण्ड्राणि सततं धारयेद्वैष्णवोत्तमः ९०
पुण्ड्रसंस्कार इत्येवं शिष्येणापि च कारयेत्
मन्त्रशेषं समाप्याथ वैष्णवान् भोजयेत्ततः ९१

इति पुण्ड्रसंस्कारो द्वितीयः

अथ वैष्णवानां नाम संस्कारवर्णनम्

तृतीयं नाम संस्कारं कुर्व्वीत शुभवासरे ९२
स्नात्वा संपूज्य देवेशं गन्धपुष्पादिभिर्गुरून्
नामाधिदैवतं पश्चात्पूजयेत्प्रयतात्मवान् ९३
द्वादशैव तु मासास्तु केशवाद्यैरधिष्ठिताः
आरभ्य मार्गशीर्षं तु यदा संख्या द्विजोत्तमः ९४

यस्मिन्मासि भवेद्दीक्षा तन्मूर्त्तेर्नाम चोदितम्
नृसिंहरामकृष्णाख्यं दासनाम प्रकल्पयेत् ९५
शक्त्या दशावताराणां वर्जयेन्नाम वैष्णवः
नामदद्यात्प्रयत्नेन वैष्णवं पापनाशनम् ९६
यस्य वै वैष्णवं नाम नास्ति चेत्तु द्विजन्मनः
अनामिकः स विज्ञेयः सर्वकर्मसु गर्हितः ९७
चक्रस्य धारणं यस्य जातकर्मणि सम्भवेत्
तत्र वै मासनामापि दद्याद्विप्रो विधानतः
ध्यात्वा समर्च्चयेन्नाम मूर्ति मन्त्रेण देशिकः ९८
धूपं दीपञ्च नैवेद्यं ताम्बूलञ्च समर्पयेत्
प्रदक्षिणमनुव्रज्य भक्त्या सम्यक्प्रणम्य च ९९
तन्मत्रं मूलमन्त्रं वा जपेत्साहस्रसङ्ख्यया
पश्चाद्धोमं प्रकुर्वीत शतमष्टोत्तरं हविः १००
वैष्णवैरनुवाकैश्च जुहुयात्सर्पिषा तदा
नाम दद्यात्ततः शिष्यं मन्त्रतोये समाप्लुतम् १०१
ततः पुष्पाञ्जलिं दत्वा होमशेषं समापयेत्
वैष्णवान्भोजयेत्पश्चाद्दक्षिणाद्यैश्च तोषयेत् १०२
एवं हि नामसंस्कारं कुर्वीत द्विजसत्तमः
गुणयोगेन चान्यानि विष्णोर्नामानि लौकिके १०३
विशिष्टं वैष्णवं नाम सर्वकर्मसु चोदितम्
हरेः परं पितुर्न्नाम यो ददात्यपरं सुतम् १०४
अतिरोचनकं दिव्यं तृतीयं श्रुतिचोदितम्
तस्माद्भगवतो नाम सर्वेषां मुनिभिः स्मृतम् १०५

इति नामसंस्कारस्तृतीयः

अथ वैष्णवानां मन्त्रसंस्कारवर्णनम्

एवं तृतीयसंस्कारं कृत्वा वै वैदिकोत्तमः

चतुर्थमन्त्रसंस्कारं कुर्वीत द्विजसत्तमः १०६
ततः स्नात्वा विधानेन पूजयेत् जगतां पतिम्
अष्टोत्तरसहस्रं तु मन्त्ररत्नं जपेद्गुरुः १०७
स्नातं शिष्यं समाहूय सुवेषं समलङ्कृतम्
आदाय कलशं रम्यं पवित्रोदकपूरितम् १०८
पञ्चत्वक्पल्लवयुतं पञ्चरत्नसमन्वितम्
मङ्गलद्रव्यसंयुक्तं मन्त्रेणैवाभिमन्त्रयेत् १०९
सम्मार्जयेत्ततः शिष्यं तज्जलेन कुशैः शुभैः
सूक्तैश्च विष्णुदेवत्यैः पावमानैस्तदैव च ११०
अष्टोत्तरशतं पश्चान्मन्त्ररत्नेन मार्जयेत्
अभिषिच्य ततो मूर्ध्नि शुक्लवस्त्रधरं शुचिम् १११
स्वलङ्कृतं समाचान्तमूर्ध्वपूण्ड्रधरं तदा
पवित्रहस्तं पद्माक्षमालया समलङ्कृतम् ११२
निवेश्य दक्षिणे स्वस्य आसने कुशनिर्मिते
स्वगृह्योक्तविधानेन पुरतोऽग्निं प्रकल्पयेत् ११३
पौरुषेण तु सूक्तेन श्रीसूक्तेन तथैव च
मध्वाज्यमिश्रितं रम्यं पायसं जुहुयाद्गुरुः ११४
अष्टोत्तरशतं पश्चादाज्यं मन्त्रद्वयेन च
मूलमन्त्रेण जुहुयाच्चरुं घृतविमिश्रितम् ११५
केशवादीन्समुद्दिश्य नित्यान्मुक्तांस्तथैव च
एकैकमाहुतिं हुत्वा होमशेषं समापयेत् ११६
ततः प्रदक्षिणं कृत्वा नमस्कृत्वा जनार्दनम्
आचार्यः स्वगुरुं नत्वा जपेद्गुरुपरम्पराम् ११७
मातरं सर्वजगतां प्रपद्येत श्रियं ततः
त्वं माता सर्वलोकानां सर्वलोकेश्वरप्रिये ११८
अपराधशतैर्जुष्टं नमस्तेन मम च्युतम्

एवं प्रपद्य लक्ष्मीं तां श्रियं सद्गुरुभावतः ११९
नित्ययुक्तं तया देव्या वात्सल्यादिगुणान्वितम्
शरण्यं सर्वलोकानां प्रपद्ये तं सनातनम्
नारायण दयासिन्धो वात्सल्यगुणसागर १२०
एनं रक्ष जगन्नाथ बहुजन्मापराधिनम्
इत्याचार्येण सन्दिष्टः प्रपद्यत जनार्दनम् १२१
प्रपद्येत ततः शिष्यो गुरुमेव दयानिधिम्
गुरो त्वमेव मे देवस्त्वमेव परमागतिः १२२
त्वमेव परमो धर्मस्त्वमेव परमं तपः
इति प्रपन्नमाचार्यो निवेश्य पुरतो हरेः १२३
प्रागग्रेषु समासीनं दर्भेषु सुसमाहितः
स्वाचार्यं पुरतो ध्यात्वा नमस्कृत्वाथ भक्तिमान् १२४
गुरोः परम्परां जप्त्वा हृदि ध्यात्वा जनार्दनम्
कृपया वीक्षितं शिष्यं दक्षिणं ज्ञानदक्षिणम् १२५
निक्षिप्य हस्त शिरसि वामं हृदि च विन्यसेत्
पादौ गृहीत्वा शिष्यस्तु गुरोः प्रयतमानसः १२६
भो गुरो ब्रूहि मन्त्रं मे ब्रूयादिति दयानिधे
अध्यापयेत्ततस्तस्मै मन्त्ररत्नं शुभाह्वयम् १२७
सन्न्यासञ्च समुद्रञ्च सर्पिषण्डोऽधिदैवतम्
सार्थमध्यापयेच्छिष्यं प्रयतं शरणागतम् १२८
अष्टाक्षरं द्वादशार्णं षट्कुक्षीं वैष्णवीं तदा
रामकृष्णनृसिंहाख्यान् मन्त्रान् तस्मै निवेदयेत् १२९
न्यासे वाप्यर्चने वापि मन्त्रमेकान्तिनं श्रयेत्
अवैष्णवोपदिष्टेन मन्त्रेण नरकं व्रजेत् १३०
अवैष्णवद् गुरोर्मन्त्रं यः पठेद्वैष्णवो द्विजः
कल्पकोटिसहस्राणि पच्यते नरकात्मना १३१

अचक्रधारिणं यस्तु मन्त्रमध्यापयेद्गुरुः
रौरवं नरकं प्राप्य चाण्डालीं योनिमाप्नुयात् १३२
तस्माद्दीक्षाविधानेन शिष्यं भक्तिसमन्वितम्
मन्त्रमध्यापयेद्विद्वान्वैष्णवं पापनाशनम् १३३
अनधीत्य वृयं मन्त्रं योऽन्यवैष्णवमुत्तमम्
अधीत्यमन्त्रसंसिद्धिं न प्राप्नोति न संशयः १३४
जातकर्मणि वा चौले तदा मौञ्जीनिबन्धने
चक्रस्य धारणं यत्र भवेत्तस्य तु तत्र वै १३५
उपनीय गुरुः शिष्यं गृह्योक्तविधिना ततः
अध्यापयेच्च सावित्रं तपोमन्त्रं द्वयं शुभम् १३६
प्राप्तमन्त्रस्ततः शिष्यः पूजयेच्छ्रद्धया गुरुम्
गोभूहिरण्यरत्नाद्यैः वासोभिर्भूषणैरपि १३७
सद्वक्ता शासयेच्छिष्यमाचार्यः संशितव्रत
स्वरूपं साधनं साध्यं मन्त्रेणास्मै निवेदयेत् १३८
द्वयेन वृत्तियाथात्म्यं सम्यगस्मै निवेदयेत्
आचार्याधीनवृत्तिस्तु संयतस्तु वसेत् सदा १३९
कर्मणा मनसा वाचा हरिमेव भजेत्सुधीः
यावच्च तीरपातन्तु द्वयमावर्तयेत्सदा १४०
एवं हि विधिना सम्यङ्मन्त्रसंस्कारसंकृतः १४१
इति मन्त्रसंस्कारश्चतुर्थः
अथ पञ्चसंस्कारविधिर्नामवर्णनम्
मन्त्रार्थतत्वविदुषं यागतन्त्रे नियोजयेत्
पूर्वाह्ने पूजयेद्देवं तस्य प्रियतरं शुभः १४२
मन्त्ररत्नविधानेन गन्धपुष्पादिभिर्गुरुः
अर्चयित्वाच्युतं भक्त्या होमं पूर्ववदाचरेत् १४३
सर्वैश्च वैष्णवैः सूक्तैः पायसं घृतमिश्रितम्

आज्यं मन्त्रेण होतव्यं शतमष्टोत्तरं तदा १४४
शक्त्या च वैष्णवैर्मन्त्रैः सर्वैर्होमं समाचरेत्
एकैकमाहुतिं हुत्वा सर्वाधरणदेवता १४५
प्रणवादिचतुर्थ्यन्तैस्तेषां वै नामभिर्यजेत्
होमशेषं समाप्याथ वैष्णवान् भोजयेत्तदा १४६
मन्त्ररत्नेन तद्बिम्बं पुष्पाञ्जलिशतं यजेत्
प्रणम्य भक्त्या देवेशं जप्त्वा मन्त्रमनुत्तमम् १४७
आहूय प्रणतं शिष्यं तद्बिम्बं दर्शयेद्गुरुः
कृपयाथ ततस्तस्मै दद्यद्बिम्बं हरेर्गुरुः १४८
एनं रक्ष जगन्नाथ केवलं कृपया तव
अर्चनं यत्कृतं तेन विभो स्वीकर्त्तुमर्हसि १४९
एवं लब्ध्वा जुरोर्बिम्बं पूजयेत्तं प्रयत्नतः
हिरण्यवस्त्राभरणयानशय्यासनादिभिः १५०
ततः प्रभृति देवेशमर्च्चयेद्विधिना सदा
श्रौतस्मार्त्तागमोक्तानां ज्ञात्वान्यतममच्युतम् १५१

इति वृद्धहारीतस्मृत्यां विशिष्टधर्मशास्त्रे पञ्चसंस्कार-
विधानं नाम द्वितीयोऽध्यायः

## तृतीयोऽध्यायः

### अथ भगवन्मन्त्रविधानवर्णनम्

अम्बरीष उवाच
भगवन् सर्वमन्त्राणां विधानं मम सुव्रत
ब्रूहि सर्वमशेषेण प्रयोगं सार्थसंस्कृतम् १
हारीत उवाच
शृणु राजन् प्रवक्ष्यामि मन्त्रयोगमनुत्तमम्
यथोक्तं विष्णुना पूर्वं ब्रह्मणा परमात्मना २

सर्वेषामेव मन्त्राणां प्रथमं गुह्यमुत्तमम्
मन्त्ररत्नं नृपश्रेष्ठ सद्यो मुक्तिफलप्रदम्  ३
सर्वैश्वर्यप्रदं पथ्यं सर्वेषां सर्वकामदम्
यस्योच्चारणमात्रेण परितुष्टो भवेद्धरिः  ४
देशकालादिनियममरिमित्रादिशोधनम्
स्वरवर्णादिदोषश्च पौरश्चरणकं न तु  ५
ब्राह्मणाः क्षत्रिया वैश्याः स्त्रियः शूद्रास्तथेतराः
तस्याधिकारिणः सर्वे सत्वशीलगुणा यदि  ६
पञ्चसंस्कारसम्पन्नाः श्रद्धावन्तोऽनसूयकाः
भक्त्या परमयाविष्टा युक्तास्तस्याधिकारिणः  ७
पञ्चविंशाक्षरो मन्त्रः पदैः षड्भिः समन्वितः
वाक्यद्वयं परं ज्ञेयं मन्त्ररत्नमनुत्तमम्  ८
यदाश्रयति विद्यादिः संस्थिता जगतां पतिम्
तया विद्याऽनपायिन्या संयुतः परमः पुमान्  ९
नारायणोऽच्युतः श्रीमान् वात्सल्यगुणसागरः
नाथः सुशीलः सुलभः सर्वज्ञः शक्तिमान् परः  १०
आपद्बन्धुः सदा मित्रं परिपूर्णमनोरथः
दयासुधाब्धिः सविता वीर्यवान् द्युतिमान्विभुः  ११
प्रपद्ये चरणौ तस्य शरणं श्रेयसे मम
श्रीमते विष्णवे नित्यं सर्वावस्थासु सर्वदा  १२
निर्ममो निरहङ्कारः कैङ्कर्यं करवाण्यहम्
एवमर्थं विदित्वैव पश्चान्मन्त्रं प्रयोजयेत्  १३
नारायणो महाशब्दो गायत्री च परा शुभा
स्वयं नारायणः श्रीमान् देवता समुदाहृतः  १४
करयोः स्थलयोराद्यमक्षरं विन्यसेद्द्विजः
शेषाक्षराणि देयानि चतुर्विंशतिपर्वसु  १५

षट्पदैरङ्गुलिन्यास मङ्गेषु च यथाक्रमम्
षडङ्गं षट्पदैः कृत्वा मन्त्रार्थैश्च यथाक्रमम् १६
मूर्ध्नि भाले नेत्रनासाश्रवणेषु तथाऽऽनने
भुजयोर्हृत्प्रदेशे च स्तनयोर्नाभिमण्डले १७
पृष्ठे च जघने कट्योरूर्वोर्जान्वोश्च पादयोः
पञ्चविंशात्त्ररारायत्य क्रमेणाङ्गेषु विन्यसेत् १८
एवं न्यासविधिं कृत्वा पश्चाद्ध्यानं समाचरेत्
इन्दीवरदलश्यामं कोटिसूर्याग्निवर्चसम् १९
चतुर्भुजं सुन्दराङ्गं सर्वाभरणभूषितम्
पद्मासनस्थं देवेशं पुण्डरीकनिभेक्षणम् २०
रक्तारविन्दसदृशदिव्यहस्तपदाञ्चितम्
माणिक्यमुकुटोपेतं नीलकुन्तलशीर्षजम् २१
श्रीवत्सकौस्तुभोरस्कं वनमालाविराजितम्
दिव्यचन्दलिप्ताङ्गं दिव्यपुष्पावतंसकम् २२
हारकुण्डलकेयूरनूपुरादि विराजितम्
कटकैरङ्गुरीयैश्च पीतवस्त्रेण शोभितम् २३
शङ्खपद्मगदाचक्रपाणिनं पुरुषोत्तमम्
वामाङ्के चिन्तयेत्तस्य देवीं कमललोचनाम् २४
तरुणीं सुकुमाराङ्गीं सर्वलक्षणशोभिताम्
दुकूलवस्त्रसंयुक्तां सर्वाभरणभूषिताम् २५
तप्तकाञ्चनसङ्काशां पीनोन्नतपयोवराम्
रत्नमण्डलसंयुक्तां नीलकुन्तलशीर्षजाम् २६
दिव्यचन्दनलिप्ताङ्गीं दिव्यपुष्पावतंतकाम्
मातुलिङ्गं च रक्ताब्जं दर्पणं वरदं तथा २७
देवीं च बिभ्रतीं दोर्भिश्चिन्तयेदिष्टदां सदा
एवं ध्यात्वा परं नित्यमर्चयेदच्युतं द्विजः २८

यथात्मनि तथा देवे ज्ञानकर्म समाचरेत्
अर्चयेदुपचारैश्च मनसा वा जनार्दनम्  २९
आवाहनासने पाद्यमर्घ्यमाचमनीयकम्
स्नानं वस्त्रोपवीते च भूषणं गन्धमेव च  ३०
पुष्पं धूपं तथा दीपं नैवेद्यं च प्रदक्षिणम्
नमस्कारञ्च ताम्बूलं पुष्पमालां निवेदयेत्  ३१
नमस्कृत्वा गुरून् पश्चाज्जपेन्मत्रं समाहितः
अष्टोत्तरसहस्रन्तु शतमष्टोत्तरं तथा  ३२
ध्यायन्वै मनसा देवं जपेदेकाग्रमानसः
प्राङ्मुखोदङ्मुखो वापि समासीनः कुशासने  ३३
त्रिसन्ध्यासु जपेद्देवं सर्वसिद्धिमवाप्नुयात्
आदावन्ते जपस्यास्य प्राणायामान् समाचरेत्  ३४
पूरकः कुम्भको रेच्यः प्राणायामस्त्रिलक्षणः
वामेन पूरयेद्वायुं वाह्यं नासा जपन्मखुम्  ३५
उभाभ्यां धारणं वायोः कुम्भकं समुदाहृतम्
तद्रेचनं दक्षिणेन रेचनं समुदाहृतम्  ३६
पर्यावृत्या पुनश्चैवं प्राणायामत्रयं क्रमात्
पूरके कुम्भके चैव रेवके च विशेषतः  ३७
अष्टाविंशतिवारं तु जपेन्मन्त्रं समाहितः
उत्तानं मुनिभिः प्रोक्तं प्राणायामं नृपोत्तम  ३८
जपन्द्वादशवारं तु उत्तमं तत्प्रकीर्तितम्
षड्वारन्तु कनीयः स्यात्त्रिवारमधमस्मृतम्  ३९
मनसैवार्च्चयेद्देवं पश्चादर्थं विचिन्तयेत्
प्राणायामत्रयं कृत्वा पश्चान्न्यासं समाचरेत्  ४०
स्नात्वा शुक्लाम्बरधरः कृत्वा साध्यादिकर्म च
धृतोद्धर्वपुण्ड्रदेहश्च पवित्रकर एव च  ४१

धृत्वा पद्माक्षमालां च सन्निधा वासने स्थितः
भूतशुद्धिविधानञ्च कृत्वा मन्त्रं प्रयोजयेत् ४२
अष्टाक्षरस्य मन्त्रस्य गुरुर्नारायण स्मृतः
छन्दश्च दैवी गायत्री परमात्मा च देवता
जपश्चाष्टाक्षरो मन्त्रः सर्वपापप्रणाशनः ४३
सर्वदुःखहरः श्रीमान् सर्वकामफलप्रदः
सर्वदेवात्मको मन्त्रस्ततो मोक्षप्रदो नृणाम् ४४
ऋचो यजूंषि सामानि तथैवाथर्वणानि च
सर्वमष्टाक्षरान्तस्थं तच्चान्यदपि वाङ्मयम् ४५
सर्वार्थो वेदगर्भस्थः वेदाश्चाष्टाक्षरे स्थिताः
अष्टाक्षरस्तु प्रणवे अकारे प्रणवः स्थितः ४६
इह लौकिकमैश्वर्यं स्वर्गाद्यं पारलौकिकम्
कैवल्यं भगवत्त्वञ्च मन्त्रोऽयं साधयिष्यति ४७
सकृदुच्चारणान्नृणां चतुर्वर्णफलप्रदम्
स्वरूपं साधनं प्राप्यं ददाति हि समञ्जसा ४८
महापापं चातिपापं विद्यते वोपपातकम्
जपादस्य मनोराशु प्रणश्यन्ति न संशयाः ४९
अश्वमेधसहस्राणि राजसूयशतानि च
सकृदष्टाक्षरं जप्त्वा लभते नात्र संशयः ५०
गवामयुतदानस्य पृथिव्या मण्डलस्य च
कन्याशतसहस्रस्य गजाश्वानां तथैव च ५१
दानस्य यत्फलं नृणां सत्पात्रे नृपनन्दन
शतवारं मनुं जप्त्वा तत्फलं सर्वमाप्नुयात् ५२
सार्थं समुद्रं सन्न्यासं सर्षिच्छन्दोऽधिदैवतम्
अष्टाक्षरमनुञ्जप्त्वा विष्णुसायुज्यमाप्नुयात् ५३
पदत्रयात्मकं मन्त्रं चतुर्थ्या सहितं तदा

स्वरूपसाधनोपेयमिति मत्वा जपेद्बुधः ५४
प्रणवेन स्वरूपं स्यात्साधनं मनसा तथा
संबिभक्त्या चतुर्थ्यात्र पुरुषार्थो भवेन्मनोः ५५
अकारश्चाप्युकारश्च मकारश्चेति तत्वतः
तान्येकधा समभवत्तदोमित्येतदुच्यते ५६
तस्मादोमिति प्रणवो विज्ञेयः साक्षरात्मकः
वेदत्रयात्मकं ज्ञेयं भूर्भुवःस्वरितीति वै ५७
अकारस्तु भवेद्विष्णुस्तदृग्वेद उदाहृतः
उकारस्तु भवेल्लक्ष्मीर्यजुर्वेदात्मको महान् ५८
मकारस्तु भवेज्जीवस्तयोर्दास उदाहृतः
पञ्चविंशाक्षरः साक्षात्सामवेदस्वरूपवान् ५९
पञ्चविंशोऽयं पुरुषः पञ्चविंश आत्मेति श्रुतेः
आत्मा पञ्चविंशः स्यादिति मम त्मानं संस्मरेत् ६०
इत्यौपनिषदं ह्यर्थं विदित्वा स्वं निवेदयेत्
अवधारणमन्ये तु मध्यमार्णं वदन्ति हि ६१
तदेवाग्निस्तदायुस्तत्सूर्यस्तदपि चन्द्रमाः
इत्येवं धारणश्रुतेरेवमेवोपवृंहितम् ६२
ऊकारेणैव श्रीशब्दः प्रोच्यते मुनिसत्तमः
न्यायेन गुणसिद्धिस्तु तस्यैव श्रीपतेर्वरौ ६३
श्रीरस्येशाना जगतो विष्णुपत्नीति वै श्रुतिः
कल्याणगुणसिद्धिस्तु लक्ष्मीर्भर्तुश्च नेतरा ६४
सामानाधिकरण्यत्वात्कारणत्वं तदोच्यते
अकार एव सर्वेषामक्षराणां हि कारणम् ६५
अकारो वै सर्वा वागित्यादि श्रुतिवचस्तथा
स्पर्शोष्मभिर्व्यज्यमानो नानाबहुविधोऽभवत् ६६
कारणत्वं तथैवास्य विष्णोर्वै जगतां पतेः

तस्मात्स्रष्टा च दाता च विधाता जगतां हरिः ६७
रक्षिता जीवलोकस्य गुणवानेव सर्वगः
अनन्या विष्णुना लक्ष्मीर्भास्करेण प्रभा यथा ६८
लक्ष्मीमनपगामिनीमिति श्रुतिवचो महत्
तस्मादकारो वै विष्णुः श्रीश एव जगत्पतिः ६९
लक्ष्मीपतित्वं तस्यैव नान्यस्येति सुनिश्चितम्
नित्यैवैषा जगन्माता हरेः श्रीरनपायिनी ७०
यथा सर्वगतो विष्णुस्तथैवैषा जगन्मयी
तस्मादकारो वै विष्णुर्लक्ष्मीर्भर्त्ता जगत्पतिः ७१
तस्मिंश्चतुर्थीयुक्तत्वात् त्रिपदस्य च संग्रहः
अकार प्रथमां तस्माच्चतुर्थ्यां संग्रहं न तु ७२
तच्च श्रुतिविरोधत्वान्न युक्तमिति चोदितम्
महसे ब्रह्मणे त्वा वै ओमित्यात्मानं युञ्जीत ७३
परस्य चात्मनां तस्माद्भेदस्तत्र सुनिश्चितः ७४
त्वमस्माकं तपस्यैव श्रुत्युक्तमपि पार्थिव
तौ शाश्वतौ त्रिषचिता वियन्ताविति वै तथा ७५
गृभिष्व दया प्रागेववात्मा न विश्वभृत्
असोयमर्त्यो मर्त्येन नयेनेत्येवयोनिता ७६
इत्यादि श्रुतयो भेदं वदन्ति परजीवयोः
दास्यमेवात्मनां विष्णोः स्वरूपं परमात्मनः ७७
साम्यं लक्ष्मीवरप्रोक्तं देवादीनां तथात्मनाम्
अनन्यशेषरूपा वै जीवास्तस्य जगत्पतेः ७८
दास्यं स्वरूपं सर्वेषामात्मनां सतपं हरेः
भगवच्छेषमात्मानमन्यथा यः प्रपद्यते ७९
स चैव हि महापापी चण्डालः स्यात् न संशयः
तस्मान्मकारवाच्योऽसौ पञ्चविंशात्मकः पुमान् ८०

अकारवाच्यस्येशस्य दास एवाभिधीयते
अनुज्ञानाश्रयो नित्यो निर्विकारोऽव्ययः सदा
देहेन्द्रियात्परो ज्ञाता कर्त्ता भोक्ता सनातनः  ८१
मकारवाच्यो जीवोसौ दास एव हरेः सदा
श्रीशस्याकारवाच्यस्य विष्णोरस्य जगत्पतेः  ८२
स्वस्वामिनोरुकारेण ह्यवधारणमुच्यते
स जीवः स्यादतः स्वामी सर्वदा नृपसत्तम  ८३
अनयोर्नान्यथेत्युक्तमुकारेण महर्षिभिः
इत्येवं प्रणवस्यार्थं प्रणवस्य पदस्य तु  ८४
आत्मनश्च स्वरूपत्वाद्विजेयमृषिसत्तमैः
सर्वेषामेव मन्त्राणां कारणं प्रणवः स्मृतः  ८५
तस्माद्व्याहतयो जातास्ताभ्यो वेदत्रयं तथा
भूरेत्येव हि ऋग्वेदो भुवरिति यजुस्तथा  ८६
स्वरिति सामवेदः स्यात्प्रणवो भूर्भुवःसुवः
भूर्विष्णुश्च तदा लक्ष्मीर्भुव इत्यभिधीयते  ८८
तयोः स्वरिति जीवस्तु सुव इत्यभिधीयते
अग्निर्वायुस्तथा सूर्यस्तेभ्य एव हि जज्ञिरे  ८८
य एता व्याहृतीर्हुत्वा सर्वं वेदं जुहोति वै
प्रसङ्गात्महितं चेदं मन्त्रशेषमुदीर्यते  ८९
अस्वातन्त्र्यात्तु जीवानामधीनं परमात्मनः
नमसा प्रोच्यते तस्मान्नहन्ताममतोऽपितम्  ९०
स्वरूपादित्रिवर्गस्य संसिद्धिर्न्नतु सैव हि
नमसा रहितं सव विफलं सम्प्रकीर्त्तितम्  ९१
नमसैव हि संसिद्धिर्भवेदत्र न संशयः
पुरतः पृष्ठतश्चैव पार्श्वतश्चावशेषतः  ९२
नमसैवेक्षते राजन् त्रिवर्गः सर्वदेहिनाम्

मकारेण स्वतन्त्रः स्यान्नरकस्तं निषिध्यति ९३
तस्माच्च नम इत्यत्र स्वातन्त्र्यमपनोदति
द्व्यक्षरस्तु भवेन्मृत्युस्त्र्यक्षरस्तु हि शाश्वतम् ९४
ममेति द्व्यक्षरं मृत्युर्न ममेति तु शाश्वतम्
न ममेति च सर्वत्र स्त्रातन्त्ररहिताय वै ९५
युज्यते मुनिभिः सम्यक्सर्वकर्मसु पार्थिव
तस्मात्तु नमसा युक्ता मन्त्राः सर्वे च पार्थिव ९६
सर्वसिद्धिप्रदां नृणां भवन्त्यत्र न संशयः
नमसा रहिता ये तु न तु मुक्तिप्रदा नृणाम् ९७
तस्मात्तु नमस्तेवैषां पारतन्त्र्यत्वमीशितुः
पारतन्त्र्याल्लभेत्सिद्धिं स्वातन्त्र्यान्नाशमेष्यति ९८
दास्यमेव हि जीवानां प्रोच्यते नमसैव तु
नमसा रहितं लोके किञ्चिदत्र न विद्यते ९९
नमो देवेभ्यो नम इति येषामीशे तथा मनः
हृतञ्चिदेनो नमसा आविवाक्येति वै श्रुतिः १००
क्षयैरकारः सम्प्रोक्तो नकारस्तं निषिध्यति
तस्मात्तु नर इत्यत्र नित्यत्येनोच्यते जनः १०१
नारा इति समूहत्वे बाहुल्यत्वाज्जनस्य च
तेषामयनमावासस्तेन नारायणः स्मृतः १०२
महाभूतान्यहङ्कारो महदव्यक्तमेव च
अण्डं तदन्तर्गता ये लोकाः सर्वे चतुर्दश १०३
चतुर्विधशरीराणि कालः कर्मेति व जगत्
प्रवाहरूपेणैवैषां नारत्वेनोच्यते बुधैः १०४
तेषामपि निवासत्वान्नारायण इतीरितः
अन्तर्बहिश्च जगतो धाता स च सनातनः १०५
स्त्रष्टा नियन्ता शरणं विधाता भूतभावनः

माता पिता सखा भ्राता निवासश्च सुहृद्गतिः १०६
योनौ श्रियः श्री परमस्तेन नारायणः स्मृतः
नराणां सर्वजगतामयनं शरणं हरिः १०७
तस्मान्नारायण इति मुनिभिः सम्प्रकीर्त्यते
सर्वेषु देशकालेषु सर्वावस्थासु सर्वदा १०८
तस्यैव किङ्करोऽस्मीति चतुर्दा परमात्मनः
भगवत्परिचर्यैव जीवानां फलमुच्यते १०९
तद्विना किं शरीरेण यातनास्य जनस्य तु
यस्मिन् शरीरे जीवानां न दास्यं परमात्मनः ११०
तदेव निरयं प्रोक्तं सर्वदुःखफलं भवेत्
दास्यमेव फलं विष्णोर्दास्यमेव परं सुखम् १११
दास्यमेव हरेर्मोक्षं दास्यमेव परं तपः
ब्रह्माद्याः सकला देवा वशिष्ठाद्या महर्षयः
काङ्क्षन्तः परमं दास्यं विष्णोरेव यजन्ति तम् ११२
तस्माच्चतुर्थ्या मन्त्रस्य प्रधानं दास्यमुच्यते
न दास्यवृत्तिर्जीवानां नाशहेतुः परस्य हि ११३
इत्थं सञ्चिन्त्य मन्त्राथ जपेन्मंत्रमतन्द्रितः
अविदित्वा मनोरर्थं जपेत्प्रयतमानसः ११४
न संसिद्धिमवाप्नोति स्वरूपञ्च न विन्दति
संसारञ्च समुद्रञ्च सर्षिचण्डोऽधि दैवतम् ११५
सार्द्धं स यज्ञं सद्ध्यानं मन्त्रमेव प्रपूजयेत्
नारायणार्षं गायत्री दैवी चन्द्रोऽधिदेवता ११६
परमात्मा च लक्ष्मीशो विष्णुरेवाच्युतो हरिः
प्रणयस्तु भवेद्बीजं चतुर्थी शक्तिरुच्यते ११७
क्रुद्धोल्काय महोल्काय विष्णूल्काय तथैव च
जाल्काय सहस्रोल्काय पञ्चाङ्गो न्यास उच्यते ११८

हृन्मूर्ध्नोश्च शिखायाञ्च कवचो नेत्रयोर्न्यसेत्
पञ्चाङ्गन्यासमित्युक्तं सर्वमन्त्रेषु वैष्णवैः ११९
यदा त्रयेण कुर्वीत षडङ्गं तु यथाक्रमम्
मूर्ध्न्यानने च हृदये भुजयोर्जघने तथा १२०
पृष्ठे च जान्वोः पदयोर्मन्त्रार्णानि यदा न्यसेत्
अष्टाक्षराण्यष्टदिक्षु क्रमेण तदनन्तरम् १२१
नासिकायां तथाक्ष्णोश्च श्रोत्रयोरानने तथा
कण्ठे च स्तनयोर्नाभौ गुह्ये च तदनन्तरम् १२२
अचक्राय विचक्राय सुचक्राय तथैव च
ज्वालामहासुचक्राय त्रैलोक्याय तदन्तरम् १२३
आधारकालचक्राय दशादिक्षु यथाक्रमम्
स्वाहान्तं प्रणवाद्यन्तं न्यसेच्चक्राणि वैष्णवः १२४
एवन्न्यासविधिं कृत्वा पश्चाद्ध्यानं समाचरेत्
हृदये प्रतिमायां वा जले सवितृमण्डले १२५
वह्नौ च स्थण्डिले वाऽपि चिन्तयेद्विष्णुमव्ययम्
बालार्ककोटिसङ्काशं पीतवस्त्रं चतुर्भुजम् १२६
पद्मपत्रविशालाक्षं सर्वाभरणभूषितम्
चक्रमब्जं गदां शङ्खं चतुर्दोर्भिर्धृतं तथा १२७
श्रीभूमिसहितं देवमासीनं परमासने
तत्र चाधारशक्त्याद्यैर्धर्माद्यैः सूरिभिर्धृतैः १२८
दिव्यरत्नमये पीठे पङ्कजेऽष्टदले शुभे
तत्कर्णिकोपरितले तप्तकाञ्चनसन्निभे १२९
देवीभ्यां सहितं तस्मिन्नासीनं पङ्कजासने
चिन्तयेद्दक्षिणे पार्श्वे लक्ष्मीं काञ्चनसन्निभाम् १३०
पद्महस्तविशालाक्ष्मीं दुकूलवसनां शुभाम्
वामे दूर्वादलश्यामां विचित्राम्बरभूषिताम् १३१

चिन्तयेद्धरणीं देवीं नीलोत्पलधरां शुभाम्
माहिष्यष्टदलाग्रेषु चिन्तयेद्धृतचामराम् १३२
एवं ध्यात्वा हरिं नित्यं जपेत्प्रयतमानसः
स्नातः शुक्लाम्बरधरः कृतकृत्यो यथाविधि १३३
धृतोर्द्ध्वपुण्ड्रदेहश्च पवित्रकर एव च
शुचिः कृष्णाजिनासीनः प्राणायामी च न्यासकृत् १३४
शङ्खचक्रगदाखड्गशार्ङ्गपद्मान्यनुक्रमात्
तार्क्ष्यञ्च वनमालाञ्च मुद्रा अष्टौ प्रपूजयेत् १३५
पश्चात् ध्यात्वा जगन्नाथं मनसैवार्चयेद्विभुम्
गन्धपुष्पादि सकलं मन्त्रेणैव निवेदयेत् १३६
अनेनाभ्यर्चितो विष्णुः प्रीतो भवति तत्क्षणात्
अयुतं वा सहस्रं वा त्रिसन्ध्यासु जपेन्मनुम्
विष्णोः समानरूपेण शाश्वतं पदमाप्नुयात् १३७
आयुष्कामी जपेन्नित्यं षण्मासं नियतेन्द्रियः
अयुतं तु जपेन्मन्त्रं सहस्रं जुहुयाद्धृतम् १३८
आयुर्निरामयं सम्पद्भवेद्वर्षशताधिकम्
विद्याकामी जपेद्वर्षं त्रिसन्ध्यास्वयुतं मनुम् १३९
जुहुया --- पुष्पैः सहस्रं नियतेन्द्रियः
अष्टादशानां विद्यानां भवेद्व्याससमो द्विजः १४०
विवाहार्थी जपेन्नित्यमेवं वर्षचतुष्टयम् १४१
राजहोमी सहस्रं तु लभेत्कन्यां सुशोभिताम्
सम्पत्कामी जपेन्नित्यं त्र्ययुतं वत्सरत्रयम् १४२
पद्मैर्वा पद्मपत्रैर्वा तथा होमी श्रियं लभेत्
भूकामी तु जपेन्नित्यं वत्सरं विजितेन्द्रियः १४३
दूर्वाभिर्जुहुयात्तद्वल्लभेद्भूमिमभीप्सितम्
राज्यकामी जपेन्नित्यं षडब्दं त्र्ययुतं तथा १४४

सहस्रं जुहुयान्नित्यं पायसं घृतमिश्रितम्
चक्रवर्ती भवेत् सद्य पद्माभर्त्तुः प्रसादतः १४५
द्वादशाब्दं जपेद्देवं सततं विजितेन्द्रियः
आत्महोमी तु यो नित्यमिन्द्रत्वं लभते नरः १४६
लक्षञ्जपेच्च यो नित्यं त्रिंशद्वर्षं जितेन्द्रियः
ब्रह्मत्वं वा शिवत्वं वा समाप्नोति न संशयः १४७
यावज्जीवं तु यो नित्यमयुतं सुसमाहितः
सहस्रं वा शतं वापि होतव्यं वह्निमण्डले १४८
आज्येन चरुणा वापि तिलैर्वा शर्करान्वितैः
पद्मैर्वा बिल्वपत्रैर्वा समिद्भिः पिप्पलस्य वा
कोमलैस्तुलसीपत्रैरर्चयित्वा सनातनम् १४९
अनन्तविहगेशानां क्षिप्रमन्यतमो भवेत्
किमत्र बहुनोक्तेन सर्वसिद्धिप्रदो नृणाम् १५०
श्रीमदष्टाक्षरो मन्त्रो नित्यप्रियतमो हरेः
आसीनो वा शयानो वा तिष्ठन्वा यत्र कुत्रचित् १५१
जपेदष्टाक्षरं मन्त्रं तस्य विष्णुः प्रसीदति
संस्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः १५२
अभितः सर्वदेवानां यो जपेत्सततं मनुम्
ब्रह्मघ्नो वा कृतघ्नो वा महापापयुतोऽपि वा १५३
अष्टाक्षरस्य जप्तारं दृष्ट्वा पापैः प्रमुच्यते
अष्टाक्षरस्य जप्तारो यथा भागवतोत्तमाः १५४
पुनन्ति सकलं लोकं सदेवासुरमानुषम्
अष्टाक्षरस्य जप्तारं प्रणमेद्यस्तु भक्तितः १५५
सर्वपापविनिर्मुक्तो विष्णुलोके महीयते
अचिन्त्यमेतन्माहात्म्यं मनोरस्य जगत्पतेः १५६
न हि वक्तुं मया शक्यं ब्रह्मादित्रिदशैरपि

अथ वक्ष्यामि माहात्म्यं द्वादशार्णस्य पार्थिव १५७
यस्योच्चारणमात्रेण द्वादशाब्दफलं लभेत्
नमो भगवते नित्यं वासुदेवाय शार्ङ्गिणे १५८
प्रणवेन समायुक्तं द्वादशार्णमनुं जपेत्
पूर्ववत्प्रणवस्यार्थं नमसश्च महामनोः १५९
ऐश्वर्यं च तथा वीर्यं तेजः शक्तिरनुत्तमा
ज्ञानं बलं यदेतेषां षण्णां भगवदीरितः १६०
एभिर्गुणैः पूर्ववाक्यैः स एव भगवान् हरिः
नित्या च या भगवती प्रोच्यते मुनिसत्तमैः १६१
ऐश्वर्यरूपा सा देवी सुभगा कमलालया
ईश्वरी सर्वजगतां विष्णुपत्नी सनातनी १६२
तस्याः पतित्वा धीशस्य भगवानिति चोच्यते
तस्मात्तु भगवान् श्रीमानेकार्थो मुनिभिः स्मृतः १६३
भगवानिति शब्दोऽयं तथा पुरुष इत्यपि
निरुपाधौ च वर्तेत वासुदेवेऽखिलात्मनि १६४
वक्ष्यन्ति केचिद्भगवान् ज्ञानवानिति सत्तमाः
तद्वासुदेवेनोक्तं स्यात्सामान्यत्वात्ततोऽन्यथा १६५
तस्मात्कल्याणगुणवान् श्रीमान् योऽसौ जगत्पतिः
स एव भगवान् विष्णुर्वासुदेवः सनातनः १६६
भगवते श्रीमते चेत्येकार्थे हि प्रोच्यते बुधैः
गुणवान् भगवानेव सृष्टिस्थिति विनाशकृत् १६७
द्वौ द्वौ गुणावधिष्ठाय सर्वाद्यमकरोत्प्रभुः
प्रद्युम्नश्चानिरुद्धश्च सङ्कर्षण इतीरितः १६८
भगवान् वासुदेवोऽसौ सृष्ट्याद्यमकरोत्स्वयम्
ऐश्वर्यवीर्यवान् सर्गे प्रद्युम्नः पर्यपद्यत १६९
तेजःशक्तिं समाविश्य अनिरुद्धो ह्यपालयत्

बलज्ञाने तथा द्वे तु सङ्कर्षणो ह्यधिष्ठितः १७०
अकरोद्भगवानेव संहारं जगतः पुनः
एवं षड्गुणपूर्णत्वात्पतित्वात्त्वपि च श्रियः १७१
सर्गादेः कारणत्वाच्च भगवानिति चोच्यते
सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः १७२
ततः स वासुदेवेति विद्वद्भिः परिपद्यते
चतुर्थी पूर्वविद्विद्यात्कैङ्कर्यार्थं महात्मनः १७३
एवं ज्ञात्वा मनोरर्थं द्वादशार्णस्य चक्रिणः
संसिद्धिं परमाप्नोति सम्यगावर्त्य चेतसा १७४
गत्वा गत्वा निवर्तन्ते सर्वक्रतुफलैरपि
तद्गत्वा न निवर्तन्ते द्वादशाक्षरचिन्तकाः १७५
द्वादशार्णं सकृज्जप्त्वा सर्वपापैः प्रमुच्यते
ब्रह्महत्यादिपापानि तत्संसर्गकृतानि च १७६
द्वादशार्णं मनोर्जप्तुर्दहत्यग्निरिवेन्धनम्
सर्वसौभाग्यसुखदं पुत्रपौत्राभिवर्द्धनम् १७७
सर्वकामप्रदं नृणामायुरारोग्यवर्द्धनम्
देवत्वममरेशत्वं शिवब्रह्मत्वमेव च १७८
द्वादशार्णमनुं जप्त्वा समाप्नोति न संशयः
दुराचारोऽपि सर्वाशी कृतघ्नो नास्तिकोऽपि वा १७९
द्वादशार्णमनुं जप्त्वा विष्णुसायुज्यमाप्नुयात्
प्रजापतिः कश्यपश्च मनुः स्वायम्भुवस्तथा १८०
सप्तर्षयो ध्रुवश्चैते ऋषयस्तस्य कीर्तिताः
वशिष्ठः कश्यपोऽत्रिश्च विश्वामित्रश्च गौतमः १८१
जमदग्निर्भरद्वाजस्त्वेते सप्तमहर्षयः
भगवान्वासुदेवो वै देवतास्य प्रकीर्त्तितः १८२
छन्दश्च परमा दैवी गायत्री समुदाहृता

साधकानां सदा राजन्कामुधेनुरितीरितः १८३
दशाङ्गुलीषु तलयोर्द्वादशार्णानि विन्यसेत्
पदैश्चतुर्भिरङ्गेषु विन्यसेत्तदनन्तरम् १८४
चतुरङ्गेषु विन्यस्य मन्त्रेणोत्तरयोर्द्वयोः
मूर्ध्न्यास्यनेत्रयोर्नासाकर्णयोर्भुजयो तथा
हृदि कुक्षौ तथा गुह्ये ऊर्वोर्जान्वोश्च पादयोः १८५
मन्त्रार्णानि तु विन्यस्य क्रमेणैव नृपोत्तम
अचक्राय विचक्राय सुचक्राय तथैव च १८६
तथा त्रैलोक्यचक्राय महाचक्राय वै तथा
असुरान्तकचक्राय स्वहान्तं प्रणवादिकम् १८७
हृदयादिषडङ्गेषु यथाशास्त्रं प्रयोजयेत्
क्षीराब्धौ शेषपर्यङ्के समासीनं श्रिया सह १८८
नीलजीमूतसङ्काशं तप्तकाञ्चनभूषणम्
पीताम्बरधरं देवं रक्ताब्जदललोचनम् १८९
दीर्घैश्चतुर्भिर्दोर्भिश्च सर्वाभरणभूषितैः
शङ्खचक्रगदाशार्ङ्गान् बिभ्राणं परमेश्वरम् १९०
नानाकुसुमसम्बद्धनीलकुन्तलशीर्षजम्
श्रीवत्सकौस्तुभोरस्कं वनमालाविभूषितम् १९१
समाश्लिष्टं श्रिया दिव्या पद्मया पद्महस्तया
स्तूयमानं विमानस्थैर्देवगन्धर्वकिन्नरैः १९२
मुनिभिः सनकाद्यैश्च सेवितञ्च सुरर्षिभिः
एवं ध्यात्वा हरिं नित्यं जपेन्मन्त्रं समाहितः १९३
अर्च्चयित्वा हृषीकेशं सुगन्धकुसुमैः सदा
शालग्रामादिकस्थानेष्वर्चऽमानं जपेद्बुधः १९४
जपित्वा दशसाहस्रं यावज्जीवं समाहितः
वैष्णवं पदमाप्नोति पुनरावृत्तिवर्जितम् १९५

आयुष्कामी जपेन्नित्यं वत्सरं विजितेन्द्रियः
संख्या द्वादशसाहस्त्रं होमं तिलसहस्त्रकम् १९६
लभेताऽऽयुः शतसमा दुःखरोगविवर्जितम्
विवाहकामी षरामासं जपेन्नित्यं जितेन्द्रियः १९७
आज्यहोमी सहस्त्रन्तु लभेत्कन्यां सुलक्षणाम्
सम्पत्कामी जपेन्नित्यं वत्सरन्तु सहस्त्रशः १९८
साज्यैश्च व्रीहिभिर्होमी सहस्त्रं श्रियमाप्नुयात्
राज्यमिन्द्रपदं वापि शिवत्वं ब्रह्मतामपि १९९
बहुकालं बिल्वपत्रैः कमलैर्वा जपेन्मनुम्
जुहुयाच्च जपेन्नित्यं तत्तत्प्राप्नोत्यसंशयम् २००
यं यं कामयते चित्ते तत्र तत्र नृपोत्तम
जुहुयान्मालतीपुष्पैरयुतं विजितेन्द्रियः २०१
तां तां सिद्धिमवाप्नोति पदं चाप्नोति वैष्णवम्
द्वादशार्णेन मनुना पक्षे पक्षे द्विजोत्तमः २०२
द्वादश्यां पूजयेद्विष्णुं कोमलैस्तुलसीदलैः
विष्णुतुल्य वपुः श्रीमान् मोदते परमे पदे २०३
द्वादशार्णमनोरेवं विधानं प्रोच्यते नृप
अद्य ते सम्प्रवक्ष्यामि षडक्षरमनोरिदम् २०४
विधानं सर्वफलदं जन्ममृत्युविकृन्तनम्
ओंनमो विष्णवे चेति षडक्षरमुदाहृतम् २०५
पूर्ववत्प्रणवस्यार्थं नमःशब्द उदाहृतः
व्याप्तत्वाद्व्यापकत्वाच्च विष्णुरित्यभिधीयते २०६
सदैकरूपरूपत्वात् सर्व्वात्मत्वाद्विभुत्वतः
अनामयत्वादीशत्वाद्भस्तत्वाद्घृणित्वतः
यथेष्ठफलदातृत्वाद्विष्णुरित्यभिधीयते २०७
णकारो बलमित्युक्तः षकारः प्राण उच्यते

तयोस्तु सङ्गतिर्यत्र तदात्मेत्युच्यते धृतिः २०८
तस्माराणकारषकारावनुसंहितमुत्तमम्
सप्राणं सबलं देव संहितामुत्तमां तु यः २०९
तस्यैवायुष्यमित्युक्तं नेतरस्यैव च श्रुतेः
एतदेव हि विद्वांसो वक्ष्यन्ते ये महर्षयः २१०
एवं वक्ष्यामहे किन्तु किमुत व्याख्यामहे वयम्
इमौ णकारषकारावसुसंहितमेति यत् २११
तदेव विष्णुः कृष्णेति जिष्णुरित्यभिधीयते
विष्णवे नम इत्येष मन्त्रः सर्वफलप्रदः २१२
ऐश्वर्यं तु विकारः स्यात्तादात्म्याराणद्वयं स्मृतम्
ऐश्वर्य्यद्वयबीजं स्याद्विष्णुमन्त्रमनुत्तमम् २१३
तत् षडर्णविधानेन केवलं वै जपेमहि
इत्युक्त्वा मुनयः सर्वे वेदवेदान्तपारगाः २१४
परित्यज्येतरं धर्मं तदेकशरणं गताः
एवं महामनुं जप्त्वा विधानेनाच्युतं गताः २१५
तस्मादेतन्महामन्त्रं सर्वसिद्धिप्रदं नृप
सकृदुच्चारणेनास्य हरिस्तत्र प्रसीदति २१६
ब्रह्माद्याः सनकाद्याश्च मुनयश्च जपन्ति हि
छन्दस्तु तस्य गायत्री देवता विष्णुरच्युतः २१७
स्यादोम्बीजं नमः शक्तिर्मनोरस्य प्रकीर्तितम्
त्रिभिः पदैः षडङ्गेषु यथासंख्यं सुविन्यसेत् २१८
अङ्गुलीष्वपि चाङ्गेषु मन्त्रार्णानि यथाक्रमात्
मूर्ध्न्यास्ये हृदये वाह्वोः पृष्ठे गुह्ये यथाक्रमम् २१९
विन्यस्य चक्रन्यासं च पश्चाद्ध्यानेषु तन्मयम्
प्रणवेनोन्मुखीकृत्य हृत्पङ्कजमधोमुखम् २२०
विकासयेच्च मन्त्रेण विमलं तस्य केशरम्

तस्योपरि च वह्न्यर्कसोमबिम्बानि चिन्तयेत् २२१
तत्र रत्नमयं पीठं तन्मध्येऽष्टदलाम्बुजम्
तस्मिन् कोटिशशाङ्काभं सर्वलक्षणलक्षितम् २२२
चतुर्भुजं सुन्दराङ्गं युवानं पद्मलोचनम्
कोटिकन्दर्पलावण्यं नीलभ्रूलतिकालकम् २२३
श्लक्ष्णनासं रक्तगण्डं बिम्बितोज्ज्वलकुण्डलम्
शङ्खचक्रगदापद्मधारणं दोर्भिरुज्वलैः २२४
केयूराङ्गदहाराद्यैर्भूषणैश्चन्दनैरपि
अलङ्कृतं गन्धपुष्पै रक्तहस्ताङ्घ्रिपङ्कजम् २२५
मुक्ताफलाभदन्तालिं वनमालाविभूषितम्
श्रीवत्सकौस्तुभोरस्कं दिव्यपीताम्बरं हरिम् २२६
तप्तकाञ्चनवर्णाभं पद्मया पद्महस्तया
समाश्लिष्टममुं देवं ध्यात्वा विष्णुमयो भवेत् २२७
मनसैवोपचाराणि कृत्वा मन्त्रं जपेत्ततः
त्रिसन्ध्यासु जपेन्नित्यं सहस्रं साष्टकं द्विजः २२८
विष्णोर्लोकमवाप्नोति पुनरावृत्तिवर्जितम्
पूर्ववज्जपहोमाज्यं कृत्वा सिद्धिं नरो लभेत् २२९
भगवत्सन्निधौ वापि तुलसीकाननेऽपि वा
समाहितमना जप्त्वा षडर्णं नियतेन्द्रियः २३०
तिलहोमायुतं कृत्वा सर्वसिद्धिमवाप्नुयात्
एवं विष्णुमनोः प्रोक्तं विधानं नृपसत्तम २३१
विधानैरधुनाऽमुष्य मन्त्रस्यापि ब्रवीमि ते
षडक्षरं दाशरथेस्तारकब्रह्म कथ्यते २३२
सर्वैश्वर्यप्रदं नृणां सर्वकामफलप्रदम्
एतमेव परं मन्त्रं ब्रह्मरुद्रादिदेवताः २३३
ऋषयश्च महात्मानो मुक्त्वा जप्त्वा भवाम्बुधौ

एतन्मन्त्रमगस्त्यस्तु जप्त्वा रुद्रत्वमाप्नुयात्  २३४
ब्रह्मत्वं काश्यपो जप्त्वा कौशिकस्त्वमरेशताम्
कार्त्तिकेयो मनुत्वञ्च इन्द्रार्कौ गिरिनारदौ  २३५
बालखिल्यादिमुनयो देवतात्वं प्रपेदिरे
एष वै सर्वलोकानामैश्वर्यस्यैव कारणम्  २३६
इममेव जपेन्मन्त्रं रुद्रस्त्रिपुरघातकः
ब्रह्महत्यादि निर्मुक्तः पूज्यमानोऽभवत्सुरैः  २३७
अद्यापि काश्यां रुद्रस्तु सर्वेषां त्यक्तजीविनाम्
दिशत्येतन्महामन्त्रं तारकब्रह्मनामकम्  २३८
तस्य श्रवणमात्रेण सर्व एव दिवं गताः
श्रीरामाय नमो ह्येष तारकब्रह्मनामकः  २३९
नाम्नां विष्णोः सहस्राणां तुल्य एव महामनुः
अनन्तो भगवन्मत्रो नानेव तु समाः कृताः
श्रियो रमणसामर्थ्यात्सौकर्यगुणगौरवात्  २४०
श्रीराम इति नामेदं तस्य विष्णोः प्रकीर्तितम्
रमया नित्ययुक्तत्वाद्राम इत्यभिधीयते  २४१
रकारमैश्वर्यबीजं मकारस्तेन संयुतः
अवधारणयोगेन रामेत्यस्मान्मनोः स्मृतः  २४२
शक्तिः श्रीरुच्यते राजन् सर्व्वाभीष्टफलप्रदा
श्रियो मनोरमो योऽसौ स राम इति विश्रुतः  २४३
चतुर्थ्या नमसश्चैव सोऽर्थः पूर्ववदेव हि
ब्रह्मा विष्णुश्च रुद्रश्च अगस्त्याद्या महर्षयः  २४४
छन्दश्च परमा देवी गायत्री समुदाहृता
श्रीरामो देवता प्रोक्तः सर्वैश्वर्यप्रदो हरिः  २४५
अङ्गुलीष्वपि चाङ्गेषु न्यासकर्माद्यवीजतः
मूर्ध्न्यास्ये हृदये पृष्ठे गुह्ये चरणयोस्तथा  २४६

वैष्णवाच्च गुरोः पञ्चसंस्कारविधिपूर्वकम्
अधीत्य मन्त्रं विधिना पश्चाद्देवं जपेद्बुधः २४७
ब्राह्मणाः क्षत्रिया वैश्याः स्त्रियः शूद्रास्तथेतराः
मन्त्राधिकारिणः सर्वे ह्यनन्यशरणा यदि २४८
स्नानादिकृतकृत्यः सन्नूर्ध्वपुण्ड्रः पवित्रधृत्
कृष्णाजिने समासीनः प्राणायामी च न्यासकृत् २४९
ध्यायेत्कमलपत्राक्षं जानकीसहितं हरिम्
नैव ध्यानं प्रकुर्वीत विग्रहे सति शार्ङ्गिणः २५०
चन्दनागुरुकर्पूरवासिते रत्नमण्डपे
वितानैः पुष्पमालाद्यैर्धूपैर्दिव्यैर्विराजिते २५१
तन्मध्ये कल्पवृक्षस्य छायायां परमासने
नानारत्नमये दिव्ये सौवर्णे सुमनोहरे २५२
तस्मिन् बालार्क सङ्काशे पङ्कजेऽष्टदले शुभे
वीरासने समासीनं वामाङ्काश्रितसीतया २५३
सुस्निग्धशाद्वलश्यामं कोटिवैश्वानरप्रभम्
युवानं पद्मपत्राक्षं कनकाम्बरशोभितम् २५४
सिंहस्कन्धानुरूपांसं कम्बुग्रीवं महाहनुम्
पीनवृत्तायतस्निन्धमहाबाहुचतुष्टयम् २५५
विशालवक्षसं रक्तहस्तपादतलं शुभम्
बिन्धूकस्मितमुक्ताभदन्तौष्ठद्वयशोभितम् २५६
पूर्णचन्द्राननं स्निग्धं भ्रूयुगं घननासिकम्
रम्भोरुद्वयमानीलकुन्तलं स्मितचन्द्रनम् २५७
तरुणादित्यसङ्काशकुण्डलाभ्यां विराजितम्
हारकेयूरकटकैरङ्गुलीयैश्च भूषणैः २५८
श्रीवत्सकौस्तुभाभ्याञ्च वैजयन्त्या विभूषितम्
हरिचन्दनलिप्ताङ्गं कस्तुरीतिलकाञ्चितम् २५९

शङ्खचक्रधनुर्बाणान् विभ्राणं दोर्भिरायतैः
वामाङ्के सुस्थितां देवीं तप्तकाञ्चनसन्निभाम् २६०
पद्माक्षीं पद्मवदनां नीलकुन्तलशीर्षजाम्
आरूढयौवनां नित्यां पीनोन्नतपयोधराम् २६१
दुकूलवस्त्रसम्बीतां भूषणैरुपशोभिताम्
भजन्तां कामदां पद्महस्तां सीतां विचिन्तयेत् २६२
लक्ष्मणं पश्चिमे भागे धृतच्छत्रं महाबलम्
पार्श्वे भरतशत्रुघ्नौ बालव्यजनपाणिनौ २६३
अग्रतस्तु हनूमन्तं बद्धाञ्जलिपुटं तथा
सुग्रीवं जाम्बवन्तञ्च सुषेणञ्च विभीषणम् २६४
नीलं नलञ्चाङ्गदञ्च ऋषभं दिक्षु पूजयेत्
वशिष्ठो वामदेवश्च जाबालिरथ कश्यपः २६५
मार्कण्डेयश्च मौद्गल्यस्तथा पर्वतनारदौ
द्वितीयावरणं प्रोक्तं रामस्य परमात्मनः २६६
धृष्टिर्जयतो विजयः सुराष्ट्रो राष्ट्रवर्धनः
अलको धर्मपालश्च सुमन्तुश्चाष्टमन्त्रिणः २६७
तृतीयावरणं तस्य तत्र चन्द्रादिदेवताः
कुमुदाद्याश्च चण्डाद्या विमाने चान्तरीयकाः २६८
एवं ध्यात्वा जगन्नाथं पूजयेन्मनसाऽपि वा
षट्सहस्रं जपेन्मन्त्रं जुहुयाच्च सहस्रकम् २६९
जुहुयाच्चरुणा वापि शतं पुष्पाञ्जलिं न्यसेत्
एवं संपूज्य देवेशं यावज्जीवमतन्द्रितः २७०
तद्देहपतने तस्य सारूप्यं परमे पदे
विद्या स्त्री राज्यवित्ताद्यं यं यं कामयते हृदि २७१
अन्यं देवं नमस्कृत्वा सर्वसिद्धिमवाप्नुयात्
विना वै वैष्णवं मन्त्रमन्यमन्त्रान्विसर्जयेत् २७२

तमेव पूजयेद्रामं तन्मन्त्रं वै जपेत्सदा
अन्यथा नाशमाप्नोति इह लोके परत्र च २७३
अद्वितीयं यदा मन्त्रं तारकब्रह्मतामकम्
जपित्वा सिद्धिमाप्नोति अन्यथा नाशमाप्नुयात् २७४
सावित्री मन्त्ररत्नञ्च तथा मन्त्रद्वयं शुभम्
सर्वमन्त्रं जपेत्पूर्वं संसिध्यर्थं जपेत्सदा २७५
अजप्यैतान्महामन्त्रान्न तु संसिद्धिमाप्नुयात्
तस्माच्छक्त्या जपित्वैतान् पश्चान्मन्त्रं प्रयोजयेत् २७६
विद्यास्त्रीवित्तराज्यादिरूपारोग्यजयार्थिनः
पुष्पाज्यबिल्वरक्ताब्ज जातिदूर्वाङ्कुरैस्तथा २७७
आरक्तकरवीरैश्च हुत्वा सिद्धिमवाप्नुयुः
सर्वसिद्धिमवाप्नोति तिलहोमेन वैष्णवः २७८
अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा
सायं प्रातश्च जुहुयात्षरामासं विजितेन्द्रियः २७९
यावज्जीवं जपेद्यस्तु भक्त्या राममनुस्मरन्
सदारपुत्रः सगणः प्रेत्य स्वर्गे महीयते २८०
षट्कारयुक्तं स्वाहान्तं रामास्त्रं सम्प्रकीर्तितम्
सर्वापत्सु जपेन्मन्त्रं रामं ध्यात्वा महाबलम् २८१
चोराग्निशत्रुसम्बाधे तथा रागभयेषु च
तोयवातग्रहादिभ्यो भयेषु च सभक्तिकम् २८२
शङ्खचक्रधनुर्बाणपाणिनं सुमहाबलम्
लक्ष्मणानुचरं रामं ध्यात्वा राक्षसनाशनम् २८३
सहस्रन्तु जपेन्मन्त्रं सर्वापद्भ्यो विमुच्यते
सूर्योदये यथा नाशमुपैति ध्वान्तमाशु वै २८४
तथैव रामस्मरणाद्विनाशं यान्त्युपद्रवाः
एवं श्रीराममन्त्रस्य विधानं ज्ञायते नृप २८५

विधानं कृष्णमन्त्रस्य वक्ष्यामि शृणु पार्थिव
श्रीकृष्णाय नमो ह्येष मन्त्रः सर्वार्थसाधकः २८६
कृष्णेति मङ्गलं नाम यस्य वाचि प्रवर्त्तते
भस्मीभवन्ति राजेन्द्र मह्यपातककोटयः २८७
सकृत्कृष्णेति यो ब्रूयाद्भक्त्या वापि च मानवः
पापकोटिविनिर्मुक्तो विष्णुलोकमवाप्नुयात् २८८
अश्वमेधसहस्राणि राजसूयशतानि च
भक्त्या कृष्णमनुं जप्त्वा समाप्नोति न संशयः २८९
गवाञ्च कन्यकानाञ्च ग्रामाणाञ्चायुतानि च
दत्त्वा गोदावरी कृष्णा यमुना च सरस्वती २९०
कावेरी चन्द्रभागादिस्नानं कृष्णेति योऽसमम्
कृष्णेति पञ्चकृज्जप्त्वा सर्वतीर्थफलं लभेत् २९१
कोटिजन्मार्जितं पापं ज्ञानतोऽज्ञानतः कृतम्
भक्त्या कृष्णमनुं जप्त्वा दह्यते तूलराशिवत् २९२
अगम्यागमनात्पापादभक्ष्याणाञ्च भक्षणात्
सकृत्कृष्णमनुं जप्त्वा मुच्यते नात्र संशयः २९३
सकृद्भूवाचकः शब्दो णश्च निर्वृतिवाचकः
उभयोः सङ्गतिर्यत्र तद्ब्रह्मेत्यभिधीयते २९४
णकारश्च षकारश्च बलप्राणा वुभौ स्मृतौ
आत्मन्येतौ समायुक्तौ जगतोऽस्यापि कृष्णतः २९५
तस्मात्कृष्णेति मन्त्रोऽयं वाचकः परमात्मनः
कृष्णेति परमो मन्त्रः सर्ववेदाधिकः स्मृतः २९६
श्रियः सतः प्राणपदात् श्रीकृष्ण इति वै स्मृतः
एवमर्थं विदित्वैव पश्चान्मन्त्रं जपेद्बुधः २९७
सर्वकामप्रदत्वाच्च बीजं कान्दर्पमुच्यते
नित्यानपाया श्रीशक्तिर्मनोरस्य प्रयुज्यते २९८

देवर्षिर्नारदस्तस्य गायत्री छन्द उच्यते
देवता रुक्मिणी भर्त्ता कृष्णः सर्वफलप्रदः २९९
पूर्ववद्विधिना मन्त्रं गृहीत्वा वैष्णवाद्गुरोः
स्नानवस्त्रादिभिः शुद्धः कृत्यं कृत्वोर्ध्वपुण्ड्रधृत् ३००
तुलसीकानने रम्ये देशे वा प्राङ्मुखः शुभे
कुशे कृष्णाजिने वापि पुष्पे वा शुभवासरे ३०१
समासीनस्तु कुर्वीत प्राणायामांश्च पूर्ववत्
आदिबीजेन कुर्वीत षडङ्गेषु यथाक्रमम् ३०२
अङ्गुलीष्वपि तेनैव न्यासकर्म समाचरेत्
मुखे वाह्वोश्च हृदये ध्वजे जान्वोश्च पादयोः ३०३
विन्यस्य मन्त्रवर्णानि चक्रं न्यासं ततः कृतम्
पूर्ववन्मन्त्रपादीनि स्मरेच्छाभरणानि च ३०४
विचित्रशुभपर्यङ्के दिव्यकल्पतरोरधः
सुगन्धपुष्पसङ्कीर्णे सर्वतः सुविचित्रिते ३०५
तस्मिन् देव्या समासीनं रुक्मिण्या रुक्मवर्णया
नीलोत्पलाभं कन्दर्पलावण्यं पद्मलोचनम् ३०६
चन्द्राननं जपापुष्परक्तहस्तपदाम्बुजम्
नीलकुञ्चितकेशं च सुकपोलं सुनासिकम् ३०७
सुभ्रूयुगं सुबिम्बोष्ठं सुदन्तालिविराजितम्
उन्नतांसं दीर्घबाहुं पीनवक्षसमव्ययम् ३०८
निरङ्कचन्द्रनखरं सर्वलक्षणलक्षितम्
श्रीवत्सकौस्तुभोद्भासं वनमालामहोरसम् ३०९
पीताम्बरं भूषणाढ्यं बालार्काभं सुकुण्डलम्
हारकेयूरकटकैरङ्गुलीयैश्च शोभितम् ३१०
मौक्तिकान्वितनासाग्रं कस्तूरीतिलकाञ्चितम्
हरिचन्दनलिप्ताङ्गं सदैवाऽऽरूढयौवनम् ३११

मन्दारपारिजातादिकुसुमैः कबरीकृतम्
अनर्घ्यमुक्ताहारश्च तुलसी वनमालया ३१२
चक्रशङ्खसमेताभ्यामुद्बाहुभ्यां विराजितम्
इतराभ्यां तथा देवीं समाश्लिष्टं निरन्तरम् ३१३
अलङ्कताभिः सत्यादिमहिषीभिः समाघृतम्
कालिन्दी सत्यभामा च मित्रविन्दा च सत्यवित् ३१४
सुनन्दा च सुशीला च जाम्बवती सुलक्षणा
एता महिष्यः संप्रोक्ताः कृष्णस्य परमात्मनः ३१५
ताभिश्च राजकन्यानां सहस्रैः परिसेवितम्
तारकावृत्तराजेव शोभितं निधिभिर्वृतम् ३१६
एवं ध्यात्वा हरिं नित्यमर्च्चयित्वा जपेन्मनुम्
शालग्रामे च तुलसीवने वा स्थण्डिले हृदि ३१७
स्मृत्वा जपेत्त्रिसन्ध्यासु षट्सहस्रं मनुं द्विजः
विष्णुतुल्यवपुः श्रीमान्विष्णुलोकमवाप्नुयात् ३१८
सर्वसिद्धिमवाप्नोति इह लोके परत्र च
विद्यार्थी वेणुगायन्तं जपेत् ध्यायन् ऋतुत्रयम् ३१९
जुहुयात्कुसुमैः शुभ्रैर्विद्यासिद्धिमवाप्नुयात्
आयुष्कामी तु पूर्वाह्णे वत्सरान् ह्ययुतं जपेत् ३२०
ध्यायेच्छिशुतनुं कृष्णं तिलैर्हुत्वाऽऽयुराप्नुयात्
कन्यार्थी तु जपेत्सायं षोडशं त्र्ययुतं हरिम् ३२१
ध्यात्वा सहस्रं जुहुयाल्लाजैर्मधुविमिश्रितः
स्त्रियं लभेत्स्वाभिमतां रूपौदार्यवतीं सतीम् ३२२
सम्पत्कामी जपेन्नित्यं मध्याह्ने तु ऋतुत्रयम्
द्वारकायां सुधर्मायां रत्नसिंहासने स्थितम् ३२३
शङ्खादिनिधिभी राजकुलैरपि सुसेवितम्
हारादिभूषणैर्युक्तं शङ्खाद्यायुधधारिणम् ३२४

ध्यात्वा संपूज्य होमं च जपश्चायुत संख्यया
अब्जबिल्वदलैर्वाऽपि होमं मधुविमिश्रितम्  ३२५
शाश्वतीं श्रियमाप्नोति कुबेरसदृशो भवेत्
रूपलावण्यकामी तु राममण्डलमध्यगम्  ३२६
ध्यायन् स्त्रिमासमयुतं जप्त्वा लावण्यवान् भवेत्
एवं कृष्णमनोरस्य माहात्म्यं परिकीर्तितम्  ३२७
अनन्तान् भगवन्मत्रान् वक्तुं शक्यं न ते मया
वाराहं नारसिंहञ्च वामनं तुरगाननम्  ३२८
क्रमेणैव तु वक्ष्यामि यथावच्छृणु पार्थिव
हुङ्कारं प्रथमं बीजमाद्यं वाराहमुच्यते  ३२९
पश्चात्तु धरणीबीजं लक्ष्मीबीजं ततः परम्
त्रीन् बीजानादितः कृत्वा पश्चान्मन्त्रप्रयोजनम्  ३३०
ओं नमो भगवते पश्चाद्वराहरूपाय भूर्भुवः
स्वः पतयेति भूपतित्वं मे देहीति तदाप्यायस्वेति  ३३१
अङ्गुलीषु यथाऽङ्गेषु बीजेनाऽऽद्येन वै क्रमात्
यथा सन्न्यासवद्धृत्वा पश्चाद्ध्यानं समाचरेत्  ३३२
बृहत्तनुं बृहद्ग्रीवं बृहद्दंष्ट्रं सुशोभनम्
समस्तवेदवेदाङ्गसाङ्गोपाङ्गयुतं हरिम्  ३३३
रजताद्रिसमप्रख्यं शतबाहुं शतेक्षणम्
उद्धृत्य दंष्ट्रया भूमिं समालिङ्ग्य भुजैर्मुदा  ३३४
ब्रह्मादित्रिदशैः सर्वैः सनकाद्यैर्मुनीश्वरः
स्तूयमानं समन्ताच्च गीयमानञ्च किन्नरैः  ३३५
एवं ध्यात्वा हरिं नित्यं प्रातरष्टोत्तरं शतम्
जप्त्वा लभेच्च भूपत्वं ततो विष्णुपुरं व्रजेत्  ३३६
नमो यज्ञवराहाय यित्यष्टाक्षरको मनुः
उक्तबीजत्रयं पूर्वं कृत्वा मन्त्रं जपेद्बुधः  ३३७

मूलमन्त्रमिदं प्राहुर्वाराहं मुनिपुङ्गवाः
एतमेव परं मन्त्रं जप्त्वा भूमिपतिर्भवेत्  ३८
नित्यमष्टसहस्रं तु जपेद्विष्णुं विचिन्तयन्
कमलैर्बिल्पपत्रैर्वा जुहुयाच्च दशांशकम्  ३३९
एवं संवत्सरं जप्त्वा सार्वभौमो भवेद्ध्रुवम्
राज्यं कृत्वा च धर्मेण पश्चाद्विष्णुपदं व्रजेत्  ३४०
विधानं नारसिंहस्य मनोर्वक्ष्यामि सुव्रत
उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुखम्  ३४१
नृसिंहं भीषणं भद्रं मृत्योर्मृत्युं नमाम्यहम्
आर्षं ब्रह्माऽनुष्टुप्च्छन्दो देवता च नृकेसरी  ३४२
चतुश्चतुश्च षट् षट्च षट्चतुश्च यथाक्रमात्
शिरो ललाटनेत्रेषु मुखवाह्वङ्घ्रिसन्धिषु  ३४३
साग्रेषु कुक्षौ हृदये गले पार्श्वं द्वयेऽपि च
अपराङ्गे ककुद्मे च न्यसेद्वर्णान्यनुक्रमात्  ३४४
वायोर्दशाक्षरं यत्तु बहूङ्कारं जपेत् सकृत्
विन्दुना सहितं यत्तु नृसिंहं बीजमुच्यते  ३४५
अङ्गुलीषु तथाङ्गेषु न्यासन्तेनैव चोदितम्
तद्बीजमादितः कृत्वा मन्त्रं पश्चात्प्रयोजयेत्  ३४६
ओं नमो भगवते वासुदेवाय नमो नरसिंहाय ज्वालामालिने
दीर्घदंष्ट्रायाग्निनेत्राय सर्वरक्षोघ्नाय सर्वभूतविनाशाय दह दह
पच पच रक्ष रक्ष हुं फट् स्वाहा इति ज्वालामालिपातालनृसिंहाय
नमः । बीजेनैवन्यासः । ओं ह्रीं क्षौं क्रौं हुं फट्
अस्य मन्त्रस्य ब्रह्मार्षं पङ्क्तिश्छन्दो नृसिंहो देवता
नृसिंहास्त्रमिदं बीजेनैव न्यासः
श्रीकारपूर्वो नृसिंहो द्विर्जयादुपरि स्थितः
त्रिःसप्तकृत्वो जप्तुः स्यान्महाभयनिवारणम्  ३४७

अस्य ब्रह्मा च रुद्रश्च प्रह्लादश्च महर्षयः
तथैव जगति च्छन्दो देवता च नृकेसरी
न्यासं बीजेन कुर्वीत ततो ध्यानं नृपोत्तम ३४८
माणिक्याद्रिसमप्रभं निजरुचा सन्त्रस्तरक्षोगणम्
जानुन्यस्तकराम्बुजं त्रिनयनं रत्नोल्लसद्भूषणम्
बाहुभ्यां धृतशङ्खचक्रमनिशं दंष्ट्रोल्लसत्स्वाननम्
ज्वालाजिह्वमुदग्रकेशनिचयं वन्दे नृसिंहं प्रभुम् ३४९
उद्यत्कोटिरविप्रभं नरहरिं कोटिक्षपेशोज्वलम्
दंष्ट्राभिः सुमुखोज्वलं नखमुखैर्दीर्घैरनेकैर्भुजैः
निर्भिन्नासुरनायकन्तु शशभृत्सूर्य्याग्निनेत्रत्रयम्
विद्युद्जिह्वसटाकलापभयदं वह्निं वहन्तं भजे ३५०
कोपादालोलजिह्वं विवृतनिजमुखं सोमसूर्य्याग्निनेत्रं-
पादादानाभिरक्तं प्रसभमुपरि संभिन्नदैत्येन्द्रगात्रम्
चक्रं शङ्खं सपाशाङ्कुशमुसलगदाशार्ङ्ग वाणान्वहन्तम्
भीमं तीक्ष्णाग्रदंष्ट्रं मणिमयविविधाकल्पमीडे नृसिंहम् ३५१
महाभयेष्विदं ध्यानं सौम्यमभ्युदयेषु च
सौवर्णं मण्डपान्तस्थं पद्मं ध्यायेत्सकेसरम् ३५२
पञ्चास्यवदनं भीमं सोमसूर्य्याग्निलोचनम्
तरुणादित्यदित्यसङ्काशं कुण्डलाभ्यां विराजितम् ३५३
उपेयन्यासं सुमुखं तीक्ष्णदंष्ट्रविराजितम्
व्यात्तास्य मरुणोष्ठञ्च भीषणैर्नयनैर्युतम् ३५४
सिंहस्कन्धानुरूपांसं वृत्तायतचतुर्भुजम्
जपासमाङ्घ्रिहस्ताब्जं पद्मासनसुसंस्थितम् ३५५
श्रीवत्सकौस्तुभोरस्कं वनमालाविराजितम्
केयूराङ्गदहाराढ्यं नूपुराभ्यां विराजितम् ३५६
चक्रशङ्खाभयवरचतुर्हस्तं विभुं स्मरेत्

वामाङ्के संस्थितां लक्ष्मीं सुन्दरीं भूषणान्विताम्  ३५७
दिव्यचन्दनलिप्ताङ्गीं दिव्यपुष्पोपशोभिताम्
गृहीतपद्मयुगलमातुलिङ्गकरां चलाम्  ३५८
एवं देवीं नृसिंहस्य वामाङ्कोपरिसंस्थिताम्
ध्यात्वा जपेज्जपं नित्यं पूजयेच्च यथाविधि  ३५९
क्षौं ह्रीं श्रीं श्रीं नृसिंहाय नमः
इमं लक्ष्मीनृसिंहस्य जपेत्सर्वार्थदं मनुम्
अष्टोत्तरसहस्रं वा जपेत्सन्ध्यासु वाग्यतः  ३६०
अखण्डबिल्वपत्रैश्च जुहुयादाज्यमिश्रितैः
सर्वसिद्धिमवाप्नोति षण्मासं प्रयतो भवेत्  ३६१
देवत्वममरेशत्वं गन्धर्वत्वं तथा नृप
प्राप्नुवन्ति नराः सर्वे स्वर्गं मोक्षञ्च दुर्लभम्  ३६२
यं यं कामयते चित्ते तं तमेवाऽऽप्नुयाद्ध्रुवम्
ब्रह्मर्षी तत्र गायत्री नरसिंहश्च देवता  ३६३
तदेव बीजं शक्तिः श्रीर्मनोरस्य विधीयते
न्यासमध्येन बीजेन चार्चनं तुलसीदलैः  ३६४
पूर्वोक्तविधिना पीठे पूजयित्वा समाहितः
परितः पूजयेद्दिक्षु गरुडं शङ्करं तथा  ३६५
शेषञ्च पद्मयोनिञ्च श्रियं मायां धृतिं तथा
पुष्टिं समर्च्चयद्दिक्षु ततो लोकेश्वरान् यजेत्  ३६६
महाभागवतं दैत्यनाशकं देवमग्रतः
एवं सम्पूज्य देवेशं नारसिंहं सनातनम्  ३६७
तत्पदं समवाप्नोति मुदितः सजनैः सह
कर्पूरधवलं देवं दिव्यकुण्डलभूषितम्  ३६८
किरीटकेयूरधरं पीताम्बरधरं प्रभुम्
पद्मासनस्थं देवेशं चन्द्रमण्डलमध्यगम्  ३६९

सूर्य्यकोटिप्रतीकाशं पूर्णचन्द्रनिभाननम्
मेखलाजिनदण्डादिधारणं बटुरूपिणम् ३७०
कलधौतमयं पात्रं दधानं वसुपूजितम्
पीयूषकलशं वामे दधानं द्विभुजं हरिम् ३७१
सनकाद्यैः स्तूयमानं सर्वदेवैरुपासितम्
एवं ध्यात्वा जपेनित्यं स्वासने च समाहितः ३७२
विष्णवे वामनायेति प्रणवादिनमोऽन्तकः
इन्द्रार्षञ्च विराट्छन्दो देवता वामनः स्वयम् ३७३
सुधाबीजं सुदीर्घन्तु बीजमाद्यन्तु वामनम्
तेनैव तु षडङ्गाद्यं न्यासं कुर्व्वीत वैष्णवः ३७४
दध्यन्नं पायसं वाऽऽपि जुहुयात्प्रत्यहं द्विजः
औपासनाग्नौ जुहुयादष्टोत्तरशतं गृही ३७५
कुबेरसदृशः श्रीमान्भवेत्सद्यो न संशयः
ओंनमो विष्णवे पतये महाबलाय स्वाहा ३७६
इति वामनमन्त्रः--
स्मृत्वा त्रैविक्रमं रूपं जपेन्मन्त्रमनन्यधीः ३७७
मुक्तो बन्धाद्भवेत् सद्यो नात्र कार्य्या विचारणा
ह्रीं श्रीं श्रीवामनाय नम इति मूलमन्त्रः
ब्रह्मार्षं चैव गायत्री देवता च त्रिविक्रमः
न्यासं बीजेन जपवानष्टोत्तरसहस्रकम् ३७८
इति वामनमन्त्रस्य जपादन्नपतिर्भवेत्
उद्गीथप्रणवोद्गीथ सर्ववागीश्वरेश्वर ३७९
सर्ववेदमयाचिन्त्य सर्वं बोधय मे पितः
हुं ऐं हयग्रीवाय नमः
नित्यार्षं चैव गायत्री हयग्रीवोऽस्य देवता
न्यासं बीजेन कृत्वाऽथ पश्चाद्ध्यानं समाचरेत् ३८०

शरच्छशाङ्कप्रभमश्ववक्त्रं मुक्तामयैराभरणैरुपेतम्
रथाङ्गशङ्खाञ्चितबाहुयुग्मं जानुद्वयं न्यस्तकरं भजामः ३८१
शङ्खाभः शङ्खचक्रे करसरसिजयोः पुस्तकं चान्यहस्ते
विभ्रद्व्याख्यानमुद्रां लसदितरकरो मण्डलस्थः सुधांशोः
आसीनः पुण्डरीके तुरगवरशिराः पूरुषो मे पुराणः
श्रीमानज्ञानहारी मनसि निवसता मृग्यजुःसामरूपः ३८२
एवं ध्यात्वा जपेन्मत्रं सन्ध्यासु विजितेन्द्रियः
सर्ववेदार्थतत्त्वज्ञो भवेदत्र न संशयः ३८३
अष्टोत्तरसहस्त्रं वा शतमष्टोत्तरन्तु वा
जपेच्च जुहुयाच्चैवं साज्यैः शुभ्रैः सतण्डुलैः ३८४
विद्यासिद्धिमवाप्नोति षण्मासं द्विजसत्तमः
अष्टादशानां विद्यानां बृहस्पतिसमो भवेत् ३८५
सहस्त्रारं हुं फडित्येवं मूलं सौदर्शनं मनुम्
अहिर्बुध्न्योऽनुष्टुभस्य देवता च सुदर्शनम् ३८६
अचक्राय विचक्राय सुचक्राय तथैव च
विचक्राय सुचक्राय ज्वालाचक्राय वै क्रमात् ३८७
षडङ्गेषु च विन्यस्य पश्चाद्ध्यानं समाचरेत्
नमश्चकाय स्वाहेति दशादिक्षु यथाक्रमम् ३८८
चक्रेण सह बध्नामीत्युक्त्या प्रतिदिशेत्ततः
त्रैलोक्यं रक्ष रक्ष हुं फट् स्वाहा इति वै क्रमात् ३८९
अग्निप्रकारमन्त्रोऽयं सर्वरक्षाकरः परः
ओं मूर्ध्नि स भ्रूमध्ये हं मुखे स्त्राहमधीत्यतः ३९०
रं जुह्ये हं तु जान्वोश्च फट् पदद्वयसन्धिषु
कल्पान्तार्कप्रकाशं त्रिभुवनमखिलं तेजसा पूरयन्तम्
रक्ताक्षं पिङ्गकेशं रिपुकुलभयदम्भीमदंष्ट्राजहासम्
शङ्खं चक्रं गदाब्जं पृथुतरमुशलं चापपाशाङ्कुशाढ्यम्

विभ्राणन्दोर्भिराद्यं मनसि मुररिपुं भावयेच्चक्रसंज्ञम् १९१
ओं नमो भगवते महासुदर्शनाय हुं फट्
इति षोडशाक्षरमिति सुदर्शनविधानम् ३९२
इति वृद्धहारीतस्मृतौ विशिष्टधर्म्मशास्त्रे भगवन्मन्त्रविधानं नाम
तृतीयोऽध्यायः

## चतुर्थोऽध्यायः

### अथ प्राप्तकालभगवत्समाराधनविधिवर्णनम्

हारीत उवाच
अथ वक्ष्यामि राजेन्द्र विष्णोराराधनं परम्
प्रत्यूषे सहसोत्थाय सम्यगाचम्य वारिणा १
आत्मानं देहमीशञ्च चिन्तयेत्संयतेन्द्रियः
ज्ञानानन्दमयो नित्यो निर्विकारो निरामयः २
देहेन्द्रियात्परः साक्षात्पञ्च विंशात्मको ह्यहम्
अस्मिन्देशे वसाम्यद्य शेषभूतो हि शार्ङ्गिणः ३
शुक्रशोणितसम्भूते जरारोगाद्युपद्रवे
मेदोरक्तास्थिमांसादिदेहद्रव्यसमाकुले ४
मलमूत्रवसापङ्के नानादुःखसमाकुले
तापत्रयमहावह्निदह्यमानेऽनिशम्भृशम् ५
इषणात्रयकृष्णाहिबाध्यमाने दुरत्यये
क्लिश्यामि पापभूयिष्ठे कारागृहनिभेऽशुभे ६
बहुजन्मबहुक्लेशगर्भवासादि दुःखिते
वसामि सर्वदोषाणामालये दुःखभाजने ७
अस्माद्विमोक्षणायैव चिन्तयिष्यामि केशवम्
वैकुण्ठे परमव्योम्नि दुग्धाब्धौ वैष्णवे पदे ८
अनन्तभोगिपर्य्यङ्के समासीनं श्रिया सह

इन्द्रनीलनिभं श्यामं चक्रशङ्खगदाधरम्  ९
पीताम्वरधरं देवं पद्मपत्रायतेक्षणम्
श्रीवत्सकौस्तुभोरस्कं सर्वाभरणभूषितम्  १०
चिन्तयित्वा नमस्कृत्वा कीर्तयेद्दिव्यनामभिः
सङ्कीर्त्य नामसाहस्त्रं नमस्कृत्वा गुरूनपि  ११
तुलसीं काञ्चनं गाञ्च संस्पृश्याथ समाहितः
दूराद्बहिर्विनिष्क्रम्य शुचौ देशे च निर्जने  १२
कर्णस्थ ब्रह्मसूत्रस्तु शिरः प्रावृत्य वाससा
कुर्यान्मूत्रपुरीषे च ष्ठीवनोच्छ्वासवर्जितः  १३
अहन्युदङ्मुखो रात्रौ दक्षिणाभिमुखस्तथा
समाहितमना मौनी विरामूत्रे विसृजेत्ततः  १४
उत्थायातन्द्रितः शौचं कुर्यादभ्युद्धृतैर्जलैः
गन्धलेपक्षयकरं यथासङ्ख्यां मृदा शुचिः  १५
अर्द्धप्रसृतिमात्रां तु मृदं दद्याद्यथोक्तवत्
षडपाने त्रिलिङ्गे तु सव्यहस्ते तथा दश  १६
उभयोः सप्त दद्याच्च तिस्त्रस्तिस्त्रस्तु पादयोः
आजङ्घान्मणिबन्धात्तु प्रक्षाल्य शुभवारिणा  १७
उपविष्टः शुचौ देशे अन्तर्जानुकरस्तथा
पवित्रपाणिराचामेत्प्रसृतिस्थः स वारिणा  १८
त्रिः प्राश्याङ्गुष्ठमूलेन द्विधोन्मृज्य कपोलकौ
मध्यमाङ्गुलिभिः पश्चादिद्वरोष्ठौ मृजयेत्तथा  १९
नासिकौष्ठान्तरं पश्चात्सर्वाङ्गुलिभिरेव च
पादौ हस्तौ शिरश्चैव जलैः संमार्जयेत्ततः  २०
अङ्गुष्ठतर्जनीभ्यां तु स्पृशेत् द्वौ नासिकापुटौ
अङ्गुष्ठानामिकाभ्यां तु चक्षुःश्रोत्रे जलैः स्पृशेत्  २१
कनिष्ठाङ्गुष्ठनाभिञ्च तलेन हृदयन्ततः

सर्वाङ्गुलिभिः शिरसि बाहुमूले तथैव च
नामभिः केशवाद्यैश्च यथासङ्ख्यमुपस्पृशेत् २२
द्विराचामेत्तु सर्वत्र विरामूत्रोत्सर्जने त्रयम्
सामान्यमेतत्सर्वेषां शौचं तु द्विगुणोदितम् २३
आचम्यातःपरं मौनी दन्तान् काष्ठेन शोधयेत्
प्राङ्मुखोदङ्मुखो वापि कषायं तिक्तकराटकम् २४
कनिष्ठाग्रमितस्थूलं द्वादशाङ्गुलमायतम्
पूर्वार्धः कृतकूर्चेन तेन दन्तान्निकर्षयेत् २५
अपां द्वादशगराडूषैः वक्त्रं संशोधयेद्द्विजः
मुखं संमार्जयित्वाऽथ पश्चादाचमनं चरेत्
पवित्रपाणिराचम्य पश्चात् स्नानं समाचरेत् २६
नद्यां तडागे खाते वा तथा प्रस्रवणे जले
तुलसीमृत्तिकां धात्रीमुपलिप्य कलेवरे २७
अभिमन्त्र्य जलं पश्चान्मूलमन्त्रेण वैष्णवः
निमज्ज्य तुलसीमिश्रं जलं सम्प्राशयेत्ततः २८
आचम्य मार्जनं कुर्यात्कुशैः सतुलसीदलैः
पौरुषेण तु सूक्तेन आपो हि ष्ठादिभिस्तथा २९
निमज्ज्याप्सु जले पश्चात्त्रिवारमघमर्षणम्
उत्थाय पुनराचम्य पश्चादप्सु निमज्ज्य वै ३०
मन्त्ररत्नं त्रिवारं तु जपन्ध्यायन्सनातनम्
पिवेदुत्थाय तेनैव त्रिवारमभिमन्त्रितम् ३१
आचम्य तर्पयेद्देवान् पितृनपि विधानतः
निष्पीड्य कूले वस्त्रं तु पुनराचमनं चरेत् ३२
धौतवस्त्रं सोत्तरीयं सकौपीनं धरेत्स्थितम्
निबद्धशिखकच्छस्तु द्विराचम्य यथाविधि ३३
धारयेदूर्ध्वपुराड्राणि मृदा शुभ्राणि वैष्णवः

श्रीकृष्णातुलसीमूलमृदा वाऽपि प्रयत्नतः ३४
मन्त्रेणैवाभिमन्त्र्याथ लालाटादिषु धारयेत्
नासिकामूलमारभ्य विभृयाच्छ्रीपदाकृति ३५
सान्तरालं भवेत्पुराड्रँ दराडाकारं तु वा तथा
ललाटादि तथा पश्चाद्ग्रीवान्तं केशवादिभिः ३६
नाम्नां द्वादशभिर्मूर्ध्नि वासुदेवं तलाम्बुना
पवित्रपाणिः शुद्धात्मा सन्ध्यां कुर्यात्समाहितः ३७
प्रादेशमात्रौ कौशेयौ साग्रौ मूलयुतौ तथा
अन्तर्गर्भौ सुविमलौ पवित्रं कारयेद्द्विजः ३८
देवार्चने जपे होमे कुर्याद्ब्राह्मयं च पवित्रकम्
इतरे वर्तुलग्रन्थिरेवं धर्मो विधीयते ३९
पथि दर्भाश्रिता दर्भा ये दर्भा यज्ञभूमिषु
स्तरणासनपिराडेषु ब्रह्मयज्ञे च तर्पणे ४०
पाने भोजनकाले च धृतान् दर्भान्विसर्जयेत्
सपवित्रकरेणैव आचामेत्प्रयतो द्विजः ४१
आचान्तस्य शुचिः पाणिर्यथापाणिस्तथा कुशः
सन्ध्याचमनकाले तु धृतं न परिवर्जयेत् ४२
अप्रसूताः स्मृता दर्भाः समिधस्तु कुशाः स्मृताः
समूलास्तु कुशा ज्ञेयाश्छिन्नाग्रास्तृणसंज्ञिताः ४३
कुशोदकेन यत्कराठं नित्यं संशोधयेद्द्विजः
न पर्युषन्ति पापानि ब्रह्मकूर्चं दिने दिने ४४
कुशासनं सदापूतं जपहोमार्च्चनादिषु
केशेनैव कृतं कर्म सर्वमानन्यमश्नुते ४५
तस्मात्कुशपवित्रेण सन्ध्यां कुर्यात् यथाविधि
स्मगृह्योक्तविधानेन सन्ध्योपास्तिं समाचरेत् ४६
ध्यात्वा नारायणं देवं रविमराडलमध्यगम्

गायत्र्याऽर्घ्यं प्रदद्याच्च जपं कुर्वीत भक्तिमान् ४७
सूर्यस्याभिमुखो जप्त्वा सावित्रीं नियतात्मवान्
उपस्थानं ततः कृत्वा नमस्कुर्यात्ततो हरिम् ४८
नमो ब्रह्मण इत्यादि जपित्वाऽथ विसर्जयेत्
ततः सन्तर्पयेद्विष्णुं मन्त्ररत्नेन मन्त्रवित् ४९
शतवारं सहस्रं वा तुलसीमिश्रितैर्जलैः
वैकुण्ठपार्षदं पश्चात्तर्पयेच्च यथाविधि ५०
अनन्तदीपारेखादिदेवतानामनुक्रमात्
एकैकमञ्जलिं दत्त्वा पश्चादाचमनं चरेत्
श्रीशस्याऽऽराधनार्थं वै कुर्यात्पुष्पस्य सञ्चयम् ५१
तुलसीबिल्वपत्राणि दूर्वा कौशेयमेव च
विष्णुक्रान्तं मरुवकं केशाम्बुददलं तथा ५२
उशीरं जातिकुसुमं कुन्दञ्चैव कुरण्टकम्
शमीञ्चम्पाङ्कदम्बञ्च चूतपुष्पं च माधवीम् ५३
पिप्पलस्य प्रबालानि जाम्बवं पाटलं तथा
आस्फोटं कुटजं लोध्रं कर्णिकारञ्च किंशुकम् ५४
नीपार्जुने शिंशपञ्च श्वेतकिंशुकनामकम्
जम्बीरं मातुलिङ्गं च यूथिकारचयं तथा ५५
पुन्नागं वकुलं नागकेशराशोकमल्लिकाः
शतपत्रं च हारिद्रं करवीरं प्रियङ्गु च ५६
नीलोत्पलं तूत्पलञ्च नन्द्यावर्तञ्च कैतकम्
घटजं स्थलपद्मं च सर्वाणि जलदानि च ५७
तत्कालसम्भवं पुष्पं गृहीत्वाऽथ गृहं विशेत्
वितानादियुते दिव्यधूपदीपैर्विराजिते ५८
चन्दनागरुकस्तूरी कर्पूरामोदवासिते
विचित्रङ्गवल्याढ्ये मण्डपे रत्नपीठके ५९

विस्तीर्णपुष्पपर्यङ्के देव्या सहितमच्युतम्
सन्निधा वासने स्थित्वा कुशे पद्मासने स्थितः ६०
प्राणायामविधानेन भूतशुद्धिं विधाय च
प्राणायामत्रयं कृत्वा पश्चाद्ध्यानं यथोक्तवत् ६१
परव्योम्नि स्थितं देवं लक्ष्मीनारायणं विभुम्
पराभिः शक्तिभिर्युक्तं भूलीलाविमलादिभिः ६२
अनन्तविहगाधीशसैन्याद्यैः सुरसत्तमैः
चण्डाद्यैःकुमुदाद्यैश्च लोकपालैश्च सेवितम् ६३
चतुर्भुजं सुन्दराङ्गं नानारत्नविभूषणम्
वामाङ्कस्थश्रिया युक्तं शङ्खचक्रगदाधरम् ६४
मन्त्ररत्नविधानेन न्यासमुद्रादिकर्मकृत्
पञ्चौपनिषदं न्यासं कुर्यात्सर्वत्र कर्मसु ६५
ओमीशाय नमः परायेति परमेष्ठ्यात्मने नमः
ओं यां नमः परायेति ततः पुरुषात्मने नमः ६६
ओं रां नमः परायेति ततो विश्वात्मने नमः
ओं वां नमः परायेति स्वनिवृत्यात्मने नमः ६७
ओं लां नमः परायेति ततः सर्वात्मने नमः
शिरोनासाग्रहृदयगुह्यपादेषु विन्यसेत् ६८
यथाक्रमेण तन्मन्त्रान्पञ्चाङ्गेषु क्रमान्न्यसेत्
तन्मुद्रया तदाऽऽवाह्य दद्यादासनमेव च ६९
पाद्यार्घ्याचमनस्नानपात्राणि स्थाप्य पूजयेत्
पूरयित्वा शुभजलं पात्रेषु कुसुमैर्युतम् ७०
द्रव्याणि निक्षिपेत्तेषु मङ्गलानि यथाक्रमात्
उशीरं चन्दनं कुष्ठं पाद्यपात्रे विनिक्षिपेत् ७१
विष्णुक्रान्तञ्च दूर्व्वाञ्च कौशेयान्तिलसर्षपान्
अक्षतांश्च फलं पुष्पमर्घ्यपात्रे विनिक्षिपेत् ७२

जातीफलञ्च कर्पूरमेलाञ्चाचमनीयके
मकरन्दं प्रबालञ्च रत्नं सौवर्णमेव च ७३
तानि दद्यात्स्नानपात्रे धात्रीं सुरतरुं तथा
द्रव्याणामप्यलाभे तु तुलसीपत्रमेव च ७४
चन्दनं वा सुवर्णं वा कौशेयं वा विनिक्षिपेत्
दर्शयेत्सुरभेर्मुद्रां पूजयेत्कुसुमव्रजैः ७५
अभिमन्त्र्य च मन्त्रेण धूपदीपैर्निवेदयेत्
अनन्तं चोद्धरण्या च दद्यात्पाद्यादिकं तथा ७६
तत्पात्रक्षालनं कृत्वा तथा पुष्पाञ्जलिं न्यसेत्
सौवर्णानि च रौप्याणि ताम्रकांस्यानि योजयेत् ७७
पात्राणामप्यलाभे तु शङ्खमेकं विशिष्यते
शङ्खोदकं सदा पूतमतिप्रियतरं हरेः ७८
उद्धरिण्या जलं दद्यान्नाप्सु शङ्खं निमज्जयेत्
अष्टाक्षरेण मनुना मन्त्ररत्नेन वा यजेत् ७९
पाद्यार्घ्याचमनं दत्त्वा मधुपर्कं निवेदयेत्
पुनराचमनं दत्त्वा पादपीठं निवेदयेत् ८०
दन्तधावनगण्डूषदर्पणालोचनं तथा
निवेद्याभ्यञ्जनं तैलेनोर्द्वर्त्तं केशरञ्जनम् ८१
सुखोष्णितजलैः स्नानं पुनरुद्वर्तनं चरेत्
कुङ्कुमेन हरिद्रेण चन्दनेन सुगन्धिना ८२
उद्वर्त्य गन्धतोयेन स्नापयेच्च पुनस्ततः
स्नानपात्रोदकं पश्चादादाय कुसुमैः सह ८३
पौरुषेण तु सूक्तेन स्नापयेत्कमलापतिम्
मार्जयेच्छुभवस्त्रेण दीपैर्नीराजयेत्तथा ८४
वस्त्रञ्चैवोपवीतञ्च दद्यादाभरणानि च
कस्तूरीतिलकं गन्धं पुष्पाणि सुरभीणि च

अङ्के निवेश्य देवस्य लक्ष्मीं संपूजयेत्तथा ८५
पार्श्वयोरर्द्धधरणी महिष्यः पतितास्तथा
विमलोत्कर्षणीत्यापः पूर्वमेव प्रकीर्तिताः ८६
चण्डादि द्वारपालांश्च कुमुदादींस्तथार्चयेत्
वासुदेवः सीरपाणिः प्रद्युम्नश्च उषापतिः
दिक्षु कोणेषु तत्पत्न्यो लक्ष्मीरेव रती उषा ८७
द्वितीयावरणं पश्चात्केशवाद्याः सशक्तयः
संकर्षणादयः पश्चान्मत्स्यकूर्मादयस्तथा ८८
श्रीर्लक्ष्मीः कमला पद्मा पद्मिनी कमलालया
रमा वृषाकपेर्धन्या वृत्तिर्यज्ञान्तदेवता ८९
शक्तयः केशवादीनां संप्रोक्ताः परमे पदे
हिरण्या हरणी सत्या नित्यानन्दा त्रयी सुखा ९०
सुगन्धा सुन्दरी विद्या सुशीला च सुलक्षणा
सङ्कर्षणादिमूर्तीनां शक्तयः समुदाहृताः ९१
वेदा वेदवती धात्री महालक्ष्मीः सुखालया
भार्गवी च तदा सीता रेवती रुक्मिणी प्रभा ९२
मत्स्यकूर्मादिमूर्तीनां शक्तयः सम्प्रकीर्तिताः
एवं सशक्तयः पूज्याः केशवाद्याः सुरेश्वराः ९३
पश्चात्सशक्तयः पूज्याश्चक्रशङ्खादिहेतयः
शङ्खं चक्रं गदां पद्मं शार्ङ्गञ्च मुसलं हलम् ९४
वाणञ्च खड्गखेटं च छुरिका दिव्यहेतयः
भद्रा सौम्या तथा माया जया च विजया शिवा ९५
सुमङ्गला सुनन्दा च हिता रम्या सुरक्षिणी
शक्तयो दिव्यहेतीनां पूजनीयाः सनातनाः ९६
बर्हिर्लोकेश्वराः पूज्याः साध्याश्च समरुद्गणाः
एवमावरणं सर्वमर्च्चयेत्परमातमनः

पुनरर्घ्यादिकं दत्त्वा धूपदीपैर्निवेदयेत् ९७
प्रागुदीच्याञ्च सदृशं नागराजं तथापरे
पुरतो वैनतेयञ्च पूजयेच्छक्तिभिः सह ९८
सेनापतेः सूत्रवतीं नागराजस्य वारुणीम्
भद्राञ्चलां तथा यस्य पूजयेद्वैष्णवोत्तमः ९९
गुग्गुलुं महिषाक्षीञ्च सालनिर्यासमेव च
अगरुं देवदारुञ्च उशीरं श्रीफलं तथा १००
ह्रीबेरं चन्दनं मुस्ता दशाङ्गं धूपमुच्यते
गवाज्येन च संयोज्यं दद्याद्धूपं सुवासितम् १०१
कार्पासमार्कं क्षौमञ्च शाल्मलीक्षीरकोद्भवम्
अम्भोजं कौटजं काशतूलिकाऽष्टाङ्गमुच्यते १०२
गवाज्यं तिलतैलं वा कुसुमैश्च सुवासितम्
संयोज्य वह्निना दीपं भक्त्या विष्णोर्निवेदयेत् १०३
नैवेद्यं शुभहृद्यान्नं पायसापूपसंयुतम्
फलैश्च भक्ष्यभोज्यैश्च पानकैर्व्यञ्जनैः सह १०४
गवाज्यञ्च दधि क्षीरं शर्कराञ्च निवेदयेत्
शुद्धं हविष्यं हृद्यञ्च सुरुच्यं वै निवेदयेत् १०५
यच्छास्त्रेषु निषिद्धं तु तत्प्रयत्नेन वर्जयेत्
कोद्रवं चौलकं लुब्धं यावनालं तथा सितम् १०६
निष्पावञ्च मसूरञ्च तुच्छधान्यानि सर्व्वशः
भुक्तं पर्युषितं रूक्षं यज्ञे कर्म्मणि वर्जयेत् १०७
वर्जयेदारनालञ्च मद्यमांससमानि च
निर्यासान्वर्जयेत्सर्व्वान्विना हिङ्गु च गुग्गुलुम् १०८
छत्राकं मूलकं शिग्रु करञ्जं लशुनं तथा
कुम्भीदलञ्च पिण्याकं श्वेतवृन्ताकमेव च १०९
आत्रञ्च नालिकाशाकं नालिकेर्याख्यमेव च

बिल्वञ्च शणपुष्पञ्च भूस्तृणं भौतिकं तथा  ११०
कोशातकीं बिम्बफलं मद्यमांससमानि च
अभक्ष्याण्यप्यशेषाणि वर्जयेद्यज्ञकर्मणि  १११
कालिङ्गं कतकं बिल्वफलं जन्तुफलं तथा
वंशाङ्कुरमलाबुञ्च तालहिन्तालके फले  ११२
अश्वत्थं प्लक्षनीपञ्च वटमारग्वधं तथा
कलम्बिका च निर्गुण्डिमुण्डिवार्त्ताकमेव च  ११३
ऊषरं लवणञ्चैव श्वेतञ्च बृहतीफलम्
नखचर्मातकञ्चैव चिञ्चिलञ्चेति यत्नतः  ११४
विज्ञेयानि च भक्ष्याणि वर्जयेद्यज्ञकर्म्मणि
श्लेष्मातकञ्च विड्जानि प्रत्यक्षलवणं तथा  ११५
अनिर्दशाहगोक्षीरमवत्सायास्तथाऽऽविकम्
औष्ट्रमेकशफञ्चैव पशूनां विड्भुजामपि  ११६
अतिदीर्णं तथा तक्रं करनिर्म्मन्थितन्दधि
ताम्रेण संयुतं गव्यं क्षीरञ्च लवणान्वितम्  ११७
घृतं लवणसंयुक्तं प्रयत्नेन विवर्जयेत्
सूपान्नञ्च गुडान्नञ्च शर्करामधुसंयुतम्  ११८
मरीचिमिश्रं दध्यन्नं पायसान्नं फलैः सह
तुलसीदलसम्मिश्रं जलैः सम्प्रोक्ष्य वाग्यतः  ११९
अष्टाविंशतिवारन्तु मूलमन्त्राभिमन्त्रितम्
मुद्राञ्च सौरभेयीन्तां दर्शयेन्मन्त्रमुच्चरन्  १२०
सुधाब्धिममृतं बीजं चिन्तयन्परमात्मनः
दद्यात्पुष्पाञ्जलिं पश्चाद्दशवारं समाहितः  १२१
पेषणक्रियया पूर्वमन्नमस्मै निवेदयेत्
शतवारं जपेन्मन्त्रं घण्टाशब्दं निनादयन्  १२२
जपेत्पीयूषदैवत्यान्मन्त्रानेकाग्रचेतसा

हरेर्भुक्तवतः पश्चाद्द्याद्वारि सुवासितम्  १२३
पश्चादाचमनं दद्याज्जलैर्गन्धमिविश्रितैः
अभ्यर्चा पौरुषस्यास्य सूक्तस्य सुरसत्तमान्  १२४
विष्णवर्पितचतुर्भागं क्रमाद्धव्यस्य चार्पयेत्
अनन्तताद्यर्यसेनेशपवित्राणां निवेदयेत्  १२५
तीर्थेन सहितं हव्यं पृथक्पात्रेषु निक्षिपेत्
सर्वेषां वारिपूर्वेण पश्चात्पुष्पाञ्जलिञ्चरेत्  १२६
नीराजनं ततो दत्त्वा ताम्बूलञ्च निवेदयेत्
प्रणमेच्च ततो भक्त्या रम्यैः स्तोत्रैः शुभाह्वयैः  १२७
प्रसार्य बाहू पादौ च बद्धेनाञ्जलिना सह
स्तुवन्स्तुतिभिरेवं तु प्रणामो दीर्घ उच्यते  १२८
नत्वा दीर्घप्रणामैश्च स्तुत्वा स्तुतिभिरेव च
सर्वैश्च वैष्णवैर्मन्त्रैः कुर्यात्पुष्पाञ्जलिं ततः  १२९
सूक्तैश्च विष्णुदैवत्यैर्नामभिः शार्ङ्गिणस्तथा
ततः शुभासने स्थित्वा जपेन्मन्त्रमनुत्तमम्  १३०
न्यासमुद्रादिपूर्वेण ध्यायन्वै कमलेक्षणम्
अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा  १३१
जप्त्वा पुष्पाञ्जलिं दद्याद्यथाशक्त्या च मन्त्रतः
नमेद्योगेन देवेशः हृदिस्थं कमलेक्षणम्  १३२
मनसि वाऽर्चयित्वास्मिन् समाधौ विरमेत्सुधीः
प्रातरौपासनं कृत्वा तत्र होमं समाचरेत्  १३३
आज्येन चरुणा वाऽपि समिद्भिर्वा च यज्ञियैः
तण्डुलैर्घृतमिश्रैर्वा बिल्पत्रैरथापि वा  १३४
तिलैर्वा कुसुमैर्वाऽपि यवैर्मिश्रभिरेव वा
यज्ञरूपं हरिं ध्यात्वा सर्ववेदमयं विभुम्  १३५
दिव्याभरणसम्पन्नं शङ्खचक्रगदाधरम्

वरदं पुण्डरीकाक्षं वामाङ्कस्थश्रियं हरिम्  १३६
यज्ञस्वरूपिणं वह्नौ ध्यायन्मन्त्रद्वयेन च
सर्वश्च वैष्णवैर्मन्त्रैरेकैकेनाऽऽहुतिं तथा  १३७
नामभिः केशवाद्यैश्च सूक्तैर्विष्णुप्रकाशकैः
वैकुण्ठपार्षदं सर्वं हुत्वा चैव ततो बलिम्  १३८
क्षिपेच्चतुर्विधान् भूतानुद्दिश्य च ततो भुवि
आचम्य पूजयेत्पश्चात्तदीयान् सुसमाहितः  १३९
तेभ्यः प्रणम्य भक्त्याऽथ सन्तर्प्य पितृदेवताः
वेदमध्यापयेच्छक्त्या धर्मशास्त्रञ्च संहिताः  १४०
सात्विकानि पुराणानि सेतिहासानि वैष्णवः
सर्व्वोपनिषदामर्थं सद्भिः सह विचिन्तयेत्  १४१
योगक्षेमार्थवृद्धिञ्च कुर्य्याच्छक्त्या यथार्हतः
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा बर्णा यथाक्रमम्  १४२
आद्यास्त्रयो द्विजाः प्रोक्तास्तेषां वै मन्त्रसत्क्रियाः
सवर्णेभ्यः सवर्णासु जायन्ते हि सजातयः  १४३
तेषां सङ्करयोगाश्च प्रतिलोमानुलोमजाः
विप्रान्मूर्धाभिषिक्तस्तु क्षत्रियायामजायत  १४४
वैश्यायान्तु तथाऽऽम्बष्ठो निषादः शूद्रया तथा
राजन्याद्वैश्यशूद्र्यान्तु माहिष्योग्रौ तु तौ स्मृतौ  १४५
शूद्र्यां वैश्यात्तु करणस्थिरैर्वा तेऽनुलोमजाः
विप्रायां क्षत्रियात्सूतः वैश्याद्वैदेहिकस्तथा  १४६
चण्डालस्तु तथा शूद्रात्सर्वकर्मसु गर्हितः
मागधः क्षत्रियायां वै वैशयात्क्षत्रात्तु शूद्रतः  १४७
शूद्रादयोगवं वैश्या जनयामास वै सुतम्
रथकारः करण्यान्तु माहिष्येण प्रजायते  १४८
असत्सन्ततयो ज्ञेयाः प्रतिलोमानुलोमजाः

प्रतिलोमासु वै जाता गर्हिताः सर्वकर्मणाम् १४६
एतेषां ब्राह्मणाद्याश्च षट्कर्मसु नियोजिताः
त्रिकर्मसु क्षत्रविशावेकस्मिन् शूद्रयोनिजः १५०
प्रतिग्रहञ्च वृत्त्यर्थं ब्राह्मणस्तु समाचरेत्
असदेवासतां प्रोक्तं निषिद्धं तद्विवर्जयेत् १५१
पाषण्डाः पतिताः पापास्तथैव प्रतिलोमजाः
कुलटाश्च विकर्मस्था असतः परिकीर्तिताः १५२
लवणं तिलकार्पासं चर्म्म च त्रपुसीसकम्
आयसं मधु मांसञ्च विषमन्नं घृतं रुजम् १५३
किल्विषं गजमुष्ट्रञ्च सर्षपं जलमेव च
तृणं काष्ठञ्च कूष्माण्डं शिंशपाञ्च विवर्जयेत् १५४
महिषीं गर्दभञ्चैव वाजिनञ्च तथाऽऽविकम्
दासीमजां यानवृक्षा न पञ्चानडुहन्तुलाम् १५५
एवमाद्यमसद्द्रव्यं प्रयत्नेन विवर्जयेत्
धान्यं वासांसि भूमिञ्च सुवर्णं रत्नमेव च १५६
पुष्पाणि फलमूलाद्यं सद्द्रव्यं मुनिभिः स्मृतम्
सर्वत्र परिगृह्णीयाद्भूमिं धान्यं फलादिकम् १५७
भूमिं यस्तु प्रगृह्णाति भूमिं यस्तु प्रयच्छति
तावुभौ पुण्यकर्माणौ नियतौ स्वर्गगामिनौ १५८
धान्यं करोति दातारं प्रगृहीतारमेव च
धान्यं नृपवरश्रेष्ठ इहलोके परत्र च १५९
तस्माद्धान्यं धरित्रीञ्च प्रतिगृह्णीत सर्वतः
कुसुम्भधान्य एव स्यात्कुसुम्भधान्यवान्नृप १६०
शीलोञ्छेनापि वा जीवेच्छ्रेयानेषां परो वरः
जीवेद्यायावरेणैव विप्रः सर्वत्र सर्वदा १६१
वर्जयित्वैव पाषण्डान् पतितांश्चान्यदविकान्

कृषिणा वाऽपि जीवेत सतां चानुमतेन वा  १६२
न वाहयेदनडुहं क्षुधार्तं श्रान्तमेव च
तस्य पुंस्त्वमहित्वैव वाहयेद्द्विजपुङ्गवः  १६३
कर्मलोपमकुर्वन्वै कृषिं कुर्वीत वै द्विजः
हरेः पूजां यथाकालं कृषिलोपे समाचरेत्  १६४
न ब्राह्म्यं सन्त्यजेत्विप्रस्तथा यज्ञादिकर्म च
आपद्यपि न कुर्वीत सेवां वाणिज्यमेव च  १६५
असत्प्रतिग्रहं स्तेयं तथा धर्मस्य विक्रयम्
अन्यायोपार्जितं द्रव्यमापद्यपि विवर्जयेत्  १६६
भृतकाध्यापनं चैव सदासत्कर्मभावनम्
प्रीतये वासुदेवस्य यद्दत्तमसतामपि  १६७
महाभागवतस्पर्शात्तत्सदित्युच्यते बुधैः
तापादीन्पञ्च संस्कारांस्तथाकारैस्त्रिभिर्युतः  १६८
हरेरनन्यशरणो महाभागवतः स्मृतः
यक्षराक्षसभूतानां तामसानां दिवौकसाम्  १६९
तेषां यत्प्रीतये दत्तं तथा यद्यपि वर्जयेत्
बुद्धरुद्रौ तथा वायुर्दुर्गागणसुभैरवाः  १७०
यमः स्कन्दो नैर्ऋतश्च तामसा देवताः स्मृताः
एवं विशुद्धिं द्रव्यस्य ज्ञात्वा गृह्णीत सत्तमः  १७१
कृषिस्तु सर्ववर्णानां सामान्यो धर्म उच्यते
प्रतिग्रहस्तु विप्राणां राज्ञां क्ष्मापालनं तथा  १७२
कुसीदञ्चैव वाणिज्यं विशामेव प्रकीर्तितम्
सेवावृत्तिस्तु शूद्राणां कृषिर्वा सम्प्रकीर्तिता  १७३
अशक्तस्तु भवेद्राजा पृथिव्याः परिपालने
जीवेद्वाऽपि विशां वृत्त्या शूद्राणां वा यथासुखम्  १७४
कृषिर्भृतिः पाशुपाल्यं सर्वेषां न निषिध्यते

स्तेयं परस्त्रीहरणं हिंसा कुहककौशिके १७५
स्त्रीमद्यमांसलवणविक्रयं पतितं स्मृतम्
अपकृष्टनिकृष्टानां जीवितं शिल्पकर्मभिः १७६
हीनन्तु प्रतिलोमानामहीनमनुलोमिनाम्
चर्मवैणववस्त्राणां हिंसाकर्म च नेजनम् १७७
गाणिक्यं वपनाग्निञ्च मद्यमांसक्रिया तथा
सारथ्यं वाहकानाञ्च रथानां भूभृतामपि १७८
एवमादि निषिद्धं यत्प्रातिलोम्यं यदुच्यते
यत्सौम्यशिल्पं लोकेऽस्मिन्सौम्यं तदनुलोमकम् १७९
मृद्दारुशैललोहानां शिल्पं सौम्यमिहोच्यते
न्यायेन पालयेद्राजा पृथिवीं शास्त्रमार्गतः १८०
स्वराष्ट्रकृतधर्मस्य सदा षडभागसिद्धये
राज्ञां राष्ट्रकृतं पापमिति धर्मविदो विदुः १८१
तस्मादपापसंयुक्तां यथा संरक्षयेद्ध्रुवम्
अग्निदङ्गरदञ्चोरं हिंस्रं दुर्वृत्तमेव च १८२
धूर्त्तं पतितमित्यादीन् हन्यादेवाविचारयन्
अङ्कयित्वा श्वपादेन गर्दभे चाधिरोह्य वै १८३
प्रवासयेत् स्वराष्ट्रात्तु ब्राह्मणं पतितं नृपः
कुलटां कामचारेण गर्भघ्नीं भर्तृहिंसकाम् १८४
निकृत्तकर्णनासोष्ठीं कृत्वा नारीं प्रवासयेत्
न्यायेन दण्डनं राज्ञः स्वर्गकीर्तिविवर्धनम् १८५
अदण्ड्यान् दण्डयन्राजा तथा दण्ड्यानदण्डयन्
अयशो महदाप्नोति नरकं चाधिगच्छति १८६
दिग्दण्डस्त्वथ वाग्दण्डो धनदण्डो वधस्तथा
ज्ञात्वाऽपराधं देशं च जनं कालमदोऽपि वा १८७
वयः कर्म च वित्तञ्च दण्डं न्यायेन पातयेत्

निश्चित्य शास्त्रमार्गेण विद्वभिः सह पार्थिवः १८८
गुरूणां तु गुरुं दण्डं पापानां च लघोर्लघुम्
व्यवहारान् स्वयं पश्यन् कुर्यात् सभ्यैर्वृतोऽन्वहम् १८९
मिथ्यापवादशुद्ध्यर्थं पञ्च दिव्यानि कल्पयेत्
ज्ञात्वा शुद्धेषु दिव्येषु शुद्धान्वै मानयेत्तथा १९०
तन्मिथ्याशंसिनं दुष्टं जिह्वाच्छेदेन दण्डयेत्
परद्रव्यादिहरणं परदाराभिमर्शनम् १९१
यः कुर्यात्तु बलात्तस्य हस्तच्छेदः प्रकीर्तितः
यो गच्छेत्परदारांस्तु बलात्कामाच्च वा नरः १९२
सर्वस्वहरणं कृत्वा लिङ्गच्छेदञ्च दापयेत्
दहेत्कटाग्निना देहं गुरुस्त्रीगामिनं तदा १९३
ब्रह्मघ्नं च सुरापं वा गोस्त्रीबालनिषूदनम्
देवविप्रस्वहर्तारं शूलमारोपयेन्नरम् १९४
दैवतं ब्राह्मणं गाञ्च पितृमातृगुरुंस्तथा
पादेन ताडयेद्यस्तु तस्य तच्छेदनं स्मृतम् १९५
तेषामुपरि हस्तं तु दोष्णोश्छेदन्तु कामतः
प्रत्येकं दण्डनं कुर्याद्दुर्वृत्तस्य परस्त्रियाम् १९६
चुम्बने तालुविच्छेदो द्वौ हस्तौ परिरम्भणे
हस्तस्याङ्गुलिविच्छेदः केशादिग्रहणे स्त्रियः १९७
दाहयेत्तप्ततैलेन हस्तमुष्ट्या च ताडनम्
सुरतं याचमानस्य जिह्वाच्छेदं च कामतः १९८
कामेङ्गितेषु सर्वत्र ताल्वोष्ठ दहनं स्मृतम्
दृष्ट्वा मुहुः प्रेरणे तु नेत्रयोः स्फोटनं चरेत् १९९
मानकूटं तुलाकूटं कूटसाक्ष्यकृतां नृणाम्
सहस्त्रं दापयेद्दण्डं वृत्त्या स्वस्यापनायने २००
येषु केषु च पापेषु शरीरे दण्डनं स्मृतम्

तेषु तेष्वङ्कनेनैव अद्यतो ब्राह्मणो व्रजेत् २०१
पापानेवाङ्कयित्वाऽस्य मुण्डयित्वा शिरोरुहान्
सर्वस्वहरणं कृत्वा राष्ट्रात्सम्यक्प्रवासयेत् २०२
अवैष्णवं विकर्मस्थं हरिवासरभोजनम्
ब्राह्मणं गार्दभं यानमारोप्यैव विवासयेत् २०३
न्यायेन पालयेद्राजा धर्मान् षड्भागमाहरेत्
त्रिभागमाहरेद्धान्याद्धनात् षड्भागमेव च २०४
गोभूहिरण्यवासोभिर्धान्यरत्नविभूषणैः
पूजयेद्ब्राह्मणान् भक्त्या पोषयेच्च विशेषतः २०५
बिम्बानि स्थापयेद्विष्णोर्ग्रामेषु नगरेषु च
चैत्यान्यायतनान्यस्य रम्याण्येव तु कारयेत् २०६
वसुपुष्पोपहारौघं भूधेन्वादि समर्पयेत्
इतरेषां सुराणां च वैदिकानां जनेश्वरः २०७
धर्मतः कारयेद्यश्च चैत्यान्यायतनानि तु
वापी कूपतडागादि फलपुष्पवनानि च २०८
कुर्वीत सुविशालानि पूर्वकान्यपि पालयेत्
फलितं पुष्पितं वाऽपि वनं छिन्द्यात्तु यो नरः २०९
तडागसेतुं यो भिन्द्यात्तं शूलेनानुरोहयेत्
अग्निदं गरदं गोघ्नं बालस्त्रीगुरुघातिनम् २१०
भगिनीं मातरं पुत्रीं गुरुदारान् स्नुषामपि
साध्वीं तपस्विनीं वाऽपि गच्छन्तमतिपापिनम् २११
हिंस्रयन्त्रप्रयोक्तारं दाहयेद्वै कटाग्निना
अदण्डयित्वा दुर्वृत्तान् तत्पापं पृथिवीपतिः २१२
सम्प्राप्य निरयं गच्छेत्तस्मात्तान् दण्डयेत्तथा
यः स्ववर्णाश्रमं हित्वा स्वच्छन्देन तु वर्तयेत् २१३
तं दण्डयेद्वर्षशतं नाशयेत्तद्विदेशतः

सर्वेष्वेतेषु पापेषु धनदण्डं प्रयोजयेत्  २१४
पितेव पालयेद्भृत्यान् प्रजाश्च पृथिवीपतिः
प्रजासंरक्षणार्थाय संग्रामं कारयेन्नृपः  २१५
तस्मिन् मृत्युर्भवेच्छ्रेयो राज्ञः संग्राममूर्द्धनि
मृतेन लभ्यते स्वर्गं जितेन पृथिवी त्वियम्  २१६
यशः कीर्त्तिविवृध्यर्थं धर्मसंग्राममाचरेत्
मुक्तशीर्षं मुक्तवस्त्रं त्यक्तहेतिं पलायितम्  २१७
न हन्याद्वन्दिनं राजा युद्धे प्रेक्षणकृज्जनान्
भग्ने स्वसैन्यपुञ्जे च संग्रामे विनिवर्तिनः  २१८
पदे पदे समग्रस्य यज्ञस्य फलमश्नुते
नातः परतरो धर्मो नृपाणां नरशालिनाम्  २१९
युद्धलब्धा महीशस्य दीयते नृपसप्तमैः
जित्वा शत्रून्महीं लब्ध्वा लब्धां यत्नेन पालयेत्  २२०
पालितां वर्धयेन्नित्यं वृद्धां पात्रे विनिक्षिपेत्
पात्रमित्युच्यते विप्रस्तपोविद्यासमन्वितः  २२१
न विद्यया केवलया तपसा वाऽपि पात्रता
श्रुतमध्ययनं शीलं तप इत्युच्यते बुधैः  २२२
ईश्वरस्याऽऽत्मनश्चापि ज्ञानं विद्येति चोच्यते
तथाविधेषु पात्रेषु दत्त्वा भूमिं धनं नृपः  २२३
शासनं कारयेत्सम्यक् स्वहस्तलिखितादिभिः
उपजीव्योपसर्पेच्च रम्ये देशे नृपोत्तमः  २२४
दुर्गाणि तत्र कुर्वीत जनकस्यात्मगुप्तये
तत्र कर्मसु निष्णातान् कुशलान् धर्मनिष्ठितान्  २२५
सत्यशौचयुतान् शुद्धानध्यक्षान् स्थापयेत् नृपः
अशीतिभागो वृद्धिः स्यान्मासि मासि सबन्धके  २२६
अबन्धके स्याद्द्विगुणं यथा तत्कालमात्रकम्

लेखयेत्तदृणं सम्यक् समामासादिकल्पनैः २२७
देयं सवृद्ध्याधविके पुरुषैस्त्रिभिरेव तत्
निर्धनस्तु शनैर्दद्याद्यथाकालं यथोदयम् २२८
औद्धत्याद्वा बलाद्वा तु न दद्याद्धनिने ऋणम्
दण्डयित्वैव तं राजा धनिने दापयेदृणम् २२९
छिन्ने दग्धेऽथवा पत्रे साक्षिभिः परिकल्पयेत्
वस्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणादिभिः २३०
न सन्ति साक्षिणस्तत्र देशकालान्तरादिभिः
शोधयित्वा तु दिव्येन दापयेद्धनिने ऋणम् २३१
मध्यस्थस्थापितं द्रव्यं वर्धते न ततः परम्
कृते प्रतिग्रहे चाऽऽधौ पूर्वो वै बलवत्तरः २३२
अवधिर्द्विविधं प्रोक्तं भोग्यं गोप्यं तथैव च
क्षेत्रारामादिकं भोग्यं गोप्यं द्रव्यमुपस्करम् २३३
गोप्याधिभोग्ये नो वृद्धिः सोपस्कारे तथापि ते
नष्टं देयं विनष्टञ्च द्रव्यं राजकृतादृते २३४
उपस्थितस्य भोक्तव्यमाधिस्तेनोऽन्यथा भवेत्
प्रयोजने सति धनं कुलेन्यस्याधिमाप्नुयात् २३५
तत्कालकृतमूल्ये वा तत्र तिष्ठेदवृद्धिकम्
विना धारणकाद्वापि विक्रीणीतमसाक्षिकम् २३६
तं वनस्थमनाख्याय धान्यमस्य न दीयते
तदा यदधिकं द्रव्यं प्रतिदेयं तथैव च २३७
न दाप्योऽपहृतन्त्यक्तराजदैविकतस्करैः
न प्रदद्यात्तु तन्मोहात्स दण्ड्यश्चोरवत्तदा २३८
ददीत स्वेच्छया दण्डं दापयेद्वापि सोदरम्
याचितान्वाहितन्यायान्निक्षेपादिष्वयं विधिः २३९
सुराकामद्यूतकृतं वृथा दानं तथैव च

दराडशुल्कानुशिष्टञ्च पुत्रो दद्यान्न पैतृकम्  २४०
पितरि प्रोषिते प्रेते व्यसनाभिष्टुतेऽपि वा
पुत्रपौत्रैर्ऋणं देयं निह्नुते साक्षिचोदितम्  २४१
रिक्थग्राही ऋणं दद्याद्योषिद्ग्राहस्तथैव च
पुत्रो न स्वाश्रितद्रव्यः पुत्रहीनस्तु रिक्थिनः  २४२
प्रातिभाव्य मृणं साद्यं देयं तस्मै यथोचितम्
दीयते स्यात्प्रतिभुवा धनिने तु ऋणं यथा  २४३
द्विगुणं तत्प्रदातव्यं दराडं राज्ञे च तत्समम्
पुत्रादिभिर्न दातव्यं प्रविभाव्यमृणं स्त्रियाम्  २४४
प्रतिपन्नं स्त्रिया देयं पत्या चैव हि यत्कृतम्
स्वयं कृतं तु यदृणं नान्यस्त्री दातुमर्हति  २४५
पत्यै स्वकं धनं पुत्रा विभजेयुः सुनिर्णितम्
मातृकञ्चेद्दुहितरस्तदभावे तु तत्सुत  २४६
भगिन्यश्च प्रमुदिताः पैतृकादाहरेद्धनात्
न स्त्रीधनं तु दायादा विभजेयुरनापदि  २४७
पितृमातृसुताभ्रातृपत्यपत्याद्युपागतम्
आधिवेतनिकाद्यं च स्त्रीधनं परिकीर्तितम्  २४८
अपुत्रा योषितश्चैव भर्तव्या साधुवृत्तयः
निर्वास्या व्यभिचारिरयः प्रतिकूलास्तथैव च  २४९
नैव भागं वनस्थानां यतीनां ब्रह्मचारिणाम्
पाषराडपतितानां च नचावदिककर्मणाम्  २५०
विभक्तष्वनुजो जातः सवर्णो यदि भागभाक्
अविभक्तपितृकाणां पितृव्यात् भागकल्पना  २५१
द्वै मातृणां मातृतश्च कल्पयेद्वा समोऽपि वा
विभक्तस्यास्य पुत्रस्य पत्नी दुहितरस्तथा  २५२
पितरौ भ्रातरश्चैव तत्सुताश्च सपिरिडनः

सम्बन्धिबान्धवाश्चैव क्रमाद्वै रिक्थभागिनः २५३
सीम्नोऽपवादे क्षेत्रेषु सामन्ताः स्थविरादयः
गोपाः सीमाकृषाणां च सर्वे भवनगोचराः २५४
नयेयुरेते सीमानं स्थूणाङ्गारतुषद्रुमैः
न तु वल्मीकनिम्नास्थिचैत्याद्यैरुपशोभिताः २५५
औरसो दत्तकश्चैव क्रीतः कृत्रिम एव च
क्षेत्रजः कानिकश्चैव दौहित्रः सत्तमः स्मृतः २५६
पिण्डजश्च परश्चैषां पूर्वाभावे परः परः
पुत्रः पौत्रश्च तत्पुत्रः पुत्रिकापुत्र एव च २५७
पुत्री च भ्रातरश्चैव पिण्डदाः स्युर्यथाक्रमात्
एवं धर्मेण नृपतिः शासयेत्सर्वदा प्रजाः २५८
यदुक्तं मनुना धर्मं व्यवहारपदं प्रति
विलोक्य तच्च विद्वद्भिर्वीतरागैर्विमत्सरैः २५९
विमृश्य धर्मविद्भिश्च विमलैः पापभीरुभिः
धर्मेणैव सदा राजा शासयेत्पृथिवीं स्वकाम् २६०
विपरीतां दण्डयेद्वै यावद्दर्पोपनाशनम्
सभ्या अपि च दण्ड्या वै शास्त्रमार्गविरोधिनः २६१
राजधर्मोऽयमित्येवं प्रसङ्गात् कथितो मया
कात्यायनेन मनुना याज्ञवल्क्येन धीमता २६२
नारदेन च सम्प्रोक्तं विस्तरादिदमेव हि
तस्मान्मया विस्तरेण नोक्तमत्र नृपोत्तम २६३
परं भागवतं धर्मं विस्तरेण ब्रवीमि ते
विष्णोरभ्यर्च्चनं यत्तु नित्यं नैमित्तिकं नृप २६४
यदाह भगवान् धातुस्तेन स्वायम्भुवस्य च
नारदस्य च मे सम्यक् तदद्य कथयामि ते २६५

इति वृद्धहारीतस्मृतौ विशिष्टधर्मशास्त्रे प्राप्तकालभगवत्-

## समाराधनविधिर्नाम चतुर्थोऽध्यायः

## पञ्चमोऽध्यायः

## अथ भगवन्नित्यनैमित्तिकसमाराधनविधिवर्णनम्

अम्बरीष उवाच
भगवन् ब्रह्मणा यत्तु सम्प्रोक्तं स्यान्मनोः पुरा
तत्सर्वं परमं धर्मं वक्तुमर्हसि मेऽनघ १
हारीत उवाच
सर्गादौ लोककर्ताऽसौ भगवान् पद्मसम्भवः
मन्वादिप्रमुखान् विप्रान् ससृजे धर्मगुप्तये २
मनुर्भृगुर्वशिष्ठश्च मरीचिर्दक्ष एव च
अङ्गिराः पुलहश्चैव पुलस्त्योऽत्रिर्महातपाः ३
वेदान्तपारगास्ते च तं प्रणम्य जगद्गुरुम्
भगवन् परमं धर्मं भवबन्धापनुत्तये ४
वद सर्वमशेषेण श्रोतुमिच्छामहे वयम्
इत्युक्तः स द्विजैः सोऽपि ब्रह्मा नत्वा जनार्दनम् ५
वेदान्तगोचरं धर्मं तेषां वक्तुं प्रचक्रमे
सर्वेषामवलोकानां स्रष्टा धाता जनार्दनः ६
सर्ववेदान्ततत्वार्थसर्वयज्ञमयः प्रभुः
यज्ञो वै विष्णुरित्यत्र प्रत्यक्षं श्रूयते श्रुतिः ७
इज्यते यत्समुद्दिश्य परमो धर्म उच्यते
भगवन्तमनुद्दिश्य हूयते यत्र कुत्र वै ८
तत्र हिंसाफलं पापं भवेदत्र विगर्हितम्
तस्मात्सर्वस्य यज्ञस्य भोक्तारं पुरुषं हरिम् ९
ध्यात्वैव जुहुयात्तस्मै हव्यं दीप्ते हुताशने
मुखमग्निर्भगवतो विष्णोः सर्वगतस्य वै १०
तस्मिन्नैव यजन्नित्यमुत्तमं मुनिसत्तमाः

यजेद्विप्रमुखे शक्त्या जलमन्नं फलादिकम् ११
प्रीतये वासुदेवस्य सर्वभूतनिवासिनः
तमेव चार्च्चयेन्नित्यं नमस्कुर्यात्तमेव हि १२
ध्यात्वा जपेत्तमेवेशं तमेव ध्यापयेद्धृदि
तन्नामैव प्रगातव्यं वाचा वक्तव्यमेव च १३
व्रतोपवासनियमान् तमुद्दिश्यैव कारयेत्
तत्समर्पितभोगः स्यादन्नपानादिभक्षणैः १४
मतिः स्वार्थः सदारेषु नेतरत्र कदाचन
न हिंस्यात्सर्वभूतानि यज्ञेषु विधिना विना १५
सोऽहं दासो भगवतो मम स्वामी जनार्दनः
एवं वृत्तिर्भवेदस्मिन्स्वधर्मः परमो मतः १६
एष निष्कण्टकः पन्था तस्य विष्णोः परं पदम्
अन्यन्तु कुपथं ज्ञेयं निरयप्राप्तिहेतुकम् १७
भगवन्तमनुद्दिश्य यः कर्म कुरुते नरः
स पाषण्डीति विज्ञेयः सर्वलोकेषु गर्हितः १८
यो हि विष्णु परित्यज्य सर्वलोकेश्वरं हरिम्
इतरानर्चते मोहात्स लोकायतिकः मृतः १९
उक्तधर्मं परित्यज्य यो ह्यधर्मे च वर्तते
पतितः स तु विज्ञेयः सर्वधर्मबहिष्कृतः २०
यः कर्म कुरुते विप्रो विना विष्णवर्चनं क्वचित्
ब्राह्मण्याद् भ्रश्यते सद्यश्चण्डालत्वं स गच्छति २१
ब्राह्मणो वैष्णवो विप्रो गुरुरग्र्यश्च वेदवित्
पर्य्यायेण च विद्येत नामानि क्ष्मासुरस्य हि २२
तस्मादवैष्णवत्वेन विप्रत्वाद् भ्रश्यते हि सः
अर्चयित्वाऽपि गोविन्दमितरानर्च्चयेत्पृथक् २३
अवैष्णवत्वं तस्यापि मिश्रभक्त्या भवेद्ध्रुवम्

भोक्तारं सर्वयज्ञानां सर्वलोकेश्वरं हरिम् २४
ज्ञात्वा तत्प्रीतये सर्वान् जुहुयात्सततं हरिम्
दानं तपश्च यज्ञश्च त्रिविधं कर्म कीर्तितम् २५
तत्सर्वं भगवत्प्रीत्यै कुर्वीत सुसमाहितः
तस्मात्तु वैष्णवा विप्राः पूजनीया यथा हरिः २६
ये तु वै हेतुकं वाक्यमाश्रित्यैव स्ववाग्बलात्
वैष्णवं प्रतिषिध्यन्ति ते लोकायतिकाः स्मृताः २७
यो यत्तु वैष्णवं लिङ्गं धृत्वा च तमसाऽऽवृतः
त्यजेच्चेद्वैष्णवं धर्मं सोऽपि पाषण्डतां व्रजेत् २८
तस्मात्तु वैष्णवो भूत्वा वैदिकीं वृत्तिमाश्रितः
कुर्वीत भगवत्प्रीत्यै कुर्य्याद्यज्ञादिकर्म यत् २९
तद्विशिष्टमिति प्रोक्तं सामान्यमितरं स्मृतम्
फलहीना भवेत्सा तु सामान्या वैदिकक्रिया ३०
तोयवर्जितवापीव निरर्थी भवति ध्रुवम्
नैसर्गिकन्तु जीवानां दास्यं विष्णोः सनातनम् ३१
तद्विना वर्त्तते मोहादात्मचारः सनातनात्
तस्मात्तु भगवद्दास्यमात्मनां श्रुतिचोदितम् ३२
दास्यं विना कृतं यत्तु तदेव कलुषं भवेत्
विशिष्टं परमं धर्मं दास्यं भगवतो हरेः ३३
ऋषय ऊचुः
कथं दास्यं हि तद्वृत्तिः कथं नैसर्गिकं नृणाम्
सत्सर्वं ब्रूहि तत्वेन लोकानुग्रहकाम्यया ३४
ब्रह्मोवाच
सुदर्शनोर्ध्व पुण्ड्रादिधारणं दास्यमुच्यते
तद्विधिर्वैदिकी या च तदाज्ञा चोदिता क्रिया ३५
तत्राप्याराधनत्वेन कृता पापस्य नाशिनी

निरूपणत्वाद्दास्यस्य धार्यं चक्रं महात्मनः ३६
अङ्गत्वात्सर्वधर्माणां वैष्णवत्वाच्च धर्म्मतः
कर्म कुर्याद्भगवतस्तस्मै राज्ञामनुस्मरन् ३७
विधिनैव प्रतप्तेन चक्रेणवाङ्कयेद्भुजे
तथैव विभृयाद्भाले पुण्ड्रं शुभ्रतरं मृदा ३८
विभृयादुपवीतन्तु सव्यस्कन्धे विधानतः
कण्ठे पद्माक्षमालाञ्च कौशेयं दक्षिणे करे ३९
उभे चिह्ने विना विप्रो न भवेद्धि कथञ्चन
न लभेत्कर्मणां सिद्धिं वैदिकानां विशेषतः ४०
आश्रमाणां चतुर्णाञ्च स्त्रीणाञ्च श्रुतिचोदनात्
अङ्कयेच्चक्रशङ्खाभ्यां प्रतप्ताभ्यां विधानतः ४१
एकैकमुपवीतन्तु यतीनां ब्रह्मचारिणाम्
गृहिणाञ्च वनस्थानामुपवीतद्वयं स्मृतम् ४२
सोत्तरीयं त्रयं वाऽपि विभृयाच्छुभतन्तुना
त्रयमूर्ध्वं द्वयं तन्तु तन्तुत्रयमधोवृतम् ४३
त्रिवृच्च ग्रन्थिनैकेन उपवीतमिहोच्यते
अर्ककार्पासकौशेयक्षौमशोणमयानि च ४४
तन्तूनि चोपवीतानां योज्यानि मुनिसत्तमाः
सर्वेषामप्यलाभे तु कुर्य्यात्कुशमयं द्विजः ४५
ऐणेयमुत्तरीयं स्याद्वनस्थब्रह्मचारिणाम्
शुक्लकाषायवसने गृहस्थस्य यतेः क्रमात् ४६
उक्तालाभेषु सर्वेषाङ्कुशचीरं विशिष्यते
मौञ्जी वै मेखला दण्डं पालाशं ब्रह्मचारिणः ४७
त्रयस्तु वैष्णवा दण्डा यतेः काषायवाससी
कुशचीरं वल्कलं वा वनस्थस्य विधीयते ४८
कटीसूत्रञ्च कौपीनं महच्च शुक्लवाससा

कुण्डके चाङ्गुलीयानि गृहस्थस्य विधीयते ४९
मुण्डिनौ सूक्ष्मशिखिनौ यत्यन्तेवासिनावुभौ
वानप्रस्थो यतिर्वा स्यात्सदा वै श्मश्रुरोमधृत् ५०
सुकेशी सुशिखो वा स्याद्गृहस्थः सौम्यवेषवान्
यतिश्च ब्रह्मचारी च उभौ भिक्षाशनौ स्मृतौ ५१
शाकमूलफलाशी स्याद्वनस्थः सततं द्विजः
कुसूलकुम्भधान्यो वा त्र्याहिको वा भवेद्गृही ५२
प्रतिगृहेण सौम्येन जीवेद्यायावरेण वा
यस्त्वेकं दण्डमालम्ब्य धर्मं ब्राह्मं परित्यजेत् ५३
विकर्म्मस्थो भवेद्विप्रः स याति नरकं ध्रुवम्
शिखायज्ञोपवीतादि ब्रह्मकर्म यतिस्त्यजेत् ५४
सजीवं न च चण्डालो मृतश्वानोऽभिजायते
स्वरूपेणैव धर्मस्य त्यागो हानिर्भवेद्ध्रुवम् ५५
कर्मणां फलसन्त्यागः सन्न्यासः स उदाहृतः
अनाश्रितः कर्मफलं कृत्यं कर्म समाचरेत् ५६
स सन्न्यासी च योगी च स मुनिः सात्विकः स्मृतः
तुष्ट्यर्थं वासुदेवस्य धर्मं वै यः समाचरेत् ५७
स योगी परमेकान्तं हरेः प्रियतमो भवेत्
मोहाद्दास्यं विना विष्णोः किञ्चित्कर्म समाचरेत् ५८
न तस्य फलमाप्नोति तामसीं गतिमश्नुते
हित्वा यज्ञोपवीतन्तु हित्वा चक्रस्य धारणम् ५९
हित्वा शिखोर्ध्वपुण्ड्रे च विप्रत्वाद् भ्रश्यते ध्रुवम्
पञ्चसंस्कारपूर्वेण मन्त्रमध्यापयेद्गुरुः ६०
संस्काराः पञ्च कर्तव्याः पारमैकान्त्यसिद्धये
प्रतिसम्वत्सरं कुर्य्यादुपाकर्म ह्यनुत्तमम् ६१
सर्ववेदव्रतं कृत्वा तत्र सम्पूजयेद्धरिम्

दद्यादत्रोपवीतानि विष्णवे परमात्मने ६२
ब्राह्मणेभ्यश्च दत्त्वाऽथ विभृयात् स्वयमेव च
तदग्नौ पूज्य सन्तर्प्य चक्रञ्चैवाङ्कयेद्भुजे ६३
एवं प्रात्याह्निकं धार्यमुपवीतं सुदर्शनम्
पुण्ड्रास्तु प्रतिसन्ध्यन्तु नित्यमेव च धारयेत् ६४
द्वारवत्युद्भवं गोपी चन्दनं वेङ्कटोद्भवम्
सान्तरालं प्रकुर्वीत पुण्ड्रं हरिपदाकृति ६५
श्राद्धकाले विशेषेण कर्ता भोक्ता च धारयेत्
अर्थं पञ्चकतत्वज्ञः पञ्चसंस्कारदीक्षितः ६६
महाभागवती विप्रः सततं पूजयेद्धरिम्
नारायणः परं ब्रह्म विप्राणां दैवतं सदा ६७
तस्य भुक्तावशेषन्तु पावनं मुनिसत्तमाः
हरिभुक्तोऽपि तं दद्यात्पितृणाञ्च दिवौकसाम् ६८
तदेव जुहुयाद्वह्नौ भुञ्जीयात्तु तदेव हि
हरेरनर्पितं यत्तु देवानामर्पितञ्च यत् ६९
मद्यमांससमं प्रोक्तं तद्भुञ्जीयात्कदाचन
हरेः पादजलं प्राश्यं नित्यं नान्यद्दिवौकसाम् ७०
सुराणामितरेषां तु फलपुष्पजलादिकम्
निर्माल्यमशुभं प्रोक्तमस्पृश्यं हि कदाचन ७१
विधिर्ह्येष द्विजातीनां नेतरेषां कदाचन
शिवार्च्चनं त्रिपुण्ड्रञ्च शूद्राणां तु विधीयते ७२
तद्विधानामिदं ये च विप्राः शिवपरायणाः
ते वै देवलका ज्ञेयाः सर्वकर्मबहिष्कृताः ७३
वैखानसास्तु ये विप्राः हरिपूजनतत्पराः
न ते देवलका ज्ञेया हरिपादाब्जसंश्रयात् ७४
नापहृत्य हरेर्द्रव्यं ग्रामार्च्चनपरो भवेत्

भक्त्या संपूज्य देवेशं नासौ देवलकः स्मृतः ७५
भक्त्या योऽप्यर्चयेद्देवं ग्रामार्च्चं हरिमव्ययम्
प्रसादतीर्थस्वीकारान्नासौ देवलकः स्मृतः ७६
शङ्खचक्रोर्ध्वपुण्ड्रादिधारणं स्मरणं हरेः
तन्नामकीर्तनञ्चैव तत्पादाम्बुनिषेवणम् ७७
तत्पादवन्दनञ्चैव तं निवेदितभोजनम्
एकादश्युपवासश्च तुलस्यैवार्चनं हरेः ७८
तदीयानामर्चनञ्च भक्तिर्नवविधास्मृता
एतैर्नवविधैर्युक्तो वैष्णवः प्रोच्यते बुधैः ७९
एतैर्गुणैर्विहीनस्तु न तु विप्रो न वैष्णवः
कर्मणा मनसा वाचा न प्रमाद्येज्जनार्दनम् ८०
भक्तिः सा सात्विकी ज्ञेया भवेदव्यभिचारिणी
नान्यं देवं नमस्कुर्य्यान्नान्यं देवं प्रपूजयेत् ८१
नान्यप्रसादं भुञ्जीत नान्यदायतनं विशेत्
न त्रिपुण्ड्रं तथा कुर्य्यात्पटचाकारं जगत्त्रयम् ८२
यतिर्यस्य गृहे भुङ्क्ते तस्य भुङ्क्ते हरिं स्वयम्
हरिर्यस्य गृहे भुङ्क्ते तस्य भुङ्क्ते जगत्त्रयम् ८३
महाभागवतो विप्रः सततं पूजयेद्धरिम्
पाञ्चकाल्प विधानेन निमित्तेषु विशेषतः ८४
अप्स्वग्नौ हृदये सूर्य्ये स्थण्डिले प्रतिमासु च
षट्सु तेषु हरेः पूजा नित्यमेव विधीयते ८५
स्नानकाले तु संप्राप्ते नद्यां पुण्यजले शुभे
ध्यात्वा नारायणं देवं नागपर्यङ्कशायिनम् ८६
द्वादशार्णेन मनुना सोऽर्चयित्वाऽक्षतादिभिः
अष्टोत्तरशतं जप्त्वा ततः स्नानं समाचरेत् ८७
एतदप्यर्चनं प्रोक्तं ब्राह्मणस्य जगत्पतेः

होमकाले तु सततं परिस्तीर्यानलं शुभम् ८८
यज्ञरूपं महात्मानं चिन्तयेत्पुरुषोत्तमम्
साङ्गत्रयीमयं शुभ्रदिव्याङ्गोपाङ्गशोभितम् ८९
सर्वलक्षणसम्पन्नं शुद्धजाम्बूनदप्रभम्
युवानं पुण्डरीकाक्षं शङ्खचक्रधनुर्धरम् ९०
सर्वयज्ञमयं ध्यायेद्वामाङ्काश्रितपद्मया
सम्पूज्य चाक्षतैरेव पश्चाद्धोमं समाचरेत् ९१
प्राणाग्निहोत्रसमये सम्यगाचम्य वारिणा
कुशासने समासीनः प्राग्वा प्रत्यङ्मुखोऽपि वा
पतिष्यासनमात्मानं प्राणायामं समाचरेत् ९२
मन्त्रेणोद्बुध्य हृदयपङ्कजं केशरान्वितम्
तस्मिन्वह्न्यर्कशीतांशुबिम्बान्यनु विचिन्तयेत् ९३
सर्वाक्षरमयं दिव्यरन्तपीठं तदुत्तरे
तन्मध्येऽष्टदलं पद्मं ध्यायेत्कल्पतरोरधः ९४
वीरासने समासीनं तस्मिन्नीशं विचिन्तयेत्
स्निग्धदूर्बादलश्यामं सुन्दरं भूषणैर्युतम् ९५
पीताम्बरं युवानं च चन्दनस्त्रग्विभूषितम्
शरत्पद्मासनं रक्तपद्माभाङ्घ्रिकरद्वयम् ९६
स्निग्धवर्णं महाबाहुं विशालोरस्कमव्ययम्
चक्रशङ्खगदाबाणपाणिं रघुवरं हरिम् ९७
जानकीलक्ष्मणोपेतं मनसैवार्च्चयेद्विभुम्
मन्त्रद्वयेनार्च्चयित्वा जप्त्वा चैव षडक्षरम् ९८
पश्चाद्वै जुहुयात् पञ्च प्राणानभ्यर्च्च्य तं पुनः
ध्यायन्वै मनसा विष्णुं सुखं भुञ्जीत वाग्यतः ९९
एवं ह्यर्चनं विष्णोरुत्तमं मुनिसत्तमाः
अत्यन्ताभिमता विष्णोर्हृत्पूजा परमात्मनः १००

सन्ध्याकाले तु सम्प्राप्ते रविमण्डलमध्यगम्
हिरण्यगर्भं पुरुषं हिरण्यवपुषं हरिम् १०१
श्रीवत्सकौस्तुभोरस्कं वैजयन्तीविराजितम्
शङ्खचक्रादिभिर्युक्तं भूषितैर्दोर्भिरायतैः १०२
शुक्लाम्बरधरं विष्णुमुक्ताहारविभूषितम्
ध्यात्वा समर्चयेद्देवं कुसुमैरक्षतैरपि १०३
प्रणवेण च सावित्र्या पश्चात्सूक्तं निवेदयेत्
ध्यायन्नेवं जपेद्विष्णुं गायत्रीं भक्तिसंयुतः १०४
तयैवाभ्यर्च्यगोविन्दं नमस्कृत्वा विसर्जयेत्
एवमभ्यर्चयेद्देवं त्रिसन्ध्यासु तथा हरिम् १०५
वैश्वदेवावसाने तु पुरस्ताद्वै विभावसोः
उपलिप्य स्थण्डिले तु जुहुयाद्भक्तिकर्म तत् १०६
ध्यात्वा सर्वगतं विष्णुं घनश्यामं सुलोचनम्
कौस्तुभोद्भासितोरस्कं तुलसीवनमालिनम् १०७
पीताम्बरधरं देवं रत्नकुण्डलशोभितम्
हरिचन्दनलिप्ताङ्गं पुण्डरीकायतेक्षणम् १०८
मौक्तिकान्वितनासाग्रं जगन्मोहनविग्रहम्
गोपीजनैः परिवृतं वेणुं गायन्तमच्युतम् १०९
ध्यात्वा कृष्णं जगन्नाथं पूजयित्वा यथाविधिः
जुहुयाद्धरिचक्रं तद्देवानुद्दिश्य सत्तमाः ११०
जप्त्वा कृष्णमनुं पश्चादभ्यर्च्य मनसा हरिम्
आचम्य प्रयतो भूत्वा नमस्कृत्य विसर्जयेत् १११
स्थण्डिलेऽभ्यर्चनं विष्णोरेवं कुर्याद्विधानतः
त्रिसन्ध्यास्वर्चयेद्विष्णुं प्रतिमासु विशेषतः ११२
सुवर्णरजताद्यैर्वा शिलादार्वादिनाऽपि वा
कृत्वा बिम्बं हरेः सम्यक् सर्वावयवशोभितम् ११३

सर्वलक्षणसम्पन्नं सर्वायुध समन्वितम्
ततोऽधिवासनं कुर्यात्त्रिरात्रं शुद्धवारिषु ११४
तत्रार्च्चयेद्विधानेन जपहोमादिकर्मभिः
स्नाप्य पञ्चामृतैर्गव्यैस्तदा मन्त्रजलैरपि ११५
यज्ञपेद्यां समारोप्य पूजयेत्तत्र दीक्षितः
मङ्गलद्रव्यसंयुक्तैः पूर्णकुम्भैः समन्वितः ११६
शरावैर्द्रव्यसम्पूर्णैः पताकैस्तोरणादिभिः
कुम्भेषु वासुदेवादीन् सुरान् संपूजयेत् क्रमात् ११७
वासुदेवो हयग्रीवस्तथा सङ्कर्षणो विभुः
महावराहः प्रद्युम्नो नारसिंहस्तथैव च ११८
अनिरुद्धो वामनश्च पूजनीया यथाक्रमात्
तस्य पूर्णशरावेषु लोकेशानर्चयेत्ततः ११९
मध्ये तु वारुणं कुम्भं पञ्चरत्नसमन्वितम्
पूजयेद्गन्धपुष्पाद्यैर्ध्यात्वाऽस्मिन् जलशायिनम् १२०
ततः संपूजयेद्देवं धान्योपरि निधाय च १२१
व्याघ्रचर्म्म समास्तीर्य तस्मिन् कौशेयवाससि
निवेद्य पूजयेद्बिम्बं मूलमन्त्रेण वैष्णवः १२२
तारणेषु चतुर्दिक्षु चण्डादीनर्चयेत्तदा
कुमुदादि सुरान् दिक्षु तथा धर्मादिदेवताः १२३
संपूज्य विधिना तस्मिन् पश्चाद्धोमं समाचरेत्
आग्नेयं कल्पयेत् कुण्डं मेखलाद्युपशोभितम् १२४
अश्वत्थाद्वा शमीगर्भादाहृत्याग्नौ विनिक्षिपेत्
वैष्णवस्य गृहाद्वाऽपि समानीयानलं द्विजः १२५
गृह्योक्तविधिनेवात्र प्रतिष्ठाप्य हुताशनम्
इध्माधानादि पर्यन्तं कृत्वा होमं समाचरेत् १२६
पायसेन गवाज्येन तिलैर्व्रीहिभिरेव च

चतुर्भिर्वैष्णवैः सूक्तैः पायसं जुहुयाद्धविः १२७
हिरण्यगर्भसूक्तेन श्रीसूक्तेन तथैव च
अहं रुद्रेभिरिति च गवाज्यं जुहुयात्ततः १२८
त्वमग्ने द्युभिरिति च सूक्तेन प्रत्यृचन्त्रिभिः
अस्य वामेति सूक्तेन प्रत्यृचं व्रीहिभिस्तथा १२९
अग्निं नरो दीधितिभिः सूक्तेन प्रत्यृचं तथा
समिद्भिः पिप्पलीरौद्रैर्होतव्यं मुनिसत्तमाः १३०
अष्टोत्तरं सहस्रं वा शतमष्टोत्तरं तु वा
होतव्यमाज्यं पश्चात्तु तथा मन्त्रचतुष्टयम् १३१
वैकुण्ठपार्षदं होमं पायसेन घृतेन वा
समाप्य होमं हविषः शेषं तस्मै निवेदयेत्
चतुर्मन्त्रांश्चतुर्वेदांश्चतुर्दिक्षु जपेत्ततः १३२
तत्र जागरणं कुर्य्याद्गीतवादित्रनर्तकैः
रजन्यां तु व्यतीतायां स्नात्वा नद्यां विधानतः १३३
वैकुण्ठतर्पणं कुर्य्यादृत्विग्भिर्ब्राह्मणैः सह
तर्पयित्वा पितॄन् देवान्वाग्यतो भवनं विशेत् १३४
आचम्य पूर्ववत् पूजां कृत्वा होमं समाचरेत्
जुहुयाद्ब्रह्मणः स्तुत्यैः सूक्तैश्च घृतपायसम् १३५
पौरुषेण तु सूक्तेन श्रीसूक्तेन तथैव च
वैकुण्ठपार्षदं हुत्वा कर्मशेषं समापयेत् १३६
नयनोन्मीलनं कुर्य्यात् सुमुहूर्तेन वैष्णवः
महाभागवतः श्रेष्ठः सूक्ष्महेमशलाकया १३७
द्वयेनैव प्रकुर्व्वीत नयनोन्मीलनं हरेः
निवेश्य भद्रपीठे तु स्नापयेत्सुसमाहितः १३८
सर्वैश्च वैष्णवैः सूक्तैर्ऋत्विजः कलशोदकैः
ततस्तन्मध्यमं कुम्भमादाय द्विजसत्तमः १३९

स्नापयेन्मन्त्ररत्नेन शतवारं समाहितः
सौवर्णेन च ताम्रेण शङ्खेन रजतेन वा १४०
स्नाप्य पञ्चामृतैर्गव्यैरुद्धृत्य शुभचन्दनैः
मन्त्रेण स्नापयित्वा च तुलसीमिश्रितैर्जलैः १४१
वासोभिर्भूषणैः सम्यगलङ्कृत्यं च वैष्णवः
उपचारैः समभ्यर्च्यैः पश्चान्नीराजयेत्तदा १४२
अलङ्कृते शुभे गेहे पीठे संस्थापयेद्धरिम्
सूकेत्नोत्तानपादस्य दृढं स्थाप्य सुखासने १४३
अष्टोत्तरशतं वारं शुभमन्त्रचतुष्टयात्
ध्यात्वा पुष्पाञ्जलिं दद्यान्महाभागवतोत्तमः १४४
नत्वा गुरुन् परं धाम्नि स्थितं देवं सनातनम्
ध्यात्वैव मन्त्ररत्नेन तस्मिन् बिम्बे निवेशयेत् १४५
अर्चयित्वोपचारैस्तु मङ्गलानि निवेदयेत्
दर्पणं कपिलां कन्यां शङ्खं दूर्व्वाक्षतान् पयः १४६
सौवर्णमाज्यं लाजांश्च मधुसर्षपमञ्जनम्
एवं त्रयोदशे मासि मङ्गलानि निवेदयेत् १४७
तथैव दशमुद्राश्च मन्त्रेणैव समीक्षयेत्
तद्बिम्बमूर्त्तिं मन्त्रेण पश्चाद्दशशतानि तु १४८
पुष्पाणि दद्याद्भक्त्या च जपेच्च सुसमाहितः
सतिलैस्तण्डुलैः शुभ्रैर्जुहुयाच्च द्विजोत्तमः १४९
आशिषो वाचनं कृत्वा दीपैर्नीराजयेत्तदा
भोजयित्वा ततो विप्रान् दक्षिणाभिश्च तोषयेत् १५०
आचार्य मृत्विजश्चापि विशेषेण समर्चयेत्
तदग्निं संग्रहेन्नित्यं होमार्थं परमात्मनः १५१
त्रिरात्रमुत्सवं तत्र कुर्य्याच्छक्त्या यतात्मवान्
वैष्णवैः पापमाप्तुश्च तत्र पुष्पाञ्जलिं चरेत् १५२

आज्येन चरुणा वाऽपि होमं कुर्व्वीत वैष्णवः
प्रत्यहं भोजयेद्विप्रान् वैष्णवान् धृतपायसम्  १५३
तन्मूर्तिप्रीतये शक्त्या दद्याद्वासांसि दक्षिणाः
कुर्यादवभृथेष्टिञ्च महाभागवतैः सह  १५४
सहस्रनामभिर्विष्णोः सूक्तैर्विष्णुप्रकाशकैः
नद्यामवभृथं कृत्वा तर्पयेत्पितृदेवताः  १५५
अस्य वामेति सूक्तेन पायसं मधुसंयुतम्
आज्येन मूलमन्त्रेण सहस्रं जुहुयात्तदा  १५६
आशिषो वाचनं कृत्वा भोजयेद्द्विजसत्तमान्
एवं संस्थापयेद्देवमर्च्चयेद्विधिना तदा  १५७
गृहार्चायां स्थापने तु लघुतन्त्रं समाचरेत्
आधिवासनवेद्यादि मन्त्रमत्र विवर्जयेत्  १५८
एकत्र पञ्चगव्येषु विनिक्षिप्य परेऽहनि
पञ्चामृतैः स्नापयित्वा पश्चादुद्वर्तनादिकम्  १५९
आदाय कलशं शुद्धं पवित्रोदकपूरितम्
निक्षिप्य पञ्चरत्नानि सुवर्णतुलसीदलम्  १६०
चन्दनाक्षतदूर्व्वाश्च तिलान् धात्रीञ्च सर्षपम्
अभिमन्त्र्य कुशैः पश्चान्मन्त्ररत्नेन वैष्णवः  १६१
शतवारं सहस्रं वा मन्त्रेणैवाभिषेचयेत्
सर्वैश्च वैष्णवैः सूक्तैर्गायत्र्या वैष्णवेन च  १६२
नामभिः केशवाद्यैश्च सर्वैर्मन्त्रैश्च वैष्णवैः
स्नाप्य वस्त्रैर्भूषणैश्च शुभे धान्ये निवेशयेत्  १६३
स्थण्डिलेऽग्निं प्रतिष्ठाप्य इध्माधानादि पूर्ववत्
होमं कुर्य्याद् गवाज्येन पायसान्नेन वैष्णवः  १६४
कर्तुरौपासनाग्नौ तु होममत्र विशिष्यते
प्रत्यृचं वैष्णवैः सूक्तैर्जुहुयाद् घृतपायसम्  १६५

अस्य वामेति सूक्तेन गवाज्यं जुहुयात्ततः
मन्त्ररत्नेन जुहुयादष्टोत्तरसहस्रकम् १६६
तद्बिम्बमूर्तिमन्त्रेण तिलहोमं तथैव च
अविज्ञातस्तु तन्मत्रं मूलमन्त्रेण वा यजेत् १६७
यजेच्छ्री भूप्रकाशैश्च गायत्र्या विष्णुसंज्ञया
वैकुण्ठपार्षदं होमं कृत्वा होमं समापयेत् १६८
नयनोन्मीलनं कृत्वा सौवर्णेन कुशेन वा
निवेश्याऽऽवाहयेत्पीठे मन्त्ररत्नेन वैष्णवः १६९
मन्त्रेणैवार्चनं कृत्वा पश्चात्पुष्पाञ्जलिं यजेत्
तस्मिन्बिम्बे तु तन्मूर्तिं ध्यात्वा नियतमानसः १७०
अष्टोत्तरसहस्रन्तु दद्यात्पुष्पाञ्जलिं ततः
सर्वैश्च वैष्णवैः सूक्तैर्दद्यात्पुष्पाणि वैष्णवः १७१
ब्राह्मणान्भोजयेत्पश्चात्पायसान्नं घृतान्वितम्
शक्त्या च दक्षिणां दत्त्वा विशेषेणार्च्चयेद्गुरुम् १७२
सहस्रनामभिः स्तुत्वा आशीर्भिरभिवादयेत्
प्रदक्षिणानमस्कारान्कुर्व्वीतात्र पुनः पुनः १७३
प्रसीद मम नाथेति भक्त्या सम्प्रार्थयेद्विभुम्
दीप्तैर्नीराजयेत्पश्चाच्छक्त्या तेन समाहितः १७४
हुतशेषं हविः प्राश्य जप्त्वा मन्त्रमनुत्तमम्
ध्यायन् कमलपत्राक्षं भूमौ स्वप्यात्कुशोत्तरम् १७५
एवं गृहार्चा बिम्बस्य विष्णुं संस्थाप्य वैष्णवः
अर्चयेद्विधिना नित्यं यावद्देहनिपातनम् १७६
शालग्रामशिलायान्तु पूजनं परमात्मनः
कोटिकोटिगुणाधिक्यं भवेदत्र न संशयः १७७
न जपो नाधिवासश्च न च संस्थापनक्रिया
शालग्रामार्चने विष्णुस्तस्मिन् सन्निहितस्तथा १७८

मूर्तीनान्तु हरेस्तस्य यस्यां प्रीतिरनुत्तमा
तस्यामेव तु तां ध्यात्वा पूजयेत्तद्विधानतः १७९
मूर्त्यन्तरमबिम्बे तु न यष्टव्यं तदेव तत्
शालग्रामशिलायान्तु यष्टव्या इष्टमूर्तयः १८०
अर्चनं वन्दनं दानं प्रणामं दर्शनं नृणाम्
शालग्रामशिलायान्तु सर्वं कोटिगुणं भवेत् १८१
न स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः
यो वहेच्छिरसा नित्यं सालग्रामशिलाजलम् १८२
असत्यकथनं हिंसामभक्ष्याणाञ्च भक्षणम्
शालग्रामजलं पीत्वा सर्वं दहति तत्क्षणात् १८३
द्विजानामेव नान्येषां शालग्रामशिलार्चनम्
बालकृष्णवपुर्देवं पूजयेत्तद्द्विजः सदा १८४
पठेद्वाऽप्यर्चयेद्विष्णुं विशिष्टः शूद्रयोनिजः
स्थण्डिले हृदये वाऽपि पूजयेत्तद्द्विजः सदा १८५
वाराहं नारसिंहञ्च हयग्रीवञ्च वामनम्
ब्राह्मणः पूजयेद्विष्णुं यज्ञमूर्तिञ्च केवलम् १८६
क्षत्रियः पूजयेद्रामं केशवं मधुसूदनम्
नारायणं वासुदेवमनन्तञ्च जनार्दनम् १८७
प्रद्युम्नमनिरुद्धञ्च गोविन्दञ्चाच्युतं हरिम्
सङ्कर्षणं तथा कृष्णं वैश्यः संपूजयेत्तदा १८८
बालं गोपालवेषं वा पूजयेच्छूद्रयोनिजः
सर्व एव हि संपूज्या विप्रेण मुनिसत्तमाः १८९
सर्वेऽपि भगवन्मन्त्रा जप्तव्याः सर्वसिद्धिदाः
तस्माद्द्विजोत्तमः पूज्यः सर्वेषां भूतिमिच्छताम् १९०
पञ्चसंस्कारसम्पन्नो मन्त्ररत्नार्थकोविदः
शालग्रामशिलायां तु पूजयेत्पुरुषोत्तमम्

पूजितस्तुलसीपत्रैर्दद्याद्धि सकलं हरिः १९१
यः श्राद्धं कुरुते विप्रः शालग्रामशिलाग्रतः
पितॄणां तत्र तृप्तिः स्याद् गयाश्राद्धादनन्तरम् १९२
जप्तं हुतं तथा दानं बन्दनं च ततः क्रिया
शालग्रामसमीपे तु सर्वं कोटिगुणं भवेत् १९३
ध्यात्वा कमलपत्राक्षं शालग्रामशिलोपरि
पौरुषेण तु सूक्तेन पूजयेत् पुरुषोत्तमम् १९४
अनुष्टुभस्य सूक्तस्य त्रिष्टुबन्त्वाऽस्य देवता
पुरुषो यो जगद्बीजमृषिर्नारायणः स्मृतः १९५
प्रथमां विन्यसेद्वामे द्वितीयां दक्षिणे करे
तृतीयां वामपादे तु चतुर्थीं दक्षिणे तथा १९६
पञ्चमीं वामजानौ तु षष्ठीं वै दक्षिणे तथा
सप्तमीं वामकट्यां तु ह्यष्टमीं दक्षिणेऽपि च १९७
नवमीं नाभिदेशे तु दशमीं हृदि विन्यसेत्
एकादशीं कण्ठदेशे द्वादशीं वामवाहुके १९८
त्रयोदशीं दक्षिणे तु स्वास्यदेशे चतुर्दशीम्
अक्ष्णोः पञ्चदशीं मूर्ध्नि षोडशीञ्चैव विन्यसेत् १९९
एवं न्यासविधिं कृत्वा पश्चाद्ध्यानं समाचरेत्
सहस्रार्कप्रतीकाशङ्कन्दर्पायुतसन्निभम् २००
युवानं पुण्डरीकाक्षं सर्वाभरणभूषितम्
पीनवृत्तायतैर्दोर्भिश्चतुर्भिर्भूषणान्वितैः २०१
चक्रं पद्मं गदां शङ्खं विभ्राणं पीतवाससम्
शुक्लपुष्पानुलेपञ्च रक्तहस्तपदाम्बुजम् २०२
सुस्निग्धनीलकुटिलकुन्तलैरुपशोभितम्
श्रिया भूम्या समाश्लिष्टपार्श्वं ध्यात्वा समर्चयेत् २०३
यथाऽऽत्मनि तथा देवे न्यासकर्म्म समाचरेत्

आद्ययाऽऽवाहनं विष्णोरासनं च द्वितीयया २०४
तृतीयया च तत्पाद्यं चतुर्थ्याऽर्घ्यं निवेदयेत्
पञ्चम्याऽऽचमनीयं तु दातव्यं च ततः क्रमात् २०५
षष्ठ्या स्नानन्तु सप्तम्या वस्त्रमप्युपवीतकम्
अष्टम्या चैव गन्धन्तु नवम्याथ सुपुष्पकम् २०६
दशम्या धूपकञ्चैवमेकादश्या च दीपकम्
द्वादश्या च त्रयोदश्या चरुं दिव्यं निवेदयेत् २०७
चतुर्दश्या नमस्कारं पञ्चदश्या प्रदक्षिणम्
षोडश्या शयनं दत्त्वा शेषकर्म्म समाचरेत् २०८
स्नानवस्त्रोपवीतेषु चरौ चाऽचमनं चरेत्
हुत्वा षोडशभिर्मन्त्रैः षोडशाऽऽज्याहुतीः क्रमात् २०९
तथावाऽऽज्येन होतव्यं मृद्भिः पुष्पाञ्जलिं चरेत्
तच्च सर्वं जपेत्सद्यः पौरुषं सूक्तमुत्तमम् २१०
कृत्वा माध्याह्निकस्नानमूर्द्ध्वपुण्ड्रधरस्ततः
नित्यां सन्ध्यामुपास्याथ रविमण्डलमध्यगम् २११
हरिं ध्यायन्नगदः स्यादेनसः शुचिरित्यृचा
सावित्रीं च जपेत्तिष्ठन् प्राणानायम्य पूर्वतः २१२
सौरेण चानुवाकेन उपस्थानजपं तथा
आत्मानं च परीक्ष्याथ दर्भान्तरपुटाञ्जलिम् २१३
दक्षिणाङ्के तु विन्यस्य जपयज्ञाप्तये बुधः
सव्याहृतिं सप्रणवां गायत्रीं तु जपेत्तदा २१४
शक्त्या च चतुरो वेदान् पुराणं वैष्णवं जपेत्
चरितं रघुनाथस्य गीतां भगवतो हरेः २१५
ध्यायन्वै पुण्डरीकाक्षं जप्त्वा वाऽप उपस्पृशेत्
पूर्ववत्तर्पयेद्देवं वैकुण्ठपार्षदं तथा २१६
देवानृषीन्पितॄंश्चैव तर्पयित्वा तिलोदकैः

निष्पीड्य वस्त्रमाचम्य गृहमाविश्य पूर्ववत् २१७
पूजयित्वाऽच्युतं भक्त्या पौरुषेण विधानतः
दैवं भूतं पैतृकं च मानुषञ्च विधानतः २१८
प्रीतये सर्वयज्ञस्य भोक्तुर्विष्णोर्यतेत्ततः
वैकुण्ठं वैष्णवं होमं पूर्ववज्जुहुयात्तदा २१९
चतुर्विधेभ्यो भूतेभ्यो बलिं पश्चाद्विनिक्षिपेत्
द्वारि गोदोहमात्रन्तु तिष्ठेदतिथिवाञ्छया २२०
भोजयेच्चाऽऽगतान् काले फलमूलौदनादिभिः
महाभागवतान् विप्रान् विशेषेणैव पूजयेत् २२१
मधुपर्कप्रदानेन पाद्यार्घ्याचमनादिभिः
गन्धैः पुष्पैश्च ताम्बूलैर्धूपैर्दीपैर्निवेदनैः २२२
ब्रह्मासने निवेश्यैव पूजयेच्छ्रद्धयाऽन्वितः
सकृत्संपूजिते विप्रे महाभागवतोत्तमे २२३
षष्टिं वर्षसहस्राणि हरिः संपूजितो भवेत्
मोहादनर्चयेद्यस्तु महाभागवतोत्तमम् २२४
कोटिजन्मार्जितात्पुण्याद् भ्रश्यते नात्र संशयः
गृहे तस्य न चाश्नाति शतवर्षाणि केशवः २२५
मुखं हि सर्वदेवानां महाभागवतोत्तमः
तस्मिन् सम्पूजिते विप्रे पूजितं स्याज्जगत्त्रयम् २२६
अर्थपञ्चकतत्वज्ञः पञ्चसंस्कारसंस्कृतः
नवभक्तिसमायुक्तो महाभागवतः स्मृतः २२७
काले समागते तस्मिन् पूजिते मधुसूदनः
क्षणादेव प्रसन्नः स्यादीप्सितानि प्रयच्छति २२८
महाभागवतानाञ्च पिबेत्पादोदकं तु यः
शिरसा वा श्रयेद्भक्त्या सर्वपापैः प्रमुच्यते २२९
यस्मिन् कस्मिन् हि वसति महाभागवतोत्तमे

अप्येकरात्रमथवा तद्देशस्तीर्थसम्मितः  २३०
भोजयित्वा महाभागान् वैष्णवानतिथीनपि
ततो बालसुहृद्वृद्धान् बान्धवांश्च समागतान्  २३१
भोजयित्वा यथा शक्त्या यथाकालं जितक्षुधः
भिक्षां दद्यात्प्रयत्नेन यतीनां ब्रह्मचारिणाम्  २३२
शूद्रो वा प्रतिलोमो वा पथि श्रान्तः क्षुधातुरः
भोजयेत्तं प्रयत्नेन गृहमभ्यागतो यदि  २३३
पाषण्डः पतितो वाऽपि क्षुधार्त्तो गृहमागतः
नैव दद्यात्स्वपक्वान्नमाममेव प्रदापयेत्  २३४
स्वशक्त्या तर्पयित्वैवमतिथीनागतान् गृहे
सम्यङ्निवेदितं विष्णोः स्वयं भुञ्जीत वाग्यतः  २३५
प्रक्षाल्य पादौ हस्तौ च सम्यगाचम्य वारिणा
विष्णोरभिमुखं पीठे हेमदिग्धे कुशोत्तरे  २३६
प्राग्वा प्रत्यङ्मुखो वाऽपि जान्वोरन्तःकरः शुचिः
उदङ्मुखो वा पैत्र्ये तु समासीताभिपूजितः  २३७
वंशतालादिपत्रैस्तु कृतं वसनमश्म च
कपालमिष्टकं वापि वर्णं तृणमयं तथा  २३८
चर्मासनं शुष्ककाष्ठं खलं पर्य्यङ्कमेव च
निषिद्धधातु पीठं च दान्तमस्थिमयञ्च यत्  २३९
दग्धं परावितं तालमायसञ्च विवर्जयेत्
विभीतकन्तिन्दुकञ्च करञ्जं व्याधिघातकम्  २४०
भल्लातकं कपित्थं च हिन्तालं शिग्रुमेव च
निषिद्धतरवो ह्येते सर्वकर्मसु गर्हिताः  २४१
शुद्धदारुमये पीठे समासीने कुशोत्तरे
पीठे त्वलाभे सौम्ये स्यात्केवलं कुशविष्टरम्  २४२
चतुरस्रं त्रिकोणं वा वर्तुलञ्चार्द्ध चन्द्रकम्

वर्णानामानुपूर्वेण मण्डलानि यथाक्रमात् २४३
स्वलङ्कृते मण्डलेऽस्मिन् विमलं भाजनं न्यसेत्
स्वर्णं रौप्यं च कांस्यं वा पर्णं वा शास्त्रचोदितम् २४४
चतुःषष्टिपलं कांस्यं तदर्धं पादमेव वा
गृहिणामेव भोज्यं स्यात्ततो हीनन्तु वर्जयेत् २४५
पलाशपद्मपत्रे तु गृही यत्नेन वर्जयेत्
यतीनाञ्च वनस्थानां पितॄणाञ्च शुभप्रदम् २४६
वटाश्वत्थार्कपर्णानि कुम्भीतिन्दुकयोस्तथा
एरण्डतालबिल्वेषु कोविदारकरञ्जके २४७
भल्लातकाश्वपर्णानां पर्णानि परिवर्जयेत्
मोचागर्भपलाशं च वर्जयेत्तत्तु सर्वदा २४८
मधुकं कूटजं ब्राह्मजम्बूप्लक्षमुदुम्बरम्
मातुलङ्गं पनसं च मोचाचर्मदलानि च २४९
पालाक्यवर्णं श्रीपर्णं शुभानीमानि भोजने
यथाकालोपपन्ने तु भोजने घृतसंस्कृते २५०
पत्न्यादिभिर्दत्तवस्तु वास्तुदेवार्पिते शुभे
गायत्र्या मूलमन्त्रेण संप्रोक्ष्य शुभवारिणा २५१
ऋतसत्याभ्यामिति च मन्त्राभ्यां परिषेचयेत्
अन्नरूपं विराजं संध्यात्वा मन्त्रं जपेद्बुधः २५२
ध्यात्वा हृत्पङ्कजे विष्णुं सुधांशुसदृशद्युतिम्
शङ्खचक्रगदापद्मपाणिं वै दिव्यभूषणम् २५३
मनसैवार्चयित्वाऽथ मूलमन्त्रेण वैष्णवः
पादोदकं हरेः पुण्यं तुलसीदलमिश्रितम् २५४
अमृतोपस्तरणमसीति मन्त्रेण प्राशयेत्
उद्दिश्यैव हरिं प्राणान् जुहुयात्सघृतं हविः २५५
अन्नलाभे तु होतव्यं शाकमूलफलादिभिः

पञ्चप्राणाद्या हुतयो मन्त्रैस्तैर्जुहुयाद्धरेः  २५६
श्रद्धायां प्राणे विष्टेति मन्त्रेण च यथाक्रमात्
तर्जनीमध्यमाङ्गुष्ठैः प्राणायेति यजेद्धविः  २५७
मध्यमानामिकाङ्गुष्ठैरपानायेत्यनन्तरम्
कनिष्ठानामिकाङ्गुष्ठैर्व्यानायेत्याहुतिं ततः  २५८
कनिष्ठतर्जन्यङ्गुष्ठैरुदानायेति वै यजेत्
समानायेति जुहुयात्सर्वैरङ्गुलिभिर्द्विजः  २५९
अयमग्निर्वैश्वानरिरित्यात्मानमनन्तरम्
शतमष्टोत्तरं मन्त्रं मनसैव जपेत्ततः  २६०
ध्यायन् नारायणं देवं भुञ्जीयात्तु यथासुखम्
वक्त्रादपातयन् पासं चिन्तयन्मधुसूदनम्  २६१
नाऽऽसनारूढपादस्तु न वेष्टितशिरास्तथा
न स्कन्दयन् न च हसन् बहिर्नाप्यवलोकयन्  २६२
नाऽऽत्मीयान् प्रलपन् जल्पन् बहिर्जानुकरो न च
न वादकोपितनरः पृथिव्यामपि वा न च  २६३
न प्रसारितपादश्च नोत्सङ्गकृतभाजनः
नाश्नीयाद्भार्यया सार्धं न पुत्रैर्वापि विह्वलः  २६४
न शयानो नातिसङ्गो न विमुक्तशिरोरुहः
अन्नं वृथा न विकिरन् निष्ठीवन् नातिकाङ्क्षया  २६५
नातिशब्देन भुञ्जीत न वस्त्रार्थोपवेष्टितः
प्रगृह्य पात्रं हस्तेन भुञ्जीयात्पैतृकं यदि  २६६
चषके पुटके वाऽपि पिबेत्तोयं द्विजोत्तमः
तक्रं वाऽप्यथ वा क्षीरं पानकं वाऽपि भोजने  २६७
वक्त्रेण सान्तर्धानेन दत्तमन्येन वा पिबेत्
ग्रासशेषं नचाश्नीयात्पीतशेषं पिबेन्न तु  २६८
शाकमूलफलादीनि दन्तच्छिन्नं न खादयेत्

उद्धृत्य वामहस्तेन तोयं वक्त्रेण यः पिबेत् २६९
स सुरां वै पिबेद् व्यक्तां सद्यः पतति रौरवे
शब्देनापोशने पीत्वा शब्देन दधिपायसे २७०
शब्देनान्नरसं क्षीरं पीत्वेव पतितो भवेत्
प्रत्यक्षलवणं शुक्तं क्षीरं च लवणान्वितम् २७१
दधि हस्तेन मथितं सुरापानसमं स्मृतम्
आरनालरसं तद्वत्तद्वैवानार्पितं हरेः २७२
आसनेन तु पात्रेण नैव दद्याद्धृतादिकम्
नोच्छिष्टं घृतमादद्यात्पैतृके भोजने विना २७३
तथैव तु पुरोडाशं पृषदाज्यञ्च माक्षिकम्
पानीयं पायसं क्षीरं घृतं लवणमेव च २७४
हस्तदत्तं न गृह्णीयात्तुल्यं गोमांसभक्षणम्
अपूपं पायसं माषं यावकं कृसरं मधु २७५
केवलं यो वृथाऽश्नाति तेन भुक्तं सुरासमम्
करञ्जं मूलकं शिग्रु लशुनं तिलपिष्टकम् २७६
तलास्थि श्वेतवृन्ताकं सुरापानसमं स्मृतम्
अन्यच्च फलमूलाद्यं भक्ष्यं पानादिकञ्च यत् २७७
स्रक्चन्दनादि ताम्बूलं यो भुङ्क्ते हर्यनर्पितम्
कल्पकोटिसहस्राणि रेतोविरामूत्रभाग्भवेत् २७८
तस्मात्सर्वं सुविमलं हरिभुक्तं यथोक्तवत्
स पवित्रेण यो भाङ्क्ते सर्वयज्ञफलं लभेत् २७९
ध्यायन् नारायणं देवं वाग्यतः प्रयतात्मवान्
भुक्त्वावनतितृप्तश्चैव प्राशयेदम्बु निर्मलम् २८०
अमृतापिधानमसीतिमन्त्रेण कुशपाणिना
किञ्चिदन्नमुपादाय पीतशेषेण वारिणा २८१
पैतृकेण तु तीर्थेन भूमौ दद्यात्तदर्थिनाम्

रौरवे नरके घोरे वसतां क्षुत्पिपासया २८२
तेषामन्नं सोदकञ्च अक्षय्यमुपतिष्ठतु
इति दत्त्वोदकं तेषां तस्मिन्नेवाऽऽसने स्थितः २८३
प्रक्षाल्य हस्तौ पादौ च वक्त्रं संशोध्य वारिभिः
द्विराचम्य विधानेन मन्त्रेण प्राशयेज्जलम् २८४
पीत्वा मन्त्रजलं पश्चादाचम्य हृदयाम्बुजे
राममिन्दीवरश्यामं चक्रशङ्खधनुर्धरम् २८५
युवानं पुण्डरीकाक्षं ध्यात्वा मन्त्रं जपेद्बुधः
समासीनः सुखासने वेदमध्यापयेत्ततः
सच्छिष्यान् यांस्तु शास्त्रं वा स्नेहाद्वा धर्मसंहिताम् २८६
इतिहासपुराणं वा कथयेच्छृणुयाच्च वा
एवावस्तङ्गते सन्ध्यां बहिः कुर्व्वीत पूर्ववत् २८७
बहिः सन्ध्या शतगुणं गोष्ठे शतगुणं तथा
गङ्गाजले सहस्रं स्यादनन्तं विष्णुसन्निधौ २८८
उपास्य पश्चिमां सन्ध्यां जप्त्वा जप्यं समाहितः
पूर्ववत्पूजयेद्विष्णुं गन्धपुष्पाक्षतादिभिः २८९
अष्टाक्षरविधानेन निवेश्यैवं समाहितः
सायमौपासनं हुत्वा वैष्णवं होममाचरेत् २९०
ध्यात्वा यज्ञमयं विष्णुं मन्त्रेणाष्टोत्तरं शतम्
तिलव्रीह्याज्यचरुभिस्तत्रैकेनापि वा यजेत् २९१
वैश्वदेवं भूतबलिं हुत्वा दत्त्वा च आचमेत्
शय्यायां विन्यसेद्देवं पर्य्यङ्के समलङ्कृते २९२
सविताने गन्धपुष्पधूपैरामोदिते शुभे
शाययित्वा च देवेशं देवीभ्यां सहितं हरिम् २९३
हिरण्यगर्भसूक्तेन नासदासीदनेन च
कृत्वा पुष्पाञ्जलिं पश्चादुपचारैः समर्चयेत् २९४

श्रिये जात इत्यृचैव ध्रुवसूक्तेन च द्विजः
दीपैर्नीराजनं कृत्वा पश्चादर्घ्यं निवेदयेत्  २९५
सुवाससा यवनिकां विन्यस्याथ समाहितः
द्वादशार्णं महामन्त्रं जपेदष्टोत्तरं शतम्  २९६
अस्त्रैश्च शङ्खचक्राद्यैर्दिक्षु रक्षां सुविन्यसेत्
स्तोत्रैः स्तुत्वा नमस्कृत्वा पुनः पुनरनन्तरम्  २९७
वैष्णवैश्च सुहृद्भिश्च भुञ्जीयादर्पितं हरेः
आचम्याग्निमुपस्पृश्य समासीनस्तु वाग्यतः  २९८
ध्यायन् हृदि शुभं मन्त्रं जपेदष्टोत्तरं शतम्
शेषाहिशायिनं देवं मनसैवार्चयेत्ततः  २९९
शयीत शुभशय्यायां विमले शुभमण्डले
ऋतौ गच्छेद्धर्मपत्नीं विना पञ्चसु पर्वसु  ३००
पुत्रार्थी चेत्तु युग्मासु स्त्रीकामी विषमासु च
न श्राद्धदिवसे चैव नोपवासदिने तथा  ३०१
नाशुचिर्मलिनो वाऽपि न चैव मलिनां तथा
न क्रुद्धां न च क्रुद्धः सन् न रोगी न च रोगिणीम्  ३०२
न गच्छेत्क्रूरदिवसे मघामूलद्वयोरपि
ब्राह्मे मुहूर्ते उत्थाय आचामेत्प्रयतात्मवान्  ३०३
यती च ब्रह्मचारी च वनस्थो विधवा तथा
अजिने कम्बले वाऽपि भूमौ स्वप्यात् कुशोत्तरे  ३०४
ध्यायन्तः पद्मनाभं तु शयीरन् विजितेन्द्रियाः
अर्पयेद्वाऽर्चयेद्विष्णुं त्रिकालं श्रद्धयाऽन्विताः  ३०५
आचरेयुः परं धर्मं यथावृत्त्यनुसारतः
प्रातः कृष्णं जगन्नाथं कीर्तयेत्पुण्यनामभिः  ३०६
शौचादिकन्तु यत्कर्म पूर्व्वोक्तं सर्वमाचरेत्
नैमित्तिकविशेषेण पूजयेत्पतिमव्ययम्  ३०७

तत्तत्काले तु तन्मूर्ते रर्चनं मुनिभिः स्मृतम्
प्रसुप्ते पद्मनाभे तु नित्यं मासचतुष्टयम्  ३०८
द्रोण्यान्दोलायामपि वा भक्त्या संपूजयेद्विभुम्
क्षीराब्धौ शेषपर्यङ्के शयानं रमया सह  ३०९
नीलजीमूतसङ्काशं सर्वालङ्कारसुन्दरम्
कौस्तुभोद्भासिततनुं वैजयन्त्या बिराजितम्  ३१०
लक्ष्मीघनकुचस्पर्शशुभोरस्कं सुबर्चसम्
ध्यात्वैवं पद्मनाभन्तु द्वादशार्णेन नित्यशः  ३११
पूजयेद्गन्धपुष्पाद्यैस्त्रिसन्ध्यास्वपि वैष्णवः
निवेद्य पायसान्नं तु दद्यात्पुष्पाञ्जलिं ततः  ३१२
सहस्रं शतवारं वा द्वयं मन्त्रं जपेत्सुधीः
द्वादशार्णमनुञ्चैव जप्त्वाऽऽज्येन तिलैश्च वा  ३१३
केवलं चारुणा वाऽपो जुहुयात्प्रतिवासरम्
अधःशायी ब्रह्मचारी सर्वभोगविवर्जितः  ३१४
वार्षिकांश्चतुरो मासानेवमभ्यर्च्य केशवम्
बोधयित्वाऽथ कार्तिक्यां दद्यात्पुष्पाण्यनेकशः  ३१५
साज्यैस्तिलैः पायसेन मधुना च सहस्रशः
मूलमन्त्रेण जुहुयात्सूक्तैश्चावभृथं ततः  ३१६
सहस्रनामभिः कृत्वा दद्याद्दर्पणमेव च
गृहं गत्वाऽथ देवेशम्पूजयित्वा यथाविधि  ३१७
भोजयेद्वैष्णवान्विप्रान्दक्षिणाभिश्च तोषयेत्
शुक्लपक्षे नभोमासि द्वादश्यां वैष्णवः शुचिः  ३१८
पवित्रारोपणं कुर्य्यान्नाभिमात्रायतं न्यसेत्
तथा वक्षसि पर्यन्तं सहस्रन्तान्तवं स्मृतम्  ३१९
कुशग्रन्थिसहस्रन्तु पादान्तं विन्यसेत्ततः
सौवर्णीं राजतीं मालां शतग्रन्थियुतां न्यसेत्  ३२०

मृणालतान्तवं पश्चात्पुष्पमालां ततः परम्
शतमौक्तिकहाराणि नानारत्नमयान्यपि ३२१
उपोष्यैकादशीं तत्र रात्रौ जागरणान्वितः
अभ्यर्च्चयेज्जगन्नाथं गन्धपुष्पफलादिभिः ३२२
नीत्वा रात्रिं नर्तनाद्यैः प्रभाते विमले नदीम्
गत्वा स्नात्वा च विधिना तर्पयित्वेशमर्चयेत् ३२३
सर्वैश्च वैष्णवैः सूक्तैर्मध्वाज्यतिलपायसैः
हुत्वा दत्त्वा दशार्णेन सहस्रं जुहुयात्ततः ३२४
पश्चादारोपयेद्विष्णोः पवित्राणि शुभानि वै
पवस्व सोम इति च जपन् सूक्तं सुपावनम् ३२५
निवेदयेत्पवित्राणि तथा विष्णोर्यथाक्रमात्
मन्दिरं कुशयोक्त्रेण वेष्टयन् परमात्मनः ३२६
वितानपुष्पमालाद्य रलङ्कृत्य च सर्वतः
सहस्रं द्वादशार्णेन भक्त्या पुष्पाञ्जलिं न्यसेत् ३२७
अथोपनिषदुक्तानि पञ्चसूक्तान्यनुक्रमात्
त्वयाहन् पीतमिज्यादि जपन् पुष्पाञ्जलि ततः ३२८
ब्राह्मणान् भोजयेत्पश्चात्स्वयं कुर्वीत पारणम्
शक्त्या वा चोत्सवं कुर्य्यात्त्रिरात्रं वैष्णवोत्तमः ३२९
प्रत्यब्दमेवं कुर्वीत पवित्रारोपणं हरेः
क्रतुकोटिसहस्रस्य फलं प्राप्नोत्यसंशयः ३३०
तत्र दुर्भिक्षरोगादिभयं नास्ति कदाचन
संप्राप्ते कार्तिके मासे सायाह्ने पूजयेद्धरिम् ३३१
हृद्यैः पुष्पैश्च जातीभिः कोमलैस्तुलसीदलैः
अर्चयेद्विष्णुं गायत्र्याऽनुवाकैर्वैष्णवैरपि ३३२
पावमान्यैश्च तन्मासं भक्त्या पुष्पाञ्जलिं न्यसेत्
अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा ३३३

अष्टाविंशतिं वा शक्त्या दद्याद्दीपान् सुपालिकान्
सुवासितेन तैलेन गवाज्येनाथवा हरेः  ३३४
अष्टोत्तरशतं नित्यं तिलहोमं समाचरेत्
मनुना वैष्णवेनापि गायत्र्या विष्णुसंज्ञया  ३३५
हुत्वा पुष्पाञ्जलिं दत्वा ताभ्यामेव तदा विभोः
हविष्यं मोदकं शुद्धं नक्तं भुञ्जीत वाग्यतः  ३३६
तैलं शुक्तं तथा मांसं निष्पावान्माक्षिकं तथा
चणकानपि माषांश्च वर्जयेत्कार्तिकेऽहनि  ३३७
भोजयेद्वैष्णवान्विप्रान् नित्यं दानादिशक्तयः
अन्ते च भोजयेद्विप्रान् दक्षिणाभिश्च तोषयेत्  ३३८
एवं संपूज्य देवेशं कार्तिके क्रतुकोटिभिः
पुण्यं प्राप्यानघो भूत्वा विष्णुलोके महीयते  ३३९
दशमीमिश्रितां त्यक्त्वा वेलायामरुणोदये
उपोष्यैकादशीं शुद्धां द्वादशीं वाऽपि वैष्णवः  ३४०
स्नात्वाऽऽमलक्या नद्यां तु विधानेन हरिं यजेत्
सुगन्धकुसुमैः शुभ्रैरुपचारैश्च सर्वशः  ३४१
रात्रौ जागरणं कुर्यात्पुराणं संहितां पठेत्
जागरेऽस्मिन्नशक्तश्चेद्दर्भानास्तीर्य वैष्णवः  ३४२
पुरतो वासुदेवस्य --- स्वप्यात्समाहितः
ततः प्रभातसमये तुलसीमिश्रितैर्जलैः  ३४३
स्नात्वा सन्तर्प्य देवेशं तुल्यस्या मूलमन्त्रतः
द्वयेन वा विष्णुसूक्तैः कुर्य्यात्पुष्पाञ्जलीस्ततः  ३४४
तथैव जुहुयादाज्यं मन्त्रेणैव शतं ततः
पायसान्नं निवेद्येशे ब्राह्मणान् भोजयेत्ततः  ३४५
ध्यायन् कमलपत्राक्षं स्वयं भुञ्जीत वाग्यतः
अहःशेषं समानीय पुराणं वाचयन्बुधः  ३४६

सायाह्ने समनुप्राप्ते दोलायां पूजयेद्धरिम्
अभ्यर्च्य गन्धपुष्पाद्यैर्भक्ष्यैर्नानाविधैरपि ३४७
ब्राह्मणस्य तु सूक्तैश्च शनैर्दोलां प्रचालयेत्
इतिहासपुराणाभ्यां गीतवाद्यैः प्रबन्धकैः ३४८
एवं संपूजयेद्देवं तस्यां निशि समाहितः
मध्याह्ने पूजयेद्विष्णुं वैष्णवेन समाहितः ३४९
चम्पकैः शतपत्रैश्च करवीरैः सितैरपि
वैष्णवेनैव मन्त्रेण पूजयेत्कमलापतिम् ३५०
नकरीन्द्रेति सूक्तेन दद्यात्पुष्पाञ्जलिं हरेः
मन्त्रेणाष्टोत्तरशतं दद्यात्पुष्पाणि भक्तितः ३५१
तथैव होमं कुर्वीत तिस्त्रौ व्रीहिभिरेव वा
सुदध्यन्नं फलयुतं नैवेद्यं विनिवेदयत् ३५२
दीपैर्नीराजनं कृत्वा वैष्णवान् भोजयेत्ततः
मन्दवारे तु सायाह्ने तावत्सम्यगुपोषितः ३५३
तिलैः स्नात्वा विधानेन सन्तर्प्य च सनातनम्
नृसिंहवपुषं देवं पूजयेत्तद्विधानतः ३५४
मन्त्रराजेन गायत्र्या मूलमन्त्रेण वा यजेत्
अखण्डबिल्वपत्रैश्च जातिकुन्दैश्च यूथिकैः ३५५
छन्नः पञ्चोशना शान्त्याः त्वमग्ने द्युभिरीति च
दद्यात्पुष्पाञ्जलिं भक्त्या मन्त्रेणैव शतं यथा ३५६
आम्यामेबानुवाकाभ्यां प्रत्यृचं जुहुयाद् घृतम्
मन्त्रेणाष्टोत्तरशतं बिल्वपत्रैर्वृतान्वितैः ३५७
वैकुण्ठपार्षदं हुत्वा होमशेषं समापयेत्
मधुशर्करसंयुक्तानपूपान्मोदकांस्तथा ३५८
मण्डकान्विविधान्भक्ष्यान्सूपान्नं मधुमिश्रितम्
सुवासितं पानकञ्च नृसिंहाय समर्पयेत् ३५९

नृत्यं गीतं तथा वाद्यं कुर्वीत पुरतो हरेः
भोजयेच्च ततो विप्रान् नव सप्ताथ पञ्च वा  ३६०
हर्यर्पितहविष्यान्नं भुञ्जीयाद्वाग्यतः स्वयम्
ध्यायेन्नृसिंहं मनसा भूमौ स्वप्याञ्जितेन्द्रियः  ३६१
एवं शनिदिने देवमभ्यर्च्य नरकेसरिम्
सर्वान् कामानवाप्नोति सोऽश्वमेधायुतं लभेत्  ३६२
षष्टिवर्षसहस्त्रं स पूजां प्राप्नोति केशवः
कुलकोटिं समुद्धृत्य वैकुगठपुरमाप्नुयात्  ३६३
प्रायश्चित्तमिदं गुह्यं पातकेषु महत्स्वपि
अपुत्रो लभते पुत्रमधनो धनमाप्नुयात्  ३६४
पक्षे पक्षे पौर्णमास्यामुदितेऽस्मिन्दिवाकरे
स्नात्वा संपूजयेद्विष्णुं वामनं देवमव्ययम्  ३६५
समासीनं महात्मानं तस्मिन् पूर्णेन्दुमगडले
सन्तर्पयेच्छुभजलैः कुसुमाक्षतमिश्रितैः  ३६६
तत्र मूलेन मन्त्रेण पूजयेत्परमेश्वरम्
तुलसीकुन्दकुसुमैरथ पुष्पाञ्जलिं चरेत्  ३६७
त्वं सोम इति सूक्तेन प्रत्यृच कुसुमैर्यजेत्
पश्चाद्धोमं प्रकुर्वीत पायसान्नं सशर्करम्  ३६८
मन्त्रेणाष्टोत्तरशतं सूक्तेन प्रत्यृचं तथा
अग्निसोमानुवाकेन समिद्भिः पिप्पलैर्यजेत्  ३६९
सहस्त्रनामभिः स्तुत्वा नमस्कृत्वा जनार्दनम्
वैष्णवान् भोजयेत्पश्चात्पायसान्नेन शक्तितः  ३७०
स्वयं भुक्त्वा हविः शेषं शयीत नियतेन्द्रियः
एवं संपूज्य देवेशं पौर्णमास्यां जनार्दनम्  ३७१
सर्वपापविनिर्मुक्तो विष्णु सायुज्यमाप्नुयात्
मघायामपि पूर्वाह्णे स्नात्वा कृष्णं जलैर्द्विजः  ३७२

सन्तर्प्य मूलमन्त्रेण तिलमिश्रितवारिभिः
तर्पयित्वा पितृन्देवानर्चयेदच्युतं ततः ३७३
कृष्णैश्च तुलसीपत्रैः केतकैः कमलैरपि
शोणितैः करवीरैश्च जपाकुटजपाटलैः ३७४
अस्य वामेति सूक्तेन दद्यात्पुष्पाञ्जलिं हरेः
मन्त्रेणाष्टोत्तरशतं कृष्णं श्रीतुलसीदलैः ३७५
तथैव जुहुयादग्नौ तिलैः कृष्णैः सकर्शैरैः
आज्येन पौरुषं सूक्तं प्रत्यृचं जुहुयात्ततः ३७६
नारायणानुवाकेन उपस्थाय जनार्दनम्
सुसंयावैः सौहृदैश्च शाल्यन्नं विनिवेदयेत् ३७७
वैष्णवान्भोजयेत्पश्चात्स्वयं भुञ्जीत वाग्यतः
तस्यां रात्रौ जपेन्मन्त्रमयुतं हरिसन्निधौ ३७८
वैष्णवैरनुवाकैश्च दत्त्वा पुष्पाञ्जलिं ततः
पुरतो वासुदेवस्य भूमौ स्वप्यात्कुशोत्तरे ३७९
एवं संपूज्य देवेशं मघायां वैष्णवोत्तमः
उद्धृत्य वंशजान् सर्वान् वैष्णवं पदमाप्नुयात् ३८०
व्यतीपाते तु संप्राप्ते हयग्रीवं जनार्दनम्
पुष्पैश्च करवीरैश्च पुण्डरीकैः समर्च्चयेत् ३८१
योरयीत्यनुवाकेन प्रत्यृचं वै यजेद्बुधः
मन्त्रेण च शतं दत्त्वा पश्चाद्धोमं समाचरेत् ३८२
यवैश्च तण्डुलैर्वाऽपि तिलैः पुष्पैरमापि वा
मन्त्रेणाष्टोत्तरशतं जुहुयाद्वैष्णवोत्तमः ३८३
अभूदेकाद्यष्टसूक्तैः प्रत्यृचं जुहुयाच्चरुम्
शेषं निवेद्य हरये संप्राश्याऽऽचमनं चरेत् ३८४
सहस्त्रशीर्षसूक्तेन उपस्थाय जनार्दनम्
शाल्योदनं सूपयुतं विविधैश्च फलैरपि ३८५

गवाज्येन युतं दत्त्वा दीपैर्नीराजयेत्ततः ३८६
ब्राह्मणान् भोजयेत्पश्चाद्दक्षिणाभिश्च तोषयेत्
हविष्यन्तु स्वयं भुक्त्वा भूमौ स्वप्याज्जितेन्द्रियः ३८७
एवं संपूज्य देवेशं व्यतीपाते सनातनम्
दशवर्षसहस्रस्य पूजायाः फलनाप्नुयात् ३८८
ग्रहणे रविसंक्रान्तौ वराहवपुषं हरिम्
कुमुदैरुज्वलैः पद्मैस्तुलसीभिः कुरन्दकैः ३८९
अर्चयेद्भूधरं देवं तन्मन्त्रेणैव वैष्णवः
दूरादिहेति सूक्तेन दद्यात्पुष्पाञ्जलिं द्विजः ३९०
मन्त्रेण च सहस्रं तु शतं वाऽपि यजेत्तदा
तिलैश्च जुहुयात्तद्वत् सूक्तेन प्रत्यृचं घृतम् ३९१
सूपान्नं कृसरान्नं च भक्ष्यापूपान्घृतप्लुतान्
नैवेद्यं विनिवेद्येशे ब्राह्मणान्भोजयेत्ततः ३९२
एवं संपूज्य देवेशं संक्रान्तौ ग्रहणे हरिम्
कल्पकोटिसहस्राणि विष्णुलोके महीयते ३९३
वैशाखे पूजयेद्रामं काकुत्स्थं पुरुषोत्तमम्
सीतालक्ष्मणसंयुक्तं मध्याह्ने पूजयेद्विभुम् ३९४
पुन्नागकेतकीपद्मैरुत्पलैः करवीरकैः
चाम्पेयैबकुलैः पूजां षडर्णेनैव कारयेत् ३९५
जातये वातिसूक्तेन कुर्यात्पुष्पाञ्जलिं ततः
संक्षेपेण शतश्लोक्यां प्रतिश्लोकं यजेत्ततः ३९६
पुष्पाञ्जलिं सहस्रं तु मन्त्रेणैव यजेत्ततः
त्वमग्न इति सूक्तेन पायसं जुहुयादृचा ३९७
पश्चान्मत्रेणाऽऽज्यहोमो नैवेद्यं पायसं घृतम्
कदलीफलं शर्करां च पानकं च निवेदयेत् ३९८
पञ्च सप्त त्रयो वाऽपि पूजनीया द्विजोत्तमाः

सुहृद्यैरन्नपानाद्यैर्गोहिरण्यादिदक्षिणैः ३९९
हविष्यान्नं स्वयं भुक्त्वा पठेद्रामायणं नरः
एवं संपूज्य विधिवद्राघवं जानकीयुतम् ४००
भुक्त्वा भोगान् मनोरम्यान् विष्णुलोके महीयते
लक्ष्मीनारायणं देवं भार्गवे वासरे निशि ४०१
अखण्डबिल्वपत्रैश्च तुलसीकोमलैर्दलैः
अर्चयेन्मन्त्ररत्नेन वामाङ्कस्थश्रिया सह ४०२
चन्दनं कुङ्कमोपेतङ्कस्तूर्या च समर्चयेत्
श्रीसूक्तपुरुषसूक्ताभ्यां दद्यात्पुष्पाञ्जलिं ततः ४०३
मन्त्रद्वयेन पुष्पाणां सहस्त्रं च निवेदयेत्
त्वमग्न इति सूक्तेन प्रत्यृचं कुसुमान् यजेत् ४०४
अखण्डबिल्वपत्रैर्वा पद्मपत्रैर्घृतेन वा
श्रीसूक्तपुरुषसूक्ताभ्यां प्रत्यृचं जुहुयात्ततः ४०५
अग्निं न वेति सूक्तेन तिलैर्व्रीहिभिरेव वा
मन्त्ररत्नेन जुहुयात्सुगन्धकुसुमैः शतम् ४०६
मण्डकान् क्षीरसंयुक्तान्पायसान्नं सशर्करम्
शाल्यन्नं पृषदाज्यं च भक्त्यास्मै विनिवेदयेत् ४०७
अभ्यर्च्य विप्रमिथुनान् वासोऽलङ्कारभूषणैः
भोजयित्वा यथाशक्त्या पश्चाद्भुञ्जीत वाग्यतः ४०८
मन्वन्तरशतं विष्णुं दुग्धाब्धौ हेमपङ्कजैः
संपूज्य यदवाप्नोति तत्फलं भृगुवासरे ४०९
एवं संपूज्यमानस्तु तस्मिन्नहनि वैष्णवैः
लक्ष्म्या सह हरिः साक्षात्प्रत्यक्षं तत्क्षणाद्भवेत् ४१०
कृष्णाष्टम्यां चतुर्दश्यां सायंसन्ध्यासमागमे
गोपालपुरुषं कृष्णमर्चयेच्छ्रद्धयाऽन्वितः
मल्लिकामालतीकुन्दयूथी कुटजकेतकैः ४११

लोध्रनीपार्जुनैर्नागैः कर्णिकारैः कदम्बकैः
कोविदारैः करवीरैर्बिल्वरास्फोटकैरपि ४१२
दशाक्षरेण मन्त्रेण पूजयेत्पुरुषोत्तमम्
ये त्रिंशतीति सूक्तेन दद्यात्पुष्पाञ्जलिं ततः ४१३
श्रीकृष्णं तुलसीपत्रैः प्रत्यृचं पूजयेद्विभुम्
श्रीकृष्णाय नम इति सूक्तेनाष्टोत्तरं शतम् ४१४
पूजयित्वाऽथ होमन्तु तिलैः कृष्णैर्घृतान्वितैः
प्रत्यृचं वैष्णवैः सूक्तैर्जुहुयात्पुरुषोत्तमम् ४१५
समिद्भिः पिप्पलैश्चापि मन्त्रेणाष्टोत्तरं शतम्
नामभिः केशवाद्यैश्च चरुं पश्चाद्घृतप्लुतम् ४१६
वैष्णव्या चैव गायत्र्या पृषदाज्यं शतं तथा
गुडोदनं सर्पिषाऽक्तं भक्ष्याणि विविधानि च ४१७
क्षीरान्नं शर्करोपेतं नैवेद्यञ्च समर्पयेत्
वैष्णवान्भोजयेत्पश्चात्स्वयं भुञ्जीत वाग्यतः ४१८
एवमभ्यर्च्य गोविन्दं कृष्णाष्टम्यां विधानतः
सर्वपापविनिर्मुक्तो विष्णुसायुज्यमाप्नुयात् ४१९
द्वयोरप्यनयोः श्रीशं कूर्मरूपं समर्च्चयेत्
ससागरां महीं सर्व्वां लभते नात्र संशयः ४२०
अर्चयेन्मूलमन्त्रेण गन्धपुष्पाक्षतादिभिः
अर्च्चयित्वा विधानेन हविष्यं व्यञ्जनैर्युतम् ४२१
सुदीर्घयन्त्रजान्सूपघृतमिश्रान्निवेदयेत्
अहं पूर्वेति सूक्तेन कुर्यात्पुष्पाञ्जलिं ततः ४२२
सहस्रं मूलमन्त्रेण पूजयेत्तुलसीदलैः
तिलमिश्रैश्च पृथुकैर्जुहुयाद्धव्यवाहने ४२३
प्रयद्व इति सूक्ताभ्यां नासदासीत्यनेन च
मन्त्रेणाऽऽज्यं सहस्रन्तु जुहुयाद्वैष्णवोत्तमः ४२४

भोजयेद्वैष्णवान्भक्त्या विशेषेणार्च्चयेद्गुरुम्
कौर्मे तु शतवर्षन्तु समभ्यर्च्य विधानतः ४२५
अत्राप्यर्चनमात्रेण तत्फलं समवाप्नुयात्
मधुशुक्लप्रतिपदि केशवं पूजयेद्द्विजः ४२६
स्नात्वा मध्याह्नसमये करवीरैः सुगन्धिभिः
अग्निमील इत्याद्येन प्रत्यृचं कुसुमैर्यजेत् ४२७
मन्त्ररत्नेन वाऽभ्यर्च्य चरुपायसहोमकृत्
ईले द्यावेति सूक्तेन यदिन्द्राग्नीत्यनेन च ४२८
विष्णुसूक्तैश्च जुहुयाद्गायत्र्या विष्णुसंज्ञया
अपूपान्कटकाकारान्शाल्यन्नं घृतसंयुतम् ४२९
फलैश्च भक्ष्यभोज्यैश्च नैवेद्यं विनिवेदयेत्
भोजयेद्ब्राह्मणान्शक्त्या दक्षिणाभिः प्रपूजयेत् ४३०
साग्रं सम्वत्सरं तत्र सम्यक् संपूजयेद्धरिम्
सर्वान् कामानवाप्नोति हयमेधायुतं लभेत् ४३१
तस्मिन्नवम्यां शुक्ले तु नक्षत्रेऽदितिदैवते
तत्र जातो जगन्नाथो राघवः पुरुषोत्तमः ४३२
तस्मिन्नुपोष्य मध्याह्ने स्नात्वा सन्ध्यां विधानतः
तर्पयित्वा पितृन् देवानर्चयेद्राघवं हरिम् ४३३
षडक्षरेण मन्त्रेण गन्धमाल्यानुलेपनैः
अभ्यर्च्य जगतामीशं जपेन्मन्त्रं समाहितः
शान्तिं शास्त्रं पुराणञ्च नाम्नां विष्णोः सहस्रकम् ४३४
पावमानैर्विष्णुसूक्तैः कुर्यात्पुष्पाञ्जलिं ततः
रामायणशतश्लोक्या दद्यात्पुष्पाणि वैष्णवः ४३५
सशर्करं पायसान्नं कपिलाघृतसंयुतम्
रम्भाफलं पानकञ्च नैवेद्यं विनिवेदयेत् ४३६
पीतानि नागपर्णानि स्निग्धपूगीफलानि च

कर्पूरेण च संयुक्तं ताम्बूलञ्च समर्पयेत् ४३७
दीपान्नीराजयेद्भक्त्या नमस्कृत्य पुनः पुनः
प्रीतये रघुनाथस्य कुर्याद्दानानि शक्तितः ४३८
षडक्षरेण साहस्रं तिलैर्वा पायसेन वा
कमलैर्बिल्वपत्रैर्वा घृतेन जुहुयात्ततः ४३९
अस्य वामेति सूक्तेन समिद्भिः पिप्पलस्य तु
वैकुण्ठपार्षदं हुत्वा होमशेषं समापयेत् ४४०
रात्रौ जागरणं कुर्यात् द्वित्रियामं समर्चयेत्
प्रभाते विमले चापि ततो भरतजन्मनि ४४१
तृतीयेऽहनि मध्याह्ने सौमित्रेर्जन्मवासरे
सानुजं जगतामीशमर्चयेत्पूर्ववद्द्विजः ४४२
पूजां पुष्पाञ्जलिं होमं जपं ब्राह्मणभोजनम्
अविच्छिन्नं तथा कुर्यादग्निहोत्रं त्रिवासरम् ४४३
एवं त्रिरात्रं कुर्वीत राघवाणां विधानतः
महोत्सवं जन्मभेषु प्रत्यब्दं चैत्रमासिके ४४४
चतुर्थेऽह्नि तथा नद्यां कुर्यादवभृथं द्विजः
वैष्णवैरनुवाकैश्च रामनामभिरेव च ४४५
चरितं रघुनाथस्य जपन्नवभृतं चरेत्
देवान् पितॄंश्च सन्तर्प्य गृहं गत्वाऽर्च्चयेत्प्रभुम् ४४६
कुर्यादवभृथेष्टिञ्च चरुणा पायसेन वा
अस्य वामेति सूक्तेन परोमात्रेत्यनेन च ४४७
प्रत्यृचं जुहुयात्पश्चान्मन्त्रेण शतसंख्यया
हुत्वा समाप्य होमन्तु शेषं सम्प्राशयेच्चरुम् ४४८
आचम्य पूजयेद्देवं वैष्णवान् भोजयेत्ततः
स्वयं भुञ्जीत तद्रात्रावधःशायी समाहितः ४४९
एवं द्वादशभिः पूज्यश्चैत्रे नावमिके तथा

षष्टिवर्षसहस्राणि श्वेतद्वीपनिवासिनम् ४५०
संपूज्य यदवाप्नोति तदेवात्र समश्नुते
यज्ञायुतशतं लब्ध्वा विष्णुलोके महीयते ४५१
तस्यैव पौर्णमास्याञ्च शीतांशो रुदये तथा
स्नात्वा संपूजयेद्देवं माधवं रमया सह ४५२
शुद्धजाम्बूनदप्रख्यं कन्दर्पशतसन्निभम्
लक्ष्म्या सह समासीनं विमले हेमपङ्कजे ४५३
चन्दनेन सुगन्धेन करवीराब्जपङ्कजैः
कर्पूरकुङ्कुमोपेतचन्दनेन च पूजयेत् ४५४
तन्मन्त्रमन्त्ररत्नाभ्यां माधवं विधिना यजेत्
मण्डकान् क्षीरसंयुक्तान्शाल्यन्नं घृतसंयुतम् ४५५
कृष्णरम्भाफलैर्जुष्टं नैवेद्यं विनिवेदयेत्
अस जीवत्व इत्यादि षट्सूक्तैः कुसुमैर्यजेत् ४५६
मन्त्रेणाष्टोत्तरशतं कोमलैस्तुलसीदलैः
संपूज्य होमं कुर्वीत साज्येन चरुणा ततः ४५७
विहीभोतोरित्यतेन सूक्तेन प्रत्यृचं द्विजः
कमलैर्बिल्वपत्रैर्वा मन्त्रेणाष्टोत्तरं शतम् ४५८
हुत्वाऽथ पौरुषं सूक्तं श्रीसूक्तं जुहुयाद्द्विजः
सहस्रनामभिः स्तुत्वा वैष्णवान् भोजयेत्ततः ४५९
हुतशेषं स्वयं भुक्त्वा भूमौ स्वप्याज्जितेन्द्रियः
एवं संपूज्य देवेशं माधव्यां मधुसूदनः ४६०
सर्वान् कामानवाप्नोति हरिसायुज्यमाप्नुयात्
वैशाख्यां पौर्णमास्यान्तु मध्याह्ने पुरुषोत्तमम् ४६१
अर्च्चयेद्रक्तकमलैरुत्पलैः पाटलैरपि
ह्रीवेरकरवीरैश्च गायत्र्या विष्णुसंज्ञया ४६२
दध्यन्नं फलसंयुक्तं पायसञ्च निवेदयेत्

प्रत्यृचं चेद्दिवं सूक्तैः प्रत्यृचं जुहुयात्ततः ४६३
सौराष्ट्रे द्रेति सूक्तेन दीपैर्नीराजयेत्ततः
शक्त्या विप्रान्भोजयित्वा पूजयेद्देशिकं तथा ४६४
तस्मिन् सम्पूजितो देवः प्रत्यक्षस्तत्क्षणाद्भवेत्
शयने भोजयेद्विष्णुं पूजयेच्छ्रद्धयाऽन्वितः ४६५
कुशप्रसूनदूर्व्वाग्रपुण्डरीककदम्बकैः
मूलमन्त्रेण श्रीविष्णुं गायत्र्या च समर्च्चयेत् ४६६
सत्येनोत्तमसूक्तेन ऋग्भिः पुष्पाञ्जलिं यजेत्
मन्त्रेणाष्टोत्तरशतं तुलसीपल्लवैस्तथा ४६७
पश्चाद्धोमं प्रकुर्व्वीत विष्णुसूक्तैः सुपायसम्
मन्त्ररत्नेन जुहुयादाज्यमष्टोत्तरं शतम् ४६८
सशर्करं पायसान्नमपूपान्विनिवेदयेत्
विश्वजितेति सूक्तेन कुर्य्यान्नीराजनं ततः ४६९
भोजयेद्वैष्णवान् विप्रान् पूजयेच्च विशेषतः
सर्व्वान् कामानवाप्नोति हयमेधायुतं लभेत् ४७०
प्राजापत्यर्क्षसंयुक्ता नभःकृष्णाष्टमी यदा
नभस्यैव भवेत्सा तु जयन्ती परिकीर्तिता ४७१
तस्यां जातो जगन्नाथः केशवः कंसमर्दनः
तस्मिन्नुपोष्य विधिवत्सर्वपापैः प्रमुच्यते ४७२
अष्टमी रोहिणीयोगो मुहूर्ते वा दिवानिशम्
मुख्यकाल इतिख्यातस्तत्र जातः स्वयं हरिः
मासद्वये यद्यलाभे योगे तस्मिन् दिवा निशि ४७३
नवमी रोहिणीयोगः कर्तव्यो वैष्णवैर्द्विजैः
रात्रियोगस्तु बलवान् तस्यां जातो जनार्दनः ४७४
तिलेन वै भवान्ते च पारणा यत्र चोच्यते
यामत्रयवियुक्तायां प्रातरेव हि पारणा ४७५

पूर्वेद्युर्नियमं कुर्य्याद्दन्तधावनपूर्वकम्
प्रातः स्नात्वा विधानेन पूजयेत्कृष्णमव्ययम् ४७६
षडक्षरेण मन्त्रेण बालकृष्णतनुं हरिम्
सुकृष्णतुलसीपत्रैरर्चयेच्छ्रद्धयाऽन्वितः ४७७
दुग्धं क्षीरं शर्कराञ्च नवनीतं निवेदयेत्
सहस्रमयुतं वाऽपि जपेन्मन्त्रं षडक्षरम् ४७८
गवाज्यं जुहुयाद्वह्नौ कृष्णमन्त्रेण पायसम्
सहस्रं शतवारं वा प्रत्यृचं विष्णु सूक्तकैः ४७९
हुत्वा सुगन्धिपुष्पाणि तैरेव च समर्चयेत्
सहस्रनाम्नां गीतानां पठनं गुरुपूजनम् ४८०
वैष्णवान् भोजयेच्छक्त्या हुतशेषं सकृत्स्वयम्
हुत्वा कुशोत्तरे स्वप्याद्भूमौ नियमवान् शुचिः ४८१
परेऽह्नु पोष्य विधिवत्स्नात्वा नद्यां विधानतः
तर्पयित्वा जगन्नाथं पितृन्देवांश्च तर्पयेत् ४८२
पूर्ववत्पूजयित्वेशं जपहोमादिकं चरेत् ४८३
अवैष्णवं द्विजं तस्मिन्वाङ्मात्रेणापि वार्चयेत्
पुराणादिप्रपाठेन रात्रौ जागरणं चरेत् ४८४
शीतांशावुदिते स्नात्वा शुक्लाम्बरधरः शुचिः
नवो नवो भवतीत्यृचाऽर्घ्यं विनिवेदयेत् ४८५
अर्चयेन्मातुरुत्सङ्गे स्थितं कृष्णं सनातनम्
तुलसीगन्धपुष्पैश्च कस्तूरीचन्द्रचन्दनैः ४८६
षडक्षरेण मन्त्रेण भक्त्या सम्पूजयेद्धरिम्
वसुदेवं नन्दगोपं बलभद्रञ्च रोहिणीम् ४८७
यशोदां च सुभद्रां च मायां दिक्षु प्रपूजयेत्
प्रह्लादादीन् वैष्णवांश्च तथा लोकेश्वरानपि ४८८
धूपं दीपञ्च नैवेद्यं ताम्बूलञ्च समर्पयेत्

अनूनमिति सूक्तेन भक्त्या नीराजनं तथा ४८९
शन्न इत्यादिसूक्तैश्च दद्यात्पुष्पाणि वैष्णवः
दशाक्षरेण मन्त्रेण पूजयेत्पुरुषोत्तमम् ४९०
सहस्रनामभिः स्तुत्वा शय्यायां विनिवेशयेत्
गीतं नृत्यञ्च वाद्यञ्च यथा शक्त्या च कारयेत् ४९१
ततः प्रभातसमये सन्ध्यामन्वास्य वैष्णवः
दशाक्षरेण मन्त्रेण तुलसीचन्दनादिभिः ४९२
सम्पूज्य वैष्णवैः सूक्तैः कुर्य्यात् पुष्पाञ्जलिं ततः
मन्त्रेण जुहुयादाज्यं सहस्रं हव्यवाहने ४९३
ममाग्र इति सूक्ताभ्यां जुहुयात्पायसं ततः
परोमात्रेति सूक्तेन चरुं तिलविमिश्रितम् ४९४
सर्वैश्च भगवन्मन्त्रैरेकैकामाहुतिं यजेत्
नामभिः केशवाद्यैश्च तथा सङ्कर्षणादिभिः ४९५
वैकुण्ठपार्षदं हुत्वा होमशेषं समापयेत्
ततो मङ्गलवादित्रैर्यानैर्योक्त्रैश्च चामरैः ४९६
लाजैर्हरिद्राचूर्णैश्च गन्धैः पुष्पैः सुगन्धिभिः
मुदा बिकीरयन् सर्वे बालवृद्धाश्च मध्यमाः ४९७
नार्य्यश्च रमणैः सार्द्धं सुवासिन्यश्च योषितः
आरोप्य शिविकायान्तु देवकीनन्दनं हरिम् ४९८
अकर्दमां नदीं रम्यां तडागं वा मनोरहम्
गच्छेयुर्ग्राहशैवालजलौकादिविवर्जितम् ४९९
कुर्य्यादवभृथं तत्र पावमान्यैः पवित्रकैः
विष्णुसूक्तैश्च सुस्नात्वा देवान्पितृंश्च तर्पयेत् ५००
विचित्राणि च भक्ष्याणि दद्यात्तत्र शुभान्वितः
गृहं गत्वा तथैवेशं पूर्ववत्पूजयेद्द्विजः ५०१
भोजयित्वा ततो विप्रान् दक्षिणाभिश्च तोषयेत्

हिरण्यवस्त्राभरणैराचार्यं पूजयेत्तु सः ५०२
स्वयञ्च पारणां कुर्य्यात्पुत्रपौत्रसमन्वितः
सायाह्ने समनुप्राप्ते दोलायामर्च्चयेद्धरिम् ५०३
चतुः स्तम्भां चतुर्धामवितानाद्यैरलङ्कृताम्
धूपैर्दीपैश्चैव रम्यां दोलां सम्पूजयेद्द्विजः ५०४
स्तम्भेषु वेदान् मन्त्रांश्च धामस्वभ्यर्च्य कच्छपम्
पादेष्वाशागजान् पीठे सप्तच्छन्दांसि चाऽऽस्तरे ५०५
प्रणवञ्चाऽऽतपत्रे तु शेषं केतौ खगेश्वरम्
इतिहासपुराणानि सर्वतः परिपूजयेत् ५०६
तस्यां निवेश्य दोलायां वासुदेवं श्रियः पतिम्
उपचारैरर्चयित्वा शनैर्दोलाञ्च दोलयेत् ५०७
वेदाद्यैर्ब्रह्मणस्पत्यैः सूक्तैरङ्गैर्द्विजोत्तमः
सामगानैः प्रबन्धैश्च गायन्कृष्णं जगद्गुरुम् ५०८
सुवासिन्यो दोलयित्वा वैष्णवान्पूजयेत्ततः
एवं संपूज्य देवेशं पापैर्मुक्तो हरिं व्रजेत् ५०९
दोलायां दर्शनं विष्णोर्महापातकनाशमम्
कोटियागानुजं पुण्यं लभते नात्र संशयः ५१०
शिवब्रह्मादयो देवा नारदाद्या महर्षयः
दोलायां दर्शनार्थं वै प्रयान्त्यनुचरैः सह ५११
गन्धर्वाप्सरसः सर्वा विमानस्थाः सकिन्नराः
गायन्ति सामगानैश्च दोलायमर्चितं हरिम् ५१२
गवाज्यसंयुतैर्दीपैर्भक्त्या नीराजनं चरेत्
मरुत्व इन्द्रसूक्तेन मङ्गलाशीर्भिरेव च ५१३
ताम्बूलफलपुष्पाद्यैर्वैष्णवान्भोजयेत्ततः
आशिषोवाचनं कृत्वा नमस्कृत्वा विसर्जयेत् ५१४
एवं संपूज्य देवेशं जयन्त्यां मधुसूदनम्

सर्वां ल्लोकान् जपेत्त्वाशु याति विष्णोः परं पदम्  ५१५
मासि भाद्रपदे शुक्ले द्वादश्यां विष्णुदैवते
आदित्यामुदभूद्विष्णुरुपेन्द्रो वामनोऽव्ययः  ५१६
तस्यां स्नानोपवासाद्यमक्षय्यं परिकीर्तितम्
श्रीकृष्णजन्मवत्सर्वं कुर्यादत्रापि वैष्णवः  ५१७
सर्वान्कामानवाप्नोति विष्णुसायुज्यमाप्नुयात्  ५१८
माघमासे तु सप्तम्या मुदिते चैव भास्करे
स्नात्वा नद्यां विधानेन पूजयेत्पुरुषोत्तमम्  ५१९
रक्तैश्च करवीरैश्च कुमुदेन्दीवरादिभिः
मन्त्ररत्नेनार्चयित्वा पायसान्नं निवेदयेत्  ५२०
यतश्च गोपा इत्यादि दश सूक्तान्यनुक्रमात्
पुष्पाणि दद्याद्भक्त्या वै प्रत्यृचं वैष्णवोत्तमः  ५२१
सहस्रं शतवारं वा मन्त्रेणापि यजेत्ततः
पश्चाद्धोमं प्रकुर्वीत तिलैः कृष्णैः सशर्करैः  ५२२
वैष्णवैरनुवाकैश्च मन्त्ररत्नेन मन्त्रवित्
वैकुण्ठपार्षदं हुत्वा शेषं कर्म्म समाचरेत्  ५२३
नीराजनं ततो दद्यादयं गौरित्यनेन तु
इति वा इति सूक्तेन उपस्थाय जनार्दनम्  ५२४
सहस्रनामभिः स्तुत्वा वैष्णवान् भोजयेत्ततः
गुरुं सम्पूजयेद्भक्त्या भुञ्जीत तद्धविः सकृत्  ५२५
अधःशायी ब्रह्मचारी जपेद्रात्रौ समाहितः
एवं सम्पूज्य देवेशं तस्मिन्नहनि वैष्णवः  ५२६
त्रिकोटिकुलमुद्धृत्य वैष्णवं पदमाप्नुयात्
द्वादश्यामपि तस्यां वै यज्ञवाराहमच्युतम्  ५२७
वैष्णव्या चैव गायत्र्या पूजयेत्प्रयतात्मवान्
महिषाख्यं घृताक्तं वै धूपं दद्यात्प्रयत्नतः  ५२८

दद्यादष्टाङ्गदीपं च गवाज्येन च वैष्णवः
सशर्कराज्यं सूपान्नं मोदकान्कृसरं तथा ५२९
इक्षुदण्डानि रम्याणि फलानि च निवेदयेत्
प्र ते महीति सूक्तेन दद्यात् पुष्पाणि भक्तिमान् ५३०
सर्वैश्च वैष्णवैः सूक्तैश्चरुणा पायसेन वा
मधुसूक्तेन होतव्यं गायत्र्या विष्णुसंज्ञया ५३१
आज्येन वैष्णवैर्मन्त्रैः त्रिशतं त्रिभिरेव तु
वैकुण्ठपार्षदं हुत्वा होमशेषं समापयेत् ५३२
भोजयेद्ब्राह्मणान् भक्त्या गुरुं चापि प्रपूजयेत्
सर्वयज्ञेषु यत्पुण्यं सर्वदानेषु यत्फलम् ५३३
तत्फलं लभते मर्त्यो विष्णुसायुज्यमाप्नुयात्
कोदण्डस्थे दिनकरे तस्मिन्मासि निरन्तरम् ५३४
अरुणोदयवेलायां प्रातः स्नानं समाचरेत्
तर्पयित्वा विधानेन कृतकृत्यः समाहितः ५३५
नारायणं जगन्नाथमर्च्चयेद्विधिवद्द्विजः
पौरुषेण विधानेन मूलमन्त्रेण वा यजेत् ५३६
शतपत्रैश्च जातीभिस्तुलसीबिल्वपुष्करैः
गन्धैर्धूपैश्च दीपैश्च नैवेद्यैर्विविधैरपि ५३७
पायसान्नं शर्करान्नं मुद्गान्नं सघृतं हविः
सुवासितञ्च दध्यन्नमपूपान् मधुमिश्रितान् ५३८
मोदकान्पृथुकान्लाजान्शष्कुली चणकानपि
विविधानि च भक्ष्याणि फलानि च निवेदयेत् ५३९
वेदपारायणेनैव मासमेकं निरन्तरम्
ऋचां दशसहस्राणि ऋचां पञ्चशतानि च ५४०
ऋचामशीतिपादैश्च पारायणं प्रकीर्तितम्
वेदपारायणेनैव प्रत्यृचं कुसुमान्यजेत् ५४१

रात्रौ होमं प्रकुर्व्वीत तिलैर्व्रीहिभिरेव वा
सर्ववेदेष्वशक्तस्तु होमकर्मणि वैष्णवः ५४२
वैष्णवैरनुवाकैर्वा प्रत्यहं जुहुयाद्बुधः
यजुषाऽपि तथा साम्नां शक्त्या पुष्पाञ्जलिं चरेत् ५४३
अशक्तो यस्तु वेदेन प्रतिवासरमच्युतम्
मूलमन्त्रेण साहस्रं दद्यात्पुष्पाञ्जलिं द्विजः ५४४
तेनैव जुहुयाद्भक्त्या सहस्रं वह्निमण्डले
अथवा रघुनाथस्य चारित्रेण महात्मनः ५४५
प्रतिश्लोकेन पुष्पाणि दद्यान्मासं निरन्तरम्
अधःशायी ब्रह्मचारी सकृद्भोजी भवेद्द्विजः ५४६
मासान्ते तु विशेषेण पूजयेद्वैष्णवान् द्विजान्
एवमभ्यर्च्य गोविन्दम् धनुर्मासे निरन्तरम् ५४७
दिने दिने वैष्णवेष्ट्या फलं प्राप्नोत्यसंशयः
यं यं कामयते चित्ते तं तमाप्नोति पुरुषः ५४८
महद्भिः पातकैर्मुक्तो विष्णुलोके महीयते
ततोमास्युदिते भानौ मासमेकं निरन्तरम् ५४९
स्नात्वा नद्यां तडागे वा तर्पयेत्पतिमच्युतम्
अर्चयेन्माधवं नित्यं तन्मत्रेणैव तत्र वै ५५०
मन्त्ररत्नेन वा नित्यं माधवीचूतचम्पकैः
मण्डपानि विचित्राणि शर्कराज्ययुतानि च ५५१
शाल्यन्नं दधिसंयुक्तं मोदकांश्च निवेदयेत्
वैष्णवैः पावमानैश्च कुर्यात्पुष्पाञ्जलिं ततः ५५२
तिलैश्च जुहुयाद्वह्नौ मधुशर्करमिश्रितैः
प्रत्यृचं पुरुषसूक्तेन श्रीसूक्तेनापि वैष्णवः ५५३
सहस्रं मूलमन्त्रेण तन्मन्त्रेणापि वै द्विजः
सहस्रं वा शतं वाऽपि शक्त्या च जुहुयाद्बुधः ५५४

यज्ञे यज्ञमिति ऋचा दीपान्नीराजयेत्ततः
रात्रौ दोलार्चनं कुर्याद्वैष्णवैर्द्विजसत्तमैः ५५५
मासान्ते भोजयेद्विप्रान्वासोऽलङ्कारभूषणैः
एवं सम्पूजिते तस्मिन् प्रसन्नोऽभूज्जनार्दनः ५५६
ददाति स्वपदं दिव्यं योगिगम्यं सनातनम्
फाल्गुन्यां पौर्णमास्यां वै उदिते च निशाकरे ५५७
उपोष्य विधिवद्भक्तिं पूजयेद्वैष्णवोत्तमः
तिलैश्च करवीरैश्च कर्णिकारैश्च पाटलैः ५५८
कुन्दसहस्रकुसुमैर्यजेत्तं कमलापतिम्
विष्णुसूक्तैः प्रत्यृचं च चरुणाऽज्येन मन्त्रतः ५५९
ब्रह्मा देवानामनेन दीपान्नीराजयेत्ततः
प्रसन्नो नित्यमनेन उपस्थाय सनातनम्
वैष्णवान्भोजयेच्छक्त्या भुञ्जीयाद्वाग्यतः स्वयम् ५६०
एवं सम्पूज्य देवेशं तस्यां रात्रौ सनातनम्
षष्टिवर्षसहस्रस्य पूजामाप्नोत्यसंशयः ५६१
एवं सम्पूजयेद्विष्णुं निमित्तेषु विशेषतः
यथाकालं यथावर्णं यथाशक्त्या यथाबलम् ५६२
यथोक्तपुष्पालाभे तु तुलस्या वै समर्च्चयेत्
नैवेद्यस्याप्यलाभे तु हविष्यं वा निवेदयेत् ५६३
सूक्तानि वैष्णवान्येव सूक्तालाभे यथा जपेत्
एकेन वा पौरुषेण सूक्तेन जुहुयात्तथा ५६४
सर्वत्राऽज्यं प्रशस्तं स्याद्धोमद्रव्याद्यलाभतः
मन्त्रालाभे मूलमन्त्रं सर्वतन्त्रेषु यो जयेत् ५६५
उपस्थानन्तु सर्वत्र तद्विष्णोरिति वा ऋचा
नीराजनन्तु सर्वत्र श्रिये जातेत्यनेन वा ५६६
तत्तत्कालोचितं सर्वं मनसा वाऽपि पूजयेत्

तुलसीमिश्रितं तोयं भक्त्या वाऽपि समर्पयेत्  ५६७
सर्वेष्वेषु निमित्तेषु महाभागवतोत्तमान्
सम्पूज्य परिपूर्णत्वमाप्नोत्यत्र न संशयः  ५६८
इति वृद्धहारीतस्मृतौ विशिष्टपरमधर्मशास्त्रे भगवन्नित्यनैमित्तिक-
समाराधनविधिर्नाम पञ्चमोऽध्यायः

## षष्ठोऽध्यायः

### अथ महापापादिप्रायश्चित्तप्रकरणविधौ
### प्रथमं भगवतः यात्रोत्सववर्णनम्

हारीत उवाच
महोत्सवविधिं कुर्याद्देवस्य परमातमनः  १
ग्रामार्चायाः प्रकुर्वीत यथोक्तविधिना नृप
यात्रोत्सवे कृते विष्णोः श्रुतिस्मृत्युक्तमार्गतः  २
अनावृष्ट्यग्निदुर्भिक्षभयं नास्त्यत्र किञ्चन
वारिजं वातजं वाऽग्निसर्पविद्युद्द्विषत्कृतम्  ३
महारोगग्रहैश्चैवं यद्भयं ग्रामवासिनाम्
कृते महोत्सवे तत्र भयं नास्ति न संशयः  ४
तस्य दासा भविष्यन्ति नानाजनपदेश्वराः
सार्वभौमो भवेद्राजा भक्त्या कृत्वा महोत्सवम्  ५
नवाह्निकं च सप्ताहं पञ्चाहं प्रत्यहं तथा
सम्वत्सरे ऋतौ मासि पक्षेत्कुर्यात्क्रमेण तु  ६
तस्मिन्नादौ शुभदिने स्वस्तिवाचनपूर्वकम्
अङ्कुरार्पणमादौ तु गरुत्मत्केतुमुच्छ्रयेत्  ७
याश्च षडित्योषधयः केतुको वेद इत्यपि
अश्वत्थाख्यशमीगर्भशुभामरणिमाहरेत्  ८
निर्मथितेति सूक्तेन तथैवासीदमीति च

आभ्यां च प्रत्यृचं तस्मिन्निध्माधानादि पूर्ववत् ९
चर्वाज्यैरथमन्नीति उपस्थायार्चयेत्तथा
तदाग्निं संग्रहेत्तावदुत्सवः परिपूर्यते १०
दीक्षितः स भवेत्तावदाचार्यो विजितेन्द्रियः
वेदवेदाङ्गविच्छ्रौतस्मार्तकर्मविधानवत् ११
महाभागवतो विप्रस्तान्त्रिकः सर्वकर्मसु
लौकिके वा प्रकुर्वीत मथिताग्निर्न चेद्यदि १२
आभ्यामेव च सूक्ताभ्यामग्नौ देवं यजेद्बुधः
प्रातः स्मार्तविधानेन धौतवस्त्रोर्ध्वपुण्ड्रधृत् १३
ऋत्विग्भिर्ब्राह्मणैर्दान्तैर्यागभूमिं विशेद्गुरुः
देवालयस्य मध्ये तु वेदिं रम्यां प्रकल्पयेत् १४
अङ्कुरार्पणपात्रैश्च भद्रकुम्भैरलङ्कृताम्
वितानकुसुमाद्युक्तां कृत्वा तत्र सुखासने १५
महोत्सवार्हं बिम्बं च निवेश्यास्मिन् प्रपूजयेत्
श्रीभूनिलादिसंयुक्तं नित्यैः परिजनैर्वृतम् १६
मन्त्ररत्नविधानेन पूजयित्वा जगद्गुरुम्
इमे विप्रस्येत्यादिभिस्त्रिभिः सूक्तैश्च पूजयेत् १७
सुरभीणि च पुष्पाणि प्रत्यृचं विनिवेदयेत्
चतुर्दिक्षु च चत्वारो ब्राह्मणा मन्त्रवित्तमाः १८
वाराहं नारसिंहं च वामनं राघवं मनुम्
ईशान्यादिषु चत्वारो विष्णुमन्त्रान्विदिक्षु च १९
वेद्या दक्षिणतः कुण्डं लक्षणाढ्यं च तत्र तु
हुताशनं प्रतिष्ठाप्य इध्माधानानिकं चरेत् २०
सर्वैश्च वैष्णवैः सूक्तैश्चरुं तिलविमिश्रितम्
प्रत्यृचं जुहुयाद्वह्नौ मध्वाज्यगुडमिश्रितम् २१
आज्यं श्रीभूमिसूक्ताभ्यां त्वं सोम इति पायसम्

पूर्वोक्तैर्वैष्णवैर्मन्त्रैस्तिलैर्व्रीहिभिरेव वा २२
प्रत्येकं जुहुयात्पश्चादष्टोत्तरशतं क्रमात्
वैकुण्ठपार्षदं हुत्वा होमशेषं समापयेत् २३
सुदध्यन्नं फलयुतं पानकञ्च निवेदयेत्
ताम्बूलञ्च समर्प्याथ ऋत्विजश्चापि पूजयेत् २४
ततः स्यन्दनमानीय पताकाच्छत्रसंयुतम्
श्वेतैः सलक्षणैरूह्ययानमश्वैः प्रकल्पितैः २५
वस्त्रपुष्पमणिस्वर्णभूषितं तत्र चित्रितम्
तस्मिन् मृदुतरश्लक्ष्णपर्यङ्कं स्थाप्य देशिकः २६
तस्मिन्निवेश्य देवेशं देवीभ्यां सहितं हरिम्
अर्च्चयेद्गन्धपुष्पाद्यैर्धूपदीपादिभिस्तथा २७
रथचक्रेषु वेदांश्च धर्मादीनपि पूजयेत्
आधारशक्तिमाधारे ईषादण्डे पुराणकम् २८
छन्दांसि कूवरे सप्त पर्यङ्के भुजगाधिपम्
हयेषु चतुरो मन्त्रान् योक्त्रेष्वङ्गानि षट् च वै २९
ध्वजे पताकराजानं छत्रेऽनन्तं स्वराणि तु
तालवृन्ते चामरे च अक्षराणि च पूजयेत् ३०
अभ्यर्च्यैवं रथं दिव्यं पश्चात्संपूजयेद्धरिम्
दिक्पालावरणांश्चैव मर्चयेद्दिक्षु सर्वतः ३१
जीमूतस्येति सूक्तेन तत्र पुष्पाञ्जलिं चरेत्
मरुत्वानिन्द्रेति सूक्तेन कृत्वा नीराजनं ततः ३२
वनस्पतीति सूक्तेन वादयेत्पटहादिकम्
गीतैर्नृत्यैश्च वादित्रैः पुण्यस्तोत्रैर्मनोहरैः ३३
हयैर्गजैः स्यन्दनैश्च परितस्तर्पयेत्प्रभुम्
ऋत्विजः पुरतो वेदानङ्गानि च जपेत्तदा ३४
गायेत्सामानि भक्त्या वै पुरतः पार्श्वतो हरेः

कुङ्कुमैः कुसुमैर्लाजैर्विकिरन्वै समन्ततः ३५
स्वलङ्कृतेषु विधिषु पर्यटन्सेवयेत्प्रभुम्
गृहद्वारेषु मार्गेषु भक्ष्यैरिक्षुभिरेव च ३६
कुसुमैर्धूपदीपैश्च ताम्बूलैश्चापि सेवयेत्
एवं निषेव्य देवेशं पुनर्गेहं निवेशयेत् ३७
तमभि प्रगायतेति जपन्सूक्तं निवेशयेत्
प्रसन्नाजमित्यनेन दीपान्नीराजयेत्ततः ३८
पीठे निवेश्य देवेशमुपचारान्समर्पयेत्
वयमुपेत्य ध्यायेम आशिषो वाचनं चरेत् ३९
अनेन विधिना कुर्यादुत्सवं प्रतिवासरम्
जपैर्होमैस्तथा दानैर्विप्राणां भोजनैरपि ४०
समाप्ते चोत्सवे विष्णोः कुर्यादवभृथं शुभम्
नदीं खातं तडागं वा देवेन सहितो व्रजेत् ४१
स्यन्दनादिषु यानेषु स्थिता नार्यः स्वलङ्कृताः
पुरुषाश्च हरिद्राश्च चूर्णादीन् विकिरन्मिथः ४२
कुर्यादवभृथं तत्र विशिष्टैर्ब्राह्मणैः सह
वासुदेवोत्सवे स्नानमश्वमेधफलं लभेत् ४३
स्नात्वा सन्तर्प्य देवादीन् प्रविश्य हरिमन्दिरम्
यजेतावभृथेष्टिञ्च अस्य वामेति सूक्ततः ४४
चरुमाज्यं तिलैर्वापि अनुवाकैश्च वैष्णवैः
एवं हुत्वावभृथेष्टिं वै वैष्णवान् भोजयेत्ततः ४५
गुरुञ्च ऋत्विजश्चैव पूजयेद्भक्तितस्ततः
पिबासोमेत्यध्यायेन कुर्यात्स्वस्त्ययनं हरेः ४६
इच्छन्ति त्वेत्य ध्यानेन प्रत्यृचञ्च द्वयेन च
अष्टोत्तरशतं जुहुयात्कुसुमैरेव वैष्णवः ४७
हिरण्यगर्भसूक्तेन तथैवाऽऽज्यं द्विजोत्तमः

पुनरेव तु होतव्यं हुत्वा वैकुण्ठपार्षदम् ४८
होमशेषं समाप्याथ वैष्णवान् भोजयेदपि
सर्वयज्ञसमाप्तौ तु पुष्पयागं समाचरेत् ४९
सर्वं सम्पूर्णतामेति परितुष्टो जनार्दनः
एवं महोत्सवं कुर्यात्प्रत्यब्दं परमात्मनः ५०
अथ नित्योत्सवे पूजा होमश्चात्र विधीयते
शिविकायां निवेश्येशं पूजयित्वा विधानतः ५१
तत्र चामरवादित्रभृङ्गारैस्तालवृन्तकैः
दीपिकाभिरनेकाभिर्दूर्वाग्रकुसुमाक्षतैः ५२
फलमोदकहस्ताभिर्नारीभिः समलङ्कृतम्
देवस्याऽऽयतनं रम्यं त्रिः प्रदक्षिणमाचरेत् ५३
तत्तन् मन्त्रान् जपेद्दिक्षु सर्वासु द्विजपुङ्गवाः
बलिञ्च निक्षिपेतासु देवानुद्दिश्य पूर्वतः ५४
प्राचीं विश्वजिते सूक्तमग्ने तव अनन्तरम्
याम्ये परे इमां सन्तु मोषुणस्तु तदन्तरम् ५५
यच्चिद्धेति प्रतीच्यान्तु विहिहोत्येत्यनन्तरम्
स सोम इति सौम्यान्तु कद्रुद्रायेत्यनन्तरम् ५६
प्रजापतिं तथा चोद्ध्र्वमधश्च पृथिवी क्षिपेत्
एवं दिक्षु बलिं दत्त्वा परिणीय जनार्दनम् ५७
स्तुतिभिः पुष्कलाभिश्च भवनं सम्प्रवेशयेत्
पीठे निवेश्य देवेशं पूजयित्वा विधानतः ५८
विहिसोतादि सूक्तेन दद्यात्पुष्पाणि शार्ङ्गिणे
नीराजनं ततो दद्यात् ध्रुवसूक्तेन वैष्णवः ५९
शाययित्वा च शय्यायां दद्यात्पुष्पाणि मन्त्रतः
इमं महेति सूक्ताभ्यां पूजयेत् विष्णुमव्ययम् ६०
सौदर्शनेन मन्त्रेण रक्षां कुर्यात्समन्ततः ६१

एवं नित्योत्सवं कुर्याद्रात्रौ चाहनि सर्वदा
गुरूणामन्त्यदिवसे भगवज्जन्मवासरे ६२
कार्तिक्यां श्रावणे वाऽपि कुर्यादिष्टिञ्च वैष्णवीम्
उपोष्य पूर्वदिवसे दीक्षितः सुसमाहितः ६३
स्वस्तिवाचनपूर्वेण कारयेदङ्कुरार्पणम्
नद्यां स्नात्वा च ऋत्विग्भिश्चतुर्भिर्वेदपारगैः ६४
पौरुषेण विधानेन पूजयेत्पुरुषोत्तमम्
गन्धैर्नानाविधैः पुष्पैर्धूपैर्दीपैर्निवेदनैः ६५
फलैश्च भक्ष्यभोज्यैश्च ताम्बूलाद्यैः प्रपूजयेत्
अर्घ्याद्यैरुपचारैस्तु सूक्तान्ते पूजयेद्धरिम् ६६
अध्यायान्ते मण्डलान्ते नैवेद्यैर्विविधैरपि
पूजयित्वा हरिं भक्त्या वैष्णवान् भोजयेत्तथा ६७
आज्येन चरुणा वाऽपि तिलैः पद्मैरथापि वा
समिद्भिर्बिल्वपत्रैर्वा होमं कुर्वीत वैष्णवः ६८
यज्ञरूपं हरिं ध्यायन्प्रत्यृचं वेदसंहिताम्
होमः समाप्यते यावत्तावद्वै दीक्षितो भवेत् ६९
जुहुयाद्वै गार्हपत्यो सोऽग्निमभ्यर्च्य भूपते
अग्निरक्षणमप्युक्तं यावदिष्टिः समाप्यते ७०
विशिष्टान् वैष्णवान् विप्रान् भोजयेत्प्रतिवासरम्
ऋत्विजश्च पठेत्तावच्चतुर्मन्त्रान् समाहितः ७१
यजेदवभृथेष्टिं च पावमान्यैश्च वैष्णवैः
अन्ते संपूजयेद्विप्रान् वासोऽलङ्कारभूषणैः ७२
ऋत्विजश्च गुरुं चैव पूजयेच्च विशेषतः
एवमिष्टिन्तु यः कुर्याद्वैष्णवीं वैष्णवोत्तमः ७३
क्रतूनां दशकोटीनां फलं प्राप्नोत्यसंशयः
यस्मिन्देशे वैष्णवेष्ट्या पूजितो मधुसूदनः ७४

दुर्भिक्षरोगाग्निभयं तस्मिन् नास्ति न संशयः
अशक्तः सर्वदेवेन कर्त्तुमिष्टिं च वैष्णवीम्  ७५
सर्वैश्च वैष्णवैः सूक्तैर्जुहुयात्प्रत्यृचं हविः
तैरेव पुष्पाञ्जलिं च कुर्यादिष्ट्याः प्रपूर्त्तये  ७६
अथवा मूलमन्त्रं तु लक्षं जप्त्वा हुताशने
अयुतं जुहुयात्तद्वत्पुष्पाणि च सनातने  ७७
इष्टिः संपूर्णतां याति सर्ववेदाः सदक्षिणाः
एवमिष्टिं प्रकुर्वीत प्रत्यब्दं वैष्णवोत्तमः  ७८
तुष्ट्यर्थं वासुदेवस्य वंशस्योज्जीवनाय च
वृध्यर्थमपि लोकस्य देवतानां हिताय च  ७८
पिता वा यदि वा माता भ्राता वाऽन्ये सुहृज्जनाः
यदि पञ्चत्वमापन्नाः कथं कुर्याद्द्विजोत्तमः  ७९
कनिष्ठवर्जमेवात्र वपनं मुनिभिः स्मृतम्
स्नात्वाऽऽचम्य विधानेन कारयेत्पूजनं हरेः
रङ्गबल्यादिभिस्तत्र कुर्यात्सर्वत्र मङ्गलम्  ८०
रोदनं वर्जयित्वैव गोमयेन शुचि स्थलम्
विलिप्य मण्डले तत्र धान्यस्योपर्युलूखलम्  ८१
कलशांस्तु चतुर्दिक्षु तण्डुलोपरि निक्षिपेत्
हिरण्यपञ्चगव्यानि पञ्चत्वक्पल्लवान् न्यसेत्  ८२
वाससा तन्तुना वाऽपि वेष्टयेत्त्रिः प्रदक्षिणम्
उलूखले वासुदेवं कलशेषु क्रमेण च  ८३
प्रद्युम्न मनिरुद्धञ्च सङ्कर्षणमधोक्षजम्
सम्पूज्य गन्धपुष्पाद्यैर्भक्त्या भक्ष्यं निवेदयेत्  ८४
अभ्यर्च्य मुसलं पुष्पैर्गायत्र्या प्रणवेन च
हरिद्रामवहन्यात्तु परोमात्रेति वै जपन्  ८५
भगवन्मन्दिरे विष्णुं हरिद्राद्यैः प्रपूजयेत्

पितुः शरीरं विधिवत्स्नापयेत्कलशोदकैः ८६
तिलैश्च पञ्चगव्यैश्च गायत्र्या वैष्णवेन च
उद्वर्त्यसर्वकर्मणेति स्नापयेत्पितरं सुतः ८७
नारायणानुवाकेन चैवं स्नाप्य ततः पितुः
धौतवस्त्रञ्च सम्वेष्टय भूषणैर्भूषयेत्ततः ८८
गन्धमाल्यैरलङ्कृत्य शुचौ देशे कुशोत्तरे
तिलोपरि विधायैनं वस्त्रं हित्वाऽन्यतः सुतम् ८९
धारयेदुत्तरीये द्वे यावत्कर्म समाप्यते
हुत्वैवोपासनं तस्य आर्द्रयज्ञीयकाष्ठकैः ९०
शिविकां कारयित्वाऽथ वस्त्रमूल्यादिभिः शुभाम्
तस्मिन्निवेश्य तं प्रेतं बाहकान्वरयेत्ततः ९१
स्ववर्णवैष्णवानेव पूजयेत् स्वर्णदक्षिणैः
वहेयुस्तेऽपि भक्त्या तं पठन् विष्णुस्तवान् मुदा ९२
हरिद्रालाजपुष्पाणि विकिरन् वैष्णवा मुदा
वादित्रनृत्यगीताद्यैर्व्रजेयुः कीर्तयन् हरिम्
हुताग्निमग्रतः कृत्वा गच्छेयुस्तस्य बान्धवाः ९३
वाहकानामलाभे तु शकटे गोवृषान्विते
निवेश्य शिविकां रम्यां व्रजेयुर्न्नगराद्बहिः ९४
दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत्
पश्चिमोत्तरपूर्वेषु यथासङ्ख्यं द्विजातयः ९५
प्राग्द्वारं सर्ववर्णानां न निषिद्धं कदाचन
गत्वा शुभतरं देशं रम्यं शुभजलान्वितम् ९६
यज्ञवृक्षसमाकीर्णममेध्यादिविवर्जितम्
खातयेत्तत्र कुण्डं तु निम्नं हस्तत्रयं तदा
द्वाभ्यान्त्रिभिर्वा विस्तारं चतुरायतमेव च ९६
ततः संमार्जनं कृत्वा गोमयान्वितवारिणा

सम्प्रोक्ष्य यज्ञियैः काष्ठैः स्थितिं कुर्याद्यथाविधि ९७
आस्तीर्य दक्षिणामेवमेणाजिनमनुत्तमम्
तस्मिन्नास्तीर्य्य दर्भांस्तु विकीर्य च तिलांस्तथा ९८
तस्मिन्निवेश्य तं देवं घृताक्तं नववस्त्रकम्
ईषद्धौतं नवं श्वेतं सदशं यन्न धारितम् ९९
अहतं तद्विजानीयाद्दैवे पित्र्ये च कर्मणि
परिषिच्य चितिं पश्चादापोऽप्यस्मानितीत्यृचा १००
परिस्तीर्य शुभैर्दर्भैरपसव्येन सव्यतः
उरस्यग्निं निधायास्य पात्रासादनमाचरेत् १०१
प्रोक्षणं चमसाज्येन चरुमिध्मस्त्रुवौ तथा
आसाद्योक्तविधानेन इध्माधानान्तमाचरेत् १०२
स्वगृह्योक्तविधानेन हुत्वा सर्वमशेषतः
पश्चादाज्ययुतं हव्यं जुहुयादुपवीतवान् १०३
सोमानमित्योदनेन प्रत्यृचं तत आज्यतः
तं महेन्द्रेति सूक्तेन हुत्वा प्रत्यृचमेव च १०४
एष इत्यनुवाकाभ्यां पृषदाज्यं यजेत्ततः
सर्वैश्च वैष्णवैर्मन्त्रैः पृथगष्टोत्तरं शतम् १०५
तिलैश्च जुहुयात्पादमष्टाविंशतिमेव वा
एकैकामाहुतिं पश्चाद्वैकुण्ठपार्षदं यजेत् १०६
ब्रह्ममेध इति प्रोक्तं मुनिभिर्ब्रह्मतत्परैः
महाभागवतानां वै कर्तव्यमिदमुत्तमम् १०७
केशवार्पितसर्वाङ्गं शशिभं मङ्गलाद्वयम्
न वृथा दापयेद्विद्वान्ब्रह्ममेधविधिं विना १०८
परमावगतेनापि कर्तव्यं हि द्विजन्मनः
द्रव्यालाभेऽपि होतव्यं यज्ञियैश्च प्रसूनकैः १०९
शूद्रस्यापि विशिष्टस्य परमैकान्तिनस्तथा

स्वाहाकारं च वेदं च हित्वा पुष्पैर्यजेच्छुभैः ११०
तूष्णीमद्भिः परिषिच्य परिस्तीर्य कुशैस्तिलैः
नामभिः केशवाद्यैश्च तथा सङ्कर्षणादिभिः १११
मत्स्यकूर्म्मादिभिश्चैव वेदार्थोक्तप्रबन्धकैः
नमोऽन्तमेव जुहुयात्स्वाहाकारं विवर्जयेत् ११२
अमन्त्रकं प्रकुर्वीत शूद्रः सर्वमशेषतः
दग्ध्वा शरीरं विधिवद्वैष्णवस्य महात्मनः ११३
यन्मरणं तदवभृथमिति मत्वा विचक्षणः
स्नानार्थं पुण्यसलिलं व्रजेद्भागवतैः सह ११४
अनुलिप्य घृतं सर्वं गोमयं वा तिलैः सह
दूर्वाग्रैरक्षतैर्लाजैः स्नानं कुर्वीत मङ्गलम् ११५
स्वगृह्योक्तविधानेन तस्य पुत्राः स्वगोत्रजाः
पिण्डोदकप्रदानाद्यं सर्वमप्यौर्ध्व देहिकम् ११६
निर्वर्त्य विधिना धर्मं सामान्येनावशेषतः
विशिष्टं परमं धर्मं नारायणबलिं ततः ११७
प्रकुर्याद्वैष्णवैः सार्द्धं यथाशास्त्रमतन्द्रितः
निमन्त्रयेत्तु पूर्वेद्युर्ब्राह्मणान्वैष्णवान्शुभान् ११८
चतुर्विंशतिसंख्याकान् महाभागवतोत्तमः
केशवादीन्समुद्दिश्य चतुर्विंशति वैष्णवान् ११९
रात्रौ निमन्त्र्य सम्पूज्य तैः सार्द्धं विजितेन्द्रियः
प्रातरुत्थाय तैर्गत्वा नदीं पुण्यजलान्विताम् १२०
धात्रीफलानुलिप्ताङ्गो निमज्ज्य विमले जले
जपन् वै वैष्णवान् सूक्तान् स्नानं कुर्वीत वै द्विजः १२१
वैकुण्ठतर्पणं कुर्यात्कुसुमैः सतिलाक्षतैः
गृहं गत्वाऽर्चयेद्देवं सर्वावरणसंयुतम् १२२
सुगन्धपुष्पैर्विविधैर्गन्धैर्धूपैश्च दीपकैः

नैवेद्यैर्भक्ष्यभोज्यैश्च फलैर्नीराजनैरपि १२३
अर्चयित्वा विधानेन मूलमन्त्रेण वैष्णवः
पुरतोऽग्निं प्रतिष्ठाप्य इध्माधानं समाचरेत् १२४
चरुं सशर्कराज्यन्तु जुहुयाद्वह्निमण्डले
प्रत्यृचं वैष्णवैः सूक्तैः केशवाद्यैश्च नामभिः १२५
हुत्वाऽथ वैष्णवैर्मन्त्रैः पृथगष्टोत्तरं शतम्
गवाज्येनैव जुहुयाच्चतुर्भिर्वैष्णवोत्तमः १२६
वैकुण्ठपार्षदं हुत्वा होमशेषं समापयेत्
अग्नेरुत्तरभागेन गोमयेनानुलिप्य च १२७
आस्तीर्य दर्भान्प्रागग्रान् चतुर्विंशतिसंख्यया
उदक्प्रावणिकेनैव केशवादिक्रमेण तु १२८
अभ्यर्च्य गन्धपुष्पाद्यैस्तत्तन्मन्त्रैः पृथक्पृथक्
मध्वाज्यतिलमिश्रेण चरुणा पायसेन वा १२९
कुशेषु तेषु दद्यात्तु पिण्डान् तीर्थं विधानतः
स्वाहाकारेण मनसा केशवादीन्क्रमेण वै १३०
दत्त्वा पिण्डान् समभ्यर्च्य गन्धपुष्पाक्षतोदकैः
नित्यमभ्यर्च्य मुक्तेभ्यो वैष्णवेभ्यस्तथैव च १३१
दद्यात्पिण्डत्रयं चैव तेषां दक्षिणतः क्रमात्
विष्णोर्नुकेति सूक्तेन उपस्थानजपं तथा १३२
प्रदक्षिणं नमस्कारं कृत्वा भक्त्याऽथ वैष्णवः
पिण्डांस्तु सलिले दत्त्वा स्नात्वा संपूज्य केशवम् १३३
ब्राह्मणान् भोजयेत्पश्चात्पादप्रक्षालनादिभिः
अर्घ्याद्यैर्गन्धपुष्पाद्यैर्वासोऽलङ्कारभूषणैः १३४
केशवादीन् समुद्दिश्य नित्यान् मुक्तांश्च वैष्णवान्
सम्पूज्य विधिवद्भक्त्या महाभागवतोत्तमान् १३५
पायसं सगुडं साज्यं शुद्धान्नं पानकैः फलैः

सम्भोज्य विप्रानाचान्तान् प्रणिपत्य विसर्जयेत्  १३६
हविष्यञ्च सकृद्भुक्त्वा भूमौ दद्यात्कुशोत्तरे
अयं नारायणबलिर्मुनिभिः सम्प्रकीर्तितः  १३७
स्वर्गस्थानां च सर्वेषां कर्तव्यो वैष्णवोत्तमैः
अलाभेषु तु विप्रेषु वैष्णवेष्वप्यशक्तितः  १३८
सर्वं कृत्वा विधानेन जपहोमार्चनादिकम्
केशवादीन् समुद्दिश्य नित्यान् मुक्तांश्च वैष्णवान्  १३९
एकं वा भोजयेद्विप्रं महाभागवतोत्तमम्
श्रुतिस्मृत्युदितं धर्मं विशिष्टाद्यः समाचरेत्  १४०
वैष्णवं परमं धर्मं महाभागवतोत्तमम्
तस्मिन् सम्पूजिते विप्रे सर्वं सम्पूजितं जगत्  १४१
तस्माद्भागवतश्रेष्ठमेकं वाऽपि सुपूजयेत्
हरिश्च देवताश्चैव पितरश्च महर्षयः  १४२
तस्मिन् सम्पूजिते विप्रे तुष्यन्त्येव न संशयः
अर्चनं मन्त्रपठनं ध्यानं होमश्च वन्दनम्  १४३
मन्त्रार्थचिन्तनं योगो वैष्णवानाञ्च पूजनम्
प्रसादतीर्थसेवा च नवेज्याकर्म उच्यते
पञ्चसंस्कारसम्पन्नो नवेज्याकर्मकारकः  १४४
आकारत्रयसम्पन्नो महाभागवतोत्तमः
श्राद्धानामप्यलाभे तु एकं नारायणं बलिम्  १४५
कुर्वीत परया भक्त्या वैकुण्ठपदमाप्नुयात्
नित्यञ्च प्रतिमासञ्च पित्रोः श्राद्धं विधानतः  १४६
सोदकुम्भं प्रदद्यात्तु यावदिष्टयान्तिकं द्विजः
प्रत्यब्दं पार्वणश्राद्धं मातापित्रोर्मृतेऽहनि  १४७
अर्चयित्वाऽच्युतं भक्त्या पश्चात्कुर्याद्विधानतः
वैष्णवानेव विप्रांस्तु सर्वकर्मसु योजयेत्  १४८

सर्वत्रावैष्णवान्विप्रान्पतितानिव सन्त्यजेत्
शङ्खचक्रविहीनास्तु देवतान्तरपूजकाः
द्वादशीविमुखा विप्राः शैवाश्चावैष्णवाः स्मृताः १४९
अवैष्णवानां संसर्गात्पूजनाद्वन्दनादपि
यजनाध्यापनात्सद्यो वैष्णवत्वाच्च्युतो भवेत् १५०
श्रुतिस्मृत्युदितं धर्मं नातिक्रम्याऽऽचरेत्सदा
स्वशाखोक्तविधानेन वैकुण्ठार्चनपूर्वकम् १५१
कर्तृत्वफलसङ्गित्वे परित्यज्य समाचरेत्
धर्मस्य कर्ता भोक्ता च परमात्मा सनातनः १५२
अधर्मं मनसा वाचा कर्मणाऽपि त्यजेत्सदा
अकृत्यकरणाद्विप्रः कृत्यस्याकरणादपि १५३
अनिग्रहाच्चेन्द्रियाणां सद्यः पतनमृच्छति
अनिशं मनसा यस्तु पापमेवाभिचिंतयेत् १५४
कल्पकोटिसहस्राणि निरयं वै स गच्छति
यस्तु वाचा वदेत्पापमसत्यकथनादिकम् १५५
कल्पायुतसहस्राणि तिर्यग्योनिषु जायते
यस्त्वघं कुरुते नित्यं चापल्यात्करणादिभिः १५६
युगकोटिसहस्राणि विष्ठायां जायते क्रिमिः
दान्तः शुचिस्तपस्वी च सत्यवाग्विजितेन्द्रियः १५७
स सात्त्विकः शमयुतः सुरयोनिषु जायते
यस्त्वर्थकामनिरतः सदा विषयचापलः १५८
स राजसो मनुष्येषु भूयो भूयोऽभिजायते
क्रोधी प्रमादवान् दृप्तो नास्तिको विपरीतवाक् १५९
निद्रालुस्तामसो याति बहुशो मृगपक्षिताम्
महापापञ्चातिपापं पातकञ्चोपपातकम्
प्रासङ्गिकं नरः कृत्वा नरकान् याति दारुणान् १६०

तामिस्त्र मन्धतामिस्त्रं महारौरवरौरवौ
सङ्घातः कालसूत्रञ्च पूयशोणितकर्दमम् १६१
कुम्भीपाकं लोहशङ्कुस्तथा विरामूत्रसागरः
तप्तायसास्त्रयो घोरास्तप्तायसमयं गृहम् १६२
शय्या तप्तायसमयी पानकञ्चाग्निसन्निभम्
शूलमुद्गरसङ्घातं काककङ्कोलदंशितम् १६३
सिंहव्याघ्रमहानागभीकरं सम्प्रतापनम्
क्रिमिराशिमहाज्वालं तथा विरामूत्रभोजनम् १६४
असिपत्रवनं घोरं तपाङ्गारमयी नदी
सञ्जीवनं महाघोरमित्याद्या नरकाः स्मृताः १६५
महापातकजैर्घोरैरुपपातकजैरपि
व्रजतीमान्महाघोरान्दुर्वृत्तैरन्वितश्च यः १६६
प्रायश्चित्तरपैत्येनो यदकार्यकृतं महत्
कामतस्तु कृतं यत्तु मरणात्सिद्धिमृच्छति १६७
ब्रह्महत्या सुरापानं विप्रस्वर्णस्य हारणम्
गुरुदाराभिगमनं तत्संयोगश्च पञ्चमः
संलापात्स्पर्शनाद्वासादेकशय्यासनाशनात् १६८
सौहार्दाद्वीक्षणाद्दानात्तेनैव समतां व्रजेत्
गुर्वाक्षेपस्त्रयीनिन्दा सुहृदाम्वध एव च १६९
ब्रह्महत्यासमं ज्ञेयमधीतस्य च नाशनम्
यागस्थं क्षत्रियं वैश्यं विशिष्टं शूद्रमेव च १७०
शरणागतं स्वामिनं च पितरं भ्रातरं गुरुम्
पुत्रं तपस्विनं शिष्यं भार्यां तेषां च सर्वतः १७१
अन्तर्वत्नीं स्त्रियो गाश्च तथाऽऽत्रेयीं रजस्वलाः
देवताप्रतिमां साध्वीं बालांश्चैव तपस्विनीम् १७२
घातयित्वा समाप्नोति ब्रह्महत्यां न संशयः

जैह्म्यमात्मस्तवं क्रूरं निषिद्धानां च भक्षणम् १७३
रजस्वलामुखास्वादः पञ्चयज्ञादिवर्जनम्
अनृतं कूटसाक्षी च महायन्त्रप्रवर्तनम् १७४
आकर्षणादि षट्कर्म लाक्षालवणविक्रयः
पाषण्डकल्ककुहकवेदवाह्यविधिक्रिया १७५
यक्षराक्षसभूतानामर्चनं वन्दनं तथा
वक्त्रेणैवाम्बुपानञ्च सुरापस्त्रीनिषेवणम् १७६
गवां निष्पीडनं क्षीरं ताम्रस्थं गव्यमेव च
पात्रान्तरगतं यत्तु नारिकेलफलाम्बु च १७७
तालहिन्तालमाधूकफलानां रसमेव च
खरोष्ट्रमानुषीक्षीरं सुरापानसमानि वै १७८
मानकूटं तुलाकूटं निक्षेपहरणानि च
भूरत्ननारीहरणं रसान्नस्तेयमेव च १७९
गुडकार्पासलवणतिलकान्सामिषाम्बु च
काप्यवस्त्रे च हत्वा च लोहानां हरणं तथा १८०
विषाग्निदाहनं चैव सुवर्णस्तेयसम्मितम्
सखी भार्या कुमारी च सगोत्रा शरणागता १८१
साध्वी प्रव्रजिता राज्ञी निक्षिप्ता च रजस्वला
वर्णोत्तमा तथा शिष्या भार्या भ्रातृपितृव्ययोः १८२
मातामही पितामही पितुर्मातुश्च सोदराः
अन्या मातृव्यदुहिता मातुलानी पितृष्वसा १८३
जननी भगिनी धात्री दुहिताऽऽचार्यभामिनी
स्नुषाऽऽचार्यसुता चैव तत्पत्नी सुमहातपाः १८४
मातुः सपत्नी सार्वभौमी दीक्षिता चैव भामिनी
कपिला महिषी धेनुर्देवताप्रतिमा तथा १८५
आसामन्यतमाङ्गच्छेद्गुरुतल्पग उच्यते

महापातकिनामत्र तत्संयोगिन एव च १८६
प्रायश्चित्तं नास्ति तेषां भृग्वग्निपतनं स्मृतम्
हीनवर्णाभिगमनं गर्भघ्नं भर्तृहिंसनम् १८७
विशेषपतनीयानि स्त्रीणां पुंसां च यानि तु
स्त्रीशूद्रविट्क्षत्रवधो गोबालहननं तथा १८८
फलपुष्पद्रुमाणां हि चोषधीनाञ्च हिंसनम्
वापीकूपतडागानां ध्वंसनं ग्रामघातनम् १८९
अभिचारादिकं कर्म्म सस्यध्वंसनमेव च
उद्यानारामहननं प्रपाविध्वंसनं तथा १९०
मातापितृसुतत्यागो दारत्यागस्तथैव च
स्वाध्यायाग्निगुरुत्यागस्तथा धर्म्मस्य विक्रयः १९१
कन्याया विक्रयश्चैव स्वाध्यायमद्यविक्रयः
परस्त्रीगमनञ्चैव परद्रव्यापहारणम् १९२
तथा पुंसोऽभिगमनं पशूनां गमनं तथा
वृषक्षुद्रपशूनाञ्च पुंस्त्वविध्वंसनं तथा १९३
कन्याया दूषणं चैव गवां योनिनिपीडनम्
मानुषाणां पशूनाञ्च नासाद्यङ्गविभेदनम् १९४
ग्रामान्त्यजस्त्रीगमनं विज्ञेयमनुपातकम्
नित्यनैमित्तिकश्राद्धवर्जनं पशुहिंसनम् १९५
मृगपक्षिमहासर्पयादसां हननक्रिया
साधारणस्त्रीगमनं पत्न्यास्ये मैथुनं तथा १९६
पारवित्तं पारदार्यं निन्दितार्थोपजीवनम्
तथैवानाश्रमे वासो देवद्रव्योपजीवनम् १९७
पयोदधितिलानाञ्च विक्रयं लवणक्रयम्
शाकमूलफलस्तेयमतिवद्ध्युपजीवनम् १९८
निमन्त्रितातिक्रमणं दुष्प्रतिग्रहमेव च

ऋणानामप्रदानत्वं सन्ध्याकालातिवर्तनम्  १९९
वृथैवाऽऽत्मपरित्यागः संग्रामेषु पलायिता
दुर्भाजनं दुरालापं स्वधर्म्मस्य च कीर्तनम्  २००
परेषां दोषवचनं परदारनिरीक्षणम्
नास्तिक्यं व्रतलोपश्च स्वाश्रमाचारवर्जनम्  २०१
असच्छास्त्राभिगमनं व्यसनान्यात्मविक्रयः
व्रात्यतात्मार्थवचनमेकैकमुपपातकम्  २०२
इन्धनार्थं द्रुमच्छेदः क्रिमिकीटादिहिंसनम्
भावदुष्टं कालदुष्टं क्रियादुष्टं च भक्षणम्  २०३
मृच्चर्मतृणकाष्ठाम्बुस्तेयमत्यशनं तथा
अनृतं विषयचापल्यं दिवास्वप्नमसत्कथा  २०४
तच्छ्रावणं परान्नं च दिवामैथुनमेव च
रजस्वलां सूतिकां च परस्त्रीमभिदर्शनम्  २०५
उपवासदिने श्राद्धे दिवा पर्वणि मैथुनम्
शूद्रप्रेष्यं हीनसख्यमुच्छिष्टस्पर्शनादिकम्  २०६
स्त्रीभिर्हास्यं कामजल्पं मुक्तकेश्यादिवीक्षणम्
इत्यादयो ये च दोषाः प्रकीर्णाः परिकीर्तिताः
महापापं पातकञ्च अनुपातकमेव च  २०७
उपपापं प्रकीर्णञ्च पञ्चधा तत्र कीर्तितम्
महापातकतुल्यानि पापान्युक्तानि यानि तु  २०८
तानि पातकसंज्ञानि तन्न्यूनमनुपातकम्
उपपापं ततो न्यूनं ततो हीनं प्रकीर्णकम्  २०९
संसर्गस्तु तथा तेषां प्रसङ्गात्सम्प्रकीर्तितम्
क्रमेण वक्ष्यते तेषां प्रायश्चित्तं विशुद्धये  २१०
यो येन सम्वसेत्तेषां तस्यैव व्रतमाचरेत्
संसर्गिणस्तु संसर्गस्तत्संसर्गस्तथैव च  २११

चतुर्थस्य न दोषस्तु पतत्येषु यथाक्रमम्
प्रकीर्णकादिदोषाणां प्रासङ्गिकमविद्यते २१२
स्वल्पत्वात्पतनाभावात्तत्संसर्गान्न दुष्यति
स्नानाच्च शुद्धिर्दोषस्य संसर्गात्पतितं विना २१३
सावित्र्या वाऽपि शुध्येत कर्तुरेव व्रतक्रिया
कृते पापे यस्य पुंसः पश्चात्तापोऽनुजायते २१४
प्रायश्चित्तन्तु तस्यैव कर्तव्यं नेतरस्य तु
जातानुतापस्य भवेत्प्रायश्चित्तं यथोदितम् २१५
नानुतापस्य पुंसस्तु प्रायश्चित्तं न विद्यते
नाश्वमेधफलेनापि नानुतापी विशुद्ध्यते २१६
तस्माज्जातानुतापस्य प्रायश्चित्तं विशुद्ध्यते
चरेदकामतः कृत्वा पतनीयं महत्पुमान् २१७
न कामतश्चरेद्धर्मं भृग्वग्निपतनं विना
यः कामतो महापापं नरः कुर्यात्कथञ्चन २१८
न तस्य शुद्धिर्निर्दिष्टा भृग्वग्निपतनं विना
इत्युक्तं ब्रह्मणा पूर्वं मनुना च महर्षिभिः २१९
पातकेषु च सर्वत्र कामतो द्विगुणं व्रतम्
कामतः पतनीयेषु मरणाच्छुद्धिमृच्छति २२०
हयमेधाय नः शुद्धिः सर्वभौमस्य भूपतेः
कामतस्त्वनुपापेषु लोके न व्यवहार्यता २२१
महत्सु चातिपापेषु प्रदीप्तज्वलनं विशेत्
प्रायश्चित्तैरपैत्येनो यदकामकृतं भवेत् २२२
कामतो व्यवहारस्तु वचनादिह जायते
इति योगेश्वरेणोक्तमुपपापेषु तत्र तत् २२३
तस्मादकामतः पापं प्रायश्चित्तेन शुध्यति
तेषां क्रमेण वक्ष्यामि प्रायश्चित्तं विशुद्धये २२४

शिरः कपालध्वजवान्भिक्षाशी कर्म वेदयन्
ब्रह्महा द्वादशाब्दानि पुण्यतीर्थे समाविशेत्  २२५
प्रयागे सेतुबन्धादिपुण्यक्षेत्रेषु पापकृत्
तत्र वर्षादि विज्ञाप्य स्वस्वकल्पमशेषतः  २२६
तत्रस्थैर्ब्राह्मणैरेवानुज्ञातो व्रतमाचरेत्
चत्वारो ब्राह्मणाः शिष्टाः पर्षदित्यभिधीयते  २२७
तैरुक्तमाचरेद्धर्ममेको वाऽध्यात्मवित्तमः
जटी वल्कलवासाश्च बहिरेव समाविशन्  २२८
स्नानं त्रिषवणं कुर्वन् क्षितिशायी जितेन्द्रियः
एकभुक्तेन नक्तेन फलैरनशनेन च  २२९
समापयेत्कर्मफलं यथाकालं यथाबलम्
राममिन्दीवरश्यामं पौलस्त्यघ्नमकल्मषम्  २३०
ध्यात्वा षडक्षरं मन्त्रं नित्यं तावदहर्निशम्
एवं द्वादशवर्षाणि पुण्यतीर्थे समाचरन्  २३१
मुच्यते ब्रह्महत्यायास्तपसा वीतकल्मषः
चरितव्रत आयाते यवसं गोषु दापयेत्  २३२
तैस्तस्य च सुसंस्काराः कर्तव्या बान्धवैर्जनैः
विप्रमुख्याय गां दत्वा ब्राह्मणान्भोजयेत्ततः  २३३
प्रारम्भव्रतमध्ये तु यदि पञ्चत्वमाप्नुयात्
विशुद्धिस्तस्य विज्ञेया शुभाङ्गतिमवाप्नुयात्  २३४
असंस्कृतस्तु गोषु स्यात्पुनरेव व्रतं चरेत्
अशक्तस्तु व्रते दद्याद्गोसहस्रं द्विजन्मनाम्  २३५
पात्रे धनं वा पर्याप्तं दत्त्वा शुद्धिमवाप्नुयात्
ब्रह्महत्यासमेष्वेवं कामतो व्रतमाचरेत्  २३६
अकामतश्चरेद्धर्मं पापं मनसि चोच्यते
आज्ञापयिताऽनुमन्ताऽनुग्राहकस्तथैव च  २३७

उपेक्षिताऽशक्तिमांश्चेत्पादोनं व्रतमाचरेत्
कामतस्तु चरेत्पूर्णं तत्रापि द्विगुणं गुरौ २३८
अन्तर्वत्न्यां तथाऽऽत्रेय्यां तथैव व्रतमाचरेत्
आचार्ये च वनस्थेन मातापित्रोर्गुरौ तथा २३९
तपस्विनि ब्रह्मविदि द्विगुणं व्रतमाचरेत्
यावत्स्वक्षत्रियं वैश्यं विशिष्टं शूद्रमेव च २४०
कपिलां गर्भिणीङ्गाञ्च हत्वा पूर्णव्रतं चरेत्
अकामतस्तु तेष्वर्धं मुनिभिः सम्प्रकीर्तितम् २४१
विधेः प्राथमिकादस्माद्द्वितीये द्विगुणं चरेत्
तृतीये त्रिगुणं प्रोक्तं चतुर्थे नास्ति निष्कृतिः २४२
चतुर्णामाश्रमाणाञ्च शौचवत्साधनं चरेत्
प्रायश्चित्तान्तरं मध्ये केचिदिच्छन्ति सूरयः २४३
गोब्राह्मणपरित्राणमश्वमेधावभृथं तथा
इयं विशुद्धिरुदिता प्रहृत्या कामतो द्विजान् २४४
अग्निप्रपतनं केचिदिच्छन्ति मुनिसत्तमाः
लोमभ्यः स्वाहेत्यादि मन्त्रैर्हुत्वा पृथक्पृथक् २४५
अवाक्शिराः प्रविश्याग्नौ दग्धः शुद्धो भवेन्नरः
अकामतः सुरां पीत्वा मद्यं वाऽपि द्विजोत्तमः २४६
पूर्ववद्द्वादशाब्दानि चरेद्व्रतमचिह्नितम्
जपित्वा दशसाहस्रं त्रिसन्ध्यासु निरन्तरम् २४७
द्वादशाब्दं मनुं जप्त्वा ततः शुद्धो भवेन्नरः
यानि कानि च पापानि सुरापानसमानि तु २४८
अकामतश्चरेदर्धं कामतः पूर्णमाचरेत्
सर्वत्र पातनीयेषु चरित्वा व्रतमुक्तवत् २४९
पुनः संस्कारमर्हन्ति त्रयश्चैते द्विजातयः
अज्ञानात्तु सुरां पीत्वा रेतोविण्मूत्रमेव च २५०

मानुषीक्षीरपानेन पुनः संस्कारमर्हति
इत्युक्तं मनुना पूर्वमन्यैश्चापि महर्षिभिः २५१
करञ्जं लशुनं शिग्रु मूलकं ग्रामसूकरम्
छत्राकं कुक्कुटाण्डञ्च कालं पिण्याकं लशुनं तथा २५२
गृध्रमुष्ट्रं नृमांसं च खरं तत्तक्रमेव च
माहिषं माकरं मांससंवृक्षं वानरमेव च २५३
निष्पीडितञ्च गोक्षीरमारनालं च मूषकम्
मार्जारं श्वेदवृन्ताकं कुम्भीनिम्बदलं तथा २५४
क्रव्यादञ्च तथा भेकं शृगालं व्याघ्रमेव च
एवमादिनिषिद्धांस्तु भक्षयित्वा तु कामतः २५५
चरेद्व्रतं तथा प्रर्णं पादोनम्पादकामतः
नारिकेलरसं पीत्वा वायुना ताडितं द्विजः २५६
दग्ध्वा तालपलाशम्वा करनिर्मथितं दधि
ताम्रपात्रगतं गव्यं क्षीरं च लवणान्वितम् २५७
कराग्रेणैव यद्दत्तं घृतं लवणमम्बु च
सूतकान्नञ्च शूद्रान्नं कदर्याद्यन्नमेव च २५८
श्वस्पृष्टं सूतिकादृष्टमुदक्यादृष्टमेव च
पाषण्डभण्डचण्डालवृषलीपतिवीक्षितम् २५९
दत्त्वावशिष्टं यक्षाणां भूतानां रक्षसां तथा
उद्धृत्य वामहस्तेन वक्त्रेणैव पिबेदपः २६०
यच्चान्नमाधैकोद्दिष्टमुच्छिष्टमगुरोरपि
हरेरनर्पितं भुक्त्वा न भुक्त्वा देवतार्पितम् २६१
कामतस्तु चरेद्धर्मञ्चरेद्वेदमकामतः
अकामतः सकृज्जग्ध्वा चरेच्चान्द्रायणव्रतम् २६२
म्लेच्छचण्डालपतितपाषण्डानामकामतः
उदक्यासह भुक्त्वा च चरेद्धर्मव्रतं द्विजः २६३

चराडालकूपभाराडस्थं मद्यभाराडस्थमेव च
पीत्वा समाचरेत्पापं कामतोऽर्द्धं समाचरेत् २६४
मद्यगन्धं समाघ्राय कामतो व्रतमाचरेत्
अकामतस्तु निष्ठीव्य चरेदाचमनं द्विजः २६५
अभिमन्त्र्य जलं प्राश्य सावित्र्या च समन्वितम्
वृथा मांसाशनं चैव भावदुष्टादि भक्षणे २६६
चरेत्सान्तपनं कृच्छ्रं चान्द्रायणमथापि वा
कामतस्तु चरेत्पादमभ्यासे पूर्णमाचरेत् २६७
कामतस्तु सुरां पीत्वा सततं चाग्निसन्निभम्
गोमूत्रमम्बु वा पीत्वा मरणाच्छुद्धिमृच्छति २६८
सुरायाः प्रतिषेधस्तु द्विजानामेव कीर्तितः
विशिष्टस्यापि शूद्रस्य केचिदिच्छन्ति सूरयः २६९
अनृतं मद्यमांसञ्च परस्त्रीस्वापहारणम्
विशिष्टस्यापि शूद्रस्य पातित्यं मनुरब्रवीत् २७०
सुरा वै मलमन्नादेः पापाद्वै मलमुच्यते
तस्माद् ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत् २७१
चकाराद्विशिष्टस्य शूद्रास्यापि पूर्ववचनात् यत्तु राजन्यवैश्ययो-
गवाज्यादिमद्यस्याप्रतिषेधस्तन्न मतं स्यात् न च निषिद्धादीनां
सतां मतञ्च । विशिष्ट शूद्रस्यापि मद्यमांसनिषिद्धत्वात् ।
इज्याध्ययनादिश्रौतस्मार्तकर्मार्हस्य । क्षत्रविशिष्टस्यापि
तद्वद्वैश्यस्य च प्रतिषेधात् न तु प्रायश्चित्ताल्पत्वप्रतिपादनपराएयेव
नत्वप्रतिषिद्धपराणि ब्राह्मणस्य मरणान्तिकमुपदिष्टं राजन्यवैश्यवि-
शिष्टशूद्राणाम् पूर्णपादोनार्द्धोनव्रतचर्या उक्ता । सुरायान्तु सर्वेषां
द्विजाणां मरणान्तिकमेव शूद्रस्य गोसहस्रदानं वा परिपूर्णव्रतं वा-
ऽऽचरितव्यम् न तु मरणान्तिकम् ।
अग्निवर्णां सुरां पीत्वा सुरायास्तु द्विजातयः

मरणाच्छुद्धिमृच्छन्ति शूद्रस्तु व्रतमाचरेत्  २७२
राजन्यवैश्यौ तु मद्यं पीत्वा चरेतां व्रतमेव च
शूद्रस्त्वर्थञ्चरेत्तद्वद् ब्राह्मणो मरणाच्छुचिः  २७३
यक्षरक्षः पिशाचान्न मद्यं मांसं सुरासमम्
नात्तव्यमेव विप्रेण भुक्त्वा तु ज्वलनं विशेत्  २७४
मद्यं वाऽपि सुरां वाऽपि यः पिबेद्ब्राह्मणाधमः
अग्निवर्णन्तु गोमूत्रं पिबेदञ्जलिपञ्चकम्  २७५
मरणाच्छुद्धिमाप्नोति जीवेद्यदि विशुध्यति
मद्यस्य प्रतिषिध्यर्थं घृतं क्षीरमथाम्बु वा  २७६
प्राशयित्वाऽग्निवर्णन्तु तद्वत्तां शुद्धिमाप्नुयात्
दत्त्वा सुवर्णं विप्राय गाञ्च दत्त्वा विशुध्यति  २७७
क्षत्रविट्शूद्रजातीनां सुवर्णे तु यथाक्रमम्
पादोनमर्द्धं पादं वा चरेद् व्रतं यथोक्तवत्  २७८
समेष्वर्धं प्रकुर्वीत कामतः पूर्णमाचरेत्
कामतः स्वर्णहारी तु राज्ञे मुसलमर्पयेत्  २७९
स्वकर्म ख्यापयंश्चैव हतो मुक्तोऽपि वा शुचिः
राज्ञा यदि विमुक्तः स्यात्पूर्ववद्व्रतमाचरेत्  २८०
आत्मतुल्यसुवर्णं वा दद्याद्विप्रस्य तुष्टिकृत्
तत्समव्यतिरिक्तेषु पादमेव चरेद् व्रतम्  २८१
चान्द्रायणं पराकं वा कुर्यादल्पेषु सर्वशः
द्रव्यप्रत्यर्पणं कर्तुस्तन्मूल्यद्रव्यमेव वा  २८२
व्रतं समाचरेत्कृत्वा यथा परिषदीरितम्
बलाच्छौर्य्येण वा स्नेहाद्व्यवहारादिनाऽपि वा  २८३
समाहरति यद्द्रव्यं तत्सर्वं स्तेयमुच्यते
देशं कालं वयः शक्तिं पापञ्चावेक्ष्य सर्वतः  २८४
प्रायश्चित्तं प्रदातव्यं धर्मविद्भिर्मनीषिभिः

भगिनीं मातरं पुत्रीं स्नुषामाचार्ययोषितम्  २८५
अकामतः सकृद्गत्वा चरेत्पूर्णव्रतं नरः
पश्चिमाभिमुखां गङ्गां कालिन्द्या सह सङ्गताम्  २८६
प्लक्षप्रस्रवणं पुण्यं द्वारकां सेतुमेव वा
चन्द्रपुष्करणीं वाऽपि वेणी सागरसङ्गमम्  २८७
गोदावर्याः शवर्या वा गत्वा तत्राऽऽचरेद्व्रतम्
पूर्ववत् द्वादशाब्दानि चरेद् व्रतमनुत्तमम्  २८८
कृष्णाय नम इत्येष मन्त्रः सर्वाघनाशनः
इममेव जपन्मन्त्रं ध्यात्वा हृदि सनातनम्  २८९
त्रिसन्ध्यास्वयुतं भक्त्या नित्यं द्वादशवत्सरम्
चान्द्रायणैः पराकैर्वा कृच्छ्रैर्वा शमयेत्समाः  २९०
जीवे क्षीणेऽथवा पुण्यकामी मण्डपपाटलैः
निवसित्वा बहिर्ग्रामात् क्षितिशायी जितेन्द्रियः  २९१
मनः सन्तापकरणमुद्वहेच्छोकमन्ततः
सदा कृष्णं हरिं ध्यायन् जपन्मन्त्रमनुत्तमम्  २९२
द्वादशाब्दाद्विमुच्येत पापादस्मात्तपो बलात्
भगिन्यादिषु योषित्सु यो गच्छेत्कामतो नरः  २९३
प्रतप्तासमतोयेन समाश्लिष्य हुताशने
शयित्वा सुमहद्वह्नौ दग्धः शुद्धिमवाप्नुयात्  २९४
एतासु मतिदुष्टासु कामतो बहुशो व्रजेत्
एवमग्निं विशेद्धीमान् पापं विज्ञाप्य पर्षदि  २९५
अकामतः सकृद् गत्वा चरेद्धर्मव्रतं नरः
अभ्यासे तु चरेत्पूर्णं कामतः सकृदेव च  २९६
कामतोऽभ्यासविषये तत्रापि मरणान्तिकम्
समेष्वर्थं प्रकुर्वीत सकृदेव ह्यकामतः  २९७
कामतस्तु चरेत्पूर्णमभ्यासे मरणान्तिकम्

अकामतो वाऽभ्यासे तु पूर्णमेव व्रतं चरेत् २९८
अन्यास्वपि च नारीषु सकृद्गत्वाऽप्यकामतः
पादमेवाऽऽचरेद्विद्वानभ्यासे त्वर्थमाचरेत् २९९
साधारणासु सर्वासु चरेच्चान्द्रायणव्रतम्
कामतो द्विगुणं तासु अभ्यासे व्रतमाचरेत्
स्वदारास्वास्यगमने पुंसि तिर्यक्षु कामतः ३००
चान्द्रायणं पराकं वा प्राजापत्यमथापि वा
उदक्यां सूतिकां गत्वा चरेत्सान्तपनं व्रतम् ३०१
चान्द्रायणं तथाऽन्यासु कामतो द्विगुणं चरेत्
अष्टम्याञ्च चतुर्दश्यां दिवा पर्वणि मैथुनम् ३०२
कृत्वा सचैलं स्नात्वा च वारुणीभिश्च मार्जयेत्
चण्डालीं पुंश्चलीं म्लेच्छां पाषण्डीं पतितामपि ३०३
रजकीं बुरुडीं व्याधां सर्वा ग्रामान्त्यजाः स्त्रियः
अकामतः सकृद्गत्वा चरेच्चान्द्रायणव्रतम् ३०४
अभ्यासे तु व्रतं पूर्णन्ताभिश्च सह भोजने
कामतस्तु सकृद्गत्वा भुक्त्वा त्वर्थव्रतं चरेत् ३०५
तत्र भूयश्चरेत्पूर्णमभ्यासे मरणान्तिकम्
यो येन सम्वसेदेषान्तत्पापं सोऽपि तत्समः ३०६
संलापस्पर्शनादेव शय्याशनासनादिभिः
तद्वदेवाऽऽचरेत्सर्वं व्रतं द्वादशवार्षिकम् ३०७
अकामतश्चरेद्धर्मं षण्मासात्पादमाचरेत्
मासत्रये द्विवर्षं स्यान्मासमात्रे तु वत्सरम् ३०८
कामतो द्विगुणं तत्र चरेदब्दादिकं व्रतम्
ऊर्द्धन्तु वत्सरात्पूर्णं द्वैगुण्याद्यमतः क्रमात् ३०९
कामतो वत्सरादूर्ध्वं द्विगुणव्रतमाचरेत्
ऊर्ध्वं द्विवर्षात्तस्यापि मरणान्तिकमुच्यते ३१०

यजनाध्यापनाद्दानात्पानाच्च सह भोजनात्
सद्य एव पतत्यस्मिन् पतितेन सहाऽऽचरन्  ३११
तत्राप्यकामतस्त्वर्थं कामतः पूर्णमाचरेत्
षण्मासे वत्सरेऽप्यत्र द्विगुणं त्रिगुणं स्मृतम्  ३१२
ऊर्ध्वे तु निष्कृतिर्न स्याद् भृग्वग्निपतनं विना
द्वितीयस्य तृतीयस्य नेष्यते मरणान्तिकम्  ३१३
अर्द्धं पादं समुद्दिष्टं कामतो द्विगुणं तथा
ब्रह्मकूर्चोपवासेन चतुर्थस्य विनिष्कृतिः  २१४
पञ्चमस्य न दोषः स्यादिति धर्मविदो विदुः
अन्येषामपि संसर्गात्प्रायश्चित्तं प्रकल्पयेत्  ३१५
पतनीयेषु नारीणां मरणान्तिकमुच्यते
अकामतश्चरेद्धर्मव्रतं पृथु यथोदितम्  ३१६
व्यभिचारे तु सर्वत्र कामतो मरणाच्छुचिः
अकामतश्चरेत्पूर्णं प्रातिलोम्यं गता सती  ३१७
अर्द्धमेवाऽऽनुलोम्येषु तथैव भ्रूणहादिषु
यतिश्च ब्रह्मचारी च गत्वा स्त्रियमकामतः  ३१८
गुरुतल्पगमुद्दिष्टं पूर्णमर्थं समाचरेत्
नामतो ब्रह्मचारी तु पूर्णमेवाऽऽचरेद्व्रतम्  ३१९
यतेस्तु मरणाच्छुद्धिः शिश्नः स्यात्कृन्तनेन वा
तयोस्तु रेतः स्खलने कृच्छ्रं चान्द्रायणं चरेत्  ३२०
जप्त्वा सहस्रं गायत्र्या गृहस्थः शुद्धिमाप्नुयात्
द्विसहस्रं वनस्थस्तु जपेद्रेतो निपातने  ३२१
तत्रापि कामतस्तेषां द्विगुणत्रिगुणादिकम्
परिव्राजनकामस्तु नयनोत्पाटनं तथा  ३२२
एवं समाचरेद्धीमान् प्रायश्चित्तमतन्द्रितः
प्रायश्चित्तमकुर्वाणः पापेषु निरतः सदा  ३२३

कल्पायुतशतं गत्वा नरकं प्रतिपद्यते
धृत्वा गोचर्ममात्रन्तु सममेकं निरन्तरम् ३२४
पञ्चगव्यं पिबन् गोघ्नो गुरुगामी विशुध्यति
गोमूत्रेणैव च स्नात्वा पीत्वा चाऽऽचम्य वारिभिः ३२५
विष्णोः सहस्रनामानि जपेन्नित्यं समाहितः
शयीत गोव्रजे रात्रौ गवां हितमनुस्मरन् ३२६
व्याघ्रादिभिर्गृहीतां गां पङ्के निपतितां तथा
च चरेदथवा प्राणान्तदर्थं वै परित्यजेत् ३२७
तेनैव हि विशुद्धः स्यादसम्पूर्णव्रतोऽपि वा
व्रतान्ते गोप्रदो भूत्वा ततः शुद्धिमवाप्नुयात् ३२८
गोस्वामिने च गां दत्त्वा पश्चादेवं व्रतं चरेत्
दद्यात्त्रिरात्रमुपोष्य वृषमेकञ्च गा दश ३२९
योक्त्रे च गृहदाहाद्यैर्बन्धनैर्वा हता यदि
मतिपूर्वेण गां हत्वा चरेत्त्रैवार्षिकं व्रतम् ३३०
द्विवर्षं पूर्ववद्वाऽपि चर्मणाऽऽर्द्रेण वाससा
कपिलां गर्भिणीं वाऽपि वृषं हत्वा च कामतः ३३१
व्रतं द्वादशवर्षाणि चरेद् ब्रह्मव्रतोदितम्
आचार्यदेवविप्राणां हत्वा च द्विगुणं चरेत् ३३२
होमधेनुं प्रसूताञ्च दाने च समलङ्कृताम्
उपभुक्तां वृषेणापि ताञ्च द्वादशवार्षिकम् ३३३
निष्पीडनं वाऽपि तेषु दोषेष्वल्पमतन्द्रितः
शरणागतबालस्त्रीघातुकैः सम्वसेन्न तु ३३४
चीर्णव्रतानपि चरन्कृतघ्नानपि सर्वदा
अग्निदाङ्गरदां चण्डीं भर्तृघ्नीं लोकघातिनीम् ३३५
हिंस्त्रयंस्तु विधानस्त्रीं हत्वा पापं न गच्छति
गुरुं वा बालवृद्धान्वा श्रोत्रियं वा बहुश्रुतम् ३३६

ग्राततायिनमायान्तं हन्यादेवाविचारयन्
नाऽऽततायिवधे दोषो हन्तुर्भवति कश्चन ३३७
प्रख्यातदोषः कुर्वीत परित्यक्तं यथोदितम्
ग्रनभिख्यातदोषस्तु रहस्यव्रतमाचरेत् ३३८
कराठमात्रजले स्थित्वा राममन्त्रं समाहितः
जपेद्वा दशसाहस्रं ब्रह्महा शुद्धिमाप्नुयात् ३३९
सुरापः स्वर्णहारी तु जपेदष्टाक्षरं तथा
लक्षं जप्त्वा कृष्णमन्त्रं मुच्यते गुरुतल्पगात् ३४०
उपोष्यान्तजले स्थित्वा वासुदेवमनुं शुभम्
जपेद्द्वादशसाहस्रं गोघ्नः प्रयतमानसः ३४१
ग्रसंख्यानि च पापानि ग्रनुक्तान्यपि यानि च
चित्तस्थो भगवान्कृष्णः सर्वं हरति तत्क्षणात् ३४२
एकादश्युपवासस्य फलं प्राप्नोति मानवः
ग्राषाढादिचतुर्मासे कृते भुक्त्वा जितेन्द्रियः ३४३
दुग्धाब्धौ शेषपर्यङ्के शयानं कमलापतिम्
ध्यात्वा समर्चयेन्नित्यं महद्भिर्मुच्यते ह्यघैः ३४४

इति रहस्यप्रायश्चित्तवर्णनम्

ग्रथ महापापादिप्रायश्चित्तप्रकरणवर्णनम्

रजस्वलां सूतिकाञ्च चराडालं पतितं तथा ३४५
पाषरिडनं विकर्मस्थं शैवं स्पृष्ट्वाऽप्यकामतः
गोमयेनानुलिप्ताङ्गः सवासा जलमाविशेत् ३४६
गायत्र्यष्टशतं जप्त्वा घृतं प्राश्य विशुध्यति
स्पृष्ट्वा तु कामतः स्नात्वा चरेत्सान्तपनं व्रतम् ३४७
श्वपचं पतितं स्पृष्ट्वा गोपालव्यजनादृतम्
विड्वराहं शुनङ्काकं गर्दभं यूपमेव च ३४८
मद्यं मासं तथैवोष्ट्रं विरामूत्रं दशमेव च

करकञ्जलफेनञ्च वृक्षनिर्यासमेव च ३४९
करञ्जं लशुनञ्चानुगच्छति स्वस्य शुद्धये
सचैलमेकवाह्यापः सावित्रीं त्रिशतं जपेत् ३५०
तत्स्पृष्टस्पृष्टिनौ स्पृष्ट्वा सवासा जलमाविशेत्
ऊर्ध्वमाचमनं प्रोक्तं धर्मविद्भिरकल्मषैः
उच्छिष्टकेशभस्मास्थिकपालं मलमेव च ३५१
स्नानार्द्रधरणीञ्चैव स्पृष्ट्वा स्नानं समाचरेत्
प्रक्षाल्य पादौ संक्रम्य तथैवाऽऽचम्य वारिणा ३५२
मन्त्रसन्मार्जितजलं स्पृष्ट्वा ताञ्च विशुध्यति
विशिष्टानाञ्च विप्राणां शुरूणां व्रतशालिनाम् ३५३
विनीततराणामुच्छिष्टं स्पृष्ट्वा स्नानं समाचरेत्
शैवानां पतितानाञ्च वाह्यानान्त्यक्तकर्मणाम् ३५४
उच्छिष्टस्पर्शनं कृत्वा चरेच्चान्द्रायणं व्रतम्
उच्छिष्टेन स्वयं चान्यमुच्छिष्टं यद्यकामतः ३५५
स्पृष्ट्वा सचैलं स्नात्वा च सावित्र्यष्टशतं जपेत्
कामतश्चाऽऽचरेत्कृच्छ्रं ब्रह्मकूर्चं द्विजोत्तमः ३५६
राजानञ्च विशं शूद्रं चरेच्चान्द्रायणं द्विजः
तौ च स्नात्वा चरेत्कृच्छ्रं गां वा दद्यात्पयस्विनीम् ३५७
उच्छिष्टिनं स्पृशन् शूद्रमुच्छिष्टं श्वानमेव वा
सवासा जलमाप्लुत्य चरेत्सान्तपनव्रतम् ३५८
तत्रापि कामतः स्पृष्टा पराकद्वयमाचरेत्
पञ्चगव्यं पिबेच्छूद्रः स्नात्वा नद्यां विधानतः ३५९
चण्डालं पतितं मद्यं सूतिकाञ्च रजस्वलाम्
उच्छिष्टेन तु संस्पृष्टः पराकत्रयमाचरेत् ३६०
उच्छिष्टेन चिरं कालमुषित्वा स्नानमाचरेत्
उच्छिष्टाशौचमरणे चरेदब्दं द्विजातयः ३६१

रजस्वला सूतिका वा पञ्चत्वं यदि चेद्गता
पञ्चगव्यैः स्नापयित्वा पावमान्यैर्द्विजोत्तमाः ३६२
प्रत्यृचं कलशैः स्नाप्य सपवित्रैर्जलैः शुभैः
शुभ्रवस्त्रेण सम्वेष्ट्य दाहं कुर्याद्विधानतः ३६३
चण्डालात् ब्राह्मणात्सर्पात्क्रव्यादादुदकादिभिः
हतानामपि कुर्व्वीत पूर्ववद्द्विजपुङ्गवः ३६४
तत्रापि कामतः कुर्यात् षडब्दं तस्य बान्धवाः
विषाद्यैर्घनशस्त्राद्यैरात्मानं यदि घातयेत् ३६५
गोशतं विप्रमुख्येभ्यो दद्यादेकं वृषं तथा
नारायणबलिं कृत्वा सर्वमप्यौर्ध्वदेहिकम् ३६६
रजस्वला तु या नारी स्पृष्ट्वा चान्यां रजस्वलाम्
चण्डालं पतितं वाऽपि शुनं गर्दभमेव च ३६७
तावत्तिष्ठेन्निराहारा चरेत्सान्तपनं व्रतम्
स्पृष्ट्वाऽप्यकामतः स्नात्वा पञ्चगव्यैः शुभैर्जलैः ३६८
चातुर्वर्णस्य गेहेषु चण्डालः पतितोऽपि वा
अन्तर्वत्नी भवेत्सा चेत्कथं स्यात्तत्र निष्कृतिः ३६९
तद्गृहन्तु परित्यक्त्वा दग्ध्वा वाऽन्यत्र संस्थितः
संसर्गोक्तप्रकारेण प्रायश्चित्तं समाचरेत् ३७०
पृथक्पृथक्प्रकुर्वीरन् सर्वे गृहनिवासिनः
दाराः पुत्राश्च सुहृदः प्रायश्चित्तं यथोदितम् ३७१
सभर्तृकाणां नारीणां वपनन्तु विवर्जयेत्
सर्वान् केशान् समुद्धृत्य च्छेदयेदङ्गुलित्रयम् ३७२
केशानां रक्षणार्थाय द्विगुणं व्रतमाचरेत्
प्रायश्चित्ते तु सम्पूर्णे कृत्वा सान्तपनं व्रतम् ३७३
ब्रह्मकूर्चोपवासं वा विशुध्यन्ति तदेनसः
अर्वाक्सम्वत्सरार्धात्तु गृहदाहं न चोदितम् ३७४

यद्गृहे पातकोत्पत्तिस्तत्र यत्नेन दाहयेत्
त्यजेद्वा संनिकृष्टाच्च शुद्धिश्चैवाऽऽत्मनस्ततः  ३७५
सन्बन्धाच्चैव संसर्गात्तुल्यमेव नृणामघम्
तस्मात्संसर्गसम्बधान्पतितेषु विवर्जयेत्  ३७६
चण्डालपतितादीनां तोयं यस्तु पिवेन्नरः
पराकं कामतः कुर्याद्ब्रह्मकूर्च्चमकामतः  ३७७
अभ्यासे तु षडब्दं स्याच्चान्द्रायणमकामतः
चण्डालानां तडागे वा नदीनां तीर्थ एव वा  ३७८
स्नात्वा पीत्वा जलं विप्रः प्राजापत्यमकामतः
कामतस्तु पराकं वा चान्द्रायणमथाऽपि वा  ३७९
अभ्यासे तु व्रतं पूर्णं षडब्दं स्यादकामतः
सर्वेषां प्रतिलोमानां पीत्वा सन्तापनं चरेत्  ३८०
चान्द्रायणं पराकं वा त्र्यब्दं वाऽपि यथाक्रमम्
भोजने गमनेऽप्येवं प्रायश्चित्तं समाचरेत्  ३८१
चाण्डालपतितादीनां गृहेष्वन्नमपि द्विजः
भुक्त्वाऽब्दमाचरेत्कृच्छ्रं चान्द्रायणमकामतः  ३८२
चण्डालवाटिकायान्तु सुप्त्वा भुक्त्वाऽप्यकामतः
चरेत्सान्तपनं कृच्छ्रं चान्द्रायणमथाऽपि वा  ३८३
चण्डालवाटिकायान्तु मृतस्याब्दं विशोधनम्
स्नापनं पञ्चगव्यैश्च पावमान्यैः शुभैर्जलैः  ३८४
शूद्रान्नं सूतिकान्नं वा शुना स्पृष्टञ्च कामतः
भुक्त्वा चान्द्रायणं कृच्छ्रं पराकं वा समाचरेत्  ३८५
जलं पीत्वा तयोर्विप्रः पञ्चगव्यं पिबेद् द्व्यहम्
चण्डालः पतितो वाऽपि यस्मिन् गेहे समाचरेत्
त्यक्त्वा मृण्मयभाण्डानि गोभिः संक्रामयेत् त्रयम्  ३८६
मासादूर्ध्वं दशाहन्तु द्विमासं पक्षमेव तु

षरामासात्तु तथा मासं गवां वृन्दं निवेशयेत् ३८७
ऊर्ध्वन्तु दहनं प्रोक्तं लाङ्गुलेन च खातनम्
ब्रह्मकूर्च्चं तथा कृच्छ्रं चान्द्रायरामथापि वा ३८८
ग्रतिकृच्छ्रं पराकञ्च त्र्यब्दं वाऽपि समाचरेत्
षडब्दमूर्ध्वं षरामासात्प्रायश्चित्तं समाचरेत् ३८९
वत्सरादूर्ध्वसम्पूर्णं व्रतमेवाऽऽचरेद्बुधः
ग्रमेध्यशवचराडालमद्यमांसादिदूषितात् ३९०
कूपादुद्धृत्य कलशैः सहस्त्रं रेचयेज्जलम्
निद्मिप्य पञ्चगव्यानि वारुरौरपि मन्त्रयेत् ३९१
तडागस्यापि शुध्यर्थं गोभिः संक्रामयेज्जलम्
धान्यन्तु द्मालनाच्छुद्धिर्बाहुल्यं प्रोद्मरागादपि ३९२
रसानान्तु परित्यागश्चाराडालादिप्रदूषरात्
प्रासाददेवहर्म्यारां चराडालपतितादिषु ३९३
ग्रन्तः प्रविष्टेषु तदा शुद्धिः स्यात्केन कर्मरा
गोभिः संक्रमरां कृत्वा गोमूत्रेरौव लेपयेत् ३९४
पुरायाहं वाचयित्वाऽथ तत्तोयैर्दर्भसंयुतैः
सम्प्रोन्दय सर्वतः पश्चादेवं समभिषेचयेत् ३९५
पञ्चामृतैः पञ्चगव्यैः स्नापयित्वाऽथ वैष्णवः
प्रत्यृचं पावमान्यैश्च वैष्णवैश्चाभिषेचयेत् ३९६
ग्रष्टोत्तरसहस्त्रं वा शतमष्टोत्तरं तु वा
चतुर्भिर्वैष्णवैर्मन्त्रैः स्नाप्य पुष्पाञ्जलिं तथा ३९७
श्रीसूक्तेन तदा दिव्यैर्दद्यान्नीराजनं ततः
ग्रवैष्णवस्पर्शनेऽपि एवं कुर्वीत वैष्णवः
भिन्ने बिम्बे तथा दग्धे परित्यक्त्वैव तं गृहे ३९८
वैदेहीं वैष्णवीमिष्ट्वा पुनः स्थापनमाचरेत्
चोराद्यपहृते नष्टे वासुदेवीं यजेच्चरुम् ३९९

स्थानान्तरगते बिम्बे पुनः स्थापनमाचरेत्
तोयाधिवासनं वेद्यामधिरोहणमेव च ४००
नयनोन्मीलनं दीक्षां वर्जयित्वाऽन्यमाचरेत्
पञ्चगव्यैः स्नापयित्वा पञ्चत्वक्पल्लवाञ्चितैः ४०१
मङ्गलद्रव्यसंयुक्तैरद्भिः समभिषेचयेत्
सूक्तैश्च ब्राह्मणस्पत्यैरविगैर्वैष्णवीस्तथा ४०२
चतुभिर्वैष्णवैर्मन्त्रैः पृथगष्टोत्तरं शतम्
वैष्णव्या चैव गायत्र्या शङ्खेन स्नापयेद्बुधः ४०३
ध्रुवसूक्तमृचं स्मृत्वा जपन्संस्थापयेद्धरिम्
ततस्तन्मूर्तिमन्त्रेण मूलमन्त्रेण वा द्विजः ४०४
दद्यात्पुष्पसहस्राणि देवतां स मनुं स्मरन्
पश्चात्सावरणं विष्णोरर्चयित्वा विधानतः ४०५
इन्द्रसोमं सोमपतेरिति सूक्तमनुत्तमम्
जपन्भक्त्याऽथ देवैस्तु दद्यान्नीराजनं द्विजः ४०६
प्रदक्षिणं नमस्कारं कृत्वा विप्रांस्तु भोजयेत्
अवैष्णवेन विप्रेण शूद्रेणैवार्चिते हरौ ४०७
सहस्रमभिषेकं च पुष्पाञ्जलिसहस्रकम्
महाभागवतो विप्रः कुर्यान्मन्त्रद्वयेन च ४०८
देवतोत्तरसम्पर्कं विना स्वाहरणं हरौ
अवैष्णवानां मन्त्राणां पक्वान्नस्य निवेदने ४०९
कृत्वा नारायणीमिष्टिं पुनः संस्कारमाचरेत्
देशान्तरगते बिम्बे चिरकालमनर्चिते ४१०
अधिवासादिकं सर्वं पूर्ववद्वैष्णवोत्तमः
विष्णोरुत्सवमध्ये तु विद्युत्स्तनितसम्भवे ४११
रथे बिम्बे ध्वजे भग्ने बिम्बे च पतितो भुवि
ग्रामदाहेऽश्मवर्षे च गुरावृत्विजि वै मृते ४१२

नालङ्कृतेषु विधिषु परिणीते जनार्दने
अवैदिकक्रियोपेते जपहोमादिवर्जिते ४१३
कुर्वीत महतीं शान्तिं वैष्णवीं वैष्णमोत्तमः
अग्निनाशे तु तन्मध्ये पुनरादानमाचरेत् ४१४
कुर्वीत वैनतेयेष्टिं वैष्वक्सेनीमथापि वा
श्वशूकरादिसम्पर्के पवित्रेष्टिं समाचरेत् ४१५
वैष्णवेष्टिं प्रकुर्वीत पाषण्डादिप्रदूषिते
अथास्य संप्लवे विष्णोर्यत्र यत्र च सङ्करम् ४१६
तत्र तत्र यजेदिष्टिं पावमानीं द्विजोत्तमः
स्वापचारैस्तथाऽन्यैर्वा मुच्यते सर्वकिल्बषैः ४१७
अवैष्णवेन विप्रेण स्थापिते मधुसूदने
तद्राष्ट्रं वा भूपतिर्वा विनाशमुपयास्यति ४१८
कुर्वीत वासुदेवेष्टिं सर्वं पापं प्रशामयेत्
महाभागवतेनैव पुनः संस्कारमाचरेत् ४१९
सेनेशवैनतेयादि नित्यानाञ्च दिवौकसाम्
मुक्तानामपि पूजार्थं बिम्बानि स्थापयेद्यदि ४२०
स निवेश्यै करात्रन्तु गव्यैः स्नाप्याऽथ देशिकः
सर्ववैष्णवसूक्तैश्च तद्गायत्र्या सहस्रकम् ४२१
शङ्खेनैवाभिषिच्याथ भगवत्पुरतो न्यसेत्
स्थण्डिलेऽग्निं प्रतिष्ठाप्य यजेच्च पुरतो हरेः ४२२
अस्य वामेति सूक्तेन पायसं मधुमिश्रितम्
अष्टोत्तरशतं पञ्चादाज्यं मन्त्रचतुष्टयात् ४२३
सुवर्णतार्क्ष्यसूक्ताभ्यां पृषदाज्यं यजेत्ततः
तिलैर्व्याहृतिभिर्हुत्वा पश्चादष्टोत्तरं शतम् ४२४
वैकुण्ठं पार्षदञ्चैव होमशेषं समापयेत्
अहमस्मीतिसूक्तेन पीठे संस्थापयेद्बुधः ४२५

प्रणवादि चतुर्थ्यन्तनामभिस्तत्प्रकाशकैः
आवाह्य पूजयित्वाऽथ दद्यात्पुष्पाञ्जलिं ततः ४२६
द्वादशार्णेन मनुना सहस्रमथवा शतम्
सोमरुद्रेति सूक्तेन दीपैर्नीराजयेत्ततः ४२७
भोजयित्वा ततो विप्रान् गुरुं सम्यक् प्रपूजयेत्
मत्स्यकूर्मादिमूर्तीनामेवं संस्थापनं चरेत् ४२८
तत्तत्प्रकाशकैर्मन्त्रैर्जपहोमादिकं चरेत्
सहस्रनामभिर्दद्यात्पुष्पाणि सुरभीणि च ४२९
वापीकूपतडागानां तरुणां स्थापने तथा
वारुणीभिश्च सौम्यैश्च जपहोमादिकं चरेत् ४३०
तरूणां स्थापने गोपकृष्णं मातरमेव च
ताभ्यामेव तु मन्त्राभ्यां सहस्रं जुहुयाद्धृतम् ४३१
वैनतेयाङ्कितं स्तम्भं मध्ये संस्थापयेद्बुधः
अवैष्णवान्धये जातः कृत्वेष्टिं वैष्णवीं द्विजः ४३२
वैष्णवैः पञ्चसंस्कारैः संस्कृतो वैष्णवो भवेत्
देवतान्तरशेषस्य भोजने स्पर्शने तथा ४३३
अनर्चिते पद्मनाभे तस्यानर्पितभोजने
अवैष्णवानां विप्राणां पूजने वन्दने तथा ४३४
याजनेऽध्यापने दाने श्राद्धे चैषाञ्च भोजने
अनर्चिते भागवते हरिवासरभोजने ४३५
प्रायश्चित्तं प्रकुर्व्वीत वैय्यूही मिष्टिमुत्तमाम्
पश्चाद्भागवतानाञ्च पिवेत्पादजलं शुभम् ४३६
एतत्समस्तपापानां प्रायश्चित्तं मनीषिभिः
निर्णीतं भगवद्भक्तपादामृतनिषेवणम् ४३७
अङ्गीकृतं महाभागैर्महाभागवतैर्द्विजैः
सर्व्वापचारैर्मुच्येत परां वृतिञ्च विन्दति ४३८

प्रायश्चित्ते तथा चीर्णे महाभागवताद् द्विजात्
वैष्णवैः पञ्चसंस्कारैः संकृतो हरिमर्चयेत् ४३६
इति वृद्धहारीतस्मृतौ महापापादिप्रायश्चित्तप्रकरणं
नाम षष्ठोऽध्यायः

## सप्तमोऽध्यायः

### अथ नानाविधोत्सवविधानवर्णनम्

अम्बरीष उवाच
भगवन् भवता प्रोक्ता विष्णोराराधनक्रिया
प्रायश्चित्तमकृत्यानामसतां दण्डमेव च १
अधुना श्रोतुमिच्छामि शाश्वतीं वृत्तिमुत्तमाम्
इष्टीनाञ्च विधानानि विशेषांश्चोत्सवान् हरेः २
हारीत उवाच
शृणु राजन् प्रवक्ष्यामि सर्वं निरवशेषतः
इष्टीनाञ्च विधानञ्च हरेत्सवकर्मणाम् ३
नारायणी वासुदेवी गारुडी वैष्णवी तथा
चैय्यूही वैभवी पाद्मी पवित्री पावमानिका ४
सौदर्शिनी च सेनेशी आनन्ती च शुभाह्वया
महाभागवतीत्येताः सर्वपापहराः शुभाः ५
प्रायश्चित्तार्थमपि वा भोगार्थं वा समाचरेत्
पूर्वं विघनसे विष्णुः प्रोक्तवान् विघनसा भृगोः ६
प्रोक्तं ममेरितं तेन भृगुणा दिव्यमुत्तमम्
गुह्यं तत्सर्ववेदेषु निश्चितं ते ब्रवीम्यहम् ७
अग्निर्वै देवानामव मे विष्णुरीश्वरः
तदन्तरेण वै सर्वा देवता इति ह श्रुतिः ८
निवसन्ति पुरोडाशमग्नौ वैष्णवमव्ययम्

देवाश्च ऋषयः सर्वे योगिनः सनकादयः ९
अग्नौ यद्धूयते हव्यं विष्णवे परमात्मने
तदग्नौ वैष्णवं प्रोक्तं सर्वदेवोपजीवनम् १०
एतदेवहि कुर्वन्ति सदा नित्या अपीश्वराः
विमुक्ता अपि भोगार्थमेतमेव मुमुक्षवः ११
एतदेव परं प्रीतिः सश्रियः परमात्मनः
एतद्विना न तुष्येत भगवान् पुरुषोत्तमः १२
यज्ञार्थमेव संसृष्टमात्मवर्गं चतुर्विधम्
यज्ञार्थात्कर्मणोऽन्यत्तु तदेषां कर्मबन्धनम् १३
वह्निर्जिह्वा भगवतो वेदा अङ्गाः सदाऽध्वरे
अस्थीनि समिधः प्रोक्ता रोमा दर्भाः प्रकीर्तिताः १४
स्वाहाकारः शिरः प्रोक्तं प्राणा एव हवींषि च
सर्ववेदक्रिया भोगा मन्त्राः पक्षयः प्रकीर्तिताः १५
एवं यज्ञवपुर्विष्णुर्विदित्वैनं हुताशने
जुहुयाद्वै पुरोडाशं अज्ञात्वैवम्पतेदथ १६
यज्ञो यज्ञपति यज्वा यज्ञाङ्गो यज्ञवाहनः
यज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग्यज्ञसाधनः १७
यज्ञान्तकृद्यज्ञगुह्यमन्नमन्नाद एव च
तस्मादेनं विदित्वैवं यज्ञं यज्ञेन पूजयेत् १८
कोऽयं लोकोऽस्त्ययज्ञस्य कथं स्यात्परतः शुचिः
द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथा परे १९
स्वाध्यायज्ञानयज्ञाश्च सदा कुर्वन्ति योगिनः २०
हरेर्भोगतया कुर्यान्न साधनतया क्वचित्
साधनं भगवान् विष्णुः साध्याः स्युर्वैदिकाः क्रियाः २१
शेषभूतश्च जीवस्य तद्दास्यैकफलाः क्रियाः
श्रुतिस्मृत्युदितं कर्म तद्दास्यं परिकीर्तितम् २२

नैसर्गिकं तथा कुर्यात्तद्वास्यंकं निकीर्तितम्
वैदिकेनैव मार्गेण पूजयेत्परमेश्वरम् २३
अन्यथा नरकं याति कल्पकोटिशतत्रयम्
तस्माच्छ्रुत्युक्तमार्गेण यजेद्विष्णुं हि वैष्णवः २४
अर्चायामर्चयेत्पुष्पैरग्नौ च जुहुयाद्धविः
ध्यायेत्तु मनसा वाचा जपेन्मन्त्रान् सुवैदिकान् २५
एवं विदित्वा सत्कर्म भोगार्थं परमात्मनः
कुर्वीत परमैकान्ती पत्युः पत्नी यथा प्रिया २६
इदं प्रसङ्गेणोक्तं स्याद्विधानं तद्ब्रवीमि ते
पूर्वपक्षदशम्यान्तु स्नात्वा सम्पूज्य केशवम् २७
स्वस्तिवाचनपूर्वेण कुर्यादत्राङ्कुरार्पणम्
हरिं नारायणेष्टच्यर्थमिति सङ्कल्प्य पूजयेत् २८
विष्णुप्रकाशकै राज्यं भूसूक्ताभ्यां शतं ततः
मन्त्रेण चैव वैकुण्ठं पार्षदं हुत्वा समापयेत् २९
अयुतं तु जपेन्मत्रं होमञ्चाष्टोत्तरं शतम्
शेषं निवेद्य देवाय भुञ्जीयात्स्वयमेव च ३०
ततो मौनी जपेन्मत्रं शयीत पुरतो हरेः
प्रभाते च नदीं गत्वा स्नात्वा सन्तर्प्य देवताः ३१
सन्ध्यामन्वास्य चाऽऽगत्य स्वगेहे समलङ्कृते
वेद्यां संपूज्य देवेशं मन्त्ररत्नविधानतः ३२
सप्तावरणसंयुक्तं महिषीभिः समन्वितम्
अभ्यर्च्य गन्धपुष्पाद्यैर्धूपदीपनिवेदनैः ३३
अर्चयित्वा विधानेन कुण्डं दक्षिणभागतः
विस्तरायामनिम्नैश्च हस्तमात्रन्त्रिमेखलम् ३४
तत्र वह्निं प्रतिष्ठाप्य इध्माधानान्तमाचरेत्
ओङ्कारः स्यात्परं ब्रह्म सर्वमन्त्रेषु नायकः ३५

त्र्यक्षरं तत्त्रयाणाञ्च वेदानां बीजमुच्यते
अजायन्त ऋचः पूर्वमकाराद्विष्णुवाचकात्  ३६
श्रीवाचकादुकारात्तु यजूंषि तदनन्तरम्
अजायन्त तयोः सङ्गात्सामान्यन्यान्यनेकशः  ३७
तयोर्दासो मकारेण प्रोच्यते सर्वदेहिनः
कारणं सर्ववर्णानामकारः प्रोच्यते बुधैः  ३८
अकारो वै च सर्वा वाक् सैषा स्पर्शोष्मभिः सदा
वह्नौ सा व्यज्यमानाऽपि नानारूपा इति श्रुतिः  ३९
अकार एव लुप्यन्ति सर्वमन्त्राक्षराणि हि
अकारो वासुदेवः स्यात्तस्मिन् सर्वं प्रतिष्ठितम्  ४०
मन्त्रो हि बीजं सर्वत्र क्रिया तच्छक्तिरुच्यते
मन्त्रतन्त्रसमायुक्तो यज्ञ इत्यभिधीयते  ४१
मन्त्रः पुमान् क्रिया स्त्री च तदुक्तं मिथुनं स्मृतम्
तस्माद्यजूंषि तन्त्राणि ऋचो मन्त्राणि चाध्वरे  ४२
मन्त्रक्रियाजुष्टमेव मिथुनं यज्ञ उच्यते
मन्त्रतन्त्रांशमेते ऋग्यजुषी यज्ञकर्मणि  ४३
उद्गीतं तु भवेत्साम तस्मात्तद्वैष्णवं त्रयम्
ऋग्भिरेव तमुद्दिश्य पुरोडाशं यजेद्बुधः  ४४
ताभिरेव तु पुष्पाणि दद्यात्कर्मसु शार्ङ्गिणे
इन्द्राग्निवरुणादीनि नामान्युक्तानि तत्र तु
ज्ञेयानि विष्णोस्तान्यत्र नान्येषां स्युः कथञ्चन  ४५
अकारे रूढइत्यग्निमिन्द्रत्वं वर ईश्वरे
आत्मनां प्रसवे सूर्यः सौम्यत्वात्साम इत्यतः  ४६
वायुः स्याज्जीवतः प्राणाद्वरुणः सर्वजीवनः
मित्रः स्यात्सर्वमित्रत्वादात्मैकत्वाद् बृहस्पतिः  ४७
रोगनाशो भवेद्रुद्रो यमः स्यात्तु नियामकः

हिरण्यत्वमिति प्रोक्तं नेति प्राप्यत्वमुच्यते ४८
नित्यसत्वाद्धिरण्यः स्यात्तद्गर्भत्वाद्धिरण्मयः
हिरण्यगर्भ इत्युक्तः सत्वगर्भो जनार्दनः ४९
हिरण्मयः स भूतेभ्यो ददृशे इति वै श्रुतिः
सर्वान् स त्राति सविता पिता च पितृतत्पिता ५०
स्वर्भूर्भुव इति प्रोक्तो वेदवेद्येति चोच्यते
यस्य छन्दांसि चाङ्गानि स सुवर्णमिहोच्यते ५१
अत्राङ्गं वर्णमित्युक्तं छन्दोमयमुदाहृतम्
गायत्र्युष्णिगनुष्टुप्च बृहती पङ्क्तिरेव च ५२
त्रिष्टुप् च जगती चैव छन्दांस्येतान्यनुक्रमात्
एतानि यस्य चाङ्गानि स सुपर्ण इहोच्यते ५३
यस्माज्जातास्त्रयो वेदा जातवेदाः स उच्यते
पवमानः पावयित्वा शिवः स्यात्सर्वदा शुभात् ५४
सुजनैः सेव्यते यस्तु अतो वै शम्भुरित्यजः
सव्यान्यस्यैव नामानि वैदिकानि विवेचनात् ५५
पुन्नामानि यानि विष्णोः स्त्री नामानि श्रियस्तथा
परस्य वैदिकाः शब्दाः समाकृष्येतरेष्वपि ५६
व्यवह्रियन्ते सततं लोकवेदानुसारतः
न तु नारायणादीनि नामान्यन्यस्य कर्हिचित् ५७
एतन्नाम्नां गतिर्विष्णुरेक एव प्रचक्षते
शब्दब्रह्मत्रयी सर्वं वैष्णवं तदिहोच्यते ५८
देवतान्तरशङ्का तु न कर्तव्या हि वैदिकैः
वषट्कृतं यद्वेदेन तदत्यन्तप्रियं हरेः ५९
स्वाहास्वधाभ्यां नमसा हुतं तद्वैष्णवं स्मृतम्
समिदाज्यैर्या आहुतीर्थे वेदेनैव जुह्वति
यो मनसा सवर इत्यृचां प्रोक्तः सदाध्वरे ६०

वेदेनैव हरिं तस्माद्यजेत द्विजसत्तमः
प्रसङ्गादेव मुक्तं स्याद्विधानं तद्ब्रवीमि ते  ६१
ऋग्वेदसंहितायान्तु मराडलानि दश क्रमात्
एकैकमिष्ट्या होतव्यं चरुणा पायसेन वा  ६२
घृतेन वा तिलैर्वाऽपि बिल्वपत्रैरथापि वा
अग्निमील इति पूर्वं मराडलं प्रत्यृचं यजेत्  ६३
पुष्पाणि च तथा दद्यात्सुगन्धीनि जनार्दने
विष्णुसूक्तैर्हविर्हुत्वा चतुर्मन्त्रैः शतं यजेत्  ६४
वैष्णवान् भोजयेन्नित्यमग्निञ्चापि सुसंग्रहेत्
उपोषितो दीक्षितश्च यावदिष्टिः समाप्यते  ६५
अन्ते चावभृथेष्टिञ्च पुष्पयागञ्च पूर्ववत्
आचार्यं ब्राह्मणांश्चापि दक्षिणाभिः प्रपूजयेत्  ६६
इमान्नारायणेष्टिञ्च सकृद्वाऽपि यजेत्तु यः
अनधीतवेदश्चेष्टिमयुतं मूलमन्त्रतः  ६७
होमं पुष्पाञ्जलिं वाऽपि तथैवायुतमाचरेत्
पूजयित्वा ततो विप्रान्निष्ट्याः सम्यक्फलो भवेत्
अवाक्यपौरुषं सूक्तमष्टोत्तरशतं चरुम्
हुत्वा चतुर्भिर्मन्त्रैश्च लभेदिष्टिं न संशयः  ६९
अथ वासुदेवेष्टिरुच्यते
एकादश्यां कृष्णपक्षे समुपोष्य जनार्दनम्
समर्च्चयेद्विधानेन रात्रौ जागरणान्वितः  ७०
द्वादश्यां प्रातरुत्थाय स्नायान्नद्यां तिलैः सह
द्वादशार्णेन मनुना सिञ्चेदष्टोत्तरं शतम्  ७१
अभिमन्त्र्य जलं पश्चात्तुलसीमिश्रितं पिबेत्
सर्वकर्मस्वभिहित एतदेवाघमर्षणः  ७२
तत्तत्कर्मणि तन्मन्त्रं यो जपेदघमर्षणे

स्नात्वा सन्तर्प्य देवर्षीन् कृतकृत्यः समाहितः ७३
गृहं गत्वाऽर्चयेद्देवं वासुदेवं सनातनम्
द्वादशार्णविधानेन कस्तूरीचन्दनादिभिः ७४
जातिकेतककुन्दाद्यैः सुकृष्णतुलसीदलैः
सुधाब्धौ शेषपर्यङ्के समासीनं श्रिया सह ७५
इन्दीवरदलश्यामं चक्रशङ्खगदाधरम्
सर्वाभरणसम्पन्नं सदायौवनमच्युतम् ७६
अनन्तं विहगाधीशं शौनकाद्यैरुपासितम्
त्रिदशेन्द्रैर्विमानस्थैर्ब्रह्मरुद्रादिभिस्तथा ७७
स्तूयमानं हरिं ध्यात्वा अर्चयेत्प्रयतात्मवान्
सर्वमावरणं पश्चादर्च्चयेत्कुसुमादिभिः ७८
प्रथमं महिषीसङ्घं लक्ष्मीभूम्यौ सनीलया
अनन्तरञ्च गरुडधर्मसेनादिभिस्तथा ७९
ऐश्वर्यज्ञानवैराग्याः पूजनीया यथाक्रमम्
सनन्दनश्च सनकः सनत्कुमारः सनातनः ८०
औडुश्च सोमकपिलः पञ्चमो नारदस्तथा
भृगुर्विघनसोऽत्रिश्च मरीचिः कश्यपोऽङ्गिराः ८१
पुलहः स्वायम्भुवो दाल्भ्यो वशिष्ठाद्यास्ततः क्रमात्
वशिष्ठो वामदेवश्च हारीतश्च पराशरः ८२
व्यास शुकश्च प्रह्लादः शौनको जनकस्तथा
मार्कण्डेयो ध्रुवश्चैव पुण्डरीकश्च मारुतः ८३
रुक्माङ्गदः शिवो ब्रह्मा पूजनीया यथाक्रमम्
तथा लोकेश्वराः पूज्याः शङ्खचक्रादिहेतयः ८४
वेदाश्च साङ्गाः स्मृतयः पुराणं धर्मसंहिताः
राशयो ग्रहनक्षत्राः पूजनीया समं ततः ८५
एवं सम्पूज्य देवेशमग्न्याधानादिपूर्वकम्

द्वितीयं मराडलमृचा जुहुयात्सद्भृतं चरुम् ८६
ध्यात्वा वह्नौ वासुदेवं दद्यात्पुष्पाणि तत्र तु
वैष्णवांश्च यजेत्तत्रावभृथं पुष्पयागकम् ८७
ब्राह्मणान्भोजयेदन्ते गुरुञ्चापि प्रपूजयेत्
इमाञ्च वासुदेवेष्टिं यः कुर्याद्वैष्णवोत्तमः ८८
कुलकोटिं समुद्धृत्य स गच्छेत्परमं पदम्
अथवा वासुदेवस्य मन्त्रेणैव द्विजोत्तमः ८९
जुहुयादयुतं वह्नौ वैष्णवैः प्रत्यृचं तथा
पुष्पाणि दत्त्वा देवेशे सम्यगिष्ट्या लभेत्फलम् ९०
अथ वक्ष्यामि राजर्षे वैष्णवेष्ट्या विधिं ततः
श्रवणर्क्षे तु पूर्वाह्णे पूर्ववच्च समारभेत् ९१
उपोष्य पूर्वदिवसे पूजयेज्जागरे हरिम्
प्रभाते पूर्ववत् स्नात्वा तर्पयेज्जगतां पतिम् ९२
षडक्षरविधानेन परव्योम्नि स्थितं हरिम्
वह्न्यर्क हेमबिम्बाद्यैर्योगपीठसुसंस्थितम् ९३
चतुर्भुजं सुन्दराङ्गं सर्वाभरणभूषितम्
चक्रशङ्खगदाशार्ङ्गान् बिभ्राणं दोर्भिरायतैः ९४
वामाङ्कस्थश्रिया सार्द्धं गन्धपुष्पाक्षतादिभिः
नवेद्यैश्च फलैर्भक्ष्यैर्दिव्यैर्भोज्यैः सुपानकैः ९५
अर्चयेद्देवदेवेशं सर्वाभरणसंयुतम्
श्रीर्लक्ष्मीः कमला पद्मा सीता सत्या च रुक्मिणी ९६
सावित्री परितः पूज्या ततस्तुते बलादयः
अनन्ततार्क्ष्यदेवेशसत्यधर्मदमाः शमाः ९७
बुद्धिश्च पूजनीयास्ते दिक्षु सर्वास्वनुक्रमात्
ततो लोकेश्वराः पूज्यास्ततश्चक्रादिहेतयः ९८
महाभागवताः पूज्या होमकर्म समाचरेत्

चतुर्भिर्वैष्णवैः सूक्तैः प्रत्यृचं जुहुयाच्चरुम् ९९
व्यापका मन्त्ररत्नञ्च चतुर्मन्त्रा उदाहृताः
तैरप्यष्टोत्तरशतं पृथक् पृथगतो यजेत् १००
तृतीयमण्डलं पश्चाज्जुहुयात्प्रत्यृचं ततः
तथा पुष्पैश्च सम्पूज्य कुर्यादवभृथं ततः १०१
समाप्य पुष्पयोगेन वैष्णवान् भोजयेत्ततः
एवं कर्तुमशक्तश्चेद्वैष्णवीं वैष्णवोत्तमः १०२
वैष्णव्या चैव गायत्र्या पुष्पाञ्जल्ययुतं चरेत्
त्रिसहस्रं चरुं हुत्वा वैष्णवेष्ट्याः फलं लभेत् १०३
इमां तु वैष्णवीमिष्टिं यः कुर्याद्वैष्णवोत्तमः
त्रिकोटिकुलमुद्धृत्य याति विष्णोः परं पदम् १०४
प्रायश्चित्तमिदं कुर्याद्वृत्तिभङ्गेषु वैष्णवः
शान्त्यर्थं देवकार्येषु पापेषु च महत्स्वपि १०५
अथ वैयूही इष्टिरुच्यते
शुक्लपक्षे तु द्वादश्यां सङ्क्रान्तौ ग्रहणेऽपि वा
उपोष्य विधिवद्विष्णुं पूजयित्वा विधानतः १०६
अभ्यर्चयेद्गन्धपुष्पैः केशवादीन् पृथक्पृथक्
सङ्कर्षणादीनपि च पूजयेत्प्रयतात्मवान् १०७
तत्तन्मूर्तिं पृथक् ध्यात्वा पृथगेव समर्चयेत्
केशवस्तु सुवर्णाभः श्यामो नारायणोऽव्ययः १०८
माधवः स्यादुत्पलाभो गोविन्दः शशिसन्निभः
गौरवर्णस्तथा विष्णुः शोणो मधुजिदव्ययः १०९
त्रिविक्रमोऽग्निसङ्काशो वामनः स्फटिकप्रभः
श्रीधरस्तु हरिद्राभो हृषीकेशोंऽशुमान् यथा ११०
पद्मनाभो घनश्यामो हैमो दामोदरः प्रभुः
सङ्कर्षणस्तु मुक्ताभो वासुदेवो घनद्युतिः १११

प्रद्युम्नो रक्तवर्णः स्यादनिरुद्धो यथोत्पलम्
अधोक्षजः शाद्वलाभो रक्ताङ्गः पुरुषोत्तमः ११२
नृसिंहो मणिवर्णः स्यादच्युतोऽर्कसमप्रभः
जनार्दनः कुन्दवर्ण उपेन्द्रो विद्रुमद्युतिः ११३
हरिर्वै सूर्यसङ्काशः कृष्णोभिन्नाञ्जनद्युतिः
आयुधानि ब्रुवे चैषां दक्षिणाधः करादितः ११४
पद्मं शङ्खं गदाचक्रं गदां दधाति केशवः
शङ्खं पद्मं गदाचक्रं धत्ते नारायणोऽव्ययः ११५
माधवस्तु गदां चक्रं शङ्खं पद्मं विभर्त्ति च
चक्रं गदां तथा पद्मं शङ्खं गोविन्द एव च ११६
गदां पद्मं गदाशङ्खं चक्रं विष्णुर्विभर्त्ति हि
चक्रं शङ्खं तथा पद्मं गदां च मधुसूदनः ११७
पद्मं गदां तथा चक्रं शङ्खं चैव त्रिविक्रमः
शङ्खं चक्रं गदापद्मं वामनो विभृयात्तथा ११८
पद्मं चक्रं गदाशङ्खं श्रीधरः श्रीपतिर्दधत्
गदां चक्रं हृषीकेशः पद्मं शङ्खं विभर्त्ति हि ११९
पद्मनाभस्तथा शङ्खं पद्मं चक्रं गदां धरेत्
पद्मं शङ्खं गदां चक्रं धत्ते दामोदरस्तथा १२०
सङ्कर्षणो गदां शङ्खं पद्मं चक्रं दधाति हि
वासुदेवो गदां शङ्खं चक्रं पद्मं बिभर्त्ति हि १२१
चक्रं शङ्खं गदां पद्मं प्रद्युम्नो बिभृयात्तथा
अनिरुद्धस्तथा चक्रं गदां शङ्खं च पङ्कजम् १२२
चक्रं पद्मं तथा शङ्खं गदां च पुरुषोत्तमः
पद्मं गदां तथा शङ्खं चक्रं चाधोक्षजो हरिः १२३
चक्रं पद्मं गदां शङ्खं नरसिंहो बिभर्त्ति हि
अच्युतश्च गदां पद्मं चक्रं शङ्खं बिभर्त्ति हि १२४

जनार्दनस्तथा पद्मं शङ्खं चक्रं गदां धरेत्
उपेन्द्रस्तु तथा शङ्खं गदां चक्रं च पङ्कजम्  १२५
हरिस्तु शङ्खं चक्रं च पद्मं चैव गदां धरेत्
शङ्खं गदां पङ्कजं च चक्रं कृष्णो बिभर्त्ति हि  १२६
एवं चतुर्विंशतिस्तु मूर्तीर्ध्यात्वा समर्चयेत्
तत्तद्बिम्बेषु वा राजन् शालग्रामशिलासु वा  १२७
गन्धैः पुष्पैश्च ताम्बूलैर्धूपैर्दीपैर्निवेदनैः
फलैश्च भक्ष्यभोज्यैश्च पानीयैः शर्करान्वितैः  १२८
नामभिस्तैश्चतुर्थ्यन्तैर्मूलमन्त्रेण वा यजेत्
देवानावरणीयांश्च पूजयेत्परितः क्रमात्  १२९
यं हेत्वाहतिसूक्तेन कुर्यान्नीराजनं शुभम्
पुरतोऽग्निं प्रतिष्ठाप्य स्वगृह्योक्तविधानतः
मण्डलेन चतुर्थेन प्रत्यृचं जुहुयाच्चरुम्  १३०
पुष्पैः सम्पूजयेद्भक्त्या कुर्यादवभृथं नरः
इमां वैयूहिकीमिष्टिं सम्यक् प्राहुर्महर्षयः  १३१
प्रायश्चित्तमिदं प्रोक्तं पातकेषु महत्स्वपि
अनप्स्वपि च बिम्बानां शान्त्यर्थं वा समाचरेत्  १३२
प्रायश्चित्तं विशिष्टं स्याद्देयं प्रत्यृचकर्मसु
अनधीतः कथं कुर्याद्वियूहीं वैष्णवीं द्विजः  १३३
प्रत्येकं शतमष्टौ च मन्त्रैस्तेषां यजेद्बुधः
सर्वत्रावभृथेष्टिञ्च पुष्पयागञ्च वैष्णवः  १३४
द्वयेन मूलमन्त्रेण कुर्वीत सुसमाहितः
वैष्णवान् भोजयेद्भक्त्या कर्मान्ते सत्वसिद्धये  १३५
चतुर्विंशतिसंख्यान्वै महाभागवतान् द्विजान्
एकं वा भोजयेद्विप्रं महाभागवतोत्तमम्
सर्वं सम्पूर्णतामेति तस्मिन् संपूजिते द्विजे  १३६

यः करोति सुभामिष्टिं वैयूहीं वैष्णवोत्तमः
अनन्तस्याच्युतानाञ्च विशिष्टोऽन्यतमो भवेत् १३७
वैभवीमथ वक्ष्यामि सर्वपापप्रणाशिनीम्
पावनीं सर्वलोकानां सर्वकामप्रदां शुभाम् १३८
भगवज्जन्मदिवसे वारे सूर्यसुतस्य वा
स्वजन्मर्क्षेऽपि वा कुर्याद्वैभवीं मङ्गलाह्वयाम् १३९
पूर्वेऽह्नयभ्युदयं कुर्यादङ्कुरार्पणपूर्वकम्
उपोष्य पूजयेद्विष्णुमान्याधानं समाचरेत् १४०
स्नात्वा परेऽह्नि विधिना सन्तर्प्य पितृदेवताः
विशिष्टैर्ब्राह्मणैः सार्द्धमर्चयित्वा जनार्दनम् १४१
मत्स्यं कूर्मं च वाराहं नारसिंहं च वामनम्
श्रीरामं बलभद्रञ्च कृष्णं कल्किनमव्ययम् १४२
हयग्रीवं जगद्योनिं पूजयेद्वैष्णवोत्तमः
नार्चयेद्भार्गवं बुद्धं सर्वत्रापि च कर्मसु १४३
कुशग्रन्थिषु बिम्बेषु शालग्रामशिलासु वा
अर्चयेद्गन्धपुष्पाद्यैः प्रागुदक्प्रवणेन च १४४
पृथक्पृथक् च नैवेद्यं विविधं वै समर्पयेत्
मोदकान् पृथुकान् सक्तूनपूपान् पायसांस्तथा १४५
हविष्यमन्नमुद्गान्नं मण्डकान् मधुसंयुतान्
दध्यन्नञ्च गुडान्नञ्च भक्त्या तेभ्यो निवेदयेत् १४६
कर्पूरसंयुतं दिव्यं ताम्बूलञ्च निवेदयेत्
इमा विश्वेतिसूक्तेन दद्यान्नीराजनं तथा १४७
सहस्रनामभिः स्तुत्वा भक्त्या च प्रणमेद्बुधः
इध्माधानादिपर्य्यन्तं कृत्वा होमं समाचरेत् १४८
सर्वैस्तु वैष्णवैः सूक्तैर्हुत्वा पूर्वं शुभं हविः
पञ्चमं मण्डलं पश्चात्प्रत्यृचं जुहुयाद्द्विजः १४९

इमान्तु वैभवीमिष्टिं कुर्याद्विष्णुपरायणः
अकृत्वा वैभवीमन्त्रं योऽध्यापयति देशिकः १५०
रौरवं नरकं याति यावदाभूतसंप्लवम्
होमं विना स शूद्राणां कुर्यात्सर्वमशेषतः १५१
मन्त्रैर्वा जुहुयादाज्यं तत्तन्मूर्तिप्रकाशकैः
पूजयित्वा द्विजवरान् पश्चान्मन्त्रं प्रदापयेत् १५२
अशक्तो यस्तु वेदेन कर्तुमिष्टिं द्विजोत्तमः
तत्तन्मूर्तिमयैर्मन्त्रैः पृथगष्टोत्तरं शतम् १५३
हुत्वा चरुं घृतयुतं सम्यगिष्ट्याः फलं लभेत्
वैष्णवत्वाच्युतस्यापि कारयेदिष्टिमुत्तमाम् १५४
उद्दिश्य वैष्णवान् स्वस्वपितॄनपि च वैष्णवः
यः कुर्याद्वैष्णवीमिष्टिं भक्त्या परमया युतः १५५
वैष्णवत्वं कुलं सर्वं लभेत स न संशयः
अत ऊर्ध्वं प्रवक्ष्यामि आनन्तीमघनाशनीम् १५६
पौर्णमास्यां प्रकुर्वीत पूर्वोक्तविधिना नृप
आदानं पूर्ववत्कृत्वा अङ्कुरार्पणपूर्वकम् १५७
उपोष्याभ्यर्चयेद्देवमनन्तं पुरुषोत्तमम्
सहस्रशीर्षं विश्वेशं सहस्रकरलोचनम् १५८
सहस्रचरणं श्रीशं सदैवाश्रितवत्सलम्
पौरुषेण विधानेन पूजयेत्पुरुषोत्तमम् १५९
गन्धपुष्पैश्च धूपैश्च दीपैश्चापि निवेदनैः
पूजयित्वा जगन्नाथं पश्चादावरणं यजेत् १६०
पार्श्वयोश्च श्रियं भूमिं नीलाञ्च शुभलोचनाम्
हिरण्यवर्णा हरिणी जातवेदा हिरण्मयी १६१
चन्द्रा सूर्या च दुर्धर्षा गन्धद्वारा महेश्वरी
नित्य पुष्टा सहस्राक्षी महालक्ष्मीः सनातनी १६२

पूजनीया समस्ताश्च गन्धपुष्पाक्षतादिभिः
संकर्षणस्तथाऽनन्तः शेषो भूधर एव च १६३
लक्ष्मणो नागराजश्च बलभद्रो हलायुधः
तच्छक्तयः पूजनीयाः प्रागादिषु यथाक्रमम् १६४
रेवती वारुणी कान्तिरैश्वर्या च इला तथा
भद्रा सुमङ्गला गौरी शक्तयः परिकीर्तिताः १६५
अस्त्रान् लोकेश्वरान् पूज्य पश्चाद्धोमं समाचरेत्
पश्चात्तु मण्डलं षष्ठं प्रत्यृचं जुहुयाच्चरुम् १६६
पुष्पाणि च तथा दत्त्वा कुर्य्यादवभृथादिकम्
अशक्तश्चेन्नृसूक्तेन शतमष्टोत्तरं चरुम् १६७
इष्ट्वै वेष्ट्याः फलं सम्यगाप्नोत्येव न संशयः
आनन्तीयामिमामिष्टिं वैकुण्ठपदमाप्नुयात् १६८
न दास्यमीशस्य भवेद्यस्य दास्यं नृणामसत्
तत्र कुर्यादिमामिष्टिं दास्यैकफलसिद्धये १६९
अधुना वैनतेयेष्टिं वक्ष्यामि नृपसत्तम
पञ्चम्यां भानुवारे वा कस्मिंश्चिच्छुभवासरे १७०
उपोष्य पूर्ववत्सर्वं कुर्य्यादभ्युदयादिकम्
स्नात्वाऽर्चयित्वा देवेशं गन्धपुष्पाक्षतादिभिः १७१
लक्ष्म्या सह समासीनं वैकुण्ठभवने शुभे
सर्वमन्त्रमये दिव्ये वाङ्मये परमासने १७२
मन्त्रस्वरै रक्षरैश्च साङ्गैर्वेदैः समन्वितः
तारेण सह सावित्र्या संस्तीर्णे शुभवर्च्चसि १७३
ईश्वर्या च समासीनं सहस्रार्कसमद्युतिम्
चतुर्भुजमुदाराङ्गं कन्दर्पशतसन्निभम्
युवानं पद्मपत्राक्षं चक्रशङ्खगदाङ्गिनम् १७४
वैष्णव्या चैव गायत्र्या पूजयेद्धरिमव्ययम्

श्रियं देवीं नित्यपुष्टां सुभगाञ्च सुलक्षणाम्  १७५
ऐरावतीं वेदवतीं सुकेशीञ्च सुमङ्गलाम्
अर्चयेत्परितो देवीः सुरूपा नित्ययौवनाः  १७६
ततः समर्चयेत्तार्क्ष्यं गरुडं विनतासुतम्
सुपर्णञ्च चतुर्दिक्षु विदिक्षु शक्तयस्तथा  १७७
श्रुतिस्मृतीतिहासाश्च पुराणानीति शक्तयः
अस्त्रादीनीश्वरान् पश्चादर्चयेत् कुसुमाक्षतैः  १७८
धूपं दीपञ्च नैवेद्यं ताम्बूलञ्च समर्चयेत्
अयं हि ते चार्थीति दद्यान्नीराजनं शुभम्  १७९
प्रदक्षिणं नमस्कारं कृत्वा होमं समाचरेत्
वशिष्ठेन च संदृष्टं सप्तमं मण्डलं धुनेत्  १८०
पुष्पाणि च ततो दत्त्वा कुर्य्यादवभृथादिकम्
रदयानादिभङ्गे च वाहनध्वंसने तथा  १८१
अवैदिकक्रियाजुष्टे कुर्यादिष्टिमिमां शुभाम्
अरिष्टे चोपपातेषु शान्त्यर्थमपि वा यजेत्  १८२
इष्ट्याऽनया पूजितेशे रोगसर्पाग्निभिः शमेत्
वैनतेयसमो भूत्वा भवेदनुचरो हरेः  १८३
वैष्वक्सेनीं ततो वक्ष्ये सर्वपापप्रणाशिनीम्
उपोष्यैकादशीं शुद्धां पूर्व्ववत् पूजयेद्धरिम्  १८४
तद्विष्णोरितिमन्त्राभ्यामुपचारैः समर्चयेत्
विष्वक्सेनञ्च सेनेशं सेनान् पञ्च चमूपतिम्  १८५
अर्चयित्वा चतुर्दिक्षु शक्तयश्च बिदिक्षु च
त्रयीं सूत्रवतीं सौम्यां सावित्रीं चार्चयेद्द्विजः
अस्त्रान् दीपांश्च सम्पूज्य होमं पश्चात् समाचरेत्  १८६
कृत्वेध्माधानपर्यन्तमष्टमं मण्डलं यजेत्  १८७
पायसेनाथ पुष्पाणि दद्यात्प्रयतमानसः

अन्ते चावभृथेष्टिञ्च प्रसूनयजनं तथा १८८
ब्राह्मणान् भोजयेच्छक्त्या दक्षिणाभिश्च तोषयेत्
अशक्तो यस्तु वेदेन कर्तुमिष्टिञ्च वैष्णवः १८९
तद्विष्णोरिति मन्त्राभ्यां सहस्रं जुहुयाच्चरुम्
कृत्वा पुष्पाञ्जलिञ्चापि सम्यगिष्टिं लभेन्नरः १९०
वैष्वक्सेनीमिमां हुत्वा विष्वक्सेनसमो भवेत्
प्रभूतधनधान्याढ्यमैश्वर्यं चैव विन्दति १९१
यक्षराक्षसभूतानां तामसानां दिवौकसाम्
अभ्यर्चने तद्दोषस्य विशुद्ध्यर्थमिदं यजेत् १९२
सौदर्शनीं प्रवक्ष्यामि सर्वपापप्रणाशिनीम्
व्यतीपाते वैधृतौ वा समुपोष्यार्चयेद्धरिम् १९३
अखण्डबिल्वपत्रैर्वा कोमलौस्तुलसीदलैः
अर्चयित्वा हृषीकेशं गन्धपुष्पाक्षतादिभिः १९४
पश्चात्समर्चनीयाः स्युः श्रीभूनीलादिमातरः
सुदर्शनसहस्रारं पवित्रं ब्रह्मणस्पतिम् १९५
सहस्रार्कं शतोद्यामं लोकद्वारं हिरण्मयम्
अभ्यर्च्चयेत्क्रमाद्दिक्षु तथा शक्तीः समर्चयेत् १९६
अनिष्टध्वंसिनी माया लज्जा पुष्टिः सरस्वती
प्रकृतीर्जगदाधारा कामधुक् चाष्टशक्तयः १९७
तथा तांश्चैव लोकेशाः पूज्या दिक्षु यथाक्रमात्
अभ्यर्च्य गन्धपुष्पाद्यैर्नैवेद्यैर्विविधैरपि १९८
ऋग्वेदोक्तस्य सूक्तेन ततो नीराजनं हरेः
नवमं मण्डलं पश्चाद्धोतव्यं चरुणा नृप १९९
आज्येन वा तिलैर्वाऽपि बिल्वैर्वाऽपि सरोरुहैः
हुत्वा पुष्पाञ्जलिं दत्त्वा कुर्यादवभृथादिकम् २००
ब्राह्मणान्भोजयेत्पश्चाद्गुरुञ्चापि समर्चयेत्

उद्वाह्य वैष्णवीं कन्यां याचित्वा वैष्णवीं तथा २०१
हुत्वा वा वैष्णवेनैव तथैवाऽऽदित्यभुज्यपि
अन्यलिङ्गधृतौ चापि कुर्यादिष्टिमिमां द्विजः २०२
सौदर्शनेन मन्त्रेण सहस्रं जुहुयाच्चरुम्
पुष्पाणि दत्त्वा साहस्रं सम्यगिष्ट्याः फलं लभेत् २०३
अथ भागवतीमिष्टिं प्रवक्ष्यामि नृपोत्तम
उपोष्यैकादशीं शुद्धां द्वादश्यां पूर्ववद्धरिम् २०४
अर्चयित्वा विधानेन गन्धपुष्पाक्षतादिभिः
पौरुषेण तु सूक्तेन श्रीमदष्टाक्षरेण वा २०५
अर्चयेज्जगतामीशं सर्वाभरणसंयुतम्
ततो भागवतान् सर्वानर्चयेत्परितो द्विजः २०६
पुष्पैर्वा तुलसीपत्रैः सलिलै रक्षतैरपि
प्रह्लादं नारदञ्चैव पुण्डरीकं विभीषणम् २०७
रुक्माङ्गदं तत्सुतञ्च हनूमन्तं शिवं भृगुम्
वशिष्ठं वामदेवञ्च व्यासं शौनकमेव च २०८
मार्कण्डेयं चाम्बरीषं दत्तात्रेयं पराशरम्
रुक्मदाल्भ्यौ कश्यपञ्च हारीतञ्चात्रिमेव च २०९
भरद्वाजं बलिं भीष्ममुद्धवाक्रूरपुष्करान्
गुहं सूतञ्च वाल्मीकं स्वायम्भुवमनुं ध्रुवम् २१०
वैणञ्च रोमशञ्चैव मातंगं शबरीं तथा
सनन्दनञ्च सनकं विघनञ्च सनातनम् २११
वोटुं पञ्चशिखञ्चैव गजेन्द्रञ्च जटायुषम्
सुशीलां त्रिजटां गौरीं शुभां सन्ध्यावलिं तथा २१२
अनसूयां द्रौपदीञ्च यशोदां देवकीं तथा
सुभद्राञ्चैव गोपीश्च शुभा नन्दव्रजे स्थिताः २१३
नन्दं च वसुदेवञ्च दिलीपं दशरथं तथा

कौसल्याञ्चैव जनककन्यामपि च वैष्णवान्  २१४
अर्चयेद्गन्धपुष्पाद्यैर्धूपैर्दीपैर्निवेदनैः
ताम्बूलैर्भक्ष्यभोज्यैश्च दीपैर्नीराजनैरपि  २१५
अहं भुवेति सूक्तेन दद्यान्नीराजनं हरेः
पश्चाद्धोमं प्रकुर्वीत अग्न्याधानादिपूर्ववत्  २१६
दशमं मण्डलं सर्वं प्रत्यृचं जुहुयाद्धविः
तिलमिश्रेण साज्येन चरुणा गोघृतेन वा  २१७
सर्वैश्च वैष्णवैः सूक्तैश्चतुर्भिश्चाष्टोत्तरं शतम्
नामभिश्च चतुर्थ्यन्तैस्तान् सर्वान् वैष्णवान्यजेत्  २१८
पुष्पैरिष्ट्वा चावभृथं प्रसूनेष्टिञ्च कारयेत्
होमं कर्तुमशक्तश्चेद्वेदेन नृपनन्दन  २१९
चतुर्भिर्वैष्णवैर्मन्त्रैः साहस्रं वा पृथक्पृथक्
इमां भागवतीमिष्टिं यः कुर्याद्वैष्णवोत्तमः  २२०
अनन्तगरुडादीनामयमन्यतमो भवेत्
पावमानैर्यदा ऋग्भिरिज्यते मधुसूदनः  २२१
तत्त्वावमानी मुनिभिः प्रोच्यते मधुसूदनः
यदा तु द्वादशी शुक्ला भृगुवासरसंयुता  २२२
तस्यामेव प्रकुर्वीत पाद्मीमिष्टिं द्विजोत्तमः
महाप्रीतिकरं विष्णोः सद्योमुक्तिप्रदायकम्  २२३
तस्यां कृतायामिष्ट्यां तु लक्ष्मीभर्त्ता जनार्दनः
प्रत्यक्षो हि भवेत्तत्र सर्वकामफलप्रदः  २२४
श्रीधरं पूजयेत्तत्र तन्मन्त्रेणैव वैष्णवः
सुवर्णमण्डपे दिव्ये नानारत्नप्रदीपिते  २२५
उदयादित्यसङ्काशे हिरण्ये पङ्कजे शुभे
लक्ष्म्या सह समासीनं कोटिशीतांशुसन्निभम्  २२६
चक्रशङ्खगदापद्मपाणिनं श्रीधरं विभुम्

पीताम्बरधरं विष्णुं वनमालाविराजितम्  २२७
अर्चयेज्जगतामीशं सर्वाभरणभूषितम्
पद्मां पद्मलयां लक्ष्मीं कमलां पद्मसम्भवाम्  २२८
पद्ममाल्यां पद्महस्तां पद्मनाभीं सनातनीम्
प्रागादिषु तथा दिक्षु पूजयेत् कुसुमादिभिः  २२९
अस्त्रादीनीश्वरान्पूज्य नमस्कुर्वीत भक्तितः
ततो नीराजनं दत्त्वा श्रीसूक्तेन तु वैष्णवः  २३०
पुरतो जुहुयादग्नौ पायसं घृतमिश्रितम्
तन्मंत्रैणैव साहस्रं सूक्ताभ्यां सकृदेव हि २३१
हुत्वा मन्त्रेण साहस्रं दद्यात्पुष्पाणि शार्ङ्गिणे
वैष्णवं विप्रमिथुनं पूजयेद्भोजयेत्तथा  २३२
इमां पाद्मीं शुभामिष्टिं यः कुर्याद्वैष्णवोत्तमः
प्रभूतधनधान्याढ्यो महाश्रियमवाप्नुयात्  २३३
सर्वान् कामानवाप्नोति विष्णुलोकं स गच्छति
लक्ष्म्यायुक्तो जगन्नाथः प्रत्यक्षः समभूद्धरिः  २३४
ददाति सकलान् कामानिह लोके परत्र च
पुण्यैः पवित्रदैवत्यैरिज्यते यत्र केशवः  २३५
तां पवित्रेष्टिमित्याहुः सर्वपापप्रणाशिनीम्
यत्ते पवित्रमित्यादि ऋग्भिर्यत्र यजेद्द्विजः  २३६
प्रायश्चित्तार्थं सहसा शान्त्यर्थं वा समाचरेत्
एवं विधानमिष्टीनां सम्यगुक्तं महर्षिभिः  २३७
वैदिकेनैव विधिना यथाशक्त्या समाचरेत्
अवैदिकक्रियाजुष्टं प्रयत्नेन विवर्जयेत्  २३८
क्षीराब्धौ शेषपर्यङ्के बुध्यमाने सनातने
अत्रोत्सवं प्रकुर्वीत पञ्चरात्रं निरन्तरम्  २३९
नद्याश्च पुष्करिण्या वा तीरे रम्यतले शुचौ

मराडपं तत्र कुर्वीत चतुर्भिस्तोरणैर्युतम् २४०
बितानपुष्पमालादि पताकाध्वजशोभितम्
अङ्कुरार्पणपूर्वेण यज्ञवेदिञ्च कल्पयेत् २४१
ऋत्विग्भिः साद्धमाचार्यो दीक्षितो मङ्गलस्वनैः
रथमारोप्य देवेशं छत्रचामरसंयुतम् २४२
पठन्वैशाकुनान् मन्त्रान् यज्ञशालां प्रवेशयेत्
स्वस्तिवाचनपूर्वेण कुर्यात्कौतुकबन्धनम् २४३
पूर्णकुम्भान् शस्ययुतान् पालिकाः परितः क्षिपेत्
अभ्यर्च्य गन्धपुष्पाद्यैः पश्चादावरणं यजेत् २४४
वासुदेवमनन्तञ्च सत्यं यज्ञं तथाऽच्युतम्
महेन्द्रं श्रीपतिं विश्वं पूर्णकुम्भेषु पूजयेत् २४५
पालिकाः सद्दिगीशांश्च दीपिकास्वथ हेतयः
तोरणेषु च चराडाद्याः पूजनीया यथाक्रमम् २४६
वेद्याश्च दक्षिणे भागे कुराडं कुर्यात्सलक्षणम्
निक्षिप्याग्निं विधानेन इध्माधानान्तमाचरेत् २४७
आचार्योपासनाग्नौ वा लौकिके वा नृपोत्तम
आधानं पूर्ववत् कृत्वा पश्चात्कर्म समाचरेत् २४८
प्रातः स्नात्वा विधानेन पूजयित्वा सनातनम्
प्रत्यृच्चं पावमानीभिर्जुहुयात्पायसं शुभम् २४९
वैष्णवैरनुवाकैश्च मन्त्रैः शक्त्या पृथक्पृथक्
चतुर्भिर्व्यापकैश्चान्यै प्रत्येकं जुहुयाद्धृतम् २५०
वैकुराठं पार्षदं हुत्वा होमशेषं समाचरेत्
ताभिरेव च पुष्पाणि दद्याच्च जगताम्पतेः २५१
उद्बोधयित्वा शयने देवदेवं जनार्दनम्
पश्चात्सर्वमिदं कुर्यादुत्सवार्थं द्विजोत्तमः २५२
अथ नावं सुविस्तीर्णां कृत्वा तस्मिन् जले शुभे

पुष्पमराडपचिह्नादि समास्तीर्णसमन्विताम् २५३
सुतोरणवितानाढ्यां पताकाध्वजशोभिताम्
तस्मिन् कनकपर्यङ्के निवेश्य कमलापतिम् २५४
अर्चयित्वा विधानेन लक्ष्म्या सार्द्धं सनातनम्
पुष्पाञ्जलिशतं तत्र मन्त्ररत्नेन कारयेत् २५५
श्रीपौरुषाभ्यां सूक्ताभ्यां दद्यात्पुष्पाञ्जलिं ततः
परितः शक्तयः पूज्यास्तथाऽऽवरणदेवताः २५६
दीपैर्नीराजनं कृत्वा बलिं दद्यात्समन्ततः
नौभिः समन्ताद्बहुभिर्गीतवादित्रसंयुतम् २५७
दीपिकाभिरनेकाभिस्तोत्ररपि मनोरमैः
प्लावयन्तो ऊगन्नाथं तत्र तत्र जलाशये २५८
फलैर्भक्ष्यैश्च ताम्बूलैः कलशैर्दधिमिश्रितैः
कुङ्कमैः कुसुमैर्लाजैर्विकिरन्तः परस्परम् २५९
गानैर्वेदैः पुराणैश्च सेवेत निशि केशवम्
ऋत्विजो वारुणान् सूक्तान् जपेयुस्तत्र भक्तितः २६०
जपेच्च भगवन्मन्त्रान् शान्तिपाठञ्चरेत्तथा
एवं संसेव्य बहुधा रात्रावस्मिन् जलाशये २६१
प्रदेवत्रेति सूक्तेन यज्ञशालां प्रवेशयेत्
तत्र नीराजनं दत्त्वा कुर्यादर्घ्यादिपूजनम् २६२
धृतव्रतेति सूक्तेन तत्र नीराजनं द्विजः २६३
स्नात्वा पूर्ववदभ्यर्च्य हुत्वा पुष्पाञ्जलिं तथा
आशिषोवाचनं कृत्वा भोजयेद्ब्राह्मणान्शुभान् २६४
शाययित्वाऽथ देवेशं भुञ्जीयाद्वाग्यतः स्वयम्
एवं प्रतिदिनं कुर्यादुत्सवं पञ्चवासरम् २६५
अन्ते चावभृथेष्टिं च पुष्पयागञ्च कारयेत्
आचार्य मृत्विजो विप्रान्पूजयेद्दक्षिणादिभिः २६६

एवं क्षीराब्धियजनं प्रत्यब्दं कारयेन्नृप
स्वसम्यगर्थवृद्ध्यर्थं भोगाय कमलापतेः २६७
वृद्ध्यर्थमपि राष्ट्रस्य शत्रूणां नाशनाय च
सर्वधर्मविवृद्ध्यर्थं क्षीराब्धियजनं चरेत्
तत्र दुर्भिक्षरोगाग्निपापबाधा न सन्ति हि २६८
गावः पूर्णदुघा नित्यं बहुलस्य फलाधरा
पुष्पिताः फलिता वृक्षा नार्यो भर्तृपरायणाः २६९
आयुष्मन्तश्च शिशवो जायते भक्तिरच्युते
यः करोति विधानेन यजनं जलशायिनः २७०
क्रतुकोटिफलं तत्र प्राप्नोत्येव न संशयः
यस्त्विदं शृणुयान्नित्यं क्षीराब्धियजनं हरेः २७१
सर्वान् कामानवाप्नोति विष्णुलोकश्च विन्दति
पुष्पिते तु रसाले तु तत्राप्युत्सवमात्मनः २७२
त्रिवासरं प्रकुर्वीत दोलानाम महोत्सवम्
उपोषितः संयतात्मा दीक्षितो माधवं हरिम् २७३
छत्रचामरवादित्रैः पताकैः शिविकां शुभाम्
आरोप्यालङ्कृतं विष्णुं स्वयञ्च समलङ्कृतः २७४
हरिद्रां विकिरन्तो वै गायन्तः परमेश्वरम्
गच्छेयुराद्रुमं प्रातर्नरनारीजनैः सह २७५
तत्राऽऽम्रवृक्षच्छायायां वेद्यांसम्पूजयेद्धरिम्
चूतपुष्पैः सुगन्धीभिर्माधवीभिश्च यूथिकैः २७६
मरीचिमिश्रं दध्यन्नं मोदकञ्च समर्पयेत्
शाष्कुल्यादीनि भक्ष्याणि पानकञ्च निवेदयेत् १७७
सकर्पूरञ्च ताम्बूलं पूगीफलसमन्वितम्
सर्वमावरणं पूज्यं होमं पश्चात्समाचरेत् २७८
कृत्वेध्मानादिपर्यन्तं विष्णुसूक्तैश्चरुं यजेत्

माधवेनैव मनुना शर्करासंयुतान् तिलान् २७९
सहस्त्रं जुहुयाद्वह्नौ भक्त्या वैष्णवसत्तमः
वैकुण्ठं पार्षदं हुत्वा होमशेषं समापयेत् २८०
प्रत्यृचं पावमानीभिर्दद्यात्पुष्पाञ्जलिं हरेः
अथ दोलां शुभाकारां बद्धास्मिन् समलङ्कृताम् २८१
वज्रवैदूर्यमाणिक्यमुक्ताविद्रुमभूषिताम्
तस्यां निवेश्य देवेशं लक्ष्म्या सार्द्धं प्रपूजयेत् २८२
गन्धैः पुष्पैर्धूपदीपैः फलैर्भक्ष्यैर्निवेदनैः
कुसुमाक्षतदूर्वाग्रतिलसर्पिर्मधूदकम् २८३
सर्षपाणि च निक्षिप्य अष्टाङ्गार्घ्यं निवेदयेत्
पादेषु चतुरो वेदान् मन्त्राण्योक्तेषु चास्तरे २८४
नागराजञ्च दोलायां पीठे सर्वस्वैरपि
व्यजनैर्वैनतेयञ्च सावित्रीं चामरे तथा २८५
द्विनिशामर्चयेद्दिक्षु ऊर्ध्वं ब्रह्म बृहस्पतिः
अधस्ताच्चण्डिकां रुद्रं क्षेत्रपालविनायकौ २८६
विताने चन्द्रसूर्यौ च नक्षत्राणि ग्रहांस्तथा
वेदाश्च सेतिहासांश्च पुराणं देवता गणाः २८७
भूधराः सागराः सर्वे पूजनीयाः समन्ततः
एवं सम्पूज्य दोलायां लक्ष्म्या सह जनार्दनम् २८८
दोलयेच्च ततो दोलां चतुर्वेदैश्चतुर्दिनम्
सूक्तैश्च ब्रह्मणोऽपत्यैः सामगानैः प्रबन्धकैः २८९
नामभिः कीर्तयन् देवमेव मन्दं प्रदोलयेत्
स्त्रियं स्वलङ्कृताः सर्वा गायन्त्यो विभुमच्युतम् २९०
चरितं रघुनाथस्य कृष्णस्य चरितं तथा
दोलयेयुर्मुदा भक्त्या दोलायां परमेश्वरम् २९१
दोलाया दर्शनं विष्णोर्महापातकनाशनम्

भक्तिप्रसादनं नृणां जन्ममृत्युनिकृन्तनम्  २९२
देवाः सर्वे विमानस्था दोलायामर्चितं हरिम्
दर्शयन्ति ततः पुण्यं दोलानामोत्सवं हरेः  २८३
भक्त्या नीराजनं दद्यात् श्रीसूक्तेनैव वैष्णवः
ब्राह्मणान् भोजयेत्पश्चाद्दक्षिणाभिश्च तोषयेत्  २९४
एवं त्रिवासरं कुर्यादुत्सवं वैष्णवोत्तमः
प्रद्युम्नमेवं कुर्वीत तत्तत्काले तु वैष्णवः  २९५
श्रौतेनैव च मार्गेण जपहोमपुरःसरम्
उत्सवं वासुदेवस्य यथाशक्त्या समाचरेत्  २९६
यत्र यत्रोत्सवं विष्णोः कर्त्तुमिच्छति वैष्णवः
होमं कुर्यात्तत्र मन्त्रैस्तथाविष्णुप्रकाशकैः  २९७
अतो देवेतिसूक्तेन तथाविष्णोर्नुकेन च
परोमात्रेति सूक्ताभ्यां पौरुषेण च वैष्णवः  २९८
नारायणानुवाकेन श्रीसूक्तेनापि वैष्णवः
प्रत्यृचं जुहुयाद्वह्नौ चरुणा पायसेन वा  २९९
चतुर्भिर्वैष्णवैर्मन्त्रैः पृथगष्टोत्तरं शतम्
आज्यहोमं प्रकुर्वीत गायत्र्या विष्णुसंज्ञया  ३००
वैकुण्ठपार्षदं हुत्वा शेषं पूर्ववदाचरेत्
अनादिष्टेषु सर्वेषु कुर्यादेवं विधानतः  ३०१
ब्राह्मणान् भोजयेद्विप्रान् सर्वं सम्पूर्णतां व्रजेत्
अथवा मन्त्ररत्नेन सहस्त्रं प्रतिवासरम्  ३०२
हुत्वा पुष्पाणि दत्त्वा च शेषं पूर्ववदाचरेत्
होमं विना न कर्तव्यमुत्सवं परमात्मनः  ३०३
जपहोमविहीनन्तु न गृह्णाति जनार्दनः
तस्माच्छ्रौतं प्रवक्ष्यामि विष्णोराराधनं नृप  ३०४
अश्वयुक्कृष्णपक्षे तु सम्यगभ्युदिते रवौ

आदर्शात्सप्तरात्रन्तु पूजयेत्प्रभुमव्ययम्  ३०५
स्नात्वा नद्यां विधानेन कृतकृत्यः समाहितः
गृहीत्वा जलकुम्भन्तु वारुणान् प्रवरान् व्रजेत्  ३०६
पञ्चत्वक्पल्लवान् पुष्पाण्यभिमन्त्र्य विनिक्षिपेत्
सौरभेयीं तथा मुद्रां दर्शयित्वा च पूजयेत्  ३०७
त्रिवारं वैष्णवैर्मन्त्रैः शङ्खेनैवाभिषेचयेत्
पूजयित्वा विधानेन गन्धपुष्पाक्षतादिभिः  ३०८
अपूपान् पायसं शक्तून् कृसरञ्च निवेदयेत्
मन्त्रैरष्टोत्तरशतं दत्त्वा पुष्पाणि चक्रिणः  ३०९
पश्चाद्धोमं प्रकुर्वीत साज्येन चरुणा ततः
कस्य वा नैतिसूक्तेन वैष्णवैरपि वैष्णवः  ३१०
हुत्वा तु मन्त्ररत्नेन घृतमष्टोत्तरं शतम्
वैकुण्ठं पार्षदं हुत्वा वैष्णवान् भोजयेत्ततः  ३११
सकृद्भोजनसंयुक्तः क्षितिशायी भवेन्निशि
सायाह्नेऽपि समभ्यर्च्य जातीपुष्पैः सुगन्धिभिः  ३१२
बहुभिर्दीपदण्डैश्च सेवेरन् पुरवासिनः
एवं महोत्सवं कृत्वा धनधान्ययुतो भवेत्  ३१३
तत्तत्कालोचितं विष्णोरुत्सवं परमात्मनः
द्रव्यहीनोऽपि कुर्वीत पत्रपुष्पैः फलादिभिः  ३१४
समिद्भिर्बिल्वपत्रैर्वा होमं कुर्वीत वैष्णवः
सन्तर्पयेच्च विप्रांस्तु कोमलैस्तुलसीदलैः  ३१५
भक्त्या वै देवदेवेशः परितुष्टो भवेद्ध्रुवम्
आस्तिक्यः श्रद्दधानश्च वियुक्तमदमत्सरः  ३१६
पूजयित्वा जगन्नाथं यावज्जीवमतन्द्रितः
इह भुक्त्वा मनोरम्यान् भोगान् सर्वान् यथेप्सितान्  ३१७
सुखेन देहमुत्सृज्य जीर्णत्वचमिवोरगः

स्थूलसूक्ष्मात्मिकाञ्चेमां विहाय प्रकृतिन्द्रुतम्  ३१८
सारूप्यमीश्वरस्याऽऽशु गत्वा तु स्वजनैः सह
दिव्यं विमानमारुह्य वैकुण्ठं नाम भास्करम्  ३१९
दिव्याप्सरोगणैर्युक्तो दिव्यभूषणभूषितः
स्तूयमानः सुरगणैर्गीयमानश्च किन्नरैः  ३२०
ब्रह्मलोकमतिक्रम्य गत्वा ब्रह्माण्डमण्डपम्
विष्णुचक्रेण वै भित्वा सर्वानावरणान् घनान्  ३२१
अतीत्य वीरजामाशु सर्ववेदस्रवां नदीम्
अभ्युद्गच्छद्भिरव्यग्रैः पूज्यमानः सुरोत्तमैः  ३२२
सम्प्राप्य परमं धाम योगिगम्यं सनातनम्
यद्गत्वा न निवर्तन्ते तद्धाम परमं हरेः  ३२३
तद्विष्णोः परमं धाम सदा पश्यन्ति योगिनः
शीतांशुकोटिसङ्काशैः सर्वैश्च भवनैर्युतम्  ३२४
आरूढयौवनैर्दित्र्यैः पुंभिः स्त्रीभिश्च सङ्कुलम्
सर्वलक्षणसम्पन्नैर्दिव्यभूषणभूषितैः  ३२५
अक्षरं परमं व्योम यस्मिन्देवा अधिष्ठिताः
इरावती धेनुमती व्यस्तभ्नासूयवासिनी  ३२६
यत्र गावो भूरिशृङ्गाः साऽयोध्या देवपूजिता
अनन्तव्यूहलोकैश्च तथा तुल्यशुभावहैः  ३२७
सर्ववेदमयं तत्र मण्डपं सुमनोहरम्
सहस्रस्थूणसदसि ध्रुवे रम्योत्तरे शुभे  ३२८
तस्मिन् मनोरमे पीठे धर्माद्यैः सूरिभिर्वृते
सहाऽऽसीनं कमलया दृष्ट्वा देवं सनातनम्  ३२९
स्तुतिभिः पुष्कलाभिश्च प्रणम्य च पुनः पुनः
प्रहर्षपुलको भूत्वा तेन चाऽऽलिङ्गितः क्रमात्  ३३०
पूजितः सकलैर्भोगैः श्रिया चापि प्रपूजितः

अनन्तविहगेशाद्यैरर्चितः सवदैवतैः ३३१
तेषामन्यतमो भूत्वा मोदते तत्र देववत्
एषु केषु च लोकेषु तिष्ठते कमलापतिः ३३२
तेषु तेष्वपि देवस्य नित्यदासो भवेत्सदा
दासवत्पुत्रवत्तस्य मित्रवद् बन्धुवत्सदा ३३३
अश्नुते सकलान्कामान्सह तेन विपश्चिता
इमान्लोकान् कामभोगः कामरूप्यनुसञ्चरन् ३३४
सर्वदा दूरविध्वस्तदुःखावेशलवांशकः
गुणानुभवजप्रीत्या कुर्याद्दानमशेषतः ३३५
इवमेव परं मोक्षं विदुः परमयोगिनः
काङ्क्षन्ति परमं दासा मुक्तमेकं महर्षयः ३३६
हरेर्दास्यैकपरमां भक्तिमालम्ब्य मानवः
इहैव मुक्तो राजर्षे सर्वकर्मनिबन्धनः ३३७
इति वृद्धहारीतस्मृतौ विशिष्टपरमधर्मशास्त्रे नानाविधोत्सवविधानं नाम सप्तमो ध्यायः

## अष्टमोऽध्यायः

## अथ विष्णुपूजाविधिवर्णनम्

हारीत उवाच
अथ वक्ष्यामि राजेन्द्र विष्णुपूजाविधिं परम् १
श्रौतं महर्षिभिः प्रोक्तं वशिष्ठाद्यैः पुरातनैः
वैखानसैश्च भृग्वाद्यैः सनकाद्यैश्च योगिभिः २
वैष्णवैर्वैदिकैः पूर्वैर्यद्यदाचरितं पुरा
तत्ते वक्ष्यामि राजेन्द्र महाप्रियतमं हरेः ३
ब्राह्मे मुहूर्ते उत्थाय सम्यगाचम्य वारिणा
ध्यात्वा हृत्पङ्कजे विष्णुं पूजयेन्मनसैव तु ४

तं प्रत्तैवेति सूक्तेन बोधयेत्कमलापतिम्
वनस्पतेति सूक्तेन तूर्यघोषं निनादयेत् ५
कुर्यात्प्रदक्षिणं विष्णोरतोदेवेत्यनेन तु
तद्विष्णोरिति मन्त्राभ्यान्त्रिः प्रणम्याऽऽचरेत्ततः ६
कृतशौचस्तथाऽऽचान्तो दन्तधावनपूर्वकम्
स्नानं कुर्याद्विधानेन धात्रीश्रीतुलसीयुतम् ७
नारायणानुवाकेन कृत्वा तत्राघमर्षणम्
कृतकृत्यः शुचिर्भूत्वा तर्पयित्वा च पूर्ववत् ८
धृतोर्ध्वपुण्ड्रदेहश्च पवित्रकर एव च
प्रविश्य मन्दिरं विष्णोः संमार्जन्या विशोधयेत् ९
वास्तोष्पतेति वै सूक्तं जपन् संमार्जयेद्गृहम्
आगाव इति सूक्तेन गोमयेनानुलेपयेत्
आनोभद्रेति सूक्तेन रङ्गवल्लिञ्च निक्षिपेत् १०
ततः कलशमादाय जपन्वै शाकुनीर्ऋचः
गत्वा जलाशयं रम्यं निर्म्मलं शुचि पाण्डुरम् ११
इमं मे गङ्गेति ऋचा जलं भक्त्याऽभिमन्त्रयेत्
आपो अस्मानिति ऋचा कलशं क्षालयेद् द्विजः १२
समुद्र ज्येष्ठमन्त्रेण गृह्णीयात्प्रयतो जलम्
उतस्मेनं वस्तुभिरिति वस्त्रेणाऽऽच्छाद्य वैष्णवः १३
प्रसम्राजेति सूक्तं वै जपन् सम्प्रविशेद् गृहम्
धान्योपरि तथा कुम्भं न्यसेद्दक्षिणतो हरेः १४
इमं मे वरुणेत्यृचा मङ्गलद्रव्यसंयुतम्
अञ्जन्ति त्वेति सूक्तेन कुर्य्यात्पुष्पस्य सञ्चयम् १५
अर्व्वाञ्चि सुभगे द्वाभ्यां गन्धांश्च पेषयेत्तथा
वाग्यतः प्रयतो भूत्वा श्रीसूक्तेनैव वैष्णवः
विश्वानि न इति ऋचा दीपं दद्यात्सुदीपितम् १६

तत्तत्पात्रेषु सलिलं दत्त्वा गन्धांस्तु निक्षिपेत्
शन्नो देव्या च सलिलं गायत्र्या च कुशांस्तथा १७
आयनेति च पुष्पाणि यवोऽसीति ऋचाऽक्षतान्
गन्धद्वारेति वै गन्धा नौषध्या तिलसर्षपान् १८
काण्डात्काण्डेति दूर्वाग्रान् सहिरण्येति रत्नकम्
हिरण्यरूपेति ऋचा हिरण्यं निक्षिपेत्तथा १९
एवं द्रव्याणि निक्षिप्य तुलस्या च समर्पयेत्
सवितुश्चेत्यादि ऋचा दद्यादर्घ्योदकं हरेः २०
श्रियेति पादेति ऋचा दद्यात्पादजलं तथा
भद्रन्ते हस्तेत्यनेन हस्तप्रक्षालनं चरेत् २१
वयः सुपर्णेति ऋचा मुखसम्मार्जनं तथा
आपो अस्मानिति ऋचा वक्त्रगण्डूषमेव च २२
हिरण्यदन्तेत्यनेन दन्तकाष्ठं निवेदयेत्
बृहस्पते प्रथमेति जिह्वालेखनमेव च २३
आपयित्वा उ भेषजीरिति गण्डूषमाचरेत्
आपो हि ष्ठा इत्यनेन कुर्य्यादाचमनीयकम् २४
मूर्धामव इत्यनेन तैलाभ्यङ्गं समाचरेत्
मूर्धानन्दीव इत्यनेन गन्धान् केशेषु लेपयेत्
तद्धियस्तस्थौ केशवन्ते केशान् वै क्षालयेत्पुनः
श्रिये पृश्न इति ऋचा तद्वर्चोद्वर्तनादिकम् २६
आपोयम्बः प्रथममिति सूक्तेनाभ्यङ्गसूचनम्
कृत्वाऽदः स्नापयेत्सूक्तैर्वैष्णवैर्गन्धवारिणा २७
ततः पञ्चामृतैर्गव्यैः स्नापयेत्तत्प्रकाशकैः
आप्यायस्वेत्यृचा क्षीरं दधिक्राव्णेति वै दधि २८
घृतमामिक्षेति घृतं मधुवातेति वै मधु
तत्ते वयं यथा गोभिरित्यृचेक्षुरसं शुभम् २९

एभिः पञ्चामृतैः स्नाप्य चन्दनञ्च निवेदयेत्
श्रीसूक्तपुरुषसूक्ताभ्यां पुनः संस्थापयेद्धरिम्  ३०
वनस्पतेति सूक्तेन कुर्य्याद् घोषसमन्वितम्
श्रिये जात इति ऋचा दद्यान्नीराजनं ततः  ३१
युवा सुवासेति ऋचा वस्त्रेणाङ्गं प्रमार्जयेत्
प्रसेनानेति मन्त्रेण वस्त्रं सम्वेष्टयेत्ततः  ३२
युवं वस्त्राणीति ऋचा उत्तरीयं तथैव च
सर्वत्राऽऽचमनं दद्याच्छन्नो देवीत्यृचा च तु  ३३
उपवीतं ततो दद्याद्ब्राह्मणानिति वै ऋचा
ऋतस्य तन्तुवितते दद्यात्कुशपवित्रकम्  ३४
पश्चादाचमनं दद्याद् भूषणैर्भूषयेद्धरिम्
विश्वजित्सूक्तेन दद्याद्भूषणानि शुभानि वै  ३५
हिरण्यकेशेति ऋचा केशान् संशोषयेत्तथा
सुपुष्पैः कवरीं दद्याद्विहिसोतेत्यनेन वै  ३६
कृपायमिन्द्र ते रथ इत्यृचा तिलकं शुभम्
गन्धञ्च लेपयेद्गात्रे गन्धद्वारेति वै ऋचा  ३७
त्रातारमिन्द्र इत्यृचा पुष्पमालां समर्पयेत्
चक्षुषः पितेति ऋचा चक्षुषो रञ्जनं शुभम्  ३८
सहस्रशीर्षेति ऋचा किरीटं शिरसि क्षिपेत्
ऋक्सामाभ्यामिति श्रोत्रे कुण्डले मा करेऽर्पयेत्  ३९
दमून्सौ उपस इति केयूरादिविभूषणम्
आश्वेते यस्येति ऋचा हाराणि विमलानि च  ४०
हस्ताभ्यां दशशाखाभ्यामित्यृचा चाङ्गुलीयकम्
अस्य त्रिपूर्णमधुना सूर्य्याके विन्यसेच्छुभे  ४१
इदन्त्वदुत्तर इति कटिसूत्रं सुरोचिषम्
स्वस्तिदा विशस्पतिरित्यायुधानि समर्पयेत्  ४२

द्यौर्नय इन्द्रेति दद्याच्छत्रं सुविमलं तथा
सोमः पवर्ततेत्यृचा चामरं हैममुत्तमम् ४३
सोमापूषणेत्यृचा तालवृन्तौ सुवर्चसौ
रूपं रूपमिति ऋचा दद्यादादर्शनं शुभम् ४४
इन्द्रमेव धीषणेति ऋचाऽऽसने विनिवेशयेत्
इहैवास्तमेति ऋचा दद्याच्च कुशविष्टरम् ४५
आपस्वन्तरिति ऋचा पाद्यं दद्याच्च भक्तितः
गौरीमिमाय सूक्तेन अर्घ्यं हस्ते निवेदयेत् ४६
नतमंहो न दुरितमित्याचमनं समर्पयेत्
पिवासोममित्यनेन मधुपर्कञ्च प्राशयेत् ४७
अपस्वग्ने सधिष्टवेति पुनराचमनं चरेत्
अर्चन्तस्त्वाहवामहेत्यक्षतैरर्चयेच्छुभैः ४८
तण्डुलाः सहरिद्रास्तु अक्षता इति कीर्तिताः
विष्णोर्नुकमिति सूक्तेन धूपं दद्याद्धृतान्वितम् ४९
भावामितेति सूक्तेन दीपान्नीराजयेच्छुभान्
इदन्ते पात्रमिति भाजनं विन्यसेच्छुभम् ५०
तस्मा अरङ्गमामवेति पात्रप्रक्षालनं चरेत्
अस्मिन् पदे परमिति गवाज्येनाभिपूरयेत्
पितुं नुस्तोषमिति सूक्तेन दद्यादन्नादिकं हविः ५१
तदस्यानिकमिति ऋचा सहिरण्यं घृतं तथा
तस्मिन् रायवतय इति दद्यादापोशने घृतम् ५२
ततः प्राणाद्याहुतयो होतव्याः परमात्मनि
अग्ने विवस्वदुषस इति पञ्चभिश्च यथाक्रमम् ५३
समुद्रा दूर्मीति सूक्तेन घृतधाराः समाचरेत्
परोमात्रेति सूक्तेन भोजयेत्सश्रियं हरिम् ५४
तुभ्यं हिन्वान इत्यनेन वयः सर्वं निवेदयेत्

इन्द्र पीवेत्यनेन दद्यादापोशनं पुनः ५५
प्रत आश्विनि पवमानेत्यृचा हस्तप्रक्षालनं चरेत्
सरस्वतीं देवयन्त इति तिसृभिर्गण्डूषमेव च ५६
वृष्टिं दिवीशः तद्धारेति दद्यादाचमनं ततः
शिशुं जिज्ञाग्निनमिति ऋचा मुखहस्तौ च मार्जयेत् ५७
दक्षिणावतामिति ऋचा दद्यात्ताम्बूलमुत्तमम्
स्वादुः पवस्वेति ऋचा दद्यादाचमनं पुनः
आऽयं गौरिति सूक्ताभ्यां दद्यात्पुष्पाञ्जलिं ततः ५८
दीपन्नीराजयेत्पश्चाद् घृतसूक्तेन वैष्णवः
यत इन्द्रेत्यादि षड्भिर्दिक्षु रक्षां प्रदापयेत् ५९
यज्ञो देवानामिति सूक्तेन उपस्थानजपं चरेत्
तद्विष्णोरिति द्वाभ्यां प्रणमेच्चैव भक्तितः ६०
गौरीमिमायेति ऋचा दद्यादाचमनन्ततः
सहस्रनामभिः स्तुत्वा पश्चाद्धोमं समाचरेत् ६१
प्रातरौपासनं हुत्वा तस्मिन्नग्नौ जनार्दनम्
ध्यात्वा संपूज्य जुहुयाद्वैष्णवैः प्रत्यृचं हविः ६२
श्रीभूसूक्ताभ्यामपि च हुत्वा घृतयुतं हविः
याभिः सोमो मोदतेत्यनेन मातृभ्यां जुहुयाद्धविः ६३
किंस्विद्वनमित्यानन्तं जुहुयाद्धविः
सुपर्णं विप्रा इति ऋचा सुपर्णाय महात्मने ६४
चमूष च्छ्येन इति च सेनेशायापि हूयताम्
पवित्रन्त इति द्वाभ्याञ्चक्रायामिततेजसे ६५
स्वादुषं स इति ऋचा हेतिभ्यो जुहुयाद्धविः
इन्द्रश्रेष्ठानितीन्द्राय अग्निमूर्धेति पावकम् ६६
यमाय सोमेति यमन्नैर्ऋतं मोषुणेत्यृचा
यच्चिद्धितेति वरुणं वायवायाहीति मारुतम्

द्रविणोदा ददातु नाद्रविणाद्याशमेव च ६७
त्र्यम्बकऋृचा रुद्र मानः प्रजां प्रजापतिम्
यज्ञेनेत्यृचा साध्येभ्यो मरुतो यद्धवेति च ६९
योनः सपत्नेति ऋृचा वसुरुद्रेभ्य एव च
विश्वेदेवाः स चतसृभिर्ये देवा स ऋृचा तथा ६९
सर्वेभ्यश्चैव देवेभ्यो जुहुयादन्नमुत्तमम्
नासत्याभ्यामिति ऋृचा अश्विच्छन्दोभ्य एव च ७०
सोमपूषेति ऋृचा सूर्य्याचन्द्रमसोस्तथा
संसमिद्युदसूक्तेन वैष्णवेभ्यस्तथापुनः ७१
ततः स्विष्टकृतं हुत्वा भुक्तेभ्यश्च बलिं क्षिपेत्
नमो महद्ध्य ऋृचा बलिं भुवि विनिक्षिपेत् ७२
आचम्य वारिणा पश्चान्मन्त्रयागं समाचरेत्
एतच्छ्रौतं नृपश्रेष्ठ मुनिभिः सम्प्रकीर्तितम् ७३
सम्यगुक्तं मया तेऽद्य निश्चितं मतमुत्तमम्
एतत्प्रियतमं विष्णोः स्त्रियो नाथस्य सर्वदा ७४
श्रौतेनैव हरिं देवमर्चयन्ति मनीषिणः
श्रौतस्मार्त्तागमैर्विष्णोस्त्रिविधं पूजनं स्मृतम् ७५
एतच्छ्रौतं ततः स्मार्त्तं पौरुषेण च यत्स्मृतम्
मन्त्रैरष्टाक्षराद्यैस्तु तद्दिव्यागममुच्यते ७६
श्रौतमेव विशिष्टं स्यात्तेषां नृपवरोत्तम
श्रौतमेव तथा विप्राः प्रकुर्वन्ति जनार्दने ७७
यजन्ति केचित्त्रितयन्त्रिसन्ध्यासु च देशिकाः
यजन्ति केचित्त्रितयन्त्रयो वर्णा द्विजोत्तमाः ७८
शुश्रूषा च तथा नामकीर्तनं शूद्रजन्मनः
अपि वा परमेकान्ति बालकृष्णवपुर्हरिम् ७९
स्त्रीणामप्यर्चनीयः स्यात्स्ववर्णस्याऽऽनुरूपतः

मन्त्ररत्नेन वै पूज्यो हित्वा श्रौतं विधानतः ८०
एवमभ्यर्च्चनं विष्णोर्मुनिभिः सम्प्रकीर्तितम्
श्रौतस्मार्तागमोक्ताश्च नित्यनैमित्तिकाः क्रियाः ८१
प्रायश्चित्तमकृत्यानां दण्डमप्याततायिनाम्
अधुना सम्प्रवक्ष्यामि वृत्तिमैकान्तिलक्षणाम् ८२
नारीणामपि कर्तव्या अहन्यहनि शाश्वतीम्
उत्थाय पश्चिमे यामे भर्त्तुः पूर्वमतन्द्रिताः ८३
कृत्वा शौचं विधानेन दन्तधावनमाचरेत्
कृत्वाऽथ मङ्गलस्नानं धृत्वा शुक्लाम्बरं तथा ८४
आचम्य धारयेदूर्ध्वपुण्ड्रं शुभ्रं मृदैव तु
चन्दनेनापि कस्तूर्य्याः कुङ्कुमेनापि वाऽसति ८५
जप्त्वा मन्त्रं गुरुं पश्चादभिनन्द्य च वैष्णवान्
नमस्कृत्वा जगन्नाथं जप्त्वा च शरणागतिम् ८६
आत्मानं समलङ्कृत्य चिन्तयेन्मधुसूदनम्
गृहभाण्डादिकं सर्वं वाग्यता नियतेन्द्रियाः ८७
संशोधयेत्प्रतिदिनं यज्ञार्थं परमात्मनः
मार्जयित्वा गृहं पश्चाद्गोमयेनानुलिप्य च ८८
रङ्गवल्ल्यादिभिः पश्चादलङ्कृत्य समन्वतः
चतुर्विधानां भाण्डानां क्षालनन्तु समाचरेत् ८९
पाचकानि बहिष्ठानि जलस्याऽऽनयनानि च
स्थापनानि जलार्थं वा चतुर्विधमुदाहृतम् ९०
पृथक्पृथगुदञ्चानि तेषु तेष्वपि विन्यसेत्
नान्योन्यं सङ्करं कुर्याद्भाण्डानां सर्वकर्मसु ९१
तानि तानि स्पृशेत्पाणिं प्रक्षाल्यैव पुनः पुनः
सम्यक्प्रक्षाल्य भाण्डानि दाहयेद्यज्ञियैस्तृणैः ९२
पुनः प्रक्षाल्य सन्तप्त्वा पश्चात्पचनमाचरेत्

रसभाण्डानि सर्व्वाणि क्षालयेदुष्णवारिणा ९३
चतुर्भिः पञ्चभिर्ध्यात्वा स्रुक्स्रुवौ क्षालयेत्तदा
बहिर्न निष्क्रामयीत पाचकानि गृहान्तिकात् ९४
ताभिरेव तु दद्यात्तु भुञ्जीत हि कथञ्चन
दत्त्वा पात्रान्तरे दद्यात्कांस्येवा मृण्मयेऽपि वा ९५
पुटे पर्णमये वाऽपि दद्यादत्र तु वैष्णवे
स्रुवं दारुमयं कांस्यं कुर्व्वीतायोमयं न तु ९६
न दद्यादारनालस्य घटं तस्मिन् महावने
आरनालस्य यत्कुम्भन्त्यजेन्मद्यघटं यथा ९७
आरनालङ्क्षारशाकं करञ्जं तिलपिष्टकम्
लशुनं मूलकं शिग्रुं छत्रां कोशातकीफलम्
अलाबुञ्चान्त्रं शाकञ्च करनिर्मथितं दधि ९८
बिम्बं बिड्जञ्च निर्यासं पीलुं श्लेष्मातकं फलम्
आरगधञ्च निर्गुण्डीं कालिङ्गन्नालिकां तथा ९९
नालिकेर्याख्यशाकञ्च श्वेतवृन्ताकमेव च
उष्ट्राविमानुषीक्षीरमवत्सानिर्दशाहगोः १००
एतान्यकामतः स्पृष्ट्वा सवासा जलमाविशेत्
मत्या जग्ध्वा व्रतं कुर्यान्मुर्ज जग्ध्वा पतेदधः १०१
केशानां रञ्जनार्थं वा न स्पृशेदारनालकम्
चन्दनं घनसारं वा मकरन्दमथापि वा १०२
माषमुद्गादिचूर्णं वा तक्रं जाम्वीरमेव वा
तिन्तिडञ्च कलायं वा केशरञ्जनमाचरेत् १०३
ऊर्ध्वं मासात्त्यजेत्सर्वं मृद्भाण्डं वैष्णवोत्तमः
न त्यजेल्लोहभाण्डानि तापयेच्च हुताशने १०४
दारूणां सन्त्यजेद्वाऽपि तक्षणं वा समाचरेत्
अश्मनामश्मभिर्ध्यात्वा गोबालैर्घर्षयेत्तथा १०५

सूतके मृतके वाऽपि शुनादिस्पर्शने तथा
स्पर्शने वाऽप्यभक्ष्याणां सद्य एव परित्यजेत्
एवं संशोध्य भाण्डानि यज्ञार्थं याचयेद्धविः १०६
सम्प्रोक्ष्याद्भिः शुचौ देशे धान्यं संशोधयेद्बुधः
अवहन्याच्छुभतरं गायन्ति मधुसूदनम् १०७
संशोध्य तण्डुलान् पश्चादद्भिः संक्षालयेत्त्रिभिः
अम्भस्त्रिवारं वस्त्रेण शोधयित्वा घटान्तरे १०८
कुशेनैव पवित्रेण तण्डुलान् निर्वपेच्छुभान्
अन्तर्धाय कुशं तत्र मन्त्ररत्नमनुस्मरन् १०९
पाचयेत्सपवित्रेण वाग्यतो नियतेन्द्रियः
उपविश्य शुभे कुण्डे वह्निं प्रज्वालयेत्ततः ११०
अवैष्णवस्य शूद्रस्य पतितस्य तथैव च
पाषण्डस्याप्यशुद्धस्य गृहेष्वग्निं विवर्जयेत् १११
सम्प्रोक्ष्य मन्त्ररत्नेन वह्निं कुशजलैस्त्रिभिः
यज्ञियैर्विमलैः काष्ठैर्व्यजनेन प्रदीपयेत् ११२
सान्तर्धानमुखेनापि धमयित्वा प्रदीपयेत्
पालाशैर्खादिरैर्बिल्वैर्गोशकृत्पिटकैरपि ११३
अन्यैर्वा यज्ञियैः काष्ठैस्तृणैर्वा यज्ञियैः शुभैः
वर्जयेन्मद्यदिग्धानि तथा वैभीतकानि च ११४
आरग्वधानि शिग्रूणि तथा नैर्गुण्डकानि च
नैपानि च कपित्थानि कार्पासैरण्डकानि च ११५
अमेध्यानि सकीटानि दौर्गन्धानि तथैव च
असद्वाहानि चैत्यानि काकखट्वासनानि च ११६
देवालयानि यौप्यानि तथोपकरणानि च
महिषोष्ट्रखरादीनां कारीषपीठकानि च ११७
अन्यानां पाकशेषाणि वर्जयेद्यज्ञकर्म्माणि

प्रदीप्याग्निं ततोऽन्नाद्यं पच्यान्नियतमानसः ११८
चिन्तयन् परमात्मानं जपन्मन्त्रद्वयं तथा
शुद्धं हृद्यं तथा रुच्यं पश्चादभ्यन्तरं शुभम् ११९
निषिद्धानि च शाकानि फलमूलानि वर्जयेत्
अतिरूक्षञ्चातिदुष्टमतिरक्तञ्च वर्जयेत् १२०
भावदुष्टं क्रियादुष्टं कालदुष्टं तथैव च
संसर्गदुष्टमपि च वर्जयेद्यज्ञकर्म्मणि १२१
रूपतो गन्धतो वाऽपि यच्चाभक्ष्यैः समम्भवेत्
भावदुष्टञ्च यत्प्रोक्तं मुनिभिर्धर्म्मपारगैः १२२
आरनालञ्च मद्यञ्च करनिर्म्मथितं दधि
हस्तदत्तञ्च लवणं क्षीरं घृतपयांसि च १२३
हस्तेनोद्धृत्य यत्तोयं पीतं वक्त्रेण बकदा
शब्देन पीतं भुक्तञ्च गव्यं ताम्रेण संयुतम् १२४
क्षीरञ्च लवणोन्मिश्रं क्रियादुष्टमिहोच्यते
एकादश्यां तु यच्चान्नं यच्चान्नं राहुदर्शने
सूतके मृतके चान्नं शुष्कं पर्युषितं तथा १२५
अनिर्दशाहगोःक्षीरं षष्ठ्यां तैलं तथाऽपि च
नदीष्वसमुद्रगासु सिंहकर्कटयोर्जलम् १२६
निःशेषजलवाप्यादौ यत्प्रविष्टं नवोदकम्
नातीतपञ्चरात्रं तत्कालदुष्टमिहोच्यते १२७
शैवपाषण्डपतितैर्विकर्मस्थैर्निरीश्वरैः
अवैष्णवैर्द्विजैः शूद्रैर्हरिवासरभोक्तृभिः १२८
श्वकाकसूकरोष्ट्राद्यैरुदक्यासूतिकादिभिः
पुंश्चलीभिश्च नारीभिर्वृषलीपतिभिस्तथा १२९
दृष्टं स्पृष्टं च दत्तं च भुक्तशेषं तथैव च
अभक्ष्याणां च संयुक्तं संसर्ग दुष्टमुच्यते १३०

बिम्बं शिग्रु च कालिङ्गं तिलपिष्टञ्च मूलकम्
कोशातकीमलाबुञ्च तथा कट्फलमेव च १३१
शालिका नालिकेत्यादिजातिदुष्टमिहोच्यते
एवं सर्वाण्यभक्ष्याणि तत्सङ्गान्यपि संत्यजेत् १३२
तथैवाभक्ष्यभोक्तृणां हरिवासरभोजिनाम्
लोकायतिकविप्राणां देवतान्तरसेविनाम् १३३
अवैष्णवानामपि च संसर्गं दूरतस्त्यजेत् १३४
पक्वान्नाद्यं यथा पक्वं वाग्यतो नियतेन्द्रियः
सम्मार्जयेच्छुभतरं वारिणा वाससैव च १३५
करकैरपिधायाथ चक्रेणैवाङ्कयेत्ततः
गन्धेन वा हरिद्रेण जलेनाप्यथ वा लिखेत् १३६
सुदर्शनं पाञ्चजन्यं भाण्डानां यज्ञयोगिनाम्
कुशोत्तरे शुचौ देशे विन्यस्य कुशवारिणा १३७
संप्रोक्ष्य मन्त्ररत्नेन वस्त्रेणाऽऽच्छादयेत्ततः
क्षालयित्वाऽथ देवस्य भाजनानि शुभैर्जलैः ३३८
अभिपूर्यं ततो दद्याद्भोजयेच्च विशेषतः
भोजयेदागतान् काले सखिसम्बन्धिबान्धवान् १३९
बालान् वृद्धान् भोजयित्वा भर्तारं भोजयेत्ततः
स्वयं हृष्टा ततोऽश्नीयाद्भर्तुर्भुक्तावशेषितम् १४०
पशाचिकानां यक्षाणां शक्तानां लिङ्गधारिणाम्
द्वादशीविमुखानां च संलापादि विवर्जयेत् १४१
शैवबौद्धस्कान्दशाक्तस्थानानि न विशेत् क्वचित्
वर्जयेत्तत्समीपस्थं जलपुष्पफलादि च १४२
न निरीक्षेत देवानामुत्सवादि कदाचन
स्तुतिं वाऽप्यन्यदेवानां न कुर्याच्छृणुयान्न च १४३
कामप्रसङ्गसंलापान् परिहासादि वर्जयेत्

अन्यचिह्नाङ्कितं वस्त्रं भूषणासनभाजनम् १४४
वृद्धं पशुं कूपगृहान् भाण्डं चैव विवर्जयेत्
अन्यालये हरिं दृष्ट्वा देवतान्तरसंसदि १४५
नार्चयेन्नप्रणमेच्च तीर्थसेवां विवर्जयेत्
अवैष्णवस्य हस्तात्तु दिव्यदेशादुपागतम् १४६
हरेः प्रसादतीर्थाद्यं यत्नेन परिवर्जयेत्
आकारत्रयसम्पन्नो नवेज्याकर्म्मणि स्थितः १४७
विष्णोरनन्यशेषत्वं तथैवानन्यसाधनम्
तथैवानन्यभोग्यत्वमाकारत्रयमुच्यते
अर्चनं मन्त्रपठनं ध्यानं होमश्च वन्दनम्
स्तुतिर्योगः समाधिश्च तथा मन्त्रार्थचिन्तनम् १४९
एवं नवविधा प्रोक्ता चेज्या वैष्णवसत्तमैः
प्राप्यस्य ब्रह्मणो रूपं प्राप्यञ्च प्रत्यगात्मनः १५०
प्राप्त्युपायं फलञ्चैव तथा प्राप्तिविरोधि च
ज्ञातव्यमेतदर्थस्य पञ्चकं मन्त्रवित्तमैः १५१
जगतः करणत्वं च तथा स्वामित्वमेव च
श्रीशत्वं सगुरुत्वञ्च ब्रह्मणो रूपमुच्यते १५२
देहेन्द्रियादिभ्योऽन्यत्वं नित्यत्वादिगुणौघता
श्रीहरेर्दास्य धर्मत्वं स्वरूपं प्रत्यगात्मनः १५३
उपायाध्यवसायेन त्यक्त्वा कर्मौघमात्मनः
हरेः कृपाबलम्बित्वं प्राप्त्युपायमिहोच्यते १५४
सर्वैश्वर्यफलं त्यक्त्वा शब्दादिविषयानपि
दास्यैकसुखसङ्गित्वं विष्णोः फलमिहोच्यते १५५
तज्जनस्यापराधित्वं शब्दादिष्वनुरक्तता
कृत्यस्य च परित्यागो ह्यकृत्यकरणं तथा १५६
द्वादशीविमुखत्वं च विरोधि स्यात् फलस्य हि

अर्थपञ्चकमेतद्धि ज्ञातव्यं स्यान्मुमुक्षुभिः १५७
विहितं सकलं कर्म विष्णोराराधनं परम्
निबोध तन्नृपश्रेष्ठ भोगार्थं परमात्मनः १५८
वृत्त्याख्यस्य तरोरस्य सुदृढं मूलमुच्यते
त्यागेन चैव धर्मय निषिद्धाचरणेन च १५९
आज्ञातिक्रमणाद्विज्ञः पतत्येव न संशयः
ज्योतिष्टोमादयः सर्वे यज्ञा वेदेषु कीर्तिताः १६०
पुण्यव्रताः पुराणोक्ता दाना नैमित्तिकादिषु
विष्णोर्भोगतया सर्वाः कर्तव्या वैष्णवोत्तमैः १६१
यस्तूपायतया कृत्यं नित्यनैमित्तिकादिकम्
सत्कृत्यं कुरुते विष्णोर्वैष्णवः स उदीरितः १६२
विष्णोरज्ञतया यस्तु सत्कृत्यं कुरुते बुधः
स एकान्तीति मुनिभिः प्रोच्यते वैष्णवोत्तमः १६३
यस्तु भोगतया विष्णोः सत्कृत्यं कुरुते सदा
स भवेत्परमैकान्ती महाभागवतोत्तमः १६४
वर्जनीयमकृत्यन्तु सर्वेषां करणैस्त्रिभिः
अकामतस्तु यत्प्राप्तं प्रायश्चित्ताद्विनश्यति १६३
अकृत्यं वैष्णवैः पापबुध्या शास्त्रविरोधितः
एकान्त परमैकान्ति रुच्यभावाच्च सन्त्यजेत् १६६
श्रुतिस्मृत्युदितं धर्मं यस्त्यजेद्वैष्णवाधमः
स पाषण्डीति विज्ञेयः सर्वलोकेषु गर्हितः १६७
अकृत्यकरणाद्वाऽपि कृत्यस्याकरणादपि
द्वादशीविमुखत्वेन पतत्येव न संशयः १६८
तस्मात्सर्वप्रयत्नेन सत्कृत्यं सर्वदा चरेत्
आज्ञातिक्रमणाद्विष्णोर्मुक्तोऽपि विनिबध्यते १६९
समस्तयज्ञभोक्तारं ज्ञात्वा विष्णुं सनातनम्

दैवं पैत्रं तथा यज्ञं कुर्यान्नतु परित्यजेत्  १७०
त्रिदराडमवलम्बन्ते यतयो ये महाधियः
तेषामपि हि कर्तव्यं सत्कृत्यमितरेषु किम्  १७१
ब्रह्म ब्रह्मा ब्राह्मणाश्च त्रितयं ब्राह्ममुच्यते
तस्माद्ब्राह्मेणविधिना परं ब्रह्माणमर्चयेत्  १७२
समस्तयज्ञभोक्तारमज्ञात्वा विष्णुमव्ययम्
वेदोदितं यः कुरुते स लोकायतिकः स्मृतः  १७३
यस्तु वेदोदितं धर्मन्त्यक्त्वा विष्णुं समर्चयेत्
स पाषराडत्वमापन्नो नरकं प्रतिपद्यते  १७४
वेदाः प्राणा भगवतो वासुदेवस्य सर्वदा
तदुक्तकर्माकुर्वाणः प्राणहर्ता भवेद्धरेः  १७५
विष्णोराराधनाद्वेदं विना यस्त्वन्यकर्मणि
प्रयुञ्जीत विमूढात्मा वेदहन्ता न संशयः  १७६
वत्सं माता लेढि यथा तथा लेढि स मातरम्
श्रुतं विष्णोः प्रियं ज्ञात्वा विष्णुं वेदेन वै यजेत्  १७७
तस्माद्वेदस्य विष्णोश्च संयोगो यस्तु दृश्यते
स एव परमो धर्मो वैष्णवानां यथा नृप  १७८
कश्चित् पुरा नृपश्रेष्ठ काश्यपो ब्राह्मणोत्तमः
शारिडल्य इति विख्यातः सर्वशास्त्रविशारदः  १७९
स तु धर्मप्रसङ्गेन विष्णोराराधनं प्रति
अवैदिकेन विधिना कृतवान् धर्मसंहिताम्  १८०
अवलम्ब्य मतं तस्य केचिदत्र महर्षयः
अवैदिकेन मार्गेण पूजयन्ति स्म केशवम्  १८१
अशास्त्रविहितं धर्मं सर्वे कुर्वन्ति मानवाः
स्वाहास्वधावषट्कारवर्जितं स्यान्महीतलम्  १८२
ततः क्रुद्धो जगन्नाथः शङ्खचक्रगदाधरः

इदमाह मुनिश्रेष्ठं शाण्डिल्यममितौजसम्  १८३
दुर्बुद्धे मामकं धर्मं परमं वैदिकं महत्
अवैदिकक्रियाजुष्टं प्रागल्भ्यात्कृतवानसि  १८४
यस्मादवैदिकं धर्मं प्रवर्तयसि मां द्विज
तस्मादवैदिकं लोकं निरयं गच्छ दारुणम्  १८५
तद्वाक्यादेव देवस्य शाण्डिल्योऽभूद्भयाकुलः
स्तुवन् प्राह जगन्नाथं प्रणिपत्य पुनः पुनः  १८६
त्राहि त्राहीहि लोकेश मां विभो सापराधिनम्
ततः स कृपया विष्णुर्भगवान् भूतभावनः  १८७
दिव्यवर्षशतं विप्र भुक्त्वा नरकयातनाम्
उत्पत्स्यसे भृगोवशे जमदाग्निरितीरितः  १८८
तत्राऽऽराध्य पुनमा तु वैदिकेनैव धर्मतः
गच्छ तस्मिन् मुनिश्रेष्ट मम लोकं सुनिर्मलम्  १८९
इत्युक्त्वा भगवान्विष्णुस्तत्रैवान्तरधीयत
शाण्डिल्यो निरयं प्राप्य पुनरुत्पद्य भूतले  १९०
वेदोक्तविधिना विष्णुमर्चयित्वा सनातनम्
विशुद्धभावात्सम्प्राप्य तद्धाम परमं हरेः  १९१
तस्मादवैदिकं धर्मं दूरतः परिवर्जयेत्
वैदिकेनैव विधिना भक्त्या सम्पूजयेद्धरिम्  १९२
श्रौतेन विधिना चक्रं धृत्वा वै बाहुमूलयोः
धृतोर्ध्वपुण्ड्रः शुद्धात्मा विधिनैवार्चयेद्धरिम्  १९३
कर्मणा मनसा वाचा न प्रमाद्येत् सनातनात्
न प्रमाद्येत्परं धर्मात् श्रुतिस्मृत्युक्तगौरवात्  १९४
सुशीलन्तु परं धर्मं नारीणां नृपसत्तम
शीलभङ्गेन नारीणां यमलोकः सुदारुणः  १९५
मृते जीवति वा पत्यौ या नान्यमुपगच्छति

सैव कीर्तिमवाप्नोति मोदते रमया सह १९६
पतिं या नातिचरति मनोवाक्कायकर्मभिः
सा भर्तृलोकमाप्नोति यथैवारुन्धती तथा १९७
आर्ताऽऽर्ते मुदिते हृष्टा प्रोषिते मलिना कृशा
मृते म्रियेत या पत्यौ सा स्त्री ज्ञेया पतिव्रता १९८
या स्त्री मृतं परिष्वज्य दग्धा चेद्धव्यवाहने
सा भर्तृलोकमाप्नोति हरिणा कमला यथा १९९
ब्रह्मघ्नं वा सुरापं वा कृतघ्नं वाऽपि मानवम्
यमादाय मृता नारी तं भर्त्तारं पुनाति हि २००
साध्वीनामिह नारीणामग्निप्रपतनादृते
नान्यो धर्मोऽस्ति विज्ञेयो मृते भर्तरि कुत्रचित् २०१
वैष्णवं पतिमादाय या दग्धा हव्यवाहने
सा वैष्णवपदं याति यत्र गच्छन्ति योगिनः २०२
मृते भर्तरि या नारी भवेद्यदि रजस्वला
चिताग्निसंग्रहे तावत्स्नात्वा तस्मिन् प्रवेशयेत् २०३
गर्भिणी नानुगन्तव्या मृतं भर्त्तारमव्यया
ब्रह्मचर्यव्रतं कुर्याद्यावज्जीवमतन्द्रिता २०४
केशरञ्जनताम्बूलगन्धपुत्र्यादिसेवनम्
भूषितं रङ्गवस्त्रञ्च कांस्यपात्रे च भोजनम् २०५
द्विवारं भोजनञ्चाद्दणोरञ्जनं वर्जयेत्सदा
स्नात्वा शुक्लाम्बरधरा जितक्रोधा जितेन्द्रिया २०६
न कल्क कुहका साध्वी तन्द्रालस्य विवर्जिता
सुनिर्मला शुभाचारा नित्यं सम्पूजयेद्धरिम् २०७
क्षितिशायी भवेद्रात्रौ शुचौ देशे कुशोत्तरे
ध्यानयोगपरा नित्यं सतां सङ्गे व्यवस्थिता २०८
तपश्चरणसंयुक्ता यावज्जीवं समाचरेत्

तावत्तिष्ठेन्निराहारा भवेद्यदि रजस्वला २०९
सभर्तृका सती वाऽपि पाणिपूरान्नभोजनम्
एकवारं समश्नीयाद्रजसा च परिप्लुता २१०
एवं सुनियताहारा सम्यग्व्रतपरायणा
भर्त्रा सह समाप्नोति वैकुण्ठपदमव्ययम् २११
दग्धव्या साऽग्निहोत्रेण भर्त्तुः पूर्वं मृता तु या
स्वांशमग्निं समादाय भर्त्ता पूर्ववदाचरेत् २१२
कृत्वा कुशमयीं पत्नी यावज्जीवमतन्द्रितः
जुहुयादग्निहोत्रं तु पञ्चयज्ञादिकं तथा २१३
अथ च प्रव्रजेद्विद्वान् कन्यां वाऽपि समुद्वहेत्
प्रव्रज्यामपि कुर्वीत कर्म वेदोदितं महत् २१४
आत्मन्यग्निं समारोप्य जुहुयादात्मवान् सदा
मनसा वा प्रकुर्वीत नित्यनैमित्तिकक्रियाः २१५
गृहस्थो वा वनस्थो वा यतिर्वाऽपि भवेद्द्विजः
अनाश्रमी न तिष्ठेत यावज्जीवं द्विजोत्तमः २१६
वर्णाश्रमेषु सर्वेषां पूजनीयो जनार्दनः
न व्यापकेन मन्त्रेण सदैव च महीपते २१७
व्यापकानां च सर्वेषां ज्यायानष्टाक्षरो मनुः
अष्टाक्षरस्य जप्ता तु साक्षान्नारायणः स्वयम् २१८
सन्यासं च समुद्रञ्च सर्पिश्छन्दोऽधि दैवतम्
न दीक्षा विधि न ध्यानं सार्थं मन्त्रमुदाहृतम् २१९
स्नात्वा शुद्धः प्रसन्नात्मा कृतकृत्यो जनार्दनम्
मनसाऽप्यर्चयित्वा वा जपेन्मन्त्रं सदा बुधः २२०
दानप्रतिग्रहौ यागं स्वाध्यायं पितृतर्पणम्
पितृक्रियाष्टाक्षरस्य जप्ता कुर्यादतन्द्रितः २२१
धृतोर्ध्व पुण्ड्रदेहश्च चक्राङ्कितभुजस्तथा

अष्टाक्षरं जपन्नित्यं पुनाति भुवनत्रयम्  २२२
जपेद्भोगतया मन्त्रं सततं वैष्णवोत्तमः
न साधनतया जप्यं कर्तव्यं विष्णुतत्परैः  २२३
अष्टोत्तरसहस्रं वा शतमष्टोत्तरन्तु वा
त्रिसन्ध्यासु जपेन्मन्त्रं तदर्थमनुचिन्तयन्  २२४
उपोष्य पूर्वदिवसे नद्यां स्नात्वा विधानतः
आचार्यं संश्रयेत्पूर्वं महाभागवतं द्विजः  २२५
आचार्या विष्णुमभ्यर्च्य पवित्रं चापि पूजयेत्
पुरतो वासुदेवस्य इध्माधानान्तमाचरेत्  २२६
प्रजपेहस्य सूक्तेन पवित्रन्तेवतेत्यृचा
पवमानस्य आद्येन ऋृग्भिश्चतसृभिः क्रमात्  २२७
आज्यं हुत्वा ततश्चक्रं तदग्नौ प्रतपेद्गुरुः
चरणं पवित्रमिति यजुषा तच्चक्रेणाङ्कयेद्भुजम्  २२८
वामां सम्प्रतपेत्पश्चात्ताञ्च जन्येन देशिकः  २२९
अग्निर्मन्वेति यजुषा तद्धोमाग्नौ प्रतप्य वै
ततस्तु पार्थिवैर्ऋृग्भिर्हुत्वा पुण्ड्राणि धारयेत्  २३०
अतो देवेति सूक्तेन विष्णोर्नुक्रमणेन च
पूजयेद्द्वादशभिर्वै केशवादीननुक्रमात्  २३१
कुशग्रन्थिषु संपूज्य जुहुयात्ताभिरेव तु
हुत्वाऽथ चरुणा सम्यक् मृदा शुभ्रेन देशिकः  २३२
ललाटादिषु चाङ्गेषु ऋृग्भिस्ताभिः क्रमेण वै
नामभिः केशवाद्यैश्च सच्छिद्राण्येव धारयेत्  २३३
श्रिये जात इति ऋृचा कुङ्कुमङ्केषु धारयेत्
परोमात्रेति सूक्तेन उपस्थाय जनार्दनम्  २३४
होमशेषं समाप्याथ मूर्त्युद्वापनमाचरेत्
एवं पुण्ड्रक्रियां कृत्वा नाम दद्यात्ततः परम्  २३५

प्रवः पान्तमिति सूक्तेन नाममूर्तिं समर्चयेत्
गवाज्यं प्रत्यृचं हुत्वा नाम दद्याच्च वैष्णवः २३६
अभिप्रियाणीति सूक्तेनोपस्थाय जनार्दनम्
प्रदक्षिण नमस्कारौ कृत्वा शेषं समाचरेत् २३७
मन्त्रदीक्षा विधानन्तु श्रौतं मुनिभिरीरितम्
नवाहिता भवेद्दीक्षा न पृथक्त्वेन वक्ष्यते २३८
अदीक्षितो भवेद्यस्तु मन्त्रं वैष्णवमुत्तमम्
अर्चनं वाऽपि कुरुते न संसिद्धिमवाप्नुयात् २३९
नादीक्षितः प्रकुर्वीत विष्णोराराधनक्रियाम्
श्रौतं वा यदि वा स्मार्त्तं दिव्यागममथापि वा २४०
तस्मादुक्तप्रकारेण दीक्षितो हरिमर्च्चयेत्
पूर्वेन्ह्न्युपोष्य गुरुणा नद्यां स्नात्वा कृतक्रियः २४१
आचार्यः पूजयेद्विष्णुं गन्धपुष्पाक्षतादिभिः
ईशान्यादि चतुर्दिक्षु संस्थाप्य कलशान् शुभान् २४२
तेषु गव्यानि निक्षिप्य चतुर्मूर्तीन् समर्चयेत्
वाराहं नारसिंहञ्च वामनं कृष्णमेव च २४३
तद्विष्णोरिति च द्वाभ्यां वाराहं पूजयेत्ततः
प्रतद्विष्णु इति ऋचा नारसिंहमनामयम् २४४
न ते विष्णोरित्यनेन वामनं पूजयेत्तथा
वषट्तेविष्णव इति कृष्णं संपूजयेत् द्विजः २४५
संपूज्याऽऽवरणं सर्वं गन्धपुष्पैर्विधानतः
प्रतिष्ठाप्य ततो वह्निमिध्माधानान्तमाचरेत्
चतुर्भिर्वैष्णवैः सूक्तैः पायसं मधुमिश्रितम् २४६
हुत्वाऽऽज्यं जुहुयात्पश्चाच्छ्रीसूक्तेन समाहितः
अग्निमील इत्यनुवाकेन सावित्र्या वैष्णवेन च २४७
सर्वैश्च वैष्णवैर्मन्त्रैः पृथगष्टोत्तरं शतम्

हुत्वा वेदसमाप्तिञ्च जुहुयाद्देशिकोत्तमः २४८
ततो भद्रासने शिष्यमुपविश्याभिषेचयेत्
चतुर्भिर्वैष्णवैर्मन्त्रैः सूक्तैस्तत्कलशोदकैः २४९
ऋत्विग्भिर्ब्राह्मणैः शिष्यमभिषिच्याऽथ देशिकः
कौपीनं कटिसूतञ्च तथा वस्त्रञ्च धारयेत् २५०
ऊर्ध्वपुण्ड्राणि पद्माक्ष तुलसीमालिकेऽपि च
कुशोत्तरे समासीनमाचान्तं विनयान्वितम् २५१
अध्यापयेद्वैष्णवानि सूक्तानि विमलानि च
ध्यापकान् वैष्णवान् मन्त्रानन्यांश्चापि विधानतः २५२
तदर्थन्यासमुद्रादि सर्पिश्छन्दोऽधिदैवतम्
तस्मिन्निवेश्य सद्वृत्तौ शासयेच्छासनाच्छ्रुतेः २५३
शासितो गुरुणा शिष्यः सद्वृत्तौ सत्पथे स्थितः
अर्चयेत्परमैकान्त्य सिद्धये हरिमव्ययम् २५४
आचार्यात्समनु प्राप्तं विग्रहं सुमनोहरम्
लब्ध्वाऽथ विधिना विष्णोः पूजयेत्तदनुज्ञया २५५
पूर्वऽह्नि पूर्ववत्पूज्यः श्रौतेनैवोपचारकैः
ताभिरेव च हुत्वाऽथ ऋग्भिराज्यं तथाक्रमात् २५६
शय्यासूक्तान्तमाज्येन हुत्वाऽग्निं वैष्णवोत्तमः
अध्यापयित्त्वा तान् मन्त्रान् वैदिकान् वैदिकोत्तमः २५७
पूजाविधानं त्रिविधं तस्मै होमान्तमाविशेत्
स्नानतर्पणहोमार्चा जप्याद्या विविधाः क्रियाः २५८
वैशिष्येण गुरोर्ज्ञात्त्वा शक्त्या सर्वं समाचरेत्
परमापद्गतो वाऽपि न भुञ्जीत हरेर्दिने २५९
न तिर्यग्धारयेत्पुण्ड्रन्नान्यं देवं प्रपूजयेत्
वैष्णवः पुरुषो यस्तु शिव ब्रह्मादिदैवतान् २६०
प्रणमेतार्चयेद्वाऽपि विष्ठायां जायते क्रिमिः

रजस्तमोऽभिभूतानां देवतानां निरीक्षणात् २६१
पूजनाद्वन्दनाद्वाऽपि वैष्णवो यात्यधोगतिम्
शुद्धसत्वमयो विष्णुः पूजनीयो जगत्पतिः २६२
अनर्चनीया रुद्राद्याः विष्णोरावरणं विना
यस्तु स्वात्मेश्वरं विष्णुमतीत्यान्यं यजेत हि २६३
स्वात्मेश्वराय हरये च्यवते नात्रसंशयः
यज्ञाध्ययनकाले तु नमस्यानि वषट्कृता २६४
तानि वै यज्ञियान्यत्र यज्ञो वै विष्णुरव्ययः
तस्यैवाऽवरणं प्रोक्तं यज्ञाध्ययनकर्मसु २६५
स्तुवन्ति वेदास्तस्यात्र गुणरूपविभूतयः
तस्मादावरणं हित्वा ये यजन्ति परान् सुरान् २६६
ते यान्ति निरयं घोरं कल्पकोटिशतानि वै
रुद्रः काली गणेशश्च कूष्माण्डा भैरवादयः २६७
मद्यमांसाशिनश्चान्ये तामसाः परिकीर्तिताः
शुद्धानामपि देवानां या स्वतन्त्राऽर्चनक्रिया २६८
सा दुर्गतिं नयत्येव वैष्णवं वीतकल्मषम्
अर्चयित्वा जगन्नाथं वैष्णवः पुरुषोत्तमम् २६९
तदावरणरूपेण यजेद्देवान् समन्ततः
अन्यथा नरकं याति यावदाभूतसंप्लवम् २७०
वासुदेवं जगन्नाथमर्चयित्वैव मानवः
प्राप्नोति महदैश्वर्यं ब्रह्मेन्द्रत्वादिकं क्षणात् २७१
मनसाऽपि जलेनापि जगन्नाथं जनार्दनम्
सम्प्राप्नोत्यमलां सिद्धिं जगत्सर्वं समञ्चितम् २७२
हृषीकेशं त्रयीनाथं लक्ष्मीशं सर्वदं हरिम्
तं विना पुण्डरीकाक्षं कोऽर्चयेदितरान् सुरान् २७३
नारायणं परित्यज्य योऽन्यं देवमुपासते

स्वपतिं नृपतिं हित्वा यथा स्त्री पुरुषाधमम् २७४
विष्णोर्निवेदितं हव्यं देवेभ्यो जुहुयात्तथा
पितृभ्यश्चैव तद्दद्यात्सर्वमानन्त्यमश्नुते २७५
निर्माल्यमितरेषां तु यदन्नाद्यं दिवौकसाम्
उपभुज्य नरो याति ब्रह्महत्यां न संशयः २७६
नैवेद्य भोजनं विष्णोस्तत्पादाम्बु निषेवणम्
तुलसी खादनं नृणां पापिनामपिमुक्तिदम् २७७
एकादश्युपवासश्च शङ्खचक्रादिधारणम्
तुलस्या पूजनं विष्णोस्त्रितयं वैष्णवं स्मृतम् २७८
अवैष्णवः स्याद्यो विप्रो बहुशास्त्रश्रुतोऽपि वा
सजीवन्नेव चण्डालो मृतः श्वानोऽभिजायते २७९
क्रतुसाहस्रिणं वाऽपि लोके विप्रमवैष्णवम्
चण्डालमिव नेक्षेत वर्जयेत्सर्वकर्मसु २८०
भगवद्भक्तिदीप्ताग्निदग्धदुर्जातिकल्मषः
चण्डालोऽपि बुधैः श्लाध्यो न तु पूज्यो ह्यवैष्णवः २८१
शङ्खचक्रोर्ध्वपुण्ड्रादिरहितं ब्राह्मणाधमम्
पूजयिष्यति यः श्राद्धे सर्वकर्मास्य निष्फलम् २८२
तिर्यक्पुण्ड्रधरं विप्रं यः श्राद्धे भोजयिष्यति
पितरस्तस्य यान्त्येव कालसूत्रं सुदारुणम् २८३
ऊर्ध्वपुण्ड्रधरं विप्रं चक्राङ्कितभुजं तथा
पूजयिष्यति यः श्राद्धे गया श्राद्धायुतं लभेत् २८४
शङ्खचक्रोर्ध्वपुण्ड्राद्यैरन्वितं वैष्णवं द्विजम्
भक्त्या सम्पूजयेद्यस्तु दैवे पित्र्ये च कर्मणि २८५
कल्पकोटिसहस्राणि कल्पकोटिशतानि च
यास्यन्ति पितरतस्य विष्णुलोकं सुनिर्मलम् २८६
ऊर्ध्वपुण्ड्रधरं विप्रं तप्तचक्रङ्कितांसकम्

श्राद्धे सम्पूजयेद्यस्तु गयाश्राद्धायुतं लभेत् २८७
तप्तचक्रेण विधिना बाहुमूलेन लाञ्छितः
पुनाति सकलं लोकं नारायण इवाघभित् २८८
अविद्यो वा सविद्यो वा शङ्खचक्रोर्ध्वपुण्ड्रधृत्
ब्राह्मणः सर्वलोकेषु पूज्यमानो हरिर्यथा २८९
दुराशी वा दुराचारी शङ्खचक्रोर्ध्वपुण्ड्रधृत्
नृणां हन्ति समस्ताघं तमः सूर्योदये यथा २९०
चक्राङ्कितस्य विप्रस्य पादप्रक्षालितं जलम्
पुनाति सकलं लोकं यथा त्रिपथगानदी २९१
तिस्रः कोटयर्द्ध कोटी च तीर्थानि भुवनत्रये
चक्राङ्कितस्य विप्रस्य पादे तिष्ठन्त्यसंशयः २९२
चक्राङ्कितस्य विप्रस्य पादप्रक्षालितं जलम्
पीत्वा पातकसाहस्रैर्मुच्यन्ते नात्र संशयः २९३
श्राद्धे दाने व्रते यज्ञे विवाहे चोपनायने
चक्राङ्कितं विप्रमेव पूजयेदितरान्न तु २९४
विष्णुचक्राङ्कितो विप्रो भुञ्जानोऽपि यतस्ततः
न लिप्यते स पापेन तमसैव प्रभाकरः २९५
चक्राङ्कित भुजो विप्रः पङ्क्तिं मध्ये तु भुञ्जते
पुनाति सकलां पङ्क्तिं गङ्गे वोत्तरवाहिनी २९६
चक्राङ्कित भुजं विप्रं यो भूम्यामभिवादयेत्
ललाटे पांशु संख्यानि विष्णुलोके महीयते २९७
ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा वैष्णवः पुमान्
अर्चयित्वेतरान् देवान् निरयं यान्त्यसंशयम् २९८
विष्णोरावरणं हित्वा पूजयित्वेतरान् सुरान्
वैष्णवः पुरुषो याति कालसूत्रमधोमुखः २९९
महापापी महापापैरन्वितो यदि वैष्णवः

मन्वादि धर्मशास्त्रोक्तं प्रायश्चित्तं स्माचरेत् ३००
प्रायश्चित्तविशेषं तु पश्चात्कुर्वीत वैष्णवः
वैयासिकीं वैष्णवीं च पवित्रीञ्च समाचरेत् ३०१
वैष्णवानान्तु विप्राणां पश्चात्पादजलं पिबेत्
वृत्तौ न परिपूर्णोऽथ कर्मस्वधिकृतो भवेत् ३०२
मन्त्ररत्नार्थविच्छान्त नवेज्याकर्मसंयुतः
द्वादशी नियतो विप्रः स एव पुरुषोत्तमः ३०३
किमत्र बहुनोक्तेन सारं वक्ष्यामि ते नृप
एकादश्युपवासश्च शङ्खचक्रादिधारणम् ३०४
तदीयानां पूजनञ्च वैष्णवं त्रितयं स्मृतम्
पुण्याद्विष्णुदिनादन्यन्नोपोष्यं वैष्णवैः सदा ३०५
तथा भागवतादन्यो नार्चनीयो हि कुत्रचित्
भगवन्तमनुद्दिश्य न दद्या न यजेत् क्वचित् ३०६
नावैष्णवान्नं भुञ्जीत दद्यान्ना वैष्णवाय च
नार्चयेदितरान् देवान्न तिर्यग्धारयेत्तथा ३०७
एकादश्यान्न भुञ्जीत वसेन्नावैष्णवैः सह
अष्टाक्षरस्य जप्तारं शङ्खचक्रधरं द्विजः ३०८
अवमत्य विमूढात्मा सद्यश्चण्डालतां व्रजेत्
वैष्णवं ब्राह्मणं गाञ्च तुलसी द्वादशीं तथा ३०९
अनर्चयित्वा मूढात्मा निरयं दुर्गतिं व्रजेत्
विष्णोः प्रधानतनवो विप्रा गावश्च वैष्णवाः ३१०
शक्त्या संपूज्य तानेव याति विष्णोः परं पदम्
एकादश्युपवासश्च द्वादश्यां विप्रपूजनं ३११
नित्यमामलकस्नानं पापिनामपि मुक्तिदम्
पक्षे पक्षे हरि दिने चक्राङ्कितभुजे नृप ३१२
संपूज्यमाने विप्रेन्द्रे हरिस्तेषां प्रसीदति

अभावे वैष्णवे विप्रे संप्राप्ते हरि वासरे ३१३
तद्वत्सम्पूजयेद्गावं तुलसीं वाऽपि वैष्णवः
अग्निहोत्रन्तु जुहुयात्सायं प्रातर्द्विजोत्तमः ३१४
पञ्चयज्ञांश्च कुर्वीत वैष्णवान् विष्णुमर्चयेत्
तदर्पितं वै भुञ्जीत पिबेत्तत्पादवारि वै ३१५
एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि
पूजयेद्वैष्णवं विप्रं द्वादश्यामपि वैष्णवः ३१६
विष्णोः प्रसाद तुलसीं तीर्थं वाऽपि द्विजोत्तमः
उपवासदिने वाऽपि प्राशयेदविचारयन् ३१७
उपवासदिने यस्तु तीर्थं वा तुलसीदलम् ३१८
न प्राशयेद्विमूढात्मा रौरवं नरकं व्रजेत्
हर्य्यर्पितन्तु यच्चान्नं तीर्थं वा पितृकर्मणि ३१९
दद्यात्पितृणां यद्भक्ष्यं गयाश्राद्धायुतं लभेत्
हरेर्निवेदितं भक्त्या यो दद्याच्छ्राद्धकर्मणि ३२०
पितरस्तस्य यान्त्येव तद्विष्णोः परमं पदम्
तीर्थं वा तुलसीपत्रं यो दद्यात्पितृदैवतम् ३२१
आकल्पकोटि पितरः परितृप्ता न संशयः
यः श्राद्धकाले मूढात्मा पितृणाञ्च दिवोकसाम् ३२२
न ददाति हरेर्भुक्तं तस्य वै नारकी गतिः
हर्यर्पितन्तु यच्चान्नं यच्च पादोदकं हरेः ३२३
तुलसीं वा पितणाञ्च दत्त्वा श्राद्धायुतं लभेत्
सर्व यज्ञमयं विष्णुं मत्वा देवं जनार्दनम्
आमन्त्र्य वैष्णवान् विप्रान् कुर्याच्छ्राद्धमतन्द्रितः ३२४
प्रत्यब्दं पार्वणश्राद्धं कुर्यात्पित्रोर्मृतेऽहनि
अन्यथा वैष्णवो याति ब्रह्महत्यां न संशयः ३२५
अमायां कृष्णपक्षे च पित्र्ये वाऽभ्युदये तथा

कुर्यात् श्राद्धं विधानेन विष्णोराज्ञामनुस्मरन् ३२६
न कुर्यात् यो विधानेन पितृयज्ञं नराधमः ३२७
आज्ञातिक्रमणाद्विष्णोः पतत्येव न संशयः
शङ्खचक्रोर्ध्वपुण्ड्रादिचिह्नैः प्रियतमैर्हरेः ३२८
अन्वितान् ब्राह्मणानेव पूजयेत्सर्वकर्मसु
अश्राद्धिनोऽप्ययज्ञस्य कर्मत्यागिन एव च ३२९
वेदस्याप्यनधीतस्य संसर्गं दूरतस्त्यजेत्
पित्रोः श्राद्धं प्रकुर्वीत नैकादश्यां द्विजोत्तमः ३३०
द्वादश्यान्तत्प्रकुर्वीत नोपवास दिने क्वचित्
विष्णोर्जन्मदिने वाऽपि गुरूणाञ्च मृतेऽहनि ३३१
वैष्णवेष्टिं प्रकुर्व्वीत वेदिकं वैष्णवोत्तमः
अगम्यागमनं हिंसामभक्ष्याणाञ्च भक्षणम् ३३२
असत्य कथनं स्तेयं मनसाऽपि विवर्जयेत्
तप्तचक्राङ्कनं विष्णोरेकादश्यामुपोषणम् ३३३
धृतोर्ध्वं पुण्ड्रदेहत्वं तन्मंत्राणां परिग्रहः
नित्यमामलकस्नानं देवतान्तरवर्जनम्
ध्यानं मन्त्रं जपो होमस्तुलस्याः पूजनं हरेः ३३४
प्रसादस्तीर्थसेवा च तदीयानाञ्च पूजनम्
उपायान्तर सन्त्यागस्तथा मन्त्रार्थचिन्तनम् ३३५
श्रवणं कीर्तनं सेवा सत्कृत्यकरणं तथा
असत्कृत्य परित्यागो विषयान्तरवर्जनम् ३३६
दानं दमस्तपः शौचमार्जवं क्षान्तिरेव च
आनृशंस्यं सतां सङ्गः पारमैकान्त्यहेतवः ३३७
वैष्णवः परमैकान्ती नेतरो वैष्णवः स्मृतः
नावैष्णवो व्रजेन्मुक्तिं बहुशास्त्रश्रुतोऽपि वा ३३८
वैष्णवो वर्णवाह्योऽपि याति विष्णोः परं पदम्

एतत्ते कथितं राजन् पारमैकान्त्यसिद्धिदम्  ३३९
वैशिष्ट्यं वैष्णवं धर्मशास्त्रं वेदोपबृंहितम्
विष्वक्सेनाय धात्रे च सम्प्रोक्तं परमात्मना  ३४०
विष्वक्सेनाय सम्प्रोक्तमेतद्विघनसे पुरा
भृगोः प्रोक्तं विघनसा भृगुणा च महर्षिणा  ३४१
भृगुणा च मनोः प्रोक्तं मनुना च ममेरितम्
मनुस्तु धर्मशास्त्रन्तु सामान्येनोक्तवान् स्वयम्  ३४२
तदेव हि मया राजन् वैशिष्येण तवेरितम्
विशिष्टं परमं धर्मशास्त्रं वैष्णवमुत्तमम्  ३४३
य इदं शृणुयाद्भक्त्या कथयेद्वा समाहितः
पारमैकान्त्य संसिद्धिं प्राप्नोत्येव न संशयः  ३४४
सर्वपापविनिर्मुक्तो याति विष्णोः परं पदम्
यस्त्विदं श्रुणुयाद्भक्त्या नित्यं विष्णोश्च सन्निधौ  ३४५
अश्वमेधसहस्रस्य फलं प्राप्नोत्यसंशयः
हारीतमेतच्छास्त्रन्तु परमां धर्म्मसंहिताम्  ३४६
आलोक्य पूजयन् विष्णुं पारमैकान्त्यमश्नुते
एतच्छ्रुत्वाम्बरीषस्तु हारीतोक्तिं नृपोत्तमः  ३४६
ववन्दे परया भक्त्या तमृषिं वैष्णवोत्तमः
त्वमेव परमोधर्म्मस्त्वमेव परमं तपः  ३४७
त्वदङ्घ्रियुगलं प्राप्य सर्वसिद्धिमवाप्नुयाम्
महामुनिमिति स्तुत्वा राजर्षिः स महातपाः  ३४७
प्राप्तवान् परमैकान्त्यं तत्प्रसादात्सुसिद्धिदम्
वैशिष्ट्यं पारमैकान्त्यमेतच्छास्त्रं ममाव्ययम्  ३४८
भारद्वाजादयः सर्वे नृपाश्च जनकादयः
योगिनः सनकाद्याश्च नारदाद्याः सुरर्षयः  ३४९
वसिष्ठाद्या वैष्णवाश्च विष्वक्सेनादयः सुराः

एतच्छास्त्रानुसारेण पूजयामासुरच्युतम्  ३५०
परमं वैदिकं शास्त्रमेतद्वैष्णवमुत्तमम्
ज्ञात्वैव परमैकान्ती पूजयेद्विष्णुमीश्वरम्  ३५१

इति वृद्धहारीतस्मृतौ विशिष्टधर्म्मशास्त्रे वृत्त्यधिकारो नाम अष्टमोऽध्यायः

समाप्ताचेयं वृद्धहारीतस्मृतिः

Reference:
*Smṛti Sandarbha*, Vol. II, (Delhi: Nag, 1981), pp. 994 ff.

# गौतम स्मृतिः

## श्रीगणेशाय नमः

## प्रथमोऽध्यायः

## अथाचारवर्णनम्

वेदो धर्ममूलं तद्विदाञ्च स्मृतिशीले दृष्टो धर्मव्यतिक्रमः साहसञ्च महतां न तु दृष्टोऽर्थोवरदौर्बल्यात्तुल्यबलविरोधे विकल्पः । उपनयनं ब्राह्मणस्याष्टमे नवमे पञ्चमे वा काम्यं गर्भादिः सङ्ख्यावर्षाणां तद्द्वितीयं जन्म । तद्यस्मात्स आचार्यो वेदानुवचनाच्च । एकादशद्वादशयोः क्षत्रियवैश्ययोः । आषोडशाद्ब्राह्मणस्यापतिता सावित्री द्वाविंशतेराजन्यस्य ह्यधिकाया वैश्यस्य । मौञ्जीज्यामौर्वीसौत्र्यो मेखलाः क्रमेण कृष्णरुरुवस्ताजिनानि वासांसि शाणक्षौमचीरकुतपाः सर्वेषां कार्पासञ्चाविकृतम् । काषायमप्येके । वार्क्षं ब्राह्मणस्य माञ्जिष्ठहारिद्रे इतरयोः वैल्वपालाशौ ब्राह्मणस्य दण्डावश्वत्थपैलवौ शेषे यज्ञिया वा सर्वेषामपीरिता यूपचक्राः सवल्कला मूर्द्धललाटनासाग्रप्रमाणाः । मुण्डजटिलशिखाजटाश्च । द्रव्यहस्त उच्छिष्टोऽनिधायाचामेद्द्रव्यशुद्धिः परिमार्जन प्रदाहतक्षणनिर्णेजनानि तैजसमार्त्तिकदायवतान्तवानां तैजसवदुपलमणिशङ्खशुक्तीनां दारुवदस्थिभूम्योरावपनञ्च भूमेश्चैलवद्रज्जुविदलचर्मणामुत्सर्गोवात्यन्तोपहतानाम् । प्राङ्मुखउदङ्मुखोवा शौचमारभेत् । शुचौ देशआसीनो दक्षिणं बाहुं जान्वन्तरा कृत्वा यज्ञोपवीत्यामणिन्धनात् पाणी प्रक्षाल्यवाग्यतोहृदयंस्पृशंस्त्रिश्चतुर्वापआचामेद्विः प्रमृज्यात्पादौ चाभ्युक्षेत्खानि चोपस्पृशेच्छीर्षण्यानि मूर्द्धानि च दद्यात् । सुप्त्वा भुक्त्वा क्षुत्वा च पुनः । दन्तश्लिष्टेषु दन्तवदन्यत्र जिह्वाभिमर्षणात् । प्राक्च्युतेरित्येके । च्युतेरास्रावविद्यान्निगिरन्नेव तच्छुचिः । न मुख्याविप्रुष उच्छिष्टं कुर्वन्ति ताश्चेदङ्गे निपतन्ति । लेपगन्धापकर्षणे शौचममेध्यस्य । तद्भिः पूर्वं मृदा च मूत्रपुरीष-

रेतोविस्रंसनाभ्यवहारसंयोगेषु च यत्र चाम्नायोविदध्यात् । पाणिना सव्यमुपसंगृह्याङ्गुष्ठमधीहि भोइत्यामन्त्रयेत गुरुः । तत्र चक्षुर्मनः पाणोपस्पर्शनं दर्भैः प्राणायामास्त्रयः पञ्चदशमात्राः प्राक्कूलेष्वासनञ्च ॐपूर्वा व्याहृतयः पञ्चसप्तान्ताः । गुरोः पादोपसंग्रहणं प्रातर्ब्रह्मानुवचनेचाद्यन्तयोरनुज्ञात उपविशेत् । प्राङ्मुखोदक्षिणतः शिष्य उदङ्मुखोवा सावित्रीञ्चानु वचनमादितो ब्रह्मणश्रादाने ॐकारस्याऽन्यत्रापि । अन्तरागमने पुनरुपसदनं श्वनकुलसर्पमण्डूकमार्ज्जाराणां त्र्यहमुपवासोविप्रवासश्च प्राणायामा घृतप्राशनञ्चेतरेषाम् । श्मशानाध्ययने चैवम् ।

इति गौतमीये धर्मशास्त्रे प्रथमोऽध्यायः

## द्वितीयोऽध्यायः

## अथ ब्रह्मचारिधर्मवर्णनम्

प्रागुपनयनात्कामचारावादभक्षोऽहुतोऽब्रह्मचारी यथोपपादमूत्रपुरीषो भवति नास्याचमनकल्पो विद्यतेऽन्यत्रापमार्जनप्रधावनावोक्षणेभ्यो न तदुपस्पर्शनाशौचं नत्वेवैनमग्नि हवनवलिहरणयोर्नियुञ्ज्यान्न ब्रह्माभिव्याहारयेदन्यत्र स्वधानिनयनात् । उपनयनादिनियमः । उक्तं ब्रह्मचर्यमग्नीन्धनभैक्षचरणे सत्यवचनमपामुपस्पर्शनम् । एके गोदानादि । बहिः सन्ध्यार्थञ्चातिष्ठेत् पूर्वमासीतोत्तरां सज्योतिष्या ज्योतिषो दर्शनाद्वाग्यतो नादित्यमीक्षेत । वर्जयेन्मधुमांसगन्धमाल्यदिवास्वप्नाञ्जनाभ्यञ्जनयानोपानच्छत्रकामक्रोधलोभमोहवाद्यवादनस्नानदन्तधावनहर्षनृत्यगीतपरिवादभयानि गुरुदर्शने कर्णप्रावृतावशक्थिकायाश्रयणपादप्रसारणानि निष्ठीवितहसितविजृम्भितास्फोटनानि स्त्रीप्रेक्षणालम्भने मैथुनशङ्कायां द्यूतं हीनवर्णसेवामदत्तादानं हिंसां आचार्यतत्पुत्रस्त्रीदीक्षितनामानि शुष्कां वाचं मद्यं नित्यं ब्राह्मणः । अधः शय्याशायी पूर्व्वोत्थायी जघन्यसम्बेशी वाग्वाहूदरसंयतः ।

नामगोत्रे गुरोः समानतो निर्दिशेत् । अर्च्चिते श्रेयसि चैवम् । शय्यासनस्थानानि विहाय प्रतिश्रवणमभिक्रमणं वचनादृष्टेनाधःस्थानासनस्तिर्य्यग्वा तत्सेवायाम् । गुरुदर्शने चोत्तिष्ठेत् गच्छन्त मनुव्रजेत्कर्म विज्ञाप्याख्यायाहूताध्यायी युक्तः प्रियहितयोस्तद्भार्यापुत्रेषु चैवम् । नोच्छिष्टाशनस्नपनप्रसाधनपादप्रक्षालनोन्मर्दनोपसंग्रहणानि । विप्रोष्योपसंग्रहणं गुरुभार्याणां तत्पुत्रस्य च । नैके युवतीनां । व्यवहारप्राप्तेन सार्ववर्णिकं भैक्षचरणमभिशस्तपतितवर्जं । आदिमध्यान्तेषु भवच्छब्दः प्रयोज्यो वर्णानुपूर्वेण । आचार्यज्ञातिगुरुष्वलाभेऽन्यत्र । तेषां पूर्वं परिहरन्निवेद्य गुरवेऽनुज्ञातोभुञ्जीत । असन्निधौ तद्भार्यापुत्रसब्रह्मचारिसद्भ्यः । वाग्यतस्तृप्यन्नलोलुप्यमानः सन्निधायोदकं स्पृशेत् । शिष्यशिष्टिरवधेनाशक्तोरज्जुवेणुविदलाभ्यां तनुभ्यामन्येन घ्नन् राज्ञा शास्यः । द्वादशवर्षाण्येकैकवेदे ब्रह्मचर्यं चरेत् प्रतिद्वादशवर्षेषु ग्रहणान्तं वा । विद्यान्ते गुरुरर्थेन निमन्त्र्यः । ततः कृतानुज्ञानस्य स्नानम् । आचार्यः श्रेष्ठोगुरुणां मातेत्येके ।

इति गौतमीये धर्मशास्त्रे द्वितीयोऽध्यायः

## तृतीयोऽध्यायः

### अथ ब्रह्मचारि प्रकरणवर्णनम्

तस्याश्रमविकल्पमेके ब्रुवते ब्रह्मचारी गृहस्थोभिक्षुर्वैखानस इति तेषां गृहस्थो योनिरप्रजनत्वादितपरेषाम् । तत्रोक्तं ब्रह्मचारिणआचार्य्याधीनत्वमात्रं गुरोः कर्मशेषेण जपेत् गुर्वभावे तदपत्यवृत्तिस्तदभावे वृद्धे सब्रह्मचारिण्यग्नौ वा । एवं वृत्तोब्रह्मलोकमवाप्नोति जितेन्द्रियः । उत्तरेषाञ्चैतदविरोधी अनिचयो भिक्षुरूर्ध्वरेता ध्रुवशीलो वर्षासु भिक्षार्थो ग्राममियात् । जघन्यमनिवृत्तञ्चरेत् । निवृत्ताशीर्वाक्चक्षुः कर्मसंयतः । कौपीनाच्छादनार्थं बालोबिभृयात् । प्रहीणमेके निर्णेजनाविप्रयुक्तं । औषधिवनस्पतीनामङ्गमुपाददीत । न द्वितीया-

मुपहर्त्तुं रात्रिं ग्रामे वसेत् । मुण्डीशिखी वा वर्जयेज्जीवबधम् । समाभूतेषु हिंसानुग्रहयोरनारती । वैखानसो वने मूलशफीला तपः शीलः श्रामणकेनाग्निमाधायाग्राम्यभोजी देवपितृमनुष्यभूतर्षिपूजकः सर्व्वातिथिः प्रतिषिद्धवर्जं भैक्षमप्युपयुञ्जीत न फालकृष्टमधितिष्ठेत् ग्रामञ्च न प्रविशेज्जटिलश्चीराजिनवासा नातिशयं भुञ्जीत । एकाश्रम्यं त्वाचार्याः प्रत्यक्षविधानाद्गार्हस्थस्य ।

इति गौतमीये धर्मशास्त्रे तृतीयोऽध्यायः

## चतुर्थोऽध्यायः

### अथ विवाहप्रकरणवर्णनम्

गृहस्थः सदृशीं भार्यां विन्देतानन्यपूर्वां यवीयसीम् । असमानप्रवरैर्विवाहऊर्ध्वं सप्तमात् पितृबन्धुभ्योवीजिनश्च मातुबन्धुभ्यः पञ्चमात् । ब्राह्मोविद्याचारित्रबन्धुशीलसम्पन्नाय दद्यादाच्छाद्यालङ्कृतां संयोगमन्त्रः प्राजापत्ये सहधर्मञ्चरतामिति आर्षे गोमिथनं कन्यावते दद्यादन्तर्वेद्यृत्विजे दानं दैवोऽलङ्कृत्येच्छन्त्या स्वयं संयोगो गान्धर्वोवित्तेनानतिस्त्रीमतामासुरः प्रसह्यादानाद्राक्षसोऽसंविज्ञानोपसङ्गमनात्पैशाचः । चत्वारो धर्म्याः प्रथमाः षडित्येके । अनुलोमानन्तरैकान्तरद्व्यन्तरासु जाताः सवर्णाम्वष्ठोग्रनिषाददौष्मन्तपारशवाः । प्रतिलोमासु सूतमागधायोगवक्षत्तृवैदेदकचाण्डालाः । ब्राह्मण्यजनत्पुत्रान् वर्णेभ्य आनुपूर्व्यात् ब्राह्मणसूतमागधचाण्डालान् तेभ्य एव क्षत्रिया मूर्धावषिक्तक्षत्रियधीवरपुक्कशान् तेभ्य एव वैश्या भृज्ञकण्ठकमाहिष्यवैश्यवैदेहान् तेभ्य एव पारशवयवनकरण शूद्रान् शूद्रेत्येके । वर्णान्तरगमनमुत्कर्षापकर्षाभ्यां सप्तमेन पञ्चमेन चाचार्याः । सृष्टयन्तरजातानाञ्च प्रतिलोमास्तु धर्महीनाः शूद्रायाञ्च असमानायाञ्च शूद्रात्पतितवृत्तिरन्त्यः पापिष्ठ । पुनन्ति साधवः पुत्रास्त्रिपौरुषानार्षाद्दश दैवाद्दशैव प्राजापत्याद्दशपूर्वान् दशावरानात्मानञ्च

ब्राह्मीपुत्राः ।

इति गौतमीये धर्मशास्त्रे चतुर्थोऽध्यायः

## पञ्चमोऽध्यायः

## अथ गृहस्थाश्रमवर्णनम्

ऋतावुपेयात्सर्वत्र वा प्रतिषिद्धवजम् । देवपितृमनुष्यभूतर्षिपूजको- नित्यस्वाध्यायः । पितृभ्यश्चोदकदानं यथोत्साहमन्यद्भार्यादिरग्नि- र्दायादिर्वा । तस्मिन् गृह्याणि देवपितृमनुष्ययज्ञाः स्वाध्यायश्च । बलिकर्माग्नावग्निर्धन्वन्तरिर्विश्वे देवाः प्रजापतिः स्विष्टिकृदिति होमः । दिग्देवताभ्यश्च यथा स्वद्वारेषु मरुद्भ्यो गृहदेवताभ्यः प्रविश्य ब्रह्मणे मध्ये अद्भ्य उदकुम्भे आकाशायेत्यन्तरीक्षे नक्तञ्चरेभ्यश्च सायम् । स्व- स्तिवाच्यभिक्षादानप्रश्नपूर्वन्तु ददातिषु चैवं धर्मेषु । समद्विगुण- साहस्रानन्त्यानि फलान्यब्राह्मणब्राह्मणश्रोत्रियवेदपारगोभ्यः । गुर्व- र्थनिवेशौषधार्थ वृत्तिक्षीणयक्ष्यमाणाध्यायनाध्वसंयोगवैश्वजितेषु द्र- व्यसंविभागो बहिर्वेदि भिक्षमाणेषु कृतान्नमितरेषु । प्रतिश्रुत्याप्य- धर्मसंयुक्ताय न दद्यात् । क्रुद्धहृष्टभीतार्त्तलुब्धबालस्थविरमूढमत्तो- न्मत्तवाक्यान्यनृतान्यपातकानि । भोजयेत्पूर्वमतिथिकुमारव्याधित- गर्भिणीसुवासिनीस्थविरान् जघन्यांश्च । आचार्यपितृसखीनान्तु निवेद्य वचनक्रियाऋत्विगाचार्यश्वशुरपितृव्यमातुलानामुपस्थाने म- धुपर्कः सम्वत्सरे पुनः पूजिता यज्ञविवाहयोरर्वाक् राज्ञश्च श्रोत्रियस्य । अश्रोत्रियस्यासनोदके श्रोत्रियस्य तु पाद्यमर्घ्यमन्नविशेषांश्च प्रका- रयेन्नित्यं वा संस्कारविशिष्टं मध्यतोऽन्नदानमवैद्य साधुवृत्ते विपरीते तु तृणोदकभूमिः स्वागतमन्ततः पूज्यानत्याशश्चशय्यासनावसथानु- व्रज्योपासनानि सदृक्श्रेयसोः समान्यल्पशोऽपि हीने असमान- ग्रामोऽतिथिरेकरात्रिकोऽधिवृक्षसूर्योपस्थायी कुशलनामयारोग्याणा- मनुप्रश्नोत्थं शूद्रस्याब्राह्मणस्यानतिथिरब्राह्मणोयज्ञे संवृतश्चेत् भोज-

नन्तु क्षत्रियस्योद्ध्र्वं ब्राह्मणेभ्योऽन्यान् भृत्यैः सहानृशंसार्थमानृशंसार्थम् ।

इति गौतमीये धर्मशास्त्रे पञ्चमोऽध्यायः

## षष्ठोऽध्यायः

## अथ गृहस्थाश्रमकर्तव्यवर्णनम्

पादोपसंग्रहणं गुरुसमवायेऽन्वहम् । अभिगम्य तु विप्रोष्य मातृपितृतद्बन्धूनां पूर्वजानां विद्यागुरूणां तत्तद्गुरूणाञ्च सन्निपाते परस्य । नाम प्रोच्यामयमित्यभिवादोऽज्ञसमवाये स्त्रीपुंयोगेऽभिवादतोऽनियममेके नाविप्रोष्य स्त्रीणाममातृपितृव्यभार्याभगिनीनां नोपसंग्रहणं भ्रातृभार्याणां श्वश्र्वाश्च । ऋत्विक्श्वशुरपितृव्यमातुलानान्तु यवीयसां प्रत्युत्थानमनभिवाद्यास्तथान्यः पूर्वः पौरोऽशीतिकावरः शूद्रोऽप्यपत्यसमेनावरोऽप्यार्यः शूद्रेण नाम चास्य वर्जयेद्राज्ञश्चाजपः प्रेष्यो भो भवन्निति वयस्यः समानेऽहनि जातो दशवर्षवृद्धः पौरः पञ्चभिः कलाभरः श्रोत्रियश्चारणस्त्रिभिः राजन्यो वैश्यकर्म विद्याहीनोदीक्षितस्य प्राक्क्रयात् । वित्तबन्धुकर्मजातिविद्यावयांसि मान्यानि परबलीयांसि श्रुतन्तु सर्वेभ्योगरीयस्तन्मूलत्वाद्धर्मस्य श्रुतेश्च । चक्रिदशमीस्थाणुग्राह्यवधूस्नातकराजभ्यः पथोदानं राज्ञा तु श्रोत्रियाय श्रोत्रियाय ।

इति गौतमीये धर्मशास्त्रे षष्ठोऽध्यायः

## सप्तमोऽध्यायः

## अथापद्धर्मवर्णनम्

आपत्कल्पो ब्राह्मणस्याब्राह्मणाद्विद्योपयोगोऽनुगमनं शुश्रूषा समाप्तेर्ब्राह्मणो गुरुर्याजनाध्यापनप्रतिग्रहाः सर्वेषां पूर्वः पूर्वो गुरुस्तदलाभे क्षत्रवृत्तिस्तदलाभे वैश्यवृत्तिः । तस्यापण्यं गन्धरसकृतान्नतिलशा-

णक्षौभाजिनानि रक्तनिर्णिक्ते वाससी क्षीरञ्च सविकारं मूलफलपुष्पौ-
षधमधुमांसतृणोदकापथ्यानि पशवश्च हिंसासंयोगे पुरुषवशाकु-
मारीहेतवश्च नित्यं भूमिव्रीहियवाजाव्यश्च ऋषभधेन्वनडुहश्चैके ।
विनिमयस्तु रसानां रसैः पशूनाञ्च न लवणाकृतान्नयोस्तिलानाञ्च
समेनामेन तु पक्वस्य संप्रत्यर्थे सर्वधातुवृत्तिरशक्तावशूद्रेण तदप्येके
प्राणसंशये तद्वर्णसङ्करोऽभक्ष्यनियमस्तु प्राणसंशये ब्राह्मणोऽपि
शस्त्रमाददीत राजन्यो वैश्यकर्म वैश्यकर्म ।

इति गौतमीये धर्मशास्त्रे सप्तमोऽध्यायः

## अष्टमोऽध्यायः

## अथ संस्कारवर्णनम्

द्वौ लोके धृतव्रतौ राजा ब्राह्मणश्च बहुश्रुतस्तयोश्चतुर्विधस्य मनुष्य-
जातस्यान्तः संज्ञानाञ्चलनपतनसर्पणानामायत्तं जीवनं प्रसूतिरक्षण-
मसङ्करो धर्मः । स एष बहुश्रुतो भवति लोकवेदवेदाङ्गविद्वाकोवा-
क्येतिहासपुराणकुशलस्तदपेक्षस्तदवृत्तिश्चत्वारिंशता संस्कारैः सं-
स्कृतस्त्रिषु कर्मस्वभिरतः षट्सु वासामयचारिकेष्वभिविनीतः
षड्भिः परिहार्यो राज्ञा वध्यश्चावध्यश्चादण्ड्यश्चाबहिष्कार्यश्चापरि-
वाद्यश्चापरिहार्यश्चेति । गर्भाधानपुंसवनसीमन्तोन्नयनजातकर्मनाम-
करणान्नप्राशनचौडोपनयनं चत्वारि वेदव्रतानि स्नानं सहधर्मचारि-
णीसंयोगः पञ्चानां यज्ञानामनुष्ठानं देवपितृमनुष्यभूतब्रह्मणामेतेषा-
ञ्चाष्टकापार्वणश्राद्धश्रावण्याग्रहायणीचैत्राश्वयुजीति सप्त पाकयज्ञ-
संस्था अग्न्याधेयमग्निहोत्रदर्शपौर्णमासावग्रयणं चातुर्मास्य निरूढ-
पशुबन्धसौत्रामणीति सप्त हरिर्यज्ञसंस्था अग्निष्टोमोऽत्यग्निष्टोम उक्थः
षोडशि वाजपेयोऽतिरात्रोऽप्तोर्याम इति सप्त सोमसंस्थाइत्येते चत्वा-
रिंशत् संस्काराः । अथाष्टावात्मगुणा दया सर्वभूतेषु क्षान्तिरनसूया
शौचमनायासोमङ्गलमकार्पण्यमस्पृहेति यस्यैते न चत्वारिंशत् सं-

स्कारा नवाष्टावात्मगुणा न स ब्रह्मणः सायुज्यं सालोक्यं च गच्छति । यस्य तु खलु संस्काराणामेकदेशोऽप्यष्टावात्मगुणा अथ स ब्रह्मणः सायुज्यं सालोक्यञ्च गच्छति गच्छति ।

इति गौतमीये धर्मशास्त्रेऽष्टमोऽध्यायः

## नवमोऽध्यायः

### अथ कर्तव्याकर्तव्यवर्णनम्

स विधिपूर्वं स्नात्वा भार्यामभिगम्य यथोक्तान् गृहस्थधर्मान् प्रयुञ्जान् इमानि व्रतान्यनुकर्षेत् स्नातकोनित्यं शुचिः सुगन्धः स्नानशीलः सति विभवे न जीर्णमलवद्वासाः स्यान्न रक्तमलवदन्यधृतं वा वासो विभृयान्न स्रगुपानहौ निर्णिक्तमशक्तौ न रूढश्मश्रुरकस्मान्नाग्निमपश्च युगपद्धारयेन्नाञ्जलिना पिबेन्न तिष्ठन्नुद्धृतोदकेनाचामेन्न शूद्राशुच्येक-पाण्यावर्जितेन न वाय्वग्निविप्रादित्यापोदेवतागाश्च प्रतिपश्यन् वा मूत्रपुरीषामेध्यान्युदस्येन्नैव देवताः प्रति पादौ प्रसारयेन्न पर्णलो-ष्टाश्मभिर्मूत्रपुरीषापकर्षणं कुर्यान्न भस्मकेशतुषकपालान्यधितिष्ठेन्न म्लेच्छाशुच्यधार्मिकैः सह सम्भाषेत तम्भाष्य पुण्यकृतोमनसा ध्यायेद्ब्राह्मणेन वा सह सम्भाषेत । अधेनुं धेनुभव्येति ब्रूयादभद्रं भद्रमिति कपालं भगालमिति मणिधनुरितीन्द्रधनुः । गां धयन्तीं परस्मै नाचक्षीत नचनां वारयेन्न मिथुनीभूत्वा शौचं प्रति विलम्बेत न च तस्मिन् शयने स्वाध्यायमधीयीत नचापररात्रमधीत्य पुनः प्रतिसम्विशेन्नाकल्पां नारीमभिरमयेन्न रजस्वलां नचैनां श्लिष्येन्न कन्यामग्निमुखोपधमनविगृह्यवादबहिर्गन्धमाल्यधारणपापीयसाव-लेखनभार्यासहभोजनाञ्जत्यवेक्षणकुद्वारप्रवेशनपादधावनासन्दिग्ध-भोजननदीबाहुतरणवृक्षविषमारोहणावरोहणप्राणव्यवस्थानानि च वर्जयेन्न सन्धिग्धां नावमधिरोहेत्सर्वतएवात्मानं गोपायेन्न प्रावृत्य शिरोऽहनि पर्यटेत् प्रावृत्य तु रात्रौ मूत्रोच्चारे च न भूमावनन्तर्धाय

नाराच्चावसथान्न भस्मकरीषकृष्टच्छायापथिकाम्येषु उभे मूत्रपुरीषे दिवा कुर्यादुदङ्मुखः सन्ध्ययोश्च रात्रौ तु दक्षिणामुखः पालाशमासनं पादुके दन्तधावनमिति वर्जयेत । सोपानत्कश्चाशनासनशयनाभिवादननमस्कारान् वर्जयेत् । न पूर्वाह्णमध्यन्दिनापराह्णानफलान् कुर्याद्यथाशक्ति धर्मार्थकामेभ्यस्तेषु च धर्मोत्तरः स्यान्न नग्नां परयोषितमीक्षेत न पदासनमाकर्षेन्न शिश्नोदरपाणिपादवाक्चक्षुश्चापलानि कुर्याच्छेदनभेदनविलिखनविमर्दनावस्फोटानि नाकस्मात् कुर्यान्नोपरिवत्सतन्त्रीं गच्छेन्न जलकुलः स्यान्न यज्ञमवृतोगच्छेद्दर्शनाय तु कामं न भक्ष्यानुत्सङ्गे भक्षयेन्न रात्रौ प्रेष्याहृतमुद्धृतस्नेहविलपनपिण्याकमथितप्रभृतीनि चात्रवीर्याणि नाश्नीयात्सायं प्रातस्त्वन्नमभिपूजितमनिन्दन् भुञ्जीत न कदाचिद्रात्रौ नग्नः स्वपेत् स्नायाद्वा यच्चात्मवन्तो वृद्धाः सम्यग्विनीता दम्भलोभमोहवियुक्ता वेदविदश्चाचक्षते तत्समाचरेत् योगक्षेमार्थमीश्वरमधिगच्छेन्नान्यमन्यत्र देवगुरुधार्मिकेभ्यः प्रभूतैधोदकयवसकुशमाल्योपनिष्क्रमणमार्य्यजनभूयिष्ठमनलसमृद्धं धार्मिकाधिष्ठितं निकेतनमावसितुं यतेत प्रशस्तमङ्गल्यदेवतायतनचतुष्पथादीन् प्रदक्षिणमावर्तेत । मनसा वा तत्समग्रमाचारमनुपालयेदापत्कल्पः । सत्यधर्मा आर्यवृत्तः शिष्टाध्यापकशौचशिष्टः श्रुतिनिरतः स्यान्नित्यमहिंस्रो मृदु दृढकारी दमदानशीलएवमाचारो मातापितरौ पूर्वापरान् सम्बन्धान् दुरितेभ्यो मोक्षयिष्यन् स्नातकः शश्वद्ब्रह्मलोकान्न च्यवते न च्यवते ।

इति गौतमीये धर्मशास्त्रे नवमोऽध्यायः

## दशमोऽध्यायः

### अथ वर्णानां वृत्तिवर्णनम्

द्विजातीनामध्ययनमिज्या दानं ब्राह्मणस्याधिकाः प्रवचनयाजनप्रतिग्रहाः पूर्वेषु नियमस्त्वाचार्यज्ञातिप्रियगुरुधनविद्याविनिमयेषु ब्र-

ह्मणः सम्प्रदानमन्यत्र यथोक्तात् कृषिवाणिज्ये चास्वयं कृते कुसीदञ्च । राज्ञोऽधिकं रक्षणं सर्वभूतानां न्याय्यदण्डत्वं बिभृयात् ब्राह्मणान् श्रोत्रियान् निरुत्साहांश्च ब्राह्मणानकरांश्चोपकुर्वाणांश्च योगश्च विजये भये विशेषेण चर्या च रथधनुर्भ्यां संग्रामे संस्थानमनिवृत्तिश्च न दोषो- हिंसायामाहवेऽन्यत्र व्यश्वसारथ्यायुधकृताञ्जलिप्रकीर्णकेशपराङ्मुखो- पविष्ठस्थलवृक्षारूढदूतगोब्राह्मणवादिभ्यः क्षत्रियश्चेदन्यस्तमुपजी- वेत्तद्वृत्तिः स्यात् जेता लभेत सांग्रामिकं वित्तं वाहनन्तु राज्ञउद्धार- श्चापृथग्जयेऽन्यत्तु यथार्हं भाजयेद्राजा राज्ञे बलिदानं कर्षकैदशमष्टमं षष्ठं वा पशुहिरण्ययोरप्येके पञ्चाशद्भागं विंशतिभागः शुल्कः पण्ये मूलफलपुष्पौषधमधुमांसतृणेन्धनानां षष्ठं तद्रक्षणधर्मित्वात्तेषु तु नित्ययुक्तः स्यादधिकेन वृत्तिः शिल्पिनोमासि मास्येकैकं कर्म कुर्युरेतेनात्मानोपजीविनो व्याख्याता नौचक्रीवन्तश्च भक्तं तेभ्यो दद्यात्पण्यं वणिग्भिरर्घापचये न देयं प्रणष्टमस्वामिकमधिगम्य राज्ञे प्रब्रूयुर्विख्याप्य सम्वत्सरं राज्ञा रक्ष्यमूर्ध्वमधिगन्तुश्चतुर्थं राज्ञः शेषः स्वामी ऋक्थक्रयसम्विभागपरिग्रहाधिगमेषु ब्राह्मणस्याधिकं लब्धं क्षत्रियस्य विजितं निर्विष्टं वैश्यशूद्रयोर्निध्यधिगमो राजधनं न ब्राह्मणस्याभिरूपस्याब्राह्मणो व्याख्यातः षष्ठं लभेतेत्येके चौरहृ- तमुपजित्य यथास्थानं गमयेत्कोशाद्वा दद्याद्रक्ष्यं बालधनमाव्य- वहारप्रापणात्समावृत्तेर्वा । वैश्यस्याधिकं कृषिवणिक्पाशुपाल्यकु- सीदम् । शूद्रश्चतुर्थो वर्ण एकजातिस्तस्यापि सत्समक्रोधः शौच- माचमनार्थे पाणिपादप्रक्षालनमेवैके श्राद्धकर्म भृत्यभरणं स्वदारवृत्ति परिचर्या चोत्तरेषां तेभ्यो वृत्तिं लिप्सेत जीर्णान्युपानच्छत्रवासः कूर्चा- न्युच्छिष्टाशनं शिल्पवृत्तिश्च यञ्चायमाश्रितोभर्त्तव्यस्तेन क्षीणोऽपि तेन चोत्तरस्तदर्थोऽस्य निचयः स्यादनुज्ञातोऽस्य नमस्कारोमन्त्रः पाकयज्ञैः स्वयं यजेतेत्येके । सर्वे चोत्तरोत्तरं परिचरेयुरार्यानार्ययोर्व्यतिक्षेपे कर्मणः साम्यं साम्यम् ।

इति गौतमीये धर्मशास्त्रे दशमोऽध्यायः

## एकादशोऽध्यायः

## अथ राजधर्मवर्णनम्

राजा सर्वस्येष्टे ब्राह्मणवर्जं साधुकारी स्यात् साधुवादी त्रय्यामान्वीक्षिक्याञ्चाभिविनीतः शुचिर्जितेन्द्रियो गुणवत्सहायोपायसम्पन्नः समः प्रजासु स्याद्धितञ्चासां कुर्वीत तमुपर्यासीनमधस्था उपासीरन्नन्ये ब्राह्मणेभ्यस्तेऽप्येनं मन्येरन् वर्णानाश्रमांश्च न्यायतोऽभिरक्षेच्चलतश्चैनान् स्वधर्मे स्थापयेद्धर्मस्थो ह्यंशभाग्भवतीति विज्ञायते ब्राह्मणञ्च पुरोदधीत विद्याभिजनवाग्रूपवयः शीलसम्पन्नं न्यायवृत्तं तपस्विनं तत्प्रसूतः कर्माणि कुर्वीत ब्रह्मप्रसूतं हि क्षत्रमृध्यते न व्यथत इति च विज्ञायते यानि च दैवोत्पातचिन्तकाः प्रब्रूयुस्तान्याद्रियेत तदधीनमपि ह्येके योगक्षेमं प्रतिजानते शान्तिपुण्याहस्वस्त्ययनायुष्यमङ्गलसंयुक्तान्याभ्युदयिकानि विद्वेषिणां सम्बलनमभिचारद्विषद्व्याधिसंयुक्तानि च शालाग्नौ कुर्याद्यथोक्तमृत्विजोऽन्यानि तस्य व्यवहारो वेदो धर्मशास्त्राण्यङ्गान्युपवेदाः पुराणं देशजातिकुलधर्माश्चाम्नायैरविरुद्धाः प्रमाणं कृषिवणिक्पाशुपाल्यकुसीदकारवः स्वे स्वे वर्गे तेभ्यो यथाधिकारमर्थान् प्रत्यवहृत्य धर्मव्यवस्था न्यायाधिगमे तर्कोऽभ्युपायस्तेनाभ्यूह्य यथास्थानं गमयेद्विप्रतिपत्तौ त्रयीविद्यावृद्धेभ्यः प्रत्यवहृत्यनिष्ठां गमयेदथाहास्य निःश्रेयसं भवति ब्रह्मक्षत्रेण सम्प्रवृत्तं देवपितृमनुष्यान् धारयतीति विज्ञायते दण्डोदमनादित्याहुस्तेनादान्तान् दमयेद्वर्णाश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलरूपायुः श्रुतवृत्तवित्तसुखमेधसो जन्म प्रतिपद्यन्ते विष्वमो विपरीता नश्यन्ति तानाचार्योपदेशोदण्डश्च पालयते तस्माद्राजाचार्यावनिन्द्यावनिन्द्यौ ।

इति गौतमीये धर्मशास्त्रे एकादशोऽध्यायः

## द्वादशोऽध्यायः

## अथ विविधपापकरणे दण्डविधानवर्णनम्

शूद्रोद्विजातीनभिसन्धायाभिहत्य च वाग्दण्डपारुष्याभ्यामङ्गं मोच्यो येनोपहन्यादार्यस्त्र्यभिगमने लिङ्गोद्धारः स्वहरणञ्च गोप्ता चेद्वधो-ऽधिकोऽथाहास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रतिपूरणमुदाहरणे जिह्वाच्छेदो धारणे शरीरभेद आसनशयनवाक्पथिषु समप्रेप्सुर्दण्ड्यः शतम् । क्षत्रियोब्राह्मणाक्रोशे दण्डपारुष्ये द्विगुणमध्यर्ध्वं वैश्यो-ब्राह्मणक्षत्रिये पञ्चाशत्तदर्द्धं वैश्ये न शूद्रे किञ्चित् ब्राह्मणराजन्यवत् क्षत्रियवैश्यावष्टापाद्यं स्तेयकिल्विषं शूद्रस्य द्विगुणोत्तराणीतरेषां प्रतिवर्ण विदुषोऽतिक्रमे दण्डभूयस्त्वं फलहरितधान्यशाकादाने पञ्चकृष्णलमल्पे पशुपीडिते स्वामिदोषः पालसंयुक्ते तु तस्मिन् पथि क्षेत्रेऽनावृते पालक्षेत्रिकयोः पञ्च माषा गवि षडुष्ट्रे खरोऽश्वमहिष्यो-र्दशाजाविषु द्वौ द्वौ सर्वविनाशे शतं शिष्टाकरणे प्रतिषिद्धसेवायाञ्च नित्यं चेलपिण्डादूर्ध्वं स्वहरणञ्च गोऽग्न्यर्थे तृणमेधान् वीरुध वनस्पतीनाञ्च पुष्पाणिस्ववदाददीत फलानि चापरिवृतानाम् कुसीदवृद्धिर्धर्म्या विंशतिः पञ्चमाषकी मासं नातिसाम्वत्सरीमेके चिरस्थाने द्वैगुण्यं प्रयोगस्य मुक्ताभिर्न वर्द्धते दित्सतोऽवरुद्धस्य च चक्रकालवृद्धिः कारिताकायिकाशिखाधिभोगाश्च कुसीदं पशूपज-लोमक्षेत्रशतवाह्येषु नातिपञ्चगुणमजडापोगण्डधनं दशवर्ष भुक्तं परैः सन्निधौ भोक्तुरश्रोत्रियप्रव्रजितराजन्यधर्मपुरुषः पशुभूमिस्त्रीणामनति-भोगऋक्थभाजि ऋणं प्रतिकुर्युः प्रातिभाव्यवणिक्शुल्कमद्य द्यूत-दण्डान् पुत्रानध्याभवेयुर्निध्यं वाधियाचितावक्रीताधयोनष्टाः सर्वा न निन्दिता न पुरुषापराधेन स्तेनः प्रकीर्णकेशो मुषली राजानमिया-त्कर्माचक्षाणः पूतोबधमोक्षाभ्यामघ्नन्नेनस्वी राजा न शारीरो ब्राह्म-णदण्डः कर्मवियोगविख्यापनाविवासनाङ्ककरणान्यप्रवृत्तौ प्राय-श्चित्ती स चौरसमः सचिवोमतिपूर्वे प्रतिग्रहीताप्यधर्मसंयुक्ते पुरुष-

शक्त्यपराधानुबन्धविज्ञानाद्दण्डनियोगोऽनुज्ञानं वा वेदवित् समवायवचनात् वेदवित्समवायवचनात् ।

इति गौतमीये धर्मशास्त्रे द्वादशोऽध्यायः

त्रयोदशोऽध्यायः

अथ साक्षीणां विधावर्णनम् ।

विप्रतिपत्तौ साक्षिणी मिथ्यासत्यव्यवस्था बहवः स्युरनिन्दिताः स्वकर्मसु प्रात्ययिका राज्ञाञ्च निष्प्रीत्यनभितापाश्चान्यतरस्मिन्नपि शूद्राब्राह्मणवचनादनु रोध्योऽनिबन्धश्चेन्नासमवेता पृष्टाः प्रब्रूयुरवचने च दोषिणः स्युः स्वर्गः सत्यवचने विपर्यये नरकः । अनिबन्धैरपि वक्तव्यं पीडाकृते निबन्धः प्रमत्तोक्ते च साक्षिसभ्य राजकतृषु दोषोधर्मतन्त्रपीडायां शपथेनैके सत्यकर्मणा तद्देवराजब्राह्मणसंसदि स्यादब्राह्मणानां क्षुद्रपश्वनृते साक्षी दश हन्ति गोऽश्वपुरुषभूमिषु दशगुणोत्तरान् सर्वं वा भूमौ हरणे नरकोभूमिवदप्सु मैथुनसंयोगे च पशुवन्मधुसर्पिषोर्गोवद्वस्त्रहिरण्यधान्यब्रह्मसु यानेष्वश्ववन्मिथ्यावचने याप्यो दण्ड्यश्च साक्षी नानृतवचने दोषोजीवनञ्चेत्तदधीनं न तु पापीयसोजीवनं राजा प्राड्विवाको ब्राह्मणो वा शास्त्रवित् प्राड्विवाको मध्योभवेत् सम्वत्सरं प्रतीक्षेत प्रतिभायां धेन्वनडुहस्त्रीप्रजनसंयुक्तेषु शीघ्रमात्ययिके च सर्वधर्मेभ्योगरीयः प्राड्विवाके सत्यवचनं सत्यवचनम् ।

इति गौतमीये धर्मशास्त्रे त्रयोदशोऽध्यायः

चतुदशोऽध्यायः

अथ अशौचवर्णनम्

शावमाशौचं दशरात्रमनृत्विग्दीक्षितब्रह्मचारिणां सपिण्डानामेकादशरात्रं क्षत्रियस्य द्वादशरात्रं वैश्यस्यार्द्धमासमेकं मासं शूद्रस्य

तच्चेद्दन्तः पुनरापतेत्तच्छेषेण शुद्ध्येरन् रात्रिशेषे द्वाभ्यां प्रभाते तिसृभि-र्गोब्राह्मणहतानामन्वक्षं राजक्रोधाच्च युद्धे प्रायोनाशकशास्त्राग्नि-विषोदकोद्बन्धनप्रपतनैश्चेच्छतां पिण्ड निवृत्तिः सप्तमे पञ्चमे वा जननेऽप्येवं मातापित्रोस्तन्मातुर्वा गर्भमासस मा रात्रिः स्रंसने गर्भस्य त्र्यहं वा श्रुत्वा चोर्ध्वं दशम्याः पक्षिण्यसपिण्डयोनिसम्बन्धे सहाध्या-यिनि च सब्रह्मचारिण्येकाहं श्रोत्रिये चोपसम्पन्ने प्रेतोपस्पर्शने दशरा-त्रमाशौचमभिसन्धाय चेदुक्तं वैश्यशूद्रयोरार्त्तवीर्व्वापूर्वयोश्च त्र्यहं वाचार्यतत्पुत्रस्त्रीयाज्यशिष्येषु चैवमवरश्चेद्वर्णः पूर्वं वर्णमुपस्पृशेत् पूर्वोवावरं तत्र शावोक्तमाशौचं पतित चण्डाल सूतिकोद-क्याशवस्पृष्टितत्स्पृष्ट्युपस्पर्शने सचेलोदकोपस्पर्शनाच्छुद्ध्येच्छवा-नुगमे च शुनश्च यदुपहन्यादित्येके उदकदानं सपिण्डैः कृतचूडस्य तत्स्त्रीणाञ्चानतिभोग एकेऽप्रदत्तानामधः शय्यासनिनो ब्रह्मचारिणः सर्वे न मार्जयेरन्न मासं भक्षयेयुराप्रदानात्प्रथमतृतीयपञ्चमसप्तमनव-मेषूदकक्रिया वासनाञ्च त्यागः अन्त्ये त्वन्त्यानां दन्तजन्मादि माता पितृभ्यां तूष्णीं माता बालदेशान्तरितप्रब्रजितासपिण्डानां सद्यः शौचं राज्ञाञ्च कार्यविरोधाद्ब्राह्मणस्य च स्वाध्याया निवृत्त्यर्थं स्वाध्याया-निवृत्त्यर्थम् ।

इति गौतमीये धर्मशास्त्रे चतुर्दशोऽध्यायः

## पञ्चदशोऽध्यायः

## अथ श्राद्धविवेकवर्णनम्

अथ श्राद्धममावस्यायां पितृभ्योदद्यात् पञ्चमीप्रभृति वापरपक्षस्य यथाश्राद्धं सर्वस्मिन् वा द्रव्यदेशब्राह्मणसन्निधाने वा कालनियमः शक्तितः प्रकर्ष गुणसंस्कारविधिरन्नस्य नवावरान् भोजयेदयुजो यथो-त्साहं वा ब्राह्मणान् श्रोत्रियान् वाग्रूपवयःशीलसम्पन्नान् युवभ्योदानं प्रथममेके पितृवन्नच तेन मित्रकर्म कुर्य्यात्पुत्राभावे सपिण्डा मातृ-

सपिण्डाः शिष्याश्च दद्युस्तदभावे ऋत्विगाचार्य्यौ तिलमाषव्रीहि-यवोदकदानैर्मासं पितरः प्रीणन्ति मत्स्यहरिणरुरुशशकूर्मवराहमेष-मांसैः सम्वत्सराणि गव्यपयःपायसैर्द्वादश वर्षाणि वार्ध्रीणसेन मांसेन कालशाकच्छागलोहखड्गमांसैर्मधुमिश्रैश्चानन्त्यम् । न भोजयेत् स्तेनक्लीवपतितनास्तिकतद्वृत्तिवीरहाग्रे दीधिषु दीधिषु पतिस्त्री-ग्रामयाजकाजपालोत्सृष्टाग्निमद्यपकुचरकूटसाक्षिप्रातिहारि कानुप-पत्तिर्यस्य च कुण्डाशी सोमविक्रय्यगारदाही गरदावकीर्णिगणप्रेष्या-गम्यागामिहिंस परिवित्तपरिवेत्तृपर्य्याहितपर्य्या धातृत्यक्तात्मदुर्बलाः कुनखिश्यावदन्तः श्वित्रिपौनर्भवकितवाज प्रेष्यप्रातिरूपकशूद्रापति-निराकृतिकिलासी कुसीदी वणिक्शिल्पोपजीविज्यावादित्रताल-नृत्यगीतशीलान् पित्रा चाकामेन विभक्तान् शिष्यांश्चैके सगोत्रांश्च । भोजयेदूर्द्ध्वं त्रिभ्योगुणवन्तम् । सद्यश्राद्धी शूद्रातल्पगस्तत्पुरीषे मासं नयति पितृंस्तस्मात्तदहर्ब्रह्मचारी स्यात् श्वचण्डालपतितावेक्षणे दुष्टं तस्मात्परिश्रुते दद्यात्तिलैर्व्वा किरेत् पङ्क्तिपावनो वा शमयेत् पङ्क्ति-पावनाः षडङ्गविज्ज्येष्ठमासिकस्तृणाचिकेतस्त्रिमधुस्त्रिसुपर्णः पञ्चा-ग्निः स्नातकोमन्त्रब्राह्मणविद्धर्मज्ञोब्रह्मदेयानुसंधान इति हविःषु चैवं दुर्बलादीन् श्राद्ध एवैके श्राद्ध एवैके ।

इति गौतमीये धर्मशास्त्रे पञ्चदशोऽध्यायः

षोडशोऽध्यायः ।

अथ अनध्यायवर्णनम्

श्रवणादि वार्षिकं प्रोष्ठपदीं वोपाकृत्याधीयीत च्छन्दांस्यर्द्धपञ्चममा-सान् पञ्चदक्षिणायनं वा ब्रह्मचार्य्युत्सृष्टलोमा न मांसं भुञ्जीत द्वैमा-स्यो वा नियमो नाधीयीत वायौ दिवापाशुहरे कर्णश्राविणि नक्तं वाणभेरीमृदङ्गगर्त्तार्त्तशब्देषु च श्वशृगालगर्दभसंह्लादे लोहितेन्द्रधनु-र्नीहारेष्वभ्रदर्शने चापत्तौ मूत्रित उच्चारिते निशासन्ध्योदकेषु वर्षति

चैके वलीकसन्तानमाचार्य्यपरिवेषणे ज्योतिषोश्च भीतो यानस्थः शयानः प्रौढपादः श्मशानग्रामान्तमहापथाशौचेषु पूतिगन्धान्तः शवदिवाकीर्त्तिशूद्रसन्निधाने सूतके चोद्गारे ऋग्यजुषञ्च सामशब्दो यावदाकालिका निर्घातभूमिकम्पराहुदर्शनोल्कास्तनयित्नुवर्षविद्युतः प्रादुष्कृताग्निष्वनृतौ विद्युति नक्तञ्चापररात्रात्त्रिभागादिप्रवृत्तौ सर्व-मुल्का विद्युत्समत्येकेषां । स्तनयित्नुरपराह्णेऽपि प्रदोषे सर्वं नक्तम-र्द्धरात्रादहश्चेत् सज्योतिर्विषयस्थे च राज्ञि प्रेते विप्रोष्य चान्योन्येन सह सङ्कुलोपाहितवेदसमाप्तिच्छर्दिश्राद्धमनुष्ययज्ञभोजनेष्वहोरात्रममा-वास्यायाञ्च ह्यहं वा कार्त्तिकी फाल्गुन्याषाढी पौर्णमासी तिस्रोऽष्टका-स्त्रिरात्रमन्यामेके अभितो वार्षिकं सर्वे वर्षविद्युत्स्तनयित्नुसन्निपाते प्रस्यन्दिन्यूद्ध्र्वं भोजनादुत्सवे प्राधीतस्य च निशायां चतुर्मुहूर्तं नित्यमेके नगरे मानसमप्यशुचि श्राद्धिनामाकालिकमकृतान्नश्रा-द्धिकसंयोगे च प्रतिविद्यञ्च यावत्स्मरन्ति प्रतिविद्यञ्च यावत्स्मरन्ति

इति गौतमीये धर्मशास्त्रे षोडशोऽध्यायः

## सप्तदशोऽध्यायः

### अथ भक्ष्याभक्ष्यप्रकरणम्

प्रशस्तानां स्वकर्मसु द्विजातीनां ब्राह्मणोभुञ्जीत प्रतिगृह्णीयाच्चै-धोदकयवसमूलफलमध्वभयाभ्युद्यतशय्यासनयानपयोदधिधाना-शफरिप्रियङ्गुसृङ्मार्गशाकान्यप्रणोद्यानि सर्वेषां पितृदेवगुरुभृत्यभरणे चान्यवृत्तिश्चेन्नान्तरेण शूद्रात् पशु पालक्षेत्रकर्षककुलसङ्गतकारपितृ-परिचारका भोज्यान्ना वणिक् चाशिल्पी नित्यमभोज्यं केशकीटावपन्नं रजस्वलाकृष्णशकुनिपदोपहतं भ्रूणघ्नप्रेक्षितं गवोपघ्रातं भावदुष्टं शुक्तं केवलमदधि पुनः सिद्धं पर्युषितमशाकभक्ष्यस्नेहमांसमधून्युत्सृष्ट-पुंश्चल्यभिशस्तानपदेश्यदण्डिकतक्षकदर्यबन्धनिकचिकित्सकमृग-युवार्युच्छिष्टभोजिगणविद्विषाणामपाङ्क्त्यानां प्राग्दुर्बलाद्वृथान्नाचम-

नोत्थानव्यपेतानि समासमाभ्यां विषमसमेपूजान्तरानर्चितञ्च गोश्च क्षीरमनिर्दशायाः सूतके चाजामहिष्योश्च नित्यमाविकमपेयमौष्ट्रमैकशफञ्च स्यन्दिनीयमसूसन्धिनीनाञ्च याश्च व्यपेतवत्साः पञ्चनखाश्चाशल्यकशशश्वाविड्गोधाखड्गकच्छपा उभयतोदत्केशलोमैकशफकलविङ्कप्लवचक्रवाकहंसाः काककङ्कगृध्रश्येनाजलजारक्तपादतुण्डा ग्राम्यकुक्कुट शूकरौ धेन्वनडुहौ चापन्नदावसन्नवृथामांसानि किसलयक्याकुलशुननिर्यासलोहितावृश्चनाश्वनिचिदारुवकवलाकटिट्टिभमान्धातृनक्तञ्चरा अभक्ष्याः । भक्ष्याः प्रतुदाविष्किराजालपादामत्स्याश्चाविकृताबध्याश्च धर्मार्थे व्यालहता दृष्टदोषवाक्प्रशस्तान्यभ्युक्ष्योपयुञ्जीतोपयुञ्जीत ।

इति गौतमीये धर्मशास्त्रे सप्तदशोऽध्यायः

## अष्टादशोऽध्यायः

### अथ स्त्रीषु ऋतुकाले सहवासप्रकरणम्

अस्वतन्त्रा धर्मे स्त्री नातिचरेद्भर्त्तारं वाक्चक्षुः कर्मसंयता पतिरपत्यलिप्सुर्देवराद्गुरुप्रसूता नर्त्तुमतीयात्पिण्डगोत्र ऋषिसम्बन्धिभ्यो योनिमात्राद्वा न देवरादित्येके नातिद्वितीयं जनयितुरपत्यं समयादन्यत्र जीवतश्च क्षेत्रे परस्मात्तस्य द्वयोर्वा रक्षणाद्भर्त्तुरेवनष्टेभर्त्तरि षाड्वार्षिकं क्षपणं श्रूयमाणेऽभिगमनं प्रव्रजिते तु निवृत्तिः प्रसङ्गात्तस्य द्वादशवर्षाणि ब्राह्मणस्य विद्यासम्बन्धे भ्रातरि चैवं ज्यायसि यवीयान् कन्याग्न्युपयमेषु षडित्येके त्रीन् कुमार्य्यृतूनतीत्य स्वयं युज्येतानिन्दितेनोत्सृज्य पित्र्यानलङ्कारान् प्रदानं प्रागृतोरप्रयच्छन् दोषी प्रावाससः प्रतिपत्तेरित्येके प्रव्यादानं विवाहसिद्ध्यर्थं धर्मतन्त्रसंयोगे च शूद्रान्यत्रापि शूद्राद्बहुपशोर्हीनकर्मणः शतगोरनाहिताग्नेः सहस्त्रगोश्च सोमपात् सप्तमीञ्चाभुक्त्वा निचयायाप्यहीनकर्मभ्य आचक्षीत राज्ञा पृष्टस्तेन हि भर्तव्यः श्रुतशीलसम्पन्नश्चेद्धर्मतन्त्रपीडायां तस्या-

करणे दोषादोषः

इति गौतमीये धर्मशास्त्रे अष्टादशोऽध्यायः

## एकोनविंशोऽध्यायः

### अथ प्रतिषिद्धसेवने प्रायश्चित्तमीमांसावर्णनम्

उक्तो वर्णधर्मश्चाश्रमधर्मश्चाथ खल्वयं पुरुषो येन कर्मणा लिप्यते-ऽथैतदयाज्ययाजनमभक्ष्यभक्षणमवद्यवदनं शिष्टस्याक्रिया प्रतिषि-द्धसेवनमिति च तत्र प्रायश्चित्तं कुर्य्यान्न कुर्य्यादिति मीमांसन्ते न कुर्य्यादित्याहुर्न हि कर्म क्षीयत इति कुर्य्यादित्यपरे पुनस्तोमेनेष्ट्वा पुनः सवनमायातीति विज्ञायते व्रात्यस्तोमेनेष्ट्वा तरतिं सर्वं पाप्मानं तरति ब्रह्महत्यां योऽश्वमेधेन यजतेग्निष्टुताभिशस्यमानं याजयेदिति च । तस्य निष्क्रयणानि जपस्तपोहोम उपवासोदानमुपनिषदो वेदान्ताः सर्वच्छन्दःसु संहिता मधून्यघमर्षणमथबशिरोरुद्राः पुरुषसूक्तं राज-नरौहिणे सामनी बृहद्रथन्तरे पुरुषगतिर्महानाम्यो महावैराजं महा-दिवाकीर्त्त्यं ज्येष्ठसाम्नामन्यतमद्बहिष्पवमानं कूष्माण्डानि पावमान्यः सावित्री चेति पावनानि । पयोव्रतता शाकभक्षता फलभक्षता प्रसृतयावको हिरण्यप्राशनं घृतप्राशनं सोमपानमिति च मेध्यानि । सर्वे शिलोच्चयाः सर्वाः स्रवन्त्यः पुण्याह्रदास्तीर्थानि ऋषिनि-वासगोष्ठपरिस्कन्दा इति देशाः । ब्रह्मचर्य्यं सत्यवचनं सवनेषूदको-पस्पर्शनमार्द्रवस्त्रताधःशायितानाशक इति तपांसि । हिरण्यं गौ-र्व्वासोऽश्वोभूमिस्तिलाघृतमन्नमिति देयानि । सम्वत्सरः षण्मासा-श्चत्वारस्त्रयो द्वावेकश्चतुर्व्विंशत्यहोद्वादशाहः षडहस्त्र्यहोऽहोरात्र इति कालाः । एतान्येवानादेशे विकल्पेन क्रियेरन् । एनःसु गुरुषु गुरूणि लघुषु लघूनि कृच्छ्रातिकृच्छ्रं चान्द्रायणमिति सर्वप्रायश्चित्तं सर्वप्रायश्चित्तम्

इति गौतमीये धर्मशास्त्रे एकोनविंशोऽध्यायः

## विंशतितमोऽध्यायः

## अथ विविधपापानां कर्मविपाकवर्णनम्

अथ चतुःषष्टिषु यातनास्थानेषु दुःखान्यनुभूय तत्रेमानि लक्षणानि भवन्ति ब्रह्महार्द्रकुष्ठी सुरापः श्यावदन्तगुरुतल्पगः पङ्गुः स्वर्णहारी कुनखी श्वित्री वस्त्रापहारी हिरण्यहारी दर्दूरी तेजोऽपहारी मण्डली स्नेहापहारी क्षयी तथा जीर्णवानन्नापहारी ज्ञानापहारी मूकः प्रतिहन्ता गुरोरपस्मारी गोघ्नोजात्यन्धः पिशुनः पूतिनामः पूतिवक्त्रस्तु सूचकः शूद्रोपाध्यायः श्वपाकस्त्रपुसीसचामरविक्रयी मद्यप एकशफविक्रयी मृगव्याध कुण्डाशी भृतकश्चैलिको वा नक्षत्री चार्वुदी नास्तिकोरङ्गोपजीव्यभक्ष्यभक्षी गण्डरी ब्रह्मापुरुषतस्कराणां देशिकः पिण्डितः षण्डोमहापथिकोगण्डिकश्चण्डाली पुक्कसी गोष्कवकीर्णी मध्वामेही धर्मपत्नीषु स्यान्मैथुनप्रवर्तकः खल्वाटसगोत्रसमयस्त्र्यभिगामी पितृमातृभगिनीस्त्र्यभिगाम्यावीजितस्तेषां कुब्जकुण्ठमण्डव्याधितव्यङ्गदरिद्राल्पायुषोऽल्पबुद्धयश्चण्डपण्डशैलूषतस्करपरपुरुषप्रेष्यपरकर्मकराः खल्वाटचक्राङ्गसङ्कीर्णाः क्रूरकर्माणः क्रमशश्चान्त्याश्चोपपद्यन्ते तस्मात्कर्तव्यमेवेह प्रायश्चित्तं विशुद्धैर्लक्षणैर्जायन्ते धर्मस्य धारणादिति धर्मस्य धारणादिति

इति गौतमीये धर्मशास्त्रे विंशतितमोऽध्यायः

## एकविंशतितमोऽध्यायः

## अथ सर्वपातकेषु शान्तिवर्णनम्

त्यजेत् पितरं राजघातकं शूद्रयाजकं वेदविप्लावकं भ्रूणहनं यश्चान्त्यावसायिभिः सह सम्वसेदन्त्यावसायिन्या वा तस्य विद्यागुरून् योनिसम्बन्धांश्च सन्निपात्य सर्वाण्युदकादीनि प्रेतकर्माणि कुर्य्युः पात्रञ्चास्य विपर्य्यस्येयुः । दासः कर्मकरोवावकरादमेध्यपात्रमानीय दासी घटान् पूरयित्वा दक्षिणामुखः पदा विपर्य्यस्ये-

दमुमनुदकं करोमीति नामग्राहस्तं सर्वेऽन्वालभेरन् प्राचीनावीतिनो मुक्तशिखा विद्यागुरवो योनिसम्बन्धाश्च वीक्षेरन्नप उपस्पृश्य ग्रामं प्रविशन्ति । अत ऊद्ध्र्वं तेन सम्भाष्य तिष्ठेदेकरात्रं जपन् सावित्री-मज्ञानपूर्वं ज्ञानपूर्वञ्चेत्त्रिरात्रम् यस्तु प्रायश्चित्तेन शुद्ध्येत्तस्मिन् शुद्धे शातकुम्भमयं पात्रं पुण्यतमाद्ध्रदात्पूरयित्वा स्रवन्तीभ्यो वा त एनमप उपस्पर्शयेयुः । अथास्मै तत्पात्रं दद्युस्तत् सम्प्रतिगृह्य जपेच्छान्ता द्यौः शान्ता पृथिवी शान्तं शिवमन्तरीक्षं योरोचनस्तमिह गृह्णा-मीत्येतैर्यजुर्भिः पावमानीभिस्तरत्समन्दीभिः कुष्माण्डैश्चाज्यं जुहुया-द्धिरण्यं ब्राह्मणाय वा दद्याद्गामाचार्य्याय । यस्य तु प्राणान्तिकं प्रायश्चित्तं स मृतः शुद्ध्येत्तस्य सर्वाण्युदकादीनि प्रेतकर्माणि कुर्य्युरेतदेव शान्त्युदकं सर्वेषूपपातकेषु सर्वेषूपपातकेषु ।

इति गौतमीये धर्मशास्त्रे एकविंशतितमोऽध्यायः

## द्वाविंशतितमोऽध्यायः

### अथ निषिद्धकर्मणां जन्मान्तरे विपाक वर्णनम्

ब्रह्महासुरापगुरुतल्पगमातृपितृयोनिसम्बन्धगस्तेननास्तिकनिन्दित-कर्माभ्यासिपतितत्याज्यपतितत्यागिनः पतिताः पातकसंयोजकाश्च तैश्चाब्दं समाचरन् । द्विजातिकर्मभ्योहानिः पतनं परत्र चासिद्धि-स्तामेके नरकं त्रीणि प्रथमान्यनिर्देश्यानि मनुर्न स्त्रीष्वगुरुतल्पगः पततीत्येके भ्रूणहनि । हीनवर्णसेवायाञ्च स्त्री पतति कौटसाक्ष्यं राजगामिपशुनं गुरोरनृताभिशंसनं महापातकसमानि अपांक्त्यानां प्राग्दुर्बलाद्गोहन्तृब्रह्मोज्झ्यतन्मन्द्रकृदवकीर्णिपतितसावित्रीकेषूपपा-तकं याजनाध्यापनादृत्विगाचार्य्यौ पतनीयसेवायाञ्च हेयावन्यत्र हा-नात् पतति तस्य च प्रतिग्रहीतेत्येके न कर्हिचिन्मातापित्रोरवृत्तिर्दायन्तु न भजेरन् ब्राह्मणाभिशंसने दोषस्तावान् द्विरनेनसि दुर्बलहिंसायामपि मोचने शक्तश्चेत् । अभिक्रुद्ध्यावगोरणं ब्राह्मणस्य वर्षशतमस्वर्ग्यं

निर्घाते सहस्रलोहितदर्शने यावतस्तत्प्रस्कन्द्य पांशून् संगृह्णीया-त्संगृह्णीयात् ।

इति गौतमीये धर्मशास्त्रे द्वाविंशतितमोऽध्यायः

## त्रयोविंशतितमोऽध्यायः

## अथ प्रायश्चित्तवर्णनम्

प्रायश्चित्तमग्नौ सक्तिब्रह्मघ्नस्त्रिरवच्छादितस्य लक्ष्यं वा स्याज्जन्येश-स्त्रभृताम् । खट्टाङ्गकपालपाणिर्वा द्वादशसम्वत्सरान् ब्रह्मचारी भैक्षाय ग्रामं प्रविशेत् स्वकर्माचक्षाणः पथोपक्रामेत् संदर्शनादार्यस्य स्नानासनाभ्यां विहरन् सवनेषूदकोपस्पर्शी शुद्ध्येत् प्राणलाभे वा तन्निमित्ते ब्राह्मणस्य द्रव्यापचये वा त्र्यवरं प्रति राज्ञोऽश्वमेधावभृथे वान्ययज्ञेऽप्यग्निष्टदन्तश्चोत्सृष्टश्चेद्ब्राह्मणबधे । हत्वापि आत्रेय्याश्चैवं गर्भे चाविज्ञाते वा । ब्राह्मणस्य राजन्यवधे षड्वार्षिकं प्राकृतं ब्रह्म-चर्यं ऋषभैकसहस्राश्च गा दद्यात् । वैश्ये त्रैवार्षिकं ऋषभैकशताश्च गा दद्यात् । शूद्रे सम्वत्सरं ऋषभैकदशाश्च गा दद्यादनात्रेय्याश्चैवं गाश्च । वैश्यवन्मण्डूकनकुलकाकविवदहरमूषिकाश्च । हिंसासु चास्थि-मतां सहस्रं हत्वानस्थिमतामनडुद्भारे च । अपि वास्थिमतामे-कैकस्मिन् किञ्चित्किञ्चिद्दद्यात् । षण्डे च पलालभारः सीसमाषश्च वराहे घृतघटः सर्पे लौहदण्डो ब्रह्मबन्ध्वाञ्चललनायां जीवोवैशिके न किञ्चित्तल्पान्नधनलाभबधेषु पृथग्वर्षाणि द्वे परदारे त्रीणि श्रोत्रियस्य द्रव्यलाभे चोत्सर्गो यथास्थानं वा गमयेत्प्रतिसिद्धमन्त्र संयोगे सहस्रवाक्चेदग्न्युत्सादिनिराकृत्युपपातकेषु चैवं स्त्री चातिचारिणी गुप्ता पिण्डं तु लभेत अमानुषीषु गीवर्जं स्त्रीकृते कूष्माण्डैर्घृतहोमो घृतहोमः ।

इति गौतमीये धर्मशास्त्रे त्रयोविंशतितमोऽध्यायः

## चतुर्विंशतितमोऽध्यायः

## अथ प्रायश्चित्तवर्णनम्

सुरापस्यब्राह्मणस्योष्णामासिञ्चेयुः सुरामास्ये मृतः शुद्ध्ये दमत्या पाने पयोघृतमुदकं वायुं प्रति त्र्यहं तप्तानि सकृच्छस्ततोऽस्य संस्कारः । मूत्रपुरीषरेतसाञ्च प्राशने श्वापदोष्ट्रखराणाञ्चाङ्गस्य ग्राम्यकुक्कुटशूक-रयोश्च गन्धाघ्राणे सुरापस्य प्राणायामो घृतप्राशनञ्च पूर्वैश्च दष्टस्य । तल्पे लोहशयने गुरुतल्पगः शयीत सूर्मीं वा ज्वलन्तीं श्लिष्येल्लिङ्गं वा सवृषणमुत्कृत्याञ्जलावाधाय दक्षिणाप्रतीचीं व्रजेदजिह्ममाशरीर निपातान्मृतः शुद्ध्येत । सखीसयोनिसगोत्राशिष्यभार्यासु स्नुषायां गवि च तल्पसमोऽवकरइत्येके श्वभिरादयेद्राजा हीनवर्णगमने स्त्रियं प्रकाशं पुमांसं खादयेद्यथोक्तं वा गर्दभेनावकीर्णी निर्ऋतिं चतुष्पथे यजते तस्याजिनमूर्ध्वबालं परिधाय लोहितपात्रः सप्त गृहान् भैक्षञ्चरेत् कर्माचक्षाणः सम्वत्सरेण शुद्ध्येत् । रेतस्कन्दने भये रोगे स्वप्ने-ऽग्नींन्धनभैक्षचरणानि सप्तरात्रं कृत्वाज्यहोमः साभिसन्धेर्वा रेतस्याभ्यां सूर्याभ्युदिते ब्रह्मचारी तिष्ठेदहरभुञ्जानोऽभ्यस्तमिते च रात्रिं जपन् सावित्रीमशुचिं दृष्ट्वादित्यमीक्षेत प्राणायामं कृत्वाऽभोज्यभोजने-ऽमेध्यप्राशने वा निष्पुरीषीभावस्त्रिरात्रावरमभोजनं सप्तरात्रं वा स्वयं शीर्णान्युपयुञ्जानः फलान्यनतिक्रामन् प्राक्पञ्चनखेभ्यश्छर्दिनोघृत-प्राशनञ्चाक्रोशानृतहिंसासु त्रिरात्रं परमन्तपः सत्यवाक्ये चेद्वारुणीपा-वमानीभिर्होमोविवाह मैथुननिर्मातृसंयोगेष्वदोषमेकेऽनृतं न तु खलु गुर्वर्थेषु यतः सप्त पुरुषानितश्च परतश्च हन्ति मनसापि गुरोरनृतं वद-न्नल्पेष्वप्यर्थेष्वन्त्यावसायिनीगमने कृच्छ्राब्दोऽमत्या द्वादशरात्रमुद-क्यागमने त्रिरात्रं त्रिरात्रम् ।

इति गौतमीये धर्मशास्त्रे चतुर्विंशतितमोऽध्यायः

## पञ्चविंशतितमोऽध्यायः

## अथ रहस्य प्रायश्चित्तवर्णनम्

रहस्यं प्रायश्चित्तमविख्यातदोषस्य चतुर्ऋचं तरत्समन्दीत्यप्सु जपेद-प्रतिग्राह्यं प्रतिजिघृक्षन् प्रतिगृह्य वाऽभोज्यं बुभुक्षमाणः पृथिवी-मावपेदृत्यन्तरारमण उदकोपस्पर्शनाच्छुद्धिमेके स्त्रीषु पयोव्रतो वा दशरात्रं घृतेन द्वितीयमद्भिस्तृतीयं दिवादिष्वेकभक्तकोजलक्लिन्न-वासा लोमानि नखानि त्वचं मांसं शोणितं स्नाय्वस्थिमज्ञानमि-तिहोम आप्मनोमुखे मृत्योरास्ये जुहोमीत्यन्ततः । सर्वेषामेतत् प्राय-श्चित्तं भ्रूणहत्यायाः । अथान्य उक्तोनियमोऽग्ने त्वं पारयेति महाव्या-हृतिभिर्जुहुयात् कूष्माण्डैश्चाज्यं तद्व्रत एव वा ब्रह्महत्यासुरापा-नस्तेयगुरुतल्पेषु प्राणायामैः स्नातोऽघमर्षणं जपेत्सममश्वमेधावभृथेन सावित्रीं वा सहस्रकृत्व आवर्त्तयन् पुनीतेहैवात्मानमन्तर्जले वाघ-मर्षणं त्रिरावर्त्तयन् पापेभ्यो मुच्यते मुच्यते ।

इति गौतमीये धर्मशास्त्रे पञ्चविंशतितमोऽध्यायः

## षड्विंशतितमोऽध्यायः

## अथ प्रायश्चित्तवर्णनम्

तदाहुः कतिधावकीर्णी प्रविशतीति मरुतः प्राणेनेन्द्रं बलेन बृहस्पतिं ब्रह्मवर्चसेनाग्निमेवेतरेण सर्वेणेति सोऽमावास्यायां निश्यग्निमुप-समाधाय प्रायश्चित्ताज्याहुतीर्जुहोति कामावकीर्णोऽस्म्यवकीर्णोऽस्मि कामकामाय स्वाहा कामाभिदुग्धोस्म्यभिदुग्धोऽस्मि कामकामाय स्वाहेति समिधमाधायानु पर्युक्ष्य यज्ञवास्तु कृत्वोपस्थाय सम्मासि-ञ्चत्वित्येतया त्रिरुप तिष्ठेत त्रय इमे लोका एषां लोकानामभिजित्या अभिक्रान्त्या इत्येतदेवैकेषां कर्माधिकृत्ययोः पूतइव स्यात्सइत्थं जुहुयादित्थमनुमन्त्रयेद्वरोदक्षिणेति । प्रायश्चित्तमविशेषादनार्जव-पैशुनप्रतिषिद्धाचारानाद्यप्राशनेषु । शूद्रायाञ्च रेतः सिक्त्वा योनौ च

दोषवति कर्मरयभिसन्धि पूर्वैष्वलिङ्गाभिरप उपस्पृशेद्वारुणीभिर-न्यैर्वापवित्रैः प्रतिषिद्धवाङ्मनसयोरपचारे व्याहृतयः संख्याताः पञ्च सर्वास्वपो वाचा मे देहश्च मादित्यश्च पुनातु स्वाहेति प्रातः रात्रिश्च मा वरुणश्च पुनात्विति सायमष्टौ वा समिधमादध्याद्देवकृतस्येति हुत्वैवं सर्वस्मादेनसोमुच्यते मुच्यते ।

इति गौतमीये धर्मशास्त्रे षड्विंशतितमोऽध्यायः

## सप्तविंशतितमोऽध्यायः

## अथ कृच्छ्रव्रतविधिवर्णनम्

अथातः कृच्छ्रान् व्याख्यास्यामो हविष्यान् प्रातराशान् भुक्त्वा तिस्त्रोरात्रीर्नाश्नीयादथापरं त्र्यहं नक्तं भुञ्जीत अथापरं त्र्यहं न कञ्चन याचेदथापरं त्र्यहमुपवसेत्तिष्ठेदहनि रात्रावासीत क्षिप्रकामः सत्यं वदेदनार्यैर्न सम्भाषेत रौरवयौधाजिने नित्यं प्रयुञ्जीतानुसवनमुद-कोपस्पर्शनमापोहिष्ठेति तिसृभिः पवित्र वतीभिर्मार्जयेत् हिररायवर्णाः शुचयः पावका इत्यष्टाभिः । अथोदकतर्पणं ॐ नमोहमाय मोहम्नाय संहमाय धुन्वते ताप साय पुनर्वसवे नमोनमोमौञ्ज्यायोर्म्याय वसु-विन्दाय सर्व विन्दाय नमोनमः पाराय सुपाराय महापाराय पारयिष्णवे नमोनमो रुद्राय पशुपतये महते देवाय त्र्यम्बकायैकचराधि पतये हरायशर्वायेशानायोग्राय वज्रिणे घृणिने कपर्द्दिने नमोनमः सूर्याया-दित्याय नमोनमोनीलग्रीवाय शितिकराठाय नमोनमः कृष्णाय पिङ्ग-लाय नमोनमोज्येष्ठाय श्रेष्ठाय वृद्धायेन्द्राय हरिकेशायोर्ध्वरेतसे नमो-नमः सत्याय पावकाय पावकवर्णाय कामाय कामरूपिणे नमोनमो दीप्ताय दीप्तरूपिणे नमोनमस्तीक्ष्ण रूपिणे नमोनमः सौम्याय सुपुरु-षाय महापुरुषाय मध्यमपुरुषायोत्तमपुरुषाय ब्रह्मचारिणे नमो नम-श्चन्द्रललाटाय कृत्तिवाससे पिनाकहस्ताय नमोनम इति । एतदेवा-दित्योपस्थानमेता एवाज्याहुतयो द्वादशरात्रस्यान्ते चरुं श्रपयित्वै-

ताभ्यो देवताभ्यो जुहुयादग्नये स्वाहा सोमाय स्वाहाग्नीषोमाभ्या-मिन्द्राग्निभ्यामिन्द्राय विश्वेभ्योदेवेभ्यो ब्रह्मणे प्रजापतते अग्नये स्वि-ष्टिकृत इति । ततो ब्राह्मणतर्पणम् । एतेनैवातिकृच्छ्रोव्याख्या-तोयावत् सकृदाददीत तावदश्नी यादब्भक्षस्तृतीयः स कृच्छ्रा-तिकृच्छ्रः । प्रथमं चरित्वा शुचिः पूतः कर्मण्योभवति द्वितीयं चरित्वा यत्किञ्चिदन्यन्महापातकेभ्यः पापं कुरुते तस्मात्प्रमुच्यते तृतीयं चरि-त्वा सर्वस्मादेनसोमुच्यते अथैतांस्त्रीन् कृच्छ्रान् चरित्वा सर्वेषु वेदेषु स्नातो भवति सर्वैर्देवैर्ज्ञातो भवति यश्चैवं वेद यश्चैवं वेद

इति गौतमीये धर्मशास्त्रे सप्तविंशतितमोऽध्यायः

## अष्टाविंशतितमोऽध्यायः

## अथ चान्द्रायणव्रतविधिवर्णनम्

अथातश्चान्द्रायणं तस्योक्तो विधिः कृच्छ्रे वपनं व्रतञ्चरेत् श्वोभूतां पौर्णमासीमुपवसेदाप्यायस्व सन्ते पयांसि नवोनव इति चैता-भिस्तर्पणमाज्यहोमोहविषश्चानुमन्त्रणमुपस्थानं चन्द्रमसोयद्देवा देव-हेलनमिति चतसृभिराज्यं जुहुयाद्देव कृतस्येति चान्ते समिद्भिरों भूर्भुवः स्वस्तपः सत्यं यशः श्रीरूपं गिरौजस्तेजः पुरुषोधर्मः शिवः शिव इत्येतैर्ग्रासानुमन्त्रणं प्रतिमन्त्रं मनसा नमः स्वाहेति वा सर्वग्रासप्रमाणमास्यावि कारेण चरुभैक्षसक्तुकणयावकशाकपयो-दधिघृतमूलफलोदकानि हवींष्युत्तरोत्तरं प्रशस्तानि पौर्णमास्यां पञ्च-दश ग्रासान् भुक्त्वैकापचयेन परपक्षमश्नीयादमावास्यायामुपोष्यै कोपचयेन पूर्वपक्षं विपरीतमेकेषाम् । एष चान्द्रायणोमासोमा-समेतमाप्त्वा विपापो विपाप्मा सर्व मेनोहन्ति द्वितीयमाप्त्वा दश-पूर्वान् दशावरानात्मानञ्चैकविंशं पङ्क्तीश्च पुनाति सम्वत्सरं चाप्त्वा चन्द्रमसः सलोकतामाप्नोति

इति गौतमीये धर्मशास्त्रेऽष्टाविंशतितमोऽध्यायः

## एकोनत्रिंशत्तमोऽध्यायः

## अथ पुत्राणां सम्पत्तिविभागवर्णनम्

ऊर्ध्वं पितुः पुत्रा ऋक्थं भजेरन्निवृते रजसि मातुर्वीवति चेच्छति सर्वं वा पूर्वजस्येतरान् बिभृयात् । पूर्ववद्विभागे तु धर्मवृद्धि विंशतिभागो ज्येष्ठस्य मिथुनमुभयतो दद्युक्तो रथोगोवृषः काणखोरकूटवराडा-मध्वमस्यानेकश्चेद विर्धान्यायसी गृहमनोयुक्तं चतुष्पदाञ्चैकैकं यवी-यसः समञ्चेतरत् सर्वं द्व्यंशी वा पूर्वजः स्यादेकैकमितरेषामेकैकं वा धनरूपं काम्यं पूर्वः पूर्वो लभेत दशतः पशूनां नैकशफः नैकशफानां वृषभोऽधिकोज्येष्ठस्य वृषभषोडशा ज्यैष्ठिनेयस्य समं वा ज्यैष्ठिनेयेन यवीयसां प्रतिमातृ वा स्ववर्गे भाग विशेषः । पितोत्सृजेत् पुत्रिका मनपत्योऽग्निं प्रजापतिञ्चेष्ट्वास्मदर्थमपत्यमिति संवाद्याभिसन्धिमा-त्रात्पुत्रिकेप्येकेषां तत्संशयान्नोपयेच्छेदभ्रातृकाम् । पिण्डगोत्रऋषि-सम्बन्धा ऋक्थं भजेरन् स्त्रीचानपत्यस्य बीजं वा लिप्सेत देवरवत्य-न्यतोजातमभागम् । स्त्रीधनं दुहितृणामप्रत्तानामप्रतिष्ठितानाञ्च भगि-नीशुल्कं सोदर्याणामध्वं मातुः पूर्वञ्चैके । संसृष्टविभागः प्रेतानां ज्येष्ठस्य संसृष्टिनि प्रेते असंसृष्टी ऋक्थभाक् विभक्तजः पित्र्यमेव । स्वयमर्जितं वैद्योऽवैद्येभ्यः कामं भजेरन् । पुत्रा औरसक्षेत्रजद-त्तकृत्रिमगूढोत्पन्नापबिद्धा ऋक्थभाजः कानीनसहोढपौनर्भवपुत्रि-कापुत्रस्वयन्दत्तक्रीता गोत्रभाजश्चतुर्थांशभागिनश्चौरसाद्यभावे ब्राह्म-णस्य राजन्यापुत्रो ज्येष्ठोगुणसम्पन्नस्तुल्यांशभाक् ज्येष्ठांशहीनमन्यत् राजन्या वैश्यापुत्रसमवाये स यथा ब्राह्मणीपुत्रेण क्षत्रियाच्चेत् शूद्रा-पुत्रोऽप्यनपत्यस्य शुश्रूषुश्चेल्लभेत वृत्तिमूलमन्तेवासविधिना सवर्णा-पुत्रोऽप्यन्यायवृत्तो न लभेतैकेषां श्रोत्रिया ब्राह्मणस्यान पत्यस्य ऋक्थं भजेरन् राजेतरेषां जडक्लीवौ भर्त्तव्यावपत्यं जडस्य भागार्हं शूद्रापुत्र-वत्प्रतिलोमासूदकयोगक्षेमकृतान्नेष्वविभागः स्त्रीषु च संयुक्तास्व-नाज्ञाते दशावरैः शिष्टैरूहवद्भिरलुब्धैः प्रशस्तं कार्यम् । चत्वा-

रश्चतुर्णां पारगा वेदानां प्रागुत्तमास्त्रय आश्रमिणः पृथग्धर्मविदस्त्रय एतान् दशावरान् परिषदित्याचक्षते असम्भवे त्वेतेषामश्रोत्रियो वेदविच्छिष्टोविप्रतिपत्तौ यदाह यतोऽयमप्रभवो भूतानां हिंसानुग्रह-योगेषु धर्मिणां विशेषेण स्वर्गं लोकं धर्मविदाप्नोति ज्ञानाभि-निवेशाभ्यामिति धर्मो धर्मः

इति गौतमीये धर्मशास्त्रे एकोनत्रिंशत्तमोऽध्यायः

समाप्ता चेयं गौतमस्मृतिः

Reference:

*Smṛti Sandarbha*, Vol. IV, (Delhi: Nag, 1981), pp. 1879 ff.

# अथ यमस्मृतिः

श्रीगणेशायनमः

अथ प्रायश्चित्तवर्णनम्

अथातो ह्यस्य धर्मस्य प्रायश्चित्ताभिधायकम्
चतुर्णामपि वर्णानां धर्मशास्त्रं प्रवर्त्तते १
जलाग्न्युद्बन्धनभ्रष्टाः प्रव्रज्यानशनच्युताः
विषप्रपतनप्रायशस्त्रघातच्युताश्च ये २
सर्वे ते प्रत्यवसिताः सर्वलोकवहिष्कृताः
चान्द्रायणेन शुध्यन्ति तप्तकृच्छ्रद्वयेन वा ३
उभयावसिताः पापा येऽग्राम्यशरणच्युताः
इन्दुद्वयेन शुध्यन्ति दत्त्वा धेनुं तथा वृषम् ४
गोब्राह्मणहनं दग्धा मृतमुद्बन्धनेन च
पाशं तस्यैव छित्त्वा तु तप्तकृच्छ्रं समाचरेत् ५
कृमिभिर्व्रणसंभूतैर्मक्षिकाश्चोपधातितः
कृच्छ्रार्द्धं संप्रकुर्वीत शक्त्या दद्यात्तु दक्षिणाम् ६
ब्राह्मणस्य मलद्वारे पूयशोणितसम्भवे
कृमिभुक्तव्रणे मौञ्जीहोमेन स विशुध्यति ७
यः क्षत्रियस्तथा वैश्यः शूद्रश्चाप्यनुलोमजः
ज्ञात्वा भुङ्क्ते विशेषेण चरेच्चान्द्रायणं व्रतम् ८
कुक्कुटाण्डप्रमाणन्तु ग्रासञ्च परिकल्पयेत्
अन्यथाहारदोषेण न स तत्र विशुध्यति ९
एकैकं वर्द्धयेच्छुक्ले कृष्णपक्षे च ह्रासयेत्
अमावास्यां न भुञ्जीत एष चान्द्रायणोविधिः १०
सुरान्यमद्यपानेन गोमांसभक्षणे कृते
तप्तकृच्छ्रञ्चरेद्विप्रस्यत्पापस्तु प्रणश्यति ११

प्रायश्चित्ते ह्युपक्रान्ते कर्ता यदि विपद्यते
पूतस्तदहरेवापि इहलोके परत्र च १२
यावदेकः पृथक् द्रव्यः प्रायश्चित्तेन शुध्यति
अपरास्ते न च स्पृश्यास्तेऽपि सर्वे विगर्हिताः १३
अभोज्याश्चाप्रतिग्राह्या असंपाठ्या विवाहिनः
पूयन्तेऽनुव्रते चीर्णे सर्वे ते ऋक्थभागिनः १४
ऊनैकादशवर्षस्य पञ्चवर्षात् परस्य च
प्रायश्चित्तं चरेद् भ्राता पिता वान्योऽपि बान्धवः १५
अतोबालतरस्यापि नापराधो न पातकम्
राजदण्डो न तस्यास्ति प्रायश्चित्तं न विद्यते १६
अशीतीर्यस्य वर्षाणि बालोवाप्यूनषोडशः
प्रायश्चित्तार्धमर्हन्ति स्त्रियोरोगिण एव च १७
अस्तंगतो यदा सूर्यश्चाण्डालरजकस्त्रियः
संस्पृष्टास्तु तदा कैश्चित् प्रायश्चित्तं कथं भवेत् १८
जातरूपं सुवर्णञ्च दिवानीतं च यज्जलम्
तेन स्नात्वा च पीत्वा च सर्वे ते शुचयः स्मृताः १९
दासनापितगोपालकुलमित्रार्द्धसीरिणः
एते शूद्रेषु भोज्यान्ना यश्चात्मनं निवेदयेत् २०
अन्नं शूद्रस्य भोज्यं वा ये भुञ्जन्त्यबुधा नराः
प्रायश्चित्तं तथा प्राप्तं चरेच्चान्द्रायणं व्रतम् २१
प्राप्ते द्वादशमे वर्षे यः कन्यां न प्रयच्छति
मासि मासि रजस्तस्याः पिता पिबति शोणितम् २२
माता चैव पिता चैव ज्येष्ठोभ्राता तथैव च
त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्बलाम् २३
यस्तां विवाहयेत् कन्यां ब्राह्मणो मदमोहितः
असंभाष्यो ह्यपाङ्क्तेयः स विप्रो वृषलीपतिः २४

वन्ध्या तु वृषली ज्ञेया वृषली तु मृतप्रजाः
शूद्री तु वृषली ज्ञेया कुमारी तु रजस्वला २५
यत् करोत्येकरात्रेण वृषलीसेवनाद् द्विजः
तद्भैक्षभुग् जपन्नित्यं त्रिभिर्वर्षैर्व्यपोहति २६
स्ववृषं या परित्यज्यान्यवृषेण वृहस्पतिः
वृषली सा तु विज्ञेया न शूद्री वृषली भवेत् २७
वृषलीफेनपीतस्य निःश्वासोपहतस्य च
तस्याञ्चैव प्रसूतस्य निष्कृतिर्नैव विद्यते २८
श्वित्रकुष्ठी तथा चैव कुनखी श्यावदन्तकः
रोगी हीनातिरिक्ताङ्गः पिशुनोमत्सरस्तथा २९
दुर्भगो हि तथा षण्डः पाषण्डी वेदनिन्दकः
हैतुकः शूद्रयाजी च अयाज्यानाञ्च याजकः ३०
नित्यं प्रतिग्रहे लुब्धोयाचकोविषयात्मकः
श्यावदन्तोऽथ वैद्यश्च असदालापकस्तथा ३१
एते श्राद्धे च दाने च वर्जनीयाः प्रयत्नतः ३२
ततोदेवलकश्चैव भृतकोवेदविक्रयी
एते वर्ज्याः प्रयत्नेन एतद्धास्वतिरब्रवीत् ३३
एतान्नियोजयेद्यस्तु हव्ये कव्ये च कर्मणि
निराशाः पितरस्तस्य यान्ति देवामहर्षिभिः ३४
अग्रे माहिषिकं दृष्ट्वा मध्ये तु वृषलीपतिम्
अन्ते वार्धुषिकं दृष्ट्वा निराशाः पितरोगताः ३५
महिषीत्युच्यते भार्या या चैव व्यभिचारिणी
तान् दोषान् क्षमते यस्तु स वै माहिषिकः स्मृतः ३६
समार्घन्तु समुद्धृत्य महार्घं यः प्रयच्छति
स वै वार्धुषिकोनाम ब्रह्मवादिषु गर्हितः ३७
यावदुष्णं भवत्यन्नं यावद्भुञ्जन्ति वाग्यताः

अश्नन्ति पितरस्तावद्यावन्नोक्ता हविर्गुणाः ३८
हविर्गुणा न वक्तव्याः पितरो यत्र तर्पिताः
पितृभिस्तर्पितैः पश्चाद्वक्तव्यं शोभनं हविः ३९
यावतो ग्रसते ग्रासान् हव्यकव्येषु मन्त्रवित्
तावतोग्रसते पिराडान् शरीरे ब्रह्मणः पिता ४०
उच्छिष्टोच्छिष्टसंस्पृष्टः शुना शूद्रेण वा द्विजः
उपोष्य रजमीमेकां पञ्चगव्येन शुध्यति ४१
अनुच्छिष्टेन संस्पृष्टे स्नानमात्रं विधीयते
तेनैवोच्छिष्टसंस्पृष्टः प्राजापत्यं समाचरेत् ४२
यावद्विप्रा न पूज्यन्ते सम्भोजनहिरगयकैः
तावच्चीर्णव्रतस्यापि तत्पापं न प्रणश्यति ४३
यद्वेष्टितं काकबलाकचिल्लैरमेध्यलिप्तं तु भवेच्छरीरम्
गात्रे मुखे च प्रविशेच्च सम्यक् स्नानेन लेपोपहतस्य शुद्धिः ४४
ऊर्ध्वं नाभेः करौ मुक्त्वा यदङ्गमुपहन्यते
ऊर्ध्वं स्नानमधःशौचं तन्मात्रेणैव शुध्यति ४५
अभक्ष्याणामपेयानामलेह्यानाञ्च भक्षणे
रेतोमूत्रपुरीषाणां प्रायश्चित्तं कथं भवेत् ४६
पद्मोडुम्बरविल्वाश्च कुशाश्वत्थपलाशकाः
एतेषामुदकं पीत्वा षड्रात्रेणैव शुध्यति ४७
यः प्रत्यवसितोविप्रः प्रव्रज्याग्निर्निरापदि
अनाहिताग्निर्वर्त्तेत गृहित्वञ्च चिकीर्षति ४८
आचरेत्त्रीणि कृच्छ्राणि चरेच्चान्द्रायणानि च
जातकर्मादिभिः प्रोक्तैः पुनः संस्कारमर्हति ४९
तूलिका उपधानानि पुष्पं रक्ताम्बराणि च
तूलिका उपधानानि पुष्पं रक्ताम्बराणि च
शोषयित्वा प्रतापेन प्रोक्षयित्वा शुचिर्भवेत् ५०

देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनम्
उपपत्तिमवस्थाञ्च ज्ञात्वा धर्मं समाचरेत्  ५१
रथ्याकर्द्दमतोयानि नावायस तृणानि च
मारुतार्केण शुध्यन्ति पक्वेष्टकचितानि च  ५२
आतुरे स्नानसम्प्राप्ते दशकृत्वोह्यनातुरः
स्नात्वा स्नात्वा स्पृशेत्तन्तु ततः शुध्येत आतुरः  ५३
रजकश्चर्मकारश्च नटोवुरुड एव च
कैवर्त्तमेदभिल्लाश्च सप्तैते चान्त्यजाः स्मृताः  ५४
एषां गत्वा तु योषां वै तप्तकृच्छ्रं समाचरेत्  ५५
स्त्रीणां रजस्वलानान्तु स्पृष्टास्पृष्टि यदा भवेत्
प्रायश्चित्तं कथं तासां वर्णे वर्णे विधीयते  ५६
स्पृष्ट्वा रजस्वलां यान्तु सगोत्राञ्च सभर्त्तृकाम्
कामादकामतो वापि स्नात्वा कालेन शुध्यति  ५७
स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी शूद्रजा तथा
कृच्छ्रेण शुध्यते पूर्वा शूद्रा पादेन शुध्यति  ५८
स्पृष्ट्वा रजस्वलान्योन्यं क्षत्रिया शूद्रजा तथा
पादहीनं चरेत् पूर्वा पादार्द्धन्तु तथोत्तरा  ५९
स्पृष्टा रजस्वलान्योन्यं वैश्यजा शूद्रजा तथा
कृच्छ्रपादं चरेत् पूर्वा तदर्द्धन्तु तथोत्तरा  ६०
स्पृष्टा रजस्वला चैव श्वाजजम्बूकरासभैः
तावत्तिष्ठेन्निराहारा स्नात्वा कालेन शुध्यति  ६१
स्पृष्टा रजस्वला कैश्चिच्चाण्डालैररजस्वला
प्राजापत्येन कृच्छ्रेण प्राणायामशतेन च  ६२
विप्रः स्पृष्टोनिशायाञ्च उदक्या पतितेन च
दिवानीतेन तोयेन स्नापयेच्चाग्निसन्निधौ  ६३
दिवार्क रश्मिसंस्पृष्टं रात्रौ नक्षत्ररश्मिभिः

सन्ध्योभयोश्च सन्ध्यायाः पवित्रं सर्वदा जलम् ६४
अपः करनखस्पृष्टाः पिबेदाचमने द्विजः
सुरां पिबति सुव्यक्तं यमस्य वचनं यथा ६५
खातवाप्योस्तथा कूपे पाषाणैः शस्त्रघातनैः
यष्ट्या तु घातने चैव मृत्पिण्डे गोकुलेन च ६६
रोधने बन्धने चैव स्थापिते पुष्कले तथा
काष्ठे वनस्पतौ रोधसङ्कटे रज्जुवस्त्रयोः ६७
एतत्ते कथितं सर्वं प्रमादस्थानमुत्तमम्
यत्र यत्र मृता गावः प्रायश्चित्तं समाचरेत् ६८
दारुणा घातने कृच्छ्रं पाषाणैर्द्विगुणं भवेत्
अर्द्धकृच्छ्रन्तु खाते स्यात् पादकृच्छ्रन्तु पादपे ६९
शस्त्रघाते त्रिकृच्छ्राणि यष्टिघाते द्वयं चरेत् ७०
कृच्छ्रेण वस्त्रघातेऽपि गोघ्नश्चेति विशुध्यति
योवर्त्तयति गोमध्ये नदीकान्तारमन्तिके ७१
रोमाणि प्रथमे पादे द्वितीये श्मश्रु वापयेत्
तृतीये तु शिखा धार्या चतुर्थे सशिखं वपेत् ७२
न स्त्रीणां वपनं कुर्यात् न च सा गामनुव्रजेत्
न च रात्रौ वसेद्गोष्ठे न कुर्याद् वैदिकीं श्रुतिम् ७३
सर्वान् केशान् समुद्धृत्य छेदयेदङ्गुलिद्वयम्
एवमेव तु नारीणां शिरसो वपनं स्मृतम् ७४
मृतकेन तु जातेन उभयोः सूतकं भवेत्
पातकेन तु लिप्तेन नास्य सूतकिता भवेत् ७५
चत्वारि खलु कर्माणि सन्ध्याकाले विवर्जयेत्
आहारं मैथुनं निद्रां स्वाध्यायञ्च चतुर्थकम् ७६
आहाराज्जायते व्याधिः क्रूरगर्भश्च मैथुने
निद्रा श्रियो निवर्त्तन्ते स्वाध्याये मरणं ध्रुवम् ७७

अज्ञानात्तु द्विजश्रेष्ठ वर्णानां हितकाम्यया
मया प्रोक्तमिदं शास्त्रं सावधानोऽवधारय ७८
इति यमप्रोक्तं धर्मशास्त्रं समाप्तम्

Reference:
*Smṛti Sandarbha*, Vol. II, (Delhi: Nag, 1981), pp. 2083ff.